वि. भाभा. ग्रन्थमाला—२३

ऋग्वेदः

स च

पदपाठेन च यथोपलम्भं स्कन्दस्वाम्युद्गीथीये भाष्ये, वेङ्कटमाधवीया
व्याख्या, सायणभाष्यानुसारिणी मुद्गलीया वृत्तिर् इत्येतैश्च
पाठविमर्शोपयिकैः पाठभेदादिटिप्पणैश्च संयोज्य

भीमदेवः, अमरनाथः, के. एस्. रामस्वामिशास्त्री, पीताम्बरदत्त
इत्येषां सायुज्यभाजा
विश्वबन्धुना
संपादितः

तत्र चाऽयं
सप्तमाऽष्टम–मण्डलात्मकः
५मो भागः

होशिआरपुरम्
विश्वेश्वरानन्द-वैदिकशोध-संस्थानम्
२०२१ वि.

प्रथमं संस्करणम्, २०२१ वि.

प्रकाशकृत् — विश्वेश्वरानन्द-वैदिक शोध-संस्थानम्,

साधु-आश्रमः (प. पो.), होशिआरपुरम् (पं., भारतम्)।

FIRST EDITION, 1964

Publishers :

Vishveshvaranand Vedic Research Institute,
Sadhu Ashram (P.O.), Hoshiarpur (Pb. India)

Prepared and Published under the Patronage of the Government of India in the erstwhile Ministry of Scientific Research and Cultural Affairs, the Government of Panjab, the University Grants Commission, the University of Panjab, the Dayanand Anglo-Vedic College Management, New Delhi and the Trusts and Charities of Shri Vishva Bandhu, Shri Moolchand Khairaitiram and other donors.

अथ

ऋग्वेदे सभाष्ये

सप्तमाऽष्टम-मण्डलात्मकः

पञ्चमो भागः

अथ

ऋग्वेदे सभाष्ये

सप्तमं मण्डलम्

[१]

[1]वसिष्ठो मैत्रावरुणिर्ऋषिः । अग्निर्देवता । विराट् छन्दः, एकोनविंशाद्यास्त्रिष्टुभः[1] ।

अग्निं नरो दीधितिभिररण्योर्हस्तच्युती जनयन्त प्रशस्तम् । दूरेदृशं गृहपतिमथर्युम् ॥१॥

अग्निम् । नरः । दीधितिऽभिः । अरण्योः । हस्तऽच्युती । जनयन्त । प्रऽशस्तम् ।
दूरेऽदृशम् । गृहऽपतिम् । अथर्युम् ॥ १ ॥

वेङ्कट० मैत्रावरुणिर्वसिष्ठः सप्तमं मण्डलमपश्यत्[2] । अग्निम् ऋत्विजो मनुष्याः अङ्गुलिभिः अरण्योः 'हस्तप्रच्युत्या जनयन्त प्रशस्तम् दूरेदर्शनम् गृहपतिम् अतनवन्तम्[3]' (या ५,१०) इति ॥ १ ॥

तमग्निमस्ते वसवो न्यृण्वन्त्सुप्रतिचक्षमवसे कुतश्चित् ।
दक्षाय्यो यो दम आस नित्यः ॥ २ ॥

तम् । अग्निम् । अस्ते । वसवः । नि । ऋण्वन् । सुऽप्रतिचक्षम् । अवसे । कुतः । चित् ।
दक्षाय्यः । यः । दमे । आस । नित्यः ॥ २ ॥

वेङ्कट० तम् अग्निम् गृहे वसवः देवाः हविर्वहनार्थं[4] [5]प्राक्षिपन् अत्रासयन्[5] सुदर्शनम् कुतः चित् अपि रक्षसो रक्षणाय । वर्धनीयः यः[6] गृहे भवति नित्यः ॥ २ ॥

प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ ।
त्वां शश्वन्त उप यन्ति वाजाः ॥ ३ ॥

प्रऽइद्धः । अग्ने । दीदिहि । पुरः । नः । अजस्रया । सूर्म्या । यविष्ठ ।
त्वाम् । शश्वन्तः । उप । यन्ति । वाजाः ॥ ३ ॥

वेङ्कट० प्रकर्षेणेद्धः[7] अग्ने ![8] दीप्यस्व पुरतः अस्माकम् अनवरतया सरणशीलया युवतम ! । बहूनि अन्नानि त्वाम् उप गच्छन्ति[9] ॥ ३ ॥

१-१. नास्ति मूको. २. 'मर्मण्यत' वि[१] अ[१] ल; 'मर्मण्यपश्यत' लभ. ३. मनन् मूको. ४. हविर्विहननार्थे वि[१] अ[१]; °हनार्थः ल, ५-५. 'पत्रचासयत् मूको. ६. नास्ति मूको. ७. प्रवर्धः ब; °कर्षे° लभ. ८. °ग्ने दीप्तो अ[१]. ९. गच्छति मूको.

प्र ते अग्नयोऽग्निभ्यो वरं निः सुवीरासः शोशुचन्त द्युमन्तः । यत्रा नरः समासते सुजाताः ॥४॥

प्र । ते । अग्नयः । अग्निऽभ्यः । वरम् । निः । सुऽवीरासः । शोशुचन्त । द्युऽमन्तः ।
यत्र । नरः । सम्ऽआसते । सुऽजाताः ॥ ४ ॥

वेङ्कट० प्रकर्षेण [1]'नि शोशुचन्त'[1] अन्येभ्यो लौकिकेभ्य [2]'अग्निभ्य ते अग्नय'[2] वरिष्ठ शोभनवीरा दीप्तिमन्त । यत्र ऋत्विज समासत शोभनजनना ॥ ४ ॥

दा नो अग्ने धिया रयिं सुवीरं स्वपत्यं सहस्य प्रशस्तम् ।
न यं यावा तरति यातुमावान् ॥ ५ ॥

दाः । नः । अग्ने । धिया । रयिम् । सुऽवीरम् । सुऽअपत्यम् । सहस्य । प्रऽशस्तम् ।
न । यम् । यावा । तरति । यातुऽमावान् ॥ ५ ॥

वेङ्कट० देहि अस्मभ्यम् अग्ने! कर्मणा धन शोभनवीर शोभनपुत्र हे सहनरूप[3] प्रशस्तम्, यम् रयिम् अभिगन्ता शत्रु[4] न[5] तरति हिंसावान् ॥ ५ ॥

[6]इति पञ्चमाष्टके प्रथमाध्याये त्रयोविंशो वर्ग [6] ॥

उप यमेति युवतिः सुदक्षं दोषा वस्तोर्हविष्मती घृताची । उप स्वैनमरमतिर्वसूयुः ॥६॥

उप । यम् । एति । युवतिः । सुऽदक्षम् । दोषा । वस्तोः । हविष्मती । घृताची ।
उप । स्वा । एनम् । अरमतिः । वसुऽयुः ॥ ६ ॥

वेङ्कट० उप एति यम् युवति सुबलम् रात्रिन्दिवम्[7] हविष्मती जुहू । एनम् उप गच्छतु मदीया विरामवर्जिता अर्थकामा स्तुति ॥ ६ ॥

विश्वा अग्नेऽप दहारातीर्येभिस्तपोभिरदहो जरूथम् । प्र निस्वरं चातयस्वामीवाम् ॥७॥

विश्वाः । अग्ने । अप । दह । अरातीः । येभिः । तपःऽभिः । अदहः । जरूथम् ।
प्र । निःऽस्वरम् । चातयस्व । अमीवाम् ॥ ७ ॥

वेङ्कट० सर्वा अग्ने! 'अप दह' अरातीः, यै[8] तेजोभि, [9]'अदह रक्ष'[9] । 'जरूथ'[10] गरूथं गृणाते' इति यास्क (६,१७)?। [11]'परपरुषवचनशीलम् अपि च'[11] जरयितृ । प्र चातयस्व निरानन्दम्[12] रक्ष ॥ ७ ॥

१-१. शोशुचन्त वि[1], निर्शोशुचन्त अ[1] लभ, नि शोशुचन्त छ. २-२. °न्यः नयो वि[1]. ३. °नरूप मूको; सहनरूप ए मन्ताव. ४. शत्रून् वि[1] अ[1]. ५. नास्ति वि[1]. ६-६. नास्ति मूको. ७. °दिवम् वि[1]. ८-८. अदरह वि[1] अ[1] ल, अचारह लभ. ९. यैर्य वि[1] अ[1] ल, कर्य लभ. १०-१०. ऊरो रखो नदरं वि[1]; कहो रखो जरूथं अ[1], उदः रक्ष जरूथ ए, उदः रक्ष जरूथं लभ. ११-११. परुषवचनशीलमपि वा छ लभ, परुष शीलमपि वा वि[1]; परुष च शीलमपि वा अ[1]. १२. निरानन्द अ[1].

आ यस्ते अग्न इधते अनीकं वसिष्ठ शुक्र दीदिवः पावक ।
उतो न एभिः स्तवथैरिह स्याः ॥ ८ ॥

आ । यः । ते । अग्ने । इधते । अनीकम् । वसिष्ठ । शुक्र । दीदिऽवः । पावक ।
उतो इति । नः । एभिः । स्तवथैः । इह । स्याः ॥ ८ ॥

वेङ्कट० आभिमुख्येन अग्ने! यः[1] ते तेजस्सङ्घातम्[2] इन्धे, श्रेष्ठ![3] ज्वलन्! दीप्त! शोधक![4] तस्य[5] ममापि च एभिः स्तोत्रैः इह भव ॥ ८ ॥

वि ये ते अग्ने भेजिरे अनीकं मर्ता नरः पित्र्यासः पुरुत्रा ।
उतो न एभिः सुमना इह स्याः ॥ ९ ॥

वि । ये । ते । अग्ने । भेजिरे । अनीकम् । मर्ताः । नरः । पित्र्यासः । पुरुऽत्रा ।
उतो इति । नः । एभिः । सुऽमनाः । इह । स्याः ॥ ९ ॥

वेङ्कट० वि भेजिरे ये तव अग्ने![6] रश्मिसङ्घं[7] समिन्धनेन मनुष्याः[8] नेतारः[9] पितृहिताः बहुषु देशेषु । अपि च तेषाम् अस्माकम् एभिः[10] स्तोत्रैः इह सुमनाः भव ॥ ९ ॥

इमे नरो वृत्रहत्येषु शूरा विश्वा अदेवीरभि सन्तु मायाः ।
ये मे धियं पनयन्त प्रशस्ताम् ॥ १० ॥

इमे । नरः । वृत्रऽहत्येषु । शूराः । विश्वाः । अदेवीः । अभि । सन्तु । मायाः ।
ये । मे । धियम् । पनयन्त । प्रऽशस्ताम् ॥ १० ॥

वेङ्कट० इमे नरः अस्मदीयाः सङ्ग्रामेषु शूराः विश्वाः [11]आसुरीः मायाः[11] अभि भवन्तु, ये मे कर्म प्रशस्तम् स्तुवन्ति ॥ १० ॥

[12]इति पञ्चमाष्टके प्रथमाध्याये चतुर्विंशो वर्गः[12] ॥

मा शूने अग्ने नि षदाम नृणां माशेषसोऽवीरता परि त्वा ।
प्रजावतीषु दुर्यासु दुर्य ॥ ११ ॥

मा । शूने । अग्ने । नि । सदाम । नृणाम् । मा । अशेषसः । अवीरता । परि । त्वा ।
प्रजाऽवतीषु । दुर्यासु । दुर्य ॥ ११ ॥

वेङ्कट० मा[13] नृणाम् केवलत्वाय अग्ने! त्वाम् परि [14]नि सीदाम[14] । त्वाम् परिनिषीदन्तः अशिवाद्

१. यद् अ'. २. °तः वि'. ३. श्रेष्ठं वि' अ'. ४. मोचक वि'; शोधक अ' ह लभ. ५. तमस्य अ'. ६. अग्ने वि' अ'; अग्ने ह लभ. ७. °सङ्घं अ'. ८. नास्ति वि' अ'. ९. °ता मूको. १०. एहि मूको. ११-११. आसुरीं मायाम् मूको. १२-१२. नास्ति मूको १३. मा मूको १४-१४. निषदा° वि'; निषदाम ह लभ.

भर्तुं शक्नुमः[1]। मा च अनपत्यस्य धनस्य मा चावीरयुक्तस्य धनस्य लाभाय प्रजायुक्तेषु गृहेषु भवेम गृहपते![2] ॥ ११ ॥

यमश्वी नित्यमुपयाति यज्ञं प्रजावन्तं स्वपत्यं क्षयं नः ।
स्वजन्मना शेषसा वावृधानम् ॥ १२ ॥

यम् । अश्वी । नित्यम् । उपऽयाति । यज्ञम् । प्रजाऽवन्तम् । सुऽअपत्यम् । क्षयम् । नः ।
स्वऽजन्मना । शेषसा । ववृधानम् ॥ १२ ॥

वेङ्कट० यम्[1] यज्ञम् अश्ववान् अग्निः[3] नित्यम् उपगच्छति, स यज्ञः प्रजायुक्तम् शोभनापत्यम् च गृहम् अस्मभ्यं प्रयच्छतु औरसेन पुत्रेण वर्धमानम्[4] ॥ १२ ॥

पाहि नो अग्ने रक्षसो अजुष्टात् पाहि धूर्तेरररुषो अघायोः ।
त्वा युजा पृतनायूँरभि ष्याम् ॥ १३ ॥

पाहि । नः । अग्ने । रक्षसः । अजुष्टात् । पाहि । धूर्तेः । अररुषः । अघऽयोः ।
त्वा । युजा । पृतनाऽयून् । अभि । स्याम् ॥ १३ ॥

वेङ्कट० पाहि[1] अस्मान् अग्ने! रक्षसः अप्रियात्। पाहि हिंसितुः अदातुः अघमिच्छतः। त्वया सहायेन युद्धकामान् अहम् अभि भवेयम् ॥ १३ ॥

सेदग्निरग्नीँरत्यस्त्वन्यान् यत्र वाजी तनयो वीळुपाणिः । सहस्रपाथा अक्षरा समेति ।१४।

सः । इत् । अग्निः । अग्नीन् । अति । अस्तु । अन्यान् । यत्र । वाजी । तनयः । वीळुऽपाणिः ।
सहस्रऽपाथाः । अक्षरा । सम्ऽएति ॥ १४ ॥

वेङ्कट० सः एव अग्निः अन्यान् परकीयान् अग्नीन् अभिभवतु, यस्मिन् हविष्मान् मम पुत्रः[7] दृढहस्त[8] बहुरक्षणः स्तोत्राणि समेति ॥ १४ ॥

सेदग्निर्यो वनुष्यतो निपाति समेद्धारमंहस उरुष्यात् ।
सुजातासः परि चरन्ति वीराः ॥ १५ ॥

सः । इत् । अग्निः । यः । वनुष्यतः । निऽपाति । सम्ऽएद्धारम् । अंहसः । उरुष्यात् ।
सुऽजातासः । परि । चरन्ति । वीराः ॥ १५ ॥

वेङ्कट० सः एव अग्निः यः हन्तुः परिरक्षति, यश्च समेद्धारम् अंहसः रक्षति। शोभनजननाः तमिमम् परि चरन्ति पुत्राः ॥ १५ ॥

[9]इति पञ्चमाष्टके प्रथमाध्याये पञ्चविंशो वर्गः[9] ॥

---

१. शक्नुमः मूको. २. °पतयः वि॰ अ॰ लः भव...त लभ. ३. नास्ति वि॰. ४. अग्नि मूको. ५. °मानः मूको. ६. नास्ति वि॰ अ॰. ७. °त्रो मूको. ८. °स्तौ वि॰ अ॰. ९-९. नास्ति मूको.

अयं सो अग्निराहुतः पुरुत्रा यमीशानः समिदिन्धे हविष्मान् ।
परि यमेत्यध्वरेषु होता ॥ १६ ॥

अयम् । सः । अग्निः । आऽहुतः । पुरुऽत्रा । यम् । ईशानः । सम् । इत् । इन्धे । हविष्मान् ।
परि । यम् । एति । अध्वरेषु । होता ॥ १६ ॥

वेङ्कट० अयम् सः अग्निः आहुतः बहुषु देशेषु, यम् ईश्वरः हविष्मान् सम् इत् इन्धे । परि एति यम्[1] यज्ञेषु होता ॥ १६ ॥

त्वे अग्न आहवनानि भूरीशानास आ जुहुयाम नित्या ।
उभा कृण्वन्तो वहतू मियेधे ॥ १७ ॥

त्वे इति । अग्ने । आऽहवनानि । भूरि । ईशानासः । आ । जुहुयाम । नित्या ।
उभा । कृण्वन्तः । वहतू इति । मियेधे ॥ १७ ॥

वेङ्कट० त्वयि अग्ने! हवींषि भूरीणि ईश्वराः[2] आ जुहुयाम नित्यानि उभौ वहतू[3] स्तोत्रं शस्त्रं च कृण्वन्तः अपि यज्ञे ॥ १७ ॥

इमो अग्ने वीततमानि हव्याजस्रो वक्षि देवतातिमच्छ ।
प्रति न ईं सुरभीणि व्यन्तु ॥ १८ ॥

इमो इति । अग्ने । वीतऽतमानि । हव्या । अजस्रः । वक्षि । देवऽतातिम् । अच्छ ।
प्रति । नः । ईम् । सुरभीणि । व्यन्तु ॥ १८ ॥

वेङ्कट० इमान्येव अग्ने! कान्ततमानि हवींषि अनवरतः वह देवसङ्घम् अभि । प्रति भक्षयन्ति अस्माकम् इमानि सुरभीणि हवींषि देवाः ॥ १८ ॥

मा नो अग्नेऽवीरते परा दा दुर्वाससेऽमतये मा नो अस्यै ।
मा नः क्षुधे मा रक्षस ऋतावो मा नो दमे मा वन आ जुहूर्थाः ॥ १९ ॥

मा । नः । अग्ने । अवीरते । परा । दाः । दुःऽवाससे । अमतये । मा । नः । अस्यै ।
मा । नः । क्षुधे । मा । रक्षसे । ऋतऽवः । मा । नः । दमे । मा । वने । आ । जुहूर्थाः ॥१९॥

वेङ्कट० मा अस्मान् अग्ने! अपुत्रत्वाय परा दाः, मा[4] च अशोभनवस्त्राय अमतये अस्यै[5], मा च अस्मान् क्षुधे, मा च रक्षसे यज्ञवन्! । मा हिंसीः च अस्मान् [6]गृहे, मा च वने[6] ॥ १९ ॥

---

१. नास्ति वि[१]. २. भराणि वि[१] ल हुभ; नभराणि अ[१]; ईश्वराणि ल प्रस्तावः. ३. वहतु वि[१] अ[१].
४. म मूको. ५. मस्यै मूको. ६-६. गृणिमांनवचनः वि[१]; गृणमाणवचनो अ[१]; मेहे मान वनो ल; मेहे मा च वचनः हुभ.

नू मे ब्रह्माण्यग्न उच्छशाधि त्वं देव मघवद्भ्यः सुषूदः ।
रातौ स्यामोभयास आ ते यूयं पात स्वस्तिभिः सदा नः ॥ २० ॥

नु । मे । ब्रह्माणि । अग्ने । उत् । शशाधि । त्वम् । देव । मघवत्ऽभ्यः । सुसूदः ।
रातौ । स्याम । उभयासः । आ । ते । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ २० ॥

वेङ्कट० क्षिप्रं मह्यम् अन्नानि त्वम् अग्ने! उत् शशाधि गृहाणेति ब्रूहि । त्वम्[1] हे देव! हविष्मद्भ्योऽन्नानि क्षरसि[2] । वयं तव दाने स्याम[3] उभयासः[4] हविष्मन्तः स्तुतिमन्तश्च । यूयम् पात अविनाशैः[5] 'सर्वदा अस्मान्[6]' इति, अग्निः अनुचराश्चेति ॥ २० ॥

[7]इति पञ्चमाष्टके प्रथमाध्याये षड्विंशो वर्गः[8] ॥

त्वमग्ने सुहवो रण्वसंदृक् सुदीती सूनो सहसो दिदीहि ।
मा त्वे सचा तनये नित्य आ धङ्मा वीरो अस्मन्नर्यो वि दासीत् ॥ २१ ॥

त्वम् । अग्ने । सुऽहवः । रण्वऽसंदृक् । सुऽदीती । सूनो इति । सहसः । दिदीहि ।
मा । त्वे इति । सचा । तनये । नित्ये । आ । धक् । मा । वीरः । अस्मत् । नर्यः । वि । दासीत् ॥ २१ ॥

वेङ्कट० त्वम् अग्ने! स्वाह्वः रमणीयसन्दर्शनः शोभनदीप्त्या[8] हे सहसः पुत्र![9] दीप्यस्व[10] । मा त्वयि वर्तमानो रश्मिः औरसे पुत्रे आदहनं करोतु । मा वीरः नृभ्यो हितः अस्मत्तः अपक्षयं यातु ॥ २१ ॥

मा नो अग्ने दुर्भृतये सचैषु देवेद्धेष्वग्निषु प्र वोचः ।
मा ते अस्मान् दुर्मतयो भृमाच्चिद् देवस्य सूनो सहसो नशन्त ॥ २२ ॥

मा । नः । अग्ने । दुःऽभृतये । सचा । एषु । देवऽइद्धेषु । अग्निषु । प्र । वोचः ।
मा । ते । अस्मान् । दुःऽमतयः । भृमात् । चित् । देवस्य । सूनो इति । सहसः । नशन्त ॥ २२ ॥

वेङ्कट० मा अस्मान् अग्ने! सहायभूतः त्वम् एषु अग्निषु अशोभनभरणाय प्र वोचः देवैरिद्धेषु । मा तव अस्मान् दुर्मतयः[11] भ्रमणशीलस्वभावाः देवस्य हे सहसः सूनो! व्याप्नुवन्तु[12] ॥ २२ ॥

स मर्तो अग्ने स्वनीक रेवानमर्त्ये य आजुहोति हव्यम् ।
स देवता वसुवनिं दधाति यं सूरिरर्थी पृच्छमान एति ॥ २३ ॥

सः । मर्तः । अग्ने । सुऽअनीक । रेवान् । अमर्त्ये । यः । आऽजुहोति । हव्यम् ।
सः । देवता । वसुऽवनिम् । दधाति । यम् । सूरिः । अर्थी । पृच्छमानः । एति ॥ २३ ॥

---

१ त्वा मूको; था स्र मस्ताथः. २. क्षाति मूको. ३. स्योमो मूको. ४. उभय वि° अ°; उभया अ स्र°. ५. अविनाशः मूको. ६-६. सदम अस्मा° स्र स्र°; सर्वस्मात् वि° अ°. ७-७. नास्ति मूको. ८. °भनया दी° अ°; °भनादी° स्र°. ९. पुत्र मूको. १०. वीरः मूको. ११. °यः भ्रमणशीला अ° वि°. १२. °प्नुवन्तः वि° अ° स्र; °प्नुवन्तः स्र°.

वेङ्कट० सः मनुष्यः अग्ने ! शोभनज्वालानीक[1] धनवान्[2] भवति, अमर्त्ये त्वयि यः[3] आजुहोति हविः । स देववतां धनदानं[4] धारयति, यम् विद्वान् धनदानार्थी[5] पृच्छन् एति उदारम् ॥ २३ ॥

म॒हो नो॑ अग्ने सुवि॒तस्य॑ वि॒द्वान् र॒यिं सू॒रिभ्य॒ आ व॑हा बृ॒हन्त॑म् ।
येन॑ व॒यं स॑हसाव॒न् मदे॒मावि॑क्षितास॒ आयु॑षा सु॒वीराः॑ ॥ २४ ॥

म॒हः । न॒ । अ॒ग्ने॒ । सु॒वि॒तस्य॑ । वि॒द्वान् । र॒यिम् । सू॒रिऽभ्यः॑ । आ । व॒ह॒ । बृ॒हन्त॑म् ।
येन॑ । व॒यम् । स॒ह॒सा॒ऽव॒न् । मदे॑म । अवि॑ऽक्षितासः । आयु॑षा । सु॒ऽवीराः॑ ॥ २४ ॥

वेङ्कट० महान्तम् अस्मभ्यम् अग्ने ! [6]अभ्युदयं जानन्[6] धनं स्तोतृभ्यः [7]आ वह महत्, येन[7] वयम् धनेन बलवन्![8] माद्येम अक्षीणाः[8] आयुषा शोभनवीराः ॥ २४ ॥

नू मे॒ ब्रह्मा॑ण्यग्न॒ उच्छ॑शाधि॒ त्वं दे॑व म॒घव॑द्भ्यः सुषूदः ।
रा॒तौ स्या॑मो॒भया॑स॒ आ ते॑ यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥ २५ ॥

नु । मे॒ । ब्रह्मा॑णि । अ॒ग्ने॒ । उत् । श॒शा॒धि॒ । त्वम् । दे॒व॒ । म॒घव॑त्ऽभ्यः । सु॒सू॒द॒ ।
रा॒तौ । स्या॒म॒ । उ॒भया॑सः । आ । ते॒ । यू॒यम् । पा॒त॒ । स्व॒स्तिऽभिः॑ । सदा॑ । नः॒ ॥ २५ ॥

वेङ्कट० सेयम् एकस्मिन्नपि सूक्ते [9]द्विः पठिता[9] विराट् । द्विः[10] अग्निं स्तुत्वा सकृदुपसंहृत्य [11]पुनरप्यन्यैश्च नौति[11] स्तुत्वोपसंहार इति ॥ २५ ॥

[12]इति पञ्चमाष्टके प्रथमाध्याये सप्तविंशो वर्गः[12] ॥

कुशिकानां कुले जातो माधवः सुन्दरीसुतः ।
पञ्चमस्याष्टकस्याऽऽद्यम् अध्यायं व्याकरोदिति ॥

इति वेङ्कटमाधवाचार्यविरचिते ऋक्संहिताव्याख्याने पञ्चमाष्टके प्रथमोऽध्यायः ॥

—*—

इति ऋग्वेदे सभाष्ये पञ्चमाष्टके प्रथमोऽध्यायः ॥

---

१. °लानिक मूको. २. धनवान् मूको. ३. वा वि[1] अ[1] ल, व लभ. ४. दान भनस्य अ[1] ५. धनार्थी अ[1]. ६-६. दयजातम् वि[2], °दयजान अ[1]. ७-७. °यहं अहयेन वि[1]. ८. अक्षिणा मूको. ९-९. द्विपठिता वि[3] ल लभ. १०. द्वि अ[1]. ११-११. न्यैस्तनोति अ[1], °न्वेश्च नोति वि[1] र, °न्यैरुन्नोति लभ. १२-१२. नास्ति मूको.

अथ द्वितीयोऽध्यायः।

वेङ्कट०

अथाध्यायं[1] [2]'जुषस्व नः'[2] व्याचिख्यासति माधवः।
गोत्रेष्वृषीणां वक्तव्यम् आदावेव प्रदर्शयन् ॥ १ ॥

पित्रादिषु प्रसिद्धेन येन नाम विशेष्यते।
वेदेष्वृषीणां तद्गोत्रं ज्ञातव्यं तत्र[3] वैदिकैः ॥ २ ॥

जेतुः पिता मधुच्छन्दाः श्यावाश्वस्य पितामहः।
पितामहो गौरिवीतेः गोत्रत्वेन प्रदर्शितः ॥ ३ ॥

अपालाऽत्रिकुले जाता विश्ववारा च तादृशी।
दूरस्थोऽत्रिस्तयोर्गोत्रं बहवः सन्ति तादृशाः ॥ ४ ॥

पितरौ मित्रावरुणौ वसिष्ठस्येत्यपि[4] श्रुतम्।
'उतासि मैत्रावरुणः'[5] प्रवरेषु पुनस्तयोः ॥ ५ ॥

पुत्रस्थाने [6]समावेशाद् वसिष्ठो मैत्रावरुणिः[6]।
तत्राहुः कारणं प्राज्ञा "विदेहो हि शशाप" तम् ॥ ६ ॥

ऋषे! भव विदेहस्त्वम् ऋषिः शप्तः समाविशत्।
अहोरात्रे योगबलात् तौ मित्रावरुणौ स्मृतौ ॥ ७ ॥

तयोर्मन्त्रांश्च तदा पुत्रश्चाभूत् पुनस्तयोः।
क्रमेणार्षेयवरणम् उपपन्नं तयोरिति ॥ ८ ॥

विश्वामित्रजमदग्नी [8]तथा वसिष्ठ एव च[8]।
इन्द्रो अगस्त्यो मरुतो गोत्रम् एषु[9] प्रदृश्यते ॥ ९ ॥

यद्यप्यृषीणां सहानां ब्राह्मणेषु [10]न दृश्यते[10]।
गोत्रं तथापि विज्ञेयम् ऋक्षु गोत्रनिदर्शनाद्[11] ॥ १० ॥

असगोत्रो भवेच्छूद्रे सगोत्रात् तन्तुमाहरेत्।
न प्रयच्छेद् दुहितरं सगोत्रायेति च स्मृतिः ॥ ११ ॥

---

1. श्रीः मधा° वि[1]. २-२. °सेति अ[1] वेंकम. ३. तन वि[1] अ[1]. ४. वसिष्ठस्यापि वेंकम. ५. ऋ ७,३३,११. ६-६. °वेशो वासिष्ठ मैत्रावरुणा वि[1] अ[1]; °वेशो वासिष्ठ मैत्रावरुण एम. ७-७. °होऽभिरा° वेंकम. ८-८. वद् वासिष्ठेन वा वि[1] अ[1]. ९. नेषु वि[1] ह; नेषु एम; एषु अ[1]. १०-१०. दृश्यते ह; दृश्यते वि[1] अ[1]. ११. °निदर्शनात् वि[1] ह एम.

किमेतेषु मनुष्याणां गोत्रमित्यभिधीयते ।
वक्तव्यं छान्दसैर्नैतद् धर्मशास्त्रपरैरिव[1] ॥ ११ ॥

कौतूहलनिवृत्त्यर्थम् अथ चास्माभिरुच्यते ।
गोत्राणां तु सहस्राणि प्रयुतान्यर्बुदानि[2] च ॥ १३ ॥

[3]कुलाख्यानि हि तानीह[3] तानि गोत्राणि सन्तु न ।
ननु[4] स्मरन्ति नैतानि[5] सम्प्रति ब्राह्मणा इमे ॥ १४ ॥

तर्हि गोत्रसहस्राणि प्रयुतान्यर्बुदानि च ।
पठ्यन्ते[6] सङ्गृहीतानि कृतबोधायनादिभि[7] ॥ १५ ॥

स्मरन्ति तानि चित्तेषु सम्प्रतित्वेन मानवाः ।
मार्कण्डेयोऽस्मि माण्डूकस्तथा माण्डव्य इत्यपि ॥ १६ ॥

प्रदर्शयन् बहून् पक्षान् न कथञ्चिदपीच्छति ।
[8]इतरेतरसम्बन्ध तदध्यायमिति ब्रुवन्[8] ॥ १७ ॥

यदि ह्येतानि गोत्राणि मार्कण्डेय समुद्वहेत् ।
माण्डूकस्य दुहितरम् असगोत्राऽस्य[9] सा यतः ॥ १८ ॥

तस्माद्वत्सादिकं गोत्रम् इति माधवदर्शनम् ।
आपस्तम्बश्च तानेव वेदद्दष्टानदर्शयत्[10] ॥ १९ ॥

[२]

[11]वसिष्ठो मैत्रावरुणिर्ऋषिः । आप्रीसूक्तम्=(आद्याया इध्मः समिद्धोऽग्निर्वा देवता, द्वितीयस्या नराशंसः, तृतीयस्या इळः चतुर्थ्या बर्हिः, पञ्चम्या देवीर्द्वारः, षष्ठ्या उषासानक्ता, सप्तम्या दैव्यौ होतारौ प्रचेतसौ अष्टम्यास्तिस्रो देव्यः सरस्वतीळाभारत्यः, नवम्यास्त्वष्टा, दशम्या वनस्पतिः, एकादश्याः स्वाहाकृतयः)। त्रिष्टुप् छन्दः[11] ।

जुषस्व नः सुमिधमग्ने अद्य शोचा बृहद् यजतं धूममृण्वन् ।
उप स्पृश दिव्यं सानु स्तूपैः सं रश्मिभिस्ततनः सूर्यस्य ॥ १ ॥

---

१ छान्दसैनैत° वि[1] ल २ प्रयुतन्य° वि[1] ल ३ ३ °रणाभिनाः° वत्रअ ४ न तु वैंकअ
५ चैतानि वैंकअ ६ नास्ति अ[1] ७ कबोधोदयनादिभि वि[1] अ[2] कम्बो धोय° लभ ८ ८ नास्ति मूको
९ °त्रा हि अ[1], वैंकअ १० देवद्द° वि[1] अ[1] ल, देवदृष्ट न दर्शयत् लभ ११ ११ नास्ति मूको.

जुषस्व । नः । समऽइधम् । अग्ने । अद्य । शोच । बृहत् । यजतम् । धूमम् । ऋण्वन् ।
उप । स्पृश । दिव्यम् । सानु । स्तूपैः । सम् । रश्मिऽभिः । ततनः । सूर्यस्य ॥ १ ॥

वेङ्कट० वसिष्ठः । सेवस्व[1] नः समिधम् अग्ने अद्य । प्रज्वल च बृहन्तम् यष्टव्यम् धूमम् उद्गमयन् । उप स्पृश च दिवि भवम् समुच्छ्रितम् आदित्य तेजस्सङ्घातैः । सम् गच्छस्व सूर्यस्य रश्मिभिः इति ॥ १ ॥

नराशंसस्य महिमानमेषामुप स्तोषाम यजतस्य यज्ञैः ।
ये सुक्रतवः शुचयो धियंधाः स्वदन्ति देवा उभयानि हव्या ॥ २ ॥[2]

नराशंसस्य । महिमानम् । एषाम् । उप । स्तोषाम । यजतस्य । यज्ञैः ।
ये । सुऽक्रतवः । शुचयः । धियम्ऽधाः । स्वदन्ति । देवाः । उभयानि । हव्या ॥ २ ॥

वेङ्कट० नराशंसस्य महिमानम् एषाम् [3]यजमानानामर्थाय वयम्[3] उप स्तुमः यष्टव्यस्य यज्ञैः । ये सुयज्ञाः[4] शुचयः कर्मणां धारयितारः यजमानाः, तेषाम् उभयानि पाशुकानि सौमिकानि[5] च हवींषि स्वदन्ति देवताः । [6]नाराशंसः पूजयामास सदैव यज्ञार्थम्[6] ॥ २ ॥

ईळेन्यं वो असुरं सुदक्षमन्तर्दूतं रोदसी सत्यवाचम् ।
मनुष्वदग्निं मनुना समिद्धं समध्वराय सदमिन्महेम ॥ ३ ॥

ईळेन्यम् । वः । असुरम् । सुऽदक्षम् । अन्तः । दूतम् । रोदसी इति । सत्यऽवाचम् ।
मनुष्वत् । अग्निम् । मनुना । समऽइद्धम् । सम् । अध्वराय । सदम् । इत् । महेम ॥ ३ ॥

वेङ्कट० . ... ॥ ३ ॥

सपर्यवो भरमाणा अभिज्ञु प्र वृञ्जते नमसा बर्हिरग्नौ ।
आजुह्वाना घृतपृष्ठं पृषद्वदध्वर्यवो हविषा मर्जयध्वम् ॥ ४ ॥

सपर्यवः । भरमाणाः । अभिऽज्ञु । प्र । वृञ्जते । नमसा । बर्हिः । अग्नौ ।
आऽजुह्वानाः । घृतऽपृष्ठम् । पृषत्ऽवत् । अध्वर्यवः । हविषा । मर्जयध्वम् ॥ ४ ॥

वेङ्कट० परिचरणमिच्छन्तः अरण्यात् आहरन्तः अभिगतजानुकम्[7] प्र हरन्ति हविषा सह बर्हिः अग्नौ । अभिमुखम् जुह्वानाः घृतपृष्ठम् नानावर्णं बर्हिः, हे अध्वर्यवः । अग्निम्[8] हविषा परिचरत[9] ॥ ४ ॥

स्वाध्यो३ वि दुरो देवयन्तोऽशिश्रयू रथयुर्देवताता ।
पूर्वी शिशुं न मातरा रिहाणे समग्रुवो न समनेष्वञ्जन् ॥ ५ ॥

---

१. °सिष्ठ वि' अ' म, °सिष्ठे छम, जुषस्व वि' ल छम. २. यास्केन (८,६) व्याख्याता. ३-३. °र्थोवदाम् मूको. ४. °प्रज्ञा मूको. ५. सौम्यानि वि'. ६-६. नास्ति वि' अ'. ७. अदिगत° मूको. ८. अ°ग्नः वि' अ'; अग्नि म छम. ९. °रत. मूको.

सुऽआध्यः । वि । दुरः । देवऽयन्तः । अशिश्रयुः । रथऽयुः । देवऽताता ।
पूर्वी इति । शिशुम् । न । मातरा । रिहाणे इति । सम् । अग्रुवः । न । समनेषु । अञ्जन् ॥५॥

वेङ्कट० सुकर्माणः[१] देवानिच्छन्तः वि अशिश्रयुः यज्ञद्वाराणि विवृतानि कुर्वन्ति सङ्ग्रामञ्जिगमिषया रथमिच्छन्तः । जसि पूर्वरूपम् । यज्ञे । अथ विवृतेषु द्वारेषु पूर्वैः 'प्राचीनैर्जुहूपभृतौ अग्निम्' वत्सम् इव मातरौ जिह्वया लिहाने भवतः । यमग्निम् उपस्थितेषु सङ्ग्रामेषु जिगमिषवो घृतेन[२] सम् अञ्जन्ति, यथा नद्यो जलेन क्षेत्राण्यञ्जन्तीति ॥ ५ ॥

[२]इति पञ्चमाष्टके द्वितीयाध्याये प्रथमो वर्गः[२] ॥

उत योषणे दिव्ये मही न उषासानक्ता सुदुघेव धेनुः ।
बर्हिषदा पुरुहूते मघोनी आ यज्ञिये सुविताय श्रयेताम् ॥ ६ ॥

उत । योषणे इति । दिव्ये इति । मही इति । नः । उषसानक्ता । सुदुघाऽइव । धेनुः ।
बर्हिऽसदा । पुरुहूते इति पुरुऽहूते । मघोनी इति । आ । यज्ञिये इति । सुविताय । श्रयेताम् ॥६॥

वेङ्कट० अपि स्त्रियौ[३] दिवि भवे उषासानक्ते महत्त्वाद् अस्मान् आ श्रयेताम्, यथा सुदुघा धेनुः आश्रयत्येवम्, बर्हिषि सीदन्त्यौ बहुभिराहूते धनवत्यौ यज्ञार्हे अभ्युदयार्थमिति ॥ ६ ॥

विप्रा यज्ञेषु मानुषेषु कारू मन्ये वां जातवेदसा यजध्यै ।
ऊर्ध्वं नो अध्वरं कृतं हवेषु ता देवेषु वनथो वार्याणि ॥ ७ ॥

विप्रा । यज्ञेषु । मानुषेषु । कारू इति । मन्ये । वाम् । जातऽवेदसा । यजध्यै ।
ऊर्ध्वम् । नः । अध्वरम् । कृतम् । हवेषु । ता । देवेषु । वनथः । वार्याणि ॥ ७ ॥

वेङ्कट० मेधाविनौ यज्ञेषु मनुष्यकृतेषु कर्मशीलौ मन्ये वाम्[४] जातप्रज्ञौ[५] यष्टव्यौ[६] । तौ युवाम् ऊर्ध्वम् अस्माकं यज्ञं कुरुतम् । आह्वानेषु तौ युवां यजमानानाम् देवेषु भजथः धनानि ॥ ७ ॥

आ भारती भारतीभिः सजोषा इळा देवैर्मनुष्येभिरग्निः ।
सरस्वती सारस्वतेभिरर्वाक् तिस्रो देवीर्बर्हिरेदं सदन्तु ॥ ८ ॥

आ । भारती । भारतीभिः । सऽजोषाः । इळा । देवैः । मनुष्येभिः । अग्निः ।
सरस्वती । सारस्वतेभिः । अर्वाक् । तिस्रः । देवीः । बर्हिः । आ । इदम् । सदन्तु ॥ ८ ॥

वेङ्कट० एषा व्याख्याता (ऋ ३,४,८) ॥ ८ ॥

---

१. स्वक° मूको. २-२. °पञ्चमाष्टके वि[१] अ[१], °पञ्चमाष्टके अ[१]. ३. घृतं मूको. ४. नास्ति मूको. ५. चरन्त्यौ वि[१], चरतौ अ[१]; तौ लभ. ६. वा मूको. ७. प्रज्ञौ वि[१] ल लभ. ८. यजिष्यौ वि[१] अ[१]; यष्टव्यौ लभ. ९. नास्ति वि[२] अ[१].

तन्नस्तुरीपमध पोषयित्नु देव त्वष्टर्वि रराणः स्यस्व ।
यतो वीरः कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः ॥ ९ ॥

तत् । नः । तुरीपम् । अध । पोषयित्नु । देव । त्वष्टः । वि । रराणः । स्यस्वेति स्यस्व ।
यतः । वीरः । कर्मण्यः । सुऽदक्षः । युक्तऽग्रावा । जायते । देवऽकामः ॥ ९ ॥

वेङ्कट० एषा व्याख्याता (ऋ ३,४,९) ॥ ९ ॥

वनस्पतेऽव सृजोप देवानग्निर्हविः शमिता सूदयाति ।
सेदु होता सत्यतरो यजाति यथा देवानां जनिमानि वेद ॥ १० ॥

वनस्पते । अव । सृज । उप । देवान् । अग्निः । हविः । शमिता । सूदयाति ।
सः । इत् । ऊँ इति । होता । सत्यऽतरः । यजाति । यथा । देवानाम् । जनिमानि । वेद ॥ १० ॥

वेङ्कट० एषा व्याख्याता (३,४,१०) ॥ १० ॥

आ याह्यग्ने समिधानो अर्वाङिन्द्रेण देवैः सरथं तुरेभिः ।
बर्हिर्न आस्तामदितिः सुपुत्रा स्वाहा देवा अमृता मादयन्ताम् ॥ ११ ॥

आ । याहि । अग्ने । सम्ऽइधानः । अर्वाङ् । इन्द्रेण । देवैः । सऽरथम् । तुरेभिः ।
बर्हिः । नः । आस्ताम् । अदितिः । सुऽपुत्रा । स्वाहा । देवाः । अमृताः । मादयन्ताम् ॥ ११ ॥

वेङ्कट० एषा व्याख्याता (३,४,११) ॥ ११ ॥

[1]इति पञ्चमाष्टके द्वितीयाध्याये द्वितीयो वर्गः[1] ॥

[३]

[1]वसिष्ठो मैत्रावरुणिर्ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः[1] ।

अग्निं वो देवमग्निभिः सजोषा यजिष्ठं दूतमध्वरे कृणुध्वम् ।
यो मर्त्येषु निध्रुविर्ऋतावा तपुर्मूर्धा घृतान्नः पावकः ॥ १ ॥

अग्निम् । वः । देवम् । अग्निऽभिः । सऽजोषाः । यजिष्ठम् । दूतम् । अध्वरे । कृणुध्वम् ।
यः । मर्त्येषु । निऽध्रुविः । ऋतऽवा । तपुःऽमूर्धा । घृतऽअन्नः । पावकः ॥ १ ॥

वेङ्कट० अग्निम् यूयम् देवम् अन्यैः अग्निभिः [2]सहितम् यष्टृतमम्[2] दूतम् यज्ञे कुरुत, यः मनुष्येषु दृढोऽपि सन् अभिमुखो ध्रुवस्तिष्ठति यज्ञवान्[3] तापयितृशिरस्कः[4] घृतान्नः शोधकः ॥ १ ॥

१-१. नास्ति मूको. २-२. °त यष्टव्यम् भ°. ३. यज्ञवान् वि° भ°. ४. °यितृशिरा मूको.

प्रोथदश्वो न यवसेऽविष्यन् यदा महः संवरणाद् व्यस्थात् ।
आदस्य वातो अनु वाति शोचिरध स्म ते व्रजनं कृष्णमस्ति ॥ २ ॥

प्रोथत् । अश्वः । न । यवसे । अविष्यन् । यदा । महः । सम्ऽवरणात् । वि । अस्थात् ।
आत् । अस्य । वातः । अनु । वाति । शोचिः । अध । स्म । ते । व्रजनम् । कृष्णम् । अस्ति ॥

वेङ्कट० प्रोथति शब्दकर्मा । शब्दं कुर्वन् अश्व इव अमतः स्थिते यवसे भक्षणं करिष्यन् अयमग्निः अरण्यमत्तुम् यदा महतः संवरणात् अन्योन्यसङ्घटितात्[1] शुष्कात् [2]काष्ठसङ्घातात् वि अस्थात्, अनन्तरमेव[3] अस्य शोचिः वातः अनु वाति । अथ [4]प्रत्यक्षः । अनन्तरं[5] तव मार्गः कृष्णो भवति ॥ २ ॥

उद् यस्य ते नवजातस्य वृष्णोऽग्ने चरन्त्यजरा इधानाः ।
अच्छा द्यामरुषो धूम एति सं दूतो अग्न ईयसे हि देवान् ॥ ३ ॥

उत् । यस्य । ते । नवऽजातस्य । वृष्णः । अग्ने । चरन्ति । अजराः । इधानाः ।
अच्छ । द्याम् । अरुषः । धूमः । एति । सम् । दूतः । अग्ने । ईयसे । हि । देवान् ॥ ३ ॥

वेङ्कट० उत् चरन्ति यस्य ते नवजननस्य वर्षितुः अग्ने! जरारहिता दीप्यमाना रश्मयः, तस्य तदानीं दिवं प्रति[6] आरोचमानः धूमः एति । त्वं हि देवानां दूतः सन् अग्ने! दिवि स्थितान् सम् ईयसे सङ्गच्छसे देवैः इति ॥ ३ ॥

वि यस्य ते पृथिव्यां पाजो अश्रेत् तृषु यदन्ना समवृक्त जम्भैः ।
सेनेव सृष्टा प्रसितिष्ट एति यवं न दस्म जुह्वा विवेक्षि ॥ ४ ॥

वि । यस्य । ते । पृथिव्याम् । पाजः । अश्रेत् । तृषु । यत् । अन्ना । सम्ऽअवृक्त । जम्भैः ।
सेनाऽइव । सृष्टा । प्रऽसितिः । ते । एति । यवम् । न । दस्म । जुह्वा । विवेक्षि ॥ ४ ॥

वेङ्कट० विविधं श्रयति[7] यस्य ते दावभूतस्य[8] पृथिव्यां तेजः, क्षिप्रम् यदा अन्नानि काष्ठलक्षणानि "दन्तैः सम्पृङ्क्ते"। तदानीं सेना इव उत्सृष्टा ज्वाला ते एति प्रभञ्जिनी[9]। तदानीं[10] यथा यवम् पशुः एवं हे दर्शनीय[10] त्वम् ज्वालया अरण्यं व्याप्नोषीति ॥ ४ ॥

तमिद् दोषा तमुषसि यविष्ठमग्निमत्यं न मर्जयन्त नरः ।
निशिशाना अतिथिमस्य योनौ दीदाय शोचिराहुतस्य वृष्णः ॥ ५ ॥

---

१ °सङ्घटिता° वि° अ¹ २-२. °तात्सङ्घातात्° वि° अ¹ ३-३. °त्यन्तरमेव° मूको. ४-४. प्रत्यक्ष मूको ५. °पि मूको ६. उपरि° वि°, द्यामुप° अ¹ ल एभ ७-७. °ते पाज सं°क्ते वि° ए, °जो वात सपृक्ते अ¹ एभ ८. प्रभञ्जनीति च वि°, प्रभञ्जनीति च अ¹ प्रभञ्जनीति च ल एभ, ९. नास्ति वि° १०-१०. दर्शयन्ति यस्त्वत् वि° अ¹, दर्शयन्ति यस्त्व ल एभ

तम् । इत् । दोषा । तम् । उषसि । यविष्ठम् । अग्निम् । अत्यम् । न । मर्जयन्त । नरः ।
निऽशिशाना । अतिथिम् । अस्य । योनौ । दीदाय । शोचिः । आऽहुतस्य । वृष्णः ॥ ५ ॥

वेङ्कट० तम् एव रात्रौ तम् उषसि[१] यविष्ठम् अग्निम् अश्वम्[२] इव घासैः[३] परिचरन्ति मनुष्याः तीक्ष्णीकुर्वन्तः अतिथिम् अस्य अतिथेः स्थाने आहवनीये। तदानीम् आहुतस्य वर्षितुः[४] शोचिः दीप्यते ॥ ५ ॥

[५]इति पञ्चमाष्टके द्वितीयाध्याये तृतीयो वर्गः[५] ॥

सुसंदृक् ते स्वनीक प्रतीकं वि यद् रुक्मो न रोचस उपाके ।
दिवो न ते तन्यतुरेति शुष्मश्चित्रो न सूरः प्रति चक्षि भानुम् ॥ ६ ॥

सुऽसन्दृक् । ते । सुऽअनीक । प्रतीकम् । वि । यत् । रुक्मः । न । रोचसे । उपाके ।
दिवः । न । ते । तन्यतुः । एति । शुष्मः । चित्रः । न । सूरः । प्रति । चक्षि । भानुम् ॥६॥

वेङ्कट० शोभनसन्दर्शनम्[६] ते हे शोभनज्वालानीक[६] अङ्गम्। यदा आदित्य इव मनुष्याणाम् अन्तिके वि रोचसे दावभूतः, तदा द्युलोकाद् इव अशनिः एति ते शोषकं ज्योतिः। स त्वं चित्ररूपः सूर्य इव सर्वत्र प्रदर्शयसि दीप्तीरिति ॥ ६ ॥

यथा वः स्वाहाग्नये दाशेम परीळाभिर्घृतवद्भिश्च हव्यैः ।
तेभिर्नो अग्ने अमितैर्महोभिः शतं पूर्भिरायसीभिर्नि पाहि ॥ ७ ॥

यथा । वः । स्वाहा । अग्नये । दाशेम । परि । इळाभिः । घृतवत्ऽभिः । च । हव्यैः ।
तेभिः । नः । अग्ने । अमितैः । महःऽभिः । शतम् । पूःऽभिः । आयसीभिः । नि । पाहि ॥७॥

वेङ्कट० यथा[७] तुभ्यम् 'अग्नये वयम्' स्वाहाकारं परितः[७] दाशेम, इळाभिः गोभिः, पश्चाद्धुतिभिः तथा घृतवद्भिः च पुरोडाशैः। तथा अस्मान् अग्ने! तैः त्वदीयैः तेजोभिः बहुभिः नितरां रक्ष शतेन, पुरैरिव अश्मसा निर्मितैरिति औपमिकमिति ॥ ७ ॥

या वां ते सन्ति दाशुषे अधृष्टा गिरो वा याभिर्नृवतीरुरुष्याः ।
ताभिर्नः सूनो सहसो नि पाहि स्मत् सूरीञ्जरितॄञ्जातवेदः ॥ ८ ॥

या । वा । ते । सन्ति । दाशुषे । अधृष्टाः । गिरः । वा । याभिः । नृऽवतीः । उरुष्याः ।
ताभिः । नः । सूनो इति । सहसः । नि । पाहि । स्मत् । सूरीन् । जरितॄन् । जातऽवेदः ॥८॥

वेङ्कट० या वा ते भवन्ति यजमानरक्षणार्थं रक्षोभिः अनभिभूता दीप्तयः, गिरः च मन्त्रात्मिका

१. अग्नि मूको. २. °श्व वि° अ°. ३. घासैः अ° रुम. ४. वित° मूको. ५-५. नास्ति मूको. ६. सुसदृक् शोभन °वि° अ°. ७. नास्ति वि° अ°. ८-८. अत्र यथं मूको. ९-९. रित्रोपिदा° मूको.

यास्ते भवन्ति। याभि प्रजावती.[1] प्रजा रक्षसि, ताभि अस्मान् अपि अग्ने! नि पाहि सहस. सूनो।। ग्मत्-शब्द. [2]कल्याणवचन । शोभनान्[3] मेधाविन स्तोतॄन्[4] जातवेद ! ॥ ८ ॥

निर्यत् पूतेव स्वधितिः शुचिर्गात् स्वया कृपा तन्वा३ रोचमानः ।
आ यो मात्रोरुशेन्यो जनिष्ट देवयज्याय सुक्रतुः पावकः ॥ ९ ॥

नि । यत् । पूताऽइव । स्वऽधिति । शुचि । गात् । स्वया । कृपा । तन्वा । रोचमान. ।
आ । य । मात्रो । उशेन्यः । जनिष्ट । देवऽयज्याय । सुऽक्रतु । पावक ॥ ९ ॥

वेङ्कट० नि गच्छति यदा पूता शिलाया निशितीकृता स्वधिति इव दीप्त, तदा स्वया कल्पनया ततया[5] तन्वा दीप्यमानो भवति। य अरण्यो आ जनिष्ट, कमनीयश्च[6] देवयागाय सुप्रज्ञ शोधक ॥ ९ ॥

एता नो अग्ने सौभगा दिदीह्यपि क्रतुं सुचेतसं वतेम ।
विश्वा स्तोतृभ्यो गृणते च सन्तु यूयं पात स्वस्तिभिः सदा नः ॥ १० ॥

एता । न । अग्ने । सौभगा । दिदीहि । अपि । क्रतुम् । सुऽचेतसम् । वतेम ।
विश्वा । स्तोतृऽभ्य । गृणते । च । सन्तु । यूयम् । पात । स्वस्तिऽभि । सदा । न ॥१०॥

वेङ्कट० एतानि अस्माकम् अग्ने! सौभगानि प्रज्वलय। अपि च कर्म सुशोभनेन ज्ञानेन प्रणीतम् यतेम। वनतेर्वर्णान्तरापत्ति[7]। विश्वानि धनानि स्तोतृभ्य. गृणते मह्यम् च सन्तु। यूयम् इति सानुचराभिप्रायमिति॥ १० ॥

[8]इति पञ्चमाष्टके द्वितीयाध्याये चतुर्थो वर्ग[8] ॥

[४]

[9]वसिष्ठो मैत्रावरुणिर्ऋषिः। अग्निर्देवता। त्रिष्टुप् छन्द[9]।

प्र वः शुक्राय भानवे भरध्वं हव्यं मतिं चाग्नये सुपूतम् ।
यो दैव्यानि मानुषा जनूंष्यन्तर्विश्वानि विद्मना जिगाति ॥ १ ॥

प्र । व । शुक्राय । भानवे । भरध्वम् । हव्यम् । मतिम् । च । अग्नये । सुऽपूतम् ।
य । दैव्यानि । मानुषा । जनूंषि । अन्त । विश्वानि । विद्मना । जिगाति ॥ १ ॥

वेङ्कट० 'प्र भरध्वम्' यूयम् ज्वलते दीप्यमानाय हव्यम् स्तुतिम् च अग्नये निर्मलम्, यः दैव्यानि मानुषाणि च विश्वानि जातानि भूतानि देवान् मनुष्यांश्च अन्त गच्छति ज्ञानेन। मनुष्येभ्यो देवान् प्रति गच्छति देवेभ्यो मनुष्यानिति ॥ १ ॥

---

१. यती वि[2]. २. अस्मच्छन्द वि[1], अस्मच्छब्द अ[1] ल दृश. ३. °नम् मूको. ४. स्तोति वि[2]; स्तोतु वि[1] ल, स्तोत्र दृश ५. तया मूको. ६. °यश्चो मूको ७ °न्तरावर्ति मूको, °न्तरवर्तिन लप्रस्ताव. ८-८. नास्ति मूको. ९-९. प्रहर° अ[1].

स गृत्सो अग्निस्तरुणश्चिदस्तु यतो यविष्ठो अजनिष्ट मातुः ।
सं यो वना युवते शुचिदन् भूरि चिदन्ना समिदत्ति सद्यः ॥ २ ॥

स । गृत्स । अग्नि । तरुण । चित् । अस्तु । यत । यविष्ठ । अजनिष्ट । मातु ।
सम् । य । वना । युवते । शुचिऽदन् । भूरि । चित् । अन्ना । सम् । इत् । अत्ति । सद्य ॥२॥

वेङ्कट० स मेधावी अग्नि सर्वदा युवा 'एव अस्तु' प्रशान्त, यत प्रभृति युवतम अरणे अजनिष्ट। सम् युवते य भस्मीकुर्वन् मिश्रयति वनानि शुचिदन्त, स बहूनि अपि अन्नानि सदैव अत्ति सद्य एकस्मिन् क्षणे ॥ २ ॥

अस्य देवस्य संसद्यनीके यं मर्तासः श्येतं जगृभ्रे ।
नि यो गृभं पौरुषेयीमुवोच दुरोकमग्निरायवे शुशोच ॥ ३ ॥

अस्य । देवस्य । सम्ऽसदि । अनीके । यम् । मर्तास । श्येतम् । जगृभ्रे ।
नि । य । गृभम् । पौरुषेयीम् । उवोच । दुःऽओकम् । अग्नि । आयवे । शुशोच ॥ ३ ॥

वेङ्कट० अस्य देवस्य ससदने सति वयम् अनीके 'मुखे स्याम'। यम्' मनुष्या कार्यार्थं श्वेतवर्णं गृह्णन्ति, य पुरुषै अर्प्यमाण' हविषो मुष्टिम् अभिमुख सेवते, स अग्नि मनुष्यार्थं दुस्सेव दीप्यते, अत्यन्त प्रज्वलितो भवति ॥ ३ ॥

अयं कविरकविषु प्रचेता मर्तेष्वग्निरमृतो नि धायि ।
मा नो अत्र जुहुरः सहस्वः सदा त्वे सुमनसः स्याम ॥ ४ ॥

अयम् । कवि । अकविषु । प्रऽचेता । मर्तेषु । अग्नि । अमृत । नि । धायि ।
स । मा । न । अत्र । जुहुर । सहस्व । सदा । त्वे इति । सुऽमनस । स्याम ॥ ४ ॥

वेङ्कट० अयम् क्रान्तप्रज्ञ प्रकृष्टज्ञान अप्रकृष्टज्ञानेषु निहित, तथा मरणधर्मिषु "अमरणधर्मा नि धायि"। प्रत्यक्ष दिष्ट। स त्वम् मा अस्मान् अस्मिन् स्तोत्रे क्रियमाणे हिंसी। हे बलवन्' सदा त्वयि वयम् सुमनस स्याम इति ॥ ४ ॥

आ यो योनिं देवकृतं ससाद क्रत्वा ह्यग्निरमृताँ अतारीत् ।
तमोषधीश्च वनिनश्च गर्भं भूमिश्च विश्वधायसं बिभर्ति ॥ ५ ॥

आ । य । योनिम् । देवऽकृतम् । ससाद । क्रत्वा । हि । अग्नि । अमृतान् । अतारीत् ।
तम् । ओषधी । च । वनिन । च । गर्भम् । भूमि । च । विश्वऽधायसम् । बिभर्ति ॥ ५ ॥

१-१. 'म शास्तु वि' अ, एवा शास्तु म' मूको. २-२ मुखास्था वि' म'. ३ य वि' म' एव ४. सुप्यमा' मूको. ५-५. 'मामिषा' मूको

वेङ्कट० आ सीदति य स्थानम् ओषध्यादिकं देवैरेतस्य वासाय कल्पितम्। प्रज्ञानेन हि अग्नि देवान् दुरितेभ्य उत्तारयति[1] मध्यमात्[2]। तम् ओषध्यो वृक्षा गर्भम् भूमा च विश्वस्य धर्तारम्[3] धारयन्ति ॥ ५ ॥

[4]इति पञ्चमाष्टके द्वितीयाध्याये पञ्चमो वर्गः[4] ॥

ईशे ह्य१ग्निरमृतस्य भूरेरीशे रायः सुवीर्यस्य दातोः ।
मा त्वा वयं सहसावन्नवीरा माप्सवः परि षदाम मादुवः ॥ ६ ॥

ईशे । हि । अग्नि । अमृतस्य । भूरे । ईशे । राय । सुऽवीर्यस्य । दातो ।
मा । त्वा । वयम् । सहसाऽवन् । अवीरा । मा । अप्सव । परि । सदाम । मा । अदुव ॥६॥

वेङ्कट० ईशे हि अग्नि अन्न बहु दातुम्। ईशे धन शोभनवीर्यं दातुम्। अथ प्रत्यक्ष। सहसम् त्वा वयम् बलवन्[5] मा अपुत्रा परि निषीदाम, मा च अप्सव सोमस्य अपातार[6]। मा च अपरिचारका[7] परिनिषीदाम[8] ॥ ६ ॥

परिषद्यं ह्यरणस्य रेक्णो नित्यस्य रायः पतयः स्याम ।
न शेषो अग्ने अन्यजातमस्त्यचेतानस्य मा पथो वि दुक्षः ॥ ७ ॥

परिऽसद्यम् । हि । अरणस्य । रेक्ण । नित्यस्य । राय । पतय । स्याम ।
न । शेष । अग्ने । अन्यऽजातम् । अस्ति । अचेतानस्य । मा । पथ । वि । दुक्ष ॥ ७ ॥

वेङ्कट० परिहर्तव्यम् हि, परिहृत्य गन्तव्य नोपसर्तव्यम् अरणस्य धनम्। अरणोऽन्यो भवति, न रमत इति, अपि वा अर्ते अरणोऽन्यतो गच्छतीति। यास्कस्त्वाह "अरण अपार्णो भवति" (३ २)। यदि तस्य धनमुपसीदति तमभिजानत सुतव्य तद्भवति। ततश्च तदनित्य भवति। ततो वयम् नित्यस्य एव धनस्य पतय स्याम इति पुत्रानभिप्रेत्य वदति। तथा चाह—न शेषो अग्ने अन्यजातमस्ति इति। शेष इत्यपत्यनाम। शिष्यते प्रयत[9] इति। न अन्यजातम् मनुष्यस्यापत्य भवति। ततश्च अचेतयमानस्य तदप्रमत्तस्य भवति। मा अस्माद् पथ वि दूदुष औरसमेव पुत्रमस्मभ्य देहीति। अस्योत्तरा भूयसे निर्वचनाय (नु या ३,२) ॥ ७ ॥

नहि ग्रभायारणः सुशेवोऽन्योदर्यो मनसा मन्तवा उ ।
अधा चिदोकः पुनरित् स एत्या नो वाज्यभीषाळेतु नव्यः ॥ ८ ॥

नहि । ग्रभाय । अरण । सुऽशेव । अन्यऽउदर्य । मनसा । मन्तवै । ऊँ इति ।
अध । चित् । ओक । पुन । इत् । स । एति । आ । न । वाजी । अभीषाट् । एतु । नव्य ॥८॥

---

१ उत्तरयतीति ल लभ   २ मध्यमाना वि[२] ल लभ, मध्यमाना अ[१]   ३ धर्ता वि[२] अ[१]
४-४ नास्ति मूको   ५ पाता° वि[२] ल, अवात अ[१] लभ   ६ °तारं मूको   ७ अपरिष्यूध अ[१], परिष्यदुव ल, अपरिष्युष लभ, परिषदाम यद्वा हि अदुव ल प्रस्ताय   ८-८ मूको अनवधानात एष पाठ अष्टम्या ऋचो भाष्यान्ते पठित   ९ मृतमिति वि[१] अ[१]; मृतस्य ल लभ

वेङ्कट० 'न प्रहीतव्य'[1] अरण गन्ता जनकगृहम् प्रति सुसुखतम अपि। अन्यस्य उदरात् जात मनसा अपि न मन्तव्यो ममायमिति। अथापि गृह जनकस्य स पुनरेव गच्छति, यद्यप्यय गृह्णाति यदि वा[2] मन्यत। तस्मात् एतु न वाची यजनयात् औरस अभिषहमाण सपत्नान्[3] नवजात, स एव पुत्र इति ॥ ८ ॥

त्वमग्ने वनुष्यतो नि पाहि त्वमु नः सहसावन्नवद्यात् ।
सं त्वा ध्वस्मन्वदभ्येतु पाथः सं रयिः स्पृहयाय्यः सहस्री ॥ ९ ॥

त्वम् । अग्ने । वनुष्यत । नि । पाहि । त्वम् । ऊँ इति । न । सहसाऽवन् । अवद्यात् ।
सम् । त्वा । ध्वस्मन्ऽवत् । अभि । एतु । पाथ । सम् । रयि । स्पृहयाय्य । सहस्री ॥ ९ ॥

वेङ्कट० त्वम् अग्न। हन्तु अस्मान् नि पाहि, त्वम् एव 'अस्मान् बलवन्' अवद्यात् निन्दितु[4]। सम् अभि एतु त्वा मदीये गृहे वर्तमानम् इव 'सत् क्रियायुक्तम् अन्न'[5] धन स्पृहणीय सहस्रसङ्ख्याकम् ॥ ९ ॥

एता नो अग्ने सौभगा दिदीह्यपि क्रतुं सुचेतसं वतेम ।
विश्वा स्तोतृभ्यो गृणते च सन्तु यूयं पात स्वस्तिभिः सदा नः ॥ १० ॥

एता । न । अग्न । सौभगा । दिदीहि । अपि । क्रतुम् । सुऽचेतसम् । वतेम ।
विश्वा । स्तोतृऽभ्य । गृणते । च । सन्तु । यूयम् । पात । स्वस्तिऽभि । सदा । न ॥१०॥

वेङ्कट० ऋ ७,३,१०द ॥ १० ॥

'इति पञ्चमाष्टके द्वितीयाध्याये षष्ठो वर्ग'[6] ॥

[५]

'वसिष्ठो मैत्रावरुणिर्ऋषि । वैश्वानरोऽग्निर्देवता । त्रिष्टुप् छन्द'[6] ।

प्राग्नये तवसे भरध्वं गिरं दिवो अरतये पृथिव्याः ।
यो विश्वेषाममृतानामुपस्थे वैश्वानरो वावृधे जागृवद्भिः ॥ १ ॥

प्र । अग्नये । तवसे । भरध्वम् । गिरम् । दिव । अरतये । पृथिव्या ।
य । विश्वेषाम् । अमृतानाम् । उपऽस्थे । वैश्वानर । ववृधे । जागृवत्ऽभि ॥ १ ॥

वेङ्कट० वैश्वानरः। प्र भरध्वम् अग्नये वृद्धाय गिरम् पृथिव्या सकाशाद् दिव प्रति गन्त्रे, य विश्वेषाम् देवानाम् उपस्थ पृथिव्याम् वैश्वानर वर्धते जागृवद्भि यजमानै समिद्ध ॥ १ ॥

---

1. प्रमिर° वि° न विग्रहि° ए लम, प्रहित° मूको, २ यदि म मूको ३ सपत्नान् मूको ४ ४ 'स्मान् बलवन् बधात् निन्दित वि'; स्मात् बलवन्नवधात् निन्दित अ'; 'स्मात् बलवन् अवद्या बन्दत ल स्मात् बलवन्नवद्यात् निन्दिता लम ५ सर्वक° वि° अ' ६ ६ नास्ति मूको

पृष्टो दिवि धाय्यग्निः पृथिव्यां नेता सिन्धूनां वृषभः स्तियानाम् ।
स मानुषीरभि विशो वि भाति वैश्वानरो वावृधानो वरेण ॥ २ ॥

पृष्टः । दिवि । धायि । अग्निः । पृथिव्याम् । नेता । सिन्धूनाम् । वृषभः । स्तियानाम् ।
सः । मानुषीः । अभि । विशः । वि । भाति । वैश्वानरः । वावृधानः । वरेण ॥ २ ॥

वेङ्कट० सम्पृक्तः दिवि निहितः अग्निः पृथिव्याम् च नेता नदीनां वर्षिता उदकानाम् । सः मानुषीः विशः 'अभि वि भाति'[1] वैश्वानरः वर्धमानः वरिष्ठेन तेजसा आदित्यः[1] इव ॥ २ ॥

त्वद् भिया विश आयन्नसिक्नीरसमना जहतीर्भोजनानि ।
वैश्वानर पूरवे शोशुचानः पुरो यदग्ने दरयन्नदीदेः ॥ ३ ॥

त्वत् । भिया । विशः । आयन् । असिक्नीः । असमनाः । जहतीः । भोजनानि ।
वैश्वानर । पूरवे । शोशुचानः । पुरः । यत् । अग्ने । दरयन् । अदीदेः ॥ ३ ॥

वेङ्कट० 'त्वत्तः भयेन'[3] विशः गच्छन्ति असितवर्णाः, रक्षांसीत्यर्थः, त्यक्तसङ्ग्रामाः परित्यजन्त्यः अन्नानि । वैश्वानर! अग्ने! पूरवे राज्ञे शोशुचानः तच्छत्रूणां पुराणि यदा दारयन्[4] आज्वलः ॥ ३ ॥

तव त्रिधातु पृथिवी उत द्यौर्वैश्वानर व्रतमग्ने सचन्त ।
त्वं भासा रोदसी आ ततन्थाजस्रेण शोचिषा शोशुचानः ॥ ४ ॥

तव । त्रिऽधातु । पृथिवी । उत । द्यौः । वैश्वानर । व्रतम् । अग्ने । सचन्त ।
त्वम् । भासा । रोदसी इति । आ । ततन्थ । अजस्रेण । शोचिषा । शोशुचानः ॥ ४ ॥

वेङ्कट० तिस्रो देवताः अग्निर्वायुः सूर्यः इति । '[5]तथा भिन्नस्य'[5] तव त्रिधातु व्रतम् पृथिवी अन्तरिक्षं द्यौः च वैश्वानर! अग्ने! सचन्ते । पृथिवी अग्नेः कर्म, 'अन्तरिक्षं वायोः'[6], द्यौः सूर्यस्य । त्वम् भासा द्यावापृथिव्यौ आ ततन्थ अजस्रेण तेजसा दीप्यमानः ॥ ४ ॥

त्वामग्ने हरितो वावशाना गिरः सचन्ते धुनयो घृताचीः ।
पतिं कृष्टीनां रथ्यं रयीणां वैश्वानरमुषसां केतुमह्नाम् ॥ ५ ॥

त्वाम् । अग्ने । हरितः । वावशानाः । गिरः । सचन्ते । धुनयः । घृताचीः ।
पतिम् । कृष्टीनाम् । रथ्यम् । रयीणाम् । वैश्वानरम् । उषसाम् । केतुम् । अह्नाम् ॥ ५ ॥

वेङ्कट० त्वाम् अग्ने! दिशः कामयमानाः सेवन्ते, स्तुतयश्च, तथा हविषा कम्पयित्र्यः स्रुचश्च,

---

१-१. अदि वि° वि[2] अ[1]. २. दीप्त वि[2] ल. ३-३. त्वद्भये° अ[1]. ४. °रयत् मूको. ५-५. तयाभि° ल ख्म. ६-६. वायोरन्तरिक्ष वि[2].

पतिम् प्रजानाम् नेतारम् धनानाम् वैश्वानरम् उषसाम् अह्नाम् च प्रज्ञापकम् ॥ ५ ॥

[1]इति पञ्चमाष्टके द्वितीयाध्याये सप्तमो वर्गः[1] ॥

त्वे असु॒र्यं१॒॑ वस॑वो॒ न्यृ॑ण्व॒न् क्रतुं॒ हि ते॑ मित्रमहो जु॒षन्त॑ ।
त्वं दस्यूँ॒रोक॑सो अग्न आज उ॒रु ज्योति॑र्ज॒नय॒न्नार्या॑य ॥ ६ ॥

त्वे इति॑ । अ॒सु॒र्य॑म् । वस॑वः । नि । ऋ॒ण्व॒न् । क्रतु॑म् । हि । ते॒ । मि॒त्र॒ऽम॒हः॒ । जु॒षन्त॑ ।
त्वम् । दस्यू॑न् । ओक॑सः । अ॒ग्ने॒ । आ॒जः॒ । उ॒रु । ज्योतिः॑ । ज॒नय॑न् । आर्या॑य ॥ ६ ॥

वेङ्कट० त्वयि असुराणां हन्तृ बलम्[2] वसवः प्राक्षिपन्। कर्म हि ते हे मित्राणां पूजयितः[11] जुषन्त। त्वम् च तेषाम् अग्ने! दस्यून्[4] स्वात्[5] स्थानात् निरगमय विस्तीर्णम् ज्योतिः आर्याय मनुष्याय जनयन् ॥ ६ ॥

स जाय॑मानः पर॒मे व्यो॑मन् वा॒युर्न पाथः॒ परि॑ पासि स॒द्यः ।
त्वं भुव॑ना ज॒नय॑न्न॒भि क्र॒न्नप॑त्याय जातवेदो दश॒स्यन् ॥ ७ ॥

सः । जाय॑मानः । प॒र॒मे । विऽओ॑मन् । वा॒युः । न । पाथः॑ । परि॑ । पा॒सि॒ । स॒द्यः ।
त्वम् । भुव॑ना । ज॒नय॑न् । अ॒भि । क्र॒न् । अप॑त्याय । जा॒त॒ऽवे॒दः॒ । द॒श॒स्यन् ॥ ७ ॥

वेङ्कट० सः प्रादुर्भवन् परमे व्योम्नि सूर्यात्मना वायुः इव क्षिप्रम् यज्ञमुखे सोमलक्षणमन्नम् पिबसि। त्वम् उदकानि जनयन् अभि क्रन्दसि पुत्रभूतायास्मै लोकाय जातवेदः! प्रयच्छन् ओषध्यादिकम् ॥ ७ ॥

ताम॑ग्ने अ॒स्मे इष॒मेर॑यस्व॒ वैश्वा॑नर द्यु॒मतीं॑ जातवेदः ।
यया॒ राधः॒ पिन्व॑सि विश्ववार पृ॒थु श्रवो॑ दा॒शुषे॒ मर्त्या॑य ॥ ८ ॥

ताम् । अ॒ग्ने॒ । अ॒स्मे इति॑ । इष॑म् । आ । ई॒र॒य॒स्व॒ । वैश्वा॑नर । द्यु॒ऽमती॑म् । जा॒त॒ऽवे॒दः॒ ।
यया॑ । राधः॑ । पिन्व॑सि । वि॒श्व॒ऽवा॒र॒ । पृ॒थु । श्रवः॑ । दा॒शुषे॑ । मर्त्या॑य ॥ ८ ॥

वेङ्कट० ताम् अग्ने! अस्मभ्यं वृष्टिम् आभिमुख्येन गमय वैश्वानर! विद्युद्युक्ताम्[6] जातवेदः!, यया वृष्ट्या क्षरसि धनं हे विश्ववार! पृथु च अन्नं प्रयच्छते मर्त्याय ॥ ८ ॥

तं नो॑ अग्ने म॒घव॑द्भ्यः पुरु॒क्षुं र॒यिं नि वाजं॒ श्रुत्यं॑ युवस्व ।
वैश्वा॑नर॒ महि॑ नः॒ शर्म॑ यच्छ रु॒द्रेभि॑रग्ने॒ वसु॑भिः स॒जोषाः॑ ॥ ९ ॥

तम् । नः॒ । अ॒ग्ने॒ । म॒घव॑त्ऽभ्यः । पु॒रु॒ऽक्षुम् । र॒यिम् । नि । वाज॑म् । श्रुत्य॑म् । यु॒व॒स्व॒ ।
वैश्वा॑नर । महि॑ । नः॒ । शर्म॑ । य॒च्छ॒ । रु॒द्रेभिः॑ । अ॒ग्ने॒ । वसु॑ऽभिः । स॒ऽजोषाः॑ ॥ ९ ॥

१-१. नास्ति मूको. २. बलं मूको. ३. पिपत्त मूको. ४. दस्यु मूको. ५. स्वात् स्वात् अ[1]. ६. विद्युद्वद् वि[1]; विद्युत्वाद् अ[1], विद्युक्ताम् ख एभ.

वेङ्कट० तम् अस्मभ्यम् अग्ने! हविष्मद्भ्यः[१] बहुषु शब्दितम् रयिम् नि युवस्व मिमिश्व, अन्नं च श्रवणीयम् । वैश्वानर![२] महत् च अस्मभ्यं[३] सुखं प्रयच्छ रुद्रैः अग्ने! वसुभिः च सङ्गत. ॥ ७ ॥

[४]इति पञ्चमाष्टके द्वितीयाध्याये अष्टमो वर्ग.[४] ॥

[६]

[४]वसिष्ठो मैत्रावरुणिर्ऋषिः । वैश्वानरोऽग्निर्देवता । त्रिष्टुप् छन्द.[४]।

प्र सम्राजो असुरस्य प्रशस्तिं पुंसः कृष्टीनामनुमाद्यस्य ।
इन्द्रस्येव प्र तवसस्कृतानि वन्दे दारुं वन्दमानो विवक्मि ॥ १ ॥

प्र । सम्ऽराजः । असुरस्य । प्रऽशस्तिम् । पुंस. । कृष्टीनाम् । अनुऽमाद्यस्य ।
इन्द्रस्यऽइव । प्र । तवसः । कृतानि । वन्दे । दारुम् । वन्दमान. । विवक्मि ॥ १ ॥

वेङ्कट० प्र वन्दे प्रोच्चारयामि सर्वेषाम्[५] सम्राज[६] प्राज्ञस्य प्रशस्तिम् वृषण मनुष्याणाम् अनुमोदनीयस्य, यथा इन्द्रस्य वृद्धस्य कर्माणि प्रोच्चारयन्ति तद्वत्। किञ्च एवं दरणशील नमस्यन् स्तुतिं ब्रवीमि ॥ १ ॥

कविं केतुं धासिं भानुमद्रेर्हिन्वन्ति शं राज्यं रोदस्योः ।
पुरंदरस्य गीर्भिरा विवासेऽग्नेर्व्रतानि पूर्व्या महानि ॥ २ ॥

कविम् । केतुम् । धासिम् । भानुम् । अद्रे. । हिन्वन्ति । शम् । राज्यम् । रोदस्यो ।
पुरम्ऽदरस्य । गीःऽभि । आ । विवासे । अग्ने । व्रतानि । पूर्व्या । महानि ॥ २ ॥

वेङ्कट० क्रान्तकर्माण[७] प्रज्ञापक धारयितार दीपयितारं आदर्तुं स्तोतुः प्रीणन्ति शङ्कर [८]राजानम् रोदस्यो,[८] राज्यवेर्यो नामकरण । पुराम् दारयितु. अह च स्तुतिभिः परिचर्यां करोमि । अग्ने हि महान्ति पूर्वकृतानि कर्माणीति ॥ २ ॥

न्यक्रतून् ग्रथिनो मृध्रवाचः पणीँरश्रद्धाँ अवृधाँ अयज्ञान् ।
प्रप्र तान् दस्यूँरग्निर्विवाय पूर्वश्चकारापराँ अयज्यून् ॥ ३ ॥

नि । अक्रतून् । ग्रथिनः । मृध्रऽवाचः । पणीन् । अश्रद्धान् । अवृधान् । अयज्ञान् ।
प्रऽप्र । तान् । दस्यून् । अग्नि । विवाय । पूर्वः । चकार । अपरान् । अयज्यून् ॥ ३ ॥

---

१ हविष्मन्त्यो रु लभ, °ष्मन् रो अ[१], °ष्मन् त वि[१].　२. °नरम् मूको　३. °स्मदीयम् अ[१].
४-४. नास्ति मूको.　५. °वैषा ल.　६. सराज्ञः वि[१] इ, सा राज्ञ अ[१] लभ.　७. °णो महात्मनाम् अ[१].
८-८. रोदस्यो राजानम् रु लभ.

वेङ्कट० नितरां प्रणामयति अकर्मणो अधनकामान् [1]हिंसकांश्च पणिनामकान्[1] श्रद्धारहितान् अवर्धयितॄन्[2] हविर्भि [3]विरहितान् अयज्ञान्[3] तान् दस्यून्। एतदेवाह—पूर्वं [4] य सन् अयज्यून्[5] चकार अयज्यून् अग्नि इति ॥ ३ ॥

यो अपाचीने तमसि मदन्तीः प्राचीश्चकार नृतमः शचीभिः ।
तमीशानं वस्वो अग्निं गृणीषेऽनानतं दमयन्तं पृतन्यून् ॥ ४ ॥

य । अपाचीने । तमसि । मदन्ती । प्राची । चकार । नृऽतम । शचीभि ।
तम् । ईशानम । वस्वे । अग्निम् । गृणीषे । अनानतम् । दमयन्तम् । पृतन्यून् ॥ ४ ॥

वेङ्कट० य अपाचिका (?) ॥ ४ ॥

यो देह्यो३ अनमयद् वधस्नैर्यो अर्यपत्नीरुषसश्चकार ।
स निरुध्या नहुषो यह्वो अग्निर्विशश्चक्रे बलिहृतः सहोभिः ॥ ५ ॥

य । देह्य । अनमयत् । वधऽस्नै । य । अर्यऽपत्नी । उषसे । चकारे ।
स । निऽरुध्य । नहुष । यह्व । अग्नि । विशे । चक्रे । बलिऽहृते । सहःऽभि ॥ ५ ॥

वेङ्कट० उपस चकार। स निरुध्य नहुष राज्ञ अग्नि महान् प्रजा चक्रे करप्रदायिनी बकै ॥ ५ ॥

यस्य शर्मन्नुप विश्वे जनास एवैस्तस्थुः सुमतिं भिक्षमाणाः ।
वैश्वानरो वरमा रोदस्योराग्निः ससाद पित्रोरुपस्थम् ॥ ६ ॥

यस्य । शर्मन् । उप । विश्वे । जनास । एवै । तस्थु । सुऽमतिम् । भिक्षमाणा ।
वैश्वानर । वरम् । आ । रोदस्यो । आ । अग्नि । ससाद । पित्रो । उपऽस्थम् ॥ ६ ॥

वेङ्कट० यस्य सुखनिमित्तम् उप [6]तस्थु विश्वे[6] जना गमनै [7]सुमतिम् तमेव[7] भिक्षमाणा, स वैश्वानर अग्नि [8]वरिष्ठम्[8] उपस्थम् आ सीदति द्यावापृथिव्यो पित्रो । [9]आत्मादित्यात्मना द्यावापृथिव्योर्मध्ये[9] मध्ये प्रादुर्भवति ॥ ६ ॥

आ देवो ददे बुध्न्या३ वसूनि वैश्वानर उदिता सूर्यस्य ।
आ समुद्रादवरादा परस्मादाग्निर्ददे दिव आ पृथिव्याः ॥ ७ ॥

१-१. 'करणवानान् अ' वि', 'च पणवानाशन्धार' अ', 'च पणवानान् अ' ह, 'च पणवानान् ईधार' एम. २. वर्धयि' वि' अ' छ, वर्धयितॄभि एम ३-३. हविर्भिर्विहितानयज्ञा' वि' अ' ह; पिता हितानय' एम; मरिरितयमान् ए' मस्ताव ४. पूर्वं वि' ए, पूर्व अ' एम ५. सन्। अय' ह, सन्जय एम, सन्जय' वि'; सन्जय' अ'. ६-६ 'पस्थ विश्वे मूको. ७-७ 'तिमन्ता' मूको. ८. वसिष्ठम् मूको. ९-९. द्यावापृथिव्योर्मध्ये मातरादित्यात्मना अ'.

आ । देवः । दुदे । बुध्न्या । वसूनि । वैश्वानर । उत्ऽइता । सूर्यस्य ।
आ । समुद्रात् । अवरात् । आ । परस्मात् । आ । अग्नि । दुदे । दिव । आ । पृथिव्या ॥७॥

वेङ्कट० आ ददे देव. आन्तरिक्ष्याणि वसूनि भयानि वैश्वानर उदये सूर्यस्य। पूर्वापरयो. समुद्रयोः मध्ये यानि वसूनि, यानि च द्यावापृथिव्यो मध्ये, तानि सर्वाणि आ दत्ते। मनुष्येषु पक्षिषु देवेषु च वर्तमान सर्वं भक्षयतीति ॥ ७ ॥

[1]इति पञ्चमाष्टके द्वितीयाध्याये नवमो वर्ग.[1]।

[७]

[1]वसिष्ठो मैत्रावरुणिर्ऋषि । अग्निर्देवता । त्रिष्टुप् छन्द[1]।

प्र वो देवं चित् सहसानम्ग्निमश्वं न वाजिनं हिषे नमोभिः ।
भवा नो दूतो अध्वरस्य विद्वान् त्मना देवेषु विविदे मितद्रुः ॥ १ ॥

प्र । व. । देवम् । चित् । सहसानम् । अग्निम् । अश्वम् । न । वाजिनम् । हिषे । नमःऽभि ।
भव । न । दूत । अध्वरस्य । विद्वान् । त्मना । देवेषु । विविदे । मितऽद्रु ॥ १ ॥

वेङ्कट० प्र ईरयामि युष्माकम् देवम् बलमाचरन्तम् अग्निम् अश्वम् इव बलिनम् अन्नै। भव न दूतः। यज्ञ जानन् स्वयमेव अग्नि देवेषु प्रयच्छति ज्ञापयते वा[2] विहिताध्वा इति ॥ १ ॥

आ याह्यग्ने पथ्याः अनु स्वा मन्द्रो देवानां सख्यं जुषाणः ।
आ सानु शुष्मैर्नदयन् पृथिव्या जम्भेभिर्विश्वमुशधग्वनानि ॥ २ ॥

आ । याहि । अग्ने । पथ्या । अनु । स्वा । मन्द्र । देवानाम् । सख्यम् । जुषाण ।
आ । सानु । शुष्मै । नदयन् । पृथिव्या । जम्भेभि । विश्वम् । उशधक् । वनानि ॥ २ ॥

वेङ्कट० आ गच्छ अग्ने! मार्गैः आत्मीयैः एव[3] मन्द्र. देवानाम् सख्यम् सेवमान। आ याहि पृथिव्या समुच्छ्रय वनं तेजोभि शब्दयन्[4] दंष्ट्राभि विश्वम्[5] कात्स्न्येन यथाकाम दहन् काष्ठानीति ॥ २ ॥

प्राचीनो यज्ञः सुधितं हि बर्हिः प्रीणीते अग्निरीळितो न होता ।
आ मातरा विश्ववारे हुवानो यतो यविष्ठ जज्ञिषे सुशेवः ॥ ३ ॥

प्राचीन । यज्ञ । सुऽधितम् । हि । बर्हि । प्रीणीते । अग्नि । ईळित । न । होता ।
आ । मातरा । विश्ववारे इति विश्वऽवारे । हुवान । यत । यविष्ठ । जज्ञिषे । सुऽशेव ॥३॥

१-१ नास्ति मूको २ वाद भ[2]. ३-३. मात जरामीयैव वि[2] भ[2], मानगै आत्मीदैव ह एभ, ४. शब्द मूको ५. विश्वदै वि[2] छ एभ, विश्वम । भ[2], विश्वंसर्न पक्षे ल प्रस्ताव .

वेङ्कट० प्राङ्मुख यज्ञ प्रवृत्त । सुनिहित च बर्हि । आ प्रीणाति च अग्नि[२] प्रशस्त इव ह्वाता । द्यावापृथिव्यौ विश्वैर्वरणीये । हूयमान [३]यत त्वम्[३] युवतम [१] जायसे सुसुख [१] ॥ ३ ॥

सद्यो अध्वरे रथिरं जनन्त मानुषासो विचेतसो य एषाम् ।
विशामधायि विश्पतिर्दुरोणे३ऽग्निर्मन्द्रो मधुवचा ऋतावा ॥ ४ ॥

सद्य । अध्वरे । रथिरम् । जनन्त । मानुषास । विऽचेतस । य । एषाम् ।
विशाम् । अधायि । विश्पति । दुरोणे । अग्नि । मन्द्र । मधुऽवचा । ऋतऽवा ॥ ४ ॥

वेङ्कट० सद्य यज्ञे रथवन्त जनयन्ति[४] मानुषास[४] विशिष्टप्रज्ञा[५] । य एषाम् मनुष्याणा नेता भवति, स विशापति विशाम् गृहे निहित अग्नि, मोदन मधुवचन यज्ञवान् ॥ ४ ॥

असादि वृतो वह्निराजगन्वानग्निर्ब्रह्मा नृषदने विधर्ता ।
द्यौश्च यं पृथिवी वावृधाते आ यं होता यजति विश्ववारम् ॥ ५ ॥

असादि । वृत । वह्नि । आऽजगन्वान् । अग्नि । ब्रह्मा । नृऽसदने । विऽधर्ता ।
द्यौ । च । यम् । पृथिवी । ववृधाते इति । आ । यम् । होता । यजति । विश्वऽवारम् ॥ ५ ॥

वेङ्कट० स्थापित वृत होतृत्वेन वोढा दूरादागत अग्नि महान् गृहे विधारक । यम् द्यावापृथिव्यौ[७] वर्धयत, यम् च होता आ यजति मानुष विश्वैर्वरणीयम् ॥ ५ ॥

एते द्युम्नेभिर्विश्वमातिरन्त मन्त्रं ये वारं नर्या अतक्षन् ।
प्र ये विशस्तिरन्त श्रोषमाणा आ ये मे अस्य दीधयन्नृतस्य ॥ ६ ॥

एते । द्युम्नेभि । विश्वम् । आ । अतिरन्त । मन्त्रम् । ये । वा । अरम् । नर्या । अतक्षन् ।
प्र । ये । विश । तिरन्त । श्रोषमाणा । आ । ये । मे । अस्य । दीधयन् । ऋतस्य ॥ ६ ॥

वेङ्कट० एते यशोभि सर्वम् आ छादयन्ति, ये वा अग्नये वैश्वानराय पर्याप्त मन्त्र कुर्वन्ति नृहिता, ये वा वर्धयन्ति अन्नार्थिनी प्रजा वैश्वानराधिष्ठिता[८] तदुक्तम् आज्ञावचन[९] शृण्वाना[१०], ये वा मदीयम् अनु वैश्वानरम् [११]आ अदीपयन्[११] प्राज्वलयन्निति ॥ ६ ॥

नू त्वामग्न ईमहे वसिष्ठा ईशानं सूनो सहसो वसूनाम् ।
इषं स्तोतृभ्यो मघवद्भ्य आनड् यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

---

१. अग्नि मूको. २-२. यशोत्त्वम् वि[१] अ[१] द, योत्त्वम् दम. ३. °युवम् मूको. ४. °यति मूको ५. मानुष लभ, मानुषा द प्रस्ताव ६. अविशि° वि[२], अपिशि° अ[१] लभ ७. °थि°वौ मूको. ८. °धिष्ठि° अ[१] ९-९. °वचाया (°ना अ[१]) ष° मूको १०. °न मूको. ११. आदीप्य° वि[१], आदीप्य° अ[१]; आदीपन् लभ; आसीदय° द.

नु । त्वाम् । अग्ने । ईमहे । वसिष्ठाः । ईशानम् । सूनो इति । सहसः । वसूनाम् ।
इषम् । स्तोतृऽभ्यः । मघवत्ऽभ्यः । आनट् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥७॥

वेङ्कट० क्षिप्रम् त्वाम् अग्ने! याचामहे वसिष्ठाः[1] ईशानम् हे सहसः सूनो! धनानाम्। तथा सति अन्नम् स्तोतृभ्यः हविष्मद्भ्यः प्रापयेति[2] ॥ ७ ॥

[3]इति पञ्चमाष्टके द्वितीयाध्याये दशमो वर्गः[3] ॥

[८]

[4]वसिष्ठो मैत्रावरुणिर्ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः[4] ।

इन्धे राजा समर्यो नमोभिर्यस्य प्रतीकमाहुतं घृतेन ।
नरो हव्येभिरीळते सबाध आग्निरग्र उषसामशोचि ॥ १ ॥

इन्धे । राजा । सम् । अर्यः । नमःऽभिः । यस्य । प्रतीकम् । आऽहुतम् । घृतेन ।
नरः । हव्येभिः । ईळते । सऽबाधः । आ । अग्निः । अग्रे । उषसाम् । अशोचि ॥ १ ॥

वेङ्कट० सम् इन्धे तम् राजा ईश्वरः[5] हविर्भिः[6], यस्य मुखम् आहुतम् घृतेन भवति। तम् मनुष्याः हविर्भिः[7] स्तुवन्ति बाधासहिताः[8]। आ दीप्यते यः[9] सोऽयम् अग्निः[8] उषसाम् अग्रे इति ॥ १ ॥

अयमु ष्य सुमहाँ अवेदि होता मन्द्रो मनुषो यह्वो अग्निः ।
वि भा अकः ससृजानः पृथिव्यां कृष्णपविरोषधीभिर्ववक्षे ॥ २ ॥

अयम् । ऊँ इति । स्यः । सुऽमहान् । अवेदि । होता । मन्द्रः । मनुषः । यह्वः । अग्निः ।
वि । भाः । अकः । ससृजानः । पृथिव्याम् । कृष्णऽपविः । ओषधीभिः । ववक्षे ॥ २ ॥

वेङ्कट० अयम् एव स सुमहान् ज्ञायते होता मोदमानः मनुष्यस्य महान् अग्निः । वि करोति तेजांसि । पृथिव्याम् अरण्योः सृज्यमानः[9] कृष्णमार्गः[10] ओषधिभिः[10] नि[11] उह्यते[11] ॥ २ ॥

कया नो अग्ने वि वसः सुवृक्तिं कामु स्वधामृणवः शस्यमानः ।
कदा भवेम पतयः सुदत्र रायो वन्तारो दुष्टरस्य साधोः ॥ ३ ॥

कया । नः । अग्ने । वि । वसः । सुऽवृक्तिम् । काम् । ऊँ इति । स्वधाम् । ऋणवः । शस्यमानः ।
कदा । भवेम । पतयः । सुऽदत्र । रायः । वन्तारः । दुस्तरस्य । साधोः ॥ ३ ॥

---

१. वासिष्ठा वि[२] अ[१]. २. °येरिति ल, °येदिति एभ. ३-३. नास्ति मूको. ४. वीसिश्व° वि[२], विशिश्व° अ[१], वीश्व° ल एभ. ५. इवि वि[२] अ[१], हविर्दि ल लभ. ६. हविर वि[२] अ[१]. ७. बोधा° मूको. ८-८. सोममग्नि वि[२] अ[१], सोमाग्नि ल एभ. ९. °मान वि[२] अ[१], °मान ए लभ. १०. ओषरि वि[२] अ[१], ओष ओषसिभि ल लभ. ११. नास्ति ल एभ. १२. कथो एभ.

वेङ्कट० कया स्वधया अस्माकम् अग्ने! त्व स्तुतिं प्रतिवससि। [1]किम् अन्नम्[1] स्तूयमान त्वम् आत्मान प्रापयसि। कदा वयम् भवेम स्वामिन सुखधन[2] राय सम्भक्तार शत्रुभि तरितुम् अशक्यस्य साधयितु[3] ॥ ३ ॥

प्रप्रायमग्निर्भरतस्य शृण्वे वि यत् सूर्यो न रोचते बृहद् भाः ।
अभि यः पूरुं पृतनासु तस्थौ द्युतानो दैव्यो अतिथिः शुशोच ॥ ४ ॥

प्रऽप्र । अयम् । अग्नि । भरतस्य । शृण्वे । वि । यत् । सूर्य । न । रोचते । बृहत् । भा ।
अभि । य । पूरुम् । पृतनासु । तस्थौ । द्युतान । दैव्य । अतिथि । शुशोच ॥ ४ ॥

वेङ्कट० प्रशृणोति अयम् अग्नि मनुष्यस्य स्तुतिम्, वि[4] रोचते यदा सूर्य इव अत्यन्तम् भासमान[5]। [6]अभि तस्थौ[6] य[7] [8]पूरुम् नामासुर[8] सङ्ग्रामेषु, स दीप्यमान दैव्य अतिथि प्रजज्वाल ॥ ४ ॥

असन्नित् त्वे आहवनानि भूरि भुवो विश्वेभिः सुमना अनीकैः ।
स्तुतश्चिदग्ने शृण्विषे गृणानः स्वयं वर्धस्व तन्वं सुजात ॥ ५ ॥

असन् । इत् । त्वे इति । आऽहवनानि । भूरि । भुव । विश्वेभि । सुऽमना । अनीकै ।
स्तुत । चित् । अग्ने । शृण्विषे । गृणान । स्वयम् । वर्धस्व । तन्वम् । सुऽजात ॥ ५ ॥

वेङ्कट० भवन्ति[9] एव त्वयि हवींषि बहूनि। भव त्वं सर्वै रश्मिभि सुमना। स्तोतु[10] अग्न[11] शृणोषि स्तुतिं स्तूयमान। स्वयम् वर्धय आत्मीयम् अङ्ग शोभनजनन[12] ॥ ५ ॥

इदं वचः शतसाः संसहस्रमुदग्नये जनिषीष्ट द्विबर्हाः ।
शं यत् स्तोतृभ्य आपये भवाति द्युमदमीवचातनं रक्षोहा ॥ ६ ॥

इदम् । वच । शतऽसा । सम्ऽसहस्रम् । उत् । अग्नये । जनिषीष्ट । द्विऽबर्हा ।
शम् । यत् । स्तोतृऽभ्य । आपये । भवाति । द्युऽमत् । अमीवऽचातनम् । रक्षःऽहा ॥ ६ ॥

वेङ्कट० इदम् वच गोशतस्य[13] सम्भक्तृ तथा सहस्रधनलम्भक्तृ[14] च अग्नये उत् जनिषीष्ट द्वयो स्थानयो परिवृढ (द्र या। ६,१७) वसिष्ठ, पृथिव्या मनुष्यो भूत्वा यतोऽत दिवि देव। सुखकरम् यत् स्तोतृभ्य आपये ज्ञातये पुत्रादिकाय भवति, तत् प्रयच्छति दीप्तिमत् रोगघातकम्[15] रक्षसां हन्तृ ॥ ६ ॥

नू त्वामग्न ईमहे वसिष्ठा ईशानं सूनो सहसो वसूनाम् ।
इषं स्तोतृभ्यो मघवद्भ्य आनड् यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

१-१. किमन्न मूको २. सुखधं मूको ३. °यितुम् मूको. ४. नास्ति एम ५ दमास° अ° एम ६-६ हि°म्य वि° अ°, हि तस्थौ ल लभ ७ यम् वि° अ° ए; नास्ति एम ८-८ पुरनामा° मूको ९. भवन् वि° अ°; भवत ल लभ १०. स्तोतुः वि°; स्तुत्य अ°. ११. अग्ने ए एम १२. शोभन- जननम् मूको. १३. गोशत° वि°; गोमत° अ°. १४. °भक्तृ वि° अ° १५ रोगघातनम् मूको

नु । त्वाम् । अग्ने । ईमहे । वसिष्ठाः । ईशानम् । सूनो इति । सहसः । वसूनाम् ।
इषम् । स्तोतृऽभ्यः । मघवत्ऽभ्यः । आनट् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥

वेङ्कट० ऋ ७,७,७ द. ॥ ७ ॥

[१]इति पञ्चमाष्टके द्वितीयाध्याये एकादशो वर्गः[१] ॥

[९]

[१]वसिष्ठो मैत्रावरुणिर्ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः[१] ।

अबोधि जार उषसामुपस्थाद्धोता मन्द्रः कवितमः पावकः ।
दधाति केतुमुभयस्य जन्तोर्हव्या देवेषु द्रविणं सुकृत्सु ॥ १ ॥

अबोधि । जारः । उषसाम् । उपऽस्थात् । होता । मन्द्रः । कविऽतमः । पावकः ।
दधाति । केतुम् । उभयस्य । जन्तोः । हव्या । देवेषु । द्रविणम् । सुकृत्ऽसु ॥ १ ॥

वेङ्कट० प्रबुद्धः उषसः जारः उषसाम् उत्सङ्गात् होता मन्द्रः कवितमः[२] पावकः । स करोति प्रज्ञानम् दैव्यस्य च मानुषस्य च जन्तोः[३], हव्यानि च देवेषु करोति, धनं च यजमानेषु ॥ १ ॥

स सुक्रतुर्यो वि दुरः पणीनां पुनानो अर्कं पुरुभोजसं नः ।
होता मन्द्रो विशां दमूनास्तिरस्तमो ददृशे राम्याणाम् ॥ २ ॥

सः । सुऽक्रतुः । यः । वि । दुरः । पणीनाम् । पुनानः । अर्कम् । पुरुऽभोजसम् । नः ।
होता । मन्द्रः । विशाम् । दमूनाः । तिरः । तमः । ददृशे । राम्याणाम् ॥ २ ॥

वेङ्कट० स सुप्रज्ञः, यः वि श्लथयति द्वाराणि पणीनाम् क्षरन्[४] प्रयच्छन्नस्मभ्यम् अर्कम्[५] बहुभक्षणम्[६] । होता मोदनः मनुष्याणाम् दममनाः[७] तिरः कुर्वन् तमांसि दृश्यते रात्रीणाम् ॥ २ ॥

अमूरः कविरदितिर्विवस्वान्सुसंसन्मित्रो अतिथिः शिवो नः ।
चित्रभानुरुषसां भात्यग्रेऽपां गर्भः प्रस्व आ विवेश ॥ ३ ॥

अमूरः । कविः । अदितिः । विवस्वान् । सुऽसंसत् । मित्रः । अतिथिः । शिवः । नः ।
चित्रऽभानुः । उषसाम् । भाति । अग्रे । अपाम् । गर्भः । प्रऽस्वः । आ । विवेश ॥ ३ ॥

वेङ्कट० अमूढः कविः अदीनः परिचरणवान् शोभनसदस्कः[८] मित्रः अतिथिः शिवः नः चित्रदीप्तिः उषसाम् अग्रे विभाति अपाम् गर्भः ओषधीः आ विवेश ॥ ३ ॥

१-१. नास्ति मूको. २. कवित अ[१] लभ. ३. °न्तो वि अ[१]. ४. क्षीरम् ए प्रस्ताव. ५. नास्ति मूको. ६. बाहुरक्ष° वि[१], बहुरक्ष° अ[१] रु लभ. ७. दमूना वि[२]. ८. °भजनवद° रा[१] लभ.

ईळेन्यो॑ वो॒ मनु॑षो यु॒गेषु॑ सम॒न॒गा अ॑शुचज्जा॒तवे॑दाः ।
सु॒सं॒दृशा॑ भा॒नुना॒ यो वि॒भाति॑ प्रति॒ गावः॑ समिधा॒नं बु॑धन्त ॥ ४ ॥

ईळेन्यः॑ । वः॒ । मनु॑षः । यु॒गेषु॑ । स॒म॒न॒ऽगाः । अ॒शु॒च॒त् । जा॒तऽवे॑दाः ।
सु॒ऽसं॒दृशा॑ । भा॒नुना॑ । यः । वि॒ऽभाति॑ । प्रति॑ । गावः॑ । स॒म्ऽइ॒धा॒नम् । बु॒ध॒न्त ॥ ४ ॥

वेङ्कट० ईडयः[1] युष्माकं मनुष्यस्य यजमानस्य यागदिवसेषु[2] सेनाग्रे गन्ता प्राज्वलत्[3] जातप्रज्ञः । शोभनसन्दर्शनेन तेजसा यः विभाति, तं स्तुतिवाचः समिध्यमानम् प्रति बोधयन्तु ॥ ४ ॥

अग्ने॒ याहि॑ दू॒त्यं१॒ मा रि॑षण्यो दे॒वाँ अच्छा॑ ब्रह्म॒कृता॑ ग॒णेन॑ ।
सर॑स्वतीं म॒रुतो॑ अ॒श्विना॒पो यक्षि॑ दे॒वान् र॑त्न॒धेया॑य॒ विश्वा॑न् ॥ ५ ॥

अग्ने॑ । या॒हि॒ । दू॒त्यम् । मा । रि॒ष॒ण्यः॒ । दे॒वान् । अच्छ॑ । ब्र॒ह्म॒ऽकृता॑ । ग॒णेन॑ ।
सर॑स्वतीम् । म॒रुतः॑ । अ॒श्विना॑ । अ॒पः । यक्षि॑ । दे॒वान् । र॒त्न॒ऽधेया॑य । विश्वा॑न् ॥ ५ ॥

वेङ्कट० अग्ने ! याहि दूत्यम्, मा चाध्वनि विनष्टो भूः, देवान् प्रति स्तोत्रकृता सङ्घेन सह ऋषीणाम् । सरस्वतीम् मरुतः अश्विनौ अपः यज रत्नानां दानाय सर्वान् देवान् इति[4] ॥ ५ ॥

त्वाम॑ग्ने समिधा॒नो वसि॑ष्ठो॒ जरू॑थं ह॒न् यक्षि॑ रा॒ये पुर॑न्धिम् ।
पु॒रु॒णी॒था जा॑तवेदो जरस्व यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥ ६ ॥

त्वाम् । अ॒ग्ने॒ । स॒म्ऽइ॒धा॒नः । वसि॑ष्ठः । जरू॑थम् । ह॒न् । यक्षि॑ । रा॒ये । पुर॑म्ऽधिम् ।
पु॒रु॒ऽनी॒था । जा॒त॒ऽवे॒दः॒ । ज॒र॒स्व॒ । यू॒यम् । पा॒त॒ । स्व॒स्तिऽभिः॑ । सदा॑ । नः॒ ॥ ६ ॥

वेङ्कट० त्वाम् अग्ने ! प्रज्वलयन् वसिष्ठः जरूथम्[5] रक्षः हन्तु । यज त्वं धनाय बहुप्रज्ञं देवगणम् । बहुनयनानि रक्षांसि जातवेदः ! जारय ॥ ६ ॥

[6]इति पञ्चमाष्टके द्वितीयाध्याये द्वादशो वर्गः[6] ॥

[१०]

[6]वसिष्ठो मैत्रावरुणिर्ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः[6] ।

उ॒षो न जा॒रः पृ॒थु पाजो॑ अश्रे॒द् दवि॑द्युत॒द् दीद्य॒च्छोशु॑चानः ।
वृषा॒ हरिः॒ शुचि॒रा भा॑ति भा॒सा धियो॒ हिन्वा॒न उ॑श॒तीर॑जीगः ॥ १ ॥

१. ईडेयं मूको एळ; ईडे वि°. २. यागादि° मू०. ३. प्रज्वाल वि° मू°. ४. नास्ति मूको. ५. द्र. ऋ ७,१,७ भाष्यम्. ६-६. नास्ति मूको.

उषः । न । जारः । पृथु । पाजः । अश्रेत् । दविद्युतत् । दीद्यत् । शोशुचानः ।
वृषा । हरिः । शुचिः । आ । भाति । भासा । धियः । हिन्वानः । उशतीः । अजीगरिति ॥१॥

वेङ्कट० आदित्यः इव पृथु बलम् श्रयति द्योतमानः दीप्यमानः प्रज्वलन्[1] । वृषा हरणशीलः शुचिः आ भाति तेजसा कर्माणि प्रेरयन् । कामयमानाः प्रजाः तमसा तिरोहिताः उज्जगारेति ॥ १ ॥

स्व१र्ण वस्तोरुषसामरोचि यज्ञं तन्वाना उशिजो न मन्म ।
अग्निर्जन्मानि देव आ वि विद्वान् द्रवद् दूतो देवयावा वनिष्ठः ॥ २ ॥

स्वः । न । वस्तोः । उषसाम् । अरोचि । यज्ञम् । तन्वानाः । उशिजः । न । मन्म ।
अग्निः । जन्मानि । देवः । आ । वि । विद्वान् । द्रवत् । दूतः । देवऽयावा । वनिष्ठः ॥ २ ॥

वेङ्कट० आदित्य [2]इव अग्निः[2] [3]उषसाम् आगमने[3] अह्नि दीप्यते । यज्ञम् कुर्वन्तः ऋत्विजः इव अग्निरपि स्तोत्रम् उच्चारयति । अग्निः देवः जातानि भूतानि जानन् विविधम् आ द्रवति दूतः देवान् प्रति गन्ता दातृतमः ॥ २ ॥

अच्छा गिरो मतयो देवयन्तीरग्निं यन्ति द्रविणं भिक्षमाणाः ।
सुसंदृशं सुप्रतीकं स्वञ्चं हव्यवाहमरतिं मानुषाणाम् ॥ ३ ॥

अच्छ । गिरः । मतयः । देवऽयन्तीः । अग्निम् । यन्ति । द्रविणम् । भिक्षमाणाः ।
सुऽसंदृशम् । सुऽप्रतीकम् । सुऽअञ्चम् । हव्यऽवाहम् । अरतिम् । मानुषाणाम् ॥ ३ ॥

वेङ्कट० स्तुतयः बुद्धयः च देवानिच्छन्त्यो यष्टुम् अग्निम् प्रथमम् अच्छ यन्ति धनम् भिक्षमाणाः शोभनसन्दर्शनम् शोभनाङ्गम् शोभनगमनम् हव्यवाहम् मनुष्यान्[4] देवान् प्रति गन्तारम् ॥ ३ ॥

इन्द्रं नो अग्ने वसुभिः सजोषा रुद्रं रुद्रेभिरा वहा बृहन्तम् ।
आदित्येभिरदितिं विश्वजन्यां बृहस्पतिमृक्वभिर्विश्ववारम् ॥ ४ ॥

इन्द्रम् । नः । अग्ने । वसुऽभिः । सऽजोषाः । रुद्रम् । रुद्रेभिः । आ । वह । बृहन्तम् ।
आदित्येभिः । अदितिम् । विश्वऽजन्याम् । बृहस्पतिम् । ऋक्वऽभिः । विश्वऽवारम् ॥ ४ ॥

वेङ्कट० इन्द्रम् नः अग्ने! वसुभिः [5]सङ्गतः त्वम्[5] आ वह, तं च रुद्रम्[6] महान्तं रुद्रैः, आदित्यैश्च सह अदितिम् विश्वजनहिताम्, बृहस्पतिम् च स्तुतिमद्भिः अङ्गिरोभिः विश्वैर्वरणीयमिति ॥ ४ ॥

मन्द्रं होतारमुशिजो यविष्ठमग्निं विश ईळते अध्वरेषु ।
स हि क्षपावाँ अभवद् रयीणामतन्द्रो दूतो यजथाय देवान् ॥ ५ ॥

---

1. °लत् मूको. 2-2. नास्ति मूको. 3-3. °सा गम° मूको. 4. मानुषाणाम् ल लभ.
5-5. °ङ्गाम् वि° अ°. 6. नास्ति मूको.

मन्द्रम् । होतारम् । उशिजं । यविष्ठम् । अग्निम् । विशः । ईळते । अध्वरेषु ।
सः । हि । क्षपाऽवान् । अभवत् । रयीणाम् । अतन्द्रः । दूतः । यजथाय । देवान् ॥ ५ ॥

वेङ्कट० मन्द्रम् होतारम् ऋत्विजं युवतमम् अग्निम् मनुष्याः स्तुवन्ति यज्ञेषु । स हि रात्रिमान् भवति धनानां दाता [1]अतन्द्रः दूतः[1] देवान् यष्टुम्[2] ॥ ५ ॥

[1]इति पञ्चमाष्टके द्वितीयाध्याये त्रयोदशो वर्गः[1] ॥

[११]

[1]वसिष्ठो मैत्रावरुणिर्ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः[1] ।

महाँ अस्यध्वरस्य प्रकेतो न ऋते त्वदमृता मादयन्ते ।
आ विश्वेभिः सरथं याहि देवैर्न्यग्ने होता प्रथमः सदेह ॥ १ ॥

महान् । असि । अध्वरस्य । प्रऽकेतः । न । ऋते । त्वत् । अमृताः । मादयन्ते ।
आ । विश्वेभिः । सऽरथम् । याहि । देवैः । नि । अग्ने । होता । प्रथमः । सद । इह ॥ १ ॥

वेङ्कट० महान् त्वम् असि अध्वरस्य प्रज्ञापयिता । न ऋते त्वत्त देवा माद्यन्ति । आ याहि सरथम् विश्वैः देवैः । नि सीद अग्ने होता स मुख्यः त्वं बर्हिषि अस्मिन् ॥ १ ॥

त्वामीळते अजिरं दूत्याय हविष्मन्तः सदमिन्मानुषासः ।
यस्य देवैरासदो बर्हिरग्नेऽहान्यस्मै सुदिना भवन्ति ॥ २ ॥

त्वाम् । ईळते । अजिरम् । दूत्याय । हविष्मन्तः । सदम् । इत् । मानुषासः ।
यस्य । देवैः । आ । असदः । बर्हिः । अग्ने । अहानि । अस्मै । सुऽदिना । भवन्ति ॥ २ ॥

वेङ्कट० त्वाम् स्तुवन्ति गमनशीलम् दूत्याय सहृतहविष्का सदा एव[3] मनुष्याः । यस्य त्वं यजमानस्य बर्हिः [4]देवैः सह आ असदः[4], अहानि अस्मै शोभनाह्यानि भवन्ति ॥ २ ॥

त्रिश्चिदक्तोः प्र चिकितुर्वसूनि त्वे अन्तर्दाशुषे मर्त्याय ।
मनुष्वदग्न इह यक्षि देवान् भवा नो दूतो अभिशस्तिपावा ॥ ३ ॥

त्रिः । चित् । अक्तोः । प्र । चिकितुः । वसूनि । त्वे इति । अन्तः । दाशुषे । मर्त्याय ।
मनुष्वत् । अग्ने । इह । यक्षि । देवान् । भव । नः । दूतः । अभिशस्तिऽपावा ॥ ३ ॥

वेङ्कट० त्रिः चित् अक्तोः[5] प्र वेदयन्ति हवींषि सवनेषु त्वयि[6] अन्तः[7] [8]यजमानाय ऋत्विजे[8] प्रयच्छते ।

१-१. नास्ति वि[1] अ[1]; द्र ओ क एम. २. नास्ति वि[1] अ[1]; युष्टु क एम. ३-३. नास्ति मूको. ४-४. मूको. ५-५. देवागमनः वि[1]. ६. अद्व वि[1] अ[1]; अत्र ए एम. ७. यदि वि[1]; यदि अ[1]. ८. नास्ति मूको. ९-९. "मानवि" वि[1] अ[1].

मनोरिव अग्ने![1] इह अस्मदीये यज्ञे[2] यज देवान् । भव न दूत अभिशस्तिभ्यो[3] रक्षिता ॥ ३ ॥

अ॒ग्निरी॑शे बृह॒तो अ॑ध्व॒रस्या॒ग्निर्विश्व॑स्य ह॒विष॑ः कृ॒तस्य॑ ।
क्रतुं॒ ह्य॑स्य॒ वस॑वो जु॒षन्ताथा॑ दे॒वा द॑धिरे हव्य॒वाह॑म् ॥ ४ ॥

अ॒ग्नि । ई॒शे॒ । बृ॒ह॒तः । अ॒ध्व॒रस्य॑ । अ॒ग्नि । विश्व॑स्य । ह॒विष॑ः । कृ॒तस्य॑ ।
क्रतु॑म् । हि । अ॒स्य॒ । वस॑वः । जु॒षन्त॑ । अथ॑ । दे॒वाः । द॒धि॒रे॒ । ह॒व्य॒ऽवाह॑म् ॥ ४ ॥

वेङ्कट० अग्नि ईशे महतः यज्ञस्य । अग्नि विश्वस्य हविषः सम्पादितस्य । प्रज्ञानम् हि अस्य वसवः सेवन्ते । अथ एनम् देवा कुर्वन्ति हविषा वोढारम्[4] ॥ ४ ॥

आग्ने॑ वह ह॒विर॑द्याय दे॒वानिन्द्र॑ज्येष्ठास इ॒ह मा॑दयन्ताम् ।
इ॒मं य॒ज्ञं दि॒वि दे॒वेषु॑ धेहि यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः ॥ ५ ॥

आ । अ॒ग्ने॒ । व॒ह॒ । ह॒वि॒ऽअद्या॑य । दे॒वान् । इन्द्र॑ऽज्येष्ठासः । इ॒ह । मा॒द॒य॒न्ता॒म् ।
इ॒मम् । य॒ज्ञम् । दि॒वि । दे॒वेषु॑ । धे॒हि॒ । यू॒यम् । पा॒त॒ । स्व॒स्तिऽभि॑ः । सदा॑ । नः॒ ॥ ५ ॥

वेङ्कट० निगदसिद्धेति ॥ ५ ॥

[5]इति पञ्चमाष्टके द्वितीयाध्याये चतुर्दशो वर्गः[5] ॥

[१२]

[6]वसिष्ठो मैत्रावरुणिर्ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः[5] ।

अग॑न्म म॒हा नम॑सा॒ यवि॑ष्ठं॒ यो दी॒दाय॒ समि॑द्ध॒ः स्वे दु॑रो॒णे ।
चि॒त्रभा॑नुं॒ रोद॑सी अ॒न्तरु॒र्वी स्वा॑हुतं वि॒श्वत॑ः प्र॒त्यञ्च॑म् ॥ १ ॥

अग॑न्म । म॒हा । नम॑सा । यवि॑ष्ठम् । यः । दी॒दाय॑ । सम्ऽइ॑द्धः । स्वे । दु॒रो॒णे ।
चि॒त्रऽभा॑नुम् । रोद॑सी॒ इति॑ । अ॒न्तः । उ॒र्वी इति॑ । सु॒ऽआ॑हुतम् । वि॒श्वत॑ः । प्र॒त्यञ्च॑म् ॥ १ ॥

वेङ्कट० गच्छाम महता नमस्कारेण युवतमम्, य दीप्यते काष्ठैः समिध्यमान आहवनीये, चित्रभानुम् द्यावापृथिव्योः विस्तीर्णयो. अन्तरे वर्तमानम्[6] स्वाहुतम् सर्वत एव अभिमुखम् । समिद्धो ह्यग्नि सर्वत दीप्त भवति भयावर्जित[7] (?) ॥ १ ॥

स म॒ह्ना विश्वा॑ दुरि॒तानि॑ सा॒ह्वान॒ग्निः ष्ट॑वे॒ दम॒ आ जा॒तवे॑दाः ।
स नो॑ रक्षिषद् दुरि॒ताद॑व॒द्याद॒स्मान् गृ॑ण॒त उ॒त नो॑ म॒घोन॑ः ॥ २ ॥

१ अत्र मूको २ नास्ति वि॰ अ॰ ३ शिरम्मा वि॰, °स्तीम्ना अ॰, °स्तीनां क लभ.
४ पोतारे वि॰ ल, पो तार अ॰, पोत्कारे लभ ५-५. नास्ति मूको ६. °मान मूको. ७ भयावर्जित वि॰ अ॰.

सः । मह्ना । विश्वा । दुःऽइतानि । सहान् । अग्निः । स्तवे । दमे । आ । जातऽवेदाः ।
सः । नः । रक्षिषत् । दुःऽइतात् । अवद्यात् । अस्मान् । गृणत । उत । नः । मघोनः ॥ २ ॥

वेङ्कट० सः महत्त्वेन विश्वानि दुरितानि सहमानः अग्निः स्तूयते यज्ञे जातप्रज्ञः । सः अस्मान् रक्षतु दुरितात् अवद्यात् च निन्दितु अस्मान् स्तुवत, अपि च अस्मान् हविष्मत इति ॥ २ ॥

त्वं वरुण उत मित्रो अग्ने त्वां वर्धन्ति मतिभिर्वसिष्ठाः ।
त्वे वसु सुषणनानि सन्तु यूयं पात स्वस्तिभिः सदा नः ॥ ३ ॥

त्वम् । वरुण । उत । मित्रः । अग्ने । त्वाम् । वर्धन्ति । मतिऽभिः । वसिष्ठाः ।
त्वे इति । वसु । सुऽसनननानि । सन्तु । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ३ ॥

वेङ्कट० त्वम् अग्ने । वरुणः अपि च मित्र भवसि । त्वाम् वर्धयन्ति स्तुतिभिः वसिष्ठाः । त्वयि स्थितानि धनानि सुदानानि सन्तु वसिष्ठेभ्य इति ॥ ३ ॥

इति पञ्चमाष्टके द्वितीयाध्याये पञ्चदशो वर्गः ॥

[१३]

वसिष्ठो मैत्रावरुणिर्ऋषिः । वैश्वानरोऽग्निर्देवता । त्रिष्टुप् छन्दः ।

प्राग्नये विश्वशुचे धियंधेऽसुरघ्ने मन्म धीतिं भरध्वम् ।
भरे हविर्न बर्हिषि प्रीणानो वैश्वानराय यतये मतीनाम् ॥ १ ॥

प्र । अग्नये । विश्वऽशुचे । धियम्ऽधे । असुरऽघ्ने । मन्म । धीतिम् । भरध्वम् ।
भरे । हविः । न । बर्हिषि । प्रीणानः । वैश्वानराय । यतये । मतीनाम् ॥ १ ॥

वेङ्कट० प्र भरध्वम् अग्नये[3] विश्वस्य शोचयित्रे कर्मणां धारयित्रे असुराणां हन्त्रे स्तुतिं कर्म च इत्युक्त्वा तथा करोमीति वदति—ददामि[4] हविः इदानीं यज्ञे प्रीयमाण वैश्वानराय नियन्त्रे स्तुतीनाम् ॥ १ ॥

त्वमग्ने शोचिषा शोशुचान आ रोदसी अपृणा जायमानः ।
त्वं देवाँ अभिशस्तेरमुञ्चो वैश्वानर जातवेदो महित्वा ॥ २ ॥

त्वम् । अग्ने । शोचिषा । शोशुचानः । आ । रोदसी इति । अपृणाः । जायमानः ।
त्वम् । देवान् । अभिऽशस्तेः । अमुञ्चः । वैश्वानर । जातऽवेदः । महिऽत्वा ॥ २ ॥

१. ते देवा हि अस्मान् वि° ल, ते देवा हि स्वा अ°; ते देवा इ असा लक्ष २. सधनानि वि° अ°, ३. °ऽवित्रवर्ध अ°. ३-४ नास्ति मूको ५. अग्ने वि° अ° ल; अग्ने ल्ज. ६. हामि अ, हामी ल्ज.

वेङ्कट० त्वम् अग्ने![1] ज्वालया ज्वलन् [2]आ प्रयसि[2] द्यावापृथिव्यौ प्रातः आदित्यात्मना जायमानः। त्वम् देवान्[3] अस्मच्छत्रूणाम्[4] असुराणाम् अभिशस्ते च मुञ्चसि वैश्वानर! जातवेद ! महत्त्वेन ॥ २ ॥

जातो यदग्ने भुवना व्यख्यः पशून् न गोपा इर्यः परिज्मा ।
वैश्वानर ब्रह्मणे विन्द गातुं यूयं पात स्वस्तिभिः सदा नः ॥ ३ ॥

जातः । यत् । अग्ने । भुवना । वि । अख्यः । पशून् । न । गोपाः । इर्यः । परिऽज्मा ।
वैश्वानर । ब्रह्मणे । विन्द । गातुम् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ३ ॥

वेङ्कट० यदा त्वम् अग्ने! प्रादुर्भूतो भूतानि[5] विविधं पश्यसि[6] पशून् इव[7] गोपालः[8] स्वामी परितो[9] गच्छन्, तदानीम् वैश्वानर! स्तोत्राय चास्माकम् लभस्व गमनमिति ॥ ३ ॥

[10]इति पञ्चमाष्टके द्वितीयाध्याये षोडशो वर्गः[10] ॥

[१४]

[1]वसिष्ठो मैत्रावरुणिर्ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः, प्रथमा बृहती[1] ।

समिधा जातवेदसे देवाय देवहूतिभिः ।
हविर्भिः शुक्रशोचिषे नमस्विनो वयं दाशेमाग्नये ॥ १ ॥

सम्ऽइधा । जातऽवेदसे । देवाय । देवहूतिऽभिः ।
हविःऽभिः । शुक्रऽशोचिषे । नमस्विनः । वयम् । दाशेम । अग्नये ॥ १ ॥

वेङ्कट० समिधा देवानाम् आह्वानैश्च सह अग्निमावह सोममावहेत्याह्वानादिभि[11] देवानाम् जातवेदसे देवाय[12] हविर्भिः दीप्ततेजसे नमस्कारयुक्ता वयम् दानं कुर्मः अग्नये ॥ १ ॥

वयं ते अग्ने समिधा विधेम वयं दाशेम सुष्टुती यजत्र ।
वयं घृतेनाध्वरस्य होतर्वयं देव हविषा भद्रशोचे ॥ २ ॥

वयम् । ते । अग्ने । सम्ऽइधा । विधेम । वयम् । दाशेम । सुऽस्तुती । यजत्र ।
वयम् । घृतेन । अध्वरस्य । होतरिति । वयम् । देव । हविषा । भद्रऽशोचे ॥ २ ॥

वेङ्कट० वयम् तुभ्यम् अग्ने! समिधा परिचरणं कुर्मः । वयम् हवींषि च दाशेम शोभनया स्तुत्या यष्टव्य![13], वयम् घृतेन अध्वरस्य होत![14], वयम् देव![15] हविषा भद्रदीप्ते! ॥ २ ॥

---

१. अग्ने वि[2]. २-२. आ दि वि[2] अ[1], आसि लश. ३. नास्ति वि[2] अ[1], दे ल एश. ४. शत्रूणाम् अ[1] लश. ५. भूतादि मूको. ६. पश्यति मूको. ७. इव च अ[1]. ८. ल मूको. ९. परतः मूको. १०-१०. नास्ति मूको. ११. ०नादि मूको. १२. देवा मूको. १३. ०ष्टव्या मूको. १४. भात. मूको. १५. देवा लश.

आ नो देवेभिरुप देवहूतिमग्ने याहि वषट्कृतिं जुषाणः ।
तुभ्यं देवाय दाशतः स्याम यूयं पात स्वस्तिभिः सदा नः ॥ ३ ॥

आ । नः । देवेभिः । उप । देवऽहूतिम् । अग्ने । याहि । वषट्ऽकृतिम् । जुषाणः ।
तुभ्यम् । देवाय । दाशतः । स्याम । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ३ ॥

वेङ्कट० 'उप आ याहि' देवैः सह अस्माकं यज्ञम् अग्ने । वषट्कारं सेवमानः । तुभ्यम् देवाय वयं ददतः[2] स्याम ॥ ३ ॥

[1]इति पञ्चमाष्टके द्वितीयाध्याये सप्तदशो वर्गः[1] ॥

[१५]

[1]वसिष्ठो मैत्रावरुणिर्ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः[1] ।

उपसद्याय मीळ्हुषं आस्ये जुहुता हविः । यो नो नेदिष्ठमाप्यम् ॥ १ ॥

उपऽसद्याय । मीळ्हुषे । आस्ये । जुहुत । हविः । यः । नः । नेदिष्ठम् । आप्यम् ॥ १ ॥

वेङ्कट० समाश्रयणीयाय कामानां दोग्ध्रे[3] प्रियार्थं तस्य आस्ये जुहुत हविः । यः अस्माकम् अन्तिकतमं ज्ञातेयं भवति ॥ १ ॥

यः पञ्च चर्षणीरभि निषसाद दमेदमे । कविर्गृहपतिर्युवा ॥ २ ॥

यः । पञ्च । चर्षणीः । अभि । निऽससाद । दमेऽदमे । कविः । गृहऽपतिः । युवा ॥ २ ॥

वेङ्कट० यः पञ्च जनान् अभि निषसाद गृहे गृहे कविः गृहपतिः युवा[5] ॥ २ ॥

स नो वेदो अमात्यमग्नी रक्षतु विश्वतः । उतास्मान् पात्वंहसः ॥ ३ ॥

स । नः । वेदः । अमात्यम् । अग्निः । रक्षतु । विश्वतः । उत । अस्मान् । पातु । अंहसः ॥३॥

वेङ्कट० सः अस्माकं धनं सहभवम् अग्निः रक्षतु सर्वतः । अपि च अस्मान् रक्षतु रक्षसः ॥ ३ ॥

नवं नु स्तोममग्नये दिवः श्येनाय जीजनम् । वस्वः कुविद् वनाति नः ॥ ४ ॥

नवम् । नु । स्तोमम् । अग्नये । दिवः । श्येनाय । जीजनम् । वस्वः । कुवित् । वनाति । नः ॥४॥

वेङ्कट० नवम् क्षिप्रम् स्तोमम् अग्नये[6] द्युलोकस्य श्येनभूताय जनयामि । स हि अस्मभ्य[7] बहुधनं प्रयच्छति ॥ ४ ॥

१-१ वर्गावधि वि'; उमायादि अ' ल रुअ. २ °त रुअ. ३-३ नास्ति मूको. ४ धर्ने रुअ. ५ युवाम् मूको. ६ अग्न मूको. ७ अ यै वि', अग्न अ'.

स्पार्हा यस्य श्रियो दृशे रयिर्वीरवतो यथा । अग्रे यज्ञस्य शोचतः ॥ ५ ॥

स्पार्हाः । यस्य । श्रियः । दृशे । रयिः । वीरऽवतः । यथा । अग्रे । यज्ञस्य । शोचतः ॥ ५ ॥

वेङ्कट० स्पृहणीया यस्य श्रिय दर्शनाय भवन्ति, यथा[1] पुत्रवत रयि दर्शनीय भवति, यज्ञस्य अग्रे आहवनीये दीप्यमानस्य ॥ ५ ॥

[2]इति पञ्चमाष्टके द्वितीयाध्याये अष्टादशो वर्ग [2] ॥

सेमां वेतु वषट्कृतिमग्निर्जुषत नो गिरः । यजिष्ठो हव्यवाहनः ॥ ६ ॥

सः । इमाम् । वेतु । वषट्ऽकृतिम् । अग्निः । जुषत । नः । गिरः । यजिष्ठः । हव्यऽवाहनः ॥६॥

वेङ्कट० स इम वषट्कार कामयताम् अग्नि , सेवताम् गिर च अस्माकम् यष्टृतम[3] हविषा वोढा[4] ॥६॥

नि त्वा नक्ष्य विश्पते द्युमन्तं देव धीमहि । सुवीरमग्न आहुत ॥ ७ ॥

नि । त्वा । नक्ष्य । विश्पते । द्युऽमन्तम् । देव । धीमहि । सुऽवीरम् । अग्ने । आऽहुत ॥ ७ ॥

वेङ्कट० नि धीमहि स्थाने त्वाम् उपगन्तव्य[5] विशापते[6] द्युमन्तम्[7] देव ।[8] सुवीरम् अग्ने । आहुत ।[9] ॥७॥

क्षप उस्रश्च दीदिहि स्वग्नयस्त्वया वयम् । सुवीरस्त्वमस्मयुः ॥ ८ ॥

क्षपः । उस्रः । च । दीदिहि । सुऽअग्नयः । त्वया । वयम् । सुऽवीरः । त्वम् । अस्मऽयुः ॥८॥

वेङ्कट० रात्री अहानि च सर्वदा त्व दीप्यस्व । स्वग्नय त्वया वयम् । त्वम् च सुवीर अस्मत्काम[10] ॥ ८ ॥

उप त्वा सातये नरो विप्रासो यन्ति धीतिभिः । उपाक्षरा सहस्रिणी ॥ ९ ॥

उप । त्वा । सातये । नरः । विप्रासः । यन्ति । धीतिऽभिः । उप । अक्षरा । सहस्रिणी ॥ ९ ॥

वेङ्कट० उप यन्ति त्वा[11] लाभाय नर मेधाविन[12] कर्मभि । उप याति [13]वाक् सहस्रसङ्ख्यायुक्ता[13] ॥९॥

अग्नी रक्षांसि सेधति शुक्रशोचिरमर्त्यः । शुचिः पावक ईड्यः ॥ १० ॥

अग्निः । रक्षांसि । सेधति । शुक्रऽशोचिः । अमर्त्यः । शुचिः । पावकः । ईड्यः ॥ १० ॥

वेङ्कट० अग्नि रक्षांसि निषेधति शुक्रेति स्पष्टम् ॥ १० ॥

[2]इति पञ्चमाष्टके द्वितीयाध्याये एकोनविंशो वर्ग [2] ॥

---

१. नास्ति लअ २ २. नास्ति मूको. ३ °तमा मूको ४ पोषम् वि[1] अ[1]. ५ °न्त्याद् मूको ६ °त मूको ७ ममत वि[2] ल एअ, ममन्त अ[1]. ८ देव वि[2] ल ९ °तम् मूको. १० अस्मान् काम ल लअ ११. त्वा मूको १२. °विनं मूको, १३-१३ वाक्यसहस्रसंख्या° (°से ल्या° लअ) मूको.

स नो राधांस्या भरेशानः सहसो यहो । भगश्च दातु वार्यम् ॥ ११ ॥

सः । नः । राधांसि । आ । भर । ईशानः । सहसः । यहो इति । भगः । च । दातु । वार्यम् ॥

वेङ्कट० सः अस्मभ्यं धनानि आ हर ईशानः हे सहसः पुत्र![1] । भगः[2] च देवः त्वदनुचरः[3] प्रयच्छतु धनम् ॥ ११ ॥

त्वमग्ने वीरवद् यशो देवश्च सविता भगः । दितिश्च दाति वार्यम् ॥ १२ ॥

त्वम् । अग्ने । वीरऽवत् । यशः । देवः । च । सविता । भगः । दितिः । च । दाति । वार्यम् ॥१२॥

वेङ्कट० त्वम् अग्ने । वीरवत् अन्नम् देवः च सविता भगः च [4]दितिः च[4] देवी धनं प्रयच्छतु ॥ १२ ॥

अग्ने रक्षा णो अंहसः प्रति ष्म देव रीषतः । तपिष्ठैरजरो दह ॥ १३ ॥

अग्ने । रक्ष । नः । अंहसः । प्रति । स्म । देव । रिषतः । तपिष्ठैः । अजरः । दह ॥ १३ ॥

वेङ्कट० अग्ने! रक्ष अस्मान् रक्षसः । प्रति दह देव![5] हिंसतः[6] तप्ततमैः[7] त्वत्तेजोभिः[8] अजरः[9] ॥ १३ ॥

अधा मही न आयस्यनाधृष्टो नृपीतये । पूर्भवा शतभुजिः ॥ १४ ॥

अध । मही । नः । आयसी । अनाधृष्टः । नृऽपीतये । पूः । भव । शतऽभुजिः ॥ १४ ॥

वेङ्कट० अध[10] महती अयसा निर्मिता अस्माकं पुरी । त्वम् भव शत्रुभिः अनाधृष्टः । त्वं नृणां[11] रक्षणार्थम् शतभुजिः [12]बहुरक्षकः इति[12] ॥ १४ ॥

त्वं नः पाह्यंहसो दोषावस्तरघायतः । दिवा नक्तमदाभ्य ॥ १५ ॥

त्वम् । नः । पाहि । अंहसः । दोषाऽवस्तः । अघऽयतः । दिवा । नक्तम् । अदाभ्य ॥ १५ ॥

वेङ्कट० त्वम् अस्मान् रक्ष रक्षसः दोषावस्तः![13] अघम्[14] इच्छतः । तदेवोक्तम्—दिवा नक्तम् रक्ष[15] अहिंसित! इति ॥ १५ ॥

[16]इति पञ्चमाष्टके द्वितीयाध्याये विंशो वर्गः[16] ॥

[१६]

[16]वसिष्ठो मैत्रावरुणिर्ऋषिः । अग्निर्देवता । प्रगाथः छन्दः (विषमा बृहती, समा सतोबृहती)[16] ।

एना वो अग्निं नमसोर्जो नपातमा हुवे ।
प्रियं चेतिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतम् ॥ १ ॥

---

१. °त्रम् अ[1]. २. भगम् मूको. ३. त्वमनु° मूको. ४-४. नास्ति वि[1] अ[1]; अदितिश्च ल लभ. ५. देवे मूको. ६. हिंसितः वि[1]. ७. तृप्ततमैः (°मैः अ[1].) मूको. ८. तत्तेजोदिः वि[1] अ[1]; त्वत्तेजोभिः क लभ. ९. अहरणु मूको. १०. अह मूको. ११. नः वि[1]; नास्ति अ[1]. १२-१२. °क्षके वि[2] अ[1]; °क्षकेति ल लभ. १३. °वस्ता मूको. १४. अरम् अ[1] ल भक. १५. नास्ति वि[1]. १६-१६. नास्ति मूको.

एना । वः । अग्निम् । नमसा । ऊर्जः । नपातम् । आ । हुवे ।
प्रियम् । चेतिष्ठम् । अरतिम् । सुऽअध्वरम् । विश्वस्य । दूतम् । अमृतम् ॥ १ ॥

वेङ्कट० अनेन युष्माकम् अग्निम् अन्नेन अन्नस्य पुत्रम् आ ह्वयामि प्रियम् अतिशयेन ज्ञातारं गन्तारं सुयज्ञम् विश्वस्य यजमानस्य दूतम् अमृतम् ॥ १ ॥

स योजते अरुषा विश्वभोजसा स दुद्रवत् स्वाहुतः ।
सुब्रह्मा यज्ञः सुशमी वसूनां देवं राधो जनानाम् ॥ २ ॥

सः । योजते । अरुषा । विश्वऽभोजसा । सः । दुद्रवत् । सुऽआहुतः ।
सुऽब्रह्मा । यज्ञः । सुऽशमी । वसूनाम् । देवम् । राधः । जनानाम् ॥ २ ॥

वेङ्कट० सः युनक्ति 'आरोचमानौ अश्वौ' विश्वस्य भोक्तारौ । सः अत्यन्तं द्रवति देवलोकं प्रति स्वाहुतः । सोऽयं वसूनाम् मध्ये सुस्तोत्रः यष्टव्यः सुकर्मा च देवनशीलं धनं प्रयच्छति यजमानानाम् ॥ २ ॥

उदस्य शोचिरस्थादाजुह्वानस्य मीळ्हुषः ।
उद् धूमासो अरुषासो दिविस्पृशः समग्निमिन्धते नरः ॥ ३ ॥

उत् । अस्य । शोचिः । अस्थात् । आऽजुह्वानस्य । मीळ्हुषः ।
उत् । धूमासः । अरुषासः । दिविऽस्पृशः । सम् । अग्निम् । इन्धते । नरः ॥ ३ ॥

वेङ्कट० उत् तिष्ठति अस्य दीप्तिः आहूयमानस्य सेक्तुः । 'उत् तस्थुः[1] धूमाश्च आरोचमानाः[1] दिविस्पृशः । तम् अग्निम् सम् इन्धते मनुष्याः[2] ॥ ३ ॥

तं त्वा दूतं कृण्महे यशस्तमं देवाँ आ वीतये वह ।
विश्वा सूनो सहसो मर्तभोजना रास्व तद् यत् त्वेमहे ॥ ४ ॥

तम् । त्वा । दूतम् । कृण्महे । यशःऽतमम् । देवान् । आ । वीतये । वह ।
विश्वा । सूनो इति । सहसः । मर्तऽभोजना । रास्व । तत् । यत् । त्वा । ईमहे ॥ ४ ॥

वेङ्कट० तम्[3] त्वा दूतम् कुर्मः यशस्वितमम् । देवान् आ वह अशनाय । हे सहसः सूनो ! विश्वानि अपि मनुष्यभोज्यानि देहि तदानीम्, यदा[4] त्वा याचामहे ॥ ४ ॥

त्वमग्ने गृहपतिस्त्वं होता नो अध्वरे ।
त्वं पोता विश्ववार प्रचेता यक्षि वेषि च वार्यम् ॥ ५ ॥

१-१. °मानाश्चो वि[१] अ[१], °मानाविश्वो ल रुभ. २-२ उत्थरश्मूद् वि[१] अ[१], उत्थरश्मू ल, उक्त रुभ ३. °चमा रुभ ४. °ध्या वा अ[१]. ५. नो रुभ, त्वम वि[१] अ[१] ल ६. यत्र मनि च अ[१].

त्वम् । अग्ने । गृहऽपति । त्वम् । होता । नः । अध्वरे ।
त्वम् । पोता । विश्वऽवार । प्रऽचैता । यक्षि । वेषि । च । वार्यम् ॥ ५ ॥

वेङ्कट० त्वम् अग्ने! गृहपति, त्वम् होता च असि अस्माकं यज्ञे, त्वम् पोता च विश्वैर्वरणीय! प्रकृष्टज्ञान! तथा सति त्वं देवान् यज, भक्षय च हवि वरणीयम् ॥ ५ ॥

कृधि रत्नं यजमानाय सुक्रतो त्वं हि रत्नधा असि ।
आ नं ऋते शिशीहि विश्वमृत्विजं सुशंसो यश्च दक्षते ॥ ६ ॥

कृधि । रत्नम् । यजमानाय । सुक्रतो इति सुऽक्रतो । त्वम् । हि । रत्नऽधा । असि ।
आ । न । ऋते । शिशीहि । विश्वम् । ऋत्विजम् । सुऽशंसं । य । च । दक्षते ॥ ६ ॥

वेङ्कट० कुरु रत्नम् यजमानाय सुकर्मन्[1] । त्वम् हि रत्नस्य दाता भवसि । स त्वम् आशीर्भि तीक्ष्णीकुरु अस्माकं यज्ञे सर्वम् ऋत्विजम् शोभनशंसम्[1], य च होता सहते, त चेति ॥ ६ ॥

[2]इति पञ्चमाष्टके द्वितीयाध्याये एकविंशो वर्ग[2] ॥

त्वे अग्ने स्वाहुत प्रियासः सन्तु सूरयः ।
यन्तारो ये मघवानो जनानामूर्वान् दयन्त गोनाम् ॥ ७ ॥

त्वे इति । अग्ने । सुऽआहुत । प्रियास । सन्तु । सूरयं ।
य तार । ये । मघऽवान । जनानाम् । ऊर्वान् । दयन्त । गोनाम् ॥ ७ ॥

वेङ्कट० त्वयि अग्ने! स्वाहुत! प्रिया सन्तु प्राज्ञा, प्रयन्तार[3] ये आढ्या जनानाम् सङ्घातान्[4] प्रयच्छन्ति गवा दरिद्रेभ्य ॥ ७ ॥

येषामिळा घृतहस्ता दुरोण आँ अपि प्राता निषीदति ।
ताँस्त्रायस्व सहस्य द्रुहो निदो यच्छा नः शर्म दीर्घश्रुत् ॥ ८ ॥

येषाम् । इळा । घृतऽहस्ता । दुरोणे । आ । अपि । प्राता । निऽसीदति ।
तान् । त्रायस्व । सहस्य । द्रुह । निद । यच्छ । न । शर्म । दीर्घऽश्रुत् ॥ ८ ॥

वेङ्कट० येषाम् जनानाम् इळा[5] अन्नम् [6]घृतहस्ता गृहे[6] निषीदति, अन्नस्य प्राता प्रदाता च। दासादि सघृतमन्नं प्रयच्छतीत्यर्थ[7] । [8]तान् त्रायस्व[8] सहसो जात! द्रोग्धु निन्दितु च, यच्छ च अस्मभ्य सुख दीर्घकाल श्रोतव्यम् ॥ ८ ॥

---

१. गोह° अ[1] लभ २-२. नास्ति मूको ३. मन्नातार अ[1], मभातार लभ ४. °ताष् अ[1] लभ ५. नास्ति मूको. ६-६. घृते हस्ते इस्तं गृहीत अ[1]. ७. °च्छतीत्य° वि[2] अ[1] लभ. ८-८. तान्त्रायस्व मूको

स मन्द्रया च जिह्वया वह्निरासा विदुष्टरः ।
अग्ने रयिं मघवद्भ्यो न आ वह हव्यदातिं च सूदय ॥ ९ ॥

सः । मन्द्रया । च । जिह्वया । वह्निः । आसा । विदुःऽतरः ।
अग्ने । रयिम् । मघवत्ऽभ्यः । नः । आ । वह । हव्यऽदातिम् । च । सूदय ॥ ९ ॥

वेङ्कट० सः मन्द्रया वाचा च आस्यस्थानीयया[1] ज्वालया च हविषो वोढा भवति विद्वत्तरः । अग्ने! रयिम् आढ्येभ्यः अस्मभ्यम् आ वह । [2]यजमानम् च प्रेरय[2] । 'यजमानो वै हव्यदातिः' इति शतपथब्राह्मणम् (१,४,१,२४) ॥ ९ ॥

ये राधांसि ददत्यश्व्या मघा कामेन श्रवसो महः ।
ताँ अंहसः पिपृहि पर्तृभिष्ट्वं शतं पूर्भिर्यविष्ठ्य ॥ १० ॥

ये । राधांसि । ददति । अश्व्या । मघा । कामेन । श्रवसः । महः ।
तान् । अंहसः । पिपृहि । पर्तृऽभिः । त्वम् । शतम् । पूःऽभिः । यविष्ठ्य ॥ १० ॥

वेङ्कट० ये अन्नानि प्रयच्छन्ति अश्वसङ्घान् धनानि च कामेन श्रवसः यशसो महतो महत् यशः कामयमानाः, तान् अंहसः पालय पालयितृभिः तेजोभिः त्वम् पुरां शतेन युवतम![3] ॥ १० ॥

देवो वो द्रविणोदाः पूर्णां विवष्ट्यासिचम् ।
उद् वा सिञ्चध्वमुप वा पृणध्वमादिद् वो देव ओहते ॥ ११ ॥

देवः । वः । द्रविणःऽदाः । पूर्णाम् । विवष्टि । आऽसिचम् ।
उत् । वा । सिञ्चध्वम् । उप । वा । पृणध्वम् । आत् । इत् । वः । देवः । ओहते ॥ ११ ॥

वेङ्कट० देवः युष्माकं धनस्य प्रदाता अग्निः पूर्णाम् कामयते जुहूम्[4] । तथा[5] सति द्रोणकलशात् सोमम् उत् वा सिञ्चध्वम् उप वा गृहीतं प्रयच्छत[6] । समुच्चयार्थीयौ वाशब्दौ । अनन्तरम् एव युष्मान् देवः वहति ॥ ११ ॥

तं होतारमध्वरस्य प्रचेतसं वह्निं देवा अकृण्वत ।
दधाति रत्नं विधते सुवीर्यमग्निर्जनाय दाशुषे ॥ १२ ॥

तम् । होतारम् । अध्वरस्य । प्रऽचेतसम् । वह्निम् । देवाः । अकृण्वत ।
दधाति । रत्नम् । विधते । सुऽवीर्यम् । अग्निः । जनाय । दाशुषे ॥ १२ ॥

---

१. आस्या स्थानीयेन वि[2] अ[1] लभ; आस्यास्था[°] ल. २-२. नास्ति मूको. ३. युवतम् वि[2] अ[1] लभ. ४. नास्ति वि[1] अ[1]. ५. तथापि वि[2] ल; तथासि लभ. ६. °च्छत् वि[2].

वेङ्कट० तम् द्रातारम्[1] अध्वरस्य प्रचेतसम् योतारम् देवाः अकुर्वन्[2] । शिष्टं स्पष्टमिति ॥ १२ ॥

[3]इति पञ्चमाष्टके द्वितीयाध्याये द्वाविंशो वर्गः[3] ॥

[१७]

[4]वसिष्ठो मैत्रावरुणिर्ऋषिः । अग्निर्देवता । द्विपदा त्रिष्टुप् छन्दः[4] ।

अग्ने भव सुषमिधा समिद्ध उत बर्हिरुर्विया वि स्तृणीताम् ॥ १ ॥

अग्ने । भव । सुऽसमिधा । सम्ऽइद्धः । उत । बर्हिः । उर्विया । वि । स्तृणीताम् ॥ १ ॥

वेङ्कट० द्वैपदमिदं सूक्तम् । अग्ने ! भव शोभनया समिधा समिद्धः । [5]अपि च[5] [6]उर्विया उरु[6] [7]बर्हिः वि स्तृणातु[7] ॥ १ ॥

उत द्वार उशतीर्वि श्रयन्तामुत देवाँ उशत आ वहेह ॥ २ ॥

उत । द्वारः । उशतीः । वि । श्रयन्ताम् । उत । देवान् । उशतः । आ । वह । इह ॥ २ ॥

वेङ्कट० अपि च द्वारः देव्यः कामयमानाः विवृताः भवन्तु । उत[7] देवान् कामयमानान् इह आ वह ॥ २ ॥

अग्ने वीहि हविषा यक्षि देवान्त्स्वध्वरा कृणुहि जातवेदः ॥ ३ ॥

अग्ने । वीहि । हविषा । यक्षि । देवान् । सुऽअध्वरा । कृणुहि । जातऽवेदः ॥ ३ ॥

वेङ्कट० अग्ने ! गच्छ, हविषा यज च देवान् । सुयज्ञांश्च [8]कुरु तान्[8] जातवेदः ! ॥ ३ ॥

स्वध्वरा करति जातवेदा यक्षद्देवाँ अमृतान्पिप्रयच्च ॥ ४ ॥

सुऽअध्वरा । करति । जातऽवेदाः । यक्षत् । देवान् । अमृतान् । पिप्रयत् । च ॥ ४ ॥

वेङ्कट० स्वध्वरान्[9] करोतु देवान् जातवेदाः, यजतु देवान् अमृतान्, प्रीणयतु च ॥ ४ ॥

वंस्व विश्वा वार्याणि प्रचेतः सत्या भवन्त्वाशिषो नो अद्य ॥ ५ ॥

वंस्व । विश्वा । वार्याणि । प्रचेत इति प्रऽचेतः । सत्याः । भवन्तु । आऽशिषः । नः । अद्य ॥ ५ ॥

वेङ्कट० देहि विश्वानि धनानि प्रचेतः ! । सत्यानि भवन्तु आशासनानि अस्माकम् इदानीम् ॥ ५ ॥

त्वामु ते दधिरे हव्यवाहं देवासो अग्न ऊर्ज आ नपातम् ॥ ६ ॥

---

१ होता° अ[1] लभ. २ युङ्क° वि[2], युङ्क° ल लभ. ३-३. नास्ति मूको. ४-४. नास्ति वि[2] अ[1], नाथा ल लभ. ५-५ नास्ति वि[2] अ[1], भवयूवद लभ. ६-६ नास्ति वि[2] अ[1]. ७ तत् मूको, तव ल प्रस्ताव°. ८-८. कुरुता मूको, कुरु ल प्रस्ताव. ९. °रा अ[1] लभ.

त्वाम् । ऊँ इति । ते । दधिरे । हव्यऽवाहम् । देवास । अग्ने । ऊर्जे । आ । नपातम् ॥ ६ ॥

वेङ्कट० त्वाम् एव ते कृतवन्त हव्यवाहम् देवा अग्ने! अन्नस्य पुत्रम् । आ-कार पूरण ॥ ६ ॥

ते ते देवाय दाशतः स्याम महो नो रत्ना वि दध इयानः ॥ ७ ॥

ते । ते । देवाय । दाशत । स्याम । मह । न । रत्ना । वि । दध । इयान ॥ ७ ॥

वेङ्कट० ते वय तुभ्यम् देवाय हवींषि[1] ददत[2] स्याम । महास्त्वम् अस्मभ्य रत्नानि वि धेहि याच्यमान ॥ ७ ॥

[3]इति पञ्चमाष्टके द्वितीयाध्याये त्रयोविंशो वर्ग[3] ॥

[१८]

[4]वसिष्ठो मैत्रावरुणिर्ऋषि । इन्द्रो देवता, अन्त्याना चतसृणा सुदा पैजवन । त्रिष्टुप् छन्द[4] ।

त्वे ह यत् पितरश्चिन्न इन्द्र विश्वा वामा जरितारो असन्वन् ।
त्वे गावः सुदुघास्त्वे ह्यश्वास्त्वं वसु देवयते वनिष्ठः ॥ १ ॥

त्वे इति । ह । यत् । पितर । चित् । न । इन्द्र । विश्वा । वामा । जरितार । असन्वन् ।
त्वे इति । गाव । सुऽदुघा । त्वे इति । हि । अश्वा । त्वम् । वसु । देवऽयते । वनिष्ठ ॥१॥

वेङ्कट० त्वय्येव यस्मात् पितर अपि अस्माकम् इन्द्र! विश्वानि धनानि स्तोतार अभजन्त । ततो वय च त्वा स्तुम । त्वयि एव सुदुघा गाव सन्ति, त्वयि एव अश्वा । त्वम् वसु[5], यजमानाय अत्यन्तम् वनिष्ठ दानशील ॥ १ ॥

राजेव हि जनिभिः क्षेष्येवाव द्युभिरभि विदुष्कविः सन् ।
पिशा गिरो मघवन् गोभिरश्वैस्त्वायतः शिशीहि राये अस्मान् ॥ २ ॥

राजाऽइव । हि । जनिऽभि । क्षेषि । एव । अव । द्युऽभि । अभि । विदु । कवि । सन् ।
पिशा । गिर । मघऽवन् । गोभि । अश्वै । त्वाऽयत । शिशीहि । राये । अस्मान् ॥ २ ॥

वेङ्कट० राजा इव हि जायाभि अभ्युपगच्छसि[5] एव दीप्तिभि विद्वान् क्रान्त सन् । पिशा प्रजया स्तुवत गोभि अश्वै च हे मघवन्! त्वत्कामान् तीक्ष्णीकुरु धनार्थम् अस्मान् ॥ २ ॥

इमा उ त्वा पस्पृधानासो अत्र मन्द्रा गिरो देवयन्तीरुप स्थुः ।
अर्वाची ते पथ्या राय एतु स्याम ते सुमताविन्द्र शर्मन् ॥ ३ ॥

---

१ हविषि वि[?] मू°. २. ददत एम ३ ३. नास्ति मूको. ४. ष मूको. ५. अभ्युपग°
ष एव.

इमाः । ॐ इति । त्वा । पस्पृधानासः । अत्र । मन्द्राः । गिरः । देवऽयन्तीः । उप । स्थुः ।
अर्वाची । ते । पथ्या । रायः । एतु । स्याम । ते । सुऽमतौ । इन्द्र । शर्मन् ॥ ३ ॥

वेङ्कट० इमाः एव त्वां स्वयमेवेतरेतरं स्पर्धमानाः अस्मिन् यज्ञे मदयन्त्यः[1] स्तुतयः देवं त्वां कामयमानाः उप तिष्ठन्ति । तथा सति अभिमुखी तव धनस्य प्रदात्री मार्गम् एतु । स्याम ते वयम् सुमतौ सुखहेतुभूतायाम् इन्द्र ! ॥ ३ ॥

धेनुं न त्वा सूयवसे दुदुक्षन्नुप ब्रह्माणि ससृजे वसिष्ठः ।
त्वामिन्मे गोपतिं विश्व आहा न इन्द्रः सुमतिं गन्त्वच्छ ॥ ४ ॥

धेनुम् । न । त्वा । सुऽयवसे । दुधुक्षन् । उप । ब्रह्माणि । ससृजे । वसिष्ठः ।
त्वाम् । इत् । मे । गोऽपतिम् । विश्वः । आह । आ । नः । इन्द्रः । सुऽमतिम् । गन्तु । अच्छ ॥

वेङ्कट० धेनुम् इव त्वां शोभनयवसे[2] गोष्ठे दोग्धुमिच्छन् वसिष्ठः स्तोत्राणि धाराधानानि उप सृजति[3] । त्वाम् एव मे गोपतिम् सर्वो जनः वदति । अथ परोक्षः—आ गच्छतु अस्माकम् इन्द्रः [4]सुष्ठु स्तुतिम् अभीति[4] ॥ ४ ॥

अर्णांसि चित् पप्रथाना सुदास इन्द्रो गाधान्यकृणोत् सुपारा ।
शर्धन्तं शिम्युमुचथस्य नव्यः शापं सिन्धूनामकृणोदशस्तीः ॥ ५ ॥

अर्णांसि । चित् । पप्रथाना । सुऽदासे । इन्द्रः । गाधानि । अकृणोत् । सुऽपारा ।
शर्धन्तम् । शिम्युम् । उचथस्य । नव्यः । शापम् । सिन्धूनाम् । अकृणोत् । अशस्तीः ॥ ५ ॥

वेङ्कट० उदकानि चित् प्रथमानानि सुदासे राज्ञे इन्द्रः गाधानि[5] अकृणोत् शोभनपाराणि[6] । अगाधानि[7] उदकानि गाधानि[8] कृत्वा पैजवनम्[9] गमयामासेति । वर्धमानम् शिम्युम्[10] वेदार[11] बाधकम् कृतयोः[11] उचथस्य स्तोतव्यः शाप इत्युदकनाम तम् सिन्धूनाम् अकरोत् अहिंसितः ॥ ५ ॥

[12]इति पञ्चमाष्टके द्वितीयाध्याये चतुर्विंशो वर्गः[13] ॥

पुरोळा इत् तुर्वशो यक्षुरासीद् राये मत्स्यासो निशिता अपीव ।
श्रुष्टिं चक्रुर्भृगवो द्रुह्यवश्च सखा सखायमतरद् विषूचोः ॥ ६ ॥

पुरोळाः । इत् । तुर्वशः । यक्षुः । आसीत् । राये । मत्स्यासः । निऽशिताः । अपिऽइव ।
श्रुष्टिम् । चक्रुः । भृगवः । द्रुह्यवः । च । सखा । सखायम् । अतरत् । विषूचोः ॥ ६ ॥

---

१. °यन्त्य वि[1] अ[1]. २. °नयसे अ[1] ल लभ; °नवसे वि[1]. ३. °जन्ति मूको. ४-४. सुष्ठु स्तुम् महीति वि[1]; तु अहीति अ[1]; सुष्मतिम् ल लभ, सुष्टुतिम् ल प्रस्तावः. ५. गोधा° मूको. ६ °नपरा° मूको. ७. अगाधादि वि[1] लभ; अगाधादि अ[1] ल. ८. नास्ति वि[1]. ९. पैज° मूको १०. शिम्युं वि[1] ल लभ, शिम्यु अ[1]. ११. वोढा° अ[1]. १२. तुल[1] मूको. १२-१३. नास्ति मूको

वेङ्कट० पुरोदाता धनानाम्[1] तुर्वश नाम राजा यक्षु आसीत् इन्द्रप्रियार्थम् । अथ तस्मै मत्स्यदेशस्था अपि धनाय अभवन् । बलिनम् करम् प्रददु । तथा तस्य भृगव द्रुह्यव च श्रुष्टिम् चक्रु[2] कर्मसु शीघ्रम् आगमन चक्रु, यज्ञार्थं भृगव शत्रुवधार्थं द्रुह्यव । सखा इन्द्र सखायम् तुर्वशम् अतरत् विषूचुनाश्च शत्रो ॥ ६ ॥

आ पुक्थासो॑ भलानसो॑ भनन्तालि॑नासो विषाणिनः॑ शिवासः॑ ।
आ योऽन॑यत् सधमा आर्य॑स्य गव्या तृत्सुभ्यो॑ अजगन् युधा नृन् ॥ ७ ॥

आ । पुक्थास॑ । भलानस॑ । भनन्त । आ । अलि॑नास । विषाणिन॑ । शिवास॑ ।
आ । य । अन॑यत् । सधऽमा । आर्य॑स्य । गव्या । तृत्सुऽभ्य । अजगन् । युधा । नृन् ॥७॥

वेङ्कट० आभिमुख्येन तत्येन्द्रस्य स्वभूता शब्दमकुर्वन् पक्का भलानसा भलाश्च अनसश्च । [1]'भल भनर्के, अन अनते[2] गतिकर्मण । उभयविधा शरा भवन्ति विवृतमुखा नाशयमुखाश्चेति । त उभयेऽप्यग्निपक्का भवन्ति । शत्रुशरीरेषु एव लीना शरीर निर्भिद्य शीघ्र गच्छन्त विषाणिन रुरुश्टङ्गेण सद्कृत्त कल्याणा ऋजव । 'आगक्ता या रुरुशीर्ष्णी' (ऋ ६, ७५, १५) इति मन्त्र । य इन्द्र सहमदन आर्यस्य [3]'आ अनयत्' तुर्वशस्य । स [4]'गोसङ्घान् तृत्सुभ्य आगमयत्[4] तुर्वश प्रति । युद्धेन नेतुम् 'तच्छत्रूंश्च अजयत्' ॥ ७ ॥

दुराध्यो॒३ अदि॑तिं स्रेवय॑न्तोऽचेतसो वि ज॑गृभ्रे परु॑ष्णीम् ।
मह्नावि॑व्यक् पृथिवीं पत्य॑मानः पशुष्कविर॑शयच्चाय॑मानः ॥ ८ ॥

दुःऽआध्य॑ । अदि॑तिम् । स्रेवय॑न्त । अचेतस॑ । वि । जगृभ्रे । परु॑ष्णीम् ।
मह्ना । अविव्यक् । पृथिवीम् । पत्य॑मान । पशु । कविः । अशयत् । चाय॑मान ॥ ८ ॥

वेङ्कट० दुर्बुद्धय अदीनाम् परुष्णीकूलभेदनेन शोषयन्त अज्ञाना विविध गृहीतवन्त परुष्णीम् नदीम् [5]"सुदास अभिभवाय" शासमानस्य राज्ञ सैनिका[6] । महत्त्वेन सेनाया चायमान सर्वाम् पृथिवीम् अविव्यक[9] व्याप्तवान् आगच्छत् । अथ युद्धे निर्जित [10]"पशु इव अशयत् क्रान्तकर्मेति[10] ॥८॥

ईयुरर्थं न न्य॑र्थं परु॑ष्णीमाशुश्चनेद॑भिपित्वं ज॑गाम ।
सुदास इन्द्रः॑ सुतुका॑ँ अमित्रानर॑न्धयन्मानु॑षे वध्रि॑वाचः ॥ ९ ॥

ईयु । अर्थम् । न । निऽअर्थम् । परु॑ष्णीम् । आशु । चन । इत् । अभिऽपित्वम् । जगाम ।
सुऽदासे । इन्द्र । सुऽतुकान् । अमित्रान् । अरन्धयत् । मानुषे । वध्रिऽवाच ॥ ९ ॥

---

१ नानाम ल एभ, नानाम् वि॰ अ॰, जनानां ए महतार. २ चक्रु मूको ३ ३. इलो हिनघोरेनोनते वि॰ अ॰, इलो हिनघोरेनोऽनते क, इलो हिनवरैनेते एभ. ४ ४. मयन्यन वि॰ अ॰, आनयन् ए एभ. ५ ५ शोम ग॰ वि॰ अ॰ शोसंघान् तृत्सु॰ ए एभ ६-६. शुदितम् वि॰ अ॰, तच्छत्रूंश्चायन् ए, तत् एन्छयन् एभ ७ ७ "सोदिस॰ मूको ८ सैनिका मूको ९ अपि वि॰ अ॰, अविव्यग् ए एभ १०-१० परशुरिव क्रा॰ वि॰ अ॰, परशुरिव अ॰॰ ए एभ,

वेङ्कट० भिन्नाम् परुष्णीम् इन्द्र सन्दधे । तस्या[1] तीरवासिन्य प्रजा[1] परुष्णीम् सार्थम् ईयुः न न्यर्थम् । अश्य चास्य शत्रूणाम् अभिप्राप्तिम् जघान । सुदासे इन्द्र सुहिंसान् अमित्रान्, तुफ तुजतेर्हिंसाकर्मण, वशमनयत्[2] मानुष अस्मिन् लोके प्रवृद्धवाच सुदास इति[3] ॥ ९ ॥

ईयुर्गावो न यवसादगोपा यथाकृतमभि मित्रं चितासः ।
पृश्निगावः पृश्निनिप्रेषितासः श्रुष्टिं चक्रुर्नियुतो रन्तयश्च ॥ १० ॥

ईयु । गावं । न । यर्वसात् । अगोपा । यथाऽकृतम् । अभि । मित्रम् । चितासं ।
पृश्निऽगाव । पृश्निऽनिप्रेषितास । श्रुष्टिम् । चक्रु । निऽयुतं । रन्तय । च ॥ १० ॥

वङ्कट० यथा गाव यवसमुद्दिश्य अरक्ष्यमाणा यथाकाम गच्छन्ति, तद्वद् यथाकृतम् सविदनुरूपम् अभि अगच्छन् मित्रम् इन्द्र प्रति चेतयमाना । पृश्निगाव पृश्निवर्णाश्वा पृश्निप्रसूता आशुष्माहि चक्रु नियुत रन्तयश्च इति मरुत उच्यन्ते, नियच्छन्तीति नियुत, रमयन्तीति रन्तय । सुदास प्रति गच्छन्तमिन्द्र मरुतश्चाभ्यगच्छन्नित्यर्थ ॥ १० ॥

"इति पञ्चमाष्टके द्वितीयाध्याये पञ्चविंशो वर्ग " ॥

एकं च यो विंशतिं च श्रवस्या वैकर्णयोर्जनान् राजा न्यस्तः ।
दस्मो न सद्मन् नि शिशाति बर्हिः शूरः सर्गमकृणोदिन्द्र एषाम् ॥ ११ ॥

एकम् । च । य॰ । विंशतिम् । च । श्रवस्या । वैकर्णयो । जनान् । राजा । नि । अस्तरित्यस्तं ।
दस्म । न । सद्मन् । नि । शिशाति । बर्हि । शूर । सर्गम् । अकृणोत् । इन्द्र । एषाम् ॥ ११ ॥

वेङ्कट० एकम् च य विंशतिम् च अन्नेच्छया वैकर्णयो जनपदयो जनान् अधिपतीन् राजा [4]सुदा पैजवन[4] [5]नि अस्तारीत्[5] । दस्म कर्मशील इव अध्वर्यु यज्ञे नि वृश्चति बर्हि [6]सुदा पैजवन[6] शत्रुम् । तदानीम् शूर इन्द्र[7] एषाम् सस्थान विनाश मारणम् अकरोत् युद्ध इति ॥ ११ ॥

अध श्रुतं कवषं वृद्धमप्स्वनु द्रुह्युं नि वृणग्वज्रबाहुः ।
वृणाना अत्र सख्याय सख्यं त्वायन्तो ये अमदन्ननु त्वा ॥ १२ ॥

अध । श्रुतम् । कवषम् । वृद्धम् । अप्ऽसु । अनु । द्रुह्युम् । नि । वृणक् । वज्रऽबाहु ।
वृणाना । अत्र । सख्याय । सख्यम् । त्वाऽयन्त । य । अमदन् । अनु । त्वा ॥ १२ ॥

वेङ्कट० अनन्तरम् एव विश्रुत कवषनामानम् अप्सु वृद्धम् अनुक्रमेण द्रुह्युम् च निवृक्णवान्[8] वज्र बाहु[9] । अथ प्रत्यक्ष । वृणाना[10] अत्र त्वयि[11] सख्यसिद्ध्यर्थं त्वया[12] सख्यम् त्वत्कामा ये त्वाम्

---

१ १ °सिन्यजा वि[2] अ[1], °सियजा ल लभ २ पजगशामन यद् अ[1], पशामन यद् वि[2], पशमनयत् ल लभ, वशमानयत् क प्रस्ताव ३ °ति प्राहु अ[1]. ४ ४ नास्ति मूको ५ ५. सुदा वैज° वि[2] ल लभ, सुदासो वैज° अ[1] ६ ६ न्यस्तारि मूको, न्यस्त ल प्रस्ताव. ७ इमद्र मूको, ८ निवृक्ण निवृक्णान्वा[1] वि[1] अ[1], निवृण° ल लभ. ९ बाबा° मूको १०. प्राणा° मूको ११ त्वयि मूको. १२. त्वया मूको

अनु अमदन्[1] । एषां मीत्यर्थं सुदासः सैनिकैः स्तुतः कवषं द्रुह्युं च न्यहन् इत्यर्थः ॥ १२ ॥

वि सद्यो विश्वा दृंहितान्येषामिन्द्रः पुरः सहसा सप्त दर्दः ।
व्यानवस्य तृत्सवे गयं भाग्जेष्म पूरुं विदथे मृध्रवाचम् ॥ १३ ॥

वि । सद्यः । विश्वा । दृंहितानि । एषाम् । इन्द्रः । पुरः । सहसा । सप्त । दर्दरिति दर्दः ।
वि । आनवस्य । तृत्सवे । गयम् । भाक् । जेष्म । पूरुम् । विदथे । मृध्रऽवाचम् ॥ १३ ॥

वेङ्कट० वि अदारयत्[2] सद्यः एव विश्वानि अपि दृंहितानि दृढानि प्राकारादीनि एषाम् सुदासः शत्रूणाम्[3] इन्द्रः पुरीश्च अन्याजेन सप्त । वि अभजच्च अनोः[4] पुत्रस्य पुरं [5]तद्धनं तृत्सवे । तमेनं[5] स्तुवन्तो वयं जयेम पूरुम् सङ्ग्रामे परुषवाचमिति[6] ॥ १३ ॥

नि गव्यवोऽनवो द्रुह्यवश्च षष्टिः शता सुषुपुः षट् सहस्रा ।
षष्टिर्वीरासो अधि षड् दुवोयु विश्वेदिन्द्रस्य वीर्या कृतानि ॥ १४ ॥

नि । गव्यवः । अनवः । द्रुह्यवः । च । षष्टिः । शता । सुसुपुः । षट् । सहस्रा ।
षष्टिः । वीरासः । अधि । षट् । दुवःऽयु । विश्वा । इत् । इन्द्रस्य । वीर्या । कृतानि ॥ १४ ॥

वेङ्कट० नि सुषुपुः मृताः सुदासः गाः अपहर्तुमिच्छन्तः अनवः द्रुह्यवः च षष्टिः शता षट् सहस्राणि पुनश्च षष्टिः वीराः पुनश्च षट् । परिचरणमिच्छतः[7] सुदासः इन्द्रस्य एतानि विश्वानि कर्माणीति । दुवोयु इति षष्ठ्यन्तमिति ॥ १४ ॥

इन्द्रेणैते तृत्सवो वेविषाणा आपो न सृष्टा अधवन्त नीचीः ।
दुर्मित्रासः प्रकलविन्मिमाना जहुर्विश्वानि भोजना सुदासे ॥ १५ ॥

इन्द्रेण । एते । तृत्सवः । वेविषाणाः । आपः । न । सृष्टाः । अधवन्त । नीचीः ।
दुःऽमित्रासः । प्रकलऽवित् । मिमानाः । जहुः । विश्वानि । भोजना । सुऽदासे ॥ १५ ॥

वेङ्कट० इन्द्रेण एते तृत्सवः व्याप्नुवन्तः आपः इव गमनोद्युक्ता नीचीनाः[8] अधावन्[9] पराजिताः दुर्मित्रासः प्रकलविदः कलाश्च जानन्तो वणिजः[10] [11]परिच्छेद्यं परिच्छिन्दन्तः । तृत्सवः[11] नूनं वणिजः । ते जहुः विश्वानि धनानि सुदासे राज्ञे ॥ १५ ॥

[12]इति पञ्चमाष्टके द्वितीयाध्याये षड्विंशो वर्गः[12] ॥

---

१. °मदन्नि मूको. २. दार° मूको. ३. सुतः सशत्रू° लभ. ४. अनो मूको. ५-५. °त्वा…तमे° वि° अ°. ६. परुष्वा° वि° अ° ल; पाप्वाच° लभ. ७. परिमिच्छन्तः अ°; परिमाणमिच्छन्तः वि°. ८. नीचि° मूको. ९. °धावद् वि° ल लभ; आधावद् अ°. १०. °जम् वि° अ°; °ज ल लभ. ११-११. परिच्छिद्य तत्सृत° वि°; °च्छिद्यं स्वस्वपाशो अ°; °च्छिद्यन्तस्तृत्स्वे ल लभ. १२-१२. नास्ति मूको.

अर्धं वीरस्य शृतपामनिन्द्रं परा शर्धन्तं नुनुदे अभि क्षाम् ।
इन्द्रो मन्युं मन्युम्यो मिमाय भेजे पथो वर्तनिं पत्यमानः ॥ १६ ॥

अर्धम् । वीरस्य । शृतऽपाम् । अनिन्द्रम् । परा । शर्धन्तम् । नुनुदे । अभि । क्षाम् ।
इन्द्रः । मन्युम् । मन्युऽम्यः । मिमाय । भेजे । पथः । वर्तनिम् । पत्यमानः ॥ १६ ॥

वेङ्कट० मघानाम् अर्धम् वीरस्य 'अभ्यावर्तिन चायमानस्य' शृतस्य' पातारम् अयष्टव्य इन्द्र इति स्वमिमशास्ये शृत' प्रक्षिपन्त स्ववीर्ये अधिगुप्ता' शुहृतेत्युक्तम् इन्द्रवर्जितम् परा नुनुदे शर्धन्तम् पृथिव्याः सुदासो युद्धे । तदानीम् इन्द्र क्रोधम् मन्युना हिंसितु चायमानस्य अबाधत । स च चायमान पथ युद्धमार्गात् वर्तनिम् वर्तनयोग्य परोक्ष देशम् भेजे युद्धदेशाद् अपगच्छन्निति ॥ १६ ॥

आध्रेण चित् तद्वेकं चकार सिंह्यं चित् पेत्वेना जघान ।
अवं स्रक्तीर्वेश्यावृश्चदिन्द्रः प्रायच्छद् विश्वा भोजना सुदासे ॥ १७ ॥

आध्रेण । चित् । तत् । ऊँ इति । एकम् । चकार । सिंह्यम् । चित् । पेत्वेन । जघान ।
अव । स्रक्तीः । वेश्या । अवृश्चत् । इन्द्रः । प्र । अयच्छत् । विश्वा । भोजना । सुऽदासे ॥१७॥

वेङ्कट० 'तत् खलु' इन्द्र दरिद्रेण धनानाम् एकम् गमनम् दानम् चकार । तथा अजेन सिंहम् अपि जघान । तथा वास्याऽवतक्षणीया यूपादेः स्रक्ती' वेश्या अव अवृश्चत् । वेशी' सूची । यथैते अर्था 'दुरशका, एवा' दुश्शकोऽयमर्थो यत् सुदासे शत्रूणा सर्वाण्यन्नानि इन्द्र प्र अयच्छत् इति ॥ १७ ॥

शश्वन्तो हि शत्रवो रारधुष्टे भेदस्यं चिच्छर्धतो विन्द रन्धिम् ।
मर्ताँ एनः स्तुवतो यः कृणोति तिग्मं तस्मिन् नि जहि वज्रमिन्द्र ॥ १८ ॥

शश्वन्त । हि । शत्रव । ररधु । ते । भेदस्य । चित् । शर्धत । विन्द । रन्धिम् ।
मर्तान् । एनः । स्तुवत । यः । कृणोति । तिग्मम् । तस्मिन् । नि । जहि । वज्रम् । इन्द्र ॥१८॥

वेङ्कट० बहव हि शत्रव तव वशीभूता । तथा सति 'भेदस्य चायमानस्य' अपि वर्धमानस्य वशम् लम्भय । "तमपि वशं नय" । मर्तान् "एन त्वाम् स्तुवत" य करोति चायमान तिग्मम् तस्मिन् नि जहि वज्रम् इन्द्र । ॥ १८ ॥

आवदिन्द्रं यमुना तृत्सवश्च प्रात्र भेदं सर्वताता मुषायत् ।
अजासश्च शिग्रवो यक्षवश्च बलिं शीर्षाणि जभ्रुरश्व्यानि ॥ १९ ॥

---

१ १. °र्तिन नवराव° मूको. २. शृत° मूको ३. शित वि° अ°; शित छ एभ ४ °सा च अ° ५-५ ° शुटितम् वि° अ°, तत् छ एभ ६. स्रक्ति. वि° अ° स, स्रक्ती छभ ७ वशी मूको ८ ८. शुटितम् एभ † एव वि° अ° स. १०. °दरमाचाय° लभ १०-१०. °रिलगाय वि°, °शिलगाय अ°, °रि लश्गाय छ एभ ११-११. एन स्तुवत वि°, " स्तुव ३ अ°, °स्तुवन्त ए एभ

आवत् । इन्द्रम् । यमुना । तृत्सव । च । प्र । अत्र । भेदम् । सर्वऽताता । मुषायत् ।
अजासः । च । शिग्रवः । यक्षवः । च । बलिम् । शीर्षाणि । जभ्रुः । अश्व्यानि ॥ १९ ॥

वेङ्कट० यमुना नदी तृत्सवः च योद्धारः तृत्सून् प्रति युद्धाय आगच्छन्[1] । यमुनाया तृत्सुभि[2] सङ्गमे इन्द्र इति । तत्र प्र मुषायत्[3] यमुनाया युद्धे चायमानं जघान । तदानीम् अजासः शिग्रवः यक्षवः च जनपदनामान्येतानीति तत्र जाता इन्द्राय भेदस्य अधानाम् शीर्षाणि छित्त्वा बलिम् जह्रुः[4] । अश्वत प्राक्षिपदश्वशिरासीत्यर्थः ॥ १९ ॥

न त इन्द्र सुमतयो न रायः संचक्षे पूर्वा उषसो न नूत्नाः ।
देवकं चिन्मान्यमानं जघन्थाव त्मना बृहतः शम्बरं भेत् ॥ २० ॥

न । ते । इन्द्र । सुऽमतयः । न । रायः । सम्ऽचक्षे । पूर्वाः । उषसः । न । नूत्नाः ।
देवकम् । चित् । मान्यमानम् । जघन्थ । अव । त्मना । बृहतः । शम्बरम् । भेत् ॥ २० ॥

वेङ्कट० न ते इन्द्र! सुमतयः न च धनानि सङ्ख्यातुं शक्यन्ते । न गता उषसः नापि नूतना[5] इत्यौपमिकम् । देवकनामानम् असुरं मन्यमानस्य पुत्रम् जघन्थ[6] । अव अभैत्सीः[7] शम्बरम् स्वयमेव बृहतः शिलोच्चयात् ॥ २० ॥

इति पञ्चमाष्टके द्वितीयाध्याये सप्तविंशो वर्गः ॥

प्र ये गृहादममदुस्त्वाया पराशरः शतयातुर्वसिष्ठः ।
न ते भोजस्य सख्यं मृषन्ताधा सूरिभ्यः सुदिना व्युच्छान् ॥ २१ ॥

प्र । ये । गृहात् । अममदुः । त्वाऽया । पराऽशरः । शतऽयातुः । वसिष्ठः ।
न । ते । भोजस्य । सख्यम् । मृषन्त । अध । सूरिऽभ्यः । सुऽदिना । वि । उच्छान् ॥ २१ ॥

वेङ्कट० ये प्र अममदुः प्रकर्षेण तृप्यन्ति गार्हस्थ्याश्रमात्[8] त्वत्कामनया परिव्राजाश्रमो[9] इज्यते[10] । त च पराशर शतयातु[11] शक्ति बहुभिर्यातुधानैः बद्धानिति वसिष्ठ च अहम् । तेषामस्माकं भोजयितुः तव सख्यम् शत्रवः न मृष्यन्ति । यथा सति स्तोतृभ्योऽस्मभ्य सुदिनानि अहानि वि उच्छन्ति[12] ॥ २१ ॥

द्वे नप्तुर्देववतः शते गोर्द्वा रथा वधूमन्ता सुदासः ।
अर्हन्नग्ने पैजवनस्य दानं होतेव सद्म पर्येमि रेभन् ॥ २२ ॥

---

१ °पश्यद् वि॰ छ लभ, °पश्यैं भ॰ २ तास्तुहि वि॰ भ॰ ३ °मुष्णास्य भ॰ लभ ४ मस्तुः भ॰. ५. भूत॰ मूको ६. जघन्थ ल ७ अभ॰ मूको ८-८. नास्ति मूको ९ अभयात् वि॰ भ॰. १०. ताका॰ वि॰ भ॰ ११. °ज्यमे तौ वि॰ ए °ज्यम तौ भ॰, °ज्यमा ने लभ. १२. नास्ति वि॰ भ॰. १३ °च्छन्य मूको.

द्वे इति॑ । नप्तुः॑ । देवऽव॑तः । श॒ते इति॑ । गोः । द्वा । रथा॑ । व॒धूऽम॑न्ता । सु॒ऽदासः॑ ।
अर्ह॑न् । अ॒ग्ने॒ । पै॒ज॒ऽव॒नस्य॑ । दान॑म् । होता॑ऽइव । सद्म॑ । परि॑ । ए॒मि॒ । रेभ॑न् ॥ २२ ॥

वेङ्कट० पैजवनस्य चतस्रोऽन्त्या दानस्तुतिः[1] । देववतः [2]नप्तुः पौत्रस्य[2] पैजवनस्य गवाम्[3] द्वे शते द्वौ च रथौ वधूयुक्तौ सुदासः[4] । पूजयन् अग्ने । पैजवनस्य एवंरूपं दत्तं[5] धनम् परि गच्छामि स्तुन्वन् होता इव होतृषदनमिति[6] ॥ २२ ॥

च॒त्वारो॑ मा पैजव॒नस्य॑ दा॒नाः स्मदि॑ष्टयः कृश॒निनो॑ निरे॒के ।
ऋ॒ज्रासो॑ मा पृथिवि॒ष्ठाः सु॒दास॑स्तो॒कं तो॒काय॒ श्रव॑से वहन्ति ॥ २३ ॥

च॒त्वारः॑ । मा॒ । पै॒ज॒ऽव॒नस्य॑ । दानाः॑ । स्मत्ऽदि॑ष्टयः । कृ॒श॒निनः॑ । नि॒ऽरे॒के ।
ऋ॒ज्रासः॑ । मा॒ । पृ॒थि॒वि॒ऽस्थाः । सु॒ऽदासः॑ । तो॒कम् । तो॒काय॑ । श्रव॑से । व॒ह॒न्ति॒ ॥ २३ ॥

वेङ्कट० चत्वारः मा पैजवनस्य देयाः अश्वाः प्रशस्तधनातिसर्जनाः[7] सुवर्णालङ्कृताः गमनवेलायाम् ऋजुगामिनः[8] पृथिव्यां सुसंस्थिताः सुदासः राज्ञः पुत्रभूतं[9] पुत्रस्य अन्नार्थम् वहन्ति इति । पुनः मा इति पूरणम् ॥ २३ ॥

यस्य॒ श्रवो॒ रोद॑सी अ॒न्तरु॒र्वी शी॒र्ष्णेशी॑र्ष्णे वि॒बभा॒जा वि॒भ॒क्ता ।
स॒प्तेदिन्द्रं॒ न स्र॒वतो॑ गृणन्ति॒ नि यु॑ध्याम॒धिम॑शिशाद॒भीके॑ ॥ २४ ॥

यस्य॑ । श्रवः॑ । रोद॑सी॒ इति॑ । अ॒न्तः । उ॒र्वी इति॑ । शी॒र्ष्णेऽशी॑र्ष्णे । वि॒ऽब॒भाज॑ । वि॒ऽभ॒क्ता ।
स॒प्त । इत् । इन्द्र॑म् । न । स्र॒वतः॑ । गृ॒ण॒न्ति॒ । नि । यु॒ध्याम॒धिम् । अ॒शि॒शा॒त् । अ॒भीके॑ ॥ २४ ॥

वेङ्कट० यस्य यशः द्यावापृथिव्योः महत्योः मध्ये भवति । सर्वमन्तरिक्षमस्य यशसा व्याप्तम् । यश्च[10] शीर्ष्णेशीर्ष्णे धनं विभजति धनस्य विभक्ता । सर्वेभ्यः पुरुषेभ्यः प्रयच्छतीत्यर्थः । तं सर्वे[11] च लोकाः उदारम् इन्द्रम् इव नद्यः स्तुवन्ति । सोऽयं सङ्ग्रामे [12]युध्यामधिम् नाम[12] शत्रुम् नि अशिशात्, जघानेत्यर्थः ॥ २४ ॥

इ॒मं नरो॑ मरुतः सश्च॒तानु॒ दिवो॑दासं॒ न पि॒तरं॑ सु॒दासः॑ ।
अ॒वि॒ष्टना॑ पैजव॒नस्य॒ केतं॑ दू॒णाशं॑ क्ष॒त्रम॒जरं॑ दुवो॒यु ॥ २५ ॥

इ॒मम् । न॒रः॒ । म॒रु॒तः॒ । स॒श्च॒त॒ । अनु॑ । दिवः॑ऽदासम् । न । पि॒तर॑म् । सु॒ऽदासः॑ ।
अ॒वि॒ष्टन॑ । पै॒ज॒ऽव॒नस्य॑ । केत॑म् । दुः॒ऽनशं॑म् । क्ष॒त्रम् । अ॒जर॑म् । दु॒वः॒ऽयु ॥ २५ ॥

---

१. दाने स्तु° मूको. २-२. नप्तारौ° वि° अ°. ३. गवा एभ. ४. °दासु मूको. ५. धरो वि° अ°. ६. °षद° मूको ७. °स्तवनागमस° वि° ल; स्तवनागमस° अ°; °स्तधनातिसिस° एभ. ८. °मिनं मूको. ९. पुत्रं मूर्त वि° अ°; पुत्रभूत क एभ. १०. यशश्च वि° अ°. ११. सर्व मूको. १२-१२. °मधिनौ° मूको; °मधिनम° एभप्रस्तावः.

वेङ्कट० इमम् पैजवन हे नेतार मरुत । अनु सेवध्वम् अस्य रक्षार्थम् दिवोदासम् इव सुदास[1] पितरम् । रक्षत च पैजवनस्य गृहम् दूणाशम्[2] । अस्तु अस्य बलम् जरारहितम् परिचरणकामस्येति ॥ २५ ॥

[3]इति पञ्चमाष्टके द्वितीयाध्याये अष्टाविंशो वर्ग[3] ॥

[१९]

[3]वसिष्ठो मैत्रावरुणिर्ऋषि । इन्द्रो देवता । त्रिष्टुप् छन्द[3] ।

यस्तिग्मशृङ्गो वृषभो न भीम एकः कृष्टीश्च्यावयति प्र विश्वाः ।
यः शश्वतो अदाशुषो गयस्य प्रयन्तासि सुष्वितराय वेदः ॥ १ ॥

य । तिग्मऽशृङ्ग । वृषभ । न । भीम । एक । कृष्टी । च्यवयति । प्र । विश्वा ।
य । शश्वत । अदाशुष । गयस्य । प्रऽयन्ता । असि । सुस्विऽतराय । वेद ॥ १ ॥

वेङ्कट० य तिग्मशृङ्ग वृषभ[4] इव भयानक एक[5] प्रजा विश्वा प्र च्यावयति, य च त्वम् बहो अदाशुष अयजमानस्य गृहस्य सम्बन्धि धनम् आहरसि, स त्वम् आहृतं तद्धन प्रयच्छसि, अतिशयेन सोमाभिषव कुर्वते यजमानायेति ॥ १ ॥

त्वं ह त्यदिन्द्र कुत्समावः शुश्रूषमाणस्तन्वा समर्ये ।
दासं यच्छुष्णं कुयवं न्यस्मा अरन्धय आर्जुनेयाय शिक्षन् ॥ २ ॥

त्वम् । ह । त्यत् । इन्द्र । कुत्सम् । आव । शुश्रूषमाण । तन्वा । सऽमर्ये ।
दासम् । यत् । शुष्णम् । कुयवम् । नि । अस्मै । अरन्धय । आर्जुनेयाय । शिक्षन् ॥ २ ॥

वेङ्कट० त्वम् खलु एतत्[6] इन्द्र[9] कुत्सम्[7] अरक्ष परिचर्यमाणस्तव पुत्रेण कुत्सेन सङ्ग्रामे । यदा[8] अस्मै कुत्साय अर्जुन्या पुत्राय कुयवम् उपक्षयितारम् शुष्णम् च नि अरन्धय, वशम् अनय इत्यर्थ, एतत्[6] कर्तव्यम् इति शिक्षन् इति ॥ २ ॥

त्वं धृष्णो धृषता वीतहव्यं प्रावो विश्वाभिरूतिभिः सुदासम् ।
प्र पौरुकुत्सिं त्रसदस्युमावः क्षेत्रसाता वृत्रहत्येषु पूरुम् ॥ ३ ॥

त्वम् । धृष्णो इति । धृषता । वीतऽहव्यम् । प्र । आव । विश्वाभि । ऊतिऽभि । सुऽदासम् ।
प्र । पौरुऽकुत्सिम् । त्रसदस्युम् । आव । क्षेत्रऽसाता । वृत्रऽहत्येषु । पूरुम् ॥ ३ ॥

वेङ्कट० त्वम् धृष्णो । बलेन दत्तहव्यम् प्र आव विश्वै पालनै[10] सुदासम् । [11]प्र आव च[11] पुरुकुत्सपुत्रम् त्रसदस्युम् । [11]आव च[11] क्षेत्रसम्भजने सङ्ग्रामेषु [12]पूरुम् च[12] राजानमिति ॥ ३ ॥

---

१. सुदास मूको २. दूणा° एभ, दुणा° वि° अ°. ३ ३ नास्ति मूको. ४. °भन अ°.
५ एव वि° अ°. ६ पातत् क एभ. ७ नरक्ष अ°, रक्ष एभ. ८ यदा वि°, या अ°
९ नास्ति मूको १० °पितारै वि° ए एभ, °पितानै अ°. ११ ११ नास्ति मूको.
१२-१२ पूरुच वि° अ°; पंच क लभ.

त्वं नृभिर्नृमणो देववीतौ भूरीणि वृत्रा हर्यश्व हंसि ।
त्वं नि दस्युं चुमुरिं धुनिं चास्वापयो दभीतये सुहन्तु ॥ ४ ॥

त्वम् । नृऽभिः । नृऽमनः । देवऽवीतौ । भूरीणि । वृत्रा । हरिऽअश्व । हंसि ।
त्वम् । नि । दस्युम् । चुमुरिम् । धुनिम् । च । अस्वापयः । दभीतये । सुऽहन्तु ॥ ४ ॥

वेङ्कट० त्वम् मरुद्भिः हे नेतृशीलमनस्क![1] यज्ञार्थं बहूनि वृत्राणि हर्यश्व! अनाशयः[2] । [3]त्वम् नि अस्वापयः[3] उपक्षपयितारम् चुमुरिम् धुनिम् च दभीतये राज्ञे तत्प्रीत्यर्थं शोभनहननेनायुधेनेति ॥ ४ ॥

तव च्यौत्नानि वज्रहस्त तानि नव यत् पुरो नवतिं च सद्यः ।
निवेशने शततमाविवेषीरहंश्च वृत्रं नमुचिमुताहन् ॥ ५ ॥

तव । च्यौत्नानि । वज्रऽहस्त । तानि । नव । यत् । पुरः । नवतिम् । च । सद्यः ।
निऽवेशने । शतऽतमा । अविवेषीः । अहन् । च । वृत्रम् । नमुचिम् । उत । अहन् ॥ ५ ॥

वेङ्कट० तव बलानि वज्रहस्त! तानि नव[4] यत् पुरः नवतिम् च सद्यः एवाशथः(?) । स त्वं शतानि पुराणां भगेषु जाग्रत्स्वन्तर्निविष्टेष्वेव व्याप्तवानसि । तदा अहिम् नमुचिम् च जघन्थेति[5] ॥ ५ ॥

[6]इति पञ्चमाष्टके द्वितीयाध्याये एकोनत्रिंशो वर्गः[6] ॥

सना ता त इन्द्र भोजनानि रातहव्याय दाशुषे सुदासे ।
वृष्णे ते हरी वृषणा युनज्मि व्यन्तु ब्रह्माणि पुरुशाक वाजम् ॥ ६ ॥

सना । ता । ते । इन्द्र । भोजनानि । रातऽहव्याय । दाशुषे । सुऽदासे ।
वृष्णे । ते । हरी इति । वृषणा । युनज्मि । व्यन्तु । ब्रह्माणि । पुरुऽशाक । वाजम् ॥ ६ ॥

वेङ्कट० सनातनानि[7] तानि इन्द्र! तव भोजनानि अन्नानि दत्तहविष्काय धनानि प्रयच्छते सुदासे अभूवन्[8] । वृष्णे तुभ्यम् हरी वर्षितारौ युनज्मि । [9]प्राप्नुवन्तु मदीयानि स्तोत्राणि[9] हे बहुसहाय! अन्नम्[10] ॥ ६ ॥

मा ते अस्यां सहसावन् परिष्टावघाय भूम हरिवः परादै ।
त्रायस्व नोऽवृकेभिर्वरूथैस्तव प्रियासः सूरिषु स्याम ॥ ७ ॥

---

१. °मनस्त मूको. २. नाशय मूको. ३-३. नि त्वं न्यस्वा° वि° अ°; नि त्वं यस्वा° ल छभ. ४. नव अ° छभ. ५. जघन्थेति वि° अ°; जघानेति ल छभ; जघानेति ल प्रस्तावः. ६-६. नास्ति मूको. ७. रनानि छभ. ८. इयन् वि°; भुवन् अ°. ९-९. प्राप्नुव ··· स्तो° वि° अ°; प्राप्नुवन्तम् ल छभ. १०. नास्ति वि° अ°.

मा । ते । अस्याम् । सहसाऽवन् । परिष्टौ । अघाय । भूम । हरिऽवः । पराऽदै ।
त्रायस्व । नः । अवृकेभिः । वरूथैः । तव । प्रियासः । सूरिषु । स्याम ॥ ७ ॥

वेङ्कट० अस्मिन्[1] ते[1] ऽन्वेषण क्रियमाणे सहसावन्! हरिवः! वयम् अघाय परादै मा[2] [3]भूम। मा अस्मान्[3] घातकाय परादा इत्यर्थः। त्रायस्व अस्मान् वृकरहितैः गृहैः। तव प्रियासः वयम् स्याम स्तोतॄणां मध्ये ॥ ७ ॥

प्रियास इत् ते मघवन्नभिष्टौ नरो मदेम शरणे सखायः।
नि तुर्वशं नि याद्वं शिशीह्यतिथिग्वाय शंस्यं करिष्यन् ॥ ८ ॥

प्रियासः । इत् । ते । मघऽवन् । अभिष्टौ । नरः । मदेम । शरणे । सखायः ।
नि । तुर्वशम् । नि । याद्वम् । शिशीहि । अतिथिऽग्वाय । शंस्यम् । करिष्यन् ॥ ८ ॥

वेङ्कट० प्रियास एव ते मघवन्! अभ्येषणे[4] नेतारः मादेम गृहे समानख्याना तव। नि शिशीहि याद्वम्[5] च तुर्वशम्[6] च दिवोदासाय अतिथिग्वाय शसनीयं धनम् करिष्यन्। निशिशीहि[7] तनूकुर्विति ॥ ८ ॥

सद्यश्चिन्नु ते मघवन्नभिष्टौ नरः शंसन्त्युक्थशास उक्था।
ये ते हवेभिर्वि पणीँरदाशन्नस्मान् वृणीष्व युज्याय तस्मै ॥ ९ ॥

सद्यः । चित् । नु । ते । मघऽवन् । अभिष्टौ । नरः । शंसन्ति । उक्थऽशासः । उक्था ।
ये । ते । हवेभिः । वि । पणीन् । अदाशन् । अस्मान् । वृणीष्व । युज्याय । तस्मै ॥ ९ ॥

वेङ्कट० सद्य एव क्षिप्रं तव मघवन्! अभ्येषणार्थम्[8] [8]उक्थाना शंसितारः नरः उक्थानि[9] शंसन्ति। ये तव स्तोत्रैः पणीनपि धनानि प्रदापयन्ति[10], तान् अस्मान् त्वम् वृणीष्व सख्याय[11] तस्मै त्वदीयायेति ॥ ९ ॥

एते स्तोमा नरां नृतम तुभ्यमस्मद्र्यञ्चो ददतो मघानि।
तेषामिन्द्र वृत्रहत्ये शिवो भूः सखा च शूरोऽविता च नृणाम् ॥ १० ॥

एते । स्तोमाः । नराम् । नृऽतम । तुभ्यम् । अस्मद्र्यञ्चः । ददतः । मघानि ।
तेषाम् । इन्द्र । वृत्रऽहत्ये । शिवः । भूः । सखा । च । शूरः । अविता । च । नृणाम् ॥ १० ॥

वेङ्कट० नेतॄणाम् अस्माकम् एते स्तोमाः हे नेतृतम[1] तुभ्यम् अस्माभिः क्रियन्ते। तथा सति

---

१ नास्ति वि॰ अ॰ लभ. २ नास्ति मूको. ३-३ हममस्मान् मूको. ४ अभ्ये॰° मूको. ५ यादं वि॰; यद्वं अ॰, यदु लभ. ६ °शम् वि॰ अ॰ लभ. ७ कन्वा॰ मूको. ८-८ अर्थानां द्विशितॄ मूको. ९ 'उक्थानि' इत्य॰. १० प्रदय॰ अ॰. ११ संख्याय मूको.

अस्मदभिमुखा भवेयुः धनानि ददतः उदाराः। तेषाम् उदाराणाम् इन्द्र! सङ्ग्रामेषु कल्याणः भूः सखा च शूरः रक्षिता 'च नृणाम्' इति ॥ १० ॥

नू इ॑न्द्र शूर॒ स्तव॑मान ऊ॒ती ब्रह्म॑जूतस्त॒न्वा॑ वावृधस्व ।
उप॑ नो॒ वाजा॑न् मिमी॒ह्युप॒ स्तीन् यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः ॥ ११ ॥

नु । इन्द्र॒ । शूर॒ । स्तव॑मानः । ऊ॒ती । ब्रह्म॑ऽजूतः । त॒न्वा॑ । व॒वृ॒धस्व॒ ।
उप॑ । न॒ः । वाजा॑न् । मि॒मी॒हि॒ । उप॑ । स्तीन् । यू॒यम् । पा॒त॒ । स्व॒स्तिऽभि॑ः । सदा॑ । न॒ः ॥ ११ ॥

वेङ्कट० क्षिप्रम् इन्द्र! शूर! स्तूयमानः रक्षणाय स्तोत्राकृष्टः शरीरेण '[2]वृद्धो भव[2]', उप मिमीहि च अस्माकम् अन्नानि। उप मिमीहि च गृहानिति ॥ ११ ॥

[3]इति पञ्चमाष्टके द्वितीयाध्याये त्रिंशो वर्गः[3] ॥

व्याख्यद् द्वितीयमध्यायं पञ्चमस्याष्टकस्य सः ।
गाधिनेयकुले जातो माधवो वेङ्कटात्मजः ॥ १ ॥

इति वेङ्कटमाधवाचार्यविरचिते ऋक्संहिताव्याख्याने पञ्चमाष्टके द्वितीयोऽध्यायः ।

—*—

इति ऋग्वेदे सभाष्ये पञ्चमाष्टके द्वितीयोऽध्यायः ॥

---

१. भगस्° मूको. २-२. वृद्धा ··· त वि° अ¹; वृद्धा तव स लभ. ३-३. नास्ति मूको.

अथ तृतीयोऽध्यायः ।

वेङ्कट० 'उग्रो जज्ञे [१]वीर्याय(य' इ)ति[१] व्याचिख्यासति माधवः ।
शमितेषु मितर्षीणाम् आगमे कारणं वदन्[२] ॥ १ ॥

'जातवेदसे'[३] इत्येतत् प्रसङ्गात् सूक्तमागतम् ।
कुत्समध्ये कश्यपार्षं कुत्सेन बहवः स्तुताः ॥ २ ॥

औपसो[४] द्रविणोदाश्च शुचिर्वैश्वानरस्तथा ।
जातवेदसमप्यग्निम् अथ तुष्टाव कश्यपः[५] ॥ ३ ॥

स्तुतो मरुत्वान् कुत्सेन तत इन्द्रः 'प्र मन्दिने'[६] ।
वार्षागिरैस्तत्प्रसङ्गाच् 'स यो वृषे (°षा'[७] इ)ति स स्तुतः ॥ ४ ॥

कुत्सस्त्रितश्च पतितौ कूपे तुष्टुवतुश्च तौ ।
तेन त्रितस्यागमनं 'चन्द्रमा अप्स्व१न्तरि(न्तः'[८] इ)ति ॥ ५ ॥

मध्ये '[९]गृत्समदस्यागाद् ऋषिः[९] सोमाहुतिस्तथा ।
तत्रेदं कारणं प्राहुरग्निः सूक्तैस्त्रिभिः स्तुतः ॥ ६ ॥

जागताभ्यां त्रैष्टुभेन 'त्वमग्ने द्युभिस्त्वम्'[१०] इति ।
'वाजयन्निव नू रथान्'[११] गायत्रं सूक्तमन्ततः ॥ ७ ॥

गायत्रात्प्राक्सोमाहुतिः 'हुवे वः'[१२] इति दृष्टवान् ।
क्रमेण त्रीणि छन्दांसि त्रिष्टुबादीनि भार्गवः ॥ ८ ॥

अन्यस्मिन्पुनरध्याये छन्दसोऽन्यस्य[१३] दर्शनम् ।
'नि होता होतृषदने'[१४] इति गृत्समदोऽकरोत् ॥ ९ ॥

पुनर्गृत्समदस्यैव मध्ये कूर्मोऽभ्यगादृषिः[१५] ।
'इमा गिर आदित्येभ्यः'[१६] त्रीणि सूक्तानि दृष्टवान् ॥ १० ॥

१-१. वीर्याय ख ख्श. २. वदन् वि[१] अ[१] ख. ३. ऋ १,९९,१. ४. औपसः वि[१] अ[१]; ओपशः ख्श. ५. काश्यपः वि[१] अ[१] ख ख्श. ६. ऋ १,१०१,१. ७. ऋ १,१००,१. ८. ऋ १, १०५,१. ९-९. °स्यागा ऋ° वि[१] अ[१]; 'स्य गा' ख्श. १०. ऋ २,१,१. ११. ऋ २,८,१. १२. ऋ २,४,१. १३. छान्द° ख ख्श. १४. ऋ २,९,१. १५. कूर्मो° वि[१] अ[१]. १६. ऋ २, २७, १.

बहुदैवतसामान्यात्[1] सूक्तं हि बहुदैवतम् ।
'सुतं देवाय कृण्वते'[2] तद्दृष्टवानिति[3] ऋषिः[4] ॥ ११ ॥

विश्वामित्रो द्वादशभिः स्तुतवानग्निमादितः ।
सूक्तैस्तैरनुवाकं[5] च समासं शौनकोऽब्रवीत् ॥ १२ ॥

अग्निमेव पुनश्चास्तौत् 'अग्ने सहस्व पृतनाः'[6] ।
मध्ये विरामो विस्पष्टस्तत्रान्येषां समागमः ॥ १३ ॥

मण्डलादौ 'सोमस्ये(स्य'[7] इ)ति सूक्तेऽग्निः प्रथमं स्तुतः ।
वैश्वानरीयसूक्तेन[8] ततो वैश्वानरः स्तुतः ॥ १४ ॥

उपक्रम्य पुनश्चापि तस्यैव क्रमशः स्तुतौ ।
ऋषीणामृषभादीनाम् अतो मध्ये समागमः ॥ १५ ॥

आग्नेयत्वाच्च सूक्तानाम् आग्नेयेषु समागमः ।
ऐन्द्रात् प्राक् स्तूयते ह्यग्निः[9] 'सोमस्ये(स्य'[10] इ)ति प्रधानतः ॥ १६ ॥

'इच्छन्ति त्वे(त्वा'[11] इ)ति द्व्यधिकं सूक्तमैन्द्रं तयोत्तरम् ।
छन्दोदैवतसङ्ख्यानां समत्वात्कुशिकागतिः ॥ १७ ॥

'इन्द्रापर्वता बृहता'[12] विश्वामित्रार्षमुच्यते ।
अनुवाकः समाप्तश्च तत आगात्प्रजापतिः ॥ १८ ॥

'इम मुद्दे विदुष्याय'[13] त्रीण्यपश्यत्प्रजापतिः ।
वैश्वदेवानि सूक्तानि वैश्वदेवमथाभितः ॥ १९ ॥

'इन्द्रा को वां वरुणे(णा'[14] इ)ति सूक्तमाहुर्द्विदैवतम् ।
'एष स्य भानुः'[15] इति च वामदेवस्तयोर्ऋषिः ॥ २० ॥

प्रसदस्युस्तयोर्मध्ये सौहोत्रावपि चागतौ ।
द्विदैवत्यत्वात् सामान्याद् आपायस्तत्र[16] युज्यते ॥ २१ ॥

---

१. °देवत्व सा° वि¹ भ¹ स छभ. २. ऋ ३,३०,१. ३. तद्दृष्टव° वि¹ भ¹ स; तद्दृष्ट' छभ. ४. चाक्षुषिः त्रि¹ भ¹ छभ. ५ सूक्तेष्वेष्वनु° वि¹ भ¹ क छभ. ६. ऋ ३,२४,१. ७. ऋ ३,१,१. ८. ऋ ३,२,१;३,३; वैश्वानराय पृ° वि¹ भ¹ छभ. ९. चाग्नि· चैमाक्ष १०. ऋ ३,१,१. ११. ऋ ३, ३०,१. १२. ऋ ३,५३,१. १३. ऋ ३,५४,१. १४. ऋ ४,४१,१. १५. ऋ ४,४५,१. १६. °पायसमा° चैमक्ष.

तत्राजगाम प्रथम त्रसदस्यु. 'मम द्विता'[1] ।
'इन्द्रा को वाम्'[2] इतीन्द्रस्य प्रसङ्गादिति निश्चय· ॥ २२ ॥

ऋषिर्नास्त्यमितोऽत्रीणां किन्त्वत्रि पुनरागत ।
ददर्शा(र्श 'अ)बोध्यग्नि.'[3] इति सूक्त च तत उत्तरम् ॥ २३ ॥

द्विदैवत्येषु सूक्तेषु याम्यासत्राश्विनानि[4] च ।
छन्दश्चानुगुण तत्र तस्मात्स पुनरागतः ॥ २४ ॥

अमितर्षौ भरद्वाजे वीतहव्योऽभ्यगादपि ।
आद्यानुवाकसंस्थाने[5] 'इमम् षु वो अतिथिम्'[6] ॥ २५ ॥

'अभूरेको रयिपते'[7] सुहोत्र. सूक्तयोरपि ।
तद्भ्रातरौ ददृशतुश्चत्वारि क्रमशस्तत ॥ २६ ॥

शुनहोत्रो नरश्चेति भरद्वाजस्ततोऽमित ।
सर्वाणि त्रैष्टुभान्येव सूक्तानीन्द्रश्च देवता ॥ २७ ॥

स्थितानि चानुवाकस्य मध्ये नाद्यन्तयो पुन ।
'भूय इद् वावृधे'[8] सूक्त पञ्चर्च तत्प्रसङ्गत ॥ २८ ॥

पञ्चर्चानामावपन[9] सत्रेति कवयो विदु ।
बार्हस्पत्यस्य 'यो रयिव'[10] शंयोरातृणपाणिकात् ॥ २९ ॥

'स्वादुष्किले(लं'[11] इ)ति तन्मध्ये मितो गर्ग समागत ।
शयुरस्तौत् त्रिभिः [12]'सूक्तैरिन्द्र गर्गस्तदाऽभ्यगात्'[12] ॥ ३० ॥

'यज्ञायज्ञा'[13] वैश्वदेवम्, उत्तराण्यप्यृजिश्वनः ।
सूक्तानि वैश्वदेवानि पायुरन्ते व्यवस्थित ॥ ३१ ॥

आगच्छन्ति तदतुलीनास्तस्य मध्ये मितर्षय ।
छन्दोदैवतसङ्ख्यार्थजन्मक्रमविरामत ॥ ३२ ॥

इमां सूक्ष्मेक्षिकां कुर्वन् न मन्त्रार्थेषु मुह्यति ।
बहुभिर्हेतुभि[14] कुर्यात् ता [15]'सर्वत्रैव पण्डित.'[15] ॥ ३३ ॥ इति ॥

---

१. ऋ ४,४२,१. २ ऋ ४,४१,१. ३. ऋ ५,१,१. ४. °सत्राश्विनानि वि° म°; °सत्राश्रितानि ख्म. ५. °वाकावसाने बॅक्रम, ६ ऋ ६,१५,१. ७. ऋ ६,३१,१. ८. ऋ ६,३०,१. ९. °वनतम् वि° म°. १०. ऋ ६,४४,१. ११. ऋ ६,४७,१. १२-१२. °रिन्द्रगर्गस्तु तदपि वि° म°, °रिन्द्र गर्गस्तु तदपि ख्म. १३. ऋ ६,४८,१. १४ °र्होतृभि वि° म°, °र्होतृभि· ख्म. १५-१५. °त्रापि पण्डिता बॅक्रम, सर्वेषु प° वि° म°.

[२०]

[1]वसिष्ठो मैत्रावरुणिर्ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः[1] ।

उग्रो जज्ञे वीर्याय स्वधावाञ्चक्रिरपो नर्यो यत् करिष्यन् ।
जग्मिर्युवा नृषदनमवोभिस्त्राता न इन्द्र एनसो महश्चित् ॥ १ ॥

उग्रः । जज्ञे । वीर्याय । स्वधाऽवान् । चक्रिः । अपः । नर्यः । यत् । करिष्यन् ।
जग्मिः । युवा । नृऽसदनम् । अवःऽभिः । त्राता । नः । इन्द्रः । एनसः । महः । चित् ॥ १ ॥

वेङ्कट० वसिष्ठः । उग्रः अजायत वीर्यकरणायैव बलवान् यत् शत्रुवधादिकं[2] कर्म करिष्यामीति मन्यते तस्य कर्मणः साकल्येन कर्ता नृहितः तथा युवा नराणां गृहम् रक्षणैः प्रदित्सितैः सह गन्ता रक्षिता अस्माकम् इन्द्रः दारिद्र्याद् अपि महतः[3] ॥ १ ॥

हन्ता वृत्रमिन्द्रः शूशुवानः प्रावीन्नु वीरो जरितारमूती ।
कर्ता सुदासे अह वा उ लोकं दाता वसु मुहुरा दाशुषे भूत् ॥ २ ॥

हन्ता । वृत्रम् । इन्द्रः । शूशुवानः । प्र । आवीत् । नु । वीरः । जरितारम् । ऊती ।
कर्ता । सुऽदासे । अह । वै । ऊँ इति । लोकम् । दाता । वसु । मुहुः । आ । दाशुषे । भूत् ॥ २ ॥

वेङ्कट० हन्ता शत्रुम्[4] इन्द्रः वर्धमानः प्र यच्छति क्षिप्रम् वीरः जरितारम् रक्षणाय । कर्ता शोभनदानायैव [5]यजमानाय आलोकनम् उत्तमम्[5] दाता धनम् यजमानाय मुहुर्मुहुः [6]आ भवति[6] आगच्छति ॥ २ ॥

युध्मो अनर्वा खजकृत् समद्वा शूरः सत्राषाड् जनुषेमषाळ्हः ।
व्यास इन्द्रः पृतनाः स्वोजा अधा विश्वं शत्रूयन्तं जघान ॥ ३ ॥

युध्मः । अनर्वा । खजऽकृत् । समत्ऽवा । शूरः । सत्राषाट् । जनुषा । ईम् । अषाळ्हः ।
वि । आसे । इन्द्रः । पृतनाः । सुऽओजाः । अध । विश्वम् । शत्रुऽयन्तम् । जघान ॥ ३ ॥

वेङ्कट० योधनशीलः अभिगन्तृरहितः[7] सङ्ग्रामकृत् कलहवांश्च शूरः बहूनां सोढा [8]जन्मना एव शत्रुभिरसोढः[8] इन्द्रः पृतनाः वि अस्यति सुबलः, अध विश्वम् अपि शातनमिच्छन्तम् हन्ति ॥ ३ ॥

उभे चिदिन्द्र रोदसी महित्वा पप्राथ तविषीभिस्तुविष्मः ।
नि वज्रमिन्द्रो हरिवान् मिमिक्षन्त्समन्धसा मदेषु वा उवोच ॥ ४ ॥

१-१. नास्ति मूको. २. °धादिद्रोऽस्माकं लभ. ३. महते मूको. ४. शत्रुम् वि°, गन्तुम् अ°, शत्रून् लभ. ५-५. °मा लोकं अ°, °मानायोत्तम लोकनम् लभ. ६-६. आ वदति वि° अ°, आवहति लभ. ७. अदित° अ°. ८-८. नास्ति वि° अ°.

उभे इति । चित् । इन्द्र । रोदसी इति । महिऽत्वा । आ । पप्राथ । तविषीभि । तुविष्म ।
नि । वज्रम् । इन्द्र । हरिऽवान् । मिमिक्षन् । सम् । अन्धसा । मदेषु । वै । उवोच ॥ ४ ॥

वेङ्कट० उभे अपि इन्द्र! द्यावापृथिवी[1] महत्त्वेन आ पूरितवानसि बलै हे वृद्धिमन्[2] । नितरा सम् सेवते इन्द्र हरिवान् सोमेन जनितेषु मदेषु[3] वज्रम् पृथिवीं सेक्तुमिच्छन् । उचति सेवाकर्मा[4] ॥४॥

वृषा जजान वृषणं रणाय तमु चिन्नारी नर्यं ससूव ।
प्र यः सेनानीरध नृभ्यो अस्तीनः सत्वा गवेषणः स धृष्णुः ॥ ५ ॥

वृषा । जजान । वृषणम् । रणाय । तम् । ऊँ इति । चित् । नारी । नर्यम् । ससूव ।
प्र । य । सेनाऽनीः । अध । नृऽभ्यः । अस्ति । इन । सत्वा । गोऽएषण । स । धृष्णु ॥५॥

वेङ्कट० वृषा प्रजापति वृषणम् इन्द्र जनयामास युद्धार्थम्[5] । तम् एव नारी माता अदिति असूत नृहितम्[6] । प्र भवति य सेनानी नृभ्य योद्धृभ्य, स ईश्वर शत्रूणा सदनशील गवामेषणशील शत्रूणा धर्षको भवति ॥ ५ ॥

"इति पञ्चमाष्टके तृतीयाध्याये प्रथमो वर्ग " ॥

नू चित् स भ्रेषते जनो न रेषन् मनो यो अस्य घोरमाविवासात् ।
यज्ञैर्य इन्द्रे दधते दुवांसि क्षयत् स राय ऋतपा ऋतेजाः ॥ ६ ॥

नु । चित् । स । भ्रेषते । जन । न । रेषत् । मन । य । अस्य । घोरम् । आऽविवासात् ।
यज्ञै । य । इन्द्रे । दधते । दुवांसि । क्षयत् । स । राये । ऋतऽपा । ऋतेऽजा ॥ ६ ॥

वेङ्कट० क्षिप्रम् स अशयति शत्रुम् जन, न च रिष्यति मन, य अस्य घोरम् परिचरति । यज्ञै य[7] जन इन्द्रे परिचरणानि धारयति, स जन धनाय निवसति धन प्राप्नोति यज्ञस्य रक्षक यज्ञे जायमान ॥ ६ ॥

यदिन्द्र पूर्वो अपराय शिक्षन्नयज्ज्यायान् कनीयसो देष्णम् ।
अमृत इत् पर्यासीत दूरमा चित्र चित्र्यं भरा रयिं नः ॥ ७ ॥

यत् । इन्द्र । पूर्वः । अपराय । शिक्षन् । अयत् । ज्यायान् । कनीयस । देष्णम् ।
अमृत । इत् । परि । आसीत । दूरम् । आ । चित्र । चित्र्यम् । भर । रयिम् । न ॥ ७ ॥

वेङ्कट० यदि धनम् इन्द्र! पूर्व पिता अपराय पुत्राय प्रयच्छन् भवति, गमयति ज्यायान्[8] कनीयस धनम्, ततः[9] पुनः कनीयांश्च अमृत एव परि आसीत चिरम् । तथा सति पूजनीय धनम् आ हर अस्मभ्य पूजनीय[10] इति ॥ ७ ॥

---

१. °विभ्वी छ प्रस्ताव . २. वृद्धि वि°. ३ नास्ति मूको ४ °वक° मूको ५. युद्धा° वि° छ, युद्धा° लभ ६ °हित वि°, °हित भ°. ७ ७ नास्ति मूका ८ य वा लभ ९ °थान् तत वि° भ°. १० नास्ति वि° भ°.

यस्त इन्द्र प्रियो जनो ददाशदसन्निरेके अद्रिवः सखा ते ।
वयं ते अस्यां सुमतौ चनिष्ठाः स्याम वरूथे अघ्नतो नृपीतौ ॥ ८ ॥

यः । ते । इन्द्र । प्रियः । जनः । ददाशत् । असत् । निरेके । अद्रिऽवः । सखा । ते ।
वयम् । ते । अस्याम् । सुऽमतौ । चनिष्ठाः । स्याम । वरूथे । अघ्नतः । नृऽपीतौ ॥ ८ ॥

वेङ्कट० यः तुभ्यम् इन्द्र! [1]प्रियं जनः[1] प्रयच्छति[2], स सखा यजमानो जनः तव धनस्य निरेके निर्गमने भवति [3]वज्रिन्![3] पात्रम्[3]। वयम् ते अस्याम् सुमतौ चनिष्ठाः स्याम अतिशयेनान्नवन्तो[4] भवेम। स्याम च गृहे अहन्तुः तव स्वभूते त्वया वा[5] दत्ते[5] बहुधनत्वात् मनुष्याणां पालके ॥ ८ ॥

एष स्तोमो अचिक्रदद्वृषा त उत स्तामुर्मघवन्नक्रपिष्ट ।
रायस्कामो जरितारं त आगन्त्वमङ्ग शक्र वस्व आ शको नः ॥ ९ ॥

एषः । स्तोमः । अचिक्रदत् । वृषा । ते । उत । स्तामुः । मघऽवन् । अक्रपिष्ट ।
रायः । कामः । जरितारम् । ते । आ । अगन् । त्वम् । अङ्ग । शक्र । वस्वः । आ । शकः । नः ॥

वेङ्कट० अयं स्तोता वृषा वसिष्ठः त्वाम् अचिक्रदत् अस्तौत्। अपि च स्तामुः[6]। तमिममनिकामो[7] सकारं उपजनः। मघवन्! कल्पो भवतु। धनस्य कामः[8] जरितारम् तव आ गच्छतु मघवद् धनं कामयते तदागच्छतु। त्वम् अङ्ग शक्र! धनस्य प्रयच्छ अस्मभ्यम् ॥ ९ ॥

स न इन्द्र त्वयताया इषे धास्त्मना च ये मघवानो जुनन्ति ।
वस्वी षु ते जरित्रे अस्तु शक्तिर्यूयं पात स्वस्तिभिः सदा नः ॥ १० ॥

सः । नः । इन्द्र । त्वऽयतायै । इषे । धाः । त्मना । च । ये । मघऽवानः । जुनन्ति ।
वस्वी । सु । ते । जरित्रे । अस्तु । शक्तिः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ १० ॥

वेङ्कट० सः [10]अस्मान् इन्द्र![10] त्वया प्रदेयाय अन्नाय धेहि, ये अमी हविष्मन्तः स्वयमेव तुभ्यं हविः प्रेरयन्ति[11]। अथैकवदाह—[12]कल्याणम् तव दानम्[12] स्तोत्रे मह्यं भवत्विति ॥ १० ॥

[13]इति पञ्चमाष्टके तृतीयाध्याये द्वितीयो वर्गः[13] ॥

[२१]

[13]वसिष्ठो मैत्रावरुणिर्ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः[13] ।

असावि देवं गोऋजीकमन्धो न्यस्मिन्निन्द्रो जनुषेमुवोच ।
बोधामसि त्वा हर्यश्व यज्ञैर्बोधा नः स्तोममन्धसो मदेषु ॥ १ ॥

१-१. प्रयामनस् वि[१] अ[१]. २. प्रच्छति वि[१]. ३-३. वज्री पात्रम् मूको, वज्रन् ए प्रस्तार. ४. नान्नव[°] ए ला. ५. न वि[१], न अ[१], न ए ला. ६. धत्ते वि[१]. ७. स्तोतृनाम (निघ ३,१६ [द्र वैप १,१४८१ d]). ८. तमिमलोन[°] (नि[°] अ[१].) मूको. ९. आप मूको. १०-१०. नास्ति वि[१], अस्मान् इ अ[१] ए ला. ११. [°]यति मूको. १२-१२. कल्याणम् प दानम् वि[१], [°]ण तवदानम् (न ए ला.) अ[१] ए ला. १३-१३. नास्ति मूको.

असावि । देवम् । गोऽऋजीकम् । अन्धः । नि । अस्मिन् । इन्द्रः । जनुषा । ईम् । उवोच ।
बोधामसि । त्वा । हरिऽअश्व । यज्ञैः । बोध । नः । स्तोमम् । अन्धसः । मदेषु ॥ १ ॥

वेङ्कट० सुतम् देवनशीलम् ऋजुपयस्कम्[1] अन्धः । सुते च अस्मिन् [2]सोमे इन्द्रः स्वाभाव्येन[2] सेवाम् अकरोत् । बोधयामः त्वाम् हर्यश्व ! यज्ञैः । बुध्यस्व नः स्तोमम् सोमस्य मदेषु ॥ १ ॥

प्र यन्ति यज्ञं विपयन्ति बर्हिः सोममादो विदथे दुध्रवाचः ।
न्यु भ्रियन्ते यशसो गृभादा दूरउपब्दो वृषणो नृषाचः ॥ २ ॥

प्र । यन्ति । यज्ञम् । विपयन्ति । बर्हिः । सोमऽमादः । विदथे । दुध्रऽवाचः ।
नि । ऊँ इति । भ्रियन्ते । यशसः । गृभात् । आ । दूरेऽउपब्दः । वृषणः । नृऽसाचः ॥ २ ॥

वेङ्कट० प्र आरभन्ते[3] यज्ञम्, कम्पयन्ति बर्हिः सोमेन मादयन्तः ऋत्विजः यज्ञे[4] दुर्धरमन्त्रवाचः । आभिमुख्येन हूयन्ते सुखान्यन्नानि हविर्धानात् । किञ्च दूरेश्रूयमाणशब्दाः[5] भवन्ति ग्रावाणः नृभिः सेव्यमानाः[6] ॥ २ ॥

त्वमिन्द्र स्रवितवा अपस्कः परिष्ठिता अहिना शूर पूर्वीः ।
त्वद् वावक्रे रथ्यो३ न धेना रेजन्ते विश्वा कृत्रिमाणि भीषा ॥ ३ ॥

त्वम् । इन्द्र । स्रवितवै । अपः । करिति कः । परिऽस्थिताः । अहिना । शूर । पूर्वीः ।
त्वत् । वावक्रे । रथ्यः । न । धेनाः । रेजन्ते । विश्वा । कृत्रिमाणि । भीषा ॥ ३ ॥

वेङ्कट० त्वम् इन्द्र ! स्रवितुम् उदकानि करोषि[7] परिष्ठितानि अहिना शूर ! बहूनि । त्वत्तः निर्गच्छन्ति रथिन इव नद्यः । तथा सर्वाणि कृत्रिमाणि रक्षांसि[8] कम्पन्ते त्वद्भयेन ॥ ३ ॥

भीमो विवेषायुधेभिरेषामपांसि विश्वा नर्याणि विद्वान् ।
इन्द्रः पुरो जर्हृषाणो वि दूधोद् वि वज्रहस्तो महिना जघान ॥ ४ ॥

भीमः । विवेष । आयुधेभिः । एषाम् । अपांसि । विश्वा । नर्याणि । विद्वान् ।
इन्द्रः । पुरः । जर्हृषाणः । वि । दुधोत् । वि । वज्रऽहस्तः । महिना । जघान ॥ ४ ॥

वेङ्कट० भीमः व्याप्नोति आयुधैः कृत्रिमाणि एतानि कर्माणि विश्वानि नृहितानि जानन् वर्षादीनि । इन्द्रः शत्रुपुराणि हृष्यन् वि दोधवीति वि हन्ति च वज्रहस्तः महत्त्वेन पुराणीति ॥ ४ ॥

न यातव इन्द्र जूजुवुर्नो न वन्दना शविष्ठ वेद्याभिः ।
स शर्धदर्यो विषुणस्य जन्तोर्मा शिश्नदेवा अपि गुर्ऋतं नः ॥ ५ ॥

---

१. ऋजु (°जू अ[1]) य° वि[1] अ[1]; मूकोपयस्कम् ह लभ. २-२. सोमशाल्येन वि[1]; सोम ६ शाल्येन अ[1]; °मे ६ क्येन ह लभ. ३. भाहरन्ते मूको. ४. यतैः वि[1]. ५. °भगाः शब्दो मूको. ६. °नाः मधुषा एषा (°प लभ) वे मूको. ७. परोति मूको. ८. रक्षांसि मूको.

न । यातवः । इन्द्र । जूजुवुः । नः । न । वन्दना । शविष्ठ । वेद्याभिः ।
[1]सः । शर्धत् । अर्यः । विषुणस्य । जन्तोः । मा । शिश्नऽदेवाः । अपि । गुः । ऋतम् । नः ॥५॥[1]

वेङ्कट० न[2] राक्षसाः इन्द्र! अपिगच्छेयुः अस्मान्, न च वन्दना[3], बहुवचनस्याकारः, बलवत्तम! निवेद्याभिः स्तुतिभिः। सः उत्सहताम् स्वामी विषमस्य जन्तोः प्रशास्ता। मा शिश्नदेवाः शिश्नेन क्रीडन्तः अस्माकम् यज्ञम् अपि गच्छेयुः ॥ ५ ॥

[4]इति पञ्चमाष्टके तृतीयाध्याये तृतीयो वर्गः[4] ॥

अभि क्रत्वेन्द्र भूरध ज्मन् न ते विव्यङ् महिमानं रजांसि ।
स्वेना हि वृत्रं शवसा जघन्थ न शत्रुरन्तं विविदद् युधा ते ॥ ६ ॥

अभि । क्रत्वा । इन्द्र । भूः । अध । ज्मन् । न । ते । विव्यक् । महिमानम् । रजांसि ।
स्वेन । हि । वृत्रम् । शवसा । जघन्थ । न । शत्रुः । अन्तम् । विविदत् । युधा । ते ॥ ६ ॥

वेङ्कट० अभि अभूः[5], प्रज्ञया इन्द्र! पृथिव्यां सर्वाणि भूतानि। न ते[6] व्याप्नुवन्ति महिमानम् लोकाः। व्यचिः[7] व्याप्तिकर्मा। स्वेन हि बलेन वृत्रम् त्वं हतवानसि। न शत्रुः कश्चित् तव अन्तम् अविन्दद् योधनेन ॥ ६ ॥

देवाश्चित् ते असुर्याय पूर्वेऽनु क्षत्राय ममिरे सहांसि ।
इन्द्रो मघानि दयते विषह्येन्द्रं वाजस्य जोहुवन्त सातौ ॥ ७ ॥

देवाः । चित् । ते । असुर्याय । पूर्वे । अनु । क्षत्राय । ममिरे । सहांसि ।
इन्द्रः । मघानि । दयते । विऽसह्य । इन्द्रम् । वाजस्य । जोहुवन्त । सातौ ॥ ७ ॥

वेङ्कट० देवाः च तुभ्यम् असुराणां हन्त्रे पूर्वे अनु मेनिरे क्षतात् त्रात्रे बलानि इन्द्रस्य बलकरणानि साहाय्यकरणेन अनुमन्यन्ते। इन्द्रः धनानि प्रयच्छति शत्रूनभिभूय। इन्द्रम् सङ्ग्रामस्य सम्भजने भृशम्[8] आह्वयन्ति ॥ ७ ॥

कीरिश्चिद्धि त्वामवसे जुहावेशानमिन्द्र सौभगस्य भूरेः ।
अवो बभूथ शतमूते अस्मे अभिक्षत्तुस्त्वावतो वरूता ॥ ८ ॥

कीरिः । चित् । हि । त्वाम् । अवसे । जुहाव । ईशानम् । इन्द्र । सौभगस्य । भूरेः ।
अवः । बभूथ । शतम्ऽऊते । अस्मे इति । अभिऽक्षत्तुः । त्वाऽवतः । वरूता ॥ ८ ॥

१-१. सर्वोऽयं एव पाठ्येन व्याख्यातः (४,११). २. नास्ति वि[१]. ३. तु. वैप १,२७४७ f. ४-४. नास्ति मूको. ५. भाग्यम्. वि[१] स; अभवः अ[१], अभूः सम. ६ तेः मूको. ७. व्यतिः मूको. ८. भृशम् मूको.

वेङ्कट० स्तोता नित् हि त्वाम् रक्षणाय आह्वयति[1] ईश्वरम् इन्द्र! भूरिणो धनस्य। हे बहुरक्षण! रक्षको भव अस्माकम्। क्षदिः शकलीभावकर्मा। शत्रूणाम् अभिहिंसितुः त्वावतः[2] सर्वो जनः वशीता[3] भवति ॥ ८ ॥

सखायस्त इन्द्र विश्वहं स्याम नमोवृधासो महिना तरुत्र ।
वन्वन्तु स्मा तेऽवसा समीकेऽभीतिमर्यो वनुषां शवांसि ॥ ९ ॥

सखायः । ते । इन्द्र । विश्वह । स्याम । नमःऽवृधासः । महिना । तरुत्र ।
वन्वन्तु । स्म । ते । अवसा । सम्ऽईके । अभिऽइतिम् । अर्यः । वनुषाम् । शवांसि ॥ ९ ॥

वेङ्कट० सखायः ते इन्द्र! वयं सर्वदा भवेम हविषो वर्धयितारः महत्त्वेन हे तारक!। अभिभजन्ताम्[4] तव रक्षणेन सह सङ्ग्रामे अर्यः अरेः शत्रोः अभिगमनं तत्र सम्भक्तॄणाम् अस्माकं बलानि ॥ ९ ॥

स न इन्द्र त्वयताया इषे धास्त्मना च ये मघवानो जुनन्ति ।
वस्वी षु ते जरित्रे अस्तु शक्तिर्यूयं पात स्वस्तिभिः सदा नः ॥ १० ॥

सः । नः । इन्द्र । त्वऽयतायै । इषे । धाः । त्मना । च । ये । मघऽवानः । जुनन्ति ।
वस्वी । सु । ते । जरित्रे । अस्तु । शक्तिः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ १० ॥

वेङ्कट० व्याख्याता पूर्वम् (ऋ ७,२०,१०) ॥ १० ॥

[5]इति पञ्चमाष्टके तृतीयाध्याये चतुर्थो वर्गः[5] ॥

[२२]

[6]वसिष्ठो मैत्रावरुणिर्ऋषिः । इन्द्रो देवता । विराट् छन्दः, नवमी त्रिष्टुप्[6] ।

पिबा सोममिन्द्र मन्दतु त्वा यं ते सुषाव हर्यश्वाद्रिः ।
सोतुर्बाहुभ्यां सुयतो नार्वा ॥ १ ॥

पिब । सोमम् । इन्द्र । मन्दतु । त्वा । यम् । ते । सुसाव । हरिऽअश्व । अद्रिः ।
सोतुः । बाहुऽभ्याम् । सुऽयतः । न । अर्वा ॥ १ ॥

वेङ्कट० पिब सोमम् इन्द्र!। स त्वां[6] मादयतु, यम् तुभ्यम् सुषाव हर्यश्व! ग्रावा। सोतुः[7] प्रसवितुः अश्वारोहस्य बाहुभ्याम् सुसङ्गृहीतः इव अश्वः ॥ १ ॥

---

१. ०यन्ति मूको. २. तावतः मूको. ३. वशी० अ[?] लभ. ४. भवताम् वि[?]; भवन्ताम् अ[?]; [?]भवताम् स लभ. ५-५. नास्ति मूको. ६. सं वि[?]; स अ[?]. ७. सोऽस्तु मूको.

यस्ते मदो युज्यश्चारुरस्ति येन वृत्राणि हर्यश्व हंसि ।
स त्वामिन्द्र प्रभूवसो ममत्तु ॥ २ ॥

य । ते । मदः । युज्यः । चारुः । अस्ति । येन । वृत्राणि । हरिऽअश्व । हंसि ।
स । त्वाम् । इन्द्र । प्रभुवसो इति प्रभुऽवसो । ममत्तु ॥ २ ॥

वेङ्कट० य ते[1] सोम सहाय चारु भवति, येन शत्रून् हर्यश्व ! हसि, स त्वाम् इन्द्र ! प्रभूतधन[1] मादयतु ॥ २ ॥

बोधा सु मे मघवन् वाचमेमां यां ते वसिष्ठो अर्चति प्रशस्तिम् ।
इमा ब्रह्म सधमादे जुषस्व ॥ ३ ॥

बोध । सु । मे । मघऽवन् । वाचम् । आ । इमाम् । याम् । ते । वसिष्ठ । अर्चति । प्रऽशस्तिम् ।
इमा । ब्रह्म । सधऽमादे । जुषस्व ॥ ३ ॥

वेङ्कट० बुध्यस्व मघवन् ![1] सुष्टु आभिमुख्येन मदीयाम् इमाम् स्तुतिम्, याम्[2] ते वसिष्ठ उच्चारयति[3] प्रशस्ताम् । इमानि च हवींषि यज्ञे सेवस्व ॥ ३ ॥

श्रुधी हवं विपिपानस्याद्रेर्बोधा विप्रस्यार्चतो मनीषाम् ।
कृष्वा दुवांस्यन्तमा सचेमा ॥ ४ ॥

श्रुधि । हवम् । विऽपिपानस्य । अद्रेः । बोध । विप्रस्य । अर्चतः । मनीषाम् ।
कृष्व । दुवांसि । अन्तमा । सचा । इमा ॥ ४ ॥

वेङ्कट० शृणु घोषम्, सोम विशेषेण पिबत ग्राव्णः[4] । बुध्यस्व च मेधाविन स्तुवतः[5] स्तुतिम् । कुरु च परिचरणानि अन्तिकतमानि त्वया सहितानीति ॥ ४ ॥

न ते गिरो अपि मृष्ये तुरस्य न सुष्टुतिमसुर्यस्य विद्वान् ।
सदा ते नाम स्वयशो विवक्मि ॥ ५ ॥

न । ते । गिरः । अपि । मृष्ये । तुरस्य । न । सुऽस्तुतिम् । असुर्यस्य । विद्वान् ।
सदा । ते । नाम । स्वऽयशः । विवक्मि ॥ ५ ॥

वेङ्कट० न त्वदीया स्तुती अहम् अपि मृष्ये सोढुम् न शक्नोमि क्षिप्रमुच्चारयामि क्षिप्रकारिणः,

---

१. ते मद अ[१]; ते मद एभ २ या मूको ३. °रयन्ति मूको. ४. ग्रावो वि[१] अ[१]; ग्राव द; ग्राण एभ, ५ °वत मूको. ६. नास्ति वि[१] अ[१]; ग ल लभ.

45648

तथा [1]सुष्टुतिम् च[1] न सृष्यामि असुराणां हन्तुः जानन्। सर्वदैव तव नाम हे स्वभूतयश ! ब्रवीमि ॥ ५ ॥

[2]इति पञ्चमाष्टके तृतीयाध्याये पञ्चमो वर्गः[2] ॥

भूरि हि ते सवना मानुषेषु भूरि मनीषी हवते त्वामित् ।
मारे अस्मन्मघवञ्ज्योक् कः ॥ ६ ॥

भूरि । हि । ते । सवना । मानुषेषु । भूरि । मनीषी । हवते । त्वाम् । इत् ।
मा । आरे । अस्मत् । मघऽवन् । ज्योक् । करिति कः ॥ ६ ॥

वेङ्कट० भूरीणि ते सवनानि सन्ति मनुष्येषु । भूयिष्ठ च ह्वते मेधावी त्वाम् एव । अस्माक दूरे मघवन्! चिरम् मा[3] कार्षी.[4] ॥ ६ ॥

तुभ्येदिमा सवना शूर विश्वा तुभ्यं ब्रह्माणि वर्धना कृणोमि ।
त्वं नृभिर्हव्यो विश्वधासि ॥ ७ ॥

तुभ्य । इत् । इमा । सवना । शूर । विश्वा । तुभ्यम् । ब्रह्माणि । वर्धना । कृणोमि ।
त्वम् । नृऽभिः । हव्यः । विश्वधा । असि ॥ ७ ॥

वेङ्कट० तुभ्यम् एव इमानि सर्वाणि सवनानि शूर! करोमि, तुभ्यम् एव स्तोत्राणि च वर्धनानि। त्वम् हि मनुष्यैः[5] हव्य भवसि सर्वदेति ॥ ७ ॥

नू चिन्नु ते मन्यमानस्य दस्मोदश्नुवन्ति महिमानमुग्र ।
न वीर्यमिन्द्र ते न राधः ॥ ८ ॥

नु । चित् । नु । ते । मन्यमानस्य । दस्म । उत् । अश्नुवन्ति । महिमानम् । उग्र ।
न । वीर्यम् । इन्द्र । ते । न । राधः ॥ ८ ॥

वेङ्कट० क्षिप्रम् एव तव स्तूयमानस्य हे दर्शनीय! महिमानम् उत् अश्नुवन्ति उग्र! । न त्वा साधयति[6] पुरुषस्य बलम् इन्द्र!, "न अपि धनम्" इति ॥ ८ ॥

ये च पूर्व ऋषयो ये च नूत्ना इन्द्र ब्रह्माणि जनयन्त विप्राः ।
अस्मे ते सन्तु सख्या शिवानि यूयं पात स्वस्तिभिः सदा नः ॥ ९ ॥

ये । च । पूर्वे । ऋषयः । ये । च । नूत्नाः । इन्द्र । ब्रह्माणि । जनयन्त । विप्राः ।
अस्मे इति । ते । सन्तु । सख्या । शिवानि । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ९ ॥

१-१. सुष्टु हि च वि[?] अ[?]; सुष्टु[?] ए छम. २-२. नास्ति मूको. ३. नास्ति मूको. ४. क[?] वि[?] अ[?] क; कार्षिम् एभा ५. मनुष्यु अ[?] ६. [?]दति मूको. ७-७. नास्ति धारम् मूको.

वेङ्कट० ये च पूर्व ऋषयः ये च नूतनाः[1] इन्द्र! स्तोत्राणि तव अजनयन् मेधाविन । स्वेषु इव अस्मास्वपि तव सख्यानि[2] शिवानि [3]भवन्तु इति[3] ॥ ९ ॥

[4]इति पञ्चमाष्टके तृतीयाध्याये षष्ठो वर्गः[4] ॥

[२३]

[5]वसिष्ठो मैत्रावरुणिर्ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः[6] ।

उदु ब्रह्माण्यैरत श्रवस्येन्द्रं समर्ये महया वसिष्ठ ।
आ यो विश्वानि शवसा ततानोपश्रोता म ईवतो वचांसि ॥ १ ॥

उत् । ऊँ इति । ब्रह्माणि । ऐरत । श्रवस्या । इन्द्रम् । सऽमर्ये । महय । वसिष्ठ ।
आ । यः । विश्वानि । शवसा । ततान । उपऽश्रोता । मे । ईवतः । वचांसि ॥ १ ॥

वेङ्कट० उत् ईरयति प्रेरयति अन्नानि श्रवणीयानि । तथा सति इन्द्रम् यज्ञे पूजयसि वसिष्ठ! । यः[5] सर्वाण्येव भूतानि बलेन[6] आ ततान, स [7]इन्द्र उपश्रोता[7] भवतु मम अभिगमनवत वचांसि ॥ १ ॥

अयामि घोषं इन्द्र देवजामिरिरज्यन्त यच्छुरुधो विवाचि ।
नहि स्वमायुश्चिकिते जनेषु तानीदंहांस्यति पर्ष्यस्मान् ॥ २ ॥

अयामि । घोषः । इन्द्र । देवऽजामिः । इरज्यन्त । यत् । शुरुधः । विऽवाचि ।
नहि । स्वम् । आयुः । चिकिते । जनेषु । तानि । इत् । अंहांसि । अति । पर्षि । अस्मान् ॥ २ ॥

वेङ्कट० अयामि नियत स्तुतिशब्दः इन्द्र! [8]देवानां बन्धुः । उदीरयामि[8] इत्यर्थः । यस्माद्[9] विविधवाचि स्तोतरि शुचो[10] रोधयित्र्य ओषधयः वृद्धा भवन्ति[9] । स्तुतिहेतुः[11] । नहि स्वजीव नम्[11] अस्मदीयेषु[14] केनचिदपि ज्ञायते[15] । तथा सति यत्र वयं दीर्घमायुः प्राप्नुयाम तथास्मदीयानि तानि उपद्रवाणि रोगभयादीनि अति पारयेति ॥ २ ॥

युजे रथं गवेषणं हरिभ्यामुप ब्रह्माणि जुजुषाणमस्थुः ।
वि बाधिष्ट स्य रोदसी महित्वेन्द्रो वृत्राण्यप्रती जघन्वान् ॥ ३ ॥

युजे । रथम् । गोऽएषणम् । हरिऽभ्याम् । उप । ब्रह्माणि । जुजुषाणम् । अस्थुः ।
वि । बाधिष्ट । स्यः । रोदसी इति । महिऽत्वा । इन्द्रः । वृत्राणि । अप्रति । जघन्वान् ॥ ३ ॥

---

१ भूतना भ[1] एभ. २ सख्यानि मूको. ३-३. भवन्तानि मूको. ४-४. नास्ति मूको. ५ य बलेन अ[1]. ६. नास्ति अ[1]. ७-७. इन्द्रपश्वा (°द्रश्रो वि[1] अ[1].) ता मूको. ८-८ देवश्च धीर° वि[1] अ[1], °ना देवश्च ब° ह° एभ. ९. यस्याम् वि[1], यस्मात् ल एभ. १०. शचो मूको. ११. °नि° तव अ[1]. १२. °द्व वि[1] अ[1]. १३. 'बनान् वि[1] अ[1] ह, °बान् एभ. १४. °स्मदपु मूको. १५. °त र वि[1] अ[1].

वेङ्कट० युनज्मि रथम् गवामेषणशीलम् अश्वाभ्याम्। उप अस्थुः च स्तोत्राणि रथसमीपं सेवमाने माम्। ततः अयम् इन्द्रः तं रथमधितिष्ठन् द्यावापृथिव्यौ [1]महत्त्वेन वि[†] बाधते। शत्रून्[1] इन्द्रः अप्रतिगतः अहिंसत्[2] ॥ ३ ॥

आप॑श्चित् पिप्युः स्त॒र्यो॒३॑ न गावो॒ नक्ष॑न्नृ॒तं ज॑रि॒तार॑स्त इन्द्र ।
या॒हि वा॒युर्न नि॒युतो॑ नो अच्छा॒ त्वं हि धी॒भिर्दय॑से॒ वि वाजा॑न् ॥ ४ ॥

आप॑: । चि॒त् । पि॒प्युः । स्त॒र्य॑: । न । गाव॑: । नक्ष॑न् । ऋ॒तम् । ज॒रि॒तार॑: । ते॒ । इ॒न्द्र॒ ।
या॒हि । वा॒युः । न । नि॒ऽयुत॑: । नः॒ । अच्छ॑ । त्वम् । हि । धी॒भिः । दय॑से । वि । वाजा॑न् ॥४॥

वेङ्कट० आपः चित् पिप्युः प्रवृद्धा अभवन्, यथा सङ्गवकाले भुवं स्तृणन्त्यः गावः प्रवृद्धा भवन्ति। व्याप्नुवन् उदकम् स्तोतारः तव इन्द्र! । आ याहि अस्मान् अभि वायुः आत्मीयाः इव वडवाः[3]। त्वम् हि कर्मभिः विविधं प्रयच्छसि अन्नानि ॥ ४ ॥

ते त्वा॒ मदा॑ इन्द्र मादयन्तु शु॒ष्मिणं॑ तुवि॒राध॑सं जरि॒त्रे ।
एको॑ देव॒त्रा दय॑से॒ हि मर्ता॑न॒स्मिञ्छू॑र॒ सव॑ने मादयस्व ॥ ५ ॥

ते । त्वा॒ । मदा॑: । इ॒न्द्र॒ । मा॒द॒य॒न्तु॒ । शु॒ष्मिण॑म् । तु॒वि॒ऽराध॑सम् । ज॒रि॒त्रे ।
एक॑: । दे॒व॒ऽत्रा । दय॑से । हि । मर्ता॑न् । अ॒स्मिन् । शू॒र॒ । सव॑ने । मा॒द॒य॒स्व॒ ॥ ५ ॥

वेङ्कट० ते त्वा सोमाः इन्द्र! मादयन्तु बलिनम् स्तोत्रे ददतम्[4] बहुधनम्। त्वम् एकः एव देवान् मनुष्यांश्च विविधं गच्छसि। अस्मिन् इति स्पष्टम् ॥ ५ ॥

ए॒वेदिन्द्रं॒ वृष॑णं॒ वज्र॑बाहुं॒ वसि॑ष्ठासो अ॒भ्य॑र्चन्त्य॒र्कैः ।
स नः॑ स्तु॒तो वी॒रव॑द् धातु॒ गोम॑द् यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः ॥ ६ ॥

ए॒व । इ॒त् । इन्द्र॑म् । वृष॑णम् । वज्र॑ऽबाहुम् । वसि॑ष्ठासः । अ॒भि । अ॒र्च॒न्ति॒ । अ॒र्कैः ।
सः । नः॒ । स्तु॒तः । वी॒रऽव॑त् । धा॒तु॒ । गोऽम॑त् । यू॒यम् । पा॒त॒ । स्व॒स्तिऽभि॑ः । सदा॑ । नः॒ ॥६॥

वेङ्कट० निगदसिद्धेति ॥ ६ ॥

[5]इति पञ्चमाष्टके तृतीयाध्याये सप्तमो वर्गः[5] ॥

[२४]

[6]वसिष्ठो मैत्रावरुणिर्ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः[7] ।

योनि॑ष्ट इन्द्र॒ सद॑ने अकारि॒ तमा नृभि॑ः पुरुहूत॒ प्र या॑हि ।
अस॑ो यथा॑ नोऽवि॒ता वृ॒धे च॒ ददो॒ वसू॑नि म॒मद॑श्च॒ सोमै॑ः ॥ १ ॥

१-१. °त्वेन…शू° वि[1] अ[1]. † मि ल लभ. २. °सत् मूको. ३. वि॰वा वि[1] अ[1] द; विश्वा लभ. ४. ददित वि[1] अ[2] लभ. ५-५. नास्ति मूको.

योनिः । ते । इन्द्र । सदने । अकारि । तम् । आ । नृऽभिः । पुरुऽहूत । प्र । याहि ।
असः । यथा । नः । अविता । वृधे । च । ददः । वसूनि । ममदः । च । सोमैः ॥ १ ॥

वेङ्कट० आसनस्थानम् तव इन्द्र! सदनार्थम् कृतम् । तम्[1] योनिम् आ प्र याहि पुरुहूत! [2]मरुद्भिः। भवसि[3] यथा अस्माकं रक्षिता, वर्धनाय च ददासि धनानि, मादयसि च[3] सोमैः ॥ १ ॥

गृभीतं ते मन इन्द्र द्विबर्हाः सुतः सोमः परिषिक्ता मधूनि ।
विसृष्टधेना भरते सुवृक्तिरियमिन्द्रं जोहुवती मनीषा ॥ २ ॥

गृभीतम् । ते । मनः । इन्द्र । द्विऽबर्हाः । सुतः । सोमः । परिऽसिक्ता । मधूनि ।
विसृष्टऽधेना । भरते । सुऽवृक्तिः । इयम् । इन्द्रम् । जोहुवती । मनीषा ॥ २ ॥

वेङ्कट० गृहीतम् अस्माभिः तव इन्द्र! मनः द्वयोः स्थानयोः परिवृढम् । सुतः च सोमः । ततः परितः पात्रेषु च सिक्तानि मधूनि । विसृष्टवाक्[4] इन्द्राय हविः विभजन्ती[5] सुप्रवृत्ता इयम् इन्द्रम् भृशमाह्वयन्ती स्तुतिः वाणी[6] देवेभ्यो हव्यं वहति ॥ २ ॥

आ नो दिव आ पृथिव्या ऋजीषिन्निदं बर्हिः सोमपेयाय याहि ।
वहन्तु त्वा हरयो मद्र्यञ्चमाङ्गूषमच्छा तवसं मदाय ॥ ३ ॥

आ । नः । दिवः । आ । पृथिव्याः । ऋजीषिन् । इदम् । बर्हिः । सोमऽपेयाय । याहि ।
वहन्तु । त्वा । हरयः । मद्र्यञ्चम् । आङ्गूषम् । अच्छ । तवसम् । मदाय ॥ ३ ॥

वेङ्कट० आ याहि अस्माकम् इदम् बर्हिः पृथिव्याः दिवः वा सोमपानाय तृतीयसवनस्थेन[7] 'ऋजीषेण सद्वन्!'[8] । वहन्तु त्वा हरयः मदभिमुखं स्तोमं प्रति प्रवृद्धं तव मदार्थम् ॥ ३ ॥

आ नो विश्वाभिरूतिभिः सजोषा ब्रह्म जुषाणो हर्यश्व याहि ।
वरीवृजत् स्थविरेभिः सुशिप्रास्मे दधद् वृषणं शुष्ममिन्द्र ॥ ४ ॥

आ । नः । विश्वाभिः । ऊतिऽभिः । सऽजोषाः । ब्रह्म । जुषाणः । हरिऽअश्व । याहि ।
वरीवृजत् । स्थविरेभिः । सुऽशिप्र । अस्मे इति । दधत् । वृषणम् । शुष्मम् । इन्द्र ॥ ४ ॥

वेङ्कट० आ याहि अस्मान् विश्वैः मरुद्भिः सह स्तुतिम् सेवमानः हर्यश्व । हिंसन् स्थविरैः मरुद्भिः शत्रून् हे सुहनो![9] अस्मासु दधत् कामानां वर्षितृ बलम् इन्द्र![10] ॥ ४ ॥

---

1. तद् मूको. 2. मुदितम् वि' अ'. 3. इव मूको. 4. 'ष्टवान् वि'; विसृष्ट' अ'. 5. 'भजी मूको, विभजति छ प्रस्ताव. 6. वाणि मूको. 7. 'नायेन···ऌ एक. 8-8. 'ण··· वि' अ'; 'त्रिषेन···दन् छ एक. 9. सुमनो मूको. 10. इन्द्र मूको.

एष स्तोमो मह उग्राय वाहे धुरीऽवात्यो न वाजयन्नधायि ।
इन्द्र त्वायमर्क ईट्टे वसूनां दिवीव द्यामधि नः श्रोमतं धाः ॥ ५ ॥

एषः । स्तोमः । महे । उग्राय । वाहे । धुरिऽइव । अत्यः । न । वाजयन् । अधायि ।
इन्द्र । त्वा । अयम् । अर्कः । ईट्टे । वसूनाम् । दिविऽइव । द्याम् । अधि । नः । श्रोमतम् । धाः ॥५॥

वेङ्कट० एषः स्तोमः महते '[1]उद्गूर्णाय वहनार्थं[1]' रथस्य धुरि इव अश्वः '[2]वाजयन् जयं[2]' कुर्वन् अधायि युक्तः । इन्द्र! त्वा अयम् स्तोता स्तौति धनानामर्थाय[3] । '[4]दिवि इव[4]' आदित्यम् अस्मान् अधि श्रवणीयमन्नं धेहि ॥ ५ ॥

एवा न इन्द्र वार्यस्य पूर्धि प्र ते महीं सुमतिं वेविदाम ।
इषं पिन्व मघवद्भ्यः सुवीरां यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

एव । नः । इन्द्र । वार्यस्य । पूर्धि । प्र । ते । महीम् । सुऽमतिम् । वेविदाम ।
इषम् । पिन्व । मघवत्ऽभ्यः । सुऽवीराम् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥

वेङ्कट० एवम् अस्माकम् इन्द्र! वरणीयं धनम् पूरय । प्रकर्षेण जानीमो वयं त्वदीयाम्[5] सुमतिम् । प्रयच्छ अन्नम् हविष्मद्भ्यः सुपुत्रमिति ॥ ६ ॥

[6]इति पञ्चमाष्टके तृतीयाध्याये अष्टमो वर्गः[6] ॥

[२५]

[1]वसिष्ठो मैत्रावरुणिर्ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः[1] ।

आ ते मह इन्द्रोत्युग्र समन्यवो यत् समरन्त सेनाः ।
पताति दिद्युन्नर्यस्य बाह्वोर्मा ते मनो विष्वद्र्यग्वि चारीत् ॥ १ ॥

आ । ते । महः । इन्द्र । ऊती । उग्र । सऽमन्यवः । यत् । सम्ऽअरन्त । सेनाः ।
पताति । दिद्युत् । नर्यस्य । बाह्वोः । मा । ते । मनः । विष्वद्र्यक् । वि । चारीत् ॥ १ ॥

वेङ्कट० आ समरन्त[7] । तव[8] महतः[8] । '[9]मा तव[9] मनः शत्रुदर्शनेन विष्वगञ्चनम्[10]' वि चरतु ॥ १ ॥

नि दुर्ग इन्द्र श्नथिह्यमित्राँ अभि ये नो मर्तासो अमन्ति ।
आरे तं शंसं कृणुहि निनित्सोरा नो भर संभरणं वसूनाम् ॥ २ ॥

१-१. °ये हना° वि' अ'; °णां वेह° ल लभ. २-२. °य स जयद् अ' लभ. ३. धनेशा° मूको.
४. दिविव मूको. ५. तदी° अ'. ६-६. नास्ति मूको. ७. समरं तत अ'; समन्तत: वि',
८. नास्ति वि' अ'. ९. नास्ति ल लभ. १०. विरग° मूको.

नि । दुःऽगे । इन्द्र । श्नथिहि । अमित्रान् । अभि । ये । नः । मर्तासः । अमन्ति ।
आरे । तम् । शंसम् । कृणुहि । निनित्सोः । आ । नः । भर । सम्ऽभरणम् । वसूनाम् ॥ २ ॥

वेङ्कट० दुर्गे युद्धे नितराम् अधिहि अमित्रान् इन्द्र! अभि हिंसन्ति[1] ये अस्मान् मनुष्याः। दूरे तद् अभिशंसनम् कुरु[2] निन्दितुमिच्छतः। आ हर अस्मभ्यम् वसूनाम् सम्भर्तारम् ॥ २ ॥

शतं ते शिप्रिन्नूतयः सुदासे सहस्रं शंसा उत रातिरस्तु ।
जहि वधर्वनुषो मर्त्यस्यास्मे द्युम्नमधि रत्नं च धेहि ॥ ३ ॥

शतम् । ते । शिप्रिन् । ऊतयः । सुऽदासे । सहस्रम् । शंसाः । उत । रातिः । अस्तु ।
जहि । वधः । वनुषः । मर्त्यस्य । अस्मे इति । द्युम्नम् । अधि । रत्नम् । च । धेहि ॥ ३ ॥

वेङ्कट० शतम् ते शिप्रिन्! ऊतयः शोभनदानाय, सहस्रम् च शंसनीयाः ऊतयः सन्तु, अपि च दानम्। जहि आयुधम् हन्तुः[3] मनुष्यस्य। अस्मासु अन्नम् रत्नम् च "अधि धेहि"[4] ॥ ३ ॥

त्वावतो हीन्द्र क्रत्वे अस्मि त्वावतोऽवितुः शूर रातौ ।
विश्वेदहानि तविषीव उग्रँ ओकः कृणुष्व हरिवो न मर्धीः ॥ ४ ॥

त्वाऽवतः । हि । इन्द्र । क्रत्वे । अस्मि । त्वाऽवतः । अवितुः । शूर । रातौ ।
विश्वा । इत् । अहानि । तविषीऽवः । उग्र । ओकः । कृणुष्व । हरिऽवः । न । मर्धीः ॥४॥

वेङ्कट० त्वत्सदृशस्य हि इन्द्र! कर्मणे[5] भवामि, न न्यूनगुणस्य। तथा त्वावतः रक्षितुः शूर! दाने भवामि[6]। विश्वानि एव अहानि हे "बलवन्! उद्गूर्ण!"[7] सेवाम् कुरुष्व। हरिवः! मा अस्मान् हिंसीः[8] ॥ ४ ॥

कुत्सा एते हर्यश्वाय शूषमिन्द्रे सहो देवजूतमियानाः ।
सत्रा कृधि सुहना शूर वृत्रा वयं तरुत्राः सनुयाम वाजम् ॥ ५ ॥

कुत्साः । एते । हरिऽअश्वाय । शूषम् । इन्द्रे । सहः । देवऽजूतम् । इयानाः ।
सत्रा । कृधि । सुऽहना । शूर । वृत्रा । वयम् । तरुत्राः । सनुयाम । वाजम् ॥ ५ ॥

वेङ्कट० स्तोमानां[9] कर्तारः एते हर्यश्वाय इन्द्राय सुखकरम् स्तोममुच्चारयन्ति इन्द्रे बलं देवेन प्रेरितम् गच्छन्तः। बहूनि वृत्राणि सुहनानि कुरु हे शूर!। वयम् दुःखादुत्तीर्णाः[10] लभेमहि अन्नम् ॥ ५ ॥

---

१. °सति मूको. २. कुरु मूको. ३. हन्तुः वि° अ°. ४-४. अभिरेहि मूको. ५. कर्मणो वि° अ° ह; कर्मणेः लभ. ६. भामि मूको. ७-७. °बलदग्° वि°; °बलदुग्° अ°; °बन्दुग्° ह लभ. ८. हिंमि मूको. ९. °ना अ° लभ. १०. °र्णा भवेम अ°.

एवा न इन्द्र वार्यस्य पूर्धि प्र ते महीं सुमतिं वेविदाम ।
इषं पिन्व मघवद्भ्यः सुवीरां यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

एव । नः । इन्द्र । वार्यस्य । पूर्धि । प्र । ते । महीम् । सुऽमतिम् । वेविदाम ।
इषम् । पिन्व । मघवत्ऽभ्यः । सुऽवीराम् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥

वेङ्कट० ऋ ७,२४,६द. ॥ ६ ॥

[१]इति पञ्चमाष्टके तृतीयाध्याये नवमो वर्गः[१] ॥

[२६]

[१]वसिष्ठो मैत्रावरुणिर्ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः[१] ।

न सोम इन्द्रमसुतो ममाद नाब्रह्माणो मघवानं सुतासः ।
तस्मा उक्थं जनये यज्जुजोषन्नृवन्नवीयः शृणवद् यथा नः ॥ १ ॥

न । सोमः । इन्द्रम् । असुतः । ममाद । न । अब्रह्माणः । मघऽवानम् । सुतासः ।
तस्मै । उक्थम् । जनये । यत् । जुजोषत् । नृऽवत् । नवीयः । शृणवत् । यथा । नः ॥ १ ॥

वेङ्कट० न सोमः इन्द्रम् असुतः[२] तर्पयति[३] । न मामद्यान्तः[४] मघवानम् सुताः अपि मदयन्ति । तस्मै उक्थम् जनयामि, यदि सेवते, मनुष्यराजवत् नवतरम् उक्थम् शृणुयात् यथा अस्मदीयम् ॥ १ ॥

उक्थउक्थे सोम इन्द्रं ममाद नीथेनीथे मघवानं सुतासः ।
यदीं सबाधः पितरं न पुत्राः समानदक्षा अवसे हवन्ते ॥ २ ॥

उक्थेऽउक्थे । सोमः । इन्द्रम् । ममाद । नीथेऽनीथे । मघऽवानम् । सुतासः ।
यत् । ईम् । सऽबाधः । पितरम् । न । पुत्राः । समानऽदक्षाः । अवसे । हवन्ते ॥ २ ॥

वेङ्कट० शस्त्रेशस्त्रे सोमः इन्द्रम् मादयति[५], नयनेनयने[६] मघवानम् सुताः तर्पयन्ति, यदि[७] एनं बाधासहिताः (द्र. निघ ३,१८)[८] पितरम् इव पुत्राः समानोत्साहाः सङ्गताः रक्षणाय ह्वयन्ते[९] ॥ २ ॥

चकार ता कृणवन्नूनमन्या यानि ब्रुवन्ति वेधसः सुतेषु ।
जनीरिव पतिरेकः समानो नि मामृजे पुर इन्द्रः सु सर्वाः ॥ ३ ॥

चकार । ता । कृणवत् । नूनम् । अन्या । यानि । ब्रुवन्ति । वेधसः । सुतेषु ।
जनीःऽइव । पतिः । एकः । समानः । नि । ममृजे । पुरः । इन्द्रः । सु । सर्वाः ॥ ३ ॥

१-१. नास्ति मूको. २. असु रि[१] अ[२]; असुः छ लभ. ३. °यन्ति मूको. ४. °द्यन्तः मूको. ५. मा वि[१] अ[१]; मान्दि छ लभ. ६. नयनेन लभ; नयनेनयेन अन्यत्र. ७. यथा अ[१]. ८. द्र. वेप १,१२७६]. ९. ह्वन्ते मूको.

वेङ्कट० चकार तानि कर्माणि वृत्रवधादीनि, करोति च सम्प्रति अन्यानि, यानि स्तुवन्ति विधातार सुतेषु सोमेषु। यथा एक साधारण पतिः बह्वीर्जाया उपगच्छति, एवं सुष्ठु नि मार्ष्टि[1] विनाशयति[2] शत्रूणा पुरी[3] एक एव सर्वा इति ॥ ३ ॥

एवा तमाहुरुत शृण्व इन्द्र एको विभक्ता तरणिर्मघानाम् ।
मिथस्तुर ऊतयो यस्य पूर्वीरस्मे भद्राणि सश्चत प्रियाणि ॥ ४ ॥

एव । तम् । आहुः । उत । शृण्वे । इन्द्रः । एकः । विऽभक्ता । तरणिः । मघानाम् ।
मिथःऽतुरः । ऊतयः । यस्य । पूर्वीः । अस्मे इति । भद्राणि । सश्चत । प्रियाणि ॥ ४ ॥

वेङ्कट० एवम् तम् आहु, अपि च श्रूयते—इन्द्र एक एव विभक्ता धनानाम् तारक । मिथस्तुर इतरेतर बाधमानानि निबिडानि[4] ऊतय पालनानि यस्य बहूनि, तस्य प्रियाणि[5] भद्राणि अस्मासु[6] सक्तानीति ॥ ४ ॥

एवा वसिष्ठ इन्द्रमूतये नॄन् कृष्टीनां वृषभं सुते गृणाति ।
सहस्रिण उप नो माहि वाजान् यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

एव । वसिष्ठः । इन्द्रम् । ऊतये । नॄन् । कृष्टीनाम् । वृषभम् । सुते । गृणाति ।
सहस्रिणः । उप । नः । माहि । वाजान् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥

वेङ्कट० एवम् वसिष्ठ इन्द्रम् रक्षणाय नृणाम् मनुष्याणाम् वर्षितारम् सुते सोमे स्तौति। सहस्रसङ्ख्यानि अन्नानि अस्माकम् उप मिमीहि समीपे कुरु ॥ ५ ॥

[7]इति पञ्चमाष्टके तृतीयाध्याये दशमो वर्गः[7] ॥

[२७]

[7]वसिष्ठो मैत्रावरुणिर्ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः[7] ।

इन्द्रं नरो नेमधिता हवन्ते यत् पार्या युनजते धियस्ताः ।
शूरो नृषाता शवसश्चकान आ गोमति व्रजे भजा त्वं नः ॥ १ ॥

इन्द्रम् । नरः । नेमऽधिता । हवन्ते । यत् । पार्याः । युनजते । धियः । ताः ।
शूरः । नृऽसाता । शवसः । चकानः । आ । गोऽमति । व्रजे । भज । त्वम् । नः ॥ १ ॥

वेङ्कट० इन्द्रम् मनुष्या सङ्ग्रामे ह्वयन्ते, यदा युद्धतरणनिमित्तानि कर्माणि युञ्जते तानितानि। शूर नृषु सम्भक्ता[8] बलस्य तृप्त प्रापय गोमति व्रजे अस्मान् त्वम् इति ॥ १ ॥

---

1 मार्ष्टि मूको. २ विन्दाश° वि' अ' लभ ३ पुरी मूको. ४. निबा मूको ५ प्रियाणि वि'. ६ °सु इ लभ ७-७ नास्ति मूको. ८. संभर्ता वि' अ'.

य इन्द्र शुष्मो मघवन् ते अस्ति शिक्षा सखिभ्यः पुरुहूत नृभ्यः ।
त्वं हि दृळ्हा मघवन् विचेता अपा वृधि परिवृतं न राधः ॥ २ ॥

यः । इन्द्र । शुष्मः । मघऽवन् । ते । अस्ति । शिक्ष । सखिऽभ्यः । पुरुऽहूत । नृऽभ्यः ।
त्वम् । हि । दृळ्हा । मघऽवन् । विऽचेताः । अप । वृधि । परिऽवृतम् । न । राधः ॥ २ ॥

वेङ्कट० यत् इन्द्र! बलम् मघवन्! तव अस्ति[1], तत् प्रयच्छ सखिभ्यः नृभ्यः पुरुहूत! । त्वम् हि दृढान्यपि पुराणि शत्रूणां मृद्नासि[2] मघवन्! विचेताः । तथा सति अप वृधि विवृतद्वारं कुरु परिवृतम् इव अपवरकादिकं धनं शत्रुपुरेषु स्थितम् ॥ २ ॥

इन्द्रो राजा जगतश्चर्षणीनामधि क्षमि विषुरूपं यदस्ति ।
ततो ददाति दाशुषे वसूनि चोदद् राध उपस्तुतश्चिदर्वाक् ॥ ३ ॥

इन्द्रः । राजा । जगतः । चर्षणीनाम् । अधि । क्षमि । विषुऽरूपम् । यत् । अस्ति ।
ततः । ददाति । दाशुषे । वसूनि । चोदत् । राधः । उपऽस्तुतः । चित् । अर्वाक् ॥ ३ ॥

वेङ्कट० इन्द्रः राजा चतुष्पदः द्विपदां च, पृथिव्यां नानारूपम् यत् अस्ति तस्य च सर्वस्य राजा । ततः प्रयच्छति दाशुषे वसूनि । सम्प्रति च चोदयति धनम् उपस्तुतः[3] अस्मदभिमुखम् ॥ ३ ॥

नू चिन्न इन्द्रो मघवा सहूती दानो वाजं नि यमते न ऊती ।
अनूना यस्य दक्षिणा पीपाय वामं नृभ्यो अभिवीता सखिभ्यः ॥ ४ ॥

नु । चित् । नः । इन्द्रः । मघऽवा । सऽहूती । दानः । वाजम् । नि । यमते । नः । ऊती ।
अनूना । यस्य । दक्षिणा । पीपाय । वामम् । नृऽभ्यः । अभिऽवीता । सखिऽभ्यः ॥ ४ ॥

वेङ्कट० क्षिप्रम् अस्माकम् इन्द्रः धनवान्[4] मरुद्गणेन सहितः ददानः[5] अन्नं नियमेन प्रयच्छतु अस्माकम् रक्षणाय । अन्यूनम् यस्य दानम् वर्धयति वननीयं[6] कामम् नृभ्यः अभिकाम्तम्[7] सखिभ्यः ॥ ४ ॥

नू इन्द्र राये वरिवस्कृधी न आ ते मनो ववृत्याम मघाय ।
गोमदश्वावद् रथवद् व्यन्तो यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

नु । इन्द्र । राये । वरिवः । कृधि । नः । आ । ते । मनः । ववृत्याम । मघाय ।
गोऽमत् । अश्वऽवत् । रथऽवत् । व्यन्तः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥

---

१. नास्ति ल लभ. २. मृत्नाति मूको. ३. अपस्थित॰ वि॰ अ॰. ४. 'धन् वि॰ अ॰ ल; धनं लभ. ५. दधानः अ॰. ६. वनीय मूको. ७. अभिका॰ मूको.

वेङ्कट० क्षिप्रम् इन्द्र! अस्माकं परिचरणं धनाय कुरु। परिचरणेन प्रीतो धनं प्रयच्छ। तव मनः वयं धनाय आ वर्तयामः गोमत् अश्ववत् रथवत् च धनं कामयमानाः ॥ ५ ॥

[1]इति पञ्चमाष्टके तृतीयाध्याये एकादशो वर्गः[1] ॥

[२८]

[1]वसिष्ठो मैत्रावरुणिर्ऋषिः। इन्द्रो देवता। त्रिष्टुप् छन्दः[1]।

ब्रह्मा॑ ण इन्द्रोप॑ याहि विद्वान॒र्वाञ्च॑स्ते॒ हर॑यः सन्तु यु॒क्ताः ।
विश्वे॑ चि॒द्धि त्वा॑ वि॒हव॑न्त॒ मर्ता॑ अ॒स्माक॒मिच्छृ॑णुहि विश्वमिन्व ॥ १ ॥

ब्रह्म॑ । नः॒ । इ॒न्द्र॒ । उप॑ । या॒हि॒ । वि॒द्वान् । अ॒र्वाञ्चः॑ । ते॒ । हर॑यः । स॒न्तु॒ । यु॒क्ताः ।
विश्वे॑ । चि॒त् । हि । त्वा॒ । वि॒ऽहव॑न्त । मर्ताः॑ । अ॒स्माक॑म् । इत् । शृ॒णु॒हि॒ । वि॒श्व॒म्ऽइ॒न्व॒ ॥ १ ॥

वेङ्कट० स्तोत्रम् इन्द्र! अस्माकम् उप गच्छ जानन्। अभिमुखाः ते अश्वाः सन्तु रथे युक्ताः। सर्वे अपि त्वा विविधमाह्वयन्ति मनुष्याः। अस्माकम् एव स्तुतिम् शृणु हे विश्वस्य प्रीणयितः! ॥ १ ॥

ह॒वं त इ॑न्द्र महि॒मा व्या॑न॒ड् ब्रह्म॒ यत् पासि॑ शवसि॒न्नृषी॑णाम् ।
आ यद् वज्रं॑ दधि॒षे हस्त॑ उग्र घो॒रः सन् क्रत्वा॑ जनिष्ठा॒ अषा॑ळ्हः ॥ २ ॥

ह॒वम् । ते॒ । इ॒न्द्र॒ । म॒हि॒मा । वि । आ॒न॒ट् । ब्रह्म॑ । यत् । पासि॑ । श॒व॒सि॒न् । ऋषी॑णाम् ।
आ । यत् । वज्र॑म् । द॒धि॒षे । हस्ते॑ । उ॒ग्र॒ । घो॒रः । सन् । क्रत्वा॑ । ज॒नि॒ष्ठाः॒ । अषा॑ळ्हः ॥ २ ॥

वेङ्कट० ह्वानम् ते इन्द्र! महिमा व्याप्नोति। स्तोता महिमानमेतीत्यर्थः। यस्मात् त्वं बलवन्! ऋषीणाम् स्तोत्रं धनप्रदानेन रक्षसि। यस्मात् च शत्रूणां हननाय वज्रम् धारयसि हस्ते [2]उद्गूर्ण! । स त्वम्[2] घोरः सन् कर्मणैव शत्रुभिः असोढा जातः ॥ २ ॥

तव॒ प्रणी॑तीन्द्र॒ जोहु॑वाना॒न्त्सं यन्नॄन् न रोद॑सी नि॒नेथ॑ ।
म॒हे क्ष॒त्राय॒ शव॑से॒ हि ज॒ज्ञेऽतू॑तुजिं चि॒त् तूतु॑जिरशिश्नत् ॥ ३ ॥

तव॑ । प्रऽनी॑ती । इ॒न्द्र॒ । जोहु॑वानान् । सम् । यत् । नॄन् । न । रोद॑सी॒ इति॑ । नि॒नेथ॑ ।
म॒हे । क्ष॒त्राय॑ । शव॑से । हि । ज॒ज्ञे । अतू॑तुजिम् । चि॒त् । तूतु॑जिः । अ॒शि॒श्न॒त् ॥ ३ ॥

वेङ्कट० तव प्रणयनेन इन्द्र! स्तोतॄन् सदा त्वम् सम् नयसि नरान् इव वृष्ट्यान्नप्रदानेन[3] द्यावापृथिव्यौ। तदानीं सोऽयमिन्द्रो महते बलाय वेगाय च प्रादुर्भूतश्च [4]अप्रयच्छन्तम् अयजमानम् श्नथयति[4] स्वयं स्तोतृभ्यः प्रयच्छतीति ॥ ३ ॥

१-१. नास्ति मूको. २-२. उद्‌··· वि[2] अ[1]. ३. वृष्ट्यान्न[?] छम. ४-४. अप्रयच्छन्त ··· थ वि[2] अ[1].

एभिर्न इन्द्राहभिर्दशस्य दुर्मित्रासो हि क्षितयः पवन्ते ।
प्रति यच्चष्टे अनृतमनेना अव द्विता वरुणो मायी नः सात् ॥ ४ ॥

एभिः । नः । इन्द्र । अहऽभिः । दशस्य । दुःऽमित्रासः । हि । क्षितयः । पवन्ते ।
प्रति । यत् । चष्टे । अनृतम् । अनेनाः । अव । द्विता । वरुणः । मायी । नः । सात् ॥ ४ ॥

वेङ्कट० एभिः अस्मभ्यम् इन्द्र! अहोभिः प्रीतः प्रयच्छ धनं विजयाय। बाधकाः हि मनुष्याः अभिगच्छन्ति अस्मान्। यत् अनृतम् अस्मासु इन्द्र! प्रति पश्यति, तद् अस्माकम् अनृतम् अनेनाः प्रज्ञावान् वरुणः द्वैधम्[1] [2]अव स्यतु[2] विश्लथयत्विति ॥ ४ ॥

वोचेमेदिन्द्रं मघवानमेनं महो रायो राधसो यद् ददन्नः ।
यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

वोचेम । इत् । इन्द्रम् । मघऽवानम् । एनम् । महः । रायः । राधसः । यत् । ददत् । नः ।
यः । अर्चतः । ब्रह्मऽकृतिम् । अविष्ठः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥

वेङ्कट० स्तुमास एव[3] धनवन्तम् एनम् इन्द्रम्, महत् धनम् अन्नं च प्रसादात् अस्मभ्यं प्रयच्छति, यः स्तुवतः[4] स्तोत्रकृतिम् अतिशयेन रक्षिता ॥ ५ ॥

[5]इति पञ्चमाष्टके तृतीयाध्याये द्वादशो वर्गः[5] ॥

[२९]

[5]वसिष्ठो मैत्रावरुणिर्ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः[5] ।

अयं सोम इन्द्र तुभ्यं सुन्व आ तु प्र याहि हरिवस्तदोकाः ।
पिबा त्वस्य सुषुतस्य चारोर्ददो मघानि मघवन्नियानः ॥ १ ॥

अयम् । सोमः । इन्द्र । तुभ्यम् । सुन्वे । आ । तु । प्र । याहि । हरिऽवः । तत्ऽओकाः ।
पिब । तु । अस्य । सुऽसुतस्य । चारोः । ददः । मघानि । मघऽवन् । इयानः ॥ १ ॥

वेङ्कट० अयम् सोमः इन्द्र! तुभ्यम् सुन्वे। क्षिप्रम् आ प्र याहि हरिवः! सोमनिलयः। पिब क्षिप्रम् अमुं सुतम् चारुम्[6]। प्रयच्छ धनानि मघवन्! अभिगम्यमानः[7] ॥ १ ॥

ब्रह्मन् वीर ब्रह्मकृतिं जुषाणोऽर्वाचीनो हरिभिर्याहि तूयम् ।
अस्मिन्नू षु सवने मादयस्वोप ब्रह्माणि शृणव इमा नः ॥ २ ॥

---

1. द्वैधम् वि[1] अ[1]; वैधम् ल एभ. 2-2. अवस्यतु मूको. 3. वै वि[1] अ[1]; इव अन्यत्र. 4. स्तुवत मूको. 5-5. नास्ति मूको. 6. चारो वि[1]; चारोः ल; चारां अ[1] एभ. 7. °मान मूको.

ब्रह्मन् । वीर् । ब्रह्मऽकृतिम् । जुषाणः । अर्वाचीनः । हरिऽभिः । याहि । तूयम् ।
अस्मिन् । ऊँ इति । सु । सर्वने । मादयस्व । उप । ब्रह्माणि । शृणवः । इमा । नः ॥ २ ॥

वेङ्कट० हे परिवृढ! वीर! स्तोत्रकृतिम् सेवमानः अभिमुखः[1] अश्वैः याहि क्षिप्रम्। अस्मिन् सवने सुष्टु मादयस्व[2]। उप शृणु ब्रह्माणि च इमानि अस्माकम् ॥ २ ॥

का ते अस्त्यरंकृतिः सूक्तैः कदा नूनं ते मघवन् दाशेम ।
विश्वा मतीरा ततने त्वायाधा म इन्द्र शृणवो हवेमा ॥ ३ ॥

का । ते । अस्ति । अरम्ऽकृतिः । सुऽउक्तैः । कदा । नूनम् । ते । मघऽवन् । दाशेम ।
विश्वाः । मतीः । आ । ततने । त्वाऽया । अर्ध । मे । इन्द्र । शृणवः । हवा । इमा ॥ ३ ॥

वेङ्कट० का ते भवति सूक्तैः अलङ्कृतिः। कदा क्षिप्रमेव मघवन्! तुभ्यम् हवींषि दाशेम । विश्वाः स्तुतीः विस्तारयामि[3]। [4]त्वत्कामनया अथ[4] मे इन्द्र! शृणु[5] हवानि इमानि ॥ ३ ॥

उतो घा ते पुरुष्या३ इदासन् येषां पूर्वेषामशृणोर्ऋषीणाम् ।
अधाहं त्वा मघवञ्जोहवीमि त्वं न इन्द्रासि प्रमतिः पितेव ॥ ४ ॥

उतो इति । घ । ते । पुरुष्याः । इत् । आसन् । येषाम् । पूर्वेषाम् । अशृणोः । ऋषीणाम् ।
अर्ध । अहम् । त्वा । मघऽवन् । जोहवीमि । त्वम् । नः । इन्द्र । असि । प्रऽमतिः । पिताऽइव ॥

वेङ्कट० अपि च खलु ते पुरुषहिताः[6] एव[7] प्रवृत्तयः आसन्, येषाम् पूर्वेषाम्[8] ऋषीणाम् स्तुतीः अशृणोः। अध अहम् [9]त्वाम् मघवन्![9] जोहवीमि। त्वम् अस्माकम् इन्द्र! भवसि प्रकृष्टमतिः पिता इव पुत्राणाम्[10] ॥ ४ ॥

वोचेमेदिन्द्रं मघवानमेनं महो रायो राधसो यद् ददन्नः ।
यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

वोचेम । इत् । इन्द्रम् । मघऽवानम् । एनम् । महः । रायः । राधसः । यत् । ददत् । नः ।
यः । अर्चतः । ब्रह्मऽकृतिम् । अविष्ठः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥

वेङ्कट० ऋ ७,२८,५ द्र. ॥ ५ ॥

[11]इति पञ्चमाष्टके तृतीयाध्याये त्रयोदशो वर्गः[11] ॥

---

१. °खः वि[२] अ[१] लभ. २. मादय वि[१]; मादयस्व अ[१] लु लभ. ३. वितारयामि वि[२] अ[१]. ४-४. °मय या मूको. ५. °शु दि मूको ६. हित अ[१] वि[२]. ७. एवा अ[१] लभ. ८. सर्वेषाम् वि[२] अ[१] लु; भार्षेयाम् लभ. ९-९. त्वाम् मघादिच वि[१] अ[१]; त्वाम् मघवंश्च लु लभ. १०. °णाम् मघावेव वि[१]; °णाम् भाष्यादेव अ[१] ११-११. नास्ति मूको.

[३०]

[1]वसिष्ठो मैत्रावरुणिर्ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः[1] ।

आ नो देव शवसा याहि शुष्मिन् भवा वृध इन्द्र रायो अस्य ।
महे नृम्णाय नृपते सुवज्र महि क्षत्राय पौंस्याय शूर ॥ १ ॥

आ । नः । देव । शवसा । याहि । शुष्मिन् । भव । वृधः । इन्द्र । रायः । अस्य ।
महे । नृम्णाय । नृऽपते । सुऽवज्र । महि । क्षत्राय । पौंस्याय । शूर ॥ १ ॥

वेङ्कट० आ याहि देव! बलेन [2]सह अस्मान् बलवन्!† । भव[2] वर्धकः इन्द्र! धनस्य अस्य[3] महते धनाय हे नृणां पते! सुवज्र! महते बलाय वीर्यकरणाय च शूर! ॥ १ ॥

हवन्त उ त्वा हव्यं विवाचि तनूषु शूराः सूर्यस्य सातौ ।
त्वं विश्वेषु सेन्यो जनेषु त्वं वृत्राणि रन्धया सुहन्तु ॥ २ ॥

हवन्ते । ऊँ इति । त्वा । हव्यम् । विऽवाचि । तनूषु । शूराः । सूर्यस्य । सातौ ।
त्वम् । विश्वेषु । सेन्यः । जनेषु । त्वम् । वृत्राणि । रन्धय । सुऽहन्तु ॥ २ ॥

वेङ्कट० हवन्ते एव त्वा हवनीयम् विविधवाचि सङ्ग्रामे तनूनां रक्षणार्थं शूराः सूर्यस्य भजनार्थं च अमरणार्थं च । त्वम् विश्वेषु अपि जनेषु सेनार्हः । त्वम् शत्रून् वशीकुरु शोभमहननेन वज्रेण ॥ २ ॥

अहा यदिन्द्र सुदिना व्युच्छान् दधो यत् केतुमुपमं समत्सु ।
न्य१ग्निः सीददसुरो न होता हुवानो अत्र सुभगाय देवान् ॥ ३ ॥

अहा । यत् । इन्द्र । सुऽदिना । विऽउच्छान् । दधः । यत् । केतुम् । उपऽमम् । समत्ऽसु ।
नि । अग्निः । सीदत् । असुरः । न । होता । हुवानः । अत्र । सुऽभगाय । देवान् ॥ ३ ॥

वेङ्कट० अहानि यदा इन्द्र! सुदिनानि व्युच्छन्ति[4] । करोषि च यदा प्रज्ञानम् उदितः सन् स्वतेजसान्तिकं सङ्ग्रामेषु । उदिते आदित्ये सङ्ग्रामाः प्रवर्तन्ते । तदानीं सङ्ग्रामे विजयार्थं कर्म कुर्वाणानां[5] यजमानानाम् अग्निः नि सीदति यज्ञेषु प्राज्ञः इव होता ह्वयन् अस्मिन् लोके सौभगत्वाय[6] सुखे जयार्थम् च देवान् ॥ ३ ॥

वयं ते त इन्द्र ये च देव स्तवन्त शूर ददतो मघानि ।
यच्छा सूरिभ्य उपमं वरूथं स्वाभुवो जरणामश्नवन्त ॥ ४ ॥

१-१. नास्ति मूको. २-२. °द सम···भ° वि[1] अ[1]. † बलवान् ल छम. ३. अथ वि[1] अ[1]; अर्थ ल छम. ४. °न्ती वि[1] अ[1]. ५. °र्वाणा मूको. ६. °गतिसा° वि[1] अ[1] छ, सौगतिसा° छम.

वयम् । ते । ते । इन्द्र । ये । च । देव । स्तवन्त । शूर । ददतः । मघानि ।
यच्छ । सूरिऽभ्यः । उपऽमम् । वरूथम् । सुऽआभुवः । जरणाम् । अश्नवन्त ॥ ४ ॥

वेङ्कट० ते वयम् तव स्वभूताः इन्द्र!, ये च देव! स्तुवन्ति शूर! ददतः तव हवींषि, तेभ्योऽस्मभ्यमुभयेभ्यः प्र यच्छ स्तोतृभ्यः उपमानभूतम् गृहम्। शोभनभवनाः [1]तव स्तुतिं व्याप्नुवन्तु[1] ॥ ४ ॥

वोचेमेदिन्द्रं मघवानमेनं महो रायो राधसो यद् ददन्नः ।
यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

वोचेम । इत् । इन्द्रम् । मघऽवानम् । एनम् । महः । रायः । राधसः । यत् । ददत् । नः ।
यः । अर्चतः । ब्रह्मऽकृतिम् । अविष्ठः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥

वेङ्कट० ऋ ७,२८,५ द्र. ॥ ५ ॥

[2]इति पञ्चमाष्टके तृतीयाध्याये चतुर्दशो वर्गः[2] ॥

[३१]

[3]वसिष्ठो मैत्रावरुणिर्ऋषिः । इन्द्रो देवता । गायत्री छन्दः, दशम्यादिद्वादश्यन्ता विराजः[3] ।

प्र व इन्द्राय मादनं हर्यश्वाय गायत । सखायः सोमपाव्ने ॥ १ ॥

प्र । वः । इन्द्राय । मादनम् । हरिऽअश्वाय । गायत । सखायः । सोमऽपाव्ने ॥ १ ॥

वेङ्कट० प्र गायत यूयम् इन्द्राय मदकरं स्तोत्रम् हर्यश्वाय सखायः! सोमपाव्ने ॥ १ ॥

शंसेदुक्थं सुदानव उत द्युक्षं यथा नरः । चकृमा सत्यराधसे ॥ २ ॥

शंस । इत् । उक्थम् । सुऽदानवे । उत । द्युक्षम् । यथा । नरः । चकृम । सत्यऽराधसे ॥ २ ॥

वेङ्कट० [4]शंस एव उक्थम्[4] शोभनदानाय । अपि च[5] दीप्तं स्तोत्रम् यथा[5] अस्मै नरः कुर्वन्ति तथा[5] कुर्मः सत्यधनाय ॥ २ ॥

त्वं न इन्द्र वाजयुस्त्वं गव्युः शतक्रतो । त्वं हिरण्ययुर्वसो ॥ ३ ॥

त्वम् । नः । इन्द्र । वाजऽयुः । त्वम् । गव्युः । शतक्रतो इति शतऽक्रतो । त्वम् । हिरण्यऽयुः । वसो इति ॥

वेङ्कट० त्वम् अस्माकम् इन्द्र! अन्नकामः, त्वम् गोकामश्च शतक्रतो!, त्वम् हिरण्यकामश्च हे वासयितः![7] ॥ ३ ॥

१-१. तवस्तुतिं व्याप्नुवन्ति वि[1]; तवस्तुवन्ति व्याप्नुवन्ति अ[1]. २-२. नास्ति मूको. ३-३. नास्ति वि[1] अ[1]. ४. यत्र वि[1] अ[1]; य ए एभ. ५. यदि वा अ[1]. ६. तदा अ[1]. ७. वाता[*] वि[1] अ[1] एः या सहितो एभ.

वयमिन्द्र त्वायवोऽभि प्र णोनुमो वृषन् । विद्धी त्वश्स्य नो वसो ॥ ४ ॥

वयम् । इन्द्र । त्वाऽयवः । अभि । प्र । नोनुमः । वृषन् । विद्धि । तु । अस्य । नः । वसो इति ॥४॥

वेङ्कट० वयम् इन्द्र! त्वत्कामाः[1] त्वाम् अभि प्र स्तुमः 'वर्षित.![1] विद्धि क्षिप्रम्[2] वासयितः! सत् न स्तोत्रम् ॥ ४ ॥

मा नो निदे च वक्तवेऽर्यो रन्धीरराव्णे । त्वे अपि क्रतुर्मम ॥ ५ ॥

मा । नः । निदे । च । वक्तवे । अर्यः । रन्धीः । अराव्णे । त्वे इति । अपि । क्रतुः । मम ॥ ५ ॥

वेङ्कट० मा अस्मान् निन्दित्रे परस्य[3] वक्त्रे च अर्य त्वम् वशं नयः[3] अदात्रे च। त्वय्येव च मम दानादिकं कर्म भवतु ॥ ५ ॥

त्वं वर्मासि सप्रथः पुरोयोधश्च वृत्रहन् । त्वया प्रति ब्रुवे युजा ॥ ६ ॥

त्वम् । वर्म । असि । सऽप्रथः । पुरःऽयोधः । च । वृत्रऽहन् । त्वया । प्रति । ब्रुवे । युजा ॥ ६ ॥

वेङ्कट० मम त्वम् कवचम् भवसि सर्वत पृथुतमम् पुरोयोध च हे शत्रुहन्! । त्वया सहायेन शत्रून् अहम् प्रति ब्रुवे ॥ ६ ॥

[4]इति पञ्चमाष्टके तृतीयाध्याये पञ्चदशो वर्गः[4] ॥

महाँ उतासि यस्य तेऽनु स्वधावरी सहः । मम्नाते इन्द्र रोदसी ॥ ७ ॥

महान् । उत । असि । यस्य । ते । अनु । स्वधावरी इति स्वधाऽवरी । सहः । मम्नाते इति । इन्द्र । रोदसी इति ॥ ७ ॥

वेङ्कट० अपि च त्वम् महान् भवसि, यस्य तव बलम् इन्द्र! बलवत्यौ द्यावापृथिव्यौ अनु मन्येते ॥ ७ ॥

तं त्वा मरुत्वती परि भुवद् वाणी सयावरी । नक्षमाणा सह द्युभिः ॥ ८ ॥

तम् । त्वा । मरुत्वती । परि । भुवत् । वाणी । सऽयावरी । नक्षमाणा । सह । द्युऽभिः ॥८॥

वेङ्कट० तम् त्वाम्[5] मरुद्भिः तद्वती परि भवतु[1] स्तुति स्तोतृभ्य सह निर्गच्छन्ती व्याप्नुवती दीप्तै[7] मरुद्भिः सह ॥ ८ ॥

ऊर्ध्वासस्त्वान्विन्दवो भुवन् दस्ममुप द्यवि । सं ते नमन्त कृष्टयः ॥ ९ ॥

ऊर्ध्वासः । त्वा । अनु । इन्दवः । भुवन् । दस्मम् । उप । द्यवि । सम् । ते । नमन्त । कृष्टयः ॥

१-१. र्षित वि[1] अ[1]; [°]र्षित द्वि वि[°] ल एम. २. पुरुषं मूको ३. तयो ल एम, तयो. वि[2] अ[1]. ४-४. नास्ति मूको. ५ त्वा अ[1]. ६. [°]वसन् मूको ७. त्वदीप्तै मूको

वेङ्कट० उन्मुखाः त्वां प्रति दस्मम् सोमाः [1]अभवन्[1]। उप दधि[2] दीप्तस्याहवनीयस्य समीपे सम् नमन्ते तुभ्यम् मनुष्याः ॥ ९ ॥

प्र वो॑ म॒हे म॑हि॒वृधे॑ भरध्वं॒ प्रचे॑तसे॒ प्र सु॑म॒तिं कृ॑णुध्वम् ।
वि॒शः॑ पू॒र्वीः प्र च॑र च॒र्ष॒णि॒प्राः ॥ १० ॥

प्र । वः॒ । म॒हे । म॒हि॒ऽवृधे॑ । भ॒र॒ध्व॒म् । प्रऽचे॑तसे । प्र । सु॒ऽम॒तिम् । कृ॒णु॒ध्व॒म् ।
वि॒शः॑ । पू॒र्वीः । प्र । च॒र॒ । च॒र्ष॒णि॒ऽप्राः ॥ १० ॥

वेङ्कट० प्र भरध्वम् यूयं [2]हविः महते[2] महतां वर्धयित्रे। प्रकृष्टज्ञानाय यूयम् सुमतिम् प्र कृणुध्वम्। त्वं च हे इन्द्र! पूर्वीः अभ्यस्ताः विशः प्रति प्र चर गच्छ[3] मनुष्याणां कामैः पूरयिता ॥ १० ॥

उ॒रु॒व्यच॑से म॒हिने॑ सुवृ॒क्तिमिन्द्रा॑य॒ ब्रह्म॑ जनयन्त॒ विप्राः॑ ।
तस्य॑ व्र॒तानि॒ न मि॑नन्ति॒ धीराः॑ ॥ ११ ॥

उ॒रु॒ऽव्यच॑से । म॒हिने॑ । सु॒ऽवृ॒क्तिम् । इन्द्रा॑य । ब्रह्म॑ । ज॒न॒य॒न्त॒ । विप्राः॑ ।
तस्य॑ । व्र॒तानि॑ । न । मि॒न॒न्ति॒ । धीराः॑ ॥ ११ ॥

वेङ्कट० [4]बहुव्याप्तये महते स्तुतिम्[4] सुप्रवृत्ताम् इन्द्राय जनयन्ति मेधाविनः। तस्य कर्माणि न हिंसन्ति प्राज्ञाः अन्येऽपि देवाः ॥ ११ ॥

इन्द्रं॒ वाणी॒रनु॑त्तमन्युमे॒व स॒त्रा राजा॑नं दधिरे॒ सह॑ध्यै ।
हर्य॑श्वाय बर्हया॒ समा॒पीन् ॥ १२ ॥

इन्द्र॑म् । वाणीः॑ । अनु॑त्तऽमन्युम् । ए॒व । स॒त्रा । राजा॑नम् । द॒धि॒रे॒ । सह॑ध्यै ।
हरि॑ऽअश्वाय । ब॒र्ह॒य॒ । सम् । आ॒पीन् ॥ १२ ॥

वेङ्कट० इन्द्रम् [5]स्तुतयः अनुत्तक्रोधम्[5] सत्यम् एव राजानम् पुरः दधिरे शत्रूणां सहाय। त्वं च हर्यश्वाय ज्ञातीन् सम् प्रोत्साहय होतः! इति ॥ १२ ॥

[6]इति पञ्चमाष्टके तृतीयाध्याये षोडशो वर्गः[6] ॥

[३२]

[7]वसिष्ठो मैत्रावरुणिर्ऋषिः, षड्विंश्याः पूर्वार्धस्य शक्तिर्वसिष्ठो वा ऋषिः (शाट्यायने ब्राह्मणे), षड्विंशीसप्तविंश्योः शक्तिर्वसिष्ठो वा (ताण्डके ब्राह्मणे)। इन्द्रो देवता। प्रगाथः (बृहती, सतोबृहती) छन्दः, तृतीया द्विपदा विराट्[7]।

मो षु त्वा॑ वा॒घत॑श्च॒नारे अ॒स्मन्नि री॑रमन् ।
आ॒रात्ता॑च्चित् सध॒मादं॑ न॒ आ ग॑ही॒ह वा॒ सन्नुप॑ श्रुधि ॥ १ ॥

१-१. माभवन्नु पपरि वि[1]; अभवन्नु पपनि अ[1]. २-२. महते हविः अ[1]. ३. गच्छ मूको. ४-४. °व्याप्त ··· स्तु° वि[1] अ[1]. ५-५. °यो स्तक्रो° अ[1]; °यः अनुत्तक्रो° वि[1] ए लभ. ६-६. नास्ति मूको.

मो इति । सु । त्वा । वाघतः । चन । आरे । अस्मत् । नि । रीरमन् ।
आरात्तात् । चित् । सधऽमादम् । नः । आ । गहि । इह । वा । सन् । उप । श्रुधि ॥ १ ॥

वेङ्कट० मैव त्वाम् अश्वाः दूरे अस्मत्तः[1] नि रमयन्तु । दूरात् अस्मत् अपि अस्माकं यज्ञम् आ गच्छ इह एव सन् स्तोत्रम् उप शृण्विति ॥ १ ॥

इमे हि ते ब्रह्मकृतः सुते सचा मधौ न मक्ष आसते ।
इन्द्रे कामं जरितारो वसूयवो रथे न पादमा दधुः ॥ २ ॥

इमे । हि । ते । ब्रह्मऽकृतः । सुते । सचा । मधौ । न । मक्षः । आसते ।
इन्द्रे । कामम् । जरितारः । वसुऽयवः । रथे । न । पादम् । आ । दधुः ॥ २ ॥

वेङ्कट० इमे हि ते[2] स्तोत्रकृतः सुते सोमे सह मधुनि[3] इव[4] मक्षिकाः पर्युपविशन्ति[4] । इन्द्रे अभिलषितकामम् धनकामाः स्तोतारः रथे इव पादम् आ दधुः ॥ २ ॥

रायस्कामो वज्रहस्तं सुदक्षिणं पुत्रो न पितरं हुवे ॥ ३ ॥

रायःऽकामः । वज्रऽहस्तम् । सुऽदक्षिणम् । पुत्रः । न । पितरम् । हुवे ॥ ३ ॥

वेङ्कट० धनकामः सन् अहम् वज्रहस्तम् शोभनदक्षिणं शोभनदानम् पुत्रः इव पितरम् ह्वयामीति । [6]सेयं द्विपदा[6] विराडिति ॥ ३ ॥

इम इन्द्राय सुन्विरे सोमासो दध्याशिरः ।
ताँ आ मदाय वज्रहस्त पीतये हरिभ्यां याह्योक आ ॥ ४ ॥

इमे । इन्द्राय । सुन्विरे । सोमासः । दधिऽआशिरः ।
तान् । आ । मदाय । वज्रऽहस्त । पीतये । हरिऽभ्याम् । याहि । ओकः । आ ॥ ४ ॥

वेङ्कट० इमे इन्द्राय सुताः सोमाः दधिमिश्रणाः । तान् आ याहि मदाय पातुम्[5] वज्रहस्त ! अश्वाभ्यां यज्ञं प्रति ॥ ४ ॥

श्रवच्छ्रुत्कर्ण ईयते वसूनां नू चिन्नो मर्धिषद् गिरः ।
सद्यश्चिद् यः सहस्राणि शता ददन्नकिर्दित्सन्तमा मिनत् ॥ ५ ॥

श्रवत् । श्रुत्ऽकर्णः । ईयते । वसूनाम् । नु । चित् । नः । मर्धिषत् । गिरः ।
सद्यः । चित् । यः । सहस्राणि । शता । ददत् । नकिः । दित्सन्तम् । आ । मिनत् ॥ ५ ॥

---

१. °स्मत्तः ल ऊक्ष. २. नास्ति वि[1] अ[1]. ३. °धू[2] मूको. ४. व मूको. ५. प्रवि° अ[1].
६-६. सेयस्त्विपदा वि[1] ल; सेयत्विपदा अ[1] ऊक्ष. ७. पातं वि[2].

वेङ्कट० श्रवत्[1] श्रुण्वत्कर्णः[2] आगच्छति वसूनाम् लाभाय। स क्षिप्रम् अस्माकं शत्रून् परुषस्य वक्तॄन् हिनस्तु। राधः एव यः सहस्राणि शतानि च प्रयच्छति। तं न कश्चित् दित्सन्तम् आ हिनस्तु निरुणद्धिविति ॥ ५ ॥

[3]इति पञ्चमाष्टके तृतीयाध्याये सप्तदशो वर्गः[3] ॥

स वीरो अप्रतिष्कुत इन्द्रेण शूशुवे नृभिः ।
यस्ते गभीरा सवनानि वृत्रहन्त्सुनोत्या च धावति ॥ ६ ॥

सः । वीरः । अप्रतिऽस्कुतः । इन्द्रेण । शूशुवे । नृऽभिः ।
यः । ते । गभीरा । सवनानि । वृत्रऽहन् । सुनोति । आ । च । धावति ॥ ६ ॥

वेङ्कट० सः वीरः अप्रतिकृतः सन् इन्द्रप्रसादात् नृभिः पुत्रादिभिः वर्धते, यः ते गम्भीराणि सवनानि वृत्रहन्! अभि सुनोति, आ धावति च त्वामिति ॥ ६ ॥

भवा वरूथं मघवन् मघोनां यत् समजासि शर्धतः ।
वि त्वाहतस्य वेदनं भजेमह्या दूणाशो भरा गयम् ॥ ७ ॥

भव । वरूथम् । मघऽवन् । मघोनाम् । यत् । सम्ऽअजासि । शर्धतः ।
वि । त्वाऽहतस्य । वेदनम् । भजेमहि । आ । दुःऽनशः । भर । गयम् ॥ ७ ॥

वेङ्कट० भव कवचम् मघवन्! धनवतामस्माकम्, यदा वेगं कुर्वाणान् अस्मान् युद्धे सम्प्रेरयसि। वि भजेमहि वयं त्वया [4]हतस्य धनम्। आ हर केनचिदपि नाशयितुमशक्यः त्वम् गृहम्[4] अस्माकम् ॥ ७ ॥

सुनोता सोमपाव्ने सोममिन्द्राय वज्रिणे ।
पचता पक्तीरवसे कृणुध्वमित् पृणन्नित् पृणते मयः ॥ ८ ॥

सुनोत । सोमऽपाव्ने । सोमम् । इन्द्राय । वज्रिणे ।
पचत । पक्तीः । अवसे । कृणुध्वम् । इत् । पृणन् । इत् । पृणते । मयः ॥ ८ ॥

वेङ्कट० सुनुत सोमस्य पात्रे सोमम् इन्द्राय वज्रिणे। पचत पक्तव्यांश्चरून् पुरोडाशांश्च रक्षणाय। कृणुध्वम् एव एतत्। प्रयच्छन् एव इन्द्रः[5] प्रयच्छते सुखं भवति ॥ ८ ॥

मा स्रेधत सोमिनो दक्षता महे कृणुध्वं राय आतुजे ।
तरणिरिज्जयति क्षेति पुष्यति न देवासः कवत्नवे ॥ ९ ॥

१. नास्ति अ[1]. २. श्रुण्व...र्ण' वि[1] अ[1]. ३-३. नास्ति मूको. ४-४. 'हतस्य...गृह' वि[1] अ[1].
५. इन्द्र मूको.

मा । स्रेधत । सोमिनः । दक्षत । महे । कृणुध्वम् । राये । आऽतुजे ।
तरणिः । इत् । जयति । क्षेति । पुष्यति । न । देवासः । कवत्नवे ॥ ९ ॥

वेङ्कट० मा क्षीणा[1] भवत हे[1] सोमिन !, अपि तर्हि उत्साहं कुरुत । महते धनाय कृणुध्वम् कर्म धनाय शत्रूणामाहर्त्रे[2]। क्षिप्रकारी एव पुरुष शत्रून्[3] जयति, सुखं च निवसति, पुष्यति च प्रजया पशुभिः । य कुत्सितं कर्म आतनोति स कवत्नु[4] इत्याहुः । न तस्मै देवा अभ्युदयम् आवहन्ति ॥ ९ ॥

नकिः सुदासो रथं पर्यास न रीरमत् ।
इन्द्रो यस्याविता यस्य मरुतो गमत् स गोमति व्रजे ॥ १० ॥

नकिः । सुऽदासः । रथम् । परि । आस । न । रीरमत् ।
इन्द्रः । यस्य । अविता । यस्य । मरुतः । गमत् । सः । गोऽमति । व्रजे ॥ १० ॥

वेङ्कट० [5]नकिः न[5] कश्चित् शोभनदानस्य पैजवनस्य राज्ञ रथम् परि अस्यति । न च रथं युद्धे प्रवृत्तं उपरमयति[6]। इन्द्र यस्य रक्षिता भवति, यस्य च मरुतः, गच्छतु सः गोमन्त व्रजं शत्रूणामिति ॥ १० ॥

[7]इति पञ्चमाष्टके तृतीयाध्याये अष्टादशो वर्गः[7] ॥

गमद् वाजं वाजयन्निन्द्र मर्त्यो यस्य त्वमविता भुवः ।
अस्माकं बोध्यविता रथानामस्माकं शूर नृणाम् ॥ ११ ॥

गमत् । वाजम् । वाजयन् । इन्द्र । मर्त्यः । यस्य । त्वम् । अविता । भुवः ।
अस्माकम् । बोधि । अविता । रथानाम् । अस्माकम् । शूर । नृणाम् ॥ ११ ॥

वेङ्कट० गच्छति अन्नम् युद्ध कुर्वन् इन्द्र! मर्त्य, यस्य त्वम् रक्षिता अभव । तथा सति अस्माकम् रथानाम् नृणाम् च अविता[8] भवामीति शूर! बुध्यस्व। बुधेरन्त्यस्य धकारस्य लोपश्छान्दसः ॥ ११ ॥

उदिन्न्वस्य रिच्यतेऽंशो धनं न जिग्युषः ।
य इन्द्रो हरिवान् न दभन्ति तं रिपो दक्षं दधाति सोमिनि ॥ १२ ॥

उत् । इत् । नु । अस्य । रिच्यते । अंशः । धनम् । न । जिग्युषः ।
यः । इन्द्रः । हरिऽवान् । न । दभन्ति । तम् । रिपः । दक्षम् । दधाति । सोमिनि ॥ १२ ॥

वेङ्कट० उत् रिच्यते इन्द्रस्य त्रिष्वपि सवनेष्वन्वितस्य[9] अंशः धनम् इव शत्रून्[10] जयत । यः इन्द्र हरिवान्, न[11] हिंसन्ति तम्[12] रिपव । किं च अयं बलम् वि[13] दधाति यजमाने ॥ १२ ॥

१-१. °त मदे मूको. २. °माहन्त्रिणे मूको. ३. शत्रु वि[3] अ[1]. ४. कल्वं वि[2] अ[1], कपर्दु ल लभ. ५-५. नकि इ वि[2] अ[1], नकि इ ल लभ. ६ तुपर° वि[1] अ[1], मुपर° ल लभ ७-७. नास्ति मूको. ८. पिता वि[2] अ[1], अपिता ल लभ. ९. °नेन्वित° मूको. १०. शत्रु ल लभ ११. न मूको. १२ कं अ[1], किं वि[1]. १३. नि अ[1].

मन्त्रमखर्वं सुधितं सुपेशसं दधात यज्ञियेष्वा ।
पूर्वीश्चन प्रसितयस्तरन्ति तं य इन्द्रे कर्मणा भुवत् ॥ १३ ॥

मन्त्रम् । अखर्वम् । सुऽधितम् । सुऽपेशसम् । दधात । यज्ञियेषु । आ ।
पूर्वीः । चन । प्रऽसितयः । तरन्ति । तम् । यः । इन्द्रे । कर्मणा । भुवत् ॥ १३ ॥

वेङ्कट० स्तोत्रम् अन्यूनम् हृदये सुष्ठु निहितम् सुरूपम् आ धत्त [1]स्तोतारः! देवेषु[1] इन्द्रे तदनुचरेषु । बह्व्योऽपि प्रसितयः[2] तम् न तरन्ति, यः इन्द्रे कर्मणा भवति । कर्म कुर्वन् इन्द्रसमीपं गच्छति । 'प्रसिति.[3] प्रसयनात्,[4] तन्तुर्वा जालं वा' (या ६,१२) इत्युक्तमिति ॥ १३ ॥

कस्तमिन्द्र त्वावसुमा मर्त्यो दधर्षति ।
श्रद्धा इत् ते मघवन् पार्ये दिवि वाजी वाजं सिषासति ॥ १४ ॥

कः । तम् । इन्द्र । त्वाऽवसुम् । आ । मर्त्यः । दधर्षति ।
श्रद्धा । इत् । ते । मघऽवन् । पार्ये । दिवि । वाजी । वाजम् । सिसासति ॥ १४ ॥

वेङ्कट० त्वं वासयिता यस्य स त्वावसुः[5] तम् त्वावसुम् कः इन्द्र! आ धर्षयति मर्त्यः ! श्रद्धया एव तुभ्यम् मघवन्! पारभवे[6] अह्नि यस्मिन्नहनि युद्धं सन्तिष्ठते तस्मिन् हविष्मान् अन्नं मदातुमिच्छति । यदहरेव शत्रुं जित्वा युद्धं संस्थापयति "तदहः पार्यमुच्यते" इति ॥ १४ ॥

मघोनः स्म वृत्रहत्येषु चोदय ये ददति प्रिया वसु ।
तव प्रणीती हर्यश्व सूरिभिर्विश्वा तरेम दुरिता ॥ १५ ॥

मघोनः । स्म । वृत्रऽहत्येषु । चोदय । ये । ददति । प्रिया । वसु ।
तव । प्रऽनीती । हरिऽअश्व । सूरिऽभिः । विश्वा । तरेम । दुःऽइता । १५ ॥

वेङ्कट० धनवतः युद्धेषु चोदय, ये प्रियाणि धनानि तेभ्यो युष्मभ्यं प्रयच्छन्ति । तव प्रणयनेन हर्यश्व! वयम् सूरिभिः पुत्रादिभिः सह विश्वानि दुरितानि[7] अति तरेम[7] ॥ १५ ॥

[10]"इति पञ्चमाष्टके तृतीयाध्याये एकोनविंशो वर्गः.[10] ॥

तवेदिन्द्रावमं वसु त्वं पुष्यसि मध्यमम् ।
सत्रा विश्वस्य परमस्य राजसि नकिष्ट्वा गोषु वृण्वते ॥ १६ ॥

तव । इत् । इन्द्र । अवमम् । वसु । त्वम् । पुष्यसि । मध्यमम् ।
सत्रा । विश्वस्य । परमस्य । राजसि । नकिः । त्वा । गोषु । वृण्वते ॥ १६ ॥

१-१. स्तोत... वि[1] अ[1]. २. प्रसितयः वि[1] अ[1] ल; प्रसितयः लभ. ३. °ति मूको. ४. प्रसयनात् वि[1] अ[1] ल; प्रसयनात् लभ. ५. °वसु मूको. ६ परम° मूको. ७-७. दुरुषेव° वि[1] अ[1] ल; °दु बांधे° लभ. ८. °तान् अ[1] एभ. ९. अतरेमेति अ[1] लभ. १०-१०. नास्ति मूको.

वेङ्कट० तव एव इन्द्र! अवमम् धनं पार्थिवम्। त्वम् एव अन्तरिक्षम् वसु पुष्यसि। त्वमेव दिव्यस्य धनस्य ईशिषे सत्यमेव सर्वस्य। न केचित् त्वा शत्रूणाम् गोषु प्रवृत्तं वारयन्ति ॥ १६ ॥

त्वं विश्वस्य धनदा असि श्रुतो य ईं भवन्त्याजयः।
तवायं विश्वः पुरुहूत पार्थिवोऽवस्युर्नाम भिक्षते ॥ १७ ॥

त्वम्। विश्वस्य। धनऽदाः। असि। श्रुतः। ये। ईम्। भवन्ति। आजयः।
तव। अयम्। विश्वः। पुरुऽहूत। पार्थिवः। अवस्युः। नाम। भिक्षते ॥ १७ ॥

वेङ्कट० त्वम् सर्वस्य धनस्य दाता भवसि विश्रुतः। ये इमे सङ्ग्रामाः भवन्ति, तेषु प्रवृत्तस्य विश्वस्येति। तव अयम् विश्वः पुरुहूत! पार्थिवः जनः रक्षणमिच्छन् नमनम् याचते ॥ १७ ॥

यदिन्द्र यावतस्त्वमेतावदहमीशीय।
स्तोतारमिद् दिधिषेय रदावसो न पापत्वाय रासीय ॥ १८ ॥

यत्। इन्द्र। यावतः। त्वम्। एतावत्। अहम्। ईशीय।
स्तोतारम्। इत्। दिधिषेय। रदवसो इति रदऽवसो। न। पापऽत्वाय। रासीय ॥ १८ ॥

वेङ्कट० यदि अहम् इन्द्र!, यावतः धनस्य त्वम् ईशिषे, 'तावतः ईशीय', ततो मां यः स्तौति, तमेव धनप्रदानेन अहं धारयेयम्। रदिः[1] विलेखनकर्मा। 'इन्द्रोऽस्मानरदद्वज्रबाहुः' (ऋ ३,३३,६) इति मन्त्रः। शत्रूणां धनानि यो विलिखति स 'रदावसुः। न[1] पापत्वाय अहं दद्याम्' इति ॥ १८ ॥

शिक्षेयमिन्महयते दिवेदिवे राय आ कुहचिद्विदे।
नहि त्वदन्यन्मघवन् न आप्यं वस्यो अस्ति पिता चन ॥ १९ ॥

शिक्षेयम्। इत्। महऽयते। दिवेऽदिवे। रायः। आ। कुहचित्ऽविदे।
नहि। त्वत्। अन्यत्। मघऽवन्। नः। आप्यम्। वस्यः। अस्ति। पिता। चन ॥ १९ ॥

वेङ्कट० प्रयच्छेयम् एव त्वां स्तुवते अन्वहं धनानि क्वचिदपि ज्ञाताय†। नहि त्वत्तः अन्यत् मघवन्! अस्माकम् अस्ति बान्धवम्‡। त्वद्व्यतिरिक्तः प्रशस्यतरः[5] पिता च अस्माकं नास्ति। यस्मात्त्वमेव पालयसि ॥ १९ ॥

तरणिरित् सिषासति वाजं पुरंध्या युजा।
आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्र्वम् ॥ २० ॥

१-१. तावकमीशि वि[२] अ[२]. २. रदिः मूको. ३-३. दरावसु तं वि[२] ल लभ; रवसु अ[२]. ४. दद्याम् अ[२] ल लभ; ददाम् वि[२]. ५-५. कामास्त्वामभिद्रुमो वर्धिन्ति क्षिप्रं पितरः वि[२] अ[२] लभ (तु. ७,३१,४).
† °नाय मूको. ‡ बान्धवत् मूको.

तरणिः । इत् । सिसासति । वाजम् । पुरम्ऽध्या । युजा ।
आ । वः । इन्द्रम् । पुरुऽहूतम् । नमे । गिरा । नेमिम् । तष्टाऽइव । सुऽद्रुवम् ॥ २० ॥

वेङ्कट० क्षिप्रकारी एव इन्द्र सम्भक्तुमिच्छति सङ्ग्रामम् प्रज्ञया सहायभूतया। तथा सति युष्मदर्थम् अहम् आ नमामि पुरुहूतम् इन्द्रम् स्तुत्या, नेमिम् तक्षेव शोभनकाष्ठम् ॥ २० ॥

[1]इति पञ्चमाष्टके तृतीयाध्याये विंशो वर्गः[1] ॥

न दुष्टुती मर्त्यो विन्दते वसु न स्रेधन्तं रयिर्नशत् ।
सुशक्तिरिन्मघवन् तुभ्यं मावते देष्णं यत् पार्ये दिवि ॥ २१ ॥

न । दुःऽस्तुती । मर्त्यः । विन्दते । वसु । न । स्रेधन्तम् । रयिः । नशत् ।
सुऽशक्तिः । इत् । मघऽवन् । तुभ्यम् । माऽवते । देष्णम् । यत् । पार्ये । दिवि ॥ २१ ॥

वेङ्कट० न दुष्टेन स्तोत्रेण मर्त्यः विन्दते धनम्। स्रेधतिरुपक्षयकर्मा। न उपक्षीयमाणम् अपहरन्त[2] स्तोत्र धन व्याप्नोति। शोभनदानमेव मघवन्! मत्सदृशाय स्तोत्रे देष्णम् धनम् यत् पारभवे दिवि भवति, अनायासेन त्व व्य धनं स्तोत्रे प्रयच्छसीति ॥ २१ ॥

अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः ।
ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥ २२ ॥

अभि । त्वा । शूर । नोनुमः । अदुग्धाःऽइव । धेनवः ।
ईशानम् । अस्य । जगतः । स्वःऽदृशम् । ईशानम् । इन्द्र । तस्थुषः ॥ २२ ॥

वेङ्कट० अभि ष्टुमः त्वाम् शूर! यथा अदुग्धा धेनूः दोहनार्थम् उपस्तुवन्ति। 'तस्मात्प्रातरिति उपांश वन्दमाना उपस्तुवन्त पराद्दुहन्ति' (तैब्रा ३,२,३,७) इति ब्राह्मणम्। ईशानम् अस्य जङ्गमस्य सर्वस्य द्रष्टारम् ईशानम् इन्द्र! तस्थुषः च ॥ २२ ॥

न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।
अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे ॥ २३ ॥

न । त्वाऽवान् । अन्यः । दिव्यः । न । पार्थिवः । न । जातः । न । जनिष्यते ।
अश्वऽयन्तः । मघऽवन् । इन्द्र । वाजिनः । गव्यन्तः । त्वा । हवामहे ॥ २३ ॥

वेङ्कट० न त्वासदृश अन्य दिव्य पार्थिव वा सम्प्रत्यस्ति न अपि जातः न अपि जनिष्यते। अश्वादीनिच्छन्त तम् त्वा मघवन् इन्द्र! वयम् हवामहे हविष्मन्त ॥ २३ ॥

१-१ नास्ति मूको. २ उपह° मूको ३. दिवि छ छम। नास्ति वि° भ°.

अभी सतस्तदा भरेन्द्र ज्यायः कनीयसः ।
पुरूवसुर्हि मघवन्त्सनादसि भरेभरे च हव्यः ॥ २४ ॥

अभि । सतः । तत् । आ । भर । इन्द्र । ज्यायः । कनीयसः ।
पुरुऽवसुः । हि । मघऽवन् । सनात् । असि । भरेऽभरे । च । हव्यः ॥ २४ ॥

वेङ्कट० अभि आ भर[1] सतः[2] महतस्तस्य वसिष्ठस्य तत् इन्द्र! धनं ज्यायः![3] कनीयसः मम। बहुधनः हि मघवन्! चिरादारभ्य त्वं भवसि सङ्ग्रामेसङ्ग्रामे च ह्वातव्यः[4] ॥ २४ ॥

परा णुदस्व मघवन्नमित्रान्त्सुवेदा नो वसू कृधि ।
अस्माकं बोध्यविता महाधने भवा वृधः सखीनाम् ॥ २५ ॥

परा । नुदस्व । मघऽवन् । अमित्रान् । सुऽवेदा । नः । वसु । कृधि ।
अस्माकम् । बोधि । अविता । महाऽधने । भव । वृधः । सखीनाम् ॥ २५ ॥

वेङ्कट० परा नुदस्व मघवन्! शत्रून्। सुलभानि[5] अस्माकं धनानि कुरु। अस्माकम् बुध्यस्व रक्षिता भवामीति। सङ्ग्रामे भव वर्धकः[6] सखीनाम् ॥ २५ ॥

इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।
शिक्षा णो अस्मिन् पुरुहूत यामनि जीवा ज्योतिरशीमहि ॥ २६ ॥

इन्द्र । क्रतुम् । नः । आ । भर । पिता । पुत्रेभ्यः । यथा ।
शिक्ष । नः । अस्मिन् । पुरुऽहूत । यामनि । जीवाः । ज्योतिः । अशीमहि ॥ २६ ॥

वेङ्कट० अत्र शाट्यायनकम् — "शक्तिं ह वासिष्ठं सौदासा अग्नौ प्रासुः। स ह प्रास्यमानोऽनूवाच — 'इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा' इति। एतावद्धैवास्य [7]व्याहृतमास। अथ हैनमग्नौ[7] प्रासुः। अथ ह वसिष्ठ आजगाम। स होवाच — किं मे पुत्रः प्रास्यमानोऽब्रवीदिति। तस्मै होचुः — 'इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा' इति एतावदेवास्य व्याहृतमासीत्। अथैनम् अग्नौ प्रास्यन्निति। स होवाच — 'शिक्षा णो अस्मिन् पुरुहूत यामनि जीवा ज्योतिरशीमहि' इति। यन्म एतमुत्तरमर्धर्चं मे पुत्रः प्रास्यमानो वक्ष्यति न नैवैनमग्नौ प्रारिष्यन् सर्वमायुरैष्यत्" (जैमि २, ३५२) इति। ताण्डके पुनः सर्व एव प्रगाथो वासिष्ठ उक्तः (तु. ताब्रा ४, ७, ३-४)। तत्र कात्यायनः — 'सौदासैरग्नौ प्रक्षिप्यमाणः शक्तिरन्त्यं प्रगाथमारेभे। सोऽर्धर्च उक्तेऽदह्यत[8]। तं पुत्रोक्तं वसिष्ठः समापयतेति शाट्यायनकम्। वसिष्ठस्यैव हतपुत्रस्यार्षम् इति ताण्डकम्' (ऋअ २,७,३२) इति।

इन्द्र! प्रज्ञानम् अस्माकम् आ भर, यथा पिता पुत्रेभ्यः धनं प्रयच्छति। प्रयच्छ अस्मभ्यम् पुरुहूत! अस्मिन् प्रयाणे। जीवन्तो वयं सूर्यम् अन्वहं प्राप्नुयाम ॥ २६ ॥

---

१. हर वि[1]. २. सत ल अ[1] लभ; त वि[1]. ३. तु. वैप १,१३९३ m; ज्यायान् मूको.
४. °तव्य मूको. ५. सुलभान् मूको. ६. °क वि[1] अ[1] ल; धंक् लभ. ७-७. °तमासाग्नाहृत° वि[1] अ[1].
८. °क्तेर्दं द° मूको.

मा नो अज्ञाता वृजना दुराध्योऽ माशिवासो अव क्रमुः ।
त्वया वयं प्रवतः शश्वतीरपोऽति शूर तरामसि ॥ २७ ॥

मा । न । अज्ञाता । वृजना । दुःऽआध्यः । मा । अशिवासः । अव । क्रमुः ।
त्वया । वयम् । प्रऽवतः । शश्वतीः । अप । अति । शूर । तरामसि ॥ २७ ॥

वेङ्कट० मा अस्मान् अज्ञाता[1] पापकृत दुर्बुद्धय मा च अशिवा शत्रव अव क्रमु । अवक्रमणम् अभिभव । त्वया वयम् प्रवणाभिमुखानि बहूनि उदकानि शूर। अति तराम ॥ २७ ॥

[1]इति पञ्चमाष्टके तृतीयाध्याये एकविंशो वर्ग[1] ॥

[३३]

[2]आद्याना नवाना वसिष्ठो मैत्रावरुणिऋषि, अन्त्याना पञ्चाना वसिष्ठपुत्रा । आद्याना नवाना वसिष्ठपुत्रा इन्द्रो वा देवता, अन्त्यानां पञ्चाना वसिष्ठ । त्रिष्टुप् छन्द[2] ।

श्वित्यञ्चो मा दक्षिणतस्कपर्दा धियंजिन्वासो अभि हि प्रमन्दुः ।
उत्तिष्ठन्वोचे परि बर्हिषो नॄन्न मे दूरादवितवे वसिष्ठाः ॥ १ ॥

श्वित्यञ्चः । मा । दक्षिणतःऽकपर्दाः । धियम्ऽजिन्वासः । अभि । हि । प्रऽमन्दुः ।
उत्ऽतिष्ठन् । वोचे । परि । बर्हिषः । नॄन् । न । मे । दूरात् । अवितवे । वसिष्ठाः ॥ १ ॥

वेङ्कट० कात्यायन —'सस्तवो वसिष्ठस्य सपुत्रस्य दश वा सवाद' (ऋअ २,५,३३) इति ।

शौनक — 'वसिष्ठाय सपुत्राय श्वित्यञ्चो[3] मति सस्तव ।
ऐन्द्रं सूक्तमिद चषा[4] सवादमपरे विदु ' ॥ (तु बृदे ५,१६३) इति ॥

तस्मादितो नवभिवसिष्ठेन पुत्रा सस्तूयन्ते । तत्र नून वसिष्ठ सपुत्रो दाशराज्ञे याज्याञ्चकार । ततो यज्ञान्ते गन्तुमुद्युक्त पुत्रानिदमाह ।

श्वियञ्च श्वेतिमानम् अञ्चन्त श्वेतवर्णा । काश्मीरजा हि तथावर्णा भवन्ति । माम् दक्षिणतस्कपर्दा । अत्र चूडाकरण लौगाक्षिगृह्यम्[5]—'दक्षिणतो वासिष्ठानाम् (तु. काग ४०,२) इति । कर्मणोऽस्य प्रीणयितार अभि हि प्रमन्दु । तत्र प्रयाणाय यज्ञात् उत्तिष्ठन् अह नेतॄन् पुत्रान् परितो ब्रवीमि —न[6] मत्त दूरात् गन्तुमर्हन्ति वसिष्ठा, अपि तु समीपे स्थित्वा वचनमिद श्रोतुमर्हन्तीति ॥ १ ॥

दूरादिन्द्रमनयन्ना सुतेन तिरो वैशन्तमति पान्तमुग्रम् ।
पाशद्युम्नस्य वायतस्य सोमात्सुतादिन्द्रोऽवृणीता वसिष्ठान् ॥ २ ॥

दूरात् । इन्द्रम् । अनयन् । आ । सुतेन । तिरः । वैशन्तम् । अति । पान्तम् । उग्रम् ।
पाशऽद्युम्नस्य । वायतस्य । सोमात् । सुतात् । इन्द्रः । अवृणीत । वसिष्ठान् ॥ २ ॥

---

१ १. मुद्रितम् खम ५ २ नास्ति मूको. ३ श्विग्यञ्चो भ[1]; श्वित्यञ्चो वि[1] खम ४ चे[1] भ[1]. ५. लोकाक्षि' वि[1] भ, लोकाक्षिगृह्य खम, लोगाक्षि भ . ६. न न मूको

वेङ्कट० दाशराज्ञस्य सुतेन दूरस्थितम् इन्द्रम् तत आ अनयन्। यथा तज्जयानां तिरोहितो भवति तथा अति आनयन् वैशन्तम् देशं तस्य गृहस्य स्वामिनं रक्षन्तम् उदगृणंस्। इन्द्रः च पाशद्युम्नाख्यस्य वयत पुत्रस्य यज्ञाद् वसिष्ठान् दाशराज्ञस्य याजकान् अवृणीत ॥ २ ॥

एवेन्नु कं सिन्धुमेभिस्ततारेवेन्नु कं भेदमेभिर्जघान ।
एवेन्नु कं दाशराज्ञे सुदासं प्रावदिन्द्रो ब्रह्मणा वो वसिष्ठाः ॥ ३ ॥

एव । इत् । नु । कम्। सिन्धुम् । एभिः । ततार । एव । इत् । नु । कम् । भेदम् । एभिः । जघान ।
एव । इत् । नु । कम् । दाशऽराज्ञे । सुऽदासम् । प्र । आवत् । इन्द्रः । ब्रह्मणा । वः । वसिष्ठाः ॥ ३ ॥

वेङ्कट० पूर्वार्धः परोक्षः। एवम् एव क्षिप्रम् एभि वसिष्ठपुत्रैः स्तोतृभिः इन्द्रः पाशद्युम्नस्य यज्ञादागन्तुं नदीः ततार। अथैवम् एव भेदकम् एषां रक्षोवर्गम् जघान। एवम् एव दाशराजाय सुदासम् नाम रक्षणीयम् प्र आवत्। हे वसिष्ठा! युष्माकं स्तोत्रेण दाशराजाय[1] सुदासः परिरक्षणाय च तत्र भेदकानि इन्द्रः जघानेति ॥ ३ ॥

जुष्टी नरो ब्रह्मणा वः पितॄणामक्षमव्ययं न किला रिषाथ ।
यच्छक्वरीषु बृहता रवेणेन्द्रे शुष्ममदधाता वसिष्ठाः ॥ ४ ॥

जुष्टी । नरः । ब्रह्मणा । वः । पितॄणाम् । अक्षम् । अव्ययम् । न । किल । रिषाथ ।
यत् । शक्वरीषु । बृहता । रवेण । इन्द्रे । शुष्मम् । अदधात । वसिष्ठाः ॥ ४ ॥

वेङ्कट० प्रीति भवति हे नेतारः! युष्माकं स्तोत्रेण पितॄणाम् इति, वसिष्ठ आत्मानम् परोक्षयन्नाह[2]— प्रीतो भवामीति। अथ [3]रथाक्षम् अव्ययम्[3] चलयामि। न किल यूय कदाचित् रिष्यथ[4]। यस्माद् ऋक्षु प्रयुक्तेन[5] महता रवेण इन्द्रे[6] बलम् निहितवन्तो यूयं हे वसिष्ठाः। इति ॥ ४ ॥

उद् द्यामिवेत् तृष्णजो नाथितासोऽदीधयुर्दाशराज्ञे वृतासः ।
वसिष्ठस्य स्तुवत इन्द्रो अश्रोदुरुं तृत्सुभ्यो अकृणोदु लोकम् ॥ ५ ॥

उत । द्यामऽइव । इत् । तृष्णऽजः । नाथितासः । अदीधयुः । दाशऽराज्ञे । वृतासः ।
वसिष्ठस्य । स्तुवतः । इन्द्रः । अश्रोत् । उरुम् । तृत्सुऽभ्यः । अकृणोत् । ऊँ इति । लोकम् ॥ ५ ॥

वेङ्कट० उद्दीधिः अस्तुवन् आदित्यम् इव जाततृष्णा वृष्टिं[7] याचमानाः दाशराजेन वृताः तस्मै इन्द्रम्। तथा वसिष्ठस्य च स्तुवतः स्तुतिम् इन्द्रः अश्रौषीत्। विस्तीर्णम् लोकम् शत्रुहननेन तृत्सुभ्यः[8] च अकरोत्। तृत्सवो वाजा इति ॥ ५ ॥

[9]इति पञ्चमाष्टके तृतीयाध्याये द्वाविंशो वर्गः[9] ॥

---

१. °राज मूको. २. अपरोक्ष° मूको. ३-३. रथाक्षमव्ययमविं° मूको; रथाक्षम्। अव्ययम् ए लभ. ४. रिष्य° मूको. ५. नास्ति वि° अ°. ६. इन्द्र मूको. ७. वृष्टि मूको. ८. त्रित्सु° मूको. ९-९. नास्ति मूको.

दण्डा इवेद् गोअजनास आसन् परिच्छिन्ना भरता अर्भकासः ।
अभवच्च पुरएता वसिष्ठ आदित् तृत्सूनां विशो अप्रथन्त ॥ ६ ॥

दण्डाःऽइव । इत् । गोऽअजनासः । आसन् । परिऽछिन्नाः । भरताः । अर्भकासः ।
अभवत् । च । पुरःऽएता । वसिष्ठः । आत् । इत् । तृत्सूनाम् । विशः । अप्रथन्त ॥ ६ ॥

वेङ्कट० यथा गोअजनाः दण्डाः परिच्छिन्नशाखा भवन्ति एवं निरस्तपरिचरणाः भरतकुलजाताः अर्भकाः विश्वामित्रा अस्माकं सपत्नाः अभवन् । तेषाम् एषाम् अभवत् च[1] पुरएता वसिष्ठः । अनन्तरमेव तृत्सूनाम् प्रजाः निहतशत्रुकाः प्रथिताः अभवन् इति ॥ ६ ॥

त्रयः कृण्वन्ति भुवनेषु रेतस्तिस्रः प्रजा आर्या ज्योतिरग्राः ।
त्रयो घर्मास उषसं सचन्ते सर्वाँ इत् ताँ अनु विदुर्वसिष्ठाः ॥ ७ ॥

त्रयः । कृण्वन्ति । भुवनेषु । रेतः । तिस्रः । प्रऽजाः । आर्याः । ज्योतिःऽअग्राः ।
त्रयः । घर्मासः । उषसम् । सचन्ते । सर्वान् । इत् । तान् । अनु । विदुः । वसिष्ठाः ॥ ७ ॥

वेङ्कट० अत्र शाट्यायनकम्—" 'त्रयः कृण्वन्ति हि भुवनेषु रेतः' इत्यग्निः पृथिव्यां रेतः कृणोति वायुरन्तरिक्षे आदित्यो दिवि । 'तिस्रः प्रजा आर्या ज्योतिरग्राः' इति वसवो रुद्रा[2] आदित्यास्तेषाम् एतज्ज्योतिर्यदसावादित्यः । 'त्रयो घर्मास उषसं सचन्ते' इत्यग्निरुषसं सचते वायुरुषसम् सचते आदित्य उषसं सचत इति । 'सर्वान् एव तान् अनु विदुः वसिष्ठाः' " (जैमि २,१४१-२) ॥ ७ ॥

सूर्यस्येव वक्षथो ज्योतिरेषां समुद्रस्येव महिमा गभीरः ।
वातस्येव प्रजवो नान्येन स्तोमो वसिष्ठा अन्वेतवे वः ॥ ८ ॥

सूर्यस्यऽइव । वक्षथः । ज्योतिः । एषाम् । समुद्रस्यऽइव । महिमा । गभीरः ।
वातस्यऽइव । प्रऽजवः । न । अन्येन । स्तोमः । वसिष्ठाः । अनुऽएतवे । वः ॥ ८ ॥

वेङ्कट० यथा सूर्यस्य अश्वः सञ्चरति एवम् एषाम् अपि ज्योतिः सर्वतोदिक्कं विसरति उदधेः इव महिमा गम्भीरः[3] 'वातस्य इव'[3] प्रजवः. अन्येन केनचिद् युष्माकम् स्तोमः हे वसिष्ठाः । न अन्वेतुं शक्यत इति । उत्तरोऽर्धर्चः[4] प्रत्यक्षः ॥ ८ ॥

त इन्निण्यं हृदयस्य प्रकेतैः सहस्रवल्शमभि सं चरन्ति ।
यमेन ततं परिधिं वयन्तोऽप्सरस उप सेदुर्वसिष्ठाः ॥ ९ ॥

---

१. नास्ति मू१. २. नास्ति वि१ अ१. ३-३. °तस्यैव मूको. ४. °धर्चः वि१ ख, उत्तरोऽर्धः ख्म; °धर्चः अ१.

ते । इत् । निण्यम् । हृदयस्य । प्रऽकेतैः । सहस्रऽवल्शम् । अभि । सम् । चरन्ति ।
यमेन । ततम् । परिऽधिम् । वयन्तः । अप्सरसः । उप । सेदुः । वसिष्ठाः ॥ ९ ॥

वेङ्कट० ते एव अन्तर्हितम् हृदयस्य प्रज्ञानैः बहुशाखं कर्म अभि सम् चरन्ति । तेऽस्मात् उर्वश्या[1] पुत्रात् ईश्वरेण कृतम् परिधिम् कर्मतन्तुम् वयन्तः[2] उप सेदुः वसिष्ठपुत्रा इति ॥ ९ ॥

विद्युतो ज्योतिः परि संजिहानं मित्रावरुणा यदपश्यतां त्वा ।
तत् ते जन्मोतैकं वसिष्ठागस्त्यो यत् त्वा विश आजभार ॥ १० ॥

विऽद्युतः । ज्योतिः । परि । सम्ऽजिहानम् । मित्रावरुणा । यत् । अपश्यताम् । त्वा ।
तत् । ते । जन्म । उत । एकम् । वसिष्ठ । अगस्त्यः । यत् । त्वा । विशः । आऽजभार ॥१०॥

वेङ्कट० वसिष्ठ! अन्तरिक्षे विद्युतः ज्योतिः भूत्वा सञ्चरन्तम् त्वाम् मित्रावरुणौ यदा परि अपश्यताम्, तदानीं तव एकम् जन्म अभूत् । अगस्त्यः यदा त्वाम् मनुष्यान् प्रत्याहृतवान्[3] । अगस्त्यवसिष्ठौ नून सम्मन्त्र्यैव[4] मानुष्यकमास्थिताविति ॥ १० ॥

[5]इति पञ्चमाष्टके तृतीयाध्याये त्रयोविंशो वर्गः[5] ।

उतासि मैत्रावरुणो वसिष्ठोर्वश्या ब्रह्मन् मनसोऽधि जातः ।
द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वे देवाः पुष्करे त्वाददन्त ॥ ११ ॥

उत । असि । मैत्रावरुणः । वसिष्ठ । उर्वश्याः । ब्रह्मन् । मनसः । अधि । जातः ।
द्रप्सम् । स्कन्नम् । ब्रह्मणा । दैव्येन । विश्वे । देवाः । पुष्करे । त्वा । अददन्त ॥ ११ ॥

वेङ्कट० अपि च भवसि मित्रावरुणयोः पुत्रस्त्वम् वसिष्ठ[6] उर्वश्याः ब्रह्मन्! मनसः अधि जातः । मित्रावरुणयोः दीक्षितयोरुर्वशीमप्सरसं दृष्ट्वा वासतीवरे[6] कुम्भे रेतः स्कन्नम् आसीत् । ततोऽगस्त्यवसिष्ठौ समभवताम् । उर्वशीतो[7] मित्रावरुणयोर्मनसोऽधिजात इत्युक्तो[8] भवति । मित्रावरुणयोः स्कन्नम् रेतः दैव्येन ब्रह्मणा मन्त्रेण विश्वे देवाः पुष्करे कुम्भस्यान्तरिक्षे त्वाम् अधारयन् (तु बृदे ५।१४९-१५५) ॥ ११ ॥

स प्रकेत उभयस्य प्रविद्वान्त्सहस्रदान उत वा सदानः ।
यमेन ततं परिधिं वयिष्यन्नप्सरसः परि जज्ञे वसिष्ठः ॥ १२ ॥

सः । प्रऽकेतः । उभयस्य । प्रऽविद्वान् । सहस्रऽदानः । उत । वा । सऽदानः ।
यमेन । ततम् । परिऽधिम् । वयिष्यन् । अप्सरसः । परि । जज्ञे । वसिष्ठः ॥ १२ ॥

वेङ्कट० वसिष्ठः प्रज्ञाता पार्थिवं दिव्यं च लोकं प्रजानन् गोसहस्रदानः, यद्वा सर्वदा दानयुक्तः, स सहस्रदान एव । यमेन ततम् कर्मतन्तुम् वयिष्यन् अप्सरसः परि अजायत वसिष्ठः ॥ १२ ॥

---

१ °श्याम मूको. २. वयन्त मूको. ३ °त्याहृत° मूको. ४ सम्मत्यै वि' अ', °न्त्र ल लभ. ५-५ नास्ति मूको. ६ °तीवरे वि' अ', वासतीवरे ल लभ. ७ °शीयता वि' अ', °शीतो ल लभ. ८ इत्यल्पो मूको.

स॒त्रे ह॑ जा॒तावि॑षि॒ता नमो॑भिः कु॒म्भे रेतः॑ सिषिचतुः समा॒नम् ।
ततो॑ ह॒ मान॒ उदि॑याय॒ मध्या॒त् ततो॑ जा॒तमृषि॑माहु॒र्वसि॑ष्ठम् ॥ १३ ॥

स॒त्रे । ह॒ । जा॒तौ । इ॒षि॒ता । नमः॑ऽभिः । कु॒म्भे । रेतः॑ । सि॒सि॒च॒तुः॒ । स॒मा॒नम् ।
ततः॑ । ह॒ । मानः॑ । उत् । इ॒या॒य॒ । मध्या॑त् । ततः॑ । जा॒तम् । ऋषि॑म् । आ॒हुः॒ । वसि॑ष्ठम् ॥ १३ ॥

वेङ्कट० सत्रे प्रादुर्भूतौ मित्रावरुणौ यज्ञे प्रवृत्तौ हविर्भिः मानुषैः स्तवैः स्तवेषु यज्ञेषु अध्येषितौ कुम्भे रेतः सिषिचतुः समानम्। ततः कुम्भस्य मध्यात् अगस्त्यः उत् इयाय। ततः[1] जातम् ऋषिम् आहुः वसिष्ठम् ॥ १३ ॥

उ॒क्थ॒भृतं॑ साम॒भृतं॑ बिभर्ति॒ ग्रावा॑णं॒ बिभ्र॒त् प्र व॑दा॒त्यग्रे॑ ।
उपै॑नमाध्वं सुमन॒स्यमा॑ना॒ आ वो॑ गच्छाति प्रतृदो॒ वसि॑ष्ठः ॥ १४ ॥

उ॒क्थ॒ऽभृत॑म् । सा॒म॒ऽभृत॑म् । बि॒भ॒र्ति॒ । ग्रावा॑णम् । बिभ्र॑त् । प्र । व॒दा॒ति॒ । अग्रे॑ ।
उप॑ । ए॒न॒म् । आ॒ध्व॒म् । सु॒ऽम॒न॒स्यमा॑नाः । आ । वः॒ । ग॒च्छा॒ति॒ । प्र॒ऽतृ॒दः॒ । वसि॑ष्ठः ॥ १४ ॥

वेङ्कट० होता उक्थभृत्, उद्गाता सामभृत्[2]। तौ वसिष्ठोऽध्वर्युः सन्धारयति[3]। तथा[4] अभिषवणग्रावाणं धारयन् प्रथममेव यजूंषि 'प्र वदति[5]'। उप विशत एनम् सुमनसो भवन्तः। आ गच्छति[6] युष्मान्[7] हे [8]प्रतृदः। तृत्सवः।[8] वसिष्ठ इति ॥ १४ ॥

[9]इति पञ्चमाष्टके तृतीयाध्याये चतुर्विंशो वर्गः[9]।

[३४]

[10]वसिष्ठो मैत्रावरुणिर्ऋषिः। विश्वे देवा देवता, षोडश्या अहिः, सप्तदश्या अहिर्बुध्न्यः।
द्विपदा विराट् छन्दः, अन्त्याश्चतस्रस्त्रिष्टुभः[10]।

प्र शु॒क्रैतु॑ दे॒वी म॑नी॒षा अ॒स्मत् सुत॑ष्टो॒ रथो॒ न वा॒जी ॥ १ ॥

प्र । शु॒क्रा । ए॒तु॒ । दे॒वी । म॒नी॒षा । अ॒स्मत् । सुऽत॑ष्टः । रथः॑ । न । वा॒जी ॥ १ ॥

वेङ्कट० वसिष्ठः। वैश्वदेवम्। प्र एतु ज्वलन्ती देवी स्तुतिर्वाग् अस्मत्तः सुतष्टः रथः इव वेगवानिति ॥ १ ॥

वि॒दुः पृ॑थि॒व्या दि॒वो ज॒नित्रं॑ शृ॒ण्वन्त्यापो॒ अध॒ क्षर॑न्तीः ॥ २ ॥

वि॒दुः । पृ॒थि॒व्याः । दि॒वः । ज॒नित्र॑म् । शृ॒ण्वन्ति॑ । आपः॑ । अध॑ । क्षर॑न्तीः ॥ २ ॥

वेङ्कट० ओषधीः पुष्यन्त्या अस्याः द्युलोकात् जनित्वम् उदकम् आगच्छतीति विदुः। एतदेवाह— तदनन्तरम् शृण्वन्ति [10]"आपः स्वर्गात्[10]" क्षरन्त्यः[11] ॥ २ ॥

1. ततो वे वि', ततो अ' ल लभ. 2. 'भृत् मूको. 3. 'रयन्ति मूको. 4. सर्व वि'; यथा अ'. 5-5. प्रवति मूको. 6. °च्छन्ति मूको. 7. युष्मासु(°स लभ.) वि' ल लभ, °ष्माकं स अ'. 8-8. प्रतृदस्तवो वि', प्रतृदस्तथ अ', पुनरस्तृत्सव ल लभ. 9-9. नास्ति मूको. 10-10. उपसर्गात् वि' अ'; अतः स्व° लभ. 11. क्षरन्ति मूको.

आपश्चिदस्मै पिन्वन्त पृथ्वीर्वृत्रेषु शूरा मंसन्त उग्राः ॥ ३ ॥

आपः । चित् । अस्मै । पिन्वन्त । पृथ्वीः । वृत्रेषु । शूराः । मंसन्ते । उग्राः ॥ ३ ॥

वेङ्कट० आपः चित् अस्मै इन्द्राय अक्षरन् विस्तीर्णाः । युद्धेषु चैनम्[1] शूराः स्तुवन्ति उग्राः ॥ ३ ॥

आ धूर्ष्वस्मै दधाताश्वानिन्द्रो न वज्री हिरण्यबाहुः ॥ ४ ॥

आ । धूःऽसु । अस्मै । दधात । अश्वान् । इन्द्रः । न । वज्री । हिरण्यऽबाहुः ॥ ४ ॥

वेङ्कट० आ दधात इन्द्राय रथस्य धूर्षु अश्वान्, इन्द्र इदानीं वज्रवान् हिरण्यपाणिः[2] आगच्छतु ॥ ४ ॥

अभि प्र स्थाताहेव यज्ञं यातेव पत्मन् त्मना हिनोत ॥ ५ ॥

अभि । प्र । स्थात । अहाऽइव । यज्ञम् । याताऽइव । पत्मन् । त्मना । हिनोत ॥ ५ ॥

वेङ्कट० यथा अहानि सूर्यं अभिप्रतिष्ठन्ते तथा यूयम् यज्ञम् अभि प्र तिष्ठत । याता अध्वगः[3] स यथा मार्गे पादं प्रेरयति, तथा[4] यज्ञं स्वयमेव प्रेरयतेति । अस्योत्तरा[5] भूयसे निर्वचनाय ॥ ५ ॥

त्मना समत्सु हिनोत यज्ञं दधात केतुं जनाय वीरम् ॥ ६ ॥

त्मना । समत्ऽसु । हिनोत । यज्ञम् । दधात । केतुम् । जनाय । वीरम् ॥ ६ ॥

वेङ्कट० स्वयम् एषु सङ्ग्रामेषु प्रवृत्तेषु निष्क्रमयत । यज्ञम् पुरोदधत । शत्रुजनाय युद्धेष्वात्मनो[6] ज्ञापयितारम् वीरम् ॥ ६ ॥

उदस्य शुष्माद् भानुर्नार्त बिभर्ति भारं पृथिवी न भूम ॥ ७ ॥

उत् । अस्य । शुष्मात् । भानुः । न । आर्त । बिभर्ति । भारम् । पृथिवी । न । भूम ॥ ७ ॥

वेङ्कट० "उत् गच्छतु"[7] यज्ञस्य बलाद् आदित्य इव शत्रून् प्रति वीरः । सोऽयं यज्ञं बिभर्ति[8] भारम् यथा भूमिः[9] भूतजातमिति ॥ ७ ॥

ह्वयामि देवाँ अयातुरग्ने साधन्नृतेन धियं दधामि ॥ ८ ॥

ह्वयामि । देवान् । अयातुः । अग्ने । साधन् । ऋतेन । धियम् । दधामि ॥ ८ ॥

वेङ्कट० ह्वयामि[10] देवान् [11]"अगच्छन् अहिंसको वा"[12] अग्ने! । साधयन् यज्ञं सत्येन सह कर्म धारयामि ॥ ८ ॥

अभि वो देवीं धियं दधिध्वं प्र वो देवत्रा वाचं कृणुध्वम् ॥ ९ ॥

अभि । वः । देवीम् । धियम् । दधिध्वम् । प्र । वः । देवऽत्रा । वाचम् । कृणुध्वम् ॥ ९ ॥

---

१. चैव अ[१]. २. °ण्यवान् बाहु अ[१], °ण्यबाहु ल हस्त ३. °ध्वगेरा मूको ४. यथा मूको. ५. अस्या उत्तरा ल प्रस्ताव ६. युद्धेनात्म° मूको ७-७. दुच्छस्य तु मूको, उ°र्त ल प्रस्ताव ८. बिभर्ति मूको, ९. भूमि मूको १०. ह्वयान मूको ११-११. अगच्छन् हिंसको वाम् मूको

वेङ्कट० अभि धारयत यूयं देवनशीलम् कर्म । देवेषु च वाचम् यूयम् प्र धारयतेति ॥ ९ ॥

आ चष्ट आसां पाथो नदीनां वरुण उग्रः सहस्रचक्षाः ॥ १० ॥

आ । चष्टे । आसाम् । पार्थः । नदीनाम् । वरुणः । उग्रः । सहस्रऽचक्षाः ॥ १० ॥

वेङ्कट० आसाम् नदीनाम् उदकम् आ चष्टे अभिपश्यति वरुणः उग्रः सहस्रदर्शनः ॥ १० ॥

[1]इति पञ्चमाष्टके तृतीयाध्याये पञ्चविंशो वर्गः[1] ॥

राजा राष्ट्रानां पेशो नदीनामनुत्तमस्मै क्षत्रं विश्वायु ॥ ११ ॥

राजा । राष्ट्रानाम् । पेशः । नदीनाम् । अनुत्तम् । अस्मै । क्षत्रम् । विश्वऽआयु ॥ ११ ॥

वेङ्कट० राजमानानाम् अन्येषां प्रभूणामपि राजा । अपि वा जनपदा राष्ट्राणि । णत्वाभावश्छान्दसः[2] । रूपम् नदीनाम् । अनुत्तं शत्रुभिः अस्मै बलम् भवतु[3] सर्वगामि ॥ ११ ॥

अविष्टो अस्मान् विश्वासु विक्ष्वद्युं कृणोत शंसं निनित्सोः ॥ १२ ॥

अविष्टो इति । अस्मान् । विश्वासु । विक्षु । अद्युम् । कृणोत । शंसम् । निनित्सोः ॥ १२ ॥

वेङ्कट० रक्षति एव अस्मान् सर्वासु प्रजासु । स निन्दितुमिच्छतः शत्रोः शंसनम् अद्योतमानम् करोतु ॥ १२ ॥

व्येतु दिद्युद् द्विषामशेवा युयोत विष्वग्रपस्तनूनाम् ॥ १३ ॥

वि । एतु । दिद्युत् । द्विषाम् । अशेवा । युयोत । विष्वक् । रपः । तनूनाम् ॥ १३ ॥

वेङ्कट० अपगच्छतु[4] आयुधम् शत्रूणाम् असुखम् । पृथक् करोतु विष्वक् पापम् तनूनाम् ॥ १३ ॥

अवीन्नो अग्निर्हव्यान्नमोभिः प्रेष्ठो अस्मा अधायि स्तोमः ॥ १४ ॥

अवीत् । नः । अग्निः । हव्यऽअत् । नमःऽभिः । प्रेष्ठः । अस्मै । अधायि । स्तोमः ॥ १४ ॥

वेङ्कट० रक्षतु अस्मान् अग्निः हविषोऽत्ता[5] नमस्कारैः प्रियतमः । अस्मै अग्नये अस्माभिः स्तोमाः कृताः ॥ १४ ॥

सजूर्देवेभिरपां नपातं सखायं कृध्वं शिवो नो अस्तु ॥ १५ ॥

सऽजूः । देवेभिः । अपाम् । नपातम् । सखायम् । कृध्वम् । शिवः । नः । अस्तु ॥ १५ ॥

वेङ्कट० अपान्नपाद् देवैः सङ्गतो भवति । तम् अपाम् नपातम् सखायम् कुरुध्वम् । सः शिवः अस्माकम् अस्तु ॥ १५ ॥

१-१. नास्ति मूको. २. णमाभावश्छ° मूको. ३. भवति अ[1]. ४. अपग° अ[1] एम. ५. °षोत्ता वि[1].

अब्जामुक्थैरहिं गृणीषे बुध्ने नदीनां रजःसु षीदन् ॥ १६ ॥

अप्ऽजाम् । उक्थैः । अहिम् । गृणीषे । बुध्ने । नदीनाम् । रजःऽसु । सीदन् ॥ १६ ॥

वेङ्कट० अप्सुजातम् शस्त्रैः अहिम्[1] गृणीषे नदीनाम् बुध्ने उदकेषु सीदन्तम् । निरुक्तं द्रष्टव्यम् (या १०,४४) ॥ १६ ॥

मा नोऽहिर्बुध्न्यो रिषे धान्मा यज्ञो अस्य स्रिधदृतायोः ॥ १७ ॥

मा । नः । अहिः । बुध्न्यः । रिषे । धात् । मा । यज्ञः । अस्य । स्रिधत् । ऋतऽयोः ॥ १७ ॥

वेङ्कट० मा अस्मान् 'अहिः बुध्न्य'[2] देवो विनाशाय दधातु । मा च अस्य यज्ञोखा अवस्रवतु[3] यज्ञकामस्येति ॥ १७ ॥

उत न एषु नृषु श्रवो धुः प्र राये यन्तु शर्धन्तो अर्यः ॥ १८ ॥

उत । नः । एषु । नृषु । श्रवः । धुः । प्र । राये । यन्तु । शर्धन्तः । अर्यः ॥ १८ ॥

वेङ्कट० अपि च अस्माकम् एषां नृणां मध्ये अन्नम् ददतु । प्र यच्छन्तु च धनाय । शर्धतिरुत्साहकर्मा । शर्धन्तः गमनशीला देवाः ॥ १८ ॥

तपन्ति शत्रुं स्व१र्ण भूमा महासेनासो अमेभिरेषाम् ॥ १९ ॥

तपन्ति । शत्रुम् । स्वः । न । भूम । महाऽसेनासः । अमेभिः । एषाम् ॥ १९ ॥

वेङ्कट० तपन्ति शत्रुम् आदित्य इव 'भूमिम् महासेना'[4] स्तोतारः बलैः देवानाम् ॥ १९ ॥

आ यन्नः पत्नीर्गमन्त्यच्छा त्वष्टा सुपाणिर्दधातु वीरान् ॥ २० ॥

आ । यत् । नः । पत्नीः । गमन्ति । अच्छ । त्वष्टा । सुऽपाणिः । दधातु । वीरान् ॥ २० ॥

वेङ्कट० यदि अस्मान् देवपत्न्यः आ गच्छन्ति । यदि च सुपाणिः त्वष्टा वीरान् धारयति । पूर्वत्र सम्बन्धः ॥ २० ॥

[5]इति पञ्चमाष्टके तृतीयाध्याये षड्विंशो वर्गः[5] ॥

प्रति नः स्तोमं त्वष्टा जुषेत स्यादस्मे अरमतिर्वसूयुः ॥ २१ ॥

प्रति । नः । स्तोमम् । त्वष्टा । जुषेत । स्यात् । अस्मे इति । अरमतिः । वसुऽयुः ॥ २१ ॥

वेङ्कट० प्रति सेवेत अस्माकम् स्तोमम्[6] त्वष्टा । भवतु अस्मासु पर्याप्तमतिः त्वष्टा धनकामः ॥ २१ ॥

---

१. अभि वि[2], रहितम् ल लभ, २-२ अहिर्बुध्न्य ल लभ, ३. °वतु ल लक. ४-४. "मिरघदा" वि[2], "मिरधमा" अ[1] लभ, "मिरधा" ल. ५-५ नास्ति मूको. ६. सोम वि[2] अ[1], स्तोम ल लभ

ता नो॑ रासन् राति॒षाचो॒ वसू॒न्या रोद॑सी वरुणा॒नी शृ॑णोतु ।
वरू॑त्रीभिः सुशर॒णो नो॑ अस्तु॒ त्वष्टा॑ सु॒दत्रो॒ वि द॑धातु॒ राय॑: ॥ २२ ॥

ता । नः॒ । रा॒स॒न् । रा॒ति॒ऽसाचः॑ । वसू॑नि । आ । रोद॑सी॒ इति॑ । व॒रु॒णा॒नी । शृ॒णो॒तु॒ ।
वरू॑त्रीभिः । सु॒ऽश॒र॒णः । नः॒ । अ॒स्तु॒ । त्वष्टा॑ । सु॒ऽदत्रः॑ । वि । द॒धा॒तु॒ । राय॑: ॥ २२ ॥

वेङ्कट० तानि अस्मभ्यं ददतु दानस्य सम्भक्त्यः[२] धनानि[१]। द्यावापृथिव्यौ तदनुगच्छेताम्। तथा "आ शृणोतु"[३] वरुणानी च स्तुतिम्[४]। देवपत्नीभिः सह सुगृहः अस्माकम् अस्तु। त्वष्टा सुधनः[५] करोतु चाभिमतं धनं हितम्[६] ॥ २२ ॥

तन्नो॑ रा॒यः पर्व॑ता॒स्तन्न॒ आप॒स्तद्रा॑ति॒षाच॒ ओष॑धीरु॒त द्यौः ।
वन॒स्पति॑भिः पृथि॒वी स॒जोषा॑ उ॒भे रोद॑सी॒ परि॑ पासतो नः ॥ २३ ॥

तत् । नः॒ । रा॒यः । पर्व॑ताः । तत् । नः॒ । आपः॑ । तत् । रा॒ति॒ऽसाचः॑ । ओष॑धीः । उ॒त । द्यौः ।
वन॒स्पति॑ऽभिः । पृ॒थि॒वी । स॒ऽजोषाः॑ । उ॒भे इति॑ । रोद॑सी॒ इति॑ । परि॑ । पा॒स॒तः॒ । नः॒ ॥ २३ ॥

वेङ्कट० 'तत् इदं' स्तोत्रम् अस्माकं त्वष्टृप्रभृतयः परि रक्षन्त्विति ॥ २३ ॥

अनु॒ तदु॒र्वी रोद॑सी जिहाता॒मनु॑ द्यु॒क्षो वरु॑ण॒ इन्द्र॑सखा ।
अनु॒ विश्वे॑ म॒रुतो॒ ये स॒हासो॑ रा॒यः स्या॑म ध॒रुणं॑ धि॒यध्यै॑ ॥ २४ ॥

अनु॑ । तत् । उ॒र्वी इति॑ । रोद॑सी॒ इति॑ । जि॒हा॒ता॒म् । अनु॑ । द्यु॒क्षः । वरु॑णः । इन्द्र॑ऽसखा ।
अनु॑ । विश्वे॑ । म॒रुतः॑ । ये । स॒हासः॑ । रा॒यः । स्या॒म॒ । ध॒रुण॑म् । धि॒यध्यै॑ ॥ २४ ॥

वेङ्कट० विस्तीर्णे द्यावापृथिव्यौ तत् अनु गच्छेताम्। तथा वरुणः च दीप्तः[९] अनु गच्छतु इन्द्रसखा[१०]। अनु गच्छन्तु विश्वे च मरुतः ये सहनशीलाः। धनस्य गृहम् वयं स्याम धितानां धारणार्थमिति ॥ २४ ॥

तन्न॒ इन्द्रो॒ वरु॑णो मि॒त्रो अ॒ग्निराप॒ ओष॑धीर्व॒निनो॑ जुषन्त ।
शर्म॑न्त्स्याम म॒रुता॑मु॒पस्थे॑ यू॒यं पा॑त स्व॒स्तिभि॒: सदा॑ नः ॥ २५ ॥

तत् । नः॒ । इन्द्रः॑ । वरु॑णः । मि॒त्रः । अ॒ग्निः । आपः॑ । ओष॑धीः । व॒निनः॑ । जु॒ष॒न्त॒ ।
शर्म॑न् । स्या॒म॒ । म॒रुता॑म् । उ॒पऽस्थे॑ । यू॒यम् । पा॒त॒ । स्व॒स्तिऽभिः॑ । सदा॑ । नः॒ ॥ २५ ॥

१-१. पा ६,१४ इ. २. संभक्त वि[१]; संभक्त्या अ[१]; सम्भक्त्यः ल ल्म. ३. °ति भाशृणोतु मूको. ४-४. नास्ति मूको. ५. स्तुतिः वि[१] ल ल्म; स्तुति अ[१]. ६. °धनम् वि[१] अ[१]; °धन ल ल्म. ७. हितः ल्म. ८-८. नास्ति ल ल्म. ९. दीप्तिः मूको. १०. °न्द्रसुता मूको.

वेङ्कट० तत् इदम् अस्माकम् इन्द्रादयः सेवन्ताम्, 'ओषध्यः वृक्षाश्च'। तथा वयम् मरुताम् उपस्थाने सति सुखे स्याम इति ॥ २५ ॥

'इति पञ्चमाष्टके तृतीयाध्याये सप्तविंशो वर्गः' ॥

[३५]

'वसिष्ठो मैत्रावरुणिर्ऋषिः। विश्वेदेवा देवता। त्रिष्टुप् छन्दः'।

शं न॑ इन्द्रा॒ग्नी भ॑वता॒मवो॑भि॒ः शं न॒ इन्द्रा॒वरु॑णा रा॒तह॑व्या ।
शमिन्द्रा॒सोमा॑ सुवि॒ताय॒ शं योः शं न॒ इन्द्रा॑पू॒षणा॒ वाज॑सातौ ॥ १ ॥

शम् । न॒ः । इ॒न्द्रा॒ग्नी इति॑ । भ॒वता॑म् । अव॑ऽभिः । शम् । न॒ः । इ॒न्द्रा॒वरु॑णा । रा॒तऽह॑व्या ।
शम् । इ॒न्द्रा॒सोमा॑ । सु॒वि॒ताय॑ । शम् । योः । शम् । न॒ः । इन्द्रा॑पु॒षणा॑ । वाज॑ऽसातौ ॥ १ ॥

वेङ्कट० शमविस्तारानुपद्रवाणाम् इन्द्राग्नी भवताम् 'रक्षणैः इति। इन्द्रस्य प्राधान्यात् सर्वेष्वनुषङ्गः। शम् अस्माकम् इन्द्रावरुणौ मनुष्यैर्दत्तहविष्कौ। शम् इन्द्रासोमौ अभ्युदयार्थम् अस्माकम्। शम् योः च भवताम्'। "शम् इति" पुनः' पूरणम्। शम् अस्माकम् इन्द्रापूषणौ युद्ध इति ॥ १ ॥

शं नो॒ भग॒ः शमु॑ न॒ः शंसो॑ अस्तु॒ शं न॒ः पुरं॑धि॒ः शमु॑ सन्तु॒ राय॑ः ।
शं न॑ः स॒त्यस्य॑ सु॒यम॑स्य॒ शंस॒ः शं नो॑ अर्य॒मा पु॑रुजा॒तो अ॑स्तु ॥ २ ॥

शम् । न॒ः । भग॑ः । शम् । ऊँ इति॑ । न॒ः । शंस॑ः । अ॒स्तु॒ । शम् । न॒ः । पुर॑म्ऽधिः । शम् । ऊँ इति॑ । स॒न्तु॒ । राय॑ः ॥ शम् । न॒ः । स॒त्यस्य॑ । सु॒ऽयम॑स्य । शंस॑ः । शम् । न॒ः । अ॒र्य॒मा । पु॒रु॒ऽजा॒तः । अ॒स्तु॒ ॥ २ ॥

वेङ्कट० शम् अस्माकम् भगः देवः। शम् एव अस्माकं नराशंसः भवतु। शम् अस्माकं प्रज्ञा। शम् एव भवन्तु धनानि। शम् नः सत्यस्य सुयमस्य' शंसनम्। शम् नः अर्यमा बहुजनः भवतु ॥ २ ॥

शं नो॑ धा॒ता शमु॑ ध॒र्ता नो॑ अस्तु॒ शं न॑ उरू॒ची भ॑वतु स्व॒धाभि॑ः ।
शं रोद॑सी बृह॒ती शं नो॒ अद्रि॒ः शं नो॑ दे॒वानां॑ सु॒हवा॑नि सन्तु ॥ ३ ॥

शम् । न॒ः । धा॒ता । शम् । ऊँ इति॑ । ध॒र्ता । न॒ः । अ॒स्तु॒ । शम् । न॒ः । उ॒रू॒ची । भ॒व॒तु॒ । स्व॒धाभि॑ः ।
शम् । रोद॑सी इति॑ । बृ॒ह॒ती इति॑ । शम् । न॒ः । अद्रि॑ः । शम् । न॒ः । दे॒वाना॑म् ।
सु॒ऽहवा॑नि । स॒न्तु॒ ॥ ३ ॥

वेङ्कट० शम् नः धाता भवतु। शम् एव धर्ता। शम् नः विस्तीर्णा पृथिवी अन्नैः भवतु। शम् द्यावापृथिव्यौ महत्यौ। शम् पर्वतः। शम् नः देवानाम् स्वाह्वानानि स्तोत्राणि भवन्तु ॥ ३ ॥

१-१. तु. ऋ ७,३५,५ मन्त्रस्य भाष्यम्; ऋक्षाः वनिनः मूको. २-२. नास्ति मूको.
३-३. नास्ति लभ. ४-४. शमीति मूको. ५. नास्ति अ'. ६. सयम' मूको.

शं नो॑ अ॒ग्निर्ज्योति॑रनीको अस्तु॒ शं नो॑ मि॒त्रावरु॑णाव॒श्विना॒ शम् ।
शं नः॑ सु॒कृतां॑ सुकृ॒तानि॑ सन्तु॒ शं न॑ इषि॒रो अ॒भि वा॑तु॒ वातः॑ ॥ ४ ॥

शम् । नः॒ । अ॒ग्निः । ज्योतिः॑ऽअनीकः । अ॒स्तु॒ । शम् । नः॒ । मि॒त्रावरु॑णौ । अ॒श्विना॑ । शम् ।
शम् । नः॒ । सु॒ऽकृता॑म् । सु॒ऽकृ॒तानि॑ । स॒न्तु॒ । शम् । नः॒ । इ॒षि॒रः । अ॒भि । वा॒तु॒ । वातः॑ ॥४॥

वेङ्कट० शम् अस्माकम् अग्निः ज्योतिर्मुखो भवतु । शम् अस्माकम् मित्रावरुणौ[1] अश्विनौ च । शम् नः सुकृताम् सुकृतानि कर्माणि भवन्तु । तथा सुखम् अस्माकं गमनशीलः वातः आ वातु ॥ ४ ॥

शं नो॒ द्यावा॑पृथि॒वी पू॒र्वहू॑तौ॒ शम॒न्तरि॑क्षं दृ॒शये॑ नो अस्तु ।
शं न॒ ओष॑धीर्व॒निनो॑ भवन्तु॒ शं नो॒ रज॑स॒स्पति॑रस्तु जि॒ष्णुः ॥ ५ ॥

शम् । नः॒ । द्यावा॑पृथि॒वी इति॑ । पू॒र्वऽहू॑तौ । शम् । अ॒न्तरि॑क्षम् । दृ॒शये॑ । नः॒ । अ॒स्तु॒ ।
शम् । नः॒ । ओष॑धीः । व॒निनः॑ । भ॒व॒न्तु॒ । शम् । नः॒ । रज॑सः । पतिः॑ । अ॒स्तु॒ । जि॒ष्णुः ॥५॥

वेङ्कट० शम् अस्माकं द्यावापृथिव्यौ प्रथमाह्वाने । सुखम् अन्तरिक्षम् दर्शनाय अस्माकं भवतु । शम् नः ओषध्यः वृक्षाः च भवन्तु । शम् नः लोकस्य पतिः अस्तु जिष्णुः आदित्यः ॥ ५ ॥

[2]इति पञ्चमाष्टके तृतीयाध्याये अष्टाविंशो वर्गः[2] ॥

शं न॒ इन्द्रो॒ वसु॑भिर्दे॒वो अ॑स्तु॒ शमा॑दि॒त्येभि॒र्वरु॑णः सु॒शंसः॑ ।
शं नो॑ रु॒द्रो रु॒द्रेभि॒र्जला॑षः॒ शं न॒स्त्वष्टा॒ ग्नाभि॑रि॒ह शृ॑णोतु ॥ ६ ॥

शम् । नः॒ । इन्द्रः॑ । वसु॑ऽभिः । दे॒वः । अ॒स्तु॒ । शम् । आ॒दि॒त्येभिः॑ । वरु॑णः । सु॒ऽशंसः॑ ।
शम् । नः॒ । रु॒द्रः । रु॒द्रेभिः॑ । जला॑षः । शम् । नः॒ । त्वष्टा॑ । ग्नाभिः॑ । इ॒ह । शृ॒णो॒तु॒ ॥ ६ ॥

वेङ्कट० शम् नः इन्द्रः वसुभिः सह देवः भवतु । तथा आदित्यैः [3]वरुणः च[3] शम् भवतु सुष्टुतिः[4] । शम् नः रुद्रः रुद्रैः सुखकरः । 'जलाषः' (निघ ३,६) इति सुखनाम[5] । शम् नः त्वष्टा देवपत्नीभिः सह स्तोत्रम् इह शृणोतु ॥ ६ ॥

शं नः॒ सोमो॑ भवतु॒ ब्रह्म॒ शं नः॒ शं नो॒ ग्रावा॑णः॒ शमु॑ सन्तु य॒ज्ञाः ।
शं नः॒ स्वरू॑णां मि॒तयो॑ भवन्तु॒ शं नः॑ प्र॒स्व१ः शम्व॑स्तु॒ वेदिः॑ ॥ ७ ॥

शम् । नः॒ । सोमः॑ । भ॒व॒तु॒ । ब्रह्म॑ । शम् । नः॒ । शम् । नः॒ । ग्रावा॑णः । शम् । ऊँ इति॑ । स॒न्तु॒ । य॒ज्ञाः ।
शम् । नः॒ । स्वरू॑णाम् । मि॒तयः॑ । भ॒व॒न्तु॒ । शम् । नः॒ । प्र॒ऽस्वः॑ । शम् । ऊँ इति॑ । अ॒स्तु॒ । वेदिः॑ ॥ ७ ॥

---

१. °न्द्रावरु° मूको. २-२. नास्ति मूको. ३-३. °रुणश्च मूको. ४. सुष्टुतिरिति वि' अ'. ५. °रमाः मूको.

वेङ्कट० शम् नः सोमः भवतु। ब्रह्म च अस्माकं शङ्करम्। शम् नः ग्रावाणः। शम् एव सन्तु यज्ञाः। शम् नः यूपानां मानानि भवन्तु। शम् नः बर्हींषि। शम् एव अस्तु वेदिः[1] ॥ ७ ॥

शं नः सूर्य उरुचक्षा उदेतु शं नश्चतस्रः प्रदिशो भवन्तु ।
शं नः पर्वता ध्रुवयो भवन्तु शं नः सिन्धवः शमु सन्त्वापः ॥ ८ ॥

शम्। नः। सूर्यः। उरुऽचक्षाः। उत्। एतु। शम्। नः। चतस्रः प्रऽदिशः। भवन्तु।
शम्। नः। पर्वताः। ध्रुवयः। भवन्तु। शम्। नः। सिन्धवः। शम्। ऊँ इति। सन्तु। आपः ॥

वेङ्कट० कल्याणम् अस्माकम् सूर्यः उत् एतु बहूनां द्रष्टा। शम् नः चतस्रः मुख्या दिशः भवन्तु। शम् नः पर्वताः निश्चलं[2] तिष्ठन्तः भवन्तु। शम् नः सिन्धवः। शम् एव सन्तु आपः इति ॥ ८ ॥

शं नो अदितिर्भवतु व्रतेभिः शं नो भवन्तु मरुतः स्वर्काः ।
शं नो विष्णुः शमु पूषा नो अस्तु शं नो भवित्रं शम्वस्तु वायुः ॥ ९ ॥

शम्। नः। अदितिः। भवतु। व्रतेभिः। शम्। नः। भवन्तु। मरुतः। सुऽअर्काः।
शम्। नः। विष्णुः। शम्। ऊँ इति। पूषा। नः। अस्तु। शम्। नः। भवित्रम्। शम्।
ऊँ इति। अस्तु। वायुः ॥ ९ ॥

वेङ्कट० शम् अस्माकम् अदितिः भवतु कर्मभिः। शम् नः भवन्तु मरुतः स्वञ्चनाः। शम् नः विष्णुः। शम् एव पूषा नः अस्तु। शम् अस्माकम् अस्तु भवित्रम् यत्किञ्चन पृथिव्यां भवति। शम् एव अस्तु वायुः ॥ ९ ॥

शं नो देवः सविता त्रायमाणः शं नो भवन्तूषसो विभातीः ।
शं नः पर्जन्यो भवतु प्रजाभ्यः शं नः क्षेत्रस्य पतिरस्तु शंभुः ॥ १० ॥

शम्। नः। देवः। सविता। त्रायमाणः। शम्। नः। भवन्तु। उषसः। विऽभातीः।
शम्। नः। पर्जन्यः। भवतु। प्रऽजाभ्यः। शम्। नः। क्षेत्रस्य। पतिः। अस्तु। शम्ऽभुः ॥

वेङ्कट० शम् नः देवः सविता रक्षन्[3]। शम्[4] नः भवन्तु उषसः व्युच्छन्त्यः। शम् नः पर्जन्यः भवतु प्रजाभ्यः। शम् अस्माकम् अस्तु क्षेत्रस्य पतिः सुखस्य भावयिता ॥ १० ॥

[5]इति पञ्चमाष्टके तृतीयाध्याये एकोनत्रिंशो वर्गः[5] ॥

शं नो देवा विश्वदेवा भवन्तु शं सरस्वती सह धीभिरस्तु ।
शमभिषाचः शमु रातिषाचः शं नो दिव्याः पार्थिवाः शं नो अप्याः ॥ ११ ॥

---

१. वेदिम् अ' ख मूको. २. निश्चलाः अ' ख ख मूको. ३. रक्ष मूको. ४. अ मूको. ५-५ नास्ति मूको.

शम् । नः । देवाः । विश्वऽदेवाः । भवन्तु । शम् । सरस्वती । सह । धीभिः । अस्तु ।
शम् । अभिऽसाचः । शम् । ऊँ इति । रातिऽसाचः । शम् । नः । दिव्याः । पार्थिवाः । शम् ।
नः । अप्याः ॥ ११ ॥

वेङ्कट० विश्वे देवा नाम देवताः अस्माकम् शम् भवन्तु । शम् सरस्वती सह कर्मभिः अस्तु । शम् अभिगन्तारः । शम् एव धनस्य सेवितारः । शम् नः दिवि भवाः । शम् नः[१] पार्थिवाः अन्तरिक्ष्या[२] च[२] ॥ ११ ॥

शं नः सत्यस्य पतयो भवन्तु शं नो अर्वन्तः शमु सन्तु गावः ।
शं न ऋभवः सुकृतः सुहस्ताः शं नो भवन्तु पितरो हवेषु ॥ १२ ॥

शम् । नः । सत्यस्य । पतयः । भवन्तु । शम् । नः । अर्वन्तः । शम् । ऊँ इति । सन्तु । गावः ।
शम् । नः । ऋभवः । सुऽकृतः । सुऽहस्ताः । शम् । नः । भवन्तु । पितरः । हवेषु ॥ १२ ॥

वेङ्कट० अभिर्यमो वरुण इति सत्यस्य पतयः अस्माकम् शम् भवन्तु । शम् नः अश्वाः । शम् एव भवन्तु गावः । शम् नः ऋभवः सुकर्माणः[३] कुशलहस्ताः । शम् अस्माकम् भवन्तु पितरः ह्वानेषु ॥ १२ ॥

शं नो अज एकपाद् देवो अस्तु शं नोऽहिर्बुध्न्यः शं समुद्रः ।
शं नो अपां नपात् पेरुरस्तु शं नः पृश्निर्भवतु देवगोपा ॥ १३ ॥

शम् । नः । अजः । एकऽपात् । देवः । अस्तु । शम् । नः । अहिः । बुध्न्यः । शम् । समुद्रः ।
शम् । नः । अपाम् । नपात् । पेरुः । अस्तु । शम् । नः । पृश्निः । भवतु । देवऽगोपा ॥ १३ ॥

वेङ्कट० शम् अस्माकम् अजः एकपात् नाम देवः भवतु । शम् अस्माकम् अहिः बुध्न्यः । शम् अन्तरिक्षम् । शम् अस्माकम् अपाम् नपात् रक्षको भवतु । शम् नः पृश्निः भवतु देवाः गोपनीया [४]गोपायितारो वा यस्याः सा[४] ॥ १३ ॥

आदित्या रुद्रा वसवो जुषन्तेदं ब्रह्म क्रियमाणं नवीयः ।
शृण्वन्तु नो दिव्याः पार्थिवासो गोजाता उत ये यज्ञियासः ॥ १४ ॥

आदित्याः । रुद्राः । वसवः । जुषन्त । इदम् । ब्रह्म । क्रियमाणम् । नवीयः ।
शृण्वन्तु । नः । दिव्याः । पार्थिवासः । गोऽजाताः । उत । ये । यज्ञियासः ॥ १४ ॥

वेङ्कट० आदित्यादयो वसिष्ठेन इदम्[५] क्रियमाणम् नवतरम् स्तोत्रम् सेवन्ताम् । शृण्वन्तु अस्माकम् दिव्याः देवाः पार्थिवाश्च, अपि च [५]ये भवि[५] गोजाता[६] मरुतो यज्ञियाश्च आदित्याः ॥ १४ ॥

---

१ नास्ति मूको. २. आन्त° मूको. ३ सुवमा° मूको. ४-४ यस्या गोपयितारो वा मूको. ५-५ यज्ञति मूको. ६ गाजाता क ख्ञ.

ये देवानां यज्ञियां यज्ञियानां मनोर्यजत्रा अमृता ऋतज्ञाः ।
ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ॥ १५ ॥

ये । देवानाम् । यज्ञियाः । यज्ञियानाम् । मनोः । यजत्राः । अमृताः । ऋतऽज्ञाः ।
ते । नः । रासन्ताम् । उरुऽगायम् । अद्य । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ १५ ॥

वेङ्कट० ये देवानाम् अपि यज्ञियानाम् यज्ञियाः भवन्ति इति प्राणान् आह इन्द्रादीन् वा मनुष्यस्य यष्टव्याः अमृताः सत्यज्ञाः, ते नः प्रयच्छन्तु बहूनां गेयं धनम्। अद्य यूयम् पात स्वस्तिभिः सदा नः ॥ १५ ॥

[1]इति पञ्चमाष्टके तृतीयाध्याये त्रिंशो वर्गः[1] ॥

व्याख्यत्तृतीयमध्यायं पञ्चमस्याष्टकस्य सः ।
विश्वामित्रकुले जातो माधवः सुन्दरीसुतः ॥

इति वेङ्कटमाधवाचार्यविरचिते ऋक्संहिताव्याख्याने पञ्चमाष्टके तृतीयोऽध्यायः ।

—*—

इति ऋग्वेदे सभाष्ये पञ्चमाष्टके तृतीयोऽध्यायः ॥

१-१. नास्ति मूको.

अथ चतुर्थोऽध्यायः ।

वेङ्कट० 'प्र ब्रह्मैति(तु' इ)त्यध्यायं[1] व्याचिख्यासति माधवः ।
अनेकर्षिषु[2] सूक्तेषु[3] वक्तव्यं सम्प्रदर्शयन् ॥ १ ॥

ऋषयः[4] सूक्तमेकं [5]सद् अपश्यन्[5] बहवः कथम् ।
सङ्घीभूय तपस्तप्त्वा सर्वे एव सहाऽपठन् ॥ २ ॥

इति केचन मन्यन्ते माधवस्य न तन्मतम् ।
नास्ति सूक्ते श्रूयमाणे [6]शपथमेवं प्रभाषितुम्[6] ॥ ३ ॥

'एना वयं पयसे(सा[7] इ)ति संवादे यदब्रवीद्वचः ।
तत्रैवं शक्यते वक्तुं नाम [8]ह्यत्र निवेशितम्[8] ॥ ४ ॥

'यमग्ने वाजसातम[9]-सूक्ते [10]नाम च कीर्त्यते[10] ।
'प्रयस्वन्तो हवामहे[11]' शक्यं [12]तत्रापि भाषितुम्[12] ॥ ५ ॥

'एवाँ अग्निं वसूयवः[13]-सूक्ते सामान्यतः कृता ।
वसूयुनामनिर्देशः[14] सन्त्यन्येऽपि च तादृशाः ॥ ६ ॥

'अबोध्यग्निः समिधे(धा[15] इ)ति सूक्तं बुधगविष्ठिरौ ।
सहैकं द्वौ [16]ददृशतुरेकः सूक्ते[16] ह्य कीर्त्यते ॥ ७ ॥

'गाविष्ठिरो नमसे(सा[17] इ)ति बुधस्तत्र[18] न कीर्तितः ।
'यदिन्द्राहं यथा त्वम्[19]' च सूक्तमार्षं द्वयोर्मतम् ॥ ८ ॥

'अहं यथा त्वमीशीय × × × स्तोता मे[19]' इति दृश्यते ।
एकवत्तत्र निर्देशो न स्वावामिति दृश्यते ॥ ९ ॥

'आ यदिन्द्रश्च दद्वहे सहस्रं वसुरोचिषः[20]' ।
एकवत्तत्र निर्देशः 'तिष्ठं वनस्य मध्य आ[21]' ॥ १० ॥

---

१. °र्षिषु सदध्यायं वेंकश. २. अनेकर्षीषु वि² अ²; अनेक° लअ; °र्षीषु वेंकश. ३. सूक्तेषु लअ. ४. नास्ति वि² अ². ५-५. सपदश्यन् वि² अ² लअ. ६-६. वाक्यमेवं प्रभाषत वि² अ²; वाक्यमेव प्र° लअ. ७. ऋ ३,३३,४. ८-८. ह्यत्रानिवेशनम् वि² अ². ९. ऋ ५,२०,१. १०-१०. नामावकी° वि² अ². ११. ऋ ५,२०,३. १२-१२. तत्राभिभा° वि² अ². १३. ऋ ५,२५,९. १४. वसुयुनामनिर्देशः वि² अ² लअ. १५. ऋ ५,१,१. १६-१६. °ऐकत्र° वि² अ² लअ. १७. ऋ ५,१,१२. १८. °बस्तत्र वेंकश. १९. ऋ ८,१४,१. २०. ऋ ८,३४,१६. २१. ऋ ८,३४,१८.

मत्स्यानां जालबद्धानां '[१]स्याम्' इत्यादि[१] विदुर्बुधाः ।
तत्रापि दृष्टो निर्देशः 'उत त्वामदिते महि'[२] ॥ ११ ॥

एवंविधेषु सूक्तेषु तस्मादेक ऋषिर्मतः ।
प्रधानोऽन्ये त्वप्रधाना इति मन्यामहे वयम् ॥ १२ ॥

स च प्रधानो निर्देशाद् अस्माभिर्ज्ञायते क्वचित् ।
'गविष्ठिरो नमसे(सा[३] इ)ति प्राधान्यं ह्यवगम्यते ॥ १३ ॥

'यदिन्द्राहं यथे(था[४] इ)त्यत्र न विशेषः प्रतीयते ।
गोषूक्ती[५] चाश्वसूक्ती वा नैकोऽपि ह्यत्र[६] कीर्त्यते ॥ १४ ॥

'तं प्रत्नथे(था[७] इ)त्यवत्सारः[८] काश्यपोऽन्यैः सहर्षिभिः ।
तस्मिन् सूक्ते समुद्दिष्टैर्ददर्शेत्यवगम्यते[८] ॥ १५ ॥

'ऋज्राश्वः प्रष्टिभिरि(भिः[९] इ)ति विरूपष्टमृषिराह च ।
कर्तृत्वमात्मनो[१०] दृष्टो भ्रातॄणां चाप्रमाणताम्[११] ॥ १६ ॥

प्रह्वाः प्राञ्जलयस्सर्वे इन्द्रं तुष्टूषवः स्थिताः ।
उपशृण्वन् सुतेष्विन्द्रम् ऋज्राश्वः स्तुतवान् स्वयम् ॥ १७ ॥

ऋषिरेकां ददर्शर्चम् ऋषिरेकामथापरः ।
इति केचन मन्यन्ते तदयुक्तमिति स्थितिः ॥ १८ ॥

शतं वैखानसान् प्राहुः सहस्रं वसुरोचिषः ।
न तावत्य ऋचस्तेषां युक्तेष्वस्तु विनिर्णयः ॥ १९ ॥ इति[१२] ॥

[३६]

[१३]वसिष्ठो मैत्रावरुणिर्ऋषिः । विश्वे देवा देवता । त्रिष्टुप् छन्दः[१३] ।

प्र ब्रह्मैतु सद॑नादृतस्य॒ वि र॒श्मिभिः॑ ससृजे॒ सूर्यो॒ गाः ।
वि सानु॑ना पृथि॒वी स॑स्र उ॒र्वी पृ॒थु प्रती॑कम॒ध्येधे॑ अ॒ग्निः ॥ १ ॥

१-१. ऋ ८,६७,१; स्याम्वित्या° वि[१] अ[१] ल छम. २. ऋ ८,६७,१०. ३. ऋ ५,३,१२. ४. ऋ ८,१४,१. ५. गोषू° वि[१] अ[१] ल; गोषू° छम. ६. ऋ ८,१४. ७. ऋ ५,४४,१. ८. °दिष्टो° वैंकश; °दिष्टे° अ[१] छम. ९. ऋ १,१००,१७. १०. कर्तृ···त्मनो वि[१] अ[१]; कर्तृमात्मनो ल छम; प्राधान्यमात्मनो वैंकश. ११. चाप्रधानताम् वैंकश. १२. नास्ति वि[१] अ[१] छम. १३-१३. नास्ति मूको.

प्र । ब्रह्म । एतु । सदनात् । ऋतस्य । वि । रश्मिऽभिः । ससृजे । सूर्यः । गाः ।
वि । सानुना । पृथिवी । सस्रे । उर्वी । पृथु । प्रतीकम् । अधि । आ । ईधे । अग्निः ॥१॥

वेङ्कट० वासिष्ठं[1] वैश्वदेवम् । प्र एतु स्तुतिं धौतीम्[2] ब्रह्म आदित्य उदकस्य सदनात् दिव । [3]वि सृजति[3] उदकानि सूर्य रश्मिभि । तत उच्छ्रितेनौषधिवनस्पतिसङ्घातेन[4] वि स्तृताऽस्ति[5] पृथिवी महती । सञ्जातेषु चौषधिषु वनस्पतिषु प्रथितम्[6] प्रतीकम् उत्तरवेदिलक्षणमङ्गम् अधि प्रज्वाल्यते अग्नि ॥ १ ॥

इमां वां मित्रावरुणा सुवृक्तिमिषं न कृण्वे असुरा नवीयः ।
इनो वामन्यः पदवीरदब्धो जनं च मित्रो यतति ब्रुवाणः ॥ २ ॥

इमाम् । वाम् । मित्रावरुणा । सुऽवृक्तिम् । इषम् । न । कृण्वे । असुरा । नवीयः ।
इनः । वाम् । अन्यः । पदऽवीः । अदब्धः । जनम् । च । मित्रः । यतति । ब्रुवाणः ॥ २ ॥

वेङ्कट० इमाम् वाम् हे मित्रावरुणौ[7] स्तुतिम् अन्नम् इव करोमि हे बलिनौ[7] नवतराम्[7] । ईश्वर युवयो अन्य पदानां[8] सर्वाऽऽवासानां ज्ञाता वरुण अहिंसित [9]'मित्र च'[9] जनम् यातयति कार्येषु[10] व्यापारयति स्तूयमान (तु ऋ ३,५९,१) ॥ २ ॥

आ वातस्य ध्रजतो रन्त इत्या अपीपयन्त धेनवो न सूदाः ।
महो दिवः सदने जायमानोऽचिक्रदद् वृषभः सस्मिन्नूधन् ॥ ३ ॥

आ । वातस्य । ध्रजतः । रन्ते । इत्याः । अपीपयन्त । धेनवः । न । सूदाः ।
महः । दिवः । सदने । जायमानः । अचिक्रदत् । वृषभः । सस्मिन् । ऊधन् ॥ ३ ॥

वेङ्कट० आ रमन्ते वायो गच्छत[11] इत्या गमनानि, वायोर्विविधा गतय इतस्तत प्रादुर्भवन्ति । वर्धन्ते च धेनव इव[12] सूदा 'सूद' (निघ ३,२३) इति कूपनाम । महत दिव सदने अन्तरिक्षे जायमान न्यक्रन्दीत्[13] पर्जन्य सर्वस्मिन् ऊधनि । यत उदक निर्गच्छति तदूधो[14] मेघसङ्घ ॥ ३ ॥

गिरा य एता युनजद्धरी त इन्द्र प्रिया सुरथा शूर धायू ।
प्र यो मन्युं रिरिक्षतो मिनात्या सुक्रतुमर्यमणं ववृत्याम् ॥ ४ ॥

गिरा । यः । एता । युनजत् । हरी इति । ते । इन्द्र । प्रिया । सुऽरथा । शूर । धायू इति ।
प्र । यः । मन्युम् । रिरिक्षतः । मिनाति । आ । सुऽक्रतुम् । अर्यमणम् । ववृत्याम् ॥ ४ ॥

---

१. वसि° मूको २ धौत्य मूको, स्तोत्र लु प्रस्ताव. ३-३. विहृति मूको. ४. °स्पतिसङ्घटन मूको. ५ °तासि मूको ६ पतितं वि¹, प्रथित अ¹, प्रतीतं ल लभ. ७ नै(ने अ¹.)वतराम् वि¹ अ¹, नैवतरम् ल; नैवतारम् लभ. ८ पादा° मूको. ९-९ मित्रस्य मूको, मित्र वा ल प्रस्ताव १०. रार्येषु वि¹ अ¹, रार्येषु ल एभ ११ °च्छन्त मूको १२. च वि¹ अ¹. १३ न्यक्रन्दि मूको १४. दूरा मूको

वेङ्कट० हे इन्द्र! स्तोत्रेण यः पृतौ हरी युनक्ति तव प्रियौ शोभनसंहननौ हे शूर! धारकौ, सोऽहम्[1]। प्र हिनस्ति यः मन्युम्[2] मां हिंसितुमिच्छतः शत्रोः, तं त्वाम् आ वक्ष्यामि सुकर्माणम् अर्यमणम् उदारम् ॥ ४ ॥

यजन्ते अस्य सुख्यं वयश्च नमस्विनः स्व ऋतस्य धामन् ।
वि पृक्षो बाबधे नृभिः स्तवान इदं नमो रुद्राय प्रेष्ठम् ॥ ५ ॥

यजन्ते । अस्य । सख्यम् । वयः । च । नमस्विनः । स्वे । ऋतस्य । धामन् ।
वि । पृक्षः । बाबधे । नृऽभिः । स्तवानः । इदम् । नमः । रुद्राय । प्रेष्ठम् ॥ ५ ॥

वेङ्कट० पूजयन्ति इन्द्रस्य सख्यम् पक्षिणः च अन्नवतः स्वस्मिन् उदकस्य स्थानेऽन्तरिक्षे वर्तमानस्य। 'वि बाधते'[3] च शत्रूणामन्नं मनुष्यैः स्तूयमानः, यद्वा 'वि बध्नाति'[4] स्तोतृषदनम्। तस्मै रुद्राय[5] मेधाविने इदम् हविः प्रियतमम् क्रियत इति ॥ ५ ॥

'इति पञ्चमाष्टके चतुर्थाध्याये प्रथमो वर्गः'[6] ॥

आ यत् साकं यशसो वावशानाः सरस्वती सप्तथी सिन्धुमाता ।
याः सुष्वयन्त सुदुघाः सुधारा अभि स्वेन पयसा पीप्यानाः ॥ ६ ॥

आ । यत् । साकम् । यशसः । वावशानाः । सरस्वती । सप्तथी । सिन्धुऽमाता ।
याः । सुस्वयन्त[7] । सुऽदुघाः । सुऽधाराः । अभि । स्वेन । पयसा । पीप्यानाः ॥ ६ ॥

वेङ्कट० आ-नयामास या सह कीर्तिं कामयमानाः सरस्वती षण्णां नदीनां सप्तमी सिन्धूनां माता। याः नद्यो 'हि सुष्वयन्त स्वधिः प्वजिपर्यायः[8]', अभ्यष्वजन्त[9] सरस्वतीम् सुदुघाः शोभनधाराः स्वेन पयसा प्यायमानाः। यद्वा[10] यदिति यदेत्यर्थः। उत्तरत्र सम्बन्धः ॥ ६ ॥

उत त्ये नो मुरुतो मन्दसाना धियं तोकं च वाजिनोऽवन्तु ।
मा नः परि ख्यदक्षरा चरन्त्यवीवृधन् युज्यं ते रयिं नः ॥ ७ ॥

उत । त्ये । नः । मरुतः । मन्दसानाः । धियम् । तोकम् । च । वाजिनः । अवन्तु ।
मा । नः । परि । ख्यत् । अक्षरा । चरन्ती । अवीवृधन् । युज्यम् । ते । रयिम् । नः ॥ ७ ॥

वेङ्कट० अपि च तथा सरस्वत्या सह अमी च मरुतः मोदमानाः अस्माकं कर्म[11] पुत्रम् च बलवन्तः रक्षन्तु। मा अस्मान् वर्जयतु[12] माता[13] चरन्ती[14] सरस्वती च। वर्धयन्तु योग्यम् रयिम् अस्माकं मरुतः सरस्वती चेति ॥ ७ ॥

---

१. सोऽयम् ल मस्तावः. २. मन्युमों ("मां म[1]) मूको. ३-३. पिबघने वि[1] अ[1] ल, विहघने लभ. ४. पिबाप्ति वि[1] अ[1]; पिब ल लभ. ५. रुन्द्रा मूको. ६-६. नास्ति मूको. ७. <√सुष्वि <सुष्वि-(<√सृ "गतौ, 'वहने') इति द्र. ८-८. हि ... तस्य वि भजि" वि[1] अ[1]; 'स्वविः ष्वजि' ल; "स्वबि ष्वजति" लभ. ९. "भ्यषज" मूको. १०. य या मूको. ११. नास्ति मूको. १२. वर्जयध्वं वि[1]; एर्जयजयध्वं अ[1]; वर्जय तं ल लभ. १३. मा वि[1]. १४. चरति मूको.

प्र वो॑ म॒हीम॒रम॑तिं कृणुध्वं॒ प्र पू॒षणं॑ विद॒थ्यं१॒॑ न वी॒रम् ।
भगं॑ धियोऽवि॒तारं॑ नो अ॒स्याः सा॒तौ वाजं॑ राति॒षाचं॒ पुरं॑धिम् ॥ ८ ॥

प्र । व॒ । म॒हीम् । अ॒रम॑तिम् । कृ॒णु॒ध्व॒म् । प्र । पू॒षण॑म् । वि॒द॒थ्य॑म् । न । वी॒रम् ।
भग॑म् । धि॒य॒ । अ॒वि॒तार॑म् । न॒ । अ॒स्याः । सा॒तौ । वाज॑म् । रा॒ति॒ऽसाच॑म् । पुर॑म्ऽधिम् ॥८॥

वेङ्कट० प्र[1] कृणुध्वम् यूय पृथिवीं पर्याप्तमतिम्[2], अपि वा विरामो रमति, अपर्यन्ताम् । प्र कृणुध्वम् पूषणम् च गृहार्हम् इव वीरम्, भगम् चास्माकम् अस्य कर्मणो रक्षितारम् । [3]अथ तं[3] धनस्य दातार बहुप्रज्ञं भगम् अन्नम् याचध्वम् सातौ सत्या भजते यदा[4] युष्मान् भगस्त्वेति[5] । यद्वा सात्यर्थम्[6] वाजम् बलिन भगं च प्रकृणुध्वमिति[7] ॥ ८ ॥

अच्छा॒यं वो॑ मरुतः॒ श्लोक॑ ए॒त्वच्छा॒ विष्णुं॑ निषि॒क्त॒पामवो॑भिः ।
उ॒त प्र॒जायै॑ गृण॒ते वयो॑ धुर्यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥ ९ ॥

अच्छ॑ । अ॒यम् । व॒ । म॒रु॒त॒ः । श्लोक॑ । ए॒तु । अच्छ॑ । विष्णु॑म् । नि॒सि॒क्त॒ऽपाम् । अव॑ऽभिः ।
उ॒त । प्र॒ऽजायै॑ । गृ॒ण॒ते । वय॑ । धु॒ । यू॒यम् । पा॒त॒ । स्व॒स्तिऽभिः॑ । सदा॑ । न॒ः ॥ ९ ॥

वेङ्कट० अभिगच्छतु अयम् युष्मान् मरुत । श्लोक । तथा निषिक्तस्य सोमस्य पातारम् विष्णुम् चाभिगच्छतु रक्षणार्थम् । अपि च मरुत सर्वे वा देवा प्रजायै गृणते च महाम् अन्नम् प्रयच्छन्तु ॥ ९ ॥

[8]इति पञ्चमाष्टके चतुर्थोऽध्याये द्वितीयो वर्ग[8] ॥

[३७]

[9]वसिष्ठो मैत्रावरुणिर्ऋषि । विश्वे देवा देवता । त्रिष्टुप् छन्द[9] ।

आ वो॒ वाहि॑ष्ठो वहतु स्त॒वध्यै॒ रथो॒ वाजा ऋभुक्षणो॒ अमृ॑क्तः ।
अ॒भि त्रि॑पृ॒ष्ठैः सव॑नेषु॒ सोमै॒र्मदे॑ सुशिप्रा म॒हभिः॑ पृणध्वम् ॥ १ ॥

आ । व॒ । वाहि॑ष्ठ । व॒ह॒तु॒ । स्त॒वध्यै॑ । रथ॑ । वा॒जा॒ । ऋ॒भु॒क्ष॒ण॒ । अमृ॑क्त ।
अ॒भि । त्रि॒ऽपृ॒ष्ठैः॑ । सव॑नेषु । सोमै॑ । मदे॑ । सु॒ऽशि॒प्रा॒ । म॒ह॒ऽभिः॑ । पृ॒ण॒ध्व॒म् ॥ १ ॥

वेङ्कट० आ वहतु युष्मान् अत्यन्त वोढा[10] स्तोतुम्[11] रथ हे सौधन्वना ![11] वाजा ! । ऋभुक्षण ![11] इत्यृभूणा[11] अज्येष्ठकनिष्ठाभ्यां व्यपदेश । शत्रुभिरपरिमृष्ट । अभिप्रयच्छत धनानि त्रयाणां देवगणाना पृष्ठभूते[13] सवनेषु सोमै जनिते[14] मदे[15] हे सुहनव ! महद्भिः ॥ १ ॥

---

1. नास्ति मूको. 2. °मतिगतोम् वि[1] अ[1]. ३ ३. रक्मय त ह एक, नास्ति वि[1] अ[1]. ४ यथा अ[1], ५. स्त्वेति वि[1] अ[1]. ६. सात्य° मूको. ७. प्राकृ° ल एक ८-८. नास्ति मूको. ९. वोढ वि[1]; वोढ अ[1] व लक्ष १० स्तोतु (°तु वि[1] अ[1]) मूको. ११-११. तु म्र ४,२७,३, ७,४८,१ प्रभृ. १२. °त्यृभूणा मूको १३ पृष्ठभू° वि[1], प्रकृष्टभू° अ[1], °ते लक्ष, १४. जनोते मूको. १५. मद वि[1] अ[1] छ, मद लक्ष.

यूयं ह रत्नं मघवत्सु धत्थ स्वर्दृश ऋभुक्षणो अमृक्तम् ।
सं यज्ञेषु स्वधावन्तः पिबध्वं वि नो राधांसि मतिभिर्दयध्वम् ॥ २ ॥

यूयम् । ह । रत्नम् । मघवत्ऽसु । धत्थ । स्वःऽदृशः । ऋभुक्षणः । अमृक्तम् ।
सम् । यज्ञेषु । स्वधाऽवन्तः । पिबध्वम् । वि । नः । राधांसि । मतिऽभिः । दयध्वम् ॥ २ ॥

वेङ्कट० यूयम् ह रत्नम् हविष्मत्सु[1] दत्थ सर्वस्य द्रष्टारः हे ऋभवः[2] अहिंसितम् । सम् पिबध्वम् यज्ञेषु हे अन्नवन्तः[2], विविधं प्रयच्छत चास्मभ्यम् धनानि स्तुतिभिः ॥ २ ॥

उवोचिथ हि मघवन् देष्णं महो अर्भस्य वसुनो विभागे ।
उभा ते पूर्णा वसुना गभस्ती न सूनृता नि यमते वसव्या ॥ ३ ॥

उवोचिथ । हि । मघऽवन् । देष्णम् । महः । अर्भस्य । वसुनः । विऽभागे ।
उभा । ते । पूर्णा । वसुना । गभस्ती इति । न । सूनृता । नि । यमते । वसव्या ॥ ३ ॥

वेङ्कट० सेवसे हि मघवन् ! धनम्[3] वृद्धस्य बालस्य च वसुनः विभागार्थम् । उभौ ते पूर्णौ धनेन बाहू । न तव वाक् नि यच्छति वसुसमूहान्[3] । किं तर्हि । भूयोभूयो विसृजति ॥ ३ ॥

त्वमिन्द्र स्वयशा ऋभुक्षा वाजो न साधुरस्तमेष्यृक्वा ।
वयं नु ते दाश्वांसः स्याम ब्रह्म कृण्वन्तो हरिवो वसिष्ठाः ॥ ४ ॥

त्वम् । इन्द्र । स्वऽयशाः । ऋभुक्षाः । वाजः । न । साधुः । अस्तम् । एषि । ऋक्वा ।
वयम् । नु । ते । दाश्वांसः । स्याम । ब्रह्म । कृण्वन्तः । हरिऽवः । वसिष्ठाः ॥ ४ ॥

वेङ्कट० त्वम् इन्द्र ! स्वभूतकीर्तिः[4] महान् अश्व इव साधयिता गृहम् एषि स्तोत्रवान् । वयम् इति स्पष्टम् ॥ ४ ॥

सनितासि प्रवतो दाशुषे चिद् याभिर्विवेषो हर्यश्व धीभिः ।
ववन्मा नु ते युज्याभिरूती कदा न इन्द्र राय आ दशस्येः ॥ ५ ॥

सनिता । असि । प्रऽवतः । दाशुषे । चित् । याभिः । विवेषः । हरिऽअश्व । धीभिः ।
ववन्म । नु । ते । युज्याभिः । ऊती । कदा । नः । इन्द्र । रायः । आ । दशस्येः ॥ ५ ॥

वेङ्कट० प्रदानशीलः भवसि मुख्यस्य धनस्य[5] यजमानाय याभिः धीभिः बुद्धिभिः । व्याप्नोषि त्वं यजमानान्[6] हर्यश्व ! । सम्भक्तारो भूयास्म क्षिप्रं तव योग्यैः रक्षणैः । कदा अस्मभ्यम् इन्द्र ! धनानि आ प्रयच्छेः ॥ ५ ॥

"इति पञ्चमाष्टके चतुर्थाध्याये तृतीयो वर्गः" ॥

---

१. °ष्मत् मु मूको. २. नास्ति ए एभ. ३-३. बहुर सनूहानदि वि° वा° ए, वसुसमूहान् बहुर मूहानदि एभ. ४. स्वभू° मूको. ५. नास्ति मूको. ६. °नान् मूको. ७-७. नास्ति मूको.

वासयसीव वेधसस्त्वं नः कदा न इन्द्र वचसो बुबोधः ।
अस्तं तात्या धिया रयिं सुवीरं पृक्षो नो अर्वा न्युहीत वाजी ॥ ६ ॥

वासयसिऽइव । वेधसः । त्वम् । नः । कदा । नः । इन्द्र । वचसः । बुबोधः ।
अस्तम् । तात्या । धिया । रयिम् । सुऽवीरम् । पृक्षः । नः । अर्वा । नि । उहीत । वाजी ॥६॥

वेङ्कट० वासयसि इदानीं परिचरतः त्वम् अस्मान् । कदा अस्माकम् इन्द्र! वचन बुध्येथाः[1] । [2]गृहम् सन्यमानेन[2] कर्मणा तवया वा स्तुत्या रयिम् सुवीरम् अन्न च प्रति वेगवान् अश्व अस्मान् [3]नि उहीत इतीन्द्रम्[3] परोक्षेणाह — गृहादिष्वस्मान् प्रापयत्विति[4] ॥ ६ ॥

अभि यं देवी निर्ऋतिश्चिदीशे नक्षन्त इन्द्रं शरदः सुपृक्षः ।
उप त्रिबन्धुर्जरदष्टिमेत्यस्ववेशं यं कृणवन्त मर्ताः ॥ ७ ॥

अभि । यम् । देवी । निःऽऋतिः । चित् । ईशे । नक्षन्ते । इन्द्रम् । शरदः । सुऽपृक्षः ।
उप । त्रिऽबन्धुः । जरत्ऽअष्टिम् । एति । अस्वऽवेशम् । यम् । कृणवन्त । मर्ताः ॥ ७ ॥

वेङ्कट० यम् इन्द्रम् अभि देवी पृथिवी प्राणिनाम् ईष्टे, व्याप्नुवन्ति इन्द्रम् शरदः [5]शोभनाद्याः, स[5] उप एति त्रयाणां लोकानां बन्धुः जरदष्टिम् । यो देवैर्देवसमशन आयाति यज्ञेन स जरदष्टिरिति । यम्[6] इन्द्रम्[6] मर्ताः कुर्वन्ति[7] अस्ववेशम्[8] स्वस्मिन्नायतने य कदाचिदपि नास्ते सोऽस्ववेशः[9] । [10]तथाकरणम् इतस्ततः[11] मरद्धानमिति ॥ ७ ॥

आ नो राधांसि सवितः स्तवध्या आ रायो यन्तु पर्वतस्य रातौ ।
सदा नो दिव्यः पायुः सिषक्तु यूयं पात स्वस्तिभिः सदा नः ॥ ८ ॥

आ । नः । राधांसि । सवितरिति । स्तवध्यै । आ । रायः । यन्तु । पर्वतस्य । रातौ ।
सदा । नः । दिव्यः । पायुः । सिसक्तु । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ८ ॥

वेङ्कट० आ यन्तु[12] अस्मान् धनानि स्वा स्तोतुम् हे सवितः । आ यन्तु च धनानि मेघस्य दाने । सदा अस्मान्[13] दिव्यः[14] रक्षकः पर्जन्यः सिषक्तु इति ॥ ८ ॥

[15]इति पञ्चमाष्टके चतुर्थोऽध्याये चतुर्थो वर्गः[15] ॥

---

1 बुधे वि[1] अ[1], बुध्य ल लभ 2 2 गृह्यमाणेन वि[1], गृहन्तामानन अ[1], ग्रहं तमानेन ल लभ, गृह तनमानेन ल प्रस्ताव 3 3. निहितेतीद वि[1] अ[1] ए, निहितीदं एभ, °द्र ल प्रस्ताव 4 °य स्वति मूको 5 5 °नाद्यास मूको 6 यत् मूको 7. ६-८ वि[1] ल लभ 8 नास्ति मूको 9 अ (आ वि[1]) स्ववेशम् मूको. 10. स्वावश वि[1] अ[1]. 11 11 तथाकारक्षितस्तत वि[1] ल 12. नयन्तु मूको 13 अस्यान् मूको. 14 दिव मूको 15 15. नास्ति मूको.

[३८]

[1]वसिष्ठो मैत्रावरुणिर्ऋषिः । आद्यादिषडन्तानां सविता देवता, षष्ठ्या उत्तरार्धस्य भगो वा, सप्तम्यष्टम्योर्वाजिनः । त्रिष्टुप् छन्दः[1] ।

उदु ष्य देवः सविता ययाम हिरण्ययीममतिं यामशिश्रेत् ।
नूनं भगो हव्यो मानुषेभिर्वि यो रत्ना पुरूवसुर्दधाति ॥ १ ॥

उत् । ऊँ इति । स्यः । देवः । सविता । ययाम । हिरण्ययीम् । अमतिम् । याम् । अशिश्रेत् ।
नूनम् । भगः । हव्यः । मानुषेभिः । वि । यः । रत्ना । पुरुऽवसुः । दधाति ॥ १ ॥

वेङ्कट० सोऽयम् सविता देवः उत् ययाम हिरण्मयम्[2] रूपम्, यद् रूपम् क्षयं श्रयति । प्रादुरभूदित्यर्थः । सम्प्रति भजनीयः ह्वातव्यः मनुष्यैः भवति । वि दधाति यः रत्नानि बहुधनः ॥ १ ॥

उदु तिष्ठ सवितः श्रुध्य१स्य हिरण्यपाणे प्रभृतावृतस्य ।
व्यु१र्वीं पृथ्वीममतिं सृजान आ नृभ्यो मर्तभोजनं सुवानः ॥ २ ॥

उत् । ऊँ इति । तिष्ठ । सवितरिति । श्रुधि । अस्य । हिरण्यऽपाणे । प्रऽभृतौ । ऋतस्य ।
वि । उर्वीम् । पृथ्वीम् । अमतिम् । सृजानः । आ । नृऽभ्यः । मर्तऽभोजनम् । सुवानः ॥ २ ॥

वेङ्कट० उत् तिष्ठ सवितः[3], 'तपतु च[3] "शृणु च[4] स्तोत्रमिदं हे हिरण्यपाणे ! सोमस्य हरणे उरुतमं पृथुतमम् रूपम् वि सृजन् आ सुवानः इव मनुष्येभ्यः मनुष्ययोग्यमशनम् ॥ २ ॥

अपि ष्टुतः सविता देवो अस्तु यमा चिद् विश्वे वसवो गृणन्ति ।
स नः स्तोमान् नमस्य१श्चनो धाद् विश्वेभिः पातु पायुभिर्नि सूरीन् ॥ ३ ॥

अपि । स्तुतः । सविता । देवः । अस्तु । यम् । आ । चित् । विश्वे । वसवः । गृणन्ति ।
सः । नः । स्तोमान् । नमस्यः । चनः । धात् । विश्वेभिः । पातु । पायुऽभिः । नि । सूरीन् ॥

वेङ्कट० अपि अस्तु सङ्गच्छताम्[5] स्तुतः सविता [6]देवः, यम्[6] विश्वे अपि[7] वसवः[8] आ स्तुवन्ति, सः अस्माकम् स्तोमान् हविश्च धारयतु नमस्यः । विश्वैश्च रक्षणैः नितरां रक्षतु स्तोतॄन् ॥ ३ ॥

अभि यं देव्यदितिर्गृणाति सवं देवस्य सवितुर्जुषाणा ।
अभि सम्राजो वरुणो गृणन्त्यभि मित्रासो अर्यमा सजोषाः ॥ ४ ॥

अभि । यम् । देवी । अदितिः । गृणाति । सवम् । देवस्य । सवितुः । जुषाणा ।
अभि । सम्ऽराजः । वरुणः । गृणन्ति । अभि । मित्रासः । अर्यमा । सऽजोषाः ॥ ४ ॥

१-१. नास्ति मूको. २. रुक्म[0] ल; 'रुक्मम् लभ. ३-३. तदनूचः वि[0] अ[0]. ४-४. शृण्वन् वि[0] अ[0]. ५. सगच्छ[0] मूको. ६-६. अथ वि[0]. ७. अपि मूको ८. वासवः लभ; वसवः वि[0] अ[0] ल.

वेङ्कट० अभि स्तौति यम् देवी अदिति प्रसवम् देवस्य सवितु सेवमाना । अभि गृणन्ति तम् सम्राज वरुण च । अभि गृणन्ति मित्रास मित्रो देव तदनुचराश्च अर्यमा च सङ्गता ॥ ४ ॥

अभि ये मिथो वनुषः सपन्ते रातिं दिवो रातिषाचः पृथिव्याः ।
अहिर्बुध्न्य उत नः शृणोतु वरूत्र्येकधेनुभिर्नि पातु ॥ ५ ॥

अभि । ये । मिथ । वनुष । सपन्ते । रातिम् । दिव । रातिऽसाच । पृथिव्या ।
अहि । बुध्न्य । उत । न । शृणोतु । वरूत्री । एकधेनुऽभि । नि । पातु ॥ ५ ॥

वेङ्कट० अभि स्पृशन्ति ये सम्भक्तारः इतरेतरजीवा[1] रातिम् दातारम् देवलोकस्य रातिं भजन्त पृथिव्या मनुष्याणामभिलषितानि प्रयच्छन्तो देवा ते सर्वेऽस्माकं स्तोत्रं शृण्वन्ति । शृणोतु[2] अपि च अहि बुध्न्य[3] । वरूत्री[4] च एकधेनुभि नाम स्वानुचरीभि अस्मान् नि पातु ॥ ५ ॥

अनु तन्नो जास्पतिर्मंसीष्ट रत्नं देवस्य सवितुरियानः ।
भगमुग्रोऽवसे जोहवीति भगमनुग्रो अध याति रत्नम् ॥ ६ ॥

अनु । तत् । न । जाःऽपति । मंसीष्ट । रत्नम् । देवस्य । सवितु । इयान ।
भगम् । उग्र । अवसे । जोहवीति । भगम् । अनुग्र । अध । याति । रत्नम् ॥ ६ ॥

वेङ्कट० अनु मन्यताम् तत् अस्माकम् जास्पति[5] त्वष्टा रत्नम् देवस्य सवितु स्वभूतम् तेन प्रत्तम्[6] इहागच्छन् सवित्रा । भजनीयं सवितारम्[7] 'उद्गूर्ण आपद्भ्यो'[8] रक्षणाय आह्वयति । भगम् अनुद्गूर्णो याचते[9] रत्नम् । भागो[10] याऽयमर्थश्च इति (तु. ऋअ २,७,३८) ॥ ६ ॥

शं नो भवन्तु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः ।
जम्भयन्तोऽहिं वृकं रक्षांसि सनेम्यस्मद्युयवन्नमीवाः ॥ ७ ॥

शम् । न । भवन्तु । वाजिन । हवेषु । देवऽताता । मितऽद्रव । सुऽअर्का ।
जम्भयन्त । अहिम् । वृकम् । रक्षांसि । सनेमि । अस्मत् । युयवन् । अमीवा ॥ ७ ॥

वेङ्कट० सुखा भवन्तु न वाजिन ह्वानेषु देवतातौ यज्ञे मितद्रव मितगमना, अध्वानं विमाय गच्छन्त, स्वर्चना । हिंसन्त अहिम् च वृकम्[11] च रक्षांसि च क्षिप्रम् अस्मत्त यावयन्तु अमीवा ॥ ७ ॥

वाजेवाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः ।
अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥ ८ ॥

---

१ जीव मूको. २-२ °क शृणोतु गृणन्ति वि[२] अ[१], °कं स्तोत्रं शृ° लक्ष. ३. °बुध्न वि[२] अ[१], बुध्न्य द, अहि न बुध्नो लक्ष. ४ प्रकृति मूको. ५ जना पति अ[१], जानां पति लक्ष. ६ प्रत्तम् मूको. ७ नास्ति मूको. ८. °र्णो माभ्यो मूको. ९. °तो मूको. १०. भगो मूको. ११. मक्तम् वि[२] अ[१],

वाजेऽवाजे । अवत । वाजिनः । नः । धनेषु । विप्राः । अमृताः । ऋतऽज्ञाः ।
अस्य । मध्वः । पिबत । मादयध्वम् । तृप्ताः । यात । पथिऽभिः । देवऽयानैः ॥ ८ ॥

वेङ्कट० सङ्ग्रामेसङ्ग्रामे रक्षत हे अश्वाः[1] अस्मान् धनेषु शत्रुभ्य आच्छिद्यार्पितेषु मेधाविनः[1] अमृताः । वाजिनोऽश्वरूपाः[1] केचन[2] देवाः । सत्यज्ञाः[1] । अमुं सोमम् पिबत मादयत च । अथ तृप्ता गच्छत पथिभिः देवयानैः ॥ ८ ॥

[3]इति पञ्चमाष्टके चतुर्थाध्याये पञ्चमो वर्गः[3] ।

[३९]

[3]वसिष्ठो मैत्रावरुणिर्ऋषिः । विश्वे देवा देवता । त्रिष्टुप् छन्दः[3] ।

ऊर्ध्वो अग्निः सुमतिं वस्वो अश्रेत् प्रतीची जूर्णिर्देवतातिमेति ।
भेजाते अद्री रथ्येव पन्थामृतं होता न इषितो यजाति ॥ १ ॥

ऊर्ध्वः । अग्निः । सुऽमतिम् । वस्वः । अश्रेत् । प्रतीची । जूर्णिः । देवऽतातिम् । एति ।
भेजाते इति । अद्री इति । रथ्याऽइव । पन्थाम् । ऋतम् । होता । नः । इषितः । यजाति ॥१॥

वेङ्कट० ऊर्ध्वः अग्निः सुष्टुतिम् अस्माकम् वस्वः दानाय श्रयति । प्रतीची[4] क्षिप्रा[5] उषा यज्ञम् एति । भेजाते शत्रूणामाहर्तारौ [6]अद्री युवाम् मार्जि[6] रथ्ये इव पन्थानं महान्तम् । अस्मिन्काले यज्ञ होता अस्माकं प्रेषितो यजति ॥ १ ॥

प्र वावृजे सुप्रया बर्हिरेषामा विश्पतीव बीरिट इयाते ।
विशामक्तोरुषसः पूर्वहूतौ वायुः पूषा स्वस्तये नियुत्वान् ॥ २ ॥

प्र । ववृजे । सुऽप्रयाः । बर्हिः । एषाम् । आ । विश्पती इवेति विश्पतीऽइव । बीरिटे । इयाते इति ।
विशाम् । अक्तोः । उषसः । पूर्वऽहूतौ । वायुः । पूषा । स्वस्तये । नियुत्वान् ॥ २ ॥

वेङ्कट० प्रवृक्तम्[7] आसीत् सुप्रयाणम्[8] एषाम् बर्हिः । आ गच्छतः वायुः पूषा च अन्तरिक्षे राजानाविव गणे[9] । मनुष्याणाम् रात्र्याः [10]विवासे उषसः च[10] पूर्वस्यामभिहूतौ[11] वायुः नियुत्वान् पूषा च अस्माकम् स्वस्तये । निरुक्तम् (५,२८) द्रष्टव्यम् ॥ २ ॥

ज्मया अत्र वसवो रन्त देवा उरावन्तरिक्षे मर्जयन्त शुभ्राः ।
अर्वाक् पथ उरुज्रयः कृणुध्वं श्रोता दूतस्य जग्मुषो नो अस्य ॥ ३ ॥

ज्मयाः । अत्र । वसवः । रन्त । देवाः । उरौ । अन्तरिक्षे । मर्जयन्त । शुभ्राः ।
अर्वाक् । पथः । उरुऽज्रयः । कृणुध्वम् । श्रोत । दूतस्य । जग्मुषः । नः । अस्य ॥ ३ ॥

---

१. वाजिनोऽश्वश्च रूपं मूको. २. केन च वि[1] अ[1]. ३-३. नास्ति मूको ४. पृथिवी मूको, ५ क्षिप्ता मूको. ६-६. °तारं विद्रवा यूय भार्जे मूको. ७. प्रवृत्तम् मूको. ८. सु याप° स्म. ९. गुदितम् वि[1] अ[1], गे इ स्म १०-१०. विवसवागेश्च मूको. ११. °मिभू° मूको,

वेङ्कट० पृथिव्याः अस्मिन् देवयजने आगच्छत पार्थिवा देवाः । उरौ अन्तरिक्षे च सप्रत्या गच्छन्ति शोभना । मार्ष्टिर्गतिकर्मसु[1] पठित (द्र. निघ २,१४, या १,२०) । अर्वाचीनान् अधोमुखान् कुरुध्वं युष्माकं मार्गान् हे[2] इत आगच्छत हे महावेगाः ! । शृणुत च युष्माकम् आगुप अस्माकम् अस्य दूतस्य अग्नेः वचः[3] ॥ ३ ॥

ते हि यज्ञेषु यज्ञियास ऊमाः सधस्थं विश्वे अभि सन्ति देवाः ।
ताँ अध्वर उशतो यक्ष्यग्ने श्रुष्टी भगं नासत्या पुरंधिम् ॥ ४ ॥

ते । हि । यज्ञेषु । यज्ञियासः । ऊमाः । सधऽस्थम् । विश्वे । अभि । सन्ति । देवाः ।
तान् । अध्वरे । उशतः । यक्षि । अग्ने । श्रुष्टी । भगम् । नासत्या । पुरम्ऽधिम् ॥ ४ ॥

वेङ्कट० ते हि यज्ञेषु यज्ञार्हाः अवितारः[4] आसनम् अभि भवन्ति सर्वे देवाः । तान् यज्ञे कामयमानान् यज अग्ने ! क्षिप्रम् भगम्[5] बहुप्रज्ञम् अश्विनौ च ॥ ४ ॥

आग्ने गिरो दिव आ पृथिव्या मित्रं वह वरुणमिन्द्रमग्निम् ।
आर्यमणमदितिं विष्णुमेषां सरस्वती मरुतो मादयन्ताम् ॥ ५ ॥

आ । अग्ने । गिरः । दिवः । आ । पृथिव्याः । मित्रम् । वह । वरुणम् । इन्द्रम् । अग्निम् ।
आ । अर्यमणम् । अदितिम् । विष्णुम् । एषाम् । सरस्वती । मरुतः । मादयन्ताम् ॥ ५ ॥

वेङ्कट० अग्ने ! दिवः पृथिव्याः च 'आ वह' अस्माकं स्तुतीः[6] प्रति देवता[7] मित्रादिकाम्[8] एषां वसिष्ठानाम् । तथा सरस्वती मरुतः च मादयन्तु च ॥ ५ ॥

ररे हव्यं मतिभिर्यज्ञियानां नक्षत् कामं मर्त्यानामसिन्वन् ।
धाता रयिमविदस्यं सदासां सक्षीमहि युज्येभिर्नु देवैः ॥ ६ ॥

ररे । हव्यम् । मतिऽभिः । यज्ञियानाम् । नक्षत् । कामम् । मर्त्यानाम् । असिन्वन् ।
धात । रयिम् । अविऽदस्यम् । सदाऽसाम् । सक्षीमहि । युज्येभिः । नु । देवैः ॥ ६ ॥

वेङ्कट० दीयते[10] हविः स्तुतिभिः सह देवानाम् । व्याप्नोतु अभिलषितं[11] मनुष्याणां मध्ये स्व धनम् अबध्नन्[12] यजमान । प्रयच्छत धनम् अक्षयम् सदा दीयमानमपि अविदस्यम्[13] । सङ्गता भवाम सहायैः[14] क्षिप्रम् देवैः ॥ ६ ॥

नू रोदसी अभिष्टुते वसिष्ठैर्ऋतावानो वरुणो मित्रो अग्निः ।
यच्छन्तु चन्द्रा उपमं नो अर्कं यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

---

१ धीन् वि[२], धीन् गति° अ[१] ल, धीन् गति° लभ. २. नास्ति मूको. ३ वच मूको. ४ अविकारं मूको. ५ भगवन् वि[२] अ[१], भगवम् ल लभ ६ ६ आह मूको ७. स्तुति वि[१] अ[१], स्तुति लभ. ८. °ता मूको ९. मित्रादिका ल प्रस्ताव. १० दीयते मूको. ११. °षितानो मूको. १२. अबुधन् वि[२], अविधन् अ[१], अबुध्यन् ल लभ. १३ अविदासं मूको. १४. भवाम मूको

तु । रोदसी इति । अभिस्तुते इत्यभिऽस्तुते । वसिष्ठ । ऋतऽवान । वरुण । मित्र । अग्ने ।
यच्छन्तु । चन्द्राः । उपऽमम् । नः । अर्कम् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥७॥

वेङ्कट० क्षिप्रं द्यावापृथिव्यौ अभिष्टुते[1] वसिष्ठे, यजमाने वरुणादयश्च प्र यच्छन्तु उपमम् उपमान भूतम्[2] नः[3] अन्नम्, यद्वा आह्लादका देवा इति ॥ ७ ॥

[4]इति पञ्चमाष्टके चतुर्थोऽध्याये षष्ठो वर्गः[4] ॥

[४०]

[5]वसिष्ठो मैत्रावरुणिर्ऋषिः । विश्वे देवा देवता । त्रिष्टुप् छन्दः[4] ।

ओ श्रुष्टिर्विदथ्या३ समेतु प्रति स्तोमं दधीमहि तुराणाम् ।
यदद्य देवः सविता सुवाति स्यामास्य रत्निनो विभागे ॥ १ ॥

ओ इति । श्रुष्टिः । विदथ्या । सम् । एतु । प्रति । स्तोमम् । दधीमहि । तुराणाम् ।
यत् । अद्य । देवः । सविता । सुवाति । स्याम । अस्य । रत्निनः । विऽभागे ॥ १ ॥

वेङ्कट० सम् आयातु क्षिप्रं विदथहिता[5] प्रति दधीमहि[6] स्तोमम् आगताया त्वयि देवानाम् । यदि अद्य देवः सविता उषा अस्मान्[7] प्रसौति, तर्हि[8] स्तुत्या युक्ता वयं धनिनः भवेम अस्य सवितुः धनविभाजने[9] ॥ १ ॥

मित्रस्तन्नो वरुणो रोदसी च द्युभक्तमिन्द्रो अर्यमा ददातु ।
दिदेष्टु देव्यदिती रेक्णो वायुश्च यन्नियुवैते भगश्च ॥ २ ॥

मित्रः । तत् । नः । वरुणः । रोदसी इति । च । द्युऽभक्तम् । इन्द्रः । अर्यमा । ददातु ।
दिदेष्टु । देवी । अदितिः । रेक्णः । वायुः । च । यत् । नियुवैते इति निऽयुवैते । भगः । च ॥

वेङ्कट० मित्र तत् अस्मभ्यं वरुणादिश्च दीप्तम् धनं प्रयच्छन्तु । दिशतु देवी[10] अदितिः धनम्, वायुः भगः च यत् धनम् पृथक् कुरुतः[11] ॥ २ ॥

सेदुग्रो अस्तु मरुतः स शुष्मी यं मर्त्यं पृषदश्वा अवाथ ।
उतेमग्निः सरस्वती जुनन्ति न तस्य रायः पर्येतास्ति ॥ ३ ॥

सः । इत् । उग्रः । अस्तु । मरुतः । सः । शुष्मी । यम् । मर्त्यम् । पृषत्ऽअश्वाः । अवाथ ।
उत । ईम् । अग्निः । सरस्वती । जुनन्ति । न । तस्य । रायः । परिऽएता । अस्ति ॥ ३ ॥

---

१ °ष्टुतो मूको २ उपमासम्° मूको ३ नास्ति मूको; अत्र लभ ४-४ नास्ति मूको
५ °धाहि° वि° अ° °धाहि° ल लभ ६. धीमहि वि° अ°; दधीनी धीमहि लभ ७ °स्मात् मूको.
८ नास्ति वि°. ९ °जने मूको. १० तेऽपि मूको ११. °नम् मूको.

वेङ्कट० स एव उद्गूर्णं भवतु हे मरुत !, स [1]बलवान्, यम्[1] मर्त्यम् हे पृषदश्वाः ! रक्षथ। अपि च पुनम् अग्नि[2] सरस्वती च तदनुचराश्च प्रीणयन्ति धनेन । न च तस्य धनस्य परिगन्ता अस्ति कश्चिदिति ॥ ३ ॥

अयं हि नेता वरुण ऋतस्य मित्रो राजानो अर्यमापो धुः ।
सुहव्या देव्यदितिरनर्वा ते नो अंहो अति पर्षन्नरिष्टान् ॥ ४ ॥

अयम् । हि । नेता । वरुण । ऋतस्य । मित्र । राजान । अर्यमा । अपः । धुरिति धुः ।
सुऽहव्या । देवी । अदिति । अनर्वा । ते । नः । अंहः । अति । पर्षन् । अरिष्टान् ॥ ४ ॥

वेङ्कट० अयम् हि नेता[3] वरुण सत्यस्य मित्र अर्यमा च राजान कर्म धारयन्ति, तथा[4] स्वाह्वाना देवी अदिति च अप्रत्युद्गता[5] अन्यस्मिन् । ते सर्वे अस्मान् अंहस. [6]अति पारयन्तु[6] अहिंसितानिति[7] ॥ ४ ॥

अस्य देवस्य मीळ्हुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः ।
विदे हि रुद्रो रुद्रियं महित्वं यासिष्टं वर्तिरश्विनाविरावत् ॥ ५ ॥

अस्य । देवस्य । मीळ्हुषः । वयाः । विष्णोः । एषस्य । प्रऽभृथे । हविःऽभिः ।
विदे । हि । रुद्र । रुद्रियम् । महिऽत्वम् । यासिष्टम् । वर्तिः । अश्विना । इराऽवत् ॥ ५ ॥

वेङ्कट० अस्य देवस्य सेक्तु शाखाभूता अन्ये देवा विष्णो हविर्भि एषणीयस्य यज्ञे । तथा रुद्र स्तोता स्तुत्यं महत्त्वम् अश्विनो हि जानाति । 'हे अश्विनौ!' तथा सति अन्नयुक्त मार्गम् यासिष्टम् इति ॥ ५ ॥

मात्र पूषन्नाघृण इरस्यो वरूत्री यद् रातिषाचश्च रासन् ।
मयोभुवो नो अर्वन्तो नि पान्तु वृष्टिं परिज्मा वातो ददातु ॥ ६ ॥

मा । अत्र । पूषन् । आघृणे । इरस्यः । वरूत्री । यत् । रातिऽसाचः । च । रासन् ।
मयःऽभुवः । नः । अर्वन्तः । नि । पान्तु । वृष्टिम् । परिऽज्मा । वातः । ददातु ॥ ६ ॥

वेङ्कट० मा अत्र हे पूषन्! आगतदीप्ते[8] (तु निघ ५,९) [9]"इरामिच्छ, वरूत्री[10] वारयित्र्यस्माक[9] प्रजा तथा रातिषाच[12] रातिं भजन्त अस्मदीय धनमपहरन्तश्च यत्र तुभ्य प्रयच्छन्ति । सुखस्य भावयितार अस्मान् अश्वा[13] रक्षन्तु । वृष्टिम् परितो गन्ता वायु ददातु ॥ ६ ॥

१-१ °वान् वि[2] °वान् न अ[1] ल लभ २ अग्निम् मूको ३ नेतार मूको ४ नास्ति वि[2]. ५. च प्रस्तुता बि ल, अप्रत्युता अ[1], अप्रत्युत्सुता लभ ६ ६ अतिचार[°] वि[2]. ७ °सितानि° ल लभ ८ द्युम्य वि[2] अ[1] ल, द्युस्य लभ ९ ९ नास्ति मूको १०-१० जरामिच्छे इति वि, जरामिच्छेवार्णि अ जरामिच्छे फ्रू ल लभ ११ विवार° मूको. १२ राति° मूको १३ तु ऋ ७,३५,१२ ३८,७ प्रभृ° अश्वश्चरा लभ अनश्वरा अ[1] वि[2] ल

नू रोदसी अभिष्टुते वसिष्ठैर्ऋतावानो वरुणो मित्रो अग्निः ।
यच्छन्तु चन्द्रा उपमं नो अर्कं यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

नु । रोदसी इति । अभिस्तुते इत्यभिऽस्तुते । वसिष्ठैः । ऋतऽवानः । वरुणः । मित्रः । अग्निः ।
यच्छन्तु । चन्द्राः । उपऽमम् । नः । अर्कम् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥६॥

वेङ्कट० पूर्वं व्याख्याता (ऋ ७,३९,७ द्र) ॥ ७ ॥

[१]इति पञ्चमाष्टके चतुर्थोऽध्याये सप्तमो वर्गः[१] ॥

[४१]

[२]वसिष्ठो मैत्रावरुणिर्ऋषिः । आद्याया अग्नीन्द्रमित्रावरुणाश्विभगपूषब्रह्मणस्पतिसोमरुद्रा देवता, द्वितीयादिषष्ठ्यन्तानां भगः, सप्तम्या उषसः । त्रिष्टुप् छन्दः, आद्या जगती[२] ।

प्रातरग्निं प्रातरिन्द्रं हवामहे प्रातर्मित्रावरुणा प्रातरश्विना ।
प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रं हुवेम ॥ १ ॥

प्रातः । अग्निम् । प्रातः । इन्द्रम् । हवामहे । प्रातः । मित्रावरुणा । प्रातः । अश्विना ।
प्रातः । भगम् । पूषणम् । ब्रह्मणः । पतिम् । प्रातः इति । सोमम् । उत । रुद्रम् । हुवेम ॥ १ ॥

वेङ्कट० 'प्रातर्भग जगत्याद्या[३] लिङ्गोक्तदेवताऽस्तोपस्या' इति कात्यायनः (ऋअ २, ७, ४१)। सेयं[४] निगदसिद्धा[४] ॥ १ ॥

प्रातर्जितं भगमुग्रं हुवेम वयं पुत्रमदितेर्यो विधर्ता ।
आध्रश्चिद् यं मन्यमानस्तुरश्चिद् राजा चिद् यं भगं भक्षीत्याह ॥ २ ॥

प्रातःऽजितम् । भगम् । उग्रम् । हुवेम । वयम् । पुत्रम् । अदितेः । यः । विऽधर्ता ।
आध्रः । चित् । यम् । मन्यमानः । तुरः । चित् । राजा । चित् । यम् । भगम् । भक्षि । इति । आह ॥२॥

वेङ्कट० प्रातर्जयिनम् भगम् उग्रम्[५] हुवेम वयम् पुत्रम् अदितेः, यः विधारयिता सर्वस्य। [६]आध्रः चित् यम् मन्यमानः[६] । आध्रः "आढ्यालुः" दरिद्रः (तु या १२, १४) सः[७] स्तुवन् भक्षि इति आह । तथा तुरः चित् तुरः प्रेरको धनस्य आढ्यः राजा चित् यम् भगम् अहं भजेयम् इति वदति ॥ २ ॥

भग प्रणेतर्भग सत्यराधो भगेमां धियमुदवा ददन्नः ।
भग प्र णो जनय गोभिरश्वैर्भग प्र नृभिर्नृवन्तः स्याम ॥ ३ ॥

१-१ नास्ति मूको. २ नास्ति मूको. ३ सोऽयं वि[१] अ[१]. ४ °सिद्ध वि[१] अ[१]. ५ °भी वयम् मूको. ६-६ आधुश्चि मन्यमान वि[१] अ[१], माधृश्चिमन्यक्यामत ए, माधृश्चिमु°यमा छभ. ७ मार्द अ[१], मार्य छभ. ८ भात छ छभ. ९. सर् अ[१], सन् छ छभ.

भग॑ । प्रने॑त॒रिति॒ प्रऽने॑तः । भग॑ । सत्य॑ऽराधः । भग॑ । इ॒माम् । धिय॑म् । उत् । अ॒व॒ । दद॑त् । नः॒ ।
भग॑ । प्र । नः॒ । ज॒न॒य॒ । गोभिः॑ । अश्वैः॑ । भग॑ । प्र । नृऽभिः॑ । नृ॒ऽवन्तः॑ । स्या॒म॒ ॥ ३ ॥

वेङ्कट० भग ! प्रणेतः ! स्तोतृणाम् भग ! सत्यधन ! भग ! इदं कर्म उत् अव रक्ष प्रयच्छन् धनम् अस्माकम् । भग ! प्र जनय अस्मान् गोभिः अश्वैः च । भग ! प्र भवेम नृभिः नृवन्तः[1] ॥ ३ ॥

उ॒तेदानीं॒ भग॑वन्तः स्यामो॒त प्र॑पि॒त्व उ॒त मध्ये॒ अह्ना॑म् ।
उ॒तोदि॑ता मघव॒न्त्सूर्य॑स्य व॒यं दे॒वानां॑ सुम॒तौ स्या॑म ॥ ४ ॥

उ॒त । इ॒दानी॑म् । भग॑ऽवन्तः । स्या॒म॒ । उ॒त । प्र॒ऽपि॒त्वे । उ॒त । मध्ये॑ । अह्ना॑म् ।
उ॒त । उ॒त्ऽइ॑ता । म॒घ॒ऽव॒न् । सूर्य॑स्य । व॒यम् । दे॒वाना॑म् । सु॒ऽम॒तौ । स्या॒म॒ ॥ ४ ॥

वेङ्कट० अपि च इदानीम् वयं भगेन देवेन युक्ताः स्याम, अपि च अह्नाम् प्रपित्वे प्रातौ प्रातः मध्ये च । अपि च उदये सूर्यस्य [2]मघवन् ! इन्द्र ![2] । भगस्यैव वा सम्बोधनम् । वयम् सर्वेषामेव देवानाम् सुमनसः स्याम ॥ ४ ॥

भग॑ ए॒व भग॑वाँ अस्तु देवा॒स्तेन॑ व॒यं भग॑वन्तः स्याम ।
तं त्वा॑ भग॒ सर्व॒ इज्जो॑हवीति॒ स नो॑ भग पुरए॒ता भ॑वे॒ह ॥ ५ ॥

भगः॑ । ए॒व । भग॑ऽवान् । अ॒स्तु॒ । दे॒वाः॒ । तेन॑ । व॒यम् । भग॑ऽवन्तः । स्या॒म॒ ।
तम् । त्वा॒ । भ॒ग॒ । सर्वः॑ । इत् । जो॒ह॒वी॒ति॒ । सः । नः॒ । भ॒ग॒ । पु॒रः॒ऽए॒ता । भ॒व॒ । इ॒ह ॥ ५ ॥

वेङ्कट० भगः एव देवोऽस्मदर्थं भाग्ययुक्तः भवतु प्रापयतु [3]अस्मान् भाग्यम्[3] हे देवाः ! । तेन वयम् भगवन्तः स्याम । तम् त्वा भग ! सर्वः एव आह्वयति[4] । सः नः भग ! पुरएता भव अत्र[5] ॥ ५ ॥

सम॑ध्व॒रायो॒षसो॑ नमन्त दधि॒क्रावे॑व॒ शुच॑ये प॒दाय॑ ।
अ॒र्वा॒ची॒नं व॑सु॒विदं॒ भगं॑ नो॒ रथ॑मि॒वाश्वा॑ वा॒जिन॒ आ व॑हन्तु ॥ ६ ॥

सम् । अ॒ध्व॒राय॑ । उ॒षसः॑ । न॒म॒न्त॒ । द॒धि॒क्रावा॑ऽइव । शुच॑ये । प॒दाय॑ ।
अ॒र्वा॒ची॒नम् । व॒सु॒ऽविद॑म् । भग॑म् । नः॒ । रथ॑म्ऽइव । अश्वाः॑ । वा॒जिनः॑ । आ । व॒ह॒न्तु॒ ॥ ६ ॥

वेङ्कट० सम् नमन्त यज्ञार्थम् उषसः अश्व इव प्रतिष्ठिताय युद्धदेशाय । अभिमुखं धनस्य लम्भयितारम् भगम् नः रथमिव अश्वाः वेगवन्तः आ [6]वहन्तु उषसः[6] ॥ ६ ॥

अश्वा॑वती॒र्गोम॑तीर्न उ॒षासो॑ वी॒रव॑तीः॒ सद॑मुच्छन्तु भ॒द्राः ।
घृ॒तं दुहा॑ना वि॒श्वतः॒ प्रपी॑ता यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥ ७ ॥

---

१. नृपते मूको. २-२. मघवन्तीन्द्र वि[1] अ[1]; मघवन्ति शिन्द्र ल लभ. ३-३. अस्माद् भाग्यं ल लभ; अस्मद्भाग्यं ल प्रमादः. ४. ष्यन्ति मूको. ५. अतः मूको. ६-६. "हरष" मूको.

अश्वऽवतीः । गोऽमतीः । नः । उषसः । वीरऽवतीः । सदम् । उच्छन्तु । भद्राः ।
घृतम् । दुहानाः । विश्वतः । प्रऽपीताः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥

वेङ्कट० अश्ववत्यः गोमत्यः अस्माकम् उषसः वीरवत्यश्च सदैव उच्छन्तु भजनीयाः[१] उदकम् दुहानाः विश्वतः एव पुष्टाः ॥ ७ ॥

[२]इति पञ्चमाष्टके चतुर्थाध्याये अष्टमो वर्गः[२] ॥

[४२]

[३]वसिष्ठो मैत्रावरुणिर्ऋषिः । विश्वे देवा देवता । त्रिष्टुप् छन्दः[३] ।

प्र ब्रह्माणो अङ्गिरसो नक्षन्त प्र क्रन्दनुर्नभन्यस्य वेतु ।
प्र धेनव उदप्रुतो नवन्त युज्यातामद्री अध्वरस्य पेशः ॥ १ ॥

प्र । ब्रह्माणः । अङ्गिरसः । नक्षन्त । प्र । क्रन्दनुः । नभन्यस्य । वेतु ।
प्र । धेनवः । उदऽप्रुतः । नवन्त । युज्याताम् । अद्री इति । अध्वरस्य । पेशः ॥ १ ॥

वेङ्कट० वैश्वदेवम् । प्र व्याप्नुवन्तु ब्राह्मणाः, अङ्गिरसः आगच्छन्तु । प्र कामयतां पर्जन्यः आगु-देशार्थम् । सङ्गच्छन्तां च उदप्रुतः धेनवः इति मेघान् आह । आयुज्यातां रथेऽश्वान् आगमार्थम्[३] आदतारौ[४] शत्रूणां वातपर्जन्यौ अध्वरस्य रूपभूतौ ॥ १ ॥

सुगस्ते अग्ने सनवित्तो अध्वा युक्ष्वा सुते हरितो रोहितश्च ।
ये वा सद्मन्नरुषा वीरवाहो हुवे देवानां जनिमानि सत्तः ॥ २ ॥

सुऽगः । ते । अग्ने । सनऽवित्तः । अध्वा । युक्ष्व । सुते । हरितः । रोहितः । च ।
ये । वा । सद्मन् । अरुषाः । वीरऽवाहः । हुवे । देवानाम् । जनिमानि । सत्तः ॥ २ ॥

वेङ्कट० शोभनगमनः[५] तव अग्ने । सम्भक्तधनः मार्गः । योजय सुते सोमे हरितः रोहितः च अश्वान्[६] । ये[७] वा तव सदने आरोचमानाः वीरस्य तव वोढारः तान् वा युङ्क्ष्व[८] । ह्वयामि[९] अहम् देवानाम् जनिमानि । देवानित्यर्थः । सत्तः निषण्णः ॥ २ ॥

सम्रु वो यज्ञं महयन् नमोभिः प्र होता मन्द्रो रिरिच उपाके ।
यजस्व सु पुर्वणीक देवाना यज्ञियामरमतिं ववृत्याः ॥ ३ ॥

---

१. सृज° वि[१]; सृज° अ[१] लभ. २-२. नास्ति मूको. ३. आगमना° ल प्रस्तावः. ४. आवर्ता° क वि[१]; आदत्ता° अ[१] लभ. ५. °मने मूको. ६. धान् मूको. ७. यद् मूको. ८. युद्य मूको. ९. भया° मूको.

सम् । ऊँ इति । वः । यज्ञम् । महयन् । नमःऽभिः । प्र । होता । मन्द्रः । रिरिचे । उपाके ।
यजस्व । सु । पुरुऽअनीक । देवान् । आ । यज्ञियाम् । अरमतिम् । ववृत्याः ॥ ३ ॥

वेङ्कट० सम् अपूजयन् युष्माकं हविः नमस्कारैः सह, प्र रिरिचे अत्यन्तमुज्ज्वलो[1] 'भवति अन्तिके[2] होता मोदनः इति अग्निमुक्त्वा तं प्रत्यक्षमाह — यजस्व सुष्ठु हे बहुज्वालानीक! देवान्, आ वर्तय च 'यज्ञार्हां सन्ततां ज्वालाम्[3] ॥ ३ ॥

यदा वीरस्य रेवतो दुरोणे स्योनशीरतिथिराचिकेतत् ।
सुप्रीतो अग्निः सुधितो दम आ स विशे दाति वार्यमियत्यै ॥ ४ ॥

यदा । वीरस्य । रेवतः । दुरोणे । स्योनऽशीः । अतिथिः । आऽचिकेतत् ।
सुऽप्रीतः । अग्निः । सुऽधितः । दमे । आ । सः । विशे । दाति । वार्यम् । इयत्यै ॥ ४ ॥

वेङ्कट० यदा वीरस्य धनवतः गृहे सुखशायी अतिथिः आभिमुख्येन स्तोत्रं बुध्यते । सुप्रीतः अग्निः सुनिहितः दमे स्वे आयतने, सः धीरो मनुष्यः विशे प्रयच्छति धनम् आत्मानमभिगच्छन्त्यै ॥ ४ ॥

इमं नो अग्ने अध्वरं जुषस्व मरुत्स्विन्द्रे यशसं कृधी नः ।
आ नक्ता बर्हिः सदतामुषासोशन्ता मित्रावरुणा यजेह ॥ ५ ॥

इमम् । नः । अग्ने । अध्वरम् । जुषस्व । मरुत्ऽसु । इन्द्रे । यशसम् । कृधि । नः ।
आ । नक्ता । बर्हिः । सदताम् । उषसा । उशन्ता । मित्रावरुणा । यज । इह ॥ ५ ॥

वेङ्कट० इमम् नः अग्ने । यज्ञं सेवस्व[4] । मरुत्सु इन्द्रे च अस्माकं यशस्विनं पुत्रं कुरु । [5]आ सीदताम्' नक्ता उषासा बर्हिः । कामयमानौ मित्रावरुणौ यज अत्र[5] ॥ ५ ॥

एवाग्निं सहस्यं१ वसिष्ठो रायस्कामो विश्वप्स्न्यस्य स्तौत् ।
इषं रयिं पप्रथद् वाजमस्मे यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

एव । अग्निम् । सहस्यम् । वसिष्ठः । रायःऽकामः । विश्वऽप्स्न्यस्य । स्तौत् ।
इषम् । रयिम् । पप्रथत् । वाजम् । अस्मे इति । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥

वेङ्कट० एवम् अग्निम् सबलम्[7] वसिष्ठः धनकामः विश्वप्स्न्यस्य राज्ञः अस्तौत् । सोऽग्निः अन्नं धनं बलं च अस्मासु प्रथयतु ॥ ६ ॥

[8]इति पञ्चमाष्टके चतुर्थाध्याये नवमो वर्गः[8] ॥

---

१. °ज्वले मूको. २-२. भवदन्तिके ल अस्तावः. ३-३. यज्ञार्हं सन्ततज्वालम् मूको. ४. °यस्व वि[२] अ[१]. ५-५. असिताता वि[२] अ[१]; असीदाताम् ल अभ. ६. भरतम् मूको. ७. सदुपर्क वि[१] अ[१] ल; सदकुशलं अभ. ८-८. नास्ति मूको.

[४३]

[1]वसिष्ठो मैत्रावरुणिर्ऋषिः । विश्वे देवा देवता । त्रिष्टुप् छन्दः[1] ।

प्र वो यज्ञेषु देवयन्तो अर्चन् द्यावा नमोभिः पृथिवी इषध्यै ।
येषां ब्रह्माण्यसमानि विप्रा विष्वग्वियन्ति वनिनो न शाखाः ॥ १ ॥

प्र । वः । यज्ञेषु । देवऽयन्तः । अर्चन् । द्यावा । नमःऽभिः । पृथिवी इति । इषध्यै ।
येषाम् । ब्रह्माणि । असमानि । विप्राः । विष्वक् । विऽयन्ति । वनिनः । न । शाखाः ॥१ ॥

वेङ्कट० प्र अर्चन् युष्मान् हे देवाः ! यज्ञेषु देवकामा विप्राः, द्यावापृथिव्यौ च नमस्कारैः इषध्यै याचितुम् अन्नम् । येषाम् विप्राणाम् स्तोत्राणि असमानि विष्वक् विविधं गच्छन्ति वृक्षस्य इव शाखाः ॥ १ ॥

प्र यज्ञ एतु हेत्वो न सप्तिरुद्यच्छध्वं समनसो घृताचीः ।
स्तृणीत बर्हिरध्वराय साधूर्ध्वा शोचींषि देवयून्यस्थुः ॥ २ ॥

प्र । यज्ञः । एतु । हेत्वः । न । सप्तिः । उत् । यच्छध्वम् । सऽमनसः । घृताचीः ।
स्तृणीत । बर्हिः । अध्वराय । साधु । ऊर्ध्वा । शोचींषि । देवऽयूनि । अस्थुः ॥ २ ॥

वेङ्कट० प्र एतु यज्ञः गमनकुशलः इव[2] अश्वः[3] । उत् यच्छध्वम् समनस्काः सन्तः स्रुचः[4] । स्तृणीत बर्हिः यज्ञार्थं कल्याणम् । उत्तिष्ठन्तु[5] देवकामानि शोचींषि, ज्वलन्त[6] इत्यर्थः ॥ २ ॥

आ पुत्रासो न मातरं विभृत्राः सानौ देवासो बर्हिषः सदन्तु ।
आ विश्वाची विदथ्यामनक्त्वग्ने मा नो देवताता मृधस्कः ॥ ३ ॥

आ । पुत्रासः । न । मातरम् । विऽभृत्राः । सानौ । देवासः । बर्हिषः । सदन्तु ।
आ । विश्वाची । विदथ्याम् । अनक्तु । अग्ने । मा । नः । देवऽताता । मृधः । करिति कः ॥३॥

वेङ्कट० आ सीदन्तु मातरम्[7] इव विशेषेण भरणीया बाला पुत्रा बर्हिषः समुच्छ्रिते देशे देवाः । आभिमुख्येन अनक्तु विश्वाचा नौ यज्ञे वर्तमाना तव ज्वालाम् । जुहूरेव वा विश्वाची । अग्ने ![8] अस्माकम् यज्ञे मा कार्षीः हिंसाम् ॥ ३ ॥

ते सीषपन्त जोषमा यजत्रा ऋतस्य धाराः सुदुघा दुहानाः ।
ज्येष्ठं वो अद्य मह आ वसूनामा गन्तन समनसो यति ष्ठ ॥ ४ ॥

ते । सीषपन्त । जोषम् । आ । यजत्राः । ऋतस्य । धाराः । सुऽदुघाः । दुहानाः ।
ज्येष्ठम् । वः । अद्य । महः । आ । वसूनाम् । आ । गन्तन । सऽमनसः । यति । स्थ ॥ ४ ॥

---

१ १. नास्ति मूको. २ नास्ति ए वि° ३. भवथ मूको. ४. दृव मूको. ५. °न्त वि° क, °न्तु कम. ६. अप दर्शं नय मूको. ७. °तर मूको ८. मत्रे मूको

वेङ्कट० ते आ स्पृशन्तु प्रीतिं यदस्या उदकस्य धारा सुदोहा दुहाना । प्रशस्ततमम् अद्य युष्माकम् सख्याय महत्वम् अस्मान् आ गच्छन्तु । हे देवा[1] आ गच्छत समानमनस्का यावन्त भवथ ॥ ४ ॥

एवा नो॑ अग्ने वि॒क्ष्वा द॑शस्य॒ त्वया॑ व॒यं स॑हसाव॒न्नास्क्राः॑ ।
रा॒या यु॒जा स॑ध॒मादो॒ अरि॑ष्टा यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥ ५ ॥

एव । नः॒ । अ॒ग्ने॒ । वि॒क्षु । आ । द॒श॒स्य॒ । त्वया॑ । व॒यम् । स॒ह॒सा॒ऽव॒न् । आस्क्राः॑ ।
रा॒या । यु॒जा । स॒ध॒ऽमादः॑ । अरि॑ष्टाः । यू॒यम् । पा॒त॒ । स्व॒स्तिऽभिः॑ । सदा॑ । नः॒ ॥ ५ ॥

वेङ्कट० एवम् अस्मभ्यम् अग्ने ! प्रजासु आभिमुख्येन देहि । त्वया वयम् बलवन्[1] आस्कन्दितार धनेन सहायेन सह मादन्त अहिंसिता ॥ ५ ॥

[1]इति पञ्चमाष्टके चतुर्थाध्याये दशमो वर्गः[1] ॥

[४४]

[1]वसिष्ठो मैत्रावरुणिर्ऋषिः । दधिक्रा देवता, प्रथमाया दधिक्राश्व्युषोऽग्निभगेन्द्रविष्णुपूष ब्रह्मणस्पत्यादित्यद्यावापृथिव्याप । त्रिष्टुप् छन्द , आद्या जगती[1] ।

द॒धि॒क्रां वः॑ प्रथ॒मम॒श्विनो॒षस॑म॒ग्निं समि॑द्धं॒ भग॑मू॒तये॑ हुवे ।
इन्द्रं॒ विष्णुं॑ पू॒षणं॒ ब्रह्म॑ण॒स्पति॑मादि॒त्यान् द्यावा॑पृथि॒वी अ॒पः स्वः॑ ॥ १ ॥

द॒धि॒ऽक्राम् । वः॒ । प्र॒थ॒मम् । अ॒श्विना॑ । उ॒षस॑म् । अ॒ग्निम् । सम्ऽइ॑द्धम् । भग॑म् । ऊ॒तये॑ । हु॒वे॒ ।
इन्द्र॑म् । विष्णु॑म् । पू॒षण॑म् । ब्रह्म॑णः । पति॑म् । आ॒दि॒त्यान् । द्यावा॑पृथि॒वी इति॑ । अ॒पः । स्वः॑रिति॑ स्वः॑ ॥ १ ॥

वेङ्कट० एता देवता युष्माकम् रक्षणाय प्रथमम् ह्वयामि । त्रींश्च लोकान् आदित्यान्[2] च ॥ १ ॥

द॒धि॒क्रामु॒ नम॑सा बो॒धय॑न्त उ॒दीरा॑णा य॒ज्ञमु॑पप्र॒यन्तः॑ ।
इळां॑ दे॒वीं ब॒र्हिषि॑ सा॒दय॑न्तो॒ऽश्विना॒ विप्रा॑ सु॒हवा॑ हुवेम ॥ २ ॥

द॒धि॒ऽक्राम् । ऊँ इति॑ । नम॑सा । बो॒धय॑न्तः । उ॒त्ऽईरा॑णाः । य॒ज्ञम् । उ॒प॒ऽप्र॒यन्तः॑ ।
इळा॑म् । दे॒वीम् । ब॒र्हिषि॑ । सा॒दय॑न्तः । अ॒श्विना॑ । विप्रा॑ । सु॒ऽहवा॑ । हु॒वे॒म॒ ॥ २ ॥

वेङ्कट० दधिक्राम् एव हविषा बोधयन्त उद्यच्छन्त यज्ञम् उपप्रयन्त इळाम् देवीम् हवि बर्हिषि सादयन्त अश्विनौ मधाविनौ स्वाह्वानौ हुवेम । दाधिक्र सूक्त साहचर्यादन्येषां स्तुति ॥ २ ॥

द॒धि॒क्रावा॑णं बुबु॒धा॒नो अ॒ग्निमुप॑ ब्रुव उ॒षसं॒ सूर्यं॒ गाम् ।
ब्र॒ध्नं मं॑श्च॒तोर्वरु॑णस्य ब॒भ्रुं ते विश्वा॒स्मद् दु॑रि॒ता या॑वयन्तु ॥ ३ ॥

१-१ नास्ति मूको २. °त्यम् मूको.

दुधिऽक्राव्णम् । बुबुधानः । अग्निम् । उपं । ब्रुवे । उषसम् । सूर्यम् । गाम् ।
ब्रध्नम् । मंश्चतोः । वरुणस्य । बभ्रुम् । ते । विश्वा । अस्मत् । दुःऽइता । यवयन्तु ॥ ३ ॥

वेङ्कट० बुबुधानः अश्वम्[1] उप ब्रुवे अग्निम् उषसम् सूर्यम् गाम् च । मंश्चतुरित्यश्वनाम, मन्यमानानभिगच्छतीति[2], इह[3] तु वरुणविशेषणम् । मंश्चतोः वरुणस्य महान्तम् बभ्रुम् अश्वम् । ते सर्वे विश्वानि अस्मत्तो दुरितानि पृथक् कुर्वन्तु ॥ ३ ॥

दुधिक्रावा प्रथमो वाज्यर्वाग्रे रथानां भवति प्रजानन् ।
संविदान उषसा सूर्येणादित्येभिर्वसुभिराङ्गिरोभिः ॥ ४ ॥

दुधिऽक्रावा । प्रथमः । वाजी । अर्वा । अग्रे । रथानाम् । भवति । प्रऽजानन् ।
सम्ऽविदानः । उषसा । सूर्येण । आदित्येभिः । वसुऽभिः । अङ्गिरःऽभिः ॥ ४ ॥

वेङ्कट० दधिक्रावा प्रथमः बलवान् गन्ता रथानाम् अग्रे भवति गन्तव्यं देशम् प्रजानन् उषःप्रभृतिभिः संविदानः ऐकमत्यं गतः ॥ ४ ॥

आ नो दधिक्राः पथ्यामनक्त्वृतस्य पन्थामन्वेतवा उ ।
शृणोतु नो दैव्यं शर्धो अग्निः शृण्वन्तु विश्वे महिषा अमूराः ॥ ५ ॥

आ । नः । दुधिऽक्राः । पथ्याम् । अनक्तु । ऋतस्य । पन्थाम् । अनुऽएतवै । ऊँ इति ।
शृणोतु । नः । दैव्यम् । शर्धः । अग्निः । शृण्वन्तु । विश्वे । महिषाः । अमूराः ॥ ५ ॥

वेङ्कट० आभिमुख्येन अनक्तु अस्माकम् दधिक्राः पन्थानम् उदकेन, यज्ञस्य पन्थानम् अविच्छेदेनानुष्ठातुम् । शृणोतु अस्मान् दैव्यम् बलम् अग्निः । शृण्वन्तु विश्वे महान्तः अमूढा देवाः अस्मानिति ॥ ५ ॥

'इति पञ्चमाष्टके चतुर्थोऽध्याये एकादशो वर्गः' ॥

[४५]

'वसिष्ठो मैत्रावरुणिर्ऋषिः । सविता देवता । त्रिष्टुप् छन्दः' ।

आ देवो यातु सविता सुरत्नोऽन्तरिक्षप्रा वहमानो अश्वैः ।
हस्ते दधानो नर्या पुरूणि निवेशयञ्च प्रसुवञ्च भूम ॥ १ ॥

आ । देवः । यातु । सविता । सुऽरत्नः । अन्तरिक्षऽप्राः । वहमानः । अश्वैः ।
हस्ते । दधानः । नर्या । पुरूणि । निऽवेशयन् । च । प्रऽसुवन् । च । भूम ॥ १ ॥

वेङ्कट० आ यातु देवः सविता[4] शोभनरत्नः अन्तरिक्षस्य पूरयिता अश्वैः उह्यमानः हस्ते प्रयच्छन् धारयन् वा बहूनि धनानि रात्रौ निवेशयन् प्रातः प्रसुवन् च भूतजातम् ॥ १ ॥

---

१. अग्निम् मूको. २. 'मानाभनभि' मूको. ३. इ मूको. [illegible] नास्ति मूको. ५. 'ता रथेन अ°.

उदस्य बाहू शिथिरा बृहन्ता हिरण्यया दिवो अन्ताँ अनष्टाम् ।
नूनं सो अस्य महिमा पनिष्ट सूरश्चिदस्मा अनु दादपस्याम् ॥ २ ॥

उत् । अस्य । बाहू इति । शिथिरा । बृहन्ता । हिरण्ययां । दिवः । अन्तान् । अनष्टाम् ।
नूनम् । सः । अस्य । महिमा । पनिष्ट । सूरः । चित् । अस्मै । अनु । दात् । अपस्याम् ॥२॥

वेङ्कट० उत् व्यायुतः[1] अस्य बाहू शिथिलौ प्रेर्यमाणौ महान्तौ हिरण्मयौ दिवः पर्यन्तान्[2]। नूनम् सः अस्य महिमा स्तूयते सवितुः यत् सूर्योऽपि अस्मै सवित्रे अनु ददाति अपस्याम् कर्मेच्छाम्, उपबृंहयतीत्यर्थः । सविता कर्माणि लौकिकानि चिकीर्षति, साहाय्यं सूर्यः करोति ॥ २ ॥

स घा नो देवः सविता सहावा साविषद् वसुपतिर्वसूनि ।
विश्रयमाणो अमतिमुरूचीं मर्तभोजनमध रासते नः ॥ ३ ॥

सः । घ । नः । देवः । सविता । सहऽवा । आ । साविषत् । वसुऽपतिः । वसूनि ।
विऽश्रयमाणः । अमतिम् । उरूचीम् । मर्तऽभोजनम् । अध । रासते । नः ॥ ३ ॥

वेङ्कट० सः खलु अस्मभ्यम् देवः सविता सहनवान् आभिमुख्येन सुवतु वसुपतिः वसूनि । विविधं श्रयमाणः रूपम् बह्वञ्चनम् मनुष्यभोजनमन्नम् इदानीं प्रयच्छतु अस्मभ्यम् ॥ ३ ॥

इमा गिरः सवितारं सुजिह्वं पूर्णगभस्तिमीळते सुपाणिम् ।
चित्रं वयो बृहदस्मे दधातु यूयं पात स्वस्तिभिः सदा नः ॥ ४ ॥

इमाः । गिरः । सवितारम् । सुऽजिह्वम् । पूर्णऽगभस्तिम् । ईळते । सुऽपाणिम् ।
चित्रम् । वयः । बृहत् । अस्मे इति । दधातु । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ४ ॥

वेङ्कट० इमाः गिरः सवितारम् शोभनवाचम् धनपूर्णबाहुम्[3] स्तुवन्ति शोभनपाणिम् । सचित्रम् अन्नम् बृहत् अस्मासु दधातु ॥ ४ ॥

[4]इति पञ्चमाष्टके चतुर्थाध्याये द्वादशो वर्गः[4]।

[४६]

[5]वसिष्ठो मैत्रावरुणिर्ऋषिः । रुद्रो देवता । जगती छन्दः, चतुर्थी त्रिष्टुप्[5]।

इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधाव्ने ।
अषाळ्हाय सहमानाय वेधसे तिग्मायुधाय भरता शृणोतु नः ॥ १ ॥

---

१. °युवतः मूको. २. °न्ताभिना वि°; °न्ताभिनाश्री अ°; °न्तानि ह लभ. ३. °र्णबाहुः मूको.
४-४. नास्ति मूको.

इमा । रुद्राय । स्थिरऽधन्वने । गिरः । क्षिप्रऽइषवे । देवाय । स्वधाऽव्ने ।
अषाळ्हाय । सहमानाय । वेधसे । तिग्मऽआयुधाय । भरत । शृणोतु । नः ॥ १ ॥[1]

वेङ्कट० इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय अन्नवते शत्रुभिरसोढाय तत्सहमानाय विधात्रे तिग्मधनुष्काय भरत [2]हे मनुष्याः[2] । स [3] शृणोतु अस्मानिति ॥ १ ॥

स हि क्षयेण क्षम्यस्य जन्मनः साम्राज्येन दिव्यस्य चेतति ।
अवन्नवन्तीरुप नो दुरश्चराऽनमीवो रुद्र जासु नो भव ॥ २ ॥

सः । हि । क्षयेण । क्षम्यस्य । जन्मनः । साम्ऽराज्येन । दिव्यस्य । चेतति ।
अवन् । अवन्तीः । उप । नः । दुरः । चर । अनमीवः । रुद्र । जासु । नः । भव ॥ २ ॥

वेङ्कट० स हि क्षयेण निवासत्वेन पार्थिवस्य भूतजातस्य ज्ञायते, साम्राज्येन च दिवि भवस्य देवगणस्य चेति । अथ प्रत्यक्ष —रक्षन्[4] चास्माकं [4]रक्षन्ती दुरः उप चर अमीवारहितः[4] रुद्र! प्रजासु भव अस्माकम् ॥ २ ॥

या ते दिद्युदवसृष्टा दिवस्परि क्ष्मया चरति परि सा वृणक्तु नः ।
सहस्रं ते स्वपिवात भेषजा मा नस्तोकेषु तनयेषु रीरिषः ॥ ३ ॥[1]

या । ते । दिद्युत् । अवऽसृष्टा । दिवः । परि । क्ष्मया । चरति । परि । सा । वृणक्तु । नः ।
सहस्रम् । ते । सुऽअपिवात । भेषजा । मा । नः । तोकेषु । तनयेषु । रिरिषः ॥ ३ ॥

वेङ्कट० यत् ते[5] आयुधम् रश्यावसृष्टम् अन्तरिक्षाद् पृथिवीं रक्षीकृत्य चरति, तत् परि वर्जयतु अस्मान् । 'सहस्रम् ते स्वाप्तवचन ।[6] भैषज्यानि' इति यास्क[7] (१०,७) । मा अस्माकं पुत्रेषु पौत्रेषु च हिंसीः[8] ॥ ३ ॥

मा नो वधी रुद्र मा परा दा मा ते भूम प्रसितौ हीळितस्य ।
आ नो भज बर्हिषि जीवशंसे यूयं पात स्वस्तिभिः सदा नः ॥ ४ ॥

मा । नः । वधीः । रुद्र । मा । परा । दाः । मा । ते । भूम । प्रऽसितौ । हीळितस्य ।
आ । नः । भज । बर्हिषि । जीवऽशंसे । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ४ ॥

वेङ्कट० मा अस्मान् वधीः रुद्र! । मा च शत्रुभ्यः परा दाः । मा ते भूम बन्धने क्रुद्धस्य । 'प्रसितिः 'प्रसयनात् तन्तुर्वा जालं वा' (या ६,१२) इत्युक्तम् । [10]आ भज[10] प्रापय अस्मान्[11] यज्ञे जीवानां शंसनीये ॥ ४ ॥

[12]इति पञ्चमाष्टके चतुर्थाध्याये त्रयोदशो वर्गः[12] ॥

1. ऋचाविमे (१,३) यथाक्रमं यास्केन व्याख्याते (१०,६,७). २-२ °ध्याः वि[1]. ३. रक्ष मूको. ४-४. रक्षन् दुरः उप अमिवारहितो वि[1] अ[1], रक्ष दुरः उप अमिवारहितौ व[1], रक्ष दुरः उप अमिवहितो लभ. ५ तव अ[1]. ६. °वन अ[1] व लभ. ७ रास्को वि[1], रास्को व लभ, रास्को अ[1]. ८. हिंसि मूको. ९ प्रसवाकृतिर्वा जाल अ[1]; प्रसयनात् कांि या जाल वि[1], प्रसयनात् तन्तिर्वा जाल व, प्रमयनतन्तिर्वा जाल लभ. १०-१०. आइभ्या मूको ११ अरिमन वि[1] व लभ १२-१२. नास्ति मूको.

[४७]

[1]वसिष्ठो मैत्रावरुणिर्ऋषिः । आपो देवता । त्रिष्टुप् छन्दः[1] ।

आपो यं वः प्रथमं देवयन्त इन्द्रपानमूर्मिमकृण्वतेळः ।
तं वो वयं शुचिमरिप्रमद्य घृतप्रुषं मधुमन्तं वनेम ॥ १ ॥

आपः । यम् । वः । प्रथमम् । देवऽयन्तः । इन्द्रऽपानम् । ऊर्मिम् । अकृण्वत । इळः ।
तम् । वः । वयम् । शुचिम् । अरिप्रम् । अद्य । घृतऽप्रुषम् । मधुऽमन्तम् । वनेम ॥ १ ॥

वेङ्कट० हे आपः ! यम् युष्माकम् प्रथमम् यजमानाः इन्द्रस्य पानम् ऊर्मिम् अकृण्वत स्तोतार इति वसतीवर्यभिप्रायम् । तम् वः वयम् शुचिम् अपापम् अद्य घृतस्य स्रावकम् मधुमन्तम् भजेम ॥ १ ॥

तमूर्मिमापो मधुमत्तमं वोऽपां नपादवत्वाशुहेमा ।
यस्मिन्निन्द्रो वसुभिर्मादयाते तमश्याम देवयन्तो वो अद्य ॥ २ ॥

तम् । ऊर्मिम् । आपः । मधुमत्ऽतमम् । वः । अपाम् । नपात् । अवतु । आशुऽहेमा ।
यस्मिन् । इन्द्रः । वसुऽभिः । मादयाते । तम् । अश्याम । देवऽयन्तः । वः । अद्य ॥ २ ॥

वेङ्कट० तम् ऊर्मिम् हे आपः ! मधुमत्तमम् युष्माकम् अपाम् नपात् देवो रक्षतु आशुगमनः । यस्मिन् इन्द्रः वसुभिः देवैः सह मादयति, तम् युष्माकम् ऊर्मिम् अद्य वयम् अश्याम देवकामाः ॥ २ ॥

शतपवित्राः स्वधया मदन्तीर्देवीर्देवानामपि यन्ति पाथः ।
ता इन्द्रस्य न मिनन्ति व्रतानि सिन्धुभ्यो हव्यं घृतवज्जुहोत ॥ ३ ॥

[2]शतऽपवित्राः । स्वधया । मदन्तीः ।[2] देवीः । देवानाम् । अपि । यन्ति । पाथः ।
ताः । इन्द्रस्य । न । मिनन्ति । व्रतानि । सिन्धुऽभ्यः । हव्यम् । घृतऽवत् । जुहोत ॥ ३ ॥

वेङ्कट० अनेकपवनसाधनाः[3] स्वधया मनुष्यान् तर्पयन्त्यः देव्यः देवानाम् अभिगच्छन्ति स्थानम् । ताः इन्द्रस्य न हिंसन्ति कर्माणि । ताभ्यः सिन्धुभ्यः हव्यम् घृतवत् जुहुत[4] ॥ ३ ॥

याः सूर्यो रश्मिभिराततान याभ्य इन्द्रो अरदद् गातुमूर्मिम् ।
ते सिन्धवो वरिवो धातना नो यूयं पात स्वस्तिभिः सदा नः ॥ ४ ॥

याः । सूर्यः । रश्मिऽभिः । आऽततान । याभ्यः । इन्द्रः । अरदत् । गातुम् । ऊर्मिम् ।
ते । सिन्धवः । वरिवः । धातन । नः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ४ ॥

१-१ नास्ति मूको. २-२. या (५,६) द्र. ३. °नेकभवन° मूको. ४. जुहोत वि°

वेङ्कट० याः सूर्यः रश्मिभिः अन्तरिक्षे विस्तारयति । याभ्यः च इन्द्रः न्यक्षिणत्[1] गमनशीलम् ऊर्मिम् । गमनकामः[1] मार्गं चकारेत्यर्थः । 'इन्द्रो अस्माँ[1] अरदद्वज्रबाहुः'[2] (ऋ ३,३३,६) इति मन्त्रः । ते[3] यूयम् हे सिन्धवः! धनम् अस्मभ्यं धत्त । सिन्धुसामानाधिकरण्यात्[4] तच्छन्दस्य लिङ्गभेदः ॥ ४ ॥

[5]इति पञ्चमाष्टके चतुर्थाध्याये चतुर्दशो वर्गः[5] ॥

[४८]

[6]वसिष्ठो मैत्रावरुणिर्ऋषिः । ऋभवो देवता, चतुर्थ्या विश्वे देवा वा । त्रिष्टुप् छन्दः[6] ।

ऋभुक्षणो वाजा मादयध्वमस्मे नरो मघवानः सुतस्य ।
आ वोऽर्वाचः क्रतवो न यातां विभ्वो रथं नर्यं वर्तयन्तु ॥ १ ॥

ऋभुक्षणः । वाजाः । मादयध्वम् । अस्मे इति । नरः । मघऽवानः । सुतस्य ।
आ । वः । अर्वाचः । क्रतवः । न । याताम् । विऽभ्वः । रथम् । नर्यम् । वर्तयन्तु ॥ १ ॥

वेङ्कट० हे ऋभवः! वाजाः! इति ज्येष्ठकनिष्ठाभ्यां व्यपदेशः, मादयध्वम् अस्मासु हे नरः! मघवन्तः! सोमेन । गच्छतां युष्माकम् अभिलोमुखाः[7] अश्वाः रथम् आ वर्तयन्तु सहितम्, यथा मनुष्याणां कर्माणि भवतां रथम् आवर्तयन्ति[8] हे महान्तः! ॥ १ ॥

ऋभुर्ऋभुभिरभि वः स्याम विभ्वो विभुभिः शवसा शवांसि ।
वाजो अस्माँ अवतु वाजसाताविन्द्रेण युजा तरुषेम वृत्रम् ॥ २ ॥

ऋभुः । ऋभुऽभिः । अभि । वः । स्याम । विऽभ्वः । विभुऽभिः । शवसा । शवांसि ।
वाजः । अस्मान् । अवतु । वाजऽसातौ । [9]इन्द्रेण । युजा । तरुषेम । वृत्रम्[9] ॥ २ ॥

वेङ्कट० ऋभुभिः युष्माभिः [10]वयमपि ऋभवः[10] शत्रून् अभि भवेम । तृतीयायामपि 'बहुवचनस्य वस्नसौ' (पा ८,१,२१) इति दृष्टम् । ऋभुरिति जसः स्वादेशः । तथा विभुभिः भवद्भिर्वयं च विभ्वः महान्तः बलेन बलानि अभिभवेम । [11]"वाजः कनीयान्"[11] युष्माकम् अस्मान् सङ्ग्रामे रक्षतु । तेषां सहायभूतेन इन्द्रेण तरेम शत्रुम् ॥ २ ॥

ते चिद्धि पूर्वीरभि सन्ति शासा विश्वाँ अर्य उपरताति वन्वन् ।
इन्द्रो विभ्वाँ ऋभुक्षा वाजो अर्यः शत्रोर्मिथत्या कृणवन् वि नृम्णम् ॥ ३ ॥

ते । चित् । हि । पूर्वीः । अभि । सन्ति । शासा । विश्वान् । अर्यः । उपरऽताति । वन्वन् ।
इन्द्रः । विऽभ्वा । ऋभुक्षाः । वाजः । अर्यः । शत्रोः । मिथत्या । कृणवन् । वि । नृम्णम् ॥३॥

---

1. विलि° मूको. 2. गमनकामार्गं अ° ल लक; गमनिकामार्गं वि°. 3. अस्माकम् वि° अ° ल; अस्मान् लक. 3-4. ते हे यूयं सि° वि° अ°. 5. °समाना° ल. 6-6. नास्ति मूको. 7. अभिलो° मूको. 8. °यति मूको. 9-9. द्र. था (५,२). 10-10. वयभिभवः वि°; वयमप्यृभवः ल लक; वयमृभवः ल मस्तावः. 11-11 ... वि° अ°. वाजो वाजनीयान ल. वाजनीया लक.

वेङ्कट० ते हि खलु यद्वी सेना अभि भवन्ति [1]शासेन असिना[1]। अपि च सर्वानेव अरीन् उपरताति घ्नन्ति। स्वार्थिकस्तातिल् प्रत्यय। मूलत एव घ्नन्तीति। इन्द्र विभ्वा मध्यम[2] ऋभुक्षा[3] च ज्येष्ठ कनीयान् वाज च ईश्वर दातो धनम् वि कृण्वन्तु। मिथत्या इति [4]निपातो मिथ पर्याय[4]। सङ्गता इति ॥ ३ ॥

नू दे॒वासो॒ वरि॑वः कर्तना नो भू॒त नो॒ विश्वेऽव॑से स॒जोषा॑ः ।
सम॒स्मे इ॒षं वस॑वो ददीरन् यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः ॥ ४ ॥

नु । दे॒वा॒स॒ । वरि॑व । क॒र्त॒न । न॒ । भू॒त । न॒ । विश्वे॑ । अव॑से । स॒ऽजोषा॑ ।
सम् । अ॒स्मे इति॑ । इ॒षम् । वस॑व । द॒दी॒र॒न् । यू॒यम् । पा॒त । स्व॒स्तिऽभि॑ । सदा॑ । न॒ ॥ ४ ॥

वेङ्कट० क्षिप्र हे[1] देवा[1] धन कुरुत अस्मभ्यम्। भवत च सर्वे अस्माक रक्षणाय सङ्गता। [2]सम् ददीरन्[2] सम्प्रयच्छन्तु अस्मभ्यम् अन्नम् वसव देवा ॥ ४ ॥

[3]इति पञ्चमाष्टके चतुर्थोऽध्याये पञ्चदशो वर्ग[3] ॥

[४९]

[4]वसिष्ठो मैत्रावरुणिर्ऋषि । आपो देवता । त्रिष्टुप् छन्द[4]।

स॒मु॒द्रज्ये॑ष्ठाः सलि॒लस्य॒ मध्या॑त् पुना॒ना य॒न्त्यनि॑विशमानाः ।
इन्द्रो॒ या व॒ज्री वृ॑ष॒भो र॒राद॒ ता आपो॑ दे॒वीरि॒ह माम॑वन्तु ॥ १ ॥

स॒मु॒द्रऽज्ये॑ष्ठा । स॒लि॒लस्य॑ । मध्या॑त् । पु॒ना॒ना । य॒न्ति॒ । अनि॑ऽविशमाना ।
इन्द्र॑ । या । व॒ज्री । वृ॒ष॒भ । र॒राद॑ । ता । आप॑ । दे॒वी । इ॒ह । माम् । अ॒व॒न्तु॒ ॥ १ ॥

वेङ्कट० समुद्रप्रथमा अन्तरिक्षस्य मध्यात् शोधयन्त्य[8] गच्छन्ति[9] अनिविशमाना[10]। इन्द्र या आप[11] वज्री वर्षिता व्यलिखद् वज्रेण भित्वा निरगमयत्, ता आप देवी इह माम् रक्षन्तु ॥ १ ॥

या आपो॑ दि॒व्या उ॒त वा॒ स्रव॑न्ति ख॒नित्रि॑मा उ॒त वा॒ याः स्व॑यं॒जाः ।
स॒मु॒द्रार्था॒ याः शुच॑यः पाव॒कास्ता आपो॑ दे॒वीरि॒ह माम॑वन्तु ॥ २ ॥

या । आप॑ । दि॒व्या । उ॒त । वा । स्रव॑न्ति । ख॒नित्रि॑मा । उ॒त । वा॒ । या । स्व॒यम्ऽजा ।
स॒मु॒द्रऽअ॑र्था । या । शुच॑य । पा॒व॒का । ता । आप॑ । दे॒वी । इ॒ह । माम् । अ॒व॒न्तु॒ ॥ २ ॥

१-१ शोभनासीना वि[१], शासेनासीना ल अ[१] रुज, शासेनापि ल प्रहताव, २ ॰ध्यमा मूको
३. ॰क्षा मूको ४-४. निपातोमिथाप ॰ मूको ५ त्रुटितम् वि[२], भे अ[१] ल रुभ. ६-६ सङ्गरी॰ मूको
७-७. नास्ति मूको ८. शोदयन्त्यौ अ[१] रुभ, शोदयन्त्य वि[२] ल ९ गच्छन्त्य वि[२], गच्छन्त अ[१].
१० विशमा॰ वि[१] अ[१] ११ आप वि[२] ल रुभ,

वेङ्कट० या आप अन्तरिक्ष्या[1], याश्च तत्र स्रवन्ति, खनित्रिमा कूप्या[2], उत वा या स्वयजाता[3] निम्नेषु देशेषु। समुद्रो गन्तव्यो यासां ता[4] समुद्रार्था नाद्येया ज्वलन्त्य[5] शोधयित्र्य ॥ २ ॥

यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम् ।
मधुश्चुतः शुचयो याः पावकास्ता आपो देवीरिह मामवन्तु ॥ ३ ॥

यासाम् । राजा । वरुण । याति । मध्ये । सत्यानृते इति । अवऽपश्यन् । जनानाम् ।
मधुऽश्चुत । शुचय । या । पावका । ता । आप । देवी । इह । माम् । अवन्तु ॥ ३ ॥

वेङ्कट० निगदसिद्धा ॥ ३ ॥

यासु राजा वरुणो यासु सोमो विश्वे देवा यासूर्जं मदन्ति ।
वैश्वानरो यास्वग्निः प्रविष्टस्ता आपो देवीरिह मामवन्तु ॥ ४ ॥

यासु । राजा । वरुण । यासु । सोम । विश्वे । देवा । यासु । ऊर्जम् । मदन्ति ।
वैश्वानर । यासु । अग्नि । प्रऽविष्ट । ता । आप । देवी । इह । माम् । अवन्तु ॥ ४ ॥

वेङ्कट० यासु राजा वरुण यासु च सोम विश्वे एव च देवा। [6]स्थिता यासु ऊर्जम्[6] प्रति माद्यन्ति। वैश्वानर यासु अग्नि प्रविष्ट ॥ ४ ॥

[7]इति पञ्चमाष्टके चतुर्थाध्याये षोडशो वर्ग[7] ॥

[५०]

[7]वसिष्ठो मैत्रावरुणिर्ऋषि । मित्रावरुणौ देवता, द्वितीयस्या अग्नि, तृतीयस्या विश्वे देवा, चतुर्थ्या नद्य । जगती छन्द, चतुर्थी अतिजगती शक्वरी वा[7]।

आ मां मित्रावरुणेह रक्षतं कुलाययद्विश्वयन्मा न आ गन् ।
अजकावं दुर्दृशीकं तिरो दधे मा मां पद्येन रपसा विदत्त्सरुः ॥ १ ॥

आ । माम् । मित्रावरुणा । इह । रक्षतम् । कुलाययत् । विऽश्वयत् । मा । न । आ । गन् ।
अजकाऽवम् । दुःऽदृशीकम् । तिर । दधे । मा । माम् । पद्येन । रपसा । विदत् । त्सरु ॥ १ ॥

वेङ्कट० आभिमुख्येन माम् इह हे मित्रावरुणौ[8] रक्षतम्[9]। कुलाय[10] [11]कुर्वन् विविध[11] वर्धमान विविध वा भयमाण[12] भूतम्[13] मा अस्मान् आ गच्छत्विति अभिप्रायम्। [14]क्षा हि भूम्या कुलाय[14] करोति। अजकावम् अजशब्दयुक्त दुर्दर्शन[15] तिर भवतु। मा माम् पदभवेन[16] छद्मना जानातु छद्मगतिश्चेति ॥ १ ॥

---

१ आन्त° वि[2]. २ कुप्या वि[2] ल, भाप्या कम. ३ यास्तु अयज्ञाज्ञाता ल छश, या स्वयंजाता वि[1] अ[1]. ४ नास्ति मूको. ५ नाद्येयो मूको ६-६. स्थितामूर्जे वि[2] अ[1], ता यासु ऊर्जम् क, ता यासु उर्जम् लश ७-७. नास्ति मूको. ८ °रुणे मूको ९ रक्षितम् मूको १० कुलाय मूको ११-११ कुर्वस्थिर वि[2], कुर्वस्थिर अ[1] १२. भय° मूको १३. विषम् इति सायण १४-१४ क्षांभि भूम्यां कुलाना मूको, क्षाभि भू° वा क्षापि भू° वा ल प्रस्ताव. १५ दर्शयन् मूको १६. भवने मूको

यद् विजामन् परुषि वन्दनं भुवदष्ठीवन्तौ परि कुल्फौ च देहत् ।
अग्निष्टच्छोचन्नप बाधतामितो मा मां पद्येन रपसा विदत् त्सरुः ॥ २ ॥

यत् । विऽजामन् । परुषि । वन्दनम् । भुवत् । अष्ठीवन्तौ । परि । कुल्फौ । च । देहत् ।
अग्निः । तत् । शोचन् । अप । बाधताम् । इतः । मा । माम् । पद्येन । रपसा । विदत् । त्सरुः ॥ २ ॥

वेङ्कट० यद् विविधजन्मनि सन्धौ भवति वन्दननामकं[1] विषमविषम्, अष्ठीवन्तौ गुल्फौ च परितः उपचितं करोति, अग्निः तत् विषं ज्वलन् अप बाधताम् इतः ॥ २ ॥

यच्छल्मलौ भवति यन्नदीषु यदोषधीभ्यः परि जायते विषम् ।
विश्वे देवा निरितस्तत् सुवन्तु मा मां पद्येन रपसा विदत् त्सरुः ॥ ३ ॥

यत् । शल्मलौ । भवति । यत् । नदीषु । यत् । ओषधीभ्यः । परि । जायते । विषम् ।
विश्वे । देवाः । निः । इतः । तत् । सुवन्तु । मा । माम् । पद्येन । रपसा । विदत् । त्सरुः ॥ ३ ॥

वेङ्कट० निगदसिद्धा ॥ ३ ॥

याः प्रवतो निवत उद्वत उदन्वतीरनुदकाश्च याः ।
ता अस्मभ्यं पयसा पिन्वमानाः शिवा देवीरशिपदा भवन्तु सर्वा नद्यो अशिमिदा भवन्तु ॥ ४ ॥

याः । प्रऽवतः । निऽवतः । उत्ऽवतः । उदन्ऽवतीः । अनुदकाः । च । याः । ताः । अस्मभ्यम् ।
पयसा । पिन्वमानाः । शिवाः । देवीः । अशिपदाः । भवन्तु । सर्वाः । नद्यः । अशिमिदाः । भवन्तु ॥ ४ ॥

वेङ्कट० या नद्यः विशालवत्सु विस्तृतेन देशेन गच्छन्त्यः, याश्च निवतः, याश्च उद्वतः, याश्च उदन्वत्यः, अनुदकाः च याः, ताः[2] अस्मभ्यम् पयसा[3] वर्धमानाः शिवाः देव्यः अशिपदाः अन्नस्य स्थानभूताः भवन्तु, ताः सर्वाः नद्यः अशिमिदाः अन्नस्य वर्धयित्र्यः भवन्तु ॥ ४ ॥

[4]इति पञ्चमाष्टके चतुर्थाध्याये सप्तदशो वर्गः[5] ॥

[५१]

[4]वसिष्ठो मैत्रावरुणिर्ऋषिः । आदित्या देवता । त्रिष्टुप् छन्दः[5] ।

आदित्यानामवसा नूतनेन सक्षीमहि शर्मणा शंतमेन ।
अनागास्त्वे अदितित्वे तुरास इमं यज्ञं दधतु श्रोषमाणाः ॥ १ ॥

आदित्यानाम् । अवसा । नूतनेन । सक्षीमहि । शर्मणा । शम्ऽतमेन ।
अनागाःऽत्वे । अदितिऽत्वे । तुरासः । इमम् । यज्ञम् । दधतु । श्रोषमाणाः ॥ १ ॥

---

१ "नं नाम" मूको. २. नास्ति वि'. ३ वयसा मूको. ४-५ नास्ति मूको.

वेङ्कट० आदित्यानाम् रक्षणेन नवतरेण[1] सक्ता भवेम [2]सुखे च[2] [3]सुखतमे अपि। अपापत्वे[3] अखण्डत्वे च क्षिप्राः इमम् यज्ञम् स्थापयन्तु यज्ञम् अपापम् अखण्डितं च कुर्वन्तु स्तुतीः शृण्वन्तः ॥ १ ॥

आदित्यासो अदितिर्मादयन्तां मित्रो अर्यमा वरुणो रजिष्ठाः ।
अस्माकं सन्तु भुवनस्य गोपाः पिबन्तु सोममवसे नो अद्य ॥ २ ॥

आदित्यासः । अदितिः । मादयन्ताम् । मित्रः । अर्यमा । वरुणः । रजिष्ठाः ।
अस्माकम् । सन्तु । भुवनस्य । गोपाः । पिबन्तु । सोमम् । अवसे । नः । अद्य ॥ २ ॥

वेङ्कट० आदित्याः अदितिः च माता माद्यन्तु[4] मित्र अर्यमा च वरुणः च अत्यन्तमृजवः । अस्माकम् भवन्तु भुवनस्य[5] गोपायितारः[6] । पिबन्तु सोमम् रक्षणाय अस्माकम् अद्य ॥ २ ॥

आदित्या विश्वे मरुतश्च विश्वे देवाश्च विश्व ऋभवश्च विश्वे ।
इन्द्रो अग्निरश्विना तुष्टुवाना यूयं पात स्वस्तिभिः सदा नः ॥ ३ ॥

आदित्याः । विश्वे । मरुतः । च । विश्वे । देवाः । च । विश्वे । ऋभवः । च । विश्वे ।
इन्द्रः । अग्निः । अश्विना । तुस्तुवानाः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ३ ॥

वेङ्कट० एते सर्वे स्तूयमाना भवन्त्वस्माभिरिति ॥ ३ ॥

[7]इति पञ्चमाष्टके चतुर्थोऽध्याये अष्टादशो वर्गः[7] ॥

[५२]

[8]वसिष्ठो मैत्रावरुणिर्ऋषिः । आदित्या देवता । त्रिष्टुप् छन्दः[8] ।

आदित्यासो अदितयः स्याम पूर्देवत्रा वसवो मर्त्यत्रा ।
सनेम मित्रावरुणा सनन्तो भवेम द्यावापृथिवी भवन्तः ॥ १ ॥

आदित्यासः । अदितयः । स्याम । पूः । देवऽत्रा । वसवः । मर्त्यऽत्रा ।
सनेम । मित्रावरुणा । सनन्तः । भवेम । द्यावापृथिवी इति । भवन्तः ॥ १ ॥

वेङ्कट० आदित्यानां 'स्वभूतायमवा' अखण्डनीया' भवेम । हे वसव ! अस्माकं देवेषु मर्त्येषु च निवासस्थानं भवतु । हे मित्रावरुणौ! भजेमहि धनम् भजमानाः अप्युपर्युपरि यथा भवेम, द्यावापृथिवी ! भवन्तः अप्युपर्युपरि प्रजाभिः पशुभिरन्यैश्चाभिवर्धिताः ॥ १ ॥

मित्रस्तन्नो वरुणो मामहन्त शर्म तोकाय तनयाय गोपाः ।
मा वो भुजेमान्यजातमेनो मा तत् कर्म वसवो यच्चयध्वे ॥ २ ॥

1. नवतित° मूको. 2-2. सुखेन क प्रलापः. 3-3. °मेऽन्तवतः° वि° अ°; भवत° क एव.
4. नास्ति वि° अ°, मु क एव. 5 भवनस्य अ° क. 6. गोपति° क. 7-7. नास्ति मूको.
8-8. °तावचर मण्डली° मूको.

मित्रः । तत् । नः । वरुणः । ममहन्त । शर्म । तोकाय । तनयाय । गोपाः ।
मा । वः । भुजेम । अन्यऽजातम् । एनः । मा । तत् । कर्म । वसवः । यत् । चयध्वे ॥ २ ॥

वेङ्कट० मित्रः तत् अस्मभ्यम् वरुणः अन्ये च आदित्याः प्रयच्छन्तु सुखं पुत्राय पौत्राय च गोपा- यितारः[1] । युष्माकम् अन्येषु 'जातम् एनः'[2] यद् यूयम् अन्येषु जनयथ तद् वयम् मा भुजेम । भोगः[3] प्राप्तिः । मा च तत् कुर्मः वसवः !, यत् यूयम् चयध्वे हृदये स्थापयत ॥ २ ॥

तुरण्यवोऽङ्गिरसो नक्षन्त रत्नं देवस्य सवितुरियानाः ।
पिता च तन्नो महान् यजत्रो विश्वे देवाः समनसो जुषन्त ॥ ३ ॥

तुरण्यवः । अङ्गिरसः । नक्षन्त । रत्नम् । देवस्य । सवितुः । इयानाः ।
पिता । च । तत् । नः । महान् । यजत्रः । विश्वे । देवाः । सऽमनसः । जुषन्त ॥ ३ ॥

वेङ्कट० त्वरमाणाः अङ्गिरसः प्राप्नुवन् रत्नम् देवस्य सवितुः याचमानाः । पिता च तत् अस्माकं वरुणः महान् यष्टव्यः विश्वे च देवाः सङ्गताः प्रायच्छन्, 'अङ्गिरसः आदित्यान् अयाजयन्[4], तेभ्य आदित्या दक्षिणामनयन्[5] (तु. माश ३,५,१,१७;१८; ऐब्रा ६,३५ प्रभृ.) । तामङ्गिरोभ्यः[6] सविता प्रायच्छत्' । तदिदमत्रोक्तमिति ॥३॥

[7]इति पञ्चमाष्टके चतुर्थाध्याये एकोनविंशो वर्गः[7] ॥

[५३]

[7]वसिष्ठो मैत्रावरुणिर्ऋषिः । द्यावापृथिवी देवता । त्रिष्टुप् छन्दः[7] ।

प्र द्यावा यज्ञैः पृथिवी नमोभिः सबाध ईळे बृहती यजत्रे ।
ते चिद्धि पूर्वे कवयो गृणन्तः पुरो मही दधिरे देवपुत्रे ॥ १ ॥

प्र । द्यावा । यज्ञैः । पृथिवी इति । नमःऽभिः । सऽबाधः । ईळे । बृहती इति । यजत्रे इति ।
ते इति । चित् । हि । पूर्वे । कवयः । गृणन्तः । पुरः । मही इति । दधिरे । देवपुत्रे इति देवऽपुत्रे ॥

वेङ्कट० प्रकर्षेण स्तौमि द्यावापृथिव्यौ यज्ञैः नमस्कारैश्च बाधया[8] सहितः महत्यौ[9] यष्टव्ये । ते[10] चित् हि पूर्वे कवयः गृणन्तः पुरः दधिरे महत्यौ ययोर्देवाः पुत्राः ॥ १ ॥

प्र पूर्वजे पितरा नव्यसीभिर्गीर्भिः कृणुध्वं सदने ऋतस्य ।
आ नो द्यावापृथिवी दैव्येन जनेन यातं महि वां वरूथम् ॥ २ ॥

---

१. गोप° लक्ष. २-२. जायमानां वि[1]; जायमाना अ[1]; जातं एनः ल लक्ष. ३. भोगं मूको.
४. अजायग मूको. ५. °णामानयन् माश. ६. °ङ्गिरोयः मूको. ७-७. नास्ति मूको. ८. बाधाय मूको.
९. नास्ति वि[1]. १०. ति मूको.

प्र । पूर्वजे इति पूर्वऽजे । पितरा । नव्यसीभिः । गीःऽभिः । कृणुध्वम् । सदने इति । ऋतस्य ।
आ । नः । द्यावापृथिवी इति । दैव्येन । जनेन । यातम् । महि । वाम् । वरूथम् ॥ २ ॥

वेङ्कट० प्र कृणुध्वम् पूर्वजे[1] पितरौ[2] नवतराभिः स्तुतिभिः यज्ञस्य आधारभूते । आ यातम् अस्मान् हे द्यावापृथिव्यौ! दैव्येन जनेन सह । महद्धि युवयोः वरणीयं धनम् ॥ २ ॥

उतो हि वां रत्नधेयानि सन्ति पुरूणि द्यावापृथिवी सुदासे ।
अस्मे धत्तं यदसदस्कृधोयु यूयं पात स्वस्तिभिः सदा नः ॥ ३ ॥

उतो इति । हि । वाम् । रत्नऽधेयानि । सन्ति । पुरूणि । द्यावापृथिवी इति । सुऽदासे ।
अस्मे इति । धत्तम् । यत् । असत् । अस्कृधोयु । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥३॥

वेङ्कट० अपि च युवयोः धनदानानि[3] विद्यन्ते बहूनि हे द्यावापृथिव्यौ! सुदासे पैजवनाय राज्ञे[4] । अस्मभ्यं च धत्तम् तत्, यत् [5]अनल्पं भवेत्[5] ॥ ३ ॥

[6]इति पञ्चमाष्टके चतुर्थाध्याये विंशो वर्गः[6] ॥

[५४]

[6]वसिष्ठो मैत्रावरुणिर्ऋषिः । वास्तोष्पतिर्देवता । त्रिष्टुप् छन्दः[6] ।

वास्तोष्पते प्रति जानीह्यस्मान्त्स्वावेशो अनमीवो भवा नः ।
यत् त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे ॥ १ ॥

वास्तोः । पते । प्रति । जानीहि । अस्मान् । सुऽआवेशः । अनमीवः । भव । नः ।
यत् । त्वा । ईमहे । प्रति । तत् । नः । जुषस्व । शम् । नः । भव । द्विऽपदे । शम् । चतुःऽपदे ॥

वेङ्कट० 'हे वास्तोः पते![7] यत् त्वां याचामहे तत् अस्मभ्यं प्रयच्छ[7] । शङ्करः भव अस्माकम् द्विपदे चतुष्पदे च ॥ १ ॥

वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो ।
अजरासस्ते सख्ये स्याम पितेव पुत्रान् प्रति नो जुषस्व ॥ २ ॥

वास्तोः । पते । प्रऽतरणः । नः । एधि । गयऽस्फानः । गोभिः । अश्वेभिः । इन्दो इति ।
अजरासः । ते । सख्ये । स्याम । पिताऽइव । पुत्रान् । प्रति । नः । जुषस्व ॥ २ ॥

---

१. °जे या वि' भां ह; °जे ⋯ हस. २. पित्रो मूको. ३. °दानादि मूको. ४. राज्ञो ह वि
५-५. नास्ति मूको. ६-६. ⋯ मूको. ७. प्रतिद° वि' भां.

वेङ्कट० वास्तो पते! प्रणेता[1] भव अस्माकं गृहाणां वर्धयिता गोभिः अश्वैश्च इन्दो! । अजरासः[2] इति स्पष्टम् ॥ २ ॥

वास्तो॑ष्पते श॒ग्मया॑ सं॒सदा॑ ते सक्षी॒महि॑ र॒ण्वया॑ गातु॒मत्या॑ ।
पा॒हि क्षेम॑ उ॒त योगे॒ वरं॑ नो यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥ ३ ॥

वास्तो॑ । प॒ते॒ । श॒ग्मया॑ । स॒म्ऽसदा॑ । ते॒ । स॒क्षी॒महि॑ । र॒ण्वया॑ । गा॒तु॒ऽमत्या॑ ।
पा॒हि । क्षेमे॑ । उ॒त । योगे॑ । वर॑म् । नः॒ । यू॒यम् । पा॒त॒ । स्व॒स्तिऽभिः॑ । सदा॑ । नः॒ ॥ ३ ॥

वेङ्कट० वास्तो पते! सुखकरेण 'तव उपसदनेन[3] रमणीयेन गतिमता सक्ता भवेम। रक्ष अस्मान् योगक्षेमयोः कल्याणम् ॥ ३ ॥

[4]इति पञ्चमाष्टके चतुर्थाध्याये एकविंशो वर्गः[4] ॥

[५५]

[5]वसिष्ठो मैत्रावरुणिर्ऋषिः । प्रथमाया वास्तोष्पतिर्देवता, शिष्टानामिन्द्रः । आद्याया गायत्री छन्दः, द्वितीयादिचतुर्थ्यन्ता उपरिष्टाद् बृहत्यः, पञ्चम्याद्यष्टम्यन्ता अनुष्टुभः[5] ।

अ॒मी॒व॒हा वा॑स्तोष्पते॒ विश्वा॑ रू॒पाण्या॑वि॒शन् । सखा॑ सु॒शेव॑ एधि नः ॥ १ ॥

अ॒मी॒व॒ऽहा । वा॒स्तो॒ । प॒ते॒ । विश्वा॑ । रू॒पाणि॑ । आ॒ऽवि॒शन् । सखा॑ । सु॒ऽशेवः॑ । ए॒धि॒ । नः॒ ॥ १ ॥

वेङ्कट० रक्षोहा वास्तो पते! विश्वानि रूपाणि आविशन् सखा सुसुखः भव अस्माकम् ॥ १ ॥

यद॑र्जुन सारमेय द॒तः पि॑शङ्ग॒ यच्छ॑से ।
वी॑व भ्राजन्त ऋ॒ष्टय॒ उप॒ स्रक्वे॑षु॒ बप्स॑तो॒ नि षु स्व॑प ॥ २ ॥

यत् । अ॒र्जु॒न॒ । सा॒र॒मे॒य॒ । द॒तः । पि॒श॒ङ्ग॒ । यच्छ॑से ।
विऽइ॑व । भ्रा॒ज॒न्ते॒ । ऋ॒ष्टयः॑ । उप॑ । स्रक्वे॑षु । बप्स॑तः । नि । सु । स्व॒प॒ ॥ २ ॥

वेङ्कट० यदा त्वम् अर्जुनवर्ण[6] सारमेय! पिशङ्गवर्ण[6] दन्तान् यच्छसि विवृतान् करोषि, तदानीं वि भ्राजन्ते इव 'तत्र ऋष्टयः[6] ऋष्टिसदृशाः[7] भवन्ति दन्ताः सृक्कयोः उप बप्सतः लेलिहानस्य । स त्वं सुष्ठु नि स्वापय ।

शौनक — वरुणस्य गृहान् रात्रौ वसिष्ठः[8] 'स्वप्न आचरत्[9]'।
प्रविवेशाथ तं[10] तत्र श्वा [11]नदन् अभ्यधावत[11] ॥

---

१ प्रणेता अ[1] एथ. २ ईश्वराच मूको ३. तव उवस[3] मूको ४-४. नास्ति मूको. ५. यास्केन व्याख्याता (१०,१७) ६-६ तत्र ऋष्टय ए एथ, सम्र य वि[2] अ[1]. ७. ऋष्टि[3] वि[2] अ[1]. ८ वसिष्ठ मूको ९-९ स्वप्नमाचरत् मूको १०. तान् वि[2] अ, ता ए एथ ११-११ नेदतम्यधावत मूको

क्रन्दन्तं सारमेयं तं धावन्तं दंष्ट्रमुद्यतम्[1] ।
'यदर्जुने(न[2] इ)ति च द्वाभ्यां [3]सान्त्वयित्वा न्यषूषुपत्[3] ॥
[4]स तं प्रस्वापयामास[4] जनमन्यं च वारुणम् ।
ततस्तु वरुणो राजा [5]स्वैः पाशैः प्रत्यबध्यत[5] ॥
[6]बद्धः स वारुणैः पाशैर् 'ध्रुवासु त्वे(त्वा[†] इ)ति दृश्यते[6] ।
स बद्धः[7] पितरं सूक्तैश्चतुर्भिरथ वारुणैः ॥
अभितुष्टाव 'धीरे(रा[8] इ)ति मुमोचैनं ततः पिता'
(बृदे ६, ११-१५) । इति ॥ २ ॥

स्तेनं राय सारमेय तस्करं वा पुनःसर ।
स्तोतॄनिन्द्रस्य रायसि किमस्मान् दुच्छुनायसे नि षु स्वप ॥ ३ ॥

स्तेनम् । राय । सारमेय । तस्करम् । वा । पुनःऽसर ।
स्तोतॄन् । इन्द्रस्य । रायसि । किम् । अस्मान् । दुच्छुनऽयसे । नि । सु । स्वप ॥ ३ ॥

वेङ्कट० स्तेनम् प्रति सम्भष[9] सारमेय! तस्करम् वा । पुनः तत् प्रति [10]सरतीति पुनःसर[10] । [11]तस्कर-स्तेनयोरल्पो[11] भेदः । स्तोतॄन् इन्द्रस्य अस्मान् भषसि[12] । तदयुक्तमिति वदति—किम् अस्मान् बाधसे ॥ ३ ॥

त्वं सूकरस्य दर्दृहि तव दर्दर्तु सूकरः ।
स्तोतॄनिन्द्रस्य रायसि किमस्मान् दुच्छुनायसे नि षु स्वप ॥ ४ ॥

त्वम् । सूकरस्य । दर्दृहि । तव । दर्दर्तु । सूकरः ।
स्तोतॄन् । इन्द्रस्य । रायसि । किम् । अस्मान् । दुच्छुनऽयसे । नि । सु । स्वप ॥ ४ ॥

वेङ्कट० जहि सूकरम् । त्वाम् सूकरः हन्तु । स्तोतॄन् इन्द्रस्य अर्दितकान् तव किम् अस्मान् बाधसे इति ॥ ४ ॥

सस्तु माता सस्तु पिता सस्तु श्वा सस्तु विश्पतिः ।
ससन्तु सर्वे ज्ञातयः सस्त्वयमभितो जनः ॥ ५ ॥

सस्तु । माता । सस्तु । पिता । सस्तु । श्वा । सस्तु । विश्पतिः ।
ससन्तु । सर्वे । ज्ञातयः । सस्तु । अयम् । अभितः । जनः ॥ ५ ॥

वेङ्कट० सर्वो जनः स्वपित्विति यथाकाममात्मनः प्रवेशार्थं प्रस्वापयति ॥ ५ ॥

---

१. दंष्ट्रा° मूको. २. ऋ ७,५५,२-३. ३-३. स च पीत्वा न्यद्रवद् मूको. ४-४. एवं प्रस्वाप° मूको. ५-५. स्वैर् पाशान् प्रत्यबुध्यत मूको. ६-६. नास्ति बृदे. † ऋ ७,८८,७. ७. बुध्वा मूको. ८. ऋ ७,८९-८९. ९. नास्ति वि॰ अ॰. १०-१०. प्रति सर मूको. ११-११. स्तेन° वि॰; तस्तेन° अ॰; तस्करस्तेन° ख्य. १२. भासि वि॰ अ॰.

य आस्ते यश्च चरति यश्च पश्यति नो जनः ।
तेषां सं हन्मो अक्षाणि यथेदं हर्म्यं तथा ॥ ६ ॥

यः । आस्ते । यः । च । चरति । यः । च । पश्यति । नः । जनः ।
तेषाम् । सम् । हन्मः । अक्षाणि । यथा । इदम् । हर्म्यम् । तथा ॥ ६ ॥

वेङ्कट० तेषाम्[1] सर्वेषाम् अक्षाणि सम् हन्मः । संहननं[2] सर्वेषां हिंसनं दण्डादिना मथनम् । तथा कृते यथा इदम् हर्म्यम् 'अविचलत् तिष्ठति' तथा[3] सर्वः जनः अविचलन्तिष्ठतु[4] सुप्तः ॥ ६ ॥

सहस्रशृङ्गो वृषभो यः समुद्रादुदाचरत् ।
तेना सहस्येना वयं नि जनान्त्स्वापयामसि ॥ ७ ॥

सहस्रऽशृङ्गः । वृषभः । यः । समुद्रात् । उत्ऽआचरत् ।
तेन । सहस्येन । वयम् । नि । जनान् । स्वापयामसि ॥ ७ ॥

वेङ्कट० सहस्रतेजाः वर्षिता यः अयम् समुद्रात् उत्तिष्ठति तेन अभिभवनकुशलेन नि स्वापयामः वयम् इमान् जनान्[5] इति ॥ ७ ॥

प्रोष्ठेशया वह्येशया नारीर्यास्तल्पशीवरीः ।
स्त्रियो याः पुण्यगन्धास्ताः सर्वाः स्वापयामसि ॥ ८ ॥

प्रोष्ठेऽशयाः । वह्येऽशयाः । नारीः । याः । तल्पऽशीवरीः ।
स्त्रियः । याः । पुण्यऽगन्धाः । ताः । सर्वाः । स्वापयामसि ॥ ८ ॥

वेङ्कट० खट्वाशयाः वह्येशयाः[6] । वह्यं शिबिकादि । याः च नार्यः तल्पशायिन्यः, स्त्रियः याः च पुण्यगन्धाः, ताः सर्वाः प्रस्वापयामः ॥ ८ ॥

[7]इति पञ्चमाष्टके चतुर्थोध्याये द्वाविंशो वर्गः[7] ॥

[५६]

[8]वसिष्ठो मैत्रावरुणिर्ऋषिः । मरुतो देवता । त्रिष्टुप् छन्द, आद्या एकादश द्विपदा विराजः[8] ।

क ईं व्यक्ता नरः सनीळा रुद्रस्य मर्या अधा स्वश्वाः ॥ १ ॥

के । ईम् । विऽअक्ताः । नरः । सऽनीळाः । रुद्रस्य । मर्याः । अध । सुऽअश्वाः ॥ १ ॥

वेङ्कट० के इमे व्यक्ताः भवन्ति मनुष्याः सरथाः, रुद्रस्य पुत्राः अपि च स्वश्वाः इति मरुतो दृष्ट्वा विस्मितो वदति ॥ १ ॥

---

१. एषां वि[2] अ[1]; येषां लभ. २. सहन° ल लभ. ३-३. अपिचलत्तिष्ठतु इति वि[1] अ[1]. ४. यथा वि[1] अ[1]. ५. नर्लीस्ता° वि[2] अ[1]. ६. नास्ति अ[1] वि[2]. ७. नास्ति वि[2]. ८-८. नास्ति मूको.

नकिर्ह्येषां जनूंषि वेद ते अङ्ग विद्रे मिथो जनित्रम् ॥ २ ॥

नकिः । हि । एषाम् । जनूंषि । वेद । ते । अङ्ग । विद्रे । मिथः । जनित्रम् ॥ २ ॥

वेङ्कट० न कश्चिद् हि एषाम् जन्मानि वेत्ति । ते एव परस्परस्य जन्मभूमी जानन्ति ॥ २ ॥

अभि स्वपूभिर्मिथो वपन्त वातस्वनसः श्येना अस्पृध्रन् ॥ ३ ॥

अभि । स्वऽपूभिः । मिथः । वपन्त । वातऽस्वनसः । श्येनाः । अस्पृध्रन् ॥ ३ ॥

वेङ्कट० स्वभूतैरुदकैः परस्परं सर्वे एव पृथिव्याम् अभिवपनं[1] कुर्वन्ति 'वपन्ति उदकानि'[2]। निर्गच्छत्स्वनाः[3] गमनशीलाः स्पर्धन्ते निविडा भवन्ति ॥ ३ ॥

एतानि धीरो निण्या चिकेत पृश्निर्यदूधो मही जभार ॥ ४ ॥

एतानि । धीरः । निण्या । चिकेत । पृश्निः । यत् । ऊधः । मही । जभार ॥ ४ ॥

वेङ्कट० एतानि भूतानि प्राज्ञः[4] अन्तर्हितानि जानाति[5], पृश्निः महती यानि आत्मीये ऊधसि जभार[6]। 'पृश्नियै वै पयसो मरुतो जाताः' (तै २,२,११,४) इति ब्राह्मणम् ॥ ४ ॥

सा विट् सुवीरा मरुद्भिरस्तु सनात् सहन्ती पुष्यन्ती नृम्णम् ॥ ५ ॥

सा । विट् । सुऽवीरा । मरुत्ऽभिः । अस्तु । सनात् । सहन्ती । पुष्यन्ती । नृम्णम् ॥ ५ ॥

वेङ्कट० सा विट् सुमनाः मरुद्भिः भवतु चिरम् अभिभवन्ती[7] शत्रून् पुष्यन्ती[8] च[9] धनम्। याऽपि[10] वैतानि[11] निण्यानि[12] वेदेति ॥ ५ ॥

यामं येष्ठाः शुभा शोभिष्ठाः श्रिया संमिश्ला ओजोभिरुग्राः ॥ ६ ॥

यामम् । येष्ठाः । शुभा । शोभिष्ठाः । श्रिया । सम्ऽमिश्लाः । ओजःऽभिः । उग्राः ॥ ६ ॥

वेङ्कट० नियातव्यम् अत्यन्तं यान्तः उदकेन अत्यन्तं शोभितारः अलङ्कारैर्वा शोभमानाः[13] श्रिया सङ्गताः[14] बलैः उद्गूर्णाः ॥ ६ ॥

उग्रं व ओजः स्थिरा शवांस्यधा मरुद्भिर्गणस्तुविष्मान् ॥ ७ ॥

---

1. °भिवपन° मूको. 2 २. वपन्ति उदकान् वि॰ ल लभ, वपन्ति उदकान् भ॰. 3. °स्वनाः° मूको. 4. प्राज्ञो मूको. 5. °नन्ति ल हलभ भ॰, जानन्ती वि॰. 6. जहार मूको. 7. °भवन्तु वि॰ ल हलभ; °भवन्ति भ॰. 8. °ष्यन्ति मूको. 9. चेद् मूको. 10. यापि मूको. 11. वेतानि वि॰ ल, वेतान भ॰ हलभ. 12. निश्यानि वि॰, निष्पानि ल हलभ. 13. °मयान मूको. 14. °हृतेः° वि॰ भ॰.

उग्रम् । वः । ओजः । स्थिरा । शवांसि । अधं । मरुत्ऽभिः । गुणः । तुविष्मान् ॥ ७ ॥

वेङ्कट० उग्रम् युष्माकम् ओजः । स्थिराणि च बलानि । अपि च सोऽयम् मरुद्भिः आरब्ध[1] सह[2] वृद्धिमान् ॥ ७ ॥

शुभ्रो वः शुष्मः क्रुध्मी मनांसि धुनिर्मुनिरिव शर्धस्य धृष्णोः ॥ ८ ॥

शुभ्रः । वः । शुष्मः । क्रुध्मी । मनांसि । धुनिः । मुनिःऽइव । शर्धस्य । धृष्णोः ॥ ८ ॥

वेङ्कट० शोभनदीप्तः युष्माकम् शुष्मः क्रोधनशीलानि मनांसि[3] । कम्पयिता मरुद्गणः, मुनिः इव वेगस्य शारीरस्य[4], धृष्णोः[5] धृषस्य स्थावरादेः । यथा मुनिरुत्थितः वेगमुन्मूलयति तद्वद् वृक्षादीनिति ॥ ८ ॥

सनेम्यस्मद् युयोत दिद्युं मा वो दुर्मतिरिह प्रणङ् नः ॥ ९ ॥

सनेमि । अस्मत् । युयोत । दिद्युम् । मा । वः । दुःऽमतिः । इह । प्रणक् । नः ॥ ९ ॥

वेङ्कट० पुराणं भवताम् आयुधम् अस्मत्तः पृथक् कुरुत । मा च युष्माकम् दुर्मतिः इह अस्मान् प्रणक्[6] ॥ ९ ॥

प्रिया वो नाम हुवे तुराणामा यत् तृपन्मरुतो वावशानाः ॥ १० ॥

प्रिया । वः । नाम । हुवे । तुराणाम् । आ । यत् । तृपत् । मरुतः । वावशानाः ॥ १० ॥

वेङ्कट० त्वरमाणानां युष्माकं [7]प्रियम् नाम[7] ह्वयामि हे मरुतः ! यत् नाम[8] कामयमानाः प्रजाः आभिमुख्येन तर्पयति ॥ १० ॥

[9]इति पञ्चमाष्टके चतुर्थाध्याये त्रयोविंशो वर्गः[9] ॥

स्वायुधासं इष्मिणः सुनिष्का उत स्वयं तन्वः शुम्भमानाः ॥ ११ ॥

सुऽआयुधासः । इष्मिणः । सुऽनिष्काः । उत । स्वयम् । तन्वः । शुम्भमानाः ॥ ११ ॥

वेङ्कट० स्वायुधाः एषणशीलाः शोभनाभरणाः[10], अपि च स्वयम् एव अङ्गानि शोभमानाः[11] भवन्ति मरुत आभरणैः ॥ ११ ॥

शुची वो हव्या मरुतः शुचीनां शुचिं हिनोम्यध्वरं शुचिभ्यः ।

ऋतेन सत्यमृतसाप आयञ्छुचिजन्मानः शुचयः पावकाः ॥ १२ ॥

---

१. नास्ति वि[2] अ[1], °रब्ध लः लभ, °रब्ध वि[1] अ २. सह्वा वि[2] अ[1], सह्वा वा लः लभ ३. मनांसि मनांसि लः वि[2]. ४. शरी° वि[2] अ[1] ५. नास्ति वि[2] अ[1] ६. प्रणक्तु वि[1], °णकु अ[1] लभ °णक्तु लः लभ ७-७. प्रियमाणा वि[1] अ, प्रियमाणाम् लः लभ ८. नामान वि[1] अ[1], मान लः लभ ९-९. नास्ति मूको. १०. °नहर° वि[1], °भरण° अ[1] लः लभ. ११. शोभना मूको.

शुची । वः । हव्या । मरुतः । शुचीनाम् । शुचिम् । हिनोमि । अध्वरम् । शुचिऽभ्यः ।
ऋतेन । सत्यम् । ऋतऽसापः । आयन् । शुचिऽजन्मानः । शुचयः । पावकाः ॥ १२ ॥

वेङ्कट० शुचीनि युष्माकं हव्यानि हे मरुतः ! । शुचीनाम् शुचिम् प्रेरयामि यज्ञम्[1] शुचिभ्यः भवद्भ्यः । सत्येनैव शस्तम् सत्यस्पृशः मरुतः आयन् शुचिजन्मानः शुचयः शोधकाः ॥ १२ ॥

अंसे॑ष्वा मरुतः खादयो॑ वो वक्षः॑सु रुक्मा उप॑शिश्रियाणाः ।
वि वि॒द्युतो॒ न वृष्टि॒भी रु॑चाना अनु॑ स्वधामायु॑धैर्यच्छ॑मानाः ॥ १३ ॥

अंसे॑षु । आ । मरुतः । खादयः॑ । वः । वक्षः॑ऽसु । रुक्माः । उप॑ऽशिश्रियाणाः ।
वि । विऽद्युतः॑ । न । वृष्टिऽभिः॑ । रुचानाः । अनु॑ । स्वधाम् । आयु॑धैः । यच्छ॑मानाः ॥ १३॥

वेङ्कट० हे मरुतः ! युष्माकम् अंसेषु खादयः भवन्ति । वक्षस्सु च रुक्माः उपश्रीयमाणाः भवन्ति । विद्युत इव वृष्टिभिः वि रोचमानाः मरुतो भवन्त्यलङ्कृताः । ते स्वधाम् उदकम् आयुधैः अनु नियच्छन्ति ॥ १३ ॥

प्र बु॒ध्न्या॑ व ईरते॒ महां॑सि॒ प्र नामा॑नि प्रयज्यवस्तिरध्वम् ।
स॒ह॒स्रियं॒ दम्यं॑ भा॒गमे॒तं गृ॑हमे॒धीयं॑ मरुतो जुषध्वम् ॥ १४ ॥

प्र । बुध्न्या॑ । वः । ईरते॒ । महां॑सि । प्र । नामा॑नि । प्रऽयज्यवः । तिरध्वम् ।
सहस्रिय॑म् । दम्य॑म् । भागम् । एतम् । गृहऽमेधीय॑म् । मरुतः । जुषध्वम् ॥ १४ ॥

वेङ्कट० प्रेरयन्ति अन्तरिक्षभवानि भवतां बलानि । ते यूयं हे प्रकर्षेण यष्टव्याः ! उदकानि वर्धयत[2] । सहस्रसम्मितम् गृहभवम् भागम् एतम् गृहमेधीयाख्यम् जुषध्वम् मरुतः ! ॥ १४ ॥

यदि॑ स्तु॒तस्य॑ मरुतो अधी॒थेत्था विप्र॑स्य वा॒जिनो॒ हवी॑मन् ।
म॒क्षू रा॒यः सु॒वीर्य॑स्य दात॒ नू चि॒द्यम॒न्य आ॒दभ॒दरा॑वा ॥ १५ ॥

यदि॑ । स्तुतस्य॑ । मरुतः । अधिऽइथ । इत्था । विप्र॑स्य । वाजिनः॑ । हवी॑मन् ।
मक्षु । रायः । सुऽवीर्य॑स्य । दात । नु । चित् । यम् । अन्यः । आऽदभ॑त् । अरा॑वा ॥ १५ ॥

वेङ्कट० यदि स्तुतं हे मरुतः ! जानीथ, इत्थं मेधाविनः हविष्मतः आह्वाने शीघ्रं धनं सुवीर्यं दत्त क्षिप्रम्, यम् रयिम् अन्यः 'आदभत् अदाता'[3] । अरातीनां[4] धनमाहृत्यास्मभ्यं दत्तेत्यर्थो भवति ॥ १५ ॥

[5]इति पञ्चमाष्टके चतुर्थाध्याये चतुर्विंशो वर्गः[5] ॥

1. °शमत्रु° मूको. 2. °यत: मूको. 3. आत्मयुदात वि° अ°. 4. अरावणीनां मूको.
5-5. नास्ति मूको.

अत्यासो न ये मरुतः स्वञ्चो यक्षदृशो न शुभयन्त मर्याः ।
ते हर्म्येष्ठाः शिशवो न शुभ्रा वत्सासो न प्रक्रीळिनः पयोधाः ॥ १६ ॥

अत्यासः । न । ये । मरुतः । सुऽअञ्चः । यक्षऽदृशः । न । शुभयन्त । मर्याः ।
ते । हर्म्येऽस्थाः । शिशवः । न । शुभ्राः । वत्सासः । न । प्रऽक्रीळिनः । पयःऽधाः ॥ १६ ॥

वेङ्कट० अश्वाः इव ये मरुतः स्वञ्चनाः यक्षदृशः यक्षा इव दृश्यमाना यक्षा इव अलङ्कारैरङ्गानि ये शुभयन्त मर्याः, ते प्रासादस्थाः इव शिशवः रथस्थाः शोभमानाः वत्साः इव च प्रकर्षेण क्रीडिनः उदकस्य दातारः ॥ १६ ॥

दशस्यन्तो नो मरुतो मृळन्तु वरिवस्यन्तो रोदसी सुमेके ।
आरे गोहा नृहा वधो वो अस्तु सुम्नेभिरस्मे वसवो नमध्वम् ॥ १७ ॥

दशस्यन्तः । नः । मरुतः । मृळन्तु । वरिवस्यन्तः । रोदसी इति । सुमेके इति सुऽमेके ।
आरे । गोऽहा । नृऽहा । वधः । वः । अस्तु । सुम्नेभिः । अस्मे इति । वसवः । नमध्वम् ॥ १७ ॥

वेङ्कट० प्रयच्छन्तः अस्माकम् मरुतः सुखयन्तु परिचरन्तः द्यावापृथिव्यौ शोभमाने । दूरे गोर्हन्ता मनुष्यस्य हन्ता च वधः युष्माकं भवतु । सुखैः अस्मासु हे वासयितारः! नमध्वम् ॥ १७ ॥

आ वो होता जोहवीति सत्तः सत्राचीं रातिं मरुतो गृणानः ।
य ईवतो वृषणो अस्ति गोपाः सो अद्वयावी हवते व उक्थैः ॥ १८ ॥

आ । वः । होता । जोहवीति । सत्तः । सत्राचीम् । रातिम् । मरुतः । गृणानः ।
यः । ईवतः । वृषणः । अस्ति । गोपाः । सः । अद्वयावी । हवते । वः । उक्थैः ॥ १८ ॥

वेङ्कट० आभिमुख्येन भृशं ह्वयति होता होतृषदने निषण्णः युष्मान् बहुत्वमञ्चन्तीम् भवताम् रातिम् दानम् हे मरुतः! ब्रुवाण. । यः यजमानो गमनवतः जङ्गमस्य हे वर्षितारः! भवति गोपायिता । यज्ञेन हि[1] जगद्धर्यते । सः होता अद्वयावी युष्मान् उक्थैः[2] द्वयरहितोऽद्वयान्[3] मरुत एव आह्वयति ॥ १८ ॥

इमे तुरं मरुतो रामयन्तीमे सहः सहस आ नमन्ति ।
इमे शंसं वनुष्यतो नि पान्ति गुरु द्वेषो अररुषे दधन्ति ॥ १९ ॥

इमे । तुरम् । मरुतः । रमयन्ति । इमे । सहः । सहसः । आ । नमन्ति ।
इमे । शंसम् । वनुष्यतः । नि । पान्ति । गुरु । द्वेषः । अररुषे । दधन्ति ॥ १९ ॥

१. नास्ति वि[1] अ[2]. २. नास्ति वि[1] अ[1]. ३. °द्वया वि° अ°.

ट० इमे स्वरमाण स्तोतारम् मरुत रमयन्ति। इमे[1] हि[2] बलवताम्[3] अभिभवितार विधेयीकु-
र्वन्ति। इमे[4] आशसक[5] 'भजमानस्य परिरक्षन्ति। गुरु च द्वेष अयजमानाय[6] कुर्वन्ति ॥ १९ ॥

इमे र॒ध्रं चि॑न्म॒रुतो॑ जुनन्ति॒ भृमिं॑ चि॒द् यथा॒ वसं॑वो जु॒षन्ते॑ ।
अप॑ बाधध्वं वृषण॒स्तमां॑सि ध॒त्त विश्वं॒ तन॑यं तो॒कम॒स्मे ॥ २० ॥

। र॒ध्रम् । चि॒त् । म॒रुतः॑ । जु॒नन्ति॒ । भृमि॑म् । चि॒त् । यथा॑ । वस॑वः । जु॒षन्ते॑ ।
प॑ । बा॒ध॒ध्व॒म् । वृ॒ष॒ण॒ः । तमां॑सि । ध॒त्त । विश्व॑म् । तन॑यम् । तो॒कम् । अ॒स्मे इति॑ ॥ २० ॥

टू० यथा अस्मान् धनानि सेवन्ते तथा इमे मरुत प्रेरयन्ति बाधक भ्रमणशीलम् च रक्ष[7]।
प्रत्यक्षस्थितिष्ट । अप बाधध्वम् हे वृषण ! तमांसि । धत्त विश्वम् धनम् तनयम् तोकम्
च अस्मासु ॥ २० ॥

[8]इति पञ्चमाष्टके चतुर्थाध्याये पञ्चविंशो वर्ग[8] ॥

मा वो॑ दा॒त्रान्म॑रुतो॒ निर॑राम॒ मा प॒श्चाद् द॑घ्म रथ्यो विभा॒गे ।
आ नः॑ स्पा॒र्हे भ॑जतना वसु॒व्ये॒३ यदीं॑ सुजा॒तं वृ॑षणो वो॒ अस्ति॑ ॥ २१ ॥

। व॒ः । दा॒त्रात् । म॒रु॒तः॒ । निः । अ॒रा॒म॒ । मा । प॒श्चात् । द॒घ्म॒ । र॒थ्यः॒ । वि॒ऽभा॒गे ।
आ । नः॒ । स्पा॒र्हे । भ॒ज॒त॒न॒ । व॒स॒व्ये॑ । यत् । ई॒म् । सु॒ऽजा॒तम् । वृ॒ष॒णः॒ । वः॒ । अस्ति॑ ॥ २१ ॥

टू० मा व दानात्[9] हे मरुत ! नि अराम निर्गमाम । मा च पश्चात् गच्छेम
हे रथवन्त ! भवता धनविभागे। आ भजत अस्मान् स्पृहणीये धनसमूहे, यत् शोभनजननम्
हे वृषण ! युष्माक विद्यत वसव्यम्[10] ॥ २१ ॥

सं यद्धन॑न्त म॒न्युभि॒र्जना॑स॒ः शूरा॑ य॒ह्वीष्वोष॑धीषु वि॒क्षु ।
अध॑ स्मा नो मरुतो रुद्रियासस्त्रा॒तारो॑ भू॒त पृत॑नास्व॒र्यः ॥ २२ ॥

नम् । यत् । हन॑न्त । म॒न्युऽभिः॑ । जना॑सः । शूराः॑ । य॒ह्वीषु॑ । ओष॑धीषु । वि॒क्षु ।
अध॑ । स्म॒ । नः॒ । म॒रु॒तः॒ । रु॒द्रि॒या॒सः॒ । त्रा॒तारः॑ । भू॒त । पृत॑नासु । अ॒र्यः ॥ २२ ॥

ङ्कट० सम् गच्छन्ते यदा क्रोधै जना शूरा महतीषु ओषधीषु निवेशयित्रीषु। ओषधीना हि
पक्वाना[11] लाभार्थं युध्यन्त। अध[12] स्म न हे मरुत ! रुद्रपुत्रा ! रक्षितार भवत सङ्ग्रामेषु
अभिगन्तार ॥ २२ ॥

---

१ नास्ति वि[2] अ[1] २ हे वि[2] अ[1] ३ भवताम् वि[2] ल, भवतारम् अ[1] लभ ४ इमे
…वन्तीमे मूको ५ °सत मूको ६ ६ °नस्य नाय वि[2] अ[1] ७ रक्ष वि[2] ल लभ ८-८. नास्ति
मूको. ९ मानात् मूको १० पस° मूको ११ पक्वाणा वि[2] अ[2], पक्वाना लभ १२ स मूको,

भूरि चक्र मरुतः पित्र्याण्युक्थानि या वः शस्यन्ते पुरा चित् ।
मरुद्भिरुग्रः पृतनासु साळ्हा मरुद्भिरित् सनिता वाजमर्वा ॥ २३ ॥

भूरि । चक्र । मरुत । पित्र्याणि । उक्थानि । या । व । शस्यन्ते । पुरा । चित् ।
मरुत्ऽभि । उग्र । पृतनासु । साळ्हा । मरुत्ऽभि । इत् । सनिता । वाजम् । अर्वा ॥ २३ ॥

वेङ्कट० भूरीणि अहं कृतवान् पितृभि कृतानि उक्थानि हे मरुत !, यानि व[1] शस्यन्ते गतेऽपि काले। मरुद्भि उद्गूर्णो[2] वीर पृतनासु शत्रूणा सोढा भवति। मरुद्भि एव सम्भक्ता सङ्ग्रामम् अश्व स्तोतु ॥ २३ ॥

अस्मे वीरो मरुतः शुष्म्यस्तु जनानां यो असुरो विधर्ता ।
अपो येन सुक्षितये तरेमाध स्वमोको अभि वः स्याम ॥ २४ ॥

अस्मे इति । वीर । मरुत । शुष्मी । अस्तु । जनानाम् । य । असुर । विऽधर्ता ।
अप । येन । सुऽक्षितये । तरेम । अध । स्वम् । ओक । अभि । व । स्याम ॥ २४ ॥

वेङ्कट० अस्माकम् वीर हे मरुत ! बलवान् अस्तु, जनानाम् य बलवान् विभर्ता भवति त्वाह। येन शोभनाय निवासाय वीरेण तरेम युद्धम्। अथ युष्माक स्वभूतम् ओक वयम् अभि भवेम। यज्ञगृह प्राप्नुयामेति ॥ २४ ॥

तन्न इन्द्रो वरुणो मित्रो अग्निराप ओषधीर्वनिनो जुषन्त ।
शर्मन्त्स्याम मरुतामुपस्थे यूयं पात स्वस्तिभिः सदा नः ॥ २५ ॥

तत् । न । इन्द्र । वरुण । मित्र । अग्नि । आप । ओषधी । वनिन । जुषन्त ।
शर्मन् । स्याम । मरुताम् । उपऽस्थे । यूयम् । पात । स्वस्तिऽभि । सदा । न ॥ २५ ॥

वेङ्कट० पूर्वं व्याख्यातेयम् ऋक् (७,३४,२५) ॥ २५ ॥

[3]इति पञ्चमाष्टके चतुर्थोऽध्याये षड्विंशो वर्ग[3] ॥

[५७]

[1]वसिष्ठो मैत्रावरुणिर्ऋषि । मरुतो देवता । त्रिष्टुप् छन्द[1] ।

मध्वो वो नाम मारुतं यजत्राः प्र यज्ञेषु शवसा मदन्ति ।
ये रेजयन्ति रोदसी चिदुर्वी पिन्वन्त्युत्सं यदयासुरुग्राः ॥ १ ॥

मध्व । व । नाम । मारुतम् । यजत्रा । प्र । यज्ञेषु । शवसा । मदन्ति ।
ये । रेजयन्ति । रोदसी इति । चित् । उर्वी इति । पिन्वन्ति । उत्सम् । यत् । अयासु । उग्रा ॥ १ ॥

---

१. नास्ति वि[1]. २ उद्गीर्णे वि[1] अ[2] ३-३. नास्ति मूको.

वेङ्कट० स्तोतारो युष्माकम् मारुतम्[1] नाम, मरुच्छन्दमित्यर्थः, हे यष्टव्याः ! प्र मदन्ति यज्ञेषु बलेन सह स्तुवन्ति । ये कम्पयन्ति द्यावापृथिव्यौ अपि विस्तीर्णे । पिन्वन्ति[2] च मेघम् यदा[3] गच्छन्ति उद्गूर्णाः । उत्तरोऽर्धः[4] परोक्षः ॥ १ ॥

निचेतारो हि मरुतो गृणन्तं प्रणेतारो यजमानस्य मन्म ।
अस्माकमद्य विदथेषु बर्हिरा वीतये सदत पिप्रियाणाः ॥ २ ॥

निऽचेतारः । हि । मरुतः । गृणन्तम् । प्रऽनेतारः । यजमानस्य । मन्म ।
अस्माकम् । अद्य । विदथेषु । बर्हिः । आ । वीतये । सदत । पिप्रियाणाः ॥ २ ॥

वेङ्कट० स्वसिद्धायतने स्थापयितारः हि मरुतः स्तुवन्तम्[5] । द्वितीया च द्रष्टा[6] । प्रणेतारः[7] यजमानस्य अभिलषितम् । अस्माकम् अद्य यज्ञेषु बर्हिः आ सीदत[8] सोमपानाय प्रीयमाणाः ॥ २ ॥

नैतावदन्ये मरुतो यथेमे भ्राजन्ते रुक्मैरायुधैस्तनूभिः ।
आ रोदसी विश्वपिशः पिशानाः समानमञ्ज्यञ्जते शुभे कम् ॥ ३ ॥

न । एतावत् । अन्ये । मरुतः । यथा । इमे । भ्राजन्ते । रुक्मैः । आयुधैः । तनूभिः ।
आ । रोदसी इति । विश्वऽपिशः । पिशानाः । समानम् । अञ्जि । अञ्जते । शुभे । कम् ॥३॥

वेङ्कट० न एतावत् ये केचन राजन्ते मरुतः यथा इमे भ्राजन्ते रुक्मैः आभरणैः अङ्गैश्च । द्यावापृथिव्यौ 'विश्वान् पिशः'[9] आभिमुख्येन पिशानाः । पिशिः[10] आश्लेषकर्मा । द्यावापृथिव्यौ सर्वे एव व्याप्नुवाना इत्यर्थः । त इमे समानम् आभरणम्[11] आत्मशरीरेषु अञ्जते[12] शोभनार्थम् ॥ ३ ॥

ऋधक् सा वो मरुतो दिद्युदस्तु यद्व आगः पुरुषता कराम ।
मा वस्तस्यामपि भूमा यजत्रा अस्मे वो अस्तु सुमतिश्चनिष्ठा ॥ ४ ॥

ऋधक् । सा । वः । मरुतः । दिद्युत् । अस्तु । यत् । वः । आगः । पुरुषता । कराम ।
मा । वः । तस्याम् । अपि । भूम । यजत्राः । अस्मे इति । वः । अस्तु । सुऽमतिः । चनिष्ठा ॥४॥

वेङ्कट० पृथग् असक्तो दूरे सद् वः हे मरुतः ! दिद्युत् आयुधं भवतु, यद्यपि वयं युष्माकं पुरुषत्वेन बालिशत्वेन[13] [14]आगः कुर्मः[14] । मा [15]युष्माकम् तस्याम् दिद्युति अपि भूम[15] । अभिभवोऽस्याः । हे यष्टव्याः ! अस्मासु युष्माकम् अस्तु सुमतिः[16] अतिशयेनान्नवती ॥ ४ ॥

---

१. मरुतम् अ[१]. २. विदन्ति अ[१], विदन्ति वि[१]. ३. यथा अ[१]. ४. °रोऽर्धेषः ल मस्तावः. ५. स्तुवन्तः मूको. ६. भ्रष्टा वि[१] अ[१]; द्रष्टा ल लभ. ७. प्रणेता मूको. ८. सीद मूको. ९-९. विश्वान् विशः वि[१] ल; विशन् विश्वः अ[१]; विश्वविशः लभ. १०. पिपिशिः वि[१] ल; विविशिः अ[१] लभ. ११. °मावर° अ[१] लभ. १२. अञ्जन्ते मूको. १३. बलानिश्चेन वि[१] ल, बलानिश्येन अ[१]; बलाश्रिश्चेन लभ, बलाश्चियेन ल मस्ताव.. १४-१४. आगकूर्मः मूको. १५-१५. °कं भिमू° वि[१] अ[१], °पि भिमू° ल. १६. सुमतुम् मूको.

कृते चिदत्र मरुतो रणन्तानवद्यासः शुचयः पावकाः ।
प्र णोऽवत सुमतिभिर्यजत्राः प्र वाजेभिस्तिरत पुष्यसे नः ॥ ५ ॥

कृते । चित् । अत्र । मरुतः । रणन्त । अनवद्यासः । शुचयः । पावकाः ।
प्र । नः । अवत । सुमतिऽभिः । यजत्राः । प्र । वाजेभिः । तिरत । पुष्यसे । नः ॥ ५ ॥

वेङ्कट० कृते चित् अत्र स्तोमे मरुतः अरमन्त[1] अनवद्याः शुचयः पावकाः । प्र अवत अस्मान् सुमतिभिः हे यष्टव्याः! । प्र वर्धयत अस्मान् अन्नैः पोषणाय ॥ ५ ॥

उत स्तुतासो मरुतो व्यन्तु विश्वेभिर्नामभिर्नरो हवींषि ।
ददात नो अमृतस्य प्रजायै जिगृत रायः सूनृता मघानि ॥ ६ ॥

उत । स्तुतासः । मरुतः । व्यन्तु । विश्वेभिः । नामऽभिः । नरः । हवींषि ।
ददात । नः । अमृतस्य । प्रऽजायै । जिगृत । रायः । सूनृता । मघानि ॥ ६ ॥

वेङ्कट० अपि च स्तुताः मरुतः भक्षयन्तु सर्वैः नामभिः 'ईदृङ् चान्यादृङ्[2] च' (तै ४,६,१२,५-६) इत्यादिभिः स्तुताः नेतारः हवींषि । दत्त अस्माकम् अन्नं प्रजार्थम् । उच्चारयत[3] सूनृतानि च वचनानि मंहनीयानि ॥ ६ ॥

आ स्तुतासो मरुतो विश्व ऊती अच्छा सूरीन्त्सर्वताता जिगात ।
ये नस्त्मना शतिनो वर्धयन्ति यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

आ । स्तुतासः । मरुतः । विश्वे । ऊती । अच्छ । सूरीन् । सर्वऽताता । जिगात ।
ये । नः । त्मना । शतिनः । वर्धयन्ति । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥

वेङ्कट० आ गच्छत स्तुताः हे मरुतः । सर्वेऽपि यूयं रक्षणार्थम् स्तोतॄन् प्रति सर्वस्मिन्नपि काले । ये अस्मान् आत्मना एव बहुधनाः वर्धयन्ति, त इति ॥ ७ ॥

'इति पञ्चमाष्टके चतुर्थाध्याये सप्तविंशो वर्गः' ॥

[५८]

'वसिष्ठो मैत्रावरुणिर्ऋषिः । मरुतो देवता । त्रिष्टुप् छन्दः'[4] ।

प्र साकमुक्षे अर्चता गणाय यो दैव्यस्य धाम्नस्तुविष्मान् ।
उत क्षोदन्ति रोदसी महित्वा नक्षन्ते नाकं निर्ऋतेरवंशात् ॥ १ ॥

प्र । साकम्ऽउक्षे । अर्चत । गणाय । यः । दैव्यस्य । धाम्नः । तुविष्मान् ।
उत । क्षोदन्ति । रोदसी इति । महिऽत्वा । नक्षन्ते । नाकम् । निःऽऋतेः । अवंशात् ॥ १ ॥

---

१. रमन्त म[1] ल लभ. २. न चान्या दृङ् मूको. ३. °यत: मूको. ४-४. नास्ति मूको.

वेङ्कट० प्र उच्चारयत स्तुतीः सहोक्षणं कुर्वते गणाय, यः दैव्यस्य स्थानस्य महत्त्वात् सर्वेभ्यो देवेभ्यो महत्तरः । अपि च शकलीकुर्वन्ति द्यावापृथिव्यौ महत्त्वेन । व्याप्नुवन्ति च नाकम् लोकम् अस्याः पृथिव्याः आरभ्य अंशरहितेनाऽन्तरिक्षेण ॥ १ ॥

जनूश्चिद् वो मरुतस्त्वेष्येण भीमासस्तुविमन्यवोऽयासः ।
प्र ये महोभिरोजसोत सन्ति विश्वो वो यामन् भयते स्वर्दृक् ॥ २ ॥

जनुः । चित् । वः । मरुतः । त्वेष्येण । भीमासः । तुविऽमन्यवः । अयासः ।
प्र । ये । महःऽभिः । ओजसा । उत । सन्ति । विश्वः । वः । यामन् । भयते । स्वःऽदृक् ॥२॥

वेङ्कट० जन्मानि युष्माकम् मरुतः! दीप्तेन रूपेण हे भीमाः! बहुक्रोधाः! गमनशीलाः! । प्र भवन्ति ये महद्भिस्तेजोभिः बलेन च सह, तेषां युष्माकं गमने सर्वोऽपि स्वर्दृग्[1] बिभेति । दिवो दर्शनात् 'वनस्पतिः स्वर्दृक् । वनस्पतयो ह्यूर्ध्वं[2] पश्यन्ति इतिप्रन्त.[2] ॥ २ ॥

बृहद् वयो मघवद्भ्यो दधात जुजोषन्निन्मरुतः सुष्टुतिं नः ।
गतो नाध्वा वि तिराति जन्तुं प्र णः स्पार्हाभिरूतिभिस्तिरेत ॥ ३ ॥

बृहत् । वयः । मघवत्ऽभ्यः । दधात । जुजोषन् । इत् । मरुतः । सुऽस्तुतिम् । नः ।
गतः । न । अध्वा । वि । तिराति । जन्तुम् । प्र । नः । स्पार्हाभिः । ऊतिऽभिः । तिरेत ॥३॥

वेङ्कट० बृहत् अन्नम् हविष्मद्भ्यः[3] प्रयच्छत हे ऋत्विजः! । सेवन्ते[4] एव अस्माकम् मरुतः सुष्टुतिम् । सोऽयं मरुद्गणो यथा गतः अध्वा विरमयति जन्तुम् एवम् वि रमयति लब्धकामम् अजिगमिषुं करोति । सोऽस्मान्[5] स्पृहणीयैः रक्षणैः प्र वर्धयेदिति ॥ ३ ॥

युष्मोतो विप्रो मरुतः शतस्वी युष्मोतो अर्वा सहुरिः सहस्री ।
युष्मोतः सम्राळुत हन्ति वृत्रं प्र तद् वो अस्तु धूतयो देष्णम् ॥ ४ ॥

युष्माऽऊतः । विप्रः । मरुतः । शतस्वी । युष्माऽऊतः । अर्वा । सहुरिः । सहस्री ।
युष्माऽऊतः । सम्ऽराट् । उत । हन्ति । वृत्रम् । प्र । तत् । वः । अस्तु । धूतयः । देष्णम् ॥४॥

वेङ्कट० युष्माभी रक्षितः हे मरुतः! स्तोता बहुधनः भवति । युष्मोतः अश्वः[6] सहनशीलः सहस्रम् आहरति शत्रुभ्य । "युष्मोत. अनघो राजा"[7] अपि च हन्ति[8] शत्रुम् सम्राट् भवन् । प्र अस्तु तत्[9] युष्माकं दानम् अस्मासु हे कम्पयितारः! ॥ ४ ॥

---

१. स्वदृक् मूको. २-२. °स्पति स्वपृक्न् वनस्पते याश्च° ल लभ; °स्पति स्वर्वन्वनस्पते याहृ° वि[२]; °स्पति सुपन् वनस्पते या हृ° अ[१]. ३. °इत' मूको. ४. °दन्ता मूको. ५. °स्मात् मूको. ६. अश्व वि[२] अ[१]; अश्व अ[२], अश्व लभ. ७-७. °तो नशीरता वि[२] अ[१]; युष्मातो नशी रता ल लभ. ८. भवन्ति मूको. ९. त मूको.

ताँ आ रुद्रस्य मीळ्हुषो विवासे कुविन्नंसन्ते मरुतः पुनर्नः ।
यत् सस्वर्ता जिहीळिरे यदाविरव तदेन ईमहे तुराणाम् ॥ ५ ॥

तान् । आ । रुद्रस्य । मीळ्हुषः । विवासे । कुवित् । नंसन्ते । मरुतः । पुनः । नः ।
यत् । सस्वर्ता । जिहीळिरे । यत् । आविः । अव । तत् । एनः । ईमहे । तुराणाम् ॥ ५ ॥

वेङ्कट० तान् परिचरामि रुद्रस्य सूनून् सेक्तॄन् । बहु अस्माकं नमयन्ति मरुतः पुनः । [1]"सस्व." (निघ ३,२४) इत्यन्तर्हितनाम । अत्र तु सस्वर्तेति दृष्टम्[1] । यत् अन्तर्हितं पापं कुर्वन्ति मरुतः, यत् च आविर्भूतम्, अव ईमहे तत् एनः मरुतां क्षिप्राणां हृद्गतम् अपगच्छत्विति[2] याचामहे ॥ ५ ॥

प्र सा वाचि सुष्टुतिर्मघोनामिदं सूक्तं मरुतो जुषन्त ।
आराच्चिद् द्वेषो वृषणो युयोत यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

प्र । सा । वाचि । सुऽस्तुतिः । मघोनाम् । इदम् । सुऽउक्तम् । मरुतः । जुषन्त ।
आरात् । चित् । द्वेषः । वृषणः । युयोत । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥

वेङ्कट० प्रोक्ता[3] सा इयम् सुष्टुतिः । हविष्मताम् इदम् सूक्तम् मरुतः सेवन्ताम् । अस्मत्तो दूरे हे वृषणः! पापं पृथक् कुरुत ॥ ६ ॥

[4]इति पञ्चमाष्टके चतुर्थाध्याये अष्टाविंशो वर्गः[4] ॥

[५९]

[1]वसिष्ठो मैत्रावरुणिर्ऋषिः । मरुतो देवता, द्वादश्या रुद्रः । प्रगाथश्छन्दः (विषमा बृहत्यः, समाः सतोबृहत्यः), सप्तम्यष्टम्यौ त्रिष्टुभौ, नवमीदशम्येकादश्यो गायत्र्यः, द्वादश्यनुष्टुप्[1] ।

यं त्रायध्व इदमिदं देवासो यं च नयथ ।
तस्मा अग्ने वरुण मित्रार्यमन् मरुतः शर्म यच्छत ॥ १ ॥

यम् । त्रायध्वे । इदम्ऽइदम् । देवासः । यम् । च । नयथ ।
तस्मै । अग्ने । वरुण । मित्र । अर्यमन् । मरुतः । शर्म । यच्छत ॥ १ ॥

वेङ्कट० यम् रक्षत इत्थमित्थम् देवासः!, यम् च नयथ, तस्मै मह्यम् हे अग्न्यादयः! सुखं प्र यच्छत । मारुतं सूक्तम् ॥ १ ॥

१-१. सस्वरिताामित्यन्तर्हितनामात्रतुसस्वर्तेतिदृष्टम् मूको. २. भवग° मूको. ३. प्र सा प्रो° वि° अ°. ४-४. नास्ति मूको.

युष्माके देवा अवसाहनि प्रिय ईजानस्तरति द्विषः ।
प्र स क्षयं तिरते वि महीरिषो यो वो वराय दाशति ॥ २ ॥

युष्माकम् । देवा । अवसा । अहनि । प्रिये । ईजान । तरति । द्विष ।
प्र । स । क्षयम् । तिरते । वि । मही । इषं । य । वः । वराय । दाशति ॥ २ ॥

वेङ्कट० युष्माकम् हे देवा ! रक्षणेन प्रिये दिवसे ईजान तरति शत्रून् । प्र वर्धयति च स गृहम्, विविधं च वर्धयति महान्ति अन्नानि, य युष्मभ्य प्रयच्छति आत्मीयमभिलषितम् उद्दिश्य ॥ २ ॥

नहि वश्चरमं चन वसिष्ठः परिमंसते ।
अस्माकमद्य मरुतः सुते सचा विश्वे पिबत कामिनः ॥ ३ ॥

नहि । वः । चरमम् । चन । वसिष्ठ । परिऽमंसते ।
अस्माकम् । अद्य । मरुत । सुते । सचा । विश्वे । पिबत । कामिन ॥ ३ ॥

वेङ्कट० नहि व चरमम् अपि यो भवता जघन्यम् आगच्छति, तमप्यथ वसिष्ठ परिबुध्यते परिवर्जयति । तथा सति अस्माकम् अद्य हे मरुत ! सुते सहिता विश्वे पिबत कामिन ॥ ३ ॥

नहि व ऊतिः पृतनासु मर्धति यस्मा अराध्वं नरः ।
अभि व आवर्त् सुमतिर्नवीयसी तूयं यात पिपीषवः ॥ ४ ॥

नहि । व । ऊति । पृतनासु । मर्धति । यस्मै । अराध्वम् । नर ।
अभि । व । आ । अवर्त् । सुऽमति । नवीयसी । तूयम् । यात । पिपीषव ॥ ४ ॥

वेङ्कट० नहि युष्माक रक्षणम् पृतनासु बाध्यते । असै यजमानाय तामूतिम् अराध्वम् नर ! । रातिर्दानकर्मा । तथा सति युष्माक 'नवतरा सुमति ' अस्मान् अभि आ वृणोतु । क्षिप्रम् आगच्छत हे सोम पातुकामा [2] ॥ ४ ॥

ओ षु घृष्विराधसो यातनान्धांसि पीतये ।
इमा वो हव्या मरुतो ररे हि कं मो ष्वन्यत्र गन्तन ॥ ५ ॥

ओ इति । सु । घृष्विऽराधस । यातन । अन्धांसि । पीतये ।
इमा । व । हव्या । मरुत । ररे । हि । कम् । मो इति । सु । अन्यत्र । गन्तन ॥ ५ ॥

वेङ्कट० आ यात ये घृष्विराधस ! इतरेतर सहम्यमानधना [3] सोमान् पातुम् । इमानि युष्मभ्य हवींषि मरुत ! अहम् हि प्रयच्छामि । मा गच्छत अन्यत्र तथा सति । सु पूरणे ॥ ५ ॥

१-१ °तरोति मूको. २. °काम वि[२] क, °कामात् अ°, °कामात् लअ ३. °मनान् मूको

आ च नो बर्हिः सदतावता च नः स्पार्हाणि दातवे वसु ।
अस्रेधन्तो मरुतः सोम्ये मधौ स्वाहेह मादयाध्वै ॥ ६ ॥

आ । च । नः । बर्हिः । सदत । अवित । च । नः । स्पार्हाणि । दातवे । वसु ।
अस्रेधन्तः । मरुतः । सोम्ये । मधौ । स्वाहा । इह । मादयाध्वै ॥ ६ ॥

वेङ्कट० आ सीदत च अस्माकम् बर्हिः । रक्षत च[1] अस्मान् । वर्णान्यत्वं छान्दसम् । स्पृहणीयानि धनानि दातुम् । अक्षीणा भवन्तः मरुत ! सोममये मधुनि स्वाहाकारेण इह मादयत ॥ ६ ॥

[2]इति पञ्चमाष्टके चतुर्थाध्याये एकोनत्रिंशो वर्गः[2] ॥

सस्वश्चिद्धि तन्वः१ शुम्भमाना आ हंसासो नीलपृष्ठा अपप्तन् ।
विश्वं शर्धो अभितो मा नि षेद नरो न रण्वाः सवने मदन्तः ॥ ७ ॥

सस्वरिति । चित् । हि । तन्वः । शुम्भमानाः । आ । हंसासः । नीलऽपृष्ठाः । अपप्तन् ।
विश्वम् । शर्धः । अभितः । मा । नि । सेद । नरः । न । रण्वाः । सवने । मदन्तः ॥ ७ ॥

वेङ्कट० अन्तर्हिताः (द्र निघ ३,२४) अङ्गानि शोभयन्त आभरणैः नीलपृष्ठाः केचन हंसाः आ अपप्तन् इति मरुदभिप्रायम् । ते नूनं नीलपृष्ठाः भवन्ति । माम् अभितः[3] विश्वम् शर्धः[4] नि सीदतु इति मारुतं शर्धोऽभिप्रेत्याह । मनुष्या इव रमणीया यज्ञे मदन्तः भवन्ति मरुतः ॥ ७ ॥

यो नो मरुतो अभि दुर्हृणायुस्तिरश्चित्तानि वसवो जिघांसति ।
द्रुहः पाशान् प्रति स मुचीष्ट तपिष्ठेन हन्मना हन्तना तम् ॥ ८ ॥

यः । नः । मरुतः । अभि । दुःऽहृणायुः । तिरः । चित्तानि । वसवः । जिघांसति ।
द्रुहः । पाशान् । प्रति । सः । मुचीष्ट । तपिष्ठेन । हन्मना । हन्तन । तम् ॥ ८ ॥

वेङ्कट० यः अस्मान् हे मरुतः । जिघांसति दुर्हृणायुः दुष्टभावो हृणायुः क्रुध्यन् तिरः कुर्वन् बुद्धीः[5] हे वासयितारः[6], "स द्रोग्धुः"[7] पाशान् युष्मदीयान् प्रति मुञ्चतु । तप्ततमेन आयुधेन तम् हत ॥ ८ ॥

सांतपना इदं हविर्मरुतस्तज्जुजुष्टन । युष्माकोती रिशादसः ॥ ९ ॥

साम्ऽतपनाः । इदम् । हविः । मरुतः । तत् । जुजुष्टन । युष्माक । ऊती । रिशादसः ॥ ९ ॥

वेङ्कट० हे सन्तपनकुशलाः ! शत्रूणाम् तत् इदम् हविः मरुतः ! सेवध्वम् यौष्माकीणेन रक्षणेन सह हे हिंसितॄणां[8] निरसितारः ! ॥ ९ ॥

---

१. नास्ति अ[1]. २-२ नास्ति मूको. ३ अहित मूको. ४. शर्धोमा वि[2], शर्धोथा अ[1]; शर्धा लभ. ५ बुद्धि मूको. ६. °सिना मूको. ७-७ समुद्रोऽद्रन् वि[2], स मुद्रोद्रन् अ[1], स द्रुदोद्रन् लभ, अस्मद्द्रोग्धुः (पक्षे) क प्रस्ताव. ८. °सितॄणाम् क.

गृहमेधास आ गत मरुतो माप भूतन । युष्माकोती सुदानवः ॥ १० ॥

गृहऽमेधासः । आ । गत । मरुतः । मा । अप । भूतन । युष्माक । ऊती । सुऽदानवः ॥ १० ॥

वेङ्कट० हे गृहमेधाः! गृहे विद्यमानयज्ञाः! आ गच्छत मरुतः! । मा च अप भवत युष्माकं ऊती सुदानाः! ॥ १० ॥

इहेह वः स्वतवसः कवयः सूर्यत्वचः । यज्ञं मरुत आ वृणे ॥ ११ ॥

इहऽइह । वः । स्वऽतवसः । कवयः । सूर्यऽत्वचः । यज्ञम् । मरुतः । आ । वृणे ॥ ११ ॥

वेङ्कट० इह चेह च युष्माकं हे स्वभूतबलाः! कवयः! सूर्यसदृशरूपाः! यज्ञम् मरुतः! आभिमुख्येन सम्भजे ॥ ११ ॥

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥ १२ ॥

त्रिऽअम्बकम् । यजामहे । सुऽगन्धिम् । पुष्टिऽवर्धनम् ।
उर्वारुकम्ऽइव । बन्धनात् । मृत्योः । मुक्षीय । मा । अमृतात् ॥ १२ ॥

वेङ्कट० अत्र वाजसनेयकम्— "'एष ते रुद्र भागः सह [1]स्वस्राऽम्बिकया तं[1] जुषस्व स्वाहा' इत्यम्बिका ह वै नामास्य स्वसा तयास्यैष सह[2] भागस्तद् यदस्यैष[3] स्त्रिया सह भागस्तस्मात् त्र्यम्बको नाम" (माश २,६,२,९) इति । तं वयम् यजामहे शोभनगन्धम् पुष्टेर्वर्धयितारम् । अथैकवदाह— यथा उर्वारुकम् पक्वं बन्धनात् स्वयमेवाऽनायासेन मुक्तं भवति एवम् अहम् मृत्योः मुक्षीय, मा अमृतात् । जीवितम् अमृतमिति ॥ १२ ॥

[4]इति पञ्चमाष्टके चतुर्थाध्याये त्रिंशो वर्गः[4] ॥

व्याकार्षीत्[5] तुरीयमध्यायं पञ्चमस्याष्टकस्य सः ।
अष्टकस्य कुले जातो माधवो वेङ्कटात्मजः ॥

इति वेङ्कटमाधवाचार्यविरचिते ऋक्संहिताव्याख्याने पञ्चमाष्टके चतुर्थोऽध्यायः ।

—*—

इति ऋग्वेदे सभाष्ये पञ्चमाष्टके चतुर्थोऽध्यायः ॥

१-१. स्वविकया ते मूको. २. स मूको. ३. सदस्यैष मूको. ४-४. नास्ति मूको. ५. व्याख्यद् वि[२] अ[१].

अथ पञ्चमोऽध्यायः ।

वेङ्कट० [1]यदत्र सू(र्ये[1]ह)ष्वध्यायं व्याचिख्यासति माधवः ।
अष्टकादिषु यतत्यम् आदितः सम्प्रदर्शनम् ॥ १ ॥

अष्टकाध्यायविच्छेदः पुराणैर्ऋषिभिः कृतः ।
उद्ग्राहार्थं प्रदेशानाम् इति मन्यामहे वयम् ॥ २ ॥

वर्गाणामपि विच्छेद आर्ष एवेति निश्चयः ।
[3]ब्राह्मणेष्वपि दृश्यन्ते[3] वर्गसंज्ञाश्च तादयः[2] ॥ ३ ॥

[4]विभज्यन्ते च[4] सूक्तानि समधा तत्र वर्गशः ।
अन्ताल्लोपोऽपि वृद्धिश्च क्रियेतेऽनुगुणाविति[4] ॥ ४ ॥

अध्यापनाय शिष्याणां विभागो वर्गशः कृतः ।
सुमहो हि भवत्यल्पः शक्यो धारयितुं ततः ॥ ५ ॥

सह्वीभूयाभवत् सर्वमेकं[5] मण्डलमादितः ।
आसीदृषिर्मधुच्छन्दा मधुरोत्तममन्त्रदृक्[6] ॥ ६ ॥

तस्मादर्भे प्रादुरभूत् काण्वो मेधातिथिस्ततः ।
शौनश्शेपानि छन्दांसि मधुराणि ततोऽभवन् ॥ ७ ॥

हैरण्यस्तूपच्छन्दांसि काण्वानि च ततः परम् ।
[8]अत्र शाट्यायनकम्—'वैश्वामित्रो मधुच्छन्दा अकामयत [7]मुख्ये ब्रह्मवर्चसि[7] स्यामिति' ॥ ८ ॥[8]

अमहान्ति निवेश्याऽन्तर्मण्डलानि महर्षिभिः ।
कृतो महद्भ्यां रक्षार्थम् अथ तेषां परिग्रहः ॥ ९ ॥

समानमेतद्यज्ञश्च 'एव तद्धसेने ह्यतीर्ति' ।
सामिधेनीप्रभृतिषु ब्राह्मणैस्तद्विधीयते[9] ॥ १० ॥

भूयिष्ठं[10] यज्ञसंयुक्तम् उत्तमं मण्डलं विदुः ।
पितृमेधादिकं तस्माद् अन्ततस्तन्निवेशितम्[11] ॥ ११ ॥

मध्यस्थानां मण्डलानां क्रमो योऽयं व्यवस्थितः ।
तस्य कारणमन्वेष्टुं सङ्ख्याऽस्माभिः प्रदर्श्यते ॥ १२ ॥

१-१. °यभिद्द° वि[२] अ[१] ल लभ. २. वर्गसंशब्दनादि च मूको. ३-३. °न्तेऽथ वि[२] अ[१]. ४. क्रियेते तु गुणाविति वि[२] अ[१] क लभ. ५. सर्वं प्र° वि[२] अ[१]. ६. मधुमत्तमम° वि[२] अ[१] ल. ७-७. मुख्यो ब्रह्मवर्चसी वि[२] अ[२] लभ. ८-८. नास्ति वेंकभ. ९. °धीयेद्दि° वेंकभ. १०. भूयिष्ठ कभ. ११. मन्यक् अन्तत° वि[२] अ[१], °तदच निवे वेंकभ.

आद्यन्तयोर्मण्डलयोर्नवोने द्वे शते विदुः ।
त्रिचत्वारिंशद्[1] द्विषष्टिर्द्व्यूना षष्टिरनन्तरम् ॥ ११ ॥

सप्ताप्यशीतिः[2] पञ्चाधिसप्ततिस्तदनन्तरम्[3] ।
चतुरधिकं च शतम् अष्टोनं च शतं ततः ॥ १२ ॥

[4]चतुर्दशकं च शतं[4] सूक्तानां क्रमशो विदुः ।
मध्यस्थानां मण्डलानाम् इतिसङ्ख्या यथाक्रमम् ॥ १३ ॥

रक्षार्थमथ वाक्यानि [5]कल्याणो स्तवनं[5] ततः ।
रातिनाश्च[6] दमूनाश्च सदनं मथनं तथा ॥ १४ ॥

धनाय क्रोधनो[7] द्वे च भयकृद् युद्धकृत् तथा ।
क्रमेण दशवाक्यानि साध्याद्धः[8] स्यात् समन्वये ॥ १५ ॥

वामदेवस्तृतीयश्चेद्[9] भरद्वाजश्च पञ्चमः ।
कण्वश्च सप्तमः सूक्तैः क्रमवृद्धिर्भवेत् क्रमः ॥ १६ ॥

न च क्रमेण वर्धन्त ऋचो गार्त्समदादिषु ।
तस्माद् रक्तोऽपि नैतेषाम् अष्टानां सिध्यति क्रमः ॥ १७ ॥

वाक्यैरेतैर्विजानीयाद् मण्डलानामृचः क्रमात् ।
दशानां दशभिः प्राज्ञः तपाधेयो[10] धरावनिः ॥ १८ ॥

साध्यं च नो धेहि मेऽर्घं शूरसूनुर्मतोऽसिनः ।
गुरुदाने युगान्तस्य[11] सिद्धान्तस्य[12] निशीथके ॥ १९ ॥

शतैश्चतुर्भिरधिकम् अयुतं गणितं मया ।
द्वे चर्चातिरिच्येते[13] द्विपदाश्चात्र सङ्गताः ॥ २० ॥

पृथक्पदा[14] तु गणनं द्विपदानां[15] शताधिका ।
चतुश्शतादशीतिश्च वाक्यं च प्रह्वानयम् ॥ २१ ॥

---

१. द्विच° वि¹ अ² ह ख़अ. २. सप्ताशीतिः वेंकअ; सप्ताधिशी ... वि¹ अ². ३. पञ्चाधिकस° वेंकअ. ४-४. चतुर्दश च शतकं अ² वेंकअ. ५-५. काल योगवत्रे वि¹ अ²; कालयोगवन ख़अ. ६. तिनश्च वेंकअ. ७. °धनो वेंकअ; स्तन्न अ² ख़अ ह, प्रपठन्न वि¹. ८. सायाद्ध वेंकअ. ९. °तीयश्च वेंकअ. १०. तदाचे° वि¹ अ², तथा देयः वेंकअ. ११. युगं तस्य वि². १२. सिद्धान्तस्य वेंकअ. १३. च यान्ति° वेंकअ; च यानति° वि¹ अ¹. १४. °धनदा वि¹ अ¹; °धन्यदा वेंकअ. १५. द्विपादा° वेंकअ.

एकर्च[1] एकवर्गः [2]स्याद् द्वृचौ[2] द्वौ नवकावुभौ[3]।
एकोनं स्यात् त्रिकशतं चतुष्कं पञ्चसप्ततिः ॥ २२ ॥

अधिकं च शतं तस्याः[4] चतुःपञ्चाशदष्टकाः।
एकविंशशतं प्राहुः सप्तकानां च वैदिकाः ॥ २३ ॥

शतानि त्रीणि षट्कानां चत्वारिंशत्त्रयस्तथा।
पञ्चकानां सहस्रं च द्वे शते नवकं तथा ॥ २४ ॥

ऋचां दश सहस्राणि ऋचां पञ्चशतानि च[5]।
ऋचामशीतिपादश्च[5] पाठोऽयं न समञ्जसः ॥ २५ ॥

अपहायाथ पादस्याक्षराण्यादाय[6] पण्डितः।
ऋचः कालेन गणयेद् तत्तु[7] शुद्धिर्भविष्यति ॥ २६ ॥

मण्डलं वामदेवस्य तृतीयं चेत्तथाष्टमम्[8]।
स्यान्मण्डलं पावमानं [9]क्रमाद् वृद्धेः[9] क्रमो भवेत् ॥ २७ ॥

विश्वामित्रो वामदेवात् सम्पन्नो व्यतिरिच्यते।
अतिरेकश्च विज्ञेयो गायत्रीकरणाद् बुधैः ॥ २८ ॥

अत्र भूमो गृत्समदः क्षत्रियो ब्राह्मणोऽभवत्।
इन्द्रप्रसादाद् अस्यासन् वाचश्च हृदयङ्गमाः ॥ २९ ॥

अग्रे तस्मात्[10] प्रादुरभूद् विश्वामित्रस्ततोऽभवत्।
तस्यापि मधुरा मन्त्रा ब्राह्मण्यमपि लब्धवान् ॥ ३० ॥

दृष्टवेदस्ततोऽपश्यत्[11] पुनश्च तपसाऽन्वितः[12]।
मण्डलं नवमं तेन तदन्ते संनिवेशितम् ॥ ३१ ॥

प्रगाथे[13] मण्डले बह्वयो नाराशंस्य[14] ऋचस्ततः।
सन्निवेशोऽन्तरस्तस्य मध्यस्थेष्विति मन्यते ॥ ३२ ॥

---

१. एतच्च वि[2] अ[1]. २-२. स्याद्दृचौ वेंक्रअ. ३. वर्गाः वेंक्रअ. ४. ते वेंक्रअ. ५. °तिः पाद° वेंक्रअ. ६. पापस्य क्षादनाय च मूको. ७. तत्तु वेंक्रअ. ८. च तथा° वेंक्रअ. ९-९. क्रमवृद्धे वेंक्रअ; क्रमावृद्धे वि[2] अ[1] लअ. १०-१०. अग्रेस्तमात् वि[2] अ[2] लअ. ११. °वेदेनो° वि[2] अ[1] ह लअ; °वेदास्ततोऽपश्यन् वेंक्रअ. १२. °न्विताः मूको. १३. प्रागा° अ[1] लअ. १४. नरा° वि[2] अ[1].

अन्येषां क्रमवृद्धानां सन्निवेशः प्रमादभूः ।
चतुर्णां वामदेवादेर्मण्डलानामिति स्थितिः ॥ ३३ ॥

अथानुवाकविच्छेदो चतुर्भिर्हेतुभिः कृतः ।
'सुरूपकृत्नुम्' इत्यैन्द्रात् प्रागेक कल्पितो बुधैः ॥ ३४ ॥

ऐन्द्राण्यथाष्टौ सूक्तानि विभक्तानि समन्विते ।
षट्सूक्तावनुवाकौ द्वौ समौ मेधातिथेरपि ॥ ३५ ॥

शौनश्शेपोऽनुवाकस्तु शुनश्शेपेन कल्पितः ।
हैरण्यस्तूपकाण्वौ च प्रास्कण्वाश्च सप्तकाः ॥ ३६ ॥

गोतमस्यो(स्य 'त्व)मग्ने प्रयमन्त''-सूक्तानां विंशतिं विदुः ।
एकादशकनवकावनुवाकौ च कल्पितौ ॥ ३७ ॥

ऐन्द्रमेकादश सूक्तम् ऐन्द्रे पूर्वसमन्वितम्' ।
इति सर्वानुवाकेषु कार्या सूक्ष्मेक्षिका बुधैः ॥ ३८ ॥ इति ।

[६०]

[5]वसिष्ठो मैत्रावरुणिर्ऋषिः । प्रथमायाः सूर्यो देवता, शिष्टानां मित्रावरुणौ । त्रिष्टुप् छन्दः[6] ।

यद॒द्य सू॑र्य॒ ब्रवोऽना॑गा उ॒द्यन् मि॒त्राय॒ वरु॑णाय स॒त्यम् ।
व॒यं दे॑व॒त्रादि॑ते स्याम॒ तव॑ प्रि॒यासो॑ अर्यमन् गृ॒णन्तः॑ ॥ १ ॥

यत् । अ॒द्य । सू॒र्य॒ । ब्रवः॑ । अना॑गाः । उ॒त्ऽयन् । मि॒त्राय॑ । वरु॑णाय । स॒त्यम् ।
व॒यम् । दे॒व॒ऽत्रा । अ॒दि॒ते॒ । स्या॒म॒ । तव॑ । प्रि॒यासः॑ । अ॒र्य॒म॒न् । गृ॒णन्तः॑ ॥ १ ॥

वेङ्कट० वसिष्ठः । मैत्रावरुण सूक्तम् । आद्या सौर्या[7] । यत् अद्य सूर्य ! ब्रूयाः[8] अस्मान् अनागसः उद्यन् मित्रावरुणयोः सत्यम् एव, नैते[8] पापं कृतमिति ब्रवीषि । ततः वयम् हे अदीने ! सूर्य ! देवेषु स्याम तव प्रियासः अर्यमन् ! त्वा स्तुवन्तः ॥ १ ॥

ए॒ष स्य मि॑त्रावरुणा नृ॒चक्षा॑ उ॒भे उदे॑ति॒ सूर्यो॑ अ॒भि ज्मन् ।
विश्व॑स्य स्था॒तुर्जग॑तश्च गो॒पा ऋ॒जु मर्ते॑षु वृजि॒ना च॒ पश्य॑न् ॥ २ ॥

ए॒षः । स्यः । मि॒त्रा॒व॒रु॒णा॒ । नृ॒ऽचक्षाः॑ । उ॒भे इति॑ । उत् । ए॒ति॒ । सूर्यः॑ । अ॒भि । ज्मन् ।
विश्व॑स्य । स्था॒तुः । जग॑तः । च॒ । गो॒पाः । ऋ॒जु । मर्ते॑षु । वृ॒जि॒ना । च॒ । पश्य॑न् ॥ २ ॥

---

१. ऋ १,४,१ २. सम क्रिया वेंस्वभ. ३. ऋ १,७४,१, गौतमस्या व त्रिपन्त वि'. ४. पूर्वं स° वेंस्वभ. ५-५. नास्ति मूको. ६. सौ मूको. ७. ब्रूवा ल, ब्रुवा वि', ब्रवो अ'. ८. नैते मूको.

वेङ्कट० सः एषः मित्रावरुणौ! मनुष्याणां द्रष्टा द्यावापृथिवी लक्षीकृत्य उत् एति सूर्यः गच्छन् विश्वस्य स्थावरस्य जङ्गमस्य च गोपायिता ऋजूनि मनुष्येषु कुटिलानि च कर्माणि पश्यन्[1] ॥ २ ॥

अयु॑क्त स॒प्त ह॒रितः॑ स॒धस्था॒द् या ईं॒ वह॑न्ति॒ सूर्यं॑ घृ॒ताचीः॑ ।
धामा॑नि मित्रावरुणा यु॒वाकुः॒ सं यो यू॒थेव॒ जनि॑मानि॒ चष्टे॑ ॥ ३ ॥

अयु॑क्त । स॒प्त । ह॒रितः॑ । स॒धऽस्था॑त् । याः । ई॒म् । वह॑न्ति । सूर्य॑म् । घृ॒ताचीः॑ ।
धामा॑नि । मि॒त्रा॒व॒रु॒णा॒ । यु॒वाकुः॑ । सम् । यः । यू॒थाऽइ॑व । जनि॑मानि । चष्टे॑ ॥ ३ ॥

वेङ्कट० रथे युक्तवान् सप्त वडवाः सहस्थाने[2], याः एनम् वहन्ति सूर्यम् उदकमञ्चन्त्यो वृष्टिमुत्पादयन्त्यः । धामानि स्थानानि त्रीन् लोकान् हे मित्रावरुणौ! यः युवां कामयमान सम् पश्यति तेषु जातानि च भूतानि यूथानीव गवां गोपालः ॥ ३ ॥

उद् वां॑ पृ॒क्षासो॒ मधु॑मन्तो अस्थु॒रा सूर्यो॑ अरुहच्छु॒क्रमर्णः॑ ।
यस्मा॑ आदि॒त्या अध्व॑नो॒ रद॑न्ति मि॒त्रो अ॑र्य॒मा वरु॑णः स॒जोषाः॑ ॥ ४ ॥

उत् । वा॒म् । पृ॒क्षासः॑ । मधु॑ऽमन्तः । अ॒स्थुः॒ । आ । सूर्यः॑ । अ॒रु॒ह॒त् । शु॒क्रम् । अर्णः॑ ।
यस्मै॑ । आ॒दि॒त्याः । अध्व॑नः । रद॑न्ति । मि॒त्रः । अ॒र्य॒मा । वरु॑णः । स॒ऽजोषाः॑ ॥ ४ ॥

वेङ्कट० उत् अस्थुः युवाभ्याम् अन्नानि आज्यवन्ति । 'आ अरुहत् अन्तरिक्षम् तत्स्थम्'[3] शुक्रम् उदकम् सूर्यः । तत्रस्थानां ह्युदकानां मध्येन सूर्यो गच्छत्यत एव आप[3] इत्यन्तरिक्षनाम (तु॰ निघ १,३) भवति । यस्मै सूर्याय अग्रे आदित्याः मार्गान्[4] विलिखन्ति, मित्रः अर्यमा वरुणः च ताभ्यां सहितः सूर्यः । आदित्या रदन्तीति ॥ ४ ॥

इ॒मे चे॒तारो॒ अनृ॑तस्य॒ भूरे॑र्मि॒त्रो अ॑र्य॒मा वरु॑णो॒ हि सन्ति॑ ।
इ॒म ऋ॒तस्य॑ वावृधुर्दुरो॒णे श॒ग्मासः॑ पु॒त्रा अदि॑ते॒रद॑ब्धाः ॥ ५ ॥

इ॒मे । चे॒तारः॑ । अनृ॑तस्य । भूरेः॑ । मि॒त्रः । अ॒र्य॒मा । वरु॑णः । हि । सन्ति॑ ।
इ॒मे । ऋ॒तस्य॑ । व॒वृ॒धुः॒ । दु॒रो॒णे । श॒ग्मासः॑ । पु॒त्राः । अदि॑तेः । अद॑ब्धाः ॥ ५ ॥

वेङ्कट० इमे ज्ञातारः पापस्य बहुनः[5] मित्रः अर्यमा वरुणः हि भवन्ति । "इमे एव" च यज्ञस्य गृहे वर्धन्ते शक्ताः अदितेः पुत्रा[6] अहिंसिता ॥ ५ ॥

इ॒मे मि॒त्रो वरु॑णो दू॒ळभा॑सोऽचे॒तसं॑ चिच्चितयन्ति॒ दक्षैः॑ ।
अपि॒ क्रतुं॑ सु॒चेत॑सं॒ वत॑न्तस्ति॒रश्चि॒दंहः॑ सु॒पथा॑ नयन्ति ॥ ६ ॥

---

१. पश्यत् ल लभ. २. स्वस्थाने मूको. ३-३. अन्तरिक्षम् आ अरुहत् तत्स्थं मूको. ४. अप मूको. ५. मार्गान् मूको. ६. "हिनौ वि[2] अ[1]; °हिनो ल लभ. ७-७. म ए° क लभ अ[1]; स ए° वि[2].

इमे । मित्रः । वरुणः । दुःऽदभासः । अचेतसम् । चित् । चितयन्ति । दक्षैः ।
अपि । क्रतुम् । सुऽचेतसम् । वतन्तः । तिरः । चित् । अंहः । सुऽपथा । नयन्ति ॥ ६ ॥

वेङ्कट० इमे मित्रः वरुणः च अर्यमा च दम्भितुमशक्यमाः[1] अज्ञमपि पुरुषं चेतयन्ति[2] स्वसामर्थ्यैः। अपि च कर्म सुप्रज्ञानम् भजमानाः तिरः नयन्ति च पापम्, स्तोतॄन् शोभनेन मार्गेण ॥ ६ ॥

[3]इति पञ्चमाष्टके पञ्चमाध्याये प्रथमो वर्गः[3] ॥

इमे दिवो अनिमिषा पृथिव्याश्चिकित्वांसो अचेतसं नयन्ति ।
प्रव्राजे चिन्नद्यो गाधमस्ति पारं नो अस्य विष्पितस्य पर्षन् ॥ ७ ॥

इमे । दिवः । अनिऽमिषा । पृथिव्याः । चिकित्वांसः । अचेतसम् । नयन्ति ।
प्रऽव्राजे । चित् । नद्यः । गाधम् । अस्ति । पारम् । नः । अस्य । विष्पितस्य । पर्षन् ॥ ७ ॥

वेङ्कट० इमे[4] द्युलोकस्य अनिमेषेण पश्यन्तः भवन्ति पृथिव्याः ज्ञातारः अज्ञं मनुष्यं स्तोतारं नयन्ति[5]। प्रव्राजो गमनमार्गः उदकस्य, तत्र चास्याः नद्याः स्थलं विद्यते। तस्मात् [6]'सुतरेयं नदी'[6] भवताम्। तथा सति पारम् अस्य प्रवृद्धस्योदकस्य (तु. या ६,२०) नयन्त्विति[7] काञ्चन नदीमुत्तितीर्षुराहेति ॥७॥

यद् गोपावददितिः शर्म भद्रं मित्रो यच्छन्ति वरुणः सुदासे ।
तस्मिन्ना तोकं तनयं दधाना मा कर्म देवहेळनं तुरासः ॥ ८ ॥

यत् । गोपावत् । अदितिः । शर्म । भद्रम् । मित्रः । यच्छन्ति । वरुणः । सुऽदासे ।
तस्मिन् । आ । तोकम् । तनयम् । दधानाः । मा । कर्म । देवऽहेळनम् । तुरासः ॥ ८ ॥

वेङ्कट० यदि गोपनवत् पृथिवी गृहम् भजनीयम् मित्रः वरुणः च प्रयच्छन्ति सुदासे राज्ञे, तस्मिन् वयं पुत्रं तत्पुत्रं च धारयन्तो निदधाना वा[8] ऊध्वधनाः चौर्यादिकं देवानां [9]'क्रोधनम् मा करवाम' हे त्वरमाणाः![9] इति। उत्तरोऽर्धः[10] प्रत्यक्षः ॥ ८ ॥

अव वेदिं होत्राभिर्यजेत रिपः काश्चिद् वरुणध्रुतः सः ।
परि द्वेषोभिरर्यमा वृणक्तूरुं सुदासे वृषणा उ लोकम् ॥ ९ ॥

अव । वेदिम् । होत्राभिः । यजेत । रिपः । काः । चित् । वरुणऽध्रुतः । सः ।
परि । द्वेषःऽभिः । अर्यमा । वृणक्तु । उरुम् । सुऽदासे । वृषणौ । ऊँ इति । लोकम् ॥ ९ ॥

वेङ्कट० याः काः चित् दिवो रिपुभूताः वरुणस्य द्रोग्ध्र्य[11] प्रजाः भवन्ति, तासाम् वेदिम् सः वरुणः

---

१. ततक्षितम° मूको. २. चोदयन्ति अ' लभ. ३-३. नास्ति मूको. ४. °मे दिवः अ'. ५. °यति मूको. ६-६. °रेखदी मूको. ७. नयन्ति ऋत्विति वि' अ'; नयन्तुर्निवति ल लभ. ८. नास्ति वि'. ९-९. तथने··· वि' अ'; तथन मा पुर्म ल लभ. १०. °रोऽर्धः ल प्रस्तावः. ११. दोग्ध्रः मूको.

ऋजिष्ठेभिः पृथक् करोतु यशोन्सुरान् असुरान् विश्वरूपयतु वा[1], अर्यमा च परि वृणक्तु द्वेषोभिः क्रोधैः । विस्तीर्णं स्थानं पैजवनाय हे वर्षितारौ ! मित्रावरुणौ ! कुरुतमिति ॥ ९ ॥

सस्वश्चिद्धि समृतिस्त्वेष्येषामपीच्येन सहसा सहन्ते ।
युष्मद् भिया वृषणो रेजमाना दक्षस्य चिन्महिना मृळता नः ॥ १० ॥

सस्वरिति । चित् । हि । सम्ऽऋतिः । त्वेषी । एषाम् । अपीच्येन । सहसा । सहन्ते ।
युष्मत् । भिया । वृषणः । रेजमानाः । दक्षस्य । चित् । महिना । मृळत । नः ॥१० ॥

वेङ्कट० एषाम् असुराणां जलैः पुरैर्वा तिरोहिता (तु. निघ ३,२५) समृतिः सङ्गतिः सङ्घः त्वेषी दीप्तिमती भवति । तथा अन्तर्हितेन (तु. निघ ३,२५) बलेन अभिभवन्ति सर्वाः प्रजाः । युष्मत् भयेन[2] हे वर्षितारः ! कम्पमानाः अपि छिद्रेषु प्रहरन्ति दक्षस्य महत्त्वेन । तत्र अस्मान् सुखयतेति ॥ १० ॥

यो ब्रह्मणे सुमतिमायजाते वाजस्य सातौ परमस्य रायः ।
सीक्षन्त मन्युं मघवानो अर्य उरु क्षयाय चक्रिरे सुधातु ॥ ११ ॥

यः । ब्रह्मणे । सुऽमतिम् । आऽयजाते । वाजस्य । सातौ । परमस्य । रायः ।
सीक्षन्त । मन्युम् । मघऽवानः । अर्यः । उरु । क्षयाय । चक्रिरे । सुऽधातु ॥ ११ ॥

वेङ्कट० यः ब्राह्मणाय मह्यम् सुमतिम् अन्नस्य परमस्य च धनस्य लाभार्थम् आप्रयच्छति[3] सुदाः[4] पैजवनः, तस्य शत्रोः क्रोधम्[5] तस्य भगाः सहन्ताम् धनवन्तः । तथा विस्तीर्णं शोभनसन्धानं[6] च स्थानम् आवासाय कुर्वन्त्विति ॥ ११ ॥

इयं देव पुरोहितिर्युवभ्यां यज्ञेषु मित्रावरुणावकारि ।
विश्वानि दुर्गा पिपृतं तिरो नो यूयं पात स्वस्तिभिः सदा नः ॥ १२ ॥

इयम् । देवा । पुरःऽहितिः । युवऽभ्याम् । यज्ञेषु । मित्रावरुणौ । अकारि ।
विश्वानि । दुःऽगा । पिपृतम् । तिरः । नः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥१२॥

वेङ्कट० हे देवौ ! मित्रावरुणौ ! युवाभ्याम् इयम् पुरोहितिः पुरोनिधानयोग्या स्तुतिः यज्ञेषु अकारि । विश्वानि दुर्गाणि अतिपारयतम्[7] अस्मान्[8] ॥ १२ ॥

[9]इति पञ्चमाष्टके पञ्चमाध्याये द्वितीयो वर्गः[9] ॥

---

१. वा मूको. २. बलेन अ[१]. ३. °च्छन्ति मूको. ४. सुदा मूको. ५. क्रोधः अ[१].
६. °भनं स° वि[१] ल; °भना स° अ[१] लभ. ७. °पारयतम् ल लभ; °पारयत अ[१]; °पारयन्. वि[१].
८. तस्मात् मूको. ९-९. नास्ति मूको.

[६१]

[1]वसिष्ठो मैत्रावरुणिर्ऋषिः । मित्रावरुणौ देवता । त्रिष्टुप् छन्दः[1] ।

उद् वां चक्षुर्वरुण सुप्रतीकं देवयोरेति सूर्यस्ततन्वान् ।
अभि यो विश्वा भुवनानि चष्टे स मन्युं मर्त्येष्वा चिकेत ॥ १ ॥

उत् । वाम् । चक्षुः । वरुणा । सुऽप्रतीकम् । देवयोः । एति । सूर्यः । ततन्वान् ।
अभि । यः । विश्वा । भुवनानि । चष्टे । सः । मन्युम् । मर्त्येषु । आ । चिकेत ॥ १ ॥

वेङ्कट० उत् एति युवयोः देवयोः तेजः सुखमन्तरिक्षे विस्तारयन् सूर्यः हे मित्रावरुणौ! । यः सूर्यः सर्वाणि भुवनानि अभि पश्यति, [2]सः मरणशीलेषु[2] मनः आ चिकेत तेजसा प्रज्ञापयति ॥ १ ॥

प्र वां स मित्रावरुणावृतावा विप्रो मन्मानि दीर्घश्रुदियर्ति ।
यस्य ब्रह्माणि सुक्रतू अवाथ आ यत् क्रत्वा न शरदः पृणैथे ॥ २ ॥

प्र । वाम् । सः । मित्रावरुणौ । ऋतऽवा । विप्रः । मन्मानि । दीर्घऽश्रुत् । इयर्ति ।
यस्य । ब्रह्माणि । सुक्रतू इति सुऽक्रतू । अवाथः । आ । यत् । क्रत्वा । न । शरदः । पृणैथे इति ॥ २ ॥

वेङ्कट० प्र इयर्ति[3] [4]वाम् सः[4] मेधावी बहुश्रुतः वसिष्ठः यज्ञवान् हे मित्रावरुणौ! स्तोत्राणि, यस्य स्तोत्राणि हे सुप्रज्ञानौ! रक्षथः, यानि च स्तोत्राणि कृष्यादिना कर्मणा शरदः इव ओषधीभिः कामैः आ पूरयथः[5] ॥ २ ॥

प्रोरोर्मित्रावरुणा पृथिव्याः प्र दिव ऋष्वाद् बृहतः सुदानू ।
स्पशो दधाथे ओषधीषु विक्ष्वृधग्यतो अनिमिषं रक्षमाणा ॥ ३ ॥

प्र । उरोः । मित्रावरुणा । पृथिव्याः । प्र । दिवः । ऋष्वात् । बृहतः । सुदानू इति सुऽदानू ।
स्पशः । दधाथे इति । ओषधीषु । विक्षु । ऋधक् । यतः । अनिऽमिषम् । रक्षमाणा ॥ ३ ॥

वेङ्कट० प्रकर्षेण दधाथे हे मित्रावरुणौ! सुदानौ! विस्तीर्णायाः पृथिव्याः दिवः च महतः दर्शनीयाद् उदितौ तेजांसि ओषधीषु मनुष्येषु च पृथक्पृथक्, स्तुतिभिः अभिगच्छतो मनुष्यान् अनिमेषम् रक्षमाणाविति ॥ ३ ॥

शंसा मित्रस्य वरुणस्य धाम शुष्मो रोदसी बद्बधे महित्वा ।
अयन् मासा अयज्वनामवीराः प्र यज्ञमन्मा वृजनं तिराते ॥ ४ ॥

१-१. नास्ति मूको. २-२. मरणशीलस्थं वि[०]; सः मरणशीलस्थम् अ[०] छ लभ. ३. [०]ति प्रेरयति छ लभ. ४-४. वा सः वा सः लभ; वां सः प्रेरयति वि[०] अ[०]. ५. [०]रथ मूको.

शंसे । मित्रस्य॑ । वरु॑णस्य । धाम॑ । शुष्मः॑ । रोद॑सी॒ इति॑ । ब॒द्ब॒धे॒ । म॒हि॒ऽत्वा ।
अय॑न् । मासाः॑ । अय॑ज्वनाम् । अ॒वीराः॑ । प्र । य॒ज्ञऽम॑न्मा । वृ॒जन॑म् । ति॒रा॒ते॒ ॥ ४ ॥

वेङ्कट० स्तुहि मित्रावरुणयोः 'तेजः । बलम् एतयोर्महत्त्वेन' द्यावापृथिव्यौ बाधते । गच्छन्तु मासाः अयज्वनाम् अनुत्पादितपुत्राः । प्र वर्धयतु 'यज्ञबुद्धिः बलमिति' ॥ ४ ॥

अमू॑रा॒ विश्वा॑ वृषणावि॒मा वां॒ न यासु॑ चि॒त्रं ददृ॑शे॒ न य॒क्षम् ।
द्रुहः॑ सचन्ते॒ अनृ॑ता॒ जना॑नां॒ न वां॑ नि॒ण्यान्य॒चिते॑ अभूवन् ॥ ५ ॥

अमू॑रा । विश्वा॑ । वृ॒ष॒णौ॒ । इ॒माः । वा॒म् । न । यासु॑ । चि॒त्रम् । ददृ॑शे । न । य॒क्षम् ।
द्रुहः॑ । स॒च॒न्ते॒ । अनृ॑ता । जना॑नाम् । न । वा॒म् । नि॒ण्यानि॑ । अ॒चिते॑ । अ॒भू॒व॒न् ॥ ५ ॥

वेङ्कट० युवयोः इमानि विश्वानि भूतानि अमूढानि हे वृषणौ!, इमाः च दिशः, यासु दिक्षु स्थितम् चित्रम् नानारूपम् अद्भुतं च भूतं मनुष्यैर्न दृश्यते । जनानाम् द्रोग्धारः पापानि सेवन्ते । तत्र न युवयोः अन्तर्हितानि कानिचिद् पापानि अभवन् अप्रज्ञाते देशे ॥ ५ ॥

समु॑ वां य॒ज्ञं म॒हयं॒ नमो॑भिर्हु॒वे वां॑ मित्रावरुणा स॒बाधः॑ ।
प्र वां॒ मन्मा॑न्यृ॒चसे॒ नवा॑नि कृ॒तानि॒ ब्रह्म॑ जुजुषन्नि॒मानि॑ ॥ ६ ॥

सम् । ऊँ॒ इति॑ । वा॒म् । य॒ज्ञम् । म॒ह॒य॒म् । नमः॑ऽभिः । हु॒वे । वा॒म् । मि॒त्रा॒व॒रु॒णा॒ । स॒ऽबाधः॑ ।
प्र । वा॒म् । मन्मा॑नि । ऋ॒चसे॑ । नवा॑नि । कृ॒तानि॑ । ब्रह्म॑ । जु॒जु॒ष॒न् । इ॒मानि॑ ॥ ६ ॥

वेङ्कट० सम् पूजयामि युवयोः यज्ञम् अहं हविर्भिः । हुवे च वाम् हे मित्रावरुणौ! बाधासहितः । प्र सेवन्ताम् वाम् मननीयानि अर्चनार्थम् नवानि कृतानि स्तोत्राणि इमानि ॥ ६ ॥

इ॒यं दे॑व पु॒रोहि॑तिर्यु॒वभ्यां॑ य॒ज्ञेषु॑ मित्रावरुणावका॒रि ।
विश्वा॑नि दु॒र्गा पि॑पृतं ति॒रो नो॑ यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥ ७ ॥

इ॒यम् । दे॒वा॒ । पु॒रःऽहि॑तिः । यु॒वऽभ्या॑म् । य॒ज्ञेषु॑ । मि॒त्रा॒व॒रु॒णौ॒ । अ॒का॒रि॒ ।
विश्वा॑नि । दुः॒ऽगा । पि॒पृ॒त॒म् । ति॒रः । नः॒ । यू॒यम् । पा॒त॒ । स्व॒स्तिऽभिः॑ । सदा॑ । नः॒ ॥ ७ ॥

वेङ्कट० पूर्वं व्याख्याता (ऋ ७,६०,१२ द्र.) ॥ ७ ॥

'इति पञ्चमाष्टके पञ्चमाध्याये तृतीयो वर्गः' ॥

१-१. 'जयोर्म' मूको; 'जः दयोर्म' ल प्रस्तावः. २. यज्ञनलबुद्धि' वि' भ'. ३. जद्भुतं छ लभ. ४-४. नास्ति मूको.

[६२]

[1]वसिष्ठो मैत्रावरुणिर्ऋषिः । आद्यानां तिसृणां सूर्यो देवता, शिष्टानां मित्रावरुणौ । त्रिष्टुप् छन्दः[1] ।

उत् सूर्यो बृहदर्चींष्यश्रेत् पुरु विश्वा जनिम मानुषाणाम् ।
समो दिवा ददृशे रोचमानः क्रत्वा कृतः सुकृतः कर्तृभिर्भूत् ॥ १ ॥

उत् । सूर्यः । बृहत् । अर्चींषि । अश्रेत् । पुरु । विश्वा । जनिम । मानुषाणाम् ।
समः । दिवा । ददृशे । रोचमानः । क्रत्वा । कृतः । सुऽकृतः । कर्तृऽभिः । भूत् ॥ १ ॥

वेङ्कट० उत् अश्रेत् प्राप सूर्यः महान्ति अर्चींषि पुरूणि च जातानि सर्वाणि मानुषाणाम् । समः[2] एव दिवा दृश्यते दीप्यमानः । 'तस्मात् सर्व एव मन्यते मां प्रति उदगात्' (तै ६,५,४,२) इति ब्राह्मणम् । उदिते च सूर्ये कर्तृभिः कृतः अयं[3] प्रज्ञानेन तेजसा वा प्रादुर्भूतेन सुकृतः भवति । रात्रौ हि कृतं दुष्कृतं भवति ॥ १ ॥

स सूर्य प्रति पुरो न उद् गा एभिः स्तोमेभिरेतशेभिरेवैः ।
प्र नो मित्राय वरुणाय वोचोऽनागसो अर्यम्णे अग्नये च ॥ २ ॥

सः । सूर्य । प्रति । पुरः । नः । उत् । गाः । एभिः । स्तोमेभिः । एतशेभिः । एवैः ।
प्र । नः । मित्राय । वरुणाय । वोचः । अनागसः । अर्यम्णे । अग्नये । च ॥ २ ॥

वेङ्कट० सः हे सूर्य ! त्वम् अस्माकम् पुरः[4] प्रति उत् अगाः[5] एभिः स्तोमेभिः मया क्रियमाणैः [6]एतशैः च अश्वैः[6] गन्तृभिः सह । उदितः[7] च सन् अस्मान् मित्रादिभ्यः प्र ब्रूहि अपापान् ॥ २ ॥

वि नः सहस्रं शुरुधो रदन्त्वृतावानो वरुणो मित्रो अग्निः ।
यच्छन्तु चन्द्रा उपमं नो अर्कमा नः कामं पूपुरन्तु स्तवानाः ॥ ३ ॥

वि । नः । सहस्रम् । शुरुधः । रदन्तु । ऋतऽवानः । वरुणः । मित्रः । अग्निः ।
यच्छन्तु । चन्द्राः । उपऽमम् । नः । अर्कम् । आ । नः । कामम् । पूपुरन्तु । स्तवानाः ॥ ३ ॥

वेङ्कट० वि लिखन्तु भिन्नाधाः कुर्वन्तु अस्माकं बह्वीः, ओषधीः शुचो रोधयित्रीः, यज्ञवन्तः वरुणः मित्रः अग्निः । प्र यच्छन्तु च ह्लादकाः अस्मभ्यम् उपमानभूतम् अन्नम् । आ पूरयन्तु च अस्माकं स्तूयमानाः कामम् ॥ ३ ॥

द्यावाभूमी अदिते त्रासीथां नो ये वां जज्ञुः सुजनिमान ऋष्वे ।
मा हेळे भूम वरुणस्य वायोर्मा मित्रस्य प्रियतमस्य नृणाम् ॥ ४ ॥

१-१. नास्ति मूको. २. समा मूको. ३. अत्र मूको. ४. पुराः मूको. ५. °गात् मूको.
६-६. एतशोश्वामि वि[1]; °शैः ··· श्व[1]; °शैः श्वाश्वैः क लभ. ७. अदितिः क लभ.

द्यावाभूमी इति । अदिते । त्रासीथाम् । नः । ये । वाम् । जज्ञुः । सुऽजनिमानः । ऋष्वे इति ।
मा । हेळे । भूम । वरुणस्य । वायोः । मा । मित्रस्य । प्रियऽतमस्य । नृणाम् ॥ ४ ॥

वेङ्कट० उभे द्यावाभूमी रक्षेथाम् अस्मान् । तत्र विशेषेण 'भूमिः माम्'[1] त्रायते । अदिते! इति त्वं विशेषेण त्रायस्व इति । ये वाम् ज्ञातवन्तः शोभनजन्मानः हे दर्शनीये! । मा क्रोधे भूम वरुणस्य वायोः च मित्रस्य नृणाम् प्रियतमस्य इति ॥ ४ ॥

प्र बाहवा सिसृतं जीवसे न आ नो गव्यूतिमुक्षतं घृतेन ।
आ नो जने श्रवयतं युवाना श्रुतं मे मित्रावरुणा हवेमा ॥ ५ ॥

प्र । बाहवा । सिसृतम् । जीवसे । नः । आ । नः । गव्यूतिम् । उक्षतम् । घृतेन ।
आ । नः । जने । श्रवयतम् । युवाना । श्रुतम् । मे । मित्रावरुणा । हवा । इमा ॥ ५ ॥

वेङ्कट० प्र सारयतम् बाहू जीवनाय अस्माकम् । गोमार्गम् च अस्माकम् उदकेन आ सिञ्चतम् । आ श्रावयतम् च अस्मान् जनेषु हे युवानौ! । शृणुतम् च हे मित्रावरुणौ! मम इमानि स्तोत्राणि ॥ ५ ॥

नू मित्रो वरुणो अर्यमा नस्त्मने तोकाय वरिवो दधन्तु ।
सुगा नो विश्वा सुपथानि सन्तु यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

नु । मित्रः । वरुणः । अर्यमा । नः । त्मने । तोकाय । वरिवः । दधन्तु ।
सुऽगा । नः । विश्वा । सुऽपथानि । सन्तु । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥

वेङ्कट० क्षिप्रम् मित्रः वरुणः अर्यमा च अस्माकं आत्मने[2] पुत्राय च धनं प्रयच्छन्तु । सुगानि अस्माकं विश्वानि स्थानानि भवन्तु ॥ ६ ॥

[3]इति पञ्चमाष्टके पञ्चमाध्याये चतुर्थो वर्गः[3] ॥

[६३]

[1]वसिष्ठो मैत्रावरुणिर्ऋषिः । आद्यादिचतुर्थ्यन्तानां सूर्यो देवता, पञ्चम्याः सूर्यमित्रावरुणाः, षष्ठ्या मित्रावरुणौ अर्यमा च । त्रिष्टुप् छन्दः[1] ।

उद्वेति सुभगो विश्वचक्षाः साधारणः सूर्यो मानुषाणाम् ।
चक्षुर्मित्रस्य वरुणस्य देवश्चर्मेव यः समविव्यक् तमांसि ॥ १ ॥

उत् । ऊँ इति । एति । सुऽभगः । विश्वऽचक्षाः । साधारणः । सूर्यः । मानुषाणाम् ।
चक्षुः । मित्रस्य । वरुणस्य । देवः । चर्मऽइव । यः । समऽअविव्यक् । तमांसि ॥ १ ॥

१-१. भूमिना मूको. २. 'त्मनः' क[1] ३-३. नास्ति मूको.

वेङ्कट० उत् एति एव सुभग विश्वस्य द्रष्टा समान सूर्यं मनुष्याणाम्। मित्रावरुणयो चक्षु देवः। य चर्म इव[1] पृथिव्यां[2] [3]विस्तृतानि अन्तरिक्ष्याणि[3] [4]च तमांसि[4] संपिण्डयति ॥ १ ॥

उद्वेति प्रसवीता जनानां महान् केतुरर्णवः सूर्यस्य ।
समानं चक्रं पर्याविवृत्सन् यदेतशो वहति धूर्षु युक्तः ॥ २ ॥

उत्। ऊँ इति। एति। प्रऽसविता। जनानाम्। महान्। केतु। अर्णव। सूर्यस्य।
समानम्। चक्रम्। परिऽआविवृत्सन्। यत्। एतश। वहति। धूःऽसु। युक्त ॥ २ ॥

वेङ्कट० उत् एति प्रेरयिता जनानाम् महान् प्रज्ञापयिता रश्मि उदकवान् सूर्यस्य। समवृत्तम् चक्रम् पर्यावर्तयितुमिच्छन् यस्मिन् काले[5] एतश[5] वहति रथस्य धूर्षु[6] युक्त ॥ २ ॥

विभ्राजमान उषसामुपस्थाद् रेभैरुदेत्यनुमद्यमानः ।
एष मे देवः सविता चच्छन्द यः समानं न प्रमिनाति धाम ॥ ३ ॥

विऽभ्राजमान। उषसाम्। उपऽस्थात्। रेभै। उत्। एति। अनुऽमद्यमान।
एष। मे। देव। सविता। चच्छन्द। य। समानम। न। प्रऽमिनाति। धाम ॥ ३ ॥

वेङ्कट० विभ्राजमान उषसाम् उत्सङ्गात् स्तोतृभि उत् एति अनुमाद्यमान। एष मे देव सविता उपच्छन्दन करोति, य समानम् सर्वेषां तेज न हिनस्ति[7] ॥ ३ ॥

दिवो रुक्म उरुचक्षा उदेति दूरेअर्थस्तरणिर्भ्राजमानः ।
नूनं जनाः सूर्येण प्रसूता अयन्नर्थानि कृणवन्नपांसि ॥ ४ ॥

दिव। रुक्म। उरुऽचक्षा। उत्। एति। दूरेऽअर्थ। तरणि। भ्राजमान।
नूनम्। जना। सूर्येण। प्रऽसूता। अयन्। अर्थानि। कृणवन्। अपांसि ॥ ४ ॥

वेङ्कट० दिव रोचमान महातेजा उत् एति दूर गमन यस्य भवत्युदितमात्रस्य क्षिप्रगति भ्राजमान। इदानीम् जना सूर्येण प्रसूता प्राप्नुवन्ति गन्तव्यानि स्थानानि, कुर्वन्ति च कर्माणि ॥ ४ ॥

यत्रा चक्रुरमृता गातुमस्मै श्येनो न दीयन्नन्वेति पाथः ।
प्रति वां सूर उदिते विधेम नमोभिर्मित्रावरुणोत हव्यैः ॥ ५ ॥

यत्र। चक्रु। अमृता। गातुम्। अस्मै। श्येन। न। दीयन्। अनु। एति। पाथ।
प्रति। वाम्। सूरे। उत्ऽइते। विधेम। नमःऽभि। मित्रावरुणा। उत। हव्यै ॥ ५ ॥

---

१. इव मेव वि[1], इममेव अ[1], चमेव रु २. नास्ति रु लभ ३-३. विस्तृतान्तरि° मूको, विस्तृतान्यान्तरी° रु प्रस्ताव ४-४. तद् वि[1] मूको, मम तमां° मूको. ५ नास्ति मूको. ६ विनाशो वि[1] अ[1], विनश रु लभ. ७ सुष्ठु वि[1] अ[1], सुष्ठु रु लभ, ८. °रित मिप वि[1] अ[1] लभ,

वेङ्कट० यत्र चक्रुः देवाः मार्गम् अस्मै तत् अन्तरिक्षम् (तु. या ६,७) श्येनः इव गच्छन् अनुगच्छति। प्रति विधेम युवयोः सूर्येऽस्मिन् उदिते नमोभिः, अपि च हव्यैः च मित्रावरुणौ! इति ॥ ५ ॥

नू मित्रो वरुणो अर्यमा नस्त्मने तोकाय वरिवो दधन्तु ।
सुगा नो विश्वा सुपथानि सन्तु यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

नु । मित्रः । वरुणः । अर्यमा । नः । त्मने । तोकाय । वरिवः । दधन्तु ।
सुऽगा । नः । विश्वा । सुऽपथानि । सन्तु । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥

वेङ्कट० पूर्वं व्याख्याता (ऋ ७,६२,६) ॥ ६ ॥

[1]इति पञ्चमाष्टके पञ्चमाध्याये पञ्चमो वर्गः[1] ॥

[६४]

[2]वसिष्ठो मैत्रावरुणिर्ऋषिः। मित्रावरुणौ देवता । त्रिष्टुप् छन्दः[2] ।

दिवि क्षयन्ता रजसः पृथिव्यां प्र वां घृतस्य निर्णिजो ददीरन् ।
हव्यं नो मित्रो अर्यमा सुजातो राजा सुक्षत्रो वरुणो जुषन्त ॥ १ ॥

दिवि । क्षयन्ता । रजसः । पृथिव्याम् । प्र । वाम् । घृतस्य । निःऽनिजः । ददीरन् ।
हव्यम् । नः । मित्रः । अर्यमा । सुऽजातः । राजा । सुऽक्षत्रः । वरुणः । जुषन्त ॥ १ ॥

वेङ्कट० दिवि निवसन्तौ [3]उदकस्य अर्थम्[3] पृथिव्याम् च वाम् आज्यस्य हूयमानस्य [4]निर्णिजः स्तोकाः[4] प्रकर्षेण धारयेयुः। हव्यम् अस्माकम् मित्रः अर्यमा च शोभनजननः राजा सुधनः वरुणः च सेवन्ताम् ॥ १ ॥

आ राजाना मह ऋतस्य गोपा सिन्धुपती क्षत्रिया यातमर्वाक् ।
इळां नो मित्रावरुणोत वृष्टिमव दिव इन्वतं जीरदानू ॥ २ ॥

आ । राजाना । महः । ऋतस्य । गोपा । सिन्धुपती इति सिन्धुऽपती । क्षत्रिया । यातम् । अर्वाक् ।
इळाम् । नः । मित्रावरुणा । उत । वृष्टिम् । अव । दिवः । इन्वतम् । जीरदानू इति जीरऽदानू ॥ २ ॥

वेङ्कट० आ यातम् हे राजानौ! महतः सत्यस्य गोपायितारौ! सिन्धूनां स्वामिनौ! जातिवः क्षत्रियौ! अभिमुखम्। अन्नम् नः [5]मित्रावरुणौ! अपि च वृष्टिम्[5] द्युलोकाद् अपक्षारयतं[6] क्षिप्रदानौ! ॥ २ ॥

मित्रस्तन्नो वरुणो देवो अर्यः प्र साधिष्ठेभिः पथिभिर्नयन्तु ।
ब्रवद् यथा न आदरिः सुदास इषा मदेम सह देवगोपाः ॥ ३ ॥

१-१. नास्ति मूको. २. °कर्थं अ°. ३-३. °मीजस्तो° मूको ४. क्षत्रियाद मूको. ५-५. °द्रबे वधि च विष्टि वि° अ° क; °वणे मनि वि विष्टि सम. ६. °रयितं मूको.

मित्रः । तत् । नः । वरुणः । देवः । अर्यः । प्र । साधिष्ठेभिः । पथिऽभिः । नयन्तु ।
ब्रवत् । यथा । नः । आत् । अरिः । सुऽदासे । इषा । मदेम । सह । देवऽगोपाः ॥ ३ ॥

वेङ्कट० मित्रादयः अस्मान् साधुतमैः मार्गैः तथा प्र नयन्तु, ब्रूयात् यथा अस्मान् अभिगमनानन्तरम् 'एव अरिः गन्ता'[1] द्वाराधिकृतः अन्तःपुरस्थिताय[2] सुदासे प्राहान्। अन्नेन मदेम पुत्रपौत्रैः सह देवैः रक्ष्यमाणाः ॥ ३ ॥

यो वां गर्तं मनसा तक्षदेतमूर्ध्वां धीतिं कृणवद् धारयच्च ।
उक्षेथां मित्रावरुणा घृतेन ता राजाना सुक्षितीस्तर्पयेथाम् ॥ ४ ॥

यः । वाम् । गर्तम् । मनसा । तक्षत् । एतम् । ऊर्ध्वाम् । धीतिम् । कृणवत् । धारयत् । च ।
उक्षेथाम् । मित्रावरुणा । घृतेन । ता । राजाना । सुऽक्षितीः । तर्पयेथाम् ॥ ४ ॥

वेङ्कट० यः वाम् रथम् (द्र॰ या ३,५) एतम्[3] मनसा स्तोत्ररूपेण 'संतक्ष्णोति स्तौतीत्यर्थः'[4]। उन्मुखां बुद्धिं करोति स्तुत्यर्थम्, धारयति च निश्चलां करोति। तस्य स्वभूताः सुनिवासाः प्रजाः उदकेन मित्रावरुणा![5] उक्षेथाम्, तौ हे राजानौ! तर्पयेथाम् च ॥ ४ ॥

एष स्तोमो वरुण मित्र तुभ्यं सोमः शुक्रो न वायवेऽयामि ।
अविष्टं धियो जिगृतं पुरंधीर्यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

एषः । स्तोमः । वरुण । मित्र । तुभ्यम् । सोमः । शुक्रः । न । वायवे । अयामि ।
अविष्टम् । धियः । जिगृतम् । पुरम्ऽधीः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥

वेङ्कट० अयम् स्तोमः वरुण! मित्र! तुभ्यम् अध्वर्युभिः सोमः इव[6] दीप्तः[7] वायवे अस्माभिः अयामि यतः[8] कृतः। अविष्टम्[9] [10]धियः, जिगृतम्[10] पुरंधीः ॥ ५ ॥

[11]इति पञ्चमाष्टके पञ्चमाध्याये षष्ठो वर्गः[11] ॥

[६५]

[11]वसिष्ठो मैत्रावरुणिर्ऋषिः । मित्रावरुणौ देवता । त्रिष्टुप् छन्दः[11] ।

प्रति वां सूर उदिते सूक्तैर्मित्रं हुवे वरुणं पूतदक्षम् ।
ययोरसुर्य१मक्षितं ज्येष्ठं विश्वस्य यामन्नाचिता जिगत्नु ॥ १ ॥

प्रति । वाम् । सूरे । उत्ऽइते । सुऽउक्तैः । मित्रम् । हुवे । वरुणम् । पूतऽदक्षम् ।
ययोः । असुर्यम् । अक्षितम् । ज्येष्ठम् । विश्वस्य । यामन् । आऽचिता । जिगत्नु ॥ १ ॥

---

१. एव वि[1] अ[1]; एव…गं° छ लभ. २. पुरस्थाय वि[1]. ३. एत वि[2] अ[1] ल; एतः लभ. ४. संस्तौति स्तौतीत्यर्थः वि[2]; सन्तरोति स्तौतीत्यर्थः अ[1]. ५. नास्ति मूको. ६. न वि[2] अ[1]. ७. नास्ति वि[2] अ[1]. ८. रत वि[2] अ[1]. ९. अवरिष्ट छ लभ. १०-१०. इति कृतम् वि[2] अ[1]; तिकृतम् लभ; धियः[2] ल. ११-११. नास्ति मूको.

वेङ्कट० प्रति हुवे[1] वाम् उदिते सूर्ये सूक्तैः मित्रम् वरुणम् च शुद्धबलम्, [2]ययोः असुराणां हन्तृ बलम् अक्षीणम् प्रशस्तम् विश्वस्य अपि अभिगमने सङ्ग्रामे च जयशीलं भवति[2] ॥ १ ॥

ता हि देवानामसुरा तावर्या ता नः क्षितीः करतमूर्जयन्तीः ।
अश्याम मित्रावरुणा वयं वां द्यावा च यत्र पीपयन्नहा च ॥ २ ॥

ता । हि । देवानाम् । असुरा । तौ । अर्या । ता । नः । क्षितीः । करतम् । ऊर्जयन्तीः ।
अश्याम । मित्रावरुणा । वयम् । वाम् । द्यावा । च । यत्र । पीपयन् । अहा । च ॥ २ ॥

वेङ्कट० तौ हि देवानाम् बलिनौ । तौ ईश्वरौ [3]तौ नः प्रजाः कुरुतम् बलं[3] कुर्वाणाः । प्राप्नुयाम हे मित्रावरुणौ! वयम् वाम्, यस्यां प्राप्तौ सत्याम् अस्मान् द्यावापृथिव्यौ अहानि च वर्धयन्ति ॥ २ ॥

ता भूरिपाशावनृतस्य सेतू दुरत्येतू रिपवे मर्त्याय ।
ऋतस्य मित्रावरुणा पथा वामपो न नावा दुरिता तरेम ॥ ३ ॥

ता । भूरिऽपाशौ । अनृतस्य । सेतू इति । दुरत्येतू इति दुःऽअत्येतू । रिपवे । मर्त्याय ।
ऋतस्य । मित्रावरुणा । पथा । वाम् । अपः । न । नावा । दुःऽइता । तरेम ॥ ३ ॥

वेङ्कट० तौ बहुतन्त्री पापस्य बन्धकौ[1] हिंसितुः[2] मर्त्यानां मनुष्यस्य आक्रमितुम् अशक्यौ सर्वथा बध्नीय इत्यर्थः । तथाविधौ हे मित्रावरुणौ! युवयोः सत्यस्य मार्गेण उदकानि नावा इव तरेम दुरितानि ॥ ३ ॥

आ नो मित्रावरुणा हव्यजुष्टिं घृतैर्गव्यूतिमुक्षतमिळाभिः ।
प्रति वामत्र वरमा जनाय पृणीतमुद्नो दिव्यस्य चारोः ॥ ४ ॥

आ । नः । मित्रावरुणा । हव्यऽजुष्टिम् । घृतैः । गव्यूतिम् । उक्षतम् । इळाभिः ।
प्रति । वाम् । अत्र । वरम् । आ । जनाय । पृणीतम् । उद्नः । दिव्यस्य । चारोः ॥ ४ ॥

वेङ्कट० आ सिञ्चतम् अस्माकं हे मित्रावरुणौ! युवाभ्यां यत्र हव्यानि सेव्यन्ते तम् इति । एतदेव आह — उदकैः गोमार्गम् इळाभिः अन्नैः घासैः[4] । इति यच्छतम् च युवां वरणीयम् उदकम् जनाय । तदेव आह — प्रयच्छतम् उदकं दिव्यं चारु इति । प्रतिभवति युवयोः स्वभूतम्[5] उदक जनायेति वा ॥ ४ ॥

एष स्तोमो वरुण मित्र तुभ्यं सोमः शुक्रो न वायवेऽयामि ।
अविष्टं धियो जिगृतं पुरंधीर्यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

---

१. प्रतिहुवे वि[1], प्रतिहुवे अ[1] ए हस. २-२. नास्ति वि[1] अ[1]. ३. बलम्[1] मूको. ४. घासैः मूको. ५. घासैः मूको, एवे. शमस्वावः. ६. स्वभूत[1] मूको.

एषः । स्तोमः । वरुण । मित्र । तुभ्यम् । सोमः । शुक्रः । न । वायवे । अयामि । अविष्टम् । धियः । जिगृतम् । पुरम्ऽधीः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥

वेङ्कट० पूर्वं व्याख्याता (ऋ ७,६४,५ द्र.) ॥ ५ ॥

[1]इति पञ्चमाष्टके पञ्चमाध्याये सप्तमो वर्गः[1] ॥

[६६]

[1]वसिष्ठो मैत्रावरुणिर्ऋषिः । मित्रावरुणौ देवता, चतुर्थ्यादित्रयोदश्यन्तानाम् आदित्याः, चतुर्दश्यादिषोडश्यन्तानां सूर्यः । गायत्री छन्दः, दशम्यादिपञ्चदश्यन्तानां प्रगाथः (समा बृहत्यः, विषमाः सतोबृहत्यः), षोडश्याः पुरउष्णिक्[1] ।

प्र मित्रयोर्वरुणयोः स्तोमो न एतु शूष्यः । नमस्वान् तुविजातयोः ॥ १ ॥

प्र । मित्रयोः । वरुणयोः । स्तोमः । नः । एतु । शूष्यः । नमस्वान् । तुविऽजातयोः ॥ १ ॥

वेङ्कट० प्र एतु मित्रावरुणयोः अस्मदीयः स्तोमः सुखावहः हविष्मान् बहुजननयोः[2] ॥ १ ॥

या धारयन्त देवाः सुदक्षा दक्षपितरा । असुर्याय प्रमहसा ॥ २ ॥

या । धारयन्त । देवाः । सुऽदक्षा । दक्षऽपितरा । असुर्याय । प्रऽमहसा ॥ २ ॥

वेङ्कट० यौ[3] अधारयन्[4] देवाः शोभनबलौ दक्षपितरौ बलं रक्षकं ययोः तौ असुर्याय असुराणां स्वभूताय[5] बलाय तत् प्रविहन्तुं प्रकृष्टतेजसौ इति ॥ २ ॥

ता नः स्तिपा तनूपा वरुण जरितॄणाम् । मित्र साधयतं धियः ॥ ३ ॥

ता । नः । स्तिऽपा । तनूऽपा । वरुण । जरितॄणाम् । मित्र । साधयतम् । धियः ॥ ३ ॥

वेङ्कट० तौ अस्माकं[6] तनूनां[6] गृहाणां च रक्षकौ हे वरुण ! स्तोतॄणाम् मित्र ! च साधयतम् कर्माणि ॥३॥

यदद्य सूर उदितेऽनागा मित्रो अर्यमा । सुवाति सविता भगः ॥ ४ ॥

यत् । अद्य । सूरे । उत्ऽइते । अनागाः । मित्रः । अर्यमा । सुवाति । सविता । भगः ॥ ४ ॥

वेङ्कट० यत् अद्य [7]उदिते सूर्ये[7] अनागसः अस्मान् मित्रादयः प्रेरयन्ति । ततः सुखं जीवाम इति वाक्यशेषः ॥ ४ ॥

सुप्रावीरस्तु स क्षयः प्र नु यामन्त्सुदानवः । ये नो अंहोऽतिपिप्रति ॥ ५ ॥

१-१. नास्ति मूको. २. बहून् जननयः वि[1], बहून् जननयोश्यान् अ[1]. ३. या वि[2] अ[1]. ४. थवाधा° वि[2], अवधा° अ[1] ल, अधार° लभ. ५. स्वभूतये वि[2] अ[1]; स्वभूतया ल लभ. ६. ···तूनां वि[1]; तूनां अ[1] ल; नः लभ. ७-७. सूर्ये वोदिते अ[1].

सुप्रऽअवी । अस्तु । सः । क्षयः । प्र । नु । यामन् ।
सुऽदानवः । ये । नः । अंहः । अतिऽपिप्रति ॥ ५ ॥

वेङ्कट० शोभनरक्षणम् प्र भवतु तत् गृहम् हे शोभनदाना[1] भवता गमने, [1]ये भवन्त[1] अस्माकम् [2]अंहस अवृत्ते[2] अतिपारमन्ति ॥ ५ ॥

[1]इति पञ्चमाष्टके पञ्चमाध्याये अष्टमो वर्गः[1] ॥

उत स्वराजो अदितिरदब्धस्य व्रतस्य ये । महो राजान ईशते ॥ ६ ॥

उत । स्वऽराजः । अदितिः । अदब्धस्य । व्रतस्य । ये । महः । राजानः । ईशते ॥ ६ ॥

वेङ्कट० अपि च स्वराजः मित्रादयः अदितिः[3] च अहिंसितस्य व्रतस्य वर्षणादेः प्रणेतारः ते महान्तः राजानः सर्वेषाम् ईश्वरा भवन्ति ॥ ६ ॥

प्रति वां सूर उदिते मित्रं गृणीषे वरुणम् । अर्यमणं रिशादसम् ॥ ७ ॥

प्रति । वाम् । सूरे । उत्ऽइते । मित्रम् । गृणीषे । वरुणम् । अर्यमणम् । रिशादसम् ॥ ७ ॥

वेङ्कट० प्रति स्तौमि । द्विविकरणाना[4] छान्दसी वृत्तिः । वाम् उदिते सूर्ये मित्रावरुणौ अर्यमणम् च हिंसितॄणाम् असितारम् ॥ ७ ॥

राया हिरण्यया मतिरियमवृकाय शवसे । इयं विप्रा मेधसातये ॥ ८ ॥

राया । हिरण्यऽया । मतिः । इयम् । अवृकाय । शवसे । इयम् । विप्रा[5] । मेधऽसातये ॥ ८ ॥

वेङ्कट० धनेन हेतुना हिरण्येच्छया च इयम् स्तुतिः स्तेनवर्जिताय बलाय च । इयम् प्राज्ञयोः मित्रावरुणयोः यज्ञभजनाय च इति ॥ ८ ॥

ते स्याम देव वरुण ते मित्र सूरिभिः सह । इषं स्वश्च धीमहि ॥ ९ ॥

ते । स्याम । देव । वरुण । ते । मित्र । सूरिऽभिः । सह । इषम् । स्वः रिति स्वः । च । धीमहि ॥ ९ ॥

वेङ्कट० ते वयं भवाम समृद्धाः हे देव ! वरुण ! । ते मित्र ! स्तोतृभिः पुत्रैः सह स्याम । अन्नम् च सर्वं धारयेम[6] ॥ ९ ॥

बहवः सूरचक्षसोऽग्निजिह्वा ऋतावृधः ।
त्रीणि ये येमुर्विदथानि धीतिभिर्विश्वानि परिभूतिभिः ॥ १० ॥

१-१. नास्ति मूको. २-२. अंहसो वैनं वि' अ', °सो वृते ए' एम. ३. अदितिः ए' एम. ४. °करणाना अ', ५. तु. वेप १,२८५५ द्र. ६. धारयाम वि'.

मुहर्वः । सूरऽचक्षसः । अग्निऽजिह्वाः । ऋतऽवृधः ।
त्रीणि । ये । येमुः । विदथानि । धीतिऽभिः । विश्वानि । परिभूतिऽभिः ॥ १० ॥

वेङ्कट० महान्तः सूर्यदर्शना मित्रादयः, तेषां हि सूर्यश्चक्षुः, अग्निजिह्वा[1] यज्ञस्य वर्धयितारः, ये त्रीणि विदथानि त्रैलोक्यानि यच्छन्ति कर्मभिः विश्वानि च भूतानि च परिभवन्ति ॥ १० ॥

'इति पञ्चमाष्टके पञ्चमाध्याये नवमो वर्गः ' ॥

वि ये दधुः शरदं मासमादहर्यज्ञमक्तुं चादृचम् ।
अनाप्यं वरुणो मित्रो अर्यमा क्षत्रं राजान आशत ॥ ११ ॥

वि । ये । दधुः । शरदम् । मासम् । आत् । अहः । यज्ञम् । अक्तुम् । च । आत् । ऋचम् ।
अनाप्यम् । वरुणः । मित्रः । अर्यमा । क्षत्रम् । राजानः । आशत ॥ ११ ॥

वेङ्कट० अकल्पयन्[2] ये अत्र संवत्सरम् मासम् अहः च आहुतिभिः यज्ञम् आज्यं स्तुतिम् च । तथा अन्यैः आप्तुमशक्यं धनं च सोमात्मकं मित्रादयः राजानः व्याप्नुवन् ॥ ११ ॥

तद् वो अद्य मनामहे सूक्तैः सूर उदिते ।
यदोहते वरुणो मित्रो अर्यमा यूयमृतस्य रथ्यः ॥ १२ ॥

तत् । वः । अद्य । मनामहे । सुऽउक्तैः । सूरे । उत्ऽइते ।
यत् । ओहते । वरुणः । मित्रः । अर्यमा । यूयम् । ऋतस्य । रथ्यः ॥ १२ ॥

वेङ्कट० तत् वः अद्य स्तुमः सूक्तैः उदिते सूर्ये[3] । यत् धनं प्रापयति वरुणः[4] मित्रः अयर्मा इति पादः परोक्षः । यूयम् सत्यभूतस्य मनुष्यस्य प्रापयथ हे नेतारः[5] रथवन्तः । वेति ॥ १२ ॥

ऋतावान ऋतजाता ऋतावृधो घोरासो अनृतद्विषः ।
तेषां वः सुम्ने सुच्छर्दिष्टमे नरः स्याम ये च सूरयः ॥ १३ ॥

ऋतऽवानः । ऋतऽजाताः । ऋतऽवृधः । घोरासः । अनृतऽद्विषः ।
तेषाम् । वः । सुम्ने । सुच्छर्दिःऽतमे । नरः । स्याम । ये । च । सूरयः ॥ १३ ॥

वेङ्कट० सत्यवन्तः सत्याज्जाताः सत्यस्य वर्धयितारः घोराः अनृतस्य द्रोग्धारः । तेषाम् युष्माकं सुखे अतिशयेन शोभनगृहयुक्ते हे नेतारः[1] स्याम वयम् । सन्तु च ये च अन्ये स्तोतारः ॥ १३ ॥

---

१ अग्निर्जि° मूको, २-२ नास्ति मूको. ३. आकु° मूको ४. नास्ति वि° अ°. ५ वरुणो वि° क ख.

उदु त्यद् दर्शतं वपुर्दिव एति प्रतिह्वरे ।
यदीमाशुर्वहति देव एतशो विश्वस्मै चक्षसे अरम् ॥ १४ ॥

उत् । ऊँ इति । त्यत् । दर्शतम् । वपुः । दिवः । एति । प्रतिऽह्वरे ।
यत् । ईम् । आशुः । वहति । देवः । एतशः । विश्वस्मै । चक्षसे । अरम् ॥ १४ ॥

वेङ्कट० दिवः उत् एति तदिदं दर्शनीयं रूपम् आदित्याख्यम् अन्तरिक्षसमीपे । यत् एनम् अश्वः वहति देवनशीलः[१] एतशवर्णः विश्वस्मै चक्षसे सर्वेषां दर्शनाय पर्याप्तम् इति ॥ १४ ॥

शीर्ष्णःशीर्ष्णो जगतस्तस्थुषस्पतिं समया विश्वमा रजः ।
सप्त स्वसारः सुविताय सूर्यं वहन्ति हरितो रथे ॥ १५ ॥

शीर्ष्णःऽशीर्ष्णः । जगतः । तस्थुषः । पतिम् । समया । विश्वम् । आ । रजः ।
सप्त । स्वसारः । सुविताय । सूर्यम् । वहन्ति । हरितः । रथे ॥ १५ ॥

वेङ्कट० उच्छ्रिताद् उच्छ्रिताद् देशात् जगतः[२] स्थावरस्य च[३] स्वामिनं सर्वस्य[४] लोकस्य समीपे सप्त स्वयं सारिण्यः अभ्युदयाय सूर्यम् आ वहन्ति हरितः रथे ॥ १५ ॥

[५]इति पञ्चमाष्टके पञ्चमाध्याये दशमो वर्गः[५] ॥

तच्चक्षुर्देवहितं शुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शतम् ॥ १६ ॥

तत् । चक्षुः । देवऽहितम् । शुक्रम् । उत्ऽचरत् । पश्येम । शरदः । शतम् । जीवेम । शरदः । शतम् ॥

वेङ्कट० तत् प्रकाशकं देवैर्निहितं ज्वलत् उद्यत्[६] पश्येम शरदः शतम्[७] । पश्यन्तश्च जीवेम शरदः शतम् ॥ १६ ॥

काव्येभिरदाभ्या यातं वरुण द्युमत् । मित्रश्च सोमपीतये ॥ १७ ॥

काव्येभिः । अदाभ्या । आ । यातम् । वरुण । द्युऽमत् । मित्रः । च । सोमऽपीतये ॥ १७ ॥

वेङ्कट० स्तोत्रैः हे अहिंसितौ[८] आ गच्छतम् दीप्तियुक्तम्[९] वरुण[१] मित्रः च सोमपानाय ॥ १७ ॥

दिवो धामभिर्वरुण मित्रश्चा यातमद्रुहा । पिबतं सोममातुजी ॥ १८ ॥

दिवः । धामऽभिः । वरुण । मित्रः । च । आ । यातम् । अद्रुहा ।
पिबतम् । सोमम् । आतुजी इत्याऽतुजी ॥ १८ ॥

वेङ्कट० दिवः स्थानेभ्यः हे मित्रावरुणौ[१] आ गच्छतम् अद्रोग्धारौ । पिबतम् च सोमम् आहन्तारौ[१०] शत्रूणाम् ॥ १८ ॥

---

१ °लम् वि[१] अ[१]. २. °गानीन वि[१] ल, जगतीति अ[१], जगदिति लभ. ३ नास्ति वि[१] अ[१]. ४ राशस्य वि[१]. ५-५ नास्ति मूको. ६ उत् वि[१]; उद्यत् ल लभ ७ नास्ति ल लभ ८. °युए ए भरताव ९ °तम् वि[१] अ[१]. १० आहद° वि[१] अ[१].

आ यातं मित्रावरुणा जुषाणावाहुतिं नरा । पातं सोमंमृतावृधा ॥ १९ ॥

आ । यातम् । मित्रावरुणा । जुषाणौ । आऽहुतिम् । नरा । पातम् । सोमम् । ऋतऽवृधा ॥१९॥

वेङ्कट० निगदसिद्धा ॥ १९ ॥

[१]इति पञ्चमाष्टके पञ्चमाध्याये एकादशो वर्गः[१] ॥

[६७]

[१]वसिष्ठो मैत्रावरुणिर्ऋषिः । अश्विनौ देवता । त्रिष्टुप् छन्दः[१] ।

प्रति वां रथं नृपती जरध्यै हविष्मता मनसा यज्ञियेन ।
यो वां दूतो न धिष्ण्यावजीगरच्छा सूनुर्न पितरा विवक्मि ॥ १ ॥

प्रति । वाम् । रथम् । नृपती इति नृऽपती । जरध्यै । हविष्मता । मनसा । यज्ञियेन ।
यः । वाम् । दूतः । न । धिष्ण्यौ । अजीगः । अच्छ । सूनुः । न । पितरा । विवक्मि ॥ १ ॥

वेङ्कट० प्रति गच्छामि युवयोः रथम् हे नृपती! स्तोतुम् हविष्मता मनसा यज्ञोपयुक्तेन, यः रथः वाम् दूतः[२] इव[२] धिषणार्हौ! अपि(?)[३] इमं लोकं श्रावयति । किञ्च पुत्रः इव पितरौ, अश्विनौ अहम् अभिष्टौमि ॥ १ ॥

अशोच्यग्निः समिधानो अस्मे उपो अदृश्रन् तमसश्चिदन्ताः ।
अचेति केतुरुषसः पुरस्ताच्छ्रिये दिवो दुहितुर्जायमानः ॥ २ ॥

अशोचि । अग्निः । सम्ऽइधानः । अस्मे इति । उपो इति । अदृश्रन् । तमसः । चित् । अन्ताः ।
अचेति । केतुः । उषसः । पुरस्तात् । श्रिये । दिवः । दुहितुः । जायमानः ॥ २ ॥

वेङ्कट० प्रज्वलितः अग्निः समिध्यमानः अस्मासु उषसि । तथा उप दृश्यन्ते औषसैः तेजोभिः अन्धकारस्य अन्ताः[४] । अचेति च तेजः उषसः प्राच्यां दिशि । अन्तरिक्षे श्रयणाय दिवः दुहितुः प्रादुर्भवति ॥ २ ॥

अभि वां नूनमश्विना सुहोता स्तोमैः सिषक्ति नासत्या विवक्वान् ।
पूर्वीभिर्यातं पथ्याभिरर्वाक् स्वर्विदा वसुमता रथेन ॥ ३ ॥

अभि । वाम् । नूनम् । अश्विना । सुऽहोता । स्तोमैः । सिसक्ति । नासत्या । विवक्वान् ।
पूर्वीभिः । यातम् । पथ्याभिः । अर्वाक् । स्वःऽविदा । वसुऽमता । रथेन ॥ ३ ॥

१-१. नास्ति मूको. २. नास्ति ल ढभ. ३. इति वा मूको. ४. =अभि. ५. अन्तान् मूको.

वेङ्कट० अभि सेवते अस्मिन् काले इमौ हे अश्विनौ! कल्याणस्तोता स्तोमैः वचनकुशलः। पुरातनैः[1] यातम्[2] मार्गैः अभिमुख सर्वज्ञौ युवां धनरता रथेन ॥ ३ ॥

अवोर्वां नूनमश्विना युवाकुर्हुवे यद् वां सुते माध्वी वसूयुः ।
आ वां वहन्तु स्थविरासो अश्वाः पिबाथो अस्मे सुषुता मधूनि ॥ ४ ॥

अवोः । वाम् । नूनम् । अश्विना । युवाकुः । हुवे । यत् । वाम् । सुते । माध्वी इति । वसुऽयुः ।
आ । वाम् । वहन्तु । स्थविरासः । अश्वाः । पिबाथः । अस्मे इति । सुऽसुता । मधूनि ॥ ४ ॥

वेङ्कट० रक्षकयोः युवयोः इदानीम् अश्विनौ! युवां कामयमानः अहम् अस्मि, तत् ह्वयामि, यदा वाम् सुतसोमे मधुमन्तौ! वसुकामः। तदानीम् आ वहन्तु वाम् दृढाः अश्वाः। पिबतम् अस्मासु सुष्ठु सुतान्[3] सोमान् ॥ ४ ॥

प्राचीमु देवाश्विना धियं मेऽमृध्रां सातये कृतं वसूयुम् ।
विश्वा अविष्टं वाज आ पुरंधीस्ता नः शक्तं शचीपती शचीभिः ॥ ५ ॥

प्राचीम् । ऊँ इति । देवा । अश्विना । धियम् । मे । अमृध्राम् । सातये । कृतम् । वसुऽयुम् ।
विश्वाः । अविष्टम् । वाजे । आ । पुरम्ऽधीः । ताः । नः । शक्तम् । शचीपती इति शचीऽपती ।
शचीभिः ॥ ५ ॥

वेङ्कट० उन्मुखम् एव हे देवौ! अश्विनौ! मदीयं कर्म रक्षोभिः अहिंसितम् भजनाय[4] कुरुतम् धनकामं मदीयं कर्म भजतम्[5]। विश्वाः च रक्षतम् अस्माकम् अन्ने प्रवृत्ताः बुद्धीः[6]। तौ अस्मान् शक्तान् कुरुतम् हे प्रज्ञापती![7] प्रज्ञाभिः ॥ ५ ॥

[8]इति पञ्चमाष्टके पञ्चमाध्याये द्वादशो वर्गः[8] ॥

अविष्टं धीष्वश्विना न आसु प्रजावद् रेतो अह्रयं नो अस्तु ।
आ वां तोके तनये तूतुजानाः सुरत्नासो देववीतिं गमेम ॥ ६ ॥

अविष्टम् । धीषु । अश्विना । नः । आसु । प्रजाऽवत् । रेतः । अह्रयम् । नः । अस्तु ।
आ । वाम् । तोके । तनये । तूतुजानाः । सुऽरत्नासः । देवऽवीतिम् । गमेम ॥ ६ ॥

वेङ्कट० रक्षतम्[9] कर्मसु अश्विनौ! अस्मान् एषु। प्रजायुक्तम् रेतः अह्रयम्[10] उन्मुखम् अस्माकम् अस्तु। आ गमेत[11] युवयोः यज्ञम् पुत्रे तत्पुत्रे च तयोः लाभाय[12] त्वरमाणाः शोभनधनाः। प्रज्ञार्थम् उपगच्छाम इत्यर्थः ॥ ६ ॥

---

१. पुरात° मूको. २. यात मूको. ३. तान् मूको. ४. भजमानाय मूको. ५. भजन मूको. ६. बुद्ध मूको. ७. प्रज्ञापती मूको. ८-८. नास्ति मूको. ९. रक्षन अ° छ एम. १०. असूयन् मूको. ११. गमे वि° अ°, गमे ए, गम छग. १२ लोभा° मूको.

एष स्य वां पूर्वगत्वेव सख्ये निधिर्हितो माध्वी रातो अस्मे ।
अहेळता मनसा यातमर्वागश्नन्ता हव्यं मानुषीषु विक्षु ॥ ७ ॥

एष । स्य । वाम् । पूर्वगत्वाऽइव । सख्ये । निऽधिः । हितः । माध्वी इति । रातः । अस्मे इति ।
अहेळता । मनसा । आ । यातम् । अर्वाक् । अश्नन्ता । हव्यम् । मानुषीषु । विक्षु ॥ ७ ॥

वेङ्कट० स 'एष वाम् पूर्वगत्वा इव युवयो[1] सन्धानाय प्रथम गच्छति स्वसख्यसिद्ध्यर्थं सोममय[2] निधि निहित अस्माकम् अभिमत[3] हे मधुमन्तौ[1]। अहेळता[4] इति स्पष्टम् ॥ ७ ॥

एकस्मिन् योगे भुरणा समाने परि वां सप्त स्रवतो रथो गात् ।
न वायन्ति सुभ्वो देवयुक्ता ये वां धूर्षु तरणयो वहन्ति ॥ ८ ॥

एकस्मिन् । योगे । भुरणा । समाने । परि । वाम् । सप्त । स्रवतः । रथः । गात् ।
न । वायन्ति । सुऽभ्वः । देवऽयुक्ताः । ये । वाम् । धूःऽसु । तरणयः । वहन्ति ॥ ८ ॥

वेङ्कट० युवयो द्वयो समाने एकस्मिन् उद्योगे हे क्षिप्रकारिणौ[1] वाम् परि गमयति सप्त नदी रथ। सप्त हि नदी अतिक्रम्य अश्विनौ आगच्छत। न शुष्यन्ति शोभनभवना[5], देवै युक्ता ये वाम् धूर्षु युक्ता अश्वा वहति ॥ ८ ॥

असश्चता मघवद्भ्यो हि भूतं ये राया मघदेयं जुनन्ति ।
प्र ये बन्धुं सूनृताभिस्तिरन्ते गव्या पृञ्चन्तो अश्व्या मघानि ॥ ९ ॥

असश्चता । मघवत्ऽभ्यः । हि । भूतम् । ये । राया । मघऽदेयम् । जुनन्ति ।
प्र । ये । बन्धुम् । सूनृताभिः । तिरन्ते । गव्या । पृञ्चन्तः । अश्व्या । मघानि ॥ ९ ॥

वेङ्कट० आसङ्गवर्जितौ[6] हविष्मद्भ्य हि युवां भवतम्, ये धनेन महनीय देयम्[7] अत्र प्रेरयन्ति, ये च बन्धुम् आगत दरिद्र वाग्भि प्र वर्धयन्ति महनीयानि गवाश्ववृन्दानि[8] सम्पर्चयन्त इति ॥ ९ ॥

नू मे हवमा शृणुतं युवाना यासिष्टं वर्तिरश्विनाविरावत् ।
धत्तं रत्नानि जरतं च सूरीन् यूयं पात स्वस्तिभिः सदा नः ॥ १० ॥

नु । मे । हवम् । आ । शृणुतम् । युवाना । यासिष्टम् । वर्तिः । अश्विनौ । इराऽवत् ।
धत्तम् । रत्नानि । जरतम् । च । सूरीन् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ १० ॥

1-1. °गहवेगायो वि[3], °गतवयोर्वयो अ[1], °अवेशयो वयो ए लभ, °यो द्वयो ल प्रस्ताव २. सोमयो वि[3] अ[1] ३. अभिमेतो वि[2] अ[1], अभिप्रक्त ए लभ. ४. अहे मूको. ५. °नदव° वि[3]. ६. द्र ऋ २, २५,४ भाष्यम् (वैतु ल प्रस्ताव असंवर्जितौ), असमवर्जितौ मूको ७. देयम् मूको ८. गवामश्व° मूको.

वेङ्कट० क्षिप्रं मम आह्वानम् आ शृणुतम् हे युवानौ[1]! । प्राप्नुतम्[2] मार्गम् अस्मद्युक्तम्[3] अश्विनौ! । भक्तम् रत्नानि, वयसा जरयतम् च स्तोतॄन् ॥ १० ॥

'इति पञ्चमाष्टके पञ्चमाध्याये त्रयोदशो वर्गः' ॥

[६८]

'वसिष्ठो मैत्रावरुणिर्ऋषिः। अश्विनौ देवता। विराट् छन्दः, अष्टमीनवम्यौ त्रिष्टुभौ'।

आ शुभ्रा यातमश्विना स्वश्वा गिरो दस्रा जुजुषाणा युवाकोः ।
हव्यानि च प्रतिभृता वीतं नः ॥ १ ॥

आ । शुभ्रा । यातम् । अश्विना । सुऽअश्वा । गिरः । दस्रा । जुजुषाणा । युवाकोः ।
हव्यानि । च । प्रतिऽभृता । वीतम् । नः ॥ १ ॥

वेङ्कट० आ यातम् हे शोभनौ! अश्विनौ! शोभनाश्वौ स्तुतीः[4] दर्शनीयौ! सेवमानौ युष्मत्कामस्य[5] हव्यानि च प्रतिसम्भृतानि खादतम् न ॥ १ ॥

प्र वामन्धांसि मद्यान्यस्थुररं गन्तं हविषो वीतये मे ।
तिरो अर्यो हवनानि श्रुतं नः ॥ २ ॥

प्र । वाम् । अन्धांसि । मद्यानि । अस्थुः । अरम् । गन्तम् । हविषः । वीतये । मे ।
तिरः । अर्यः । हवनानि । श्रुतम् । नः ॥ २ ॥

वेङ्कट० प्रस्थितानि युवयोः मदकराणि अन्नानि हविर्धानात्। पर्याप्तम् गच्छतम् मम हविषः पानाय। तिरस्कृत्य शत्रून् हवनानि श्रुतम् अस्माकम् ॥ २ ॥

प्र वां रथो मनोजवा इयर्ति तिरो रजांस्यश्विना शतोतिः ।
अस्मभ्यं सूर्यावसू इयानः ॥ ३ ॥

प्र । वाम् । रथः । मनःऽजवाः । इयर्ति । तिरः । रजांसि । अश्विना । शतऽऊतिः ।
अस्मभ्यम् । सूर्यावसू इति । इयानः ॥ ३ ॥

वेङ्कट० प्र ईरयति वाम् मनोवेग. रथः तिरस्कुर्वन् लोकान् अश्विनौ! शतरक्षणः अस्मदर्थं हे सूर्याया वासयितारौ! गच्छन् ॥ ३ ॥

अयं ह यद् वां देवया उ अद्रिरूर्ध्वो विवक्ति सोमसुद् युवभ्याम् ।
आ वल्गू विप्रो ववृतीत हव्यैः ॥ ४ ॥

---

१. युवा तौ वि'; युवा तौ अ' लभ. २. 'प्नुत वि' अ'. ३. 'क्त तम् मूको ४-४. नास्ति मूको. ५. स्तुति। मूको.

अयम् । ह । यत् । वाम् । देवऽया । ऊँ इति । अद्रिः । ऊर्ध्वः । विवक्ति । सोमऽसुत् । युवऽभ्याम् ।
आ । वल्गू इति । विप्रः । ववृतीत । हव्यैः ॥ ४ ॥

वेङ्कट० अयम् यदा वाम् देवौ[1] कामयमान ग्रावा "उन्मुख शब्दं" करोति सोमसुत् युवाभ्याम् । तदानीं वल्गनशीलौ मेधावी स्तोता आ ववृत्यात् युवां[1] हविर्भि ॥ ४ ॥

चित्रं ह यद् वां भोजनं न्वस्ति न्यत्रये महिष्वन्तं युयोतम् ।
यो वामोमानं दधते प्रियः सन् ॥ ५ ॥

चित्रम् । ह । यत् । वाम् । भोजनम् । नु । अस्ति । नि । अत्रये । महिष्वन्तम् । युयोतम् ।
य । वाम् । ओमानम् । दधते । प्रिय । सन् ॥ ५ ॥

वेङ्कट० पूजनीयम् ह यत् युवयो अन्नम् अस्ति, तत् सर्वं महत्त्वयुक्तम्[3] अत्रये अत्यये नि युयोतम् प्रापयतम्, य वाम्[4] रक्षणम् अधारयत् प्रिय भवन् अत्रि ॥ ५ ॥

[5]इति पञ्चमाष्टके पञ्चमाध्याये चतुर्दशो वर्ग:[5] ॥

उत त्यद् वां जुरते अश्विना भूच्च्यवानाय प्रतीत्यं हविर्दे ।
अधि यद् वर्पं इतऊति धत्थः ॥ ६ ॥

उत । त्यत् । वाम् । जुरते । अश्विना । भूत् । च्यवानाय । प्रतीत्यम् । हविःऽदे ।
अधि । यत् । वर्पः । इतःऽऊति । धत्थ ॥ ६ ॥

वेङ्कट० अपि च तत् वाम् स्तुवते अश्विनौ[1] अभवत् च्यवानाय प्रतीत्यम् प्रतिगमनम्, वृद्धस्य पुनर्युवत्व प्रतिगमनम्, हविष दात्रे । "अधि धत्थ" यस्मात्[6] रूपम् जीर्णस्य इतोमुखम्[7] ॥ ६ ॥

उत त्यं भुज्युमश्विना सखायो मध्ये जहुर्दुरेवासः समुद्रे ।
निरीं पर्षदरावा यो युवाकुः ॥ ७ ॥

उत । त्यम् । भुज्युम् । अश्विना । सखाय । मध्ये । जहु । दुःऽएवास । समुद्रे ।
नि । ईम् । पर्षत् । अरावा । य । युवाकु ॥ ७ ॥

वेङ्कट० अपि च तम् भुज्युम् अश्विनौ[1] सखाय समुद्रमध्ये त्यक्तवन्त दुर्गमना । तम् एन पार प्रति नि पर्षत् अरावा अरण गमन तद्वान् अरावेति अश्व, गमनवान् रथो वा, य[10] युष्मत्काम ॥ ७ ॥

---

१. देवा वि[2] अ[1]　२-२. "ख श" मूको　३ युष्मन् मूको.　४ ममरत्यु[0] वि[2] ल, ममहत्त्वयु[0] अ[1] लभ　५ वाम मूको　६ ६ नास्ति मूको.　७ ७ यस्य मूको.　८ भयमस्मात् मूको　९ द्र ऋ १,११५०,९ भाष्यम्, अधोमु[0] वि[2], इधोमु[0] अ[1] ल लभ.　१० नास्ति वि[2].

वृकाय चिज्जसमानाय शक्तमुत श्रुतं शयवे हूयमाना ।
यावघ्न्यामपिन्वतमपो न स्तर्यं चिच्छक्त्यश्विना शचीभिः ॥ ८ ॥

वृकाय । चित् । जसमानाय । शक्तम् । उत । श्रुतम् । शयवे । हूयमाना ।
यौ । अघ्न्याम् । अपिन्वतम् । अपः । न । स्तर्यम् । चित् । शक्ती । अश्विना । शचीभिः ॥८॥

वेङ्कट० वृकाय अपि जसमानाय विमोचने शक्तौ अभवतम् । अपि च अशृणुतम्[1] शयवे हूयमानौ[2] । शयोः गाम् अपिन्वतम् अक्षारयतम् पयः उदकानि इव निवृत्तप्रसवाम्[3] अपि आत्मीयया शक्त्या प्रज्ञाभिः च ॥ ८ ॥

एष स्य कारुर्जरते सूक्तैरग्रे बुधान उषसां सुमन्मा ।
इषा तं वर्धदघ्न्या पयोभिर्यूयं पात स्वस्तिभिः सदा नः ॥ ९ ॥

एषः । स्यः । कारुः । जरते । सुऽउक्तैः । अग्रे । बुधानः । उषसाम् । सुऽमन्मा ।
इषा । तम् । वर्धत् । अघ्न्या । पयःऽभिः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ९ ॥

वेङ्कट० एषः स्तोता स्तौति[4] सूक्तैः उषसाम् अग्रे बुध्यमानः शोभनमननः । तम् शयुम् आत्मीया गौः पयसा अवर्धयत् इति ॥ ९ ॥

[5]इति पञ्चमाष्टके पञ्चमाध्याये पञ्चदशो वर्गः[5] ॥

[६९]

[5]वसिष्ठो मैत्रावरुणिर्ऋषिः । अश्विनौ देवता । त्रिष्टुप् छन्दः[5] ।

आ वां रथो रोदसी बद्बधानो हिरण्ययो वृषभिर्यात्वश्वैः ।
घृतवर्तनिः पविभी रुचान इषां वोळ्हा नृपतिर्वाजिनीवान् ॥ १ ॥

आ । वाम् । रथः । रोदसी इति । बद्बधानः । हिरण्ययः । वृषऽभिः । यातु । अश्वैः ।
घृतऽवर्तनिः । पविऽभिः । रुचानः । इषाम् । वोळ्हा । नृऽपतिः । वाजिनीऽवान् ॥ १ ॥

वेङ्कट० आ यातु युवयोः रथः द्यावापृथिव्यौ बाधमानः हिरण्ययः वृषभिः अश्वैः उदकयुक्तमार्गः पविभिः दीप्यमानः अन्नानाम् वोळ्हा नृणां पालयिता बलवान् इति ॥ १ ॥

स पप्रथानो अभि पञ्च भूमा त्रिवन्धुरो मनसा यातु युक्तः ।
विशो येन गच्छथो देवयन्तीः कुत्रा चिद् याममश्विना दधाना ॥ २ ॥

1. अशृ° वि° ख, श्रु° भा° लभ. 2. °मानः मूको. 3. °सवा मूको. 4. स्तौतिः मूको. 5-5. नास्ति मूको.

सः । पप्रथानः । अभि । पञ्च । भूम । त्रिऽबन्धुरः । मनसा । आ । यातु । युक्तः ।
विशः । येन । गच्छथः । देवऽयन्तीः । कुत्र । चित् । यामम् । अश्विना । दधाना ॥ २ ॥

वेङ्कट० सः रथः पञ्च जनान् धनप्रदानेन विस्तारयन् त्रिबन्धुरः मनसा युक्तः अभि आ यातु। मनुष्यान् येन अभि गच्छथः[1] देवकामान् यत्र कुत्र चित् अपि गमनम् अश्विनौ! कुर्वन्तौ ॥ २ ॥

स्वश्वा यशसा यातमर्वाग् दस्रा निधिं मधुमन्तं पिबाथः ।
वि वां रथो वध्वा३ यादमानोऽन्तान् दिवो बाधते वर्तनिभ्याम् ॥ ३ ॥

सुऽअश्वा । यशसा । आ । यातम् । अर्वाक् । दस्रा । निऽधिम् । मधुऽमन्तम् । पिबाथः ।
वि । वाम् । रथः । वध्वा । यादमानः । अन्तान् । दिवः । बाधते । वर्तनिऽभ्याम् ॥ ३ ॥

वेङ्कट० शोभनाश्वौ यशस्विनौ आ गच्छतम् अभिमुखम्। हे दस्रौ! सोमवन्तम् निधिम् प्राग्रम् पिबतम्। वि बाधते युवयोः रथः उषसा सह[2] अभिगच्छन्। यदिरभिक्रमणकर्मा। दिवः पर्यन्तान् चक्रपविभ्याम् ॥ ३ ॥

युवोः श्रियं परि योषावृणीत सूरो दुहिता परितक्म्यायाम् ।
यद् देवयन्तमवथः शचीभिः परि घ्रंसमोमना वां वयो गात् ॥ ४ ॥

युवोः । श्रियम् । परि । योषा । अवृणीत । सूरः । दुहिता । परिऽतक्म्यायाम् ।
यत् । देवऽयन्तम् । अवथः । शचीभिः । परि । घ्रंसम् । ओमना । वाम् । वयः । गात् ॥ ४ ॥

वेङ्कट० युवयोः श्रियम्[3] परि अवृणीत सूर्यदुहिता युवतिः परितक्म्येति[4] रात्रिनाम, तस्याः पश्चिमे भागे युवयोः काले। यत् देवकामं रक्षथः[5] प्रज्ञाभिः। अत्र यास्कः—"पर्यगात् वां घ्रंसम् अहरवनायाह्नम्"[6] (या ६,४) इति। यजमानानां रक्षणार्थम् अह्न[7] हविर्भूतमन्नम्[8] वाम् अश्विनौ! परि गच्छति इति ॥ ४ ॥

यो ह स्य वां रथिरा वस्त उस्रा रथो युजानः परियाति वर्तिः ।
तेन नः शं योरुषसो व्युष्टौ न्यश्विना वहतं यज्ञे अस्मिन् ॥ ५ ॥

यः । ह । स्यः । वाम् । रथिरा । वस्ते । उस्राः । रथः । युजानः । परिऽयाति । वर्तिः ।
तेन । नः । शम् । योः । उषसः । विऽउष्टौ । नि । अश्विना । वहतम् । यज्ञे । अस्मिन् ॥ ५ ॥

वेङ्कट० यः खलु एषः युवयोः हे रथवन्तौ! वस्ते तेजांसि रथः युज्यमानः, परिगच्छति[9] च मार्गम्, तेन अस्माकम् शम् च योः च उषसः व्युच्छने[10] नि वहतम् अश्विनौ![11] अस्मिन्[12] यज्ञे ॥ ५ ॥

---

१ अनाभि° वि, अनभि° अ. २. हस मूको. ३. श्रियत ल लभ; श्रयतं वि अ. ४. °तक्मे° मूको. ५. रक्षन वि अ; रक्षथ ल लभ. ६. पर्यागाद्धा प्रस हरवसानेऽह्नम् मूको. ७. अहिः वि अ ल; अनि लभ. ८. °तमनम् तै ल लभ, °तं नम् वि. ९. °-ऊन्ति मूको. १०. °च्छे वि; °च्छन अ. ११. °श्विना वि अ. १२. नास्ति वि —

नरा गौरेव विद्युतं तृषाणास्माकमद्य सवनोप यातम् ।
पुरुत्रा हि वां मतिभिर्हवन्ते मा वामन्ये नि यमन् देवयन्तः ॥ ६ ॥

नरा । गौराऽइव । विऽद्युतम् । तृषाणा । अस्माकम् । अद्य । सवना । उप । यातम् ।
पुरुऽत्रा । हि । वाम् । मतिऽभिः । हवन्ते । मा । वाम् । अन्ये । नि । यमन् । देवऽयन्तः ॥ ६ ॥

वेङ्कट० हे नेतारौ ! गौरौ इव मृगौ विद्युतम्, मृगतृष्णावन्तौ अस्माकम् अद्य सवनानि[1] उप गच्छतम् । बहुषु हि देशेषु वाम्[2] स्तुतिभिः ह्वयन्ते[3] । तत्र मा वाम् अन्ये नि यच्छन्तु देवकामाः ॥ ६ ॥

युवं भुज्युमवविद्धं समुद्र उदूहथुरर्णसो अस्रिधानैः ।
पतत्रिभिरश्रमैरव्यथिभिर्दंसनाभिरश्विना पारयन्ता ॥ ७ ॥

युवम् । भुज्युम् । अवऽविद्धम् । समुद्रे । उत् । ऊहथुः । अर्णसः । अस्रिधानैः ।
पतत्रिऽभिः । अश्रमैः । अव्यथिऽभिः । दंसनाभिः । अश्विना । पारयन्ता ॥ ७ ॥

वेङ्कट० युवम् भुज्युम्[4] सखिभिः समुद्रमध्ये अवविद्धम्[5] पारं प्रति उत् ऊहथुः उदकात् अक्षीणैः[6] अश्वैः व्यथारहितैः श्रमवर्जितैः कर्मभिः अश्विनौ ! तं पारयन्तौ[7] ॥ ७ ॥

नू मे हवमा शृणुतं युवाना यासिष्टं वर्तिरश्विनाविरावत् ।
धत्तं रत्नानि जरतं च सूरीन् यूयं पात स्वस्तिभिः सदा नः ॥ ८ ॥

नु । मे । हवम् । आ । शृणुतम् । युवाना । यासिष्टम् । वर्तिः । अश्विनौ । इराऽवत् ।
धत्तम् । रत्नानि । जरतम् । च । सूरीन् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ८ ॥

वेङ्कट० पूर्वं व्याख्याता (ऋ ७,६७,१० द्र.) ॥ ८ ॥

[8]इति पञ्चमाष्टके पञ्चमाध्याये षोडशो वर्गः[9] ॥

[७०]

[8]वसिष्ठो मैत्रावरुणिर्ऋषिः । अश्विनौ देवता । त्रिष्टुप् छन्दः[9] ।

आ विश्ववाराश्विना गतं नः प्र तत् स्थानमवाचि वां पृथिव्याम् ।
अश्वो न वाजी शुनपृष्ठो अस्थादा यत् सेदथुर्ध्रुवसे न योनिम् ॥ १ ॥

---

१. °मादि मूको. २. ना मूको. ३. भवन्ति भ[२]. ४. मुज्युः मूको. ५. अपवि° वि[१] भ[२]. ६. क्षिणैः मूको. ७. षार° मूको. ८-८. नास्ति मूको.

आ । विश्वऽवारा । अश्विना । गतम् । नः । प्र । तत् । स्थानम् । अवाचि । वाम् । पृथिव्याम् ।
अश्वः । न । वाजी । शुनऽपृष्ठः । अस्थात् । आ । यत् । सेदथुः । ध्रुवसे । न । योनिम् ॥१॥

वेङ्कट० हे विश्वैः वरणीयौ! अश्विनौ! आ गच्छतम् अस्मान्। प्र अवाचि प्रोक्तं अस्माभिः तत् स्थानम् अस्याम् पृथिव्याम् युवयोः। अस्माभिः तत् च स्थानं स्तीर्णबर्हिः, वाम् [१]अभ्यधिष्ठ्य अश्वः[२] इव बलवान् सुखपृष्ठः, तिष्ठति, आ सीदथः[३] यत् स्थानम्, यथा मनुष्यः ध्रुवावस्थानाय[३] योग्यम्[४] आसीदति ॥ १ ॥

सिषक्ति सा वां सुमतिश्चनिष्ठातापि घर्मो मनुषो दुरोणे ।
यो वां समुद्रान्त्सरितः पिपर्त्येतग्वा चिन्न सुयुजा युजानः ॥ २ ॥

सिसक्ति । सा । वाम् । सुऽमतिः । चनिष्ठा । अतापि । घर्मः । मनुषः । दुरोणे ।
यः । वाम् । समुद्रान् । सरितः । पिपर्ति । एतऽग्वा । चित् । न । सुऽयुजा । युजानः ॥ २ ॥

वेङ्कट० सेवते सा वाम् सुमतिः[५] अतिशयेन अन्नवती। तप्तः च घर्मः[६] मनुष्यस्य गृहे। यः घर्मः वाम् समुद्रान् [७]सरितः च[७] पारयति, गमयति[८] इत्यर्थः, अश्वौ इव सुयुक्तौ यज्ञे युज्यमानः[९] ॥ २ ॥

यानि स्थानान्यश्विना दधाथे दिवो यह्वीष्वोषधीषु विक्षु ।
नि पर्वतस्य मूर्धनि सदन्तेषं जनाय दाशुषे वहन्ता ॥ ३ ॥

यानि । स्थानानि । अश्विना । दधाथे इति । दिवः । यह्वीषु । ओषधीषु । विक्षु ।
नि । पर्वतस्य । मूर्धनि । सदन्ता । इषम् । जनाय । दाशुषे । वहन्ता ॥ ३ ॥

वेङ्कट० यानि आवासस्थानानि आत्मनः अश्विनौ![१०] कुरुतः दिवः आगतौ महतीषु[११] ओषधीषु प्रजासु च पर्वतस्य मूर्ध्नि नि वसन्तौ[१२] यजमानाय अन्नं च [१३]वहन्तौ। उत्तरत्र सम्बन्धः[१३] ॥ ३ ॥

चनिष्टं देवा ओषधीष्वप्सु यद्योग्या अश्नवैथे ऋषीणाम् ।
पुरूणि रत्ना दधतौ न्यस्मे अनु पूर्वाणि चख्यथुर्युगानि ॥ ४ ॥

चनिष्टम् । देवौ । ओषधीषु । अप्ऽसु । यत् । योग्याः । अश्नवैथे इति । ऋषीणाम् ।
पुरूणि । रत्ना । दधतौ । नि । अस्मे इति । अनु । पूर्वाणि । चख्यथुः । युगानि ॥ ४ ॥

वेङ्कट० चनिष्टम्[१४] इच्छतं हे देवौ! तासु ओषधीषु अप्सु च, यदा[१५] व्याप्नुथः योग्याः स्तुतीः

१-१. अभिक्षाश्रय वि²; अभिवक्ष अश्व अ¹ ल लभ. २. सिदथः वि² अ¹; सिदथः ल लभ. ३. सुवा° मूको. ४. युवमह्म् मूको. ५. °नती. वि² ल लभ ६. धर्मे मूको. ७. °त··· वि² अ¹. ८. °यन्ति मूको. ९. °मानाः वि² अ¹. १०. °श्विनः वि². ११. महीषु मूको. १२. °सन्तौ मूको. १३-१३. °दन्ता···स° वि² अ¹. १४. चन मूको. १५. यथा वि² अ¹.

ऋषीणाम् । बहूनि स्तनानि अस्मासु नि दधानौ अनु चरथः[1] गतान् दिवसान् । अनुख्यानम् अनुमननम्[2] । दिवसा गता निरर्थका इति बुद्धिम् अधुना धन प्रयच्छन्तौ कुरुतः[3] ॥ ४ ॥

शुश्रुवांसा चिदश्विना पुरूण्यभि ब्रह्माणि चक्षाथे ऋषीणाम् ।
प्रति प्र यातं वरमा जनायास्मे वामस्तु सुमतिश्चनिष्ठा ॥ ५ ॥

शुश्रुऽवांसा । चित् । अश्विना । पुरूणि । अभि । ब्रह्माणि । चक्षाथे इति । ऋषीणाम् ।
प्रति । प्र । यातम् । वरम् । आ । जनाय । अस्मे इति । वाम् । अस्तु । सुऽमतिः । चनिष्ठा ॥

वेङ्कट० शुश्रूषमाणौ एव अश्विनौ[4] ... . ॥ ५ ॥

यो वां यज्ञो नासत्या हविष्मान् कृतब्रह्मा समर्यो भवाति ।
उप प्र यातं वरमा वसिष्ठमिमा ब्रह्माण्यृच्यन्ते युवभ्याम् ॥ ६ ॥

यः । वाम् । यज्ञः । नासत्या । हविष्मान् । कृतऽब्रह्मा । सऽमर्यः । भवाति ।
उप । प्र । यातम् । वरम् । आ । वसिष्ठम् । इमा । ब्रह्माणि । ऋच्यन्ते । युवऽभ्याम् ॥ ६ ॥

वेङ्कट० य वाम् यज्ञ ॥ ६ ॥

इयं मनीषा इयमश्विना गीरिमां सुवृक्तिं वृषणा जुषेथाम् ।
इमा ब्रह्माणि युवयून्यग्मन् यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

इयम् । मनीषा । इयम् । अश्विना । गीः । इमाम् । सुऽवृक्तिम् । वृषणा । जुषेथाम् ।
इमा । ब्रह्माणि । युवऽयूनि । अग्मन् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥

वेङ्कट० ... स्तुतिः । इमाम् च स्तुतिम् वर्धितारौ ! सेवेथाम् । इमानि च हवींषि युवां कामयमानानि गच्छन्तु वामिति ॥ ७ ॥

[5]इति पञ्चमाष्टके पञ्चमाध्याये सप्तदशो वर्गः[5] ॥

[७१]

वसिष्ठो मैत्रावरुणिर्ऋषिः । अश्विनौ देवता । त्रिष्टुप् छन्दः ।

अप स्वसुरुषसो नग्जिहीते रिणक्ति कृष्णीररुषाय पन्थाम् ।
अश्वामघा गोमघा वां हुवेम दिवा नक्तं शरुमस्मद्युयोतम् ॥ १ ॥

अप । स्वसुः । उषसः । नक् । जिहीते । रिणक्ति । कृष्णीः । अरुषाय । पन्थाम् ।
अश्वऽमघा । गोऽमघा । वाम् । हुवेम । दिवा । नक्तम् । शरुम् । अस्मत् । युयोतम् ॥ १ ॥

---

१. °रयथु मूको. २. °मनुनम् मूको. ३. °न इति वि° अ°. ४. °नौ° मूको. ५-५. नास्ति मूको.

वेङ्कट० खगुः उषसः आगमनाय नक्त[1] भगिनि रात्रिम् आह । सा अप गच्छति[2] । 'हशद्वत्सा रुशती श्वेत्यागात्' (ऋ १,११३,२) इत्युक्तम्[3] । रेचयति पन्थानं रात्रिः आरोचमानाय आदित्याय । अस्मिन् काले वयम् हे अश्वधनौ![4] गोधनौ![5] वाम् हुवेम[6] । दिवा नक्तम् च अस्मत्तः हिंसकं पृथक् कुरुतम् ॥ १ ॥

उपायातं दाशुषे मर्त्याय रथेन वाममश्विना वहन्ता ।
युयुतमस्मदनिराममीवां दिवा नक्तं माध्वी त्रासीथां नः ॥ २ ॥

उपऽआयातम् । दाशुषे । मर्त्याय । रथेन । वामम् । अश्विना । वहन्ता ।
युयुतम् । अस्मत् । अनिराम् । अमीवाम् । दिवा । नक्तम् । माध्वी इति । त्रासीथाम् । नः ॥२॥

वेङ्कट० उपागच्छतम्[7] दाशुषे यजमानाय रथेन धनम् अश्विनौ! वहन्तौ । पृथक् कुरुतम् अस्मत्तः अनिराम् अनतिः प्राणनकर्मा[8] । श्वासकारिण्यशक्तिरनिरा । अमीवा च रोगविशेषः औदरः । दिवा नक्तम् च हे मधुमन्तौ![9] अस्मान् रक्षतम् ॥ २ ॥

आ वां रथमवमस्यां व्युष्टौ सुम्नायवो वृषणो वर्तयन्तु ।
स्यूमगभस्तिमृतयुग्भिरश्वैराश्विना वसुमन्तं वहेथाम् ॥ ३ ॥

आ । वाम् । रथम् । अवमस्याम् । विऽउष्टौ । सुम्नऽयवः । वृषणः । वर्तयन्तु ।
स्यूमऽगभस्तिम् । ऋतयुक्ऽभिः । अश्वैः । आ । अश्विना । वसुऽमन्तम् । वहेथाम् ॥ ३ ॥

वेङ्कट० आ वर्तयन्तु वाम् रथम् अवमस्याम् उषसि । अवमाऽद्यतनी[10] । सुखम् इच्छन्तः पुमांसः ऋत्विजः । अनुस्यूतरश्मिं यज्ञयोगिभिः[11] अश्वैः आ वहेथाम्[12] अश्विनौ! वसुमन्तम् रथम् ॥ ३ ॥

यो वां रथो नृपती अस्ति वोळ्हा त्रिवन्धुरो वसुमाँ उस्रयामा ।
आ न एना नासत्योप यातमभि यद् वां विश्वप्स्न्यो जिगाति ॥ ४ ॥

यः । वाम् । रथः । नृपती इति नृऽपती । अस्ति । वोळ्हा । त्रिऽवन्धुरः । वसुऽमान् । उस्रऽयामा ।
आ । नः । एना । नासत्या । उप । यातम् । अभि । यत् । वाम् । विश्वऽप्स्न्यः । जिगाति ॥४॥

वेङ्कट० यः वाम् रथः नृपती! भवति[13] वोळ्हा । वन्धुरं फलकासङ्घातः । त्रिवन्धुरः वसुमान् उत्सरणशीलगमनः । तेन अनेन अस्मान् उप आ यातम् नासत्यौ! । अभि गच्छति यस्मात् वाम् वसिष्ठ विश्वरूपः । नानाविधस्तुतिकरणात् वैश्वरूप्यम् । यद् वा विश्वप्स्न्यः व्यापकः[14] [15]विश्वस्य द्रष्टा[15] ॥४॥

---

१. नन् मूको; नक्तम् ल प्रस्तावः. २. अवग° मूको. ३. °त्युक्तः वि° अ°. ४. अश्विध° वि° अ° ल; अश्विनी लभ. ५. °नो मूको. ६. हुवे° मूको ७. उपग° मूको. ८. °प्राणान° लभ. ९. वसुम्° मूको १०. आव° वि°. ११. यज्ञयो° मूको. १२. °वहेथौ मूको. १३. भवन्ति मूको. १४. °कः भवति अ°. १५. °स्येति वि° ल लभ, °स्योपीति अ°.

युवं च्यवानं जरसोऽमुमुक्तं नि पेदव ऊहथुराशुमश्वम् ।
निरंहसस्तमसः स्पर्तमत्रिं नि जाहुषं शिथिरे धातमन्तः ॥ ५ ॥

युवम् । च्यवानम् । जरसः । अमुमुक्तम् । नि । पेदवे । ऊहथुः । आशुम् । अश्वम् ।
निः । अंहसः । तमसः । स्पर्तम् । अत्रिम् । नि । जाहुषम् । शिथिरे । धातम् । अन्तरिति ॥ ५ ॥

वेङ्कट० युवम् च्यवानम् 'जरया मोचितवन्तौ'[1]। पेदवे[2] च राज्ञे शीघ्रगन्तारम् अश्वम् आत्मीयम् 'नि ऊहथुः । निपतितम् उत्थापितवन्तौ'[3] आहन्तुः[4] तमसः अत्रिम् शततूरपु यन्त्रगृहेषु असुरैः[5] प्रक्षिप्तम् । जाहुषम् च राजानं शिथिरे तस्य राष्ट्रे पुनः निहितवन्तौ[6] ॥ ५ ॥

इयं मनीषा इयमश्विना गीरिमां सुवृक्तिं वृषणा जुषेथाम् ।
इमा ब्रह्माणि युवयून्यग्मन् यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

इयम् । मनीषा । इयम् । अश्विना । गीः । इमाम् । सुऽवृक्तिम् । वृषणा । जुषेथाम् ।
इमा । ब्रह्माणि । युवऽयूनि । अग्मन् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥

वेङ्कट० पूर्वं व्याख्याता (ऋ ७,७०,७ द्र) ॥ ६ ॥

[7]इति पञ्चमाष्टके पञ्चमाध्याये अष्टादशो वर्गः[7] ॥

[७२]

[7]वसिष्ठो मैत्रावरुणिर्ऋषिः । अश्विनौ देवता । त्रिष्टुप् छन्दः[7] ।

आ गोमता नासत्या रथेनाश्वावता पुरुश्चन्द्रेण यातम् ।
अभि वां विश्वा नियुतः सचन्ते स्पार्हया श्रिया तन्वा शुभाना ॥ १ ॥

आ । गोऽमता । नासत्या । रथेन । अश्वऽवता । पुरुऽचन्द्रेण । यातम् ।
अभि । वाम् । विश्वाः । निऽयुतः । सचन्ते । स्पार्हया । श्रिया । तन्वा । शुभाना ॥ १ ॥

वेङ्कट० आ यातम् गोमता हे नासत्यौ रथेन अश्ववता बहुसुवर्णेन । अभि सचन्ते वाम् विश्वाः वडवाः[8] स्पृहणीयया श्रिया अङ्गेन च शोभमानौ ॥ १ ॥

आ नो देवेभिरुप यातमर्वाक् सजोषसा नासत्या रथेन ।
युवोर्हि नः सख्या पित्र्याणि समानो बन्धुरुत तस्य वित्तम् ॥ २ ॥

१-१. 'रयामोऽमुञ्च' वि[1] अ[1], 'वन्तौ ल[1] लभ. २. एन वि[1] अ[1], वेवे ल[1] लभ. ३-३. 'शु उत्था' वि[1] अ[1], 'थु निष्म् वत्था ल[1] लभ. ४. अह' मूको. ५. असै सुरे वि[1] अ[1], असुर ल[1] लभ. ६. 'वन्त वि[1] अ[1], 'वन्तौ ल[1] लभ. ७-७. नास्ति मूको. ८. विधवा मूको.

आ । नः । देवेभिः । उप । यातम् । अर्वाक् । सऽजोषसा । नासत्या । रथेन ।
युवोः । हि । नः । सख्या । पित्र्याणि । समानः । बन्धुः । उत । तस्य । वित्तम् ॥ २ ॥

वेङ्कट० उप आ यातम् अर्वाक् अस्मान् देवैः सह सहतौ हे नासत्यौ! रथेन। युवोः हि नः सख्यानि पित्र्याणि क्रमागतानि। तथा बन्धुः च समानस्तुतिः। बन्धुः पितरः च वां स्तुवन्ति, वयं चेत्यर्थः। तं बन्धुम् वित्तम् इति ॥ २ ॥

उदु स्तोमासो अश्विनोरबुध्रञ्जामि ब्रह्माण्युषसश्च देवीः ।
आविवासन् रोदसी धिष्ण्येमे अच्छा विप्रो नासत्या विवक्ति ॥ ३ ॥

उत् । ऊँ इति । स्तोमासः । अश्विनोः । अबुध्रन् । जामि । ब्रह्माणि । उषसः । च । देवीः ।
आऽविवासन् । रोदसी इति । धिष्ण्ये इति । इमे इति । अच्छ । विप्रः । नासत्या । विवक्ति ॥

वेङ्कट० उत् अबुध्यत अश्विनोः स्तोमाः । भवति (?) इमे अश्विनौ इति ॥ ३ ॥

वि चेदुच्छन्त्यश्विना उषासः प्र वां ब्रह्माणि कारवो भरन्ते ।
ऊर्ध्वं भानुं सविता देवो अश्रेद् बृहदग्नयः समिधा जरन्ते ॥ ४ ॥

वि । च । इत् । उच्छन्ति । अश्विना । उषसः । प्र । वाम् । ब्रह्माणि । कारवः । भरन्ते ।
ऊर्ध्वम् । भानुम् । सविता । देवः । अश्रेत् । बृहत् । अग्नयः । समऽइधा । जरन्ते ॥ ४ ॥

वेङ्कट० वि उच्छन्ति च इत् अश्विनौ। उषसः। प्र भरन्ते युवयोः स्तोत्राणि स्तोतारः। ऊर्ध्वम् रश्मिम् देवः सविता श्रयति। महान्तः अग्नयः समिन्धनेन सह अस्मिन् काले युवयोः पारे स्तुवन्ते ॥ ४ ॥

आ पश्चातान्नासत्या पुरस्तादाश्विना यातमधरादुदक्तात् ।
आ विश्वतः पाञ्चजन्येन राया यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

आ । पश्चातात् । नासत्या । आ । पुरस्तात् । आ । अश्विना । यातम् । अधरात् । उदक्तात् ।
आ । विश्वतः । पाञ्चऽजन्येन । राया । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥

वेङ्कट० निगदसिद्धा ॥ ५ ॥

इति पञ्चमाष्टके पञ्चमाध्याये एकोनविंशो वर्गः ॥

[७३]

वसिष्ठो मैत्रावरुणिर्ऋषिः । अश्विनौ देवता । त्रिष्टुप् छन्दः ।

अतारिष्म तमसस्पारमस्य प्रति स्तोमं देवयन्तो दधानाः ।
पुरुदंसा पुरुतमा पुराजामर्त्या हवते अश्विना गीः ॥ १ ॥

---

१. टी मूको. २-२. नः...स॰ वि॰ अ॰. ३. विवक्ति ल प्रस्तावः. ४. इद॰ मूको.
५-५. नास्ति मूको

अतारिष्म । तमसः । पारम् । अस्य । प्रति । स्तोमम् । देवऽयन्तः । दधानाः ।
पुरुऽदंसा । पुरुऽतमा । पुराऽजा । अमर्त्या । हवते । अश्विना । गीः ॥ १ ॥

वेङ्कट० नैशस्य अस्य तमसः पारम् तीर्णवन्तः[1] प्रति दधानाः स्तोमम् देवकामाः । अस्मिन् काले पुरुकर्माणौ[2] बहुक्षपणौ शत्रूणां पुराणजातौ अमर्त्यौ ह्वयति वाक् अश्विनौ ॥ १ ॥

न्यु प्रियो मनुषः सादि होता नासत्या यो यजते वन्दते च ।
अश्नीतं मध्वो अश्विना उपाक आ वां वोचे विदथेषु प्रयस्वान् ॥ २ ॥

नि । ऊँ इति । प्रियः । मनुषः । सादि । होता । नासत्या । यः । यजते । वन्दते । च ।
अश्नीतम् । मध्वः । अश्विना । उपाके । आ । वाम् । वोचे । विदथेषु । प्रयस्वान् ॥ २ ॥

वेङ्कट० निषण्णो होतृषदने प्रियः होता मनुष्यस्य नासत्यौ यः यजति[3] स्तौति च । पिबतम् सोमम् अश्विनौ ! । अन्तिके आभिमुख्येन ब्रवीमि वाम् अहं यज्ञेषु हविष्मान् ॥ २ ॥

अहेम यज्ञं पथामुराणा इमां सुवृक्तिं वृषणा जुषेथाम् ।
श्रुष्टीवेव प्रेषितो वामबोधि प्रति स्तोमैर्जरमाणो वसिष्ठः ॥ ३ ॥

अहेम । यज्ञम् । पथाम् । उराणाः । इमाम् । सुऽवृक्तिम् । वृषणा । जुषेथाम् ।
श्रुष्टीवाऽइव । प्रऽइषितः । वाम् । अबोधि । प्रति । स्तोमैः । जरमाणः । वसिष्ठः ॥ ३ ॥

वेङ्कट० प्रेरयामः यज्ञम् उषसि पतताम् आगच्छतां देवानाम् उरुकर्माणः[4] उरु कर्म कुर्वाणाः । इमाम् स्तुतिं वृषणौ सेवेथाम् । क्षिप्रवान् इव प्रेषितः[5] दूतः वाम् प्रति अबोधि स्तोमैः स्तुवन्[6] वसिष्ठः ॥ ३ ॥

उप त्या वह्नी गमतो विशं नो रक्षोहणा संभृता वीळुपाणी ।
समन्धांस्यग्मत मत्सराणि मा नो मर्धिष्टमा गतं शिवेन ॥ ४ ॥

उप । त्या । वह्नी इति । गमतः । विशम् । नः । रक्षःऽहना । सम्ऽभृता । वीळुपाणी इति वीळुऽपाणी ।
सम् । अन्धांसि । अग्मत । मत्सराणि । मा । नः । मर्धिष्टम् । आ । गतम् । शिवेन ॥ ४ ॥

वेङ्कट० तौ वोढारौ अस्माकं प्रजाम् उप गच्छतः रक्षोहणौ हविर्भिः सम्भृतौ[7] दृढपाणी । सम् अगच्छन्त युवयोः मादकानि सोमाख्यानि । मा अस्मान् हिंसिष्टम् । आ गच्छतम् सुखेन प्रदिदिक्षतेन सह इति ॥ ४ ॥

---

१. °वन्तं मूको. २. उरु° वि° अ°. ३. °ति तं मूको. ४. °कर्मणा वि° ल छभ, °कर्माणा अ°. ५. प्रेरितः वि°. ६. स्तुव मूको. ७. °भृतौ मूको.

आ पश्चातान्नासत्या पुरस्तादाश्विना यातमधरादुदक्तात् ।
आ विश्वतः पाञ्चजन्येन राया यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

आ । पश्चातात् । नासत्या । आ । पुरस्तात् । आ । अश्विना । यातम् । अधरात् । उदक्तात् ।
आ । विश्वतः । पाञ्चऽजन्येन । राया । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥

वेङ्कट० ऋ ७,७२,५ द्र. ॥ ५ ॥

[1]इति पञ्चमाष्टके पञ्चमाध्याये विंशो वर्गः[1] ॥

[७४]

[1]वसिष्ठो मैत्रावरुणिर्ऋषिः । अश्विनौ देवता । प्रगाथः छन्दः (विषमा बृहत्यः, समाः सतोबृहत्यः)[1] ।

इमा उ वां दिविष्टय उस्रा हवन्ते अश्विना ।
अयं वामह्वेऽवसे शचीवसू विशंविशं हि गच्छथः ॥ १ ॥

इमाः । ऊँ इति । वाम् । दिविष्टयः । उस्रा । हवन्ते । अश्विना ।
अयम् । वाम् । अह्वे । अवसे । शचीवसू इति शचीऽवसू । विशम्ऽविशम् । हि । गच्छथः ॥१॥

वेङ्कट० इमाः उ[2] वाम् दिविष्टयः उषसो दिवम् इच्छन्ति इति उत्सरणशीलौ[3] हवन्ते हे अश्विनौ! । अयम् च वाम् ह्वयामि रक्षणाय प्रज्ञावसू! । युवाम् हि विशंविशम् गच्छथः, सर्वाः प्रजाः अभिगच्छतम्[4] ॥ १ ॥

युवं चित्रं ददथुर्भोजनं नरा चोदेथां सूनृतावते ।
अर्वाग् रथं समनसा नि यच्छतं पिबतं सोम्यं मधु ॥ २ ॥

युवम् । चित्रम् । ददथुः । भोजनम् । नरा । चोदेथाम् । सूनृताऽवते ।
अर्वाक् । रथम् । सऽमनसा । नि । यच्छतम् । पिबतम् । सोम्यम् । मधु ॥ २ ॥

वेङ्कट० युवां पूजनीयम् ददथुः[5] अन्नम् हे नरौ!, मह्यं च चोदयतम्[6] स्तुतिमते । अर्वाग् इति स्पष्टम् ॥ २ ॥

आ यातमुप भूषतं मध्वः पिबतमश्विना ।
दुग्धं पयो वृषणा जेन्यावसू मा नो मर्धिष्टमा गतम् ॥ ३ ॥

आ । यातम् । उप । भूषतम् । मध्वः । पिबतम् । अश्विना ।
दुग्धम् । पयः । वृषणा । जेन्यावसू इति । मा । नः । मर्धिष्टम् । आ । गतम् ॥ ३ ॥

१-१. नास्ति मूको. २. नास्ति वि[2]. ३. °शीलो मूको. ४. °च्छत वि[2] छ लभ; °च्छथ अ[1].
५. ददतुः मूको. ६. °दयं वि[1] छ लभ; °दयन् अ[1].

वेङ्कट० आ गच्छतम्, उप च भवतम्[1], सोमम् [2]च पिबतम्[2] अश्विनौ![3] दुग्धम् पयः च- हे वृषणौ! जेतव्यशत्रुधनौ![4], मा अस्मान् हिंसिष्टम्, आ गच्छतम् ॥ ३ ॥

अश्वा॑सो॒ ये वा॒मुप॑ दा॒शुषो॑ गृ॒हं यु॒वां दीय॑न्ति॒ बिभ्र॑तः ।
म॒क्षू॒युभि॑र्नरा॒ हये॑भिरश्विना॒ देवा॑ यातमस्म॒यू ॥ ४ ॥

अश्वा॑सः । ये । वा॒म् । उप॑ । दा॒शुषः॑ । गृ॒हम् । यु॒वाम् । दीय॑न्ति । बिभ्र॑तः ।
म॒क्षु॒युऽभिः॑ । न॒रा॒ । हये॑भिः । अ॒श्वि॒ना॒ । आ । दे॒वा॒ । या॒त॒म् । अ॒स्म॒यू॒ इत्य॑स्म॒ऽयू ॥ ४ ॥

वेङ्कट० अश्वासः ये युवयोः उप गच्छन्ति यजमानस्य गृहम् प्रति युवाम् रथे धारयन्तः। तैः क्षिप्रगमनकारिभिः हे नरौ! अश्वैः अश्विनौ! देवौ! आ यातम् अस्मत्कामौ[5] ॥ ४ ॥

अधा॑ ह॒ यन्तो॑ अ॒श्विना॒ पृक्षः॑ सचन्त सू॒रयः॑ ।
ता यं॑सतो म॒घव॑द्भ्यो ध्रु॒वं यश॑श्छ॒र्दिर॒स्मभ्यं॒ नास॑त्या ॥ ५ ॥

अध॑ । ह॒ । यन्तः॑ । अ॒श्विना॑ । पृक्षः॑ । स॒च॒न्त॒ । सू॒रयः॑ ।
ता । यं॒स॒तः॒ । म॒घव॑त्ऽभ्यः । ध्रु॒वम् । यशः॑ । छ॒र्दिः॑ । अ॒स्मभ्य॑म् । नास॑त्या ॥ ५ ॥

वेङ्कट० अथ खलु अभिगच्छन्तः अश्विनौ अन्नं सचन्ते स्तोतारः। तौ प्रयच्छतः हविष्मद्भ्यः ध्रुवम् अन्नम्, अस्मभ्यम् च गृहम् प्रयच्छतम् हे नासत्या! इति ॥ ५ ॥

प्र ये य॒युर॑वृ॒कासो॒ रथा॑ इव नृपा॒तारो॒ जना॑नाम् ।
उ॒त स्वेन॒ शव॑सा शूशुवु॒र्नर॑ उ॒त क्षि॑यन्ति सुक्षि॒तिम् ॥ ६ ॥

प्र । ये । य॒युः । अ॒वृ॒कासः॑ । रथाः॑ऽइव । नृ॒ऽपा॒तारः॑ । जना॑नाम् ।
उ॒त । स्वेन॑ । शव॑सा । शू॒शु॒वुः॒ । नरः॑ । उ॒त । क्षि॒य॒न्ति॒ । सु॒ऽक्षि॒तिम् ॥ ६ ॥

वेङ्कट० प्र यच्छन्ति ये वृकवर्जिताः शीघ्रम् रथाः इव नृणां रक्षितारः जनानाम् मध्ये अश्विनोः[6] स्तोतारः। [7]ते च[7] [8]स्वेन बलेन[8] वृद्धा भवन्ति, अपि च निवसन्ति सुनिवासम् ॥ ६ ॥

[9]इति पञ्चमाष्टके पञ्चमाध्याये एकत्रिंशो वर्गः[9] ॥

[७५]

[1]वसिष्ठो मैत्रावरुणिर्ऋषिः। उषा देवता। त्रिष्टुप् छन्दः[1]।

व्यु१॒॑षा आ॑वो दिवि॒जा ऋ॒तेना॑विष्कृण्वा॒ना म॑हि॒मान॒मागा॑त् ।
अप॒ द्रुह॒स्तम॒ आव॒रजु॑ष्ट॒मङ्गि॑रस्तमा प॒थ्या॑ अजीगः ॥ १ ॥

---

१. इव[1] वि[2]. १-२. पवितम् वि[1]; परितम् अ[1]; च पितम् ल एम. ३. अश्विना वि[2] अ[1]. ४. जेतव्यं शत्रुधनौ मूको. ५. [0]कामम् अ[1]. ६. अश्विनौ मूको. ७-७. स्तेन मूको; स्वेन ल महताः. ८. स्तवनेन अ[1]; स्वन व[2] एम. ९-९. नास्ति मूको.

वि । उषाः । आवः । दिविऽजाः । ऋतेन । आविःऽकृण्वाना । महिमानम् । आ । अगात् ।
अप । द्रुहः । तमः । आवः । अजुष्टम् । अङ्गिरःऽतमा । पथ्याः । अजीगरिति ॥ १ ॥

वेङ्कट० उषाः त्रिविधं गच्छति दिवि जाता सत्येन प्रकाशेन सह । अन्धकाराऽपनयनात् सत्यस्य प्रकाशनम् । प्रकाशयन्ती महिमानम् आ जगाम । असाता[1] च रक्षांसि तमः च आत्मनः अपयाच्यम् अप गमयति । सा इयम्[2] अङ्गिरस्तमा । पुरा उषाः अङ्गिरःसु जज्ञे । मार्गान् तमसा तिरोहितान् तदपनयनेन उज्जहारेति । तेजांसि वा पथ्याः इति ॥ १ ॥

महे नो अद्य सुवितायं बोध्युषो महे सौभगाय प्र यन्धि ।
चित्रं रयिं यशसं धेह्यस्मे देवि मर्तेषु मानुषि श्रवस्युम् ॥ २ ॥

महे । नः । अद्य । सुविताय । बोधि । उषः । महे । सौभगाय । प्र । यन्धि ।
चित्रम् । रयिम् । यशसम् । धेहि । अस्मे इति । देवि । मर्तेषु । मानुषि । श्रवस्युम् ॥ २ ॥

वेङ्कट० महते अस्माकम् अद्य अभ्युदयाय प्रबुद्धा भव[3] । तथा उषः! महते सौभाग्याय धनम् अस्मभ्यम् प्र यच्छ । चित्रम् रयिम् यशस्विनम् प्रयच्छ अस्मभ्यम् । देवि! मर्त्येषु मां प्रथितं कुरु धनप्रदानेन 'मनुष्यहिते! कीर्तिमिच्छन्तम्' ॥ २ ॥

एते त्ये भानवो दर्शतायाश्चित्रा उषसो अमृतास आगुः ।
जनयन्तो दैव्यानि व्रतान्यापृणन्तो अन्तरिक्षा व्यस्थुः ॥ ३ ॥

एते । त्ये । भानवः । दर्शतायाः । चित्राः । उषसः । अमृतासः । आ । अगुः ।
जनयन्तः । दैव्यानि । व्रतानि । आऽपृणन्तः । अन्तरिक्षा । वि । अस्थुः ॥ ३ ॥

वेङ्कट० ते[5] इमे रश्मयः दर्शनीयायाः उषसः चित्राः मरणवर्जिताः प्रादुरभवन् । जनयन्तः यज्ञान् आपूरयन्तः[6] च अन्तरिक्षम् वि तिष्ठन्ते ॥ ३ ॥

एषा स्या युजाना पराकात् पञ्च क्षितीः परि सद्यो जिगाति ।
अभिपश्यन्ती वयुना जनानां दिवो दुहिता भुवनस्य पत्नी ॥ ४ ॥

एषा । स्या । युजाना । पराकात् । पञ्च । क्षितीः । परि । सद्यः । जिगाति ।
अभिऽपश्यन्ती । वयुना । जनानाम् । दिवः । दुहिता । भुवनस्य । पत्नी ॥ ४ ॥

वेङ्कट० सा एषा उषाः युञ्जाना दूरात् पञ्च जनान् सद्यः एव 'परि गच्छति' दर्शयन्ती[8] मार्गान् जनानाम् दिवः दुहिता भुवनस्य पालयित्री ॥ ४ ॥

---

१. °तानि वि[1] अ[1]; °ता छ लभ. २. एवम् अ[1]. ३. भवत वि[1] अ[1]. ४-४. °ते···गच्छत वि[1] अ[1].
५. नास्ति वि[2]; एते अ[1] ल लभ. ६. पू° छ लभ. ७-७. परीच्छ° वि[1] ल, परिच्छ° अ[1] लभ.
८. नास्ति वि[2] अ[1]; दर्शनीय छ लभ.

वाजिनीवती सूर्यस्य योषा चित्रामघा राय ईशे वसूनाम् ।
ऋषिष्टुता जरयन्ती मघोन्युषा उच्छति वह्निभिर्गृणाना ॥ ५ ॥

वाजिनीऽवती । सूर्यस्य । योषा । चित्रऽमघा । रायः । ईशे । वसूनाम् ।
ऋषिऽस्तुता । जरयन्ती । मघोनी । उषाः । उच्छति । वह्निऽभिः । गृणाना ॥ ५ ॥

वेङ्कट० अन्नवती सूर्यस्य योषा चित्रधना धनस्य ईशे वसूनाम् च । वसूनि वासयन्ति[1] इति रश्मयः । ऋषिस्तुता[2] सर्वं भूतजातम् जरयन्ती[3] धनवती उषाः उच्छति वोढृभिः स्तोतृभिः स्तूयमाना ॥ ५ ॥

प्रति द्युतानामरुषासो अश्वाश्चित्रा अदृश्रन्नुषसं वहन्तः ।
याति शुभ्रा विश्वपिशा रथेन दधाति रत्नं विधते जनाय ॥ ६ ॥

प्रति । द्युतानाम् । अरुषासः । अश्वाः । चित्राः । अदृश्रन् । उषसम् । वहन्तः ।
याति । शुभ्रा । विश्वऽपिशा । रथेन । दधाति । रत्नम् । विधते । जनाय ॥ ६ ॥

वेङ्कट० प्रति अदृश्रन्[4] द्योतमानाम् आरोचमानाः अश्वाः चित्राः उषसम् वहन्तः । याति शोभमाना विश्वरूपा[5] रथेन । दधाति रत्नम् परिचरते जनाय ॥ ६ ॥

सत्या सत्येभिर्महती महद्भिर्देवी देवेभिर्यजता यजत्रैः ।
रुजद् दृळ्हानि दददुस्रियाणां प्रति गाव उषसं वावशन्त ॥ ७ ॥

सत्या । सत्येभिः । महती । महत्ऽभिः । देवी । देवेभिः । यजता । यजत्रैः ।
रुजत् । दृळ्हानि । ददत् । उस्रियाणाम् । प्रति । गावः । उषसम् । वावशन्त ॥ ७ ॥

वेङ्कट० सत्या सत्यैः महती च महद्भिः देवी देवैः यष्टव्या यष्टव्यैः सह विनाशयति दृढानि[6] तमांसि, ददाति च[7] रश्मीन् । रश्मयश्च उषसम्[8] अत्यन्तम् प्रति कामयन्ते ॥

नू नो गोमद् वीरवद् धेहि रत्नमुषो अश्वावत् पुरुभोजो अस्मे ।
मा नो बर्हिः पुरुषता निदे कर्यूयं पात स्वस्तिभिः सदा नः ॥ ८ ॥

नु । नः । गोऽमत् । वीरऽवत् । धेहि । रत्नम् । उषः । अश्वऽवत् । पुरुऽभोजः । अस्मे इति ।
मा । नः । बर्हिः । पुरुषता । निदे । कः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ८ ॥

वेङ्कट० क्षिप्रम् अस्मभ्यम् गोमत् वीरवत् च धेहि रत्नम् उषः । अश्ववत् बहुभकारं भोक्तव्यम् अस्माभिः । मा अस्माकं यज्ञम् जनतायाम् निन्दायै कार्षीः[9] ॥ ८ ॥

[10]इति पञ्चमाष्टके पञ्चमाध्याये द्वाविंशो वर्गः[10] ॥

---

१. योषा[?] मूको. २. °ष्टुताः ल. ३. जनयन्ती मूको. ४. नास्ति वि[?] अ[?]. ५. °पा धनेन अ[?]. ६. दृढानि अ[?]. ७. नास्ति वि[?]. ८. औषसम् ल. ९. पी वि[?]; पीड़ अ[?]; कर्षी ल [?]. १०-१०. नास्ति मूको.

[७६]

[1]वसिष्ठो मैत्रावरुणिर्ऋषिः । उषा देवता । त्रिष्टुप् छन्दः[1]।

उदु ज्योतिरमृतं विश्वजन्यं विश्वानरः सविता देवो अश्रेत् ।
क्रत्वा देवानामजनिष्ट चक्षुराविरकर्भुवनं विश्वमुषाः ॥ १ ॥

उत् । ऊँ इति । ज्योतिः । अमृतम् । विश्वऽजन्यम् । विश्वानरः । सविता । देवः । अश्रेत् ।
क्रत्वा । देवानाम् । अजनिष्ट । चक्षुः । आविः । अकः । भुवनम् । विश्वम् । उषाः ॥ १ ॥

वेङ्कट० यास्क —'उत् अशिश्रियत् ज्योतिः अमृतम् सर्वजन्यम् विश्वानरः सविता देवः' (या ११,१०)। क्रत्वा रश्मिना उपज्ञाक्यम् देवानाम् चक्षुः अजनिष्ट। आविः करोति भुवनम्[2] सर्वम् उषा इति ॥ १ ॥

प्र मे पन्था देवयाना अदृश्रन्नमर्धन्तो वसुभिरिष्कृतासः ।
अभूदु केतुरुषसः पुरस्तात् प्रतीच्यागादधि हर्म्येभ्यः ॥ २ ॥

प्र । मे । पन्थाः । देवऽयानाः । अदृश्रन् । अमर्धन्तः । वसुऽभिः । इष्कृतासः ।
अभूत् । ऊँ इति । केतुः । उषसः । पुरस्तात् । प्रतीची । आ । अगात् । अधि । हर्म्येभ्यः ॥

वेङ्कट० प्र अदृश्यन्त मम पन्थानः देवयानाः रश्मयः अहिंसन्तः वसुभिः देवैः इष्कृताः[3]। भवति केतुः प्रज्ञानं रश्मिः उषसः पुरस्तात्। अभिमुखम् आ गच्छति उषाः उच्छ्रितेभ्यो देशेभ्यः ॥ २ ॥

तानीदहानि बहुलान्यासन् या प्राचीनमुदिता सूर्यस्य ।
यतः परि जार इवाचरन्त्युषो ददृक्षे न पुनर्यतीव ॥ ३ ॥

तानि । इत् । अहानि । बहुलानि । आसन् । या । प्राचीनम् । उत्ऽइता । सूर्यस्य ।
यतः । परि । जारःऽइव । आऽचरन्ती । उषः । ददृक्षे । न । पुनः । यतीऽइव ॥ ३ ॥

वेङ्कट० तानि एव अहानि विस्तृतानि भवन्ति, यानि अहानि सूर्यस्य उद्यतः[4] प्रागेव उदितानि आसन्। यस्मात् त्वम् जारः इव आचरन्ती उषः! न पारं दृश्यसे न क्षणमात्रं तिष्ठसि, यथा यती[5] देशान्तरं गच्छन्ती काचिद्, आगता तदानीम् एव गच्छति। यथा वा जारः तद्वत् त्वं च गत्वा ततोऽपि[6] प्रादुर्भवन्ती[7] इति। ॥ ३ ॥

त इद् देवानां सधमाद आसन्नृतावानः कवयः पूर्व्यासः ।
गूळ्हं ज्योतिः पितरो अन्वविन्दन्त्सत्यमन्त्रा अजनयन्नुषासम् ॥ ४ ॥

१-१. नास्ति मूको. २. इवनम् वि[2], भवनम् अ[1] ल लभ. ३. इवष्कृता अ[1] लभ. ४. उद्योत वि[1] ल लभ. ५. यतीति ल लभ, यतीति वि[2] अ ल प्रस्ताव. ६. °तो नि मूको. ७. °भवसि ल प्रस्ताव.

ते । इत् । देवानाम् । सधऽमादः । आसन् । ऋतऽवानः । कवयः । पूर्व्यासः ।
गूळ्हम् । ज्योतिः । पितरः । अनु । अविन्दन् । सत्यऽमन्त्राः । अजनयन् । उषसम् ॥ ४ ॥

वेङ्कट० ते खलु देवानाम् सधमादः अभवन् । यज्ञवन्तः कवयः पुराणाः कर्माणि अनुतिष्ठन्ति । गूढम् ज्योतिः उषआख्यं पालयितारः देवाः अनु अविन्दन् । सत्यमन्त्राः सत्यस्तुतयः जनयन्तु उषसम् । यद् वा वसिष्ठस्य पितरः स्तुतिभिः उषसम् अविन्दन् अजनयन् चेति ॥ ४ ॥

समान ऊर्वे अधि संगतासः सं जानते न यतन्ते मिथस्ते ।
ते देवानां न मिनन्ति व्रतान्यमर्धन्तो वसुभिर्यादमानाः ॥ ५ ॥

समाने । ऊर्वे । अधि । सम्ऽगतासः । सम् । जानते । न । यतन्ते । मिथः । ते ।
ते । देवानाम् । न । मिनन्ति । व्रतानि । अमर्धन्तः । वसुऽभिः । यादमानाः ॥ ५ ॥

वेङ्कट० समाने साधारणे ऊर्वे वाडवे अग्नौ उषसः निदानभूते[1] सङ्गताः सम् जानते । न च मिथः यतन्ते संयत्ताः[2] ते रश्मयः । ते देवानाम् यज्ञाख्यानि कर्माणि न हिंसन्ति अहिंसन्तः वसुभिः देवैः प्रेर्यमाणाः ॥ ५ ॥

प्रति त्वा स्तोमैरीळते वसिष्ठा उषर्बुधः सुभगे तुष्टुवांसः ।
गवां नेत्री वाजपत्नी न उच्छोषः सुजाते प्रथमा जरस्व ॥ ६ ॥

प्रति । त्वा । स्तोमैः । ईळते । वसिष्ठाः । उषःऽबुधः । सुऽभगे । तुस्तुऽवांसः ।
गवाम् । नेत्री । वाजऽपत्नी । नः । उच्छ । उषः । सुऽजाते । प्रथमा । जरस्व ॥ ६ ॥

वेङ्कट० प्रति स्तुवन्ति त्वाम् स्तोमैः वसिष्ठाः उषसि प्रबुध्यमानाः हे सुधने![3] स्तुवन्तः । पशूनाम् नेत्री अन्नस्य पालयित्री अन्नपतिका[4] वा अस्मदर्थं वि उच्छ । उषः! शोभनजनने! मुख्या स्तूयस्व स्तुता भवति ॥ ६ ॥

एषा नेत्री राधसः सूनृतानामुषा उच्छन्ती रिभ्यते वसिष्ठैः ।
दीर्घश्रुतं रयिमस्मे दधाना यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

एषा । नेत्री । राधसः । सूनृतानाम् । उषाः । उच्छन्ती । रिभ्यते । वसिष्ठैः ।
दीर्घऽश्रुतम् । रयिम् । अस्मे इति । दधाना । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥

वेङ्कट० एषा अन्नस्य वाचां च [5]नेत्री उषाः[5] व्युच्छन्ती स्तूयते वसिष्ठैः दीर्घकालं श्रूयमाणम् धनम् अस्मभ्यम् दधाना इति ॥ ७ ॥

[6]इति पञ्चमाष्टके पञ्चमाध्याये त्रयोविंशो वर्गः[6] ॥

---

1. निद्रान° मूको. 2. न संय° वि[1]. 3. सुधनैः वि[1]. 4. °वतीका मूको. 5-5. नेत्र्युषा मूको. 6-6. नास्ति मूको.

[७७]

[1]वसिष्ठो मैत्रावरुणिर्ऋषिः । उषा देवता । त्रिष्टुप् छन्दः[1] ।

उपो॑ रुरुचे युव॒तिर्न योषा॒ विश्वं॑ जी॒वं प्र॑सु॒वन्ती॑ च॒रायै॑ ।
अभू॑द॒ग्निः स॒मिधे॒ मानु॑षाणा॒मक॒र्ज्योति॒र्बाध॑माना॒ तमां॑सि ॥ १ ॥

उपो॒ इति॑ । रु॒रु॒चे । यु॒व॒तिः । न । योषा॑ । विश्व॑म् । जी॒वम् । प्र॒ऽसु॒वन्ती॑ । च॒रायै॑ ।
अभू॑त् । अ॒ग्निः । स॒म्ऽइधे॑ । मानु॑षाणाम् । अक॑ः । ज्योतिः॑ । बाध॑माना । तमां॑सि ॥ १ ॥

वेङ्कट० उप एव रुरुचे युवतिः इव स्त्री विश्वम् जीवम् प्रेरयन्ती चरणार्थम् । तस्मिन् काले अभूत् अग्निः समिन्धनाय मानुषाणाम् । करोति ज्योतिः बाधमाना[2] तमांसि ॥ १ ॥

विश्वं॑ प्र॒तीची॑ स॒प्रथा॒ उद॑स्था॒द् रुश॒द् वासो॒ बिभ्र॑ती शु॒क्रम॑श्वैत् ।
हिर॑ण्यवर्णा सु॒दृशी॑कसंदृ॒ग् गवां॑ मा॒ता ने॒त्र्यह्ना॑मरोचि ॥ २ ॥

विश्व॑म् । प्र॒तीची॑ । स॒ऽप्रथा॑ः । उत् । अ॒स्था॒त् । रुश॑त् । वास॑ः । बिभ्र॑ती । शु॒क्रम् । अ॒श्वै॒त् ।
हिर॑ण्यऽवर्णा । सु॒दृशी॑कऽसंदृक् । गवा॑म् । मा॒ता । ने॒त्री । अह्ना॑म् । अ॒रो॒चि॒ ॥ २ ॥

वेङ्कट० विश्वम् भूतम् अभिमुखी सर्वतः पृथुतमा उत् अतिष्ठत् । श्वेतम् वासः बिभ्रती दीप्तिमत्[3] ज्योतिः आवर्धयते[4] । हिरण्यवर्णा सुदर्शीकसन्दर्शना ज्योतिषाम् माता अह्नाम् नेत्री दीप्यते ॥ २ ॥

दे॒वानां॒ चक्षुः॑ सु॒भगा॒ वह॑न्ती श्वे॒तं नय॑न्ती सु॒दृशी॑क॒मश्व॑म् ।
उ॒षा अ॑दर्शि र॒श्मिभि॒र्व्य॑क्ता चि॒त्राम॑घा॒ विश्व॒मनु॒ प्रभू॑ता ॥ ३ ॥

दे॒वाना॑म् । चक्षु॑ः । सु॒ऽभगा॑ । वह॑न्ती । श्वे॒तम् । नय॑न्ती । सु॒ऽदृशी॑कम् । अश्व॑म् ।
उ॒षाः । अ॒द॒र्शि॒ । र॒श्मिऽभि॑ः । विऽअ॑क्ता । चि॒त्रऽम॑घा । विश्व॑म् । अनु॑ । प्रऽभू॑ता ॥ ३ ॥

वेङ्कट० देवानाम् चक्षुः आदित्यम् आह्निकं वा तेजः वहन्ती सुधना श्वेतम् सुदर्शनम् आत्मीयम् अश्वम् नयन्ती उषाः अदर्शि रश्मिभिः व्यज्यमाना चित्रधना सर्वं भूतजातं लक्ष्यीकृत्य[5] प्रादुर्भूतेति ॥ ३ ॥

अन्ति॑वामा दू॒रे अ॒मित्र॑मुच्छो॒र्वीं गव्यू॑ति॒मभ॑यं कृधी नः ।
या॒वय॒ द्वेष॒ आ भ॑रा॒ वसू॑नि चो॒दय॒ राधो॑ गृण॒ते म॑घोनि ॥ ४ ॥

१-१. नास्ति मूको. २. बाधमाना मूको, बाधमानम् ख प्रस्तावः ३. दीप्तिमिति क वि[1]; दीप्तिमिति अ[2] लख, ४. आवर्तय° वि[2]. ५ लक्षीकृ° वि[2] अ[1].

अन्तिऽवामा । दूरे । अमित्रम् । उच्छ । उर्वीम् । गव्यूतिम् । अभयम् । कृधि । नः ।
युवय । द्वेषः । आ । भर । वसूनि । चोदय । राधः । गृणते । मघोनि ॥ ४ ॥

वेङ्कट० सन्निकृष्टधना अमित्रम् दूरे अस्माकं वि उच्छ । यथा अमित्रो दूरे भवति तथा व्युच्छेः इत्यर्थः । विस्तीर्णं गोमार्गम् अभयम् च अस्माकम् कुरु । पृथक् कुरु च शत्रुम्, आ भर धनानि, चोदय अन्नं स्तुवते मह्यम् हे उषः! ॥ ४ ॥

अस्मे श्रेष्ठेभिर्भानुभिर्वि भाह्युषो देवि प्रतिरन्ती न आयुः ।
इषं च नो दधती विश्ववारे गोमदश्वावद् रथवच्च राधः ॥ ५ ॥

अस्मे इति । श्रेष्ठेभिः । भानुऽभिः । वि । भाहि । उषः । देवि । प्रऽतिरन्ती । नः । आयुः ।
इषम् । च । नः । दधती । विश्वऽवारे । गोऽमत् । अश्वऽवत् । रथऽवत् । च । राधः ॥ ५ ॥

वेङ्कट० अस्माकं श्रेष्ठैः भानुभिः व्युष्टा भव उषः । देवि । वर्धयन्ती[1] अस्माकम् आयुः, अन्नम् च नः प्रयच्छन्ती[2] हे विश्वैर्वरणीये![3] गवादियुक्तं धनम् च ॥ ५ ॥

यां त्वा दिवो दुहितर्वर्धयन्त्युषः सुजाते मतिभिर्वसिष्ठाः ।
सास्मासु धा रयिमृष्वं बृहन्तं यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

याम् । त्वा । दिवः । दुहितः । वर्धयन्ति । उषः । सुऽजाते । मतिऽभिः । वसिष्ठाः ।
सा । अस्मासु । धाः । रयिम् । ऋष्वम् । बृहन्तम् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥

वेङ्कट० निगदसिद्धेति ॥ ६ ॥

[4]इति पञ्चमाष्टके पञ्चमाध्याये चतुर्विंशो वर्गः[4] ॥

[७८]

[5]वसिष्ठो मैत्रावरुणिर्ऋषिः । उषा देवता । त्रिष्टुप् छन्दः[5] ।

प्रति केतवः प्रथमा अदृश्रन्नूर्ध्वा अस्या अञ्जयो वि श्रयन्ते ।
उषो अर्वाचा बृहता रथेन ज्योतिष्मता वाममस्मभ्यं वक्षि ॥ १ ॥

प्रति । केतवः । प्रथमाः । अदृश्रन् । ऊर्ध्वाः । अस्याः । अञ्जयः । वि । श्रयन्ते ।
उषः । अर्वाचा । बृहता । रथेन । ज्योतिष्मता । वामम् । अस्मभ्यम् । वक्षि ॥ १ ॥

वेङ्कट० 'प्रति अदृश्यन्त' मुख्याः रश्मयः । ऊर्ध्वाः उषसः अञ्जयः विविधं सेवन्ते जनाः(?) । अञ्जयः रश्मयः । हे उषः! अभिमुखेन[6] महता रथेन ज्योतिष्मता धनम् अस्मभ्यम् वह ॥ १ ॥

---

1. °यन्ति वि°. 2. °च्छन्ति मूको. 3. विश्वैर्वरणीये वि° अ°; विश्वैर्वरणीये ल भम. 4-4. नास्ति मूको. 5-5. नास्ति मूको. 6. अभिमुखेन ल भम. — 5-5. प्रति दृश्यन्त वि° अ°; प्रत्यदृश्यन् ल भम.

प्रति षीमग्निर्जरते समिद्धः प्रति विप्रासो मतिभिर्गृणन्तः ।
उषा याति ज्योतिषा बाधमाना विश्वा तमांसि दुरिताप देवी ॥ २ ॥

प्रति । सीम् । अग्निः । जरते । सम्ऽइद्धः । प्रति । विप्रासः । मतिऽभिः । गृणन्तः ।
उषाः । याति । ज्योतिषा । बाधमाना । विश्वा । तमांसि । दुःऽइता । अप । देवी ॥ २ ॥

वेङ्कट० सर्वतः समिद्धः अग्निः प्रति स्तूयते । [1]तथा विप्राश्च[1] स्तुतिभिः उपसः स्तुवन्तो जनैः प्रति स्तूयन्ते । उषाः गच्छति विश्वानि तमांसि दुरितानि च ज्योतिषा अप बाधमाना देवी इति ॥ २ ॥

एता उ त्याः प्रत्यदृश्रन् पुरस्ताज्ज्योतिर्यच्छन्तीरुषसो विभातीः ।
अजीजनन्त्सूर्यं यज्ञमग्निमपाचीनं तमो अगादजुष्टम् ॥ ३ ॥

एताः । ऊँ इति । त्याः । प्रति । अदृश्रन् । पुरस्तात् । ज्योतिः । यच्छन्तीः । उषसः । विऽभातीः ।
अजीजनन् । सूर्यम् । यज्ञम् । अग्निम् । अपाचीनम् । तमः । अगात् । अजुष्टम् ॥ ३ ॥

वेङ्कट० ताः एताः पुरस्तात् प्रति दृश्यन्ते ज्योतिः यच्छन्त्यः[2] उषसः व्युच्छन्त्यः । ताः इमाः अजीजनन् सूर्यम् यज्ञम् अग्निम् च । अवाचीनम्[3] तमः अगच्छत् आगतायाम् उषसि अशोभनम् ॥ ३ ॥

अचेति दिवो दुहिता मघोनी विश्वे पश्यन्त्युषसं विभातीम् ।
आस्थाद् रथं स्वधया युज्यमानमा यमश्वासः सुयुजो वहन्ति ॥ ४ ॥

अचेति । दिवः । दुहिता । मघोनी । विश्वे । पश्यन्ति । उषसम् । विऽभातीम् ।
आ । अस्थात् । रथम् । स्वधया । युज्यमानम् । आ । यम् । अश्वासः । सुऽयुजः । वहन्ति ॥

वेङ्कट० ज्ञायते दिवः दुहिता उषाः । विश्वे पश्यन्ति उषसम् व्युच्छन्तीम्[4] । सा इयम् आ तिष्ठति रथम् बलेन युज्यमानम्, यम्[5] रथम् आ वहन्ति अश्वाः सुयुक्ताः ॥ ४ ॥

प्रति त्वाद्य सुमनसो बुधन्तास्माकासो मघवानो वयं च ।
तिल्विलायध्वमुषसो विभातीर्यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

प्रति । त्वा । अद्य । सुऽमनसः । बुधन्त । अस्माकासः । मघऽवानः । वयम् । च ।
तिल्विलायध्वम् । उषसः । विऽभातीः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥

वेङ्कट० प्रति अबुध्यन्त[6] अद्य त्वाम् आगताम् सुमनसः स्तोतारः अस्मदीयाः हविष्मन्तः वयम्

1-1. तथापि प्राग्नः वि[1] अ[1]. 2. यच्छ° वि[1]. 3. अपाचीनम् इ प्रस्तावः. 4. अव्युच्छन्तीम् वि[1] इ इभ; अव्युच्छतीम् अ[1]. 5. नास्ति मूको. 6. अनुबुध्यन्त अ[1]; बुध्यन्त (°न्त इभ.) इ इभ.

च। हे उषः[1]! तिल्विलेवाऽऽचरत्[2] व्युच्छन्ती। यथा भद्रे क्षेत्रे निमिता[3] तिल्विला प्ररोहति तथा बहुशाखा प्रादुर्भवतीति ॥ ५ ॥

[4]इति पञ्चमाष्टके पञ्चमाध्याये पञ्चविंशो वर्गः[4] ॥

[७९]

[1]वसिष्ठो मैत्रावरुणिर्ऋषिः। उषा देवता। त्रिष्टुप् छन्दः[1]।

व्युँ१षा आवः पथ्या३ जनानां पञ्च क्षितीर्मानुषीर्बोधयन्ती।
सुसंदृग्भिरुक्षभिर्भानुमश्रेद् वि सूर्यो रोदसी चक्षसावः ॥ १ ॥

वि। उषाः। आवः। पथ्या। जनानाम्। पञ्च। क्षितीः। मानुषीः। बोधयन्ती।
सुसन्दृक्ऽभिः। उक्षऽभिः। भानुम्। अश्रेत्। वि। सूर्यः। रोदसी इति। चक्षसा। आवरित्यावः ॥

वेङ्कट० वि गमयति उषा मार्गान् जनानाम् रश्मीन् वा[2] पञ्च क्षितीः[3] मानुषीः बोधयन्ती[3]। सुसन्दर्शनैः सेक्तृभिः रश्मिभिः दीप्तं श्रयति। वि आवृणोति सूर्यः द्यावापृथिव्यौ तेजसा ॥१॥

व्यञ्जते दिवो अन्तेष्वक्तून् विशो न युक्ता उषसो यतन्ते।
सं ते गावस्तम आ वर्तयन्ति ज्योतिर्यच्छन्ति सवितेव बाहू ॥ २ ॥

वि। अञ्जते। दिवः। अन्तेषु। अक्तून्। विशः। न। युक्ताः। उषसः। यतन्ते।
सम्। ते। गावः। तमः। आ। वर्तयन्ति। ज्योतिः। यच्छन्ति। सविताऽइव। बाहू इति ॥२॥

वेङ्कट० प्रकाशयन्ति अन्तरिक्षस्य पर्यन्तेषु अञ्जनसाधनान् रश्मीन्। मनुष्या इव युक्ता कार्येषु उषसः[4] प्रयत्नं कुर्वन्ति। सम् आ वर्तयन्ति पिण्डीकुर्वन्ति तव रश्मयः तमः। ज्योतिः च यच्छन्ति। यथा सविता दधन् आत्मीयौ [5]बाहू यच्छति[5] ॥ २ ॥

अभूदुषा इन्द्रतमा मघोन्यजीजनत् सुविताय श्रवांसि।
वि दिवो देवी दुहिता दधात्यङ्गिरस्तमा सुकृते वसूनि ॥ ३ ॥

अभूत्। उषाः। इन्द्रऽतमा। मघोनी। अजीजनत्। सुविताय। श्रवांसि।
वि। दिवः। देवी। दुहिता। दधाति। अङ्गिरःऽतमा। सुऽकृते। वसूनि ॥ ३ ॥

वेङ्कट० अभूत् उषा ईश्वरतमा धनवती। अजीजनत् अभ्युदयाय अन्नानि। दिवः दुहिता देवी वि दधाति अङ्गिरमा वरिष्ठा[6] सुकर्मणे धनानि ॥ ३ ॥

तावदुषो राधो अस्मभ्यं रास्व यावत् स्तोतृभ्यो अरदो गृणाना।
यां त्वा जज्ञुर्वृषभस्या रवेण वि दृळ्हस्य दुरो अद्रेरौर्णोः ॥ ४ ॥

---

1. °वेषाचरत् मूको. 2. व्युषा स प्रस्ताव. 3-3. नास्ति मूको. 4. वा मूको. 5. °पति मूको. 6. उषस मूको. 7-7. बाहू(°हू लभ.)भ्यां वर्तन्ति मूको. 8. वसिष्ठाः मूको.

तावत् । उषः । राधः । अस्मभ्यम् । रास्व । यावत् । स्तोतृऽभ्यः । अरदः । गृणाना ।
याम् । त्वा । जज्ञुः । वृषभस्य । रवेण । वि । दृळहस्य । दुरः । अद्रेः । और्णोः ॥ ४ ॥

वेङ्कट० तावत् उषः। अन्नम् अस्मभ्यम् देहि, यावत् स्तोतृभ्यः प्रादाः स्तूयमाना। याम्[1] त्वाम् आगतां जानन्ति वृषभस्य उषसि शब्दयतः[2] रवेण, सा 'वि और्णोः[3] दृळहस्य[4] शिलोच्चयस्य द्वाराणि पणिभिः अपहृतानां गवाम् आनयनाय ॥ ४ ॥

देवंदेवं राधसे चोदयन्त्यस्मद्र्यक् सूनृता ईरयन्ती ।
व्युच्छन्ती नः सनये धियो धा यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

देवम्ऽदेवम् । राधसे । चोदयन्ती । अस्मद्र्यक् । सूनृताः । ईरयन्ती ।
विऽउच्छन्ती । नः । सनये । धियः । धाः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥

वेङ्कट० सर्वं[5] देवं[6] धनाय चोदयन्ती अस्मदभिमुखं वाचः च प्रेरयन्ती व्युच्छन्ती अस्माकं लाभाय[7] बुद्धिं देहि ॥ ५ ॥

[8]इति पञ्चमाष्टके पञ्चमाध्याये षड्विंशो वर्गः[8] ॥

[८०]

[8]वसिष्ठो मैत्रावरुणिर्ऋषिः । उषा देवता । त्रिष्टुप् छन्दः[8] ।

प्रति स्तोमेभिरुषसं वसिष्ठा गीर्भिर्विप्रासः प्रथमा अबुध्रन् ।
विवर्तयन्तीं रजसी समन्ते आविष्कृण्वतीं भुवनानि विश्वा ॥ १ ॥

प्रति । स्तोमेभिः । उषसम् । वसिष्ठाः । गीःऽभिः । विप्रासः । प्रथमाः । अबुध्रन् ।
विऽवर्तयन्तीम् । रजसी इति । समन्ते इति समऽअन्ते । आविःऽकृण्वतीम् । भुवनानि । विश्वा ॥ १ ॥

वेङ्कट० प्रति अबोधयन् स्तोमैः उषसम् वसिष्ठाः[9] गीर्भिः च मेधाविनः अन्येभ्यः स्तोतृभ्यः पूर्वम् एव अन्धकारापनयनेन पृथक् कुर्वतीम्[10] द्यावापृथिव्यौ सङ्गतान्ते सर्वाणि भुवनानि प्रकाशयन्तीम् ॥ १ ॥

एषा स्या नव्यमायुर्दधाना गूढ्वी तमो ज्योतिषोषा अबोधि ।
अग्र एति युवतिरह्रयाणा प्राचिकितत् सूर्यं यज्ञमग्निम् ॥ २ ॥

एषा । स्या । नव्यम् । आयुः । दधाना । गूढ्वी । तमः । ज्योतिषा । उषाः । अबोधि ।
अग्रे । एति । युवतिः । अह्रयाणा । प्र । अचिकितत् । सूर्यम् । यज्ञम् । अग्निम् ॥ २ ॥

---

१. या मूको. २. शब्दायन्तः वि[1] अ; शब्दं यन्तः अ[1] हस्त. ३-३. व्यौर्णो वि[1]; अयौर्णो अ[1] ए हस्त. ४. दृढस्य वि[1]. ५. देवं अ[1]. ६. देव मूको. ७ लाभायम् अ हस्त. ८-८. नास्ति मूको. ९. वसिष्ठाः वि[1] ए हस्त. १०. °वर्तीम् मूको.

वेङ्कट० सा एषा नवतरम् आयुः दधाना तिरोहितं कृत्वा तमः ज्योतिषा उषाः प्रबुद्धा भवति । अग्रे च सर्वेषां देवानाम् युवतिः एति अग्रणीभूतयाना[1] (तु. या ५,१५) । प्र ज्ञापयति च सूर्यम् यज्ञम् अग्निम् ॥ २ ॥

अश्वा॑वती॒र्गोम॑तीर्न उ॒षासो॑ वी॒रव॑तीः॒ सद॑मुच्छन्तु भ॒द्राः ।
घृ॒तं दुहा॑ना वि॒श्वतः॒ प्रपी॑ता यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥ ३ ॥

अश्व॑ऽवतीः । गोऽम॑तीः । नः॒ । उ॒षसः॑ । वी॒रऽव॑तीः । सद॑म् । उ॒च्छ॒न्तु॒ । भ॒द्राः ।
घृ॒तम् । दुहा॑नाः । वि॒श्वतः॑ । प्रऽपी॑ताः । यू॒यम् । पा॒त॒ । स्व॒स्तिऽभिः॑ । सदा॑ । नः॒ ॥ ३ ॥

वेङ्कट० पूर्वं व्याख्याता (ऋ ७,४१,७) ॥ ३ ॥

[2]इति पञ्चमाष्टके पञ्चमाध्याये सप्तविंशो वर्गः[2] ॥

व्याख्यत् पञ्चममध्यायं पञ्चमस्याष्टकस्य सः ।
लोहितस्य कुले जातो माधवः सुन्दरीसुतः ॥

इति श्रीवेङ्कटमाधवाचार्यविरचिते ऋक्संहिताव्याख्याने पञ्चमाष्टके पञ्चमोऽध्यायः ॥

—*—

इति ऋग्वेदे सभाष्ये पञ्चमाष्टके पञ्चमोऽध्यायः ॥

---

१. भणीम्' मूको. २-२. नास्ति मूको.

अथ षष्ठोऽध्यायः ।

वेङ्कट० 'प्रत्यु अदर्श्यायती(ति[1] इ)ति[2] व्याचिख्यासति माधवः ।
कारणं[2] सूक्तभेदस्य मुखतः सम्प्रदर्शयन् ॥ १ ॥

ऋषिच्छन्दोदेवतार्था[3] सूक्तभेदस्य हेतवः ।
मन्यन्ते बह्वृचा केचिद् अर्थमेव विभेदकम् ॥ २ ॥

नवमे मण्डले भेदः सूक्तानामृषिभिः कृतः ।
'स्वादिष्ठया मदिष्ठया'[4] चत्वार्याहुर्निदर्शनम् ॥ ३ ॥

गायत्राण्येव चत्वारि सोम एव च देवता ।
मधुच्छन्दःप्रभृतयः चत्वार ऋषयोऽभवन् ॥ ४ ॥

छन्दोदेवतयोः[5] साम्ये सन्ति सूक्तानि मण्डले ।
ऋषिभेदेन भिन्नानि पावमानाभिशब्दिते ॥ ५ ॥

'इन्द्रं विश्वा अवीवृधन्'[6] छन्दोभेदेन भिद्यते ।
देवताभेदभिन्नानि 'वायवा याहि दर्शत'[7] ॥ ६ ॥

आत्मदृष्टेषु सूक्तेषु क्वचित् संयोजयन्ति च ।
दृष्टानन्येन ऋषिणा मन्त्रानिह महर्षयः ॥ ७ ॥

आङ्गिरसेन घोरेण दृष्टामेकामिमामृचम् ।
'अग्ने [8]प्र मन्दिने[8], मघवन्'[9] विश्वामित्रस्तथाऽकरोत् ॥ ८ ॥

अन्त्यं[10] तृचं मण्डलस्य [11]जामदग्न्यं वदन्ति हि[11] ।
'आ नो मित्रावरुणा ("णा"[12] इ)ति [13]सूक्तान्ते च न्यवेदयत्[13] ॥ ९ ॥

सद्यासनकर्ता[14] तत्र सम्प्रीतिं कारणं विदुः ।
आत्ममन्त्रसमाश्रिते[15] मन्त्रान् पश्यन्ति सङ्गताः ॥ १० ॥

बहवः सन्ति ननु च द्रष्टारो[16] द्वैपदस्य ये ।
बन्धुः सुबन्धुरित्येते सत्यं ते भ्रातरोऽभवन् ॥ ११ ॥

---

१. °शि आयती वेङ्कम २. करणं वि[३] म[१] लम ३. ऋषिछन्दोदेवतार्थः वि[३]; ऋषिच्छन्दोदेवतार्थः ल. ४. ऋ ९,१,१. ५. °देव° वि[३] म[१]. ६. ऋ १,११,१. ७. ऋ १,२,१. ८-८. प्रहुव वि[३] म[१]; म···प लम. ९. ऋ ३,१६,१०. १०. आत्य वि[३] म[१] ल, आर्त्य च लम ११-११. सूक्तान्ते च न्यवेदयत् वि[३] म[१] ल लम. १२. ऋ ३,६२,१६. १३-१३. आमदग्न्यं वदन्ति हि वि[३] म[१] ल लम, °न्यवेदयत् वि[३] म[१] ल लम. १४. °शान(°व म[१] लम,)र्ता वि[३] म[१] लम. १५ °श्रमा° वि[३] म[१] लम. १६. द्रष्टारौ वि[३] म[१]. वेङ्कम.

द्विपदाश्च समानीता सूक्तमेकमतोऽभवत्[1] ।
ददृशु काल एकस्मिन् सर्वे च सह सङ्गताः ॥ १२ ॥

तदेतच्छाट्यायनके[2] विस्पष्टं प्रतिपादितम् ।
यथा दृष्टमिदं सूक्तं तत्तथैवावधार्यताम् ॥ १३ ॥

ऋष्यादिभेद प्रायेण सूक्तभेदस्य कारणम् ।
कारणान्तरमप्यस्ति दृश्यते यत् क्वचित्क्वचित् ॥ १४ ॥

कर्मानुरोधादपि[3] च सूक्तानां भेद इष्यते ।
ऋषिच्छन्दोदैवतेषु समानेष्वपि च क्वचित् ॥ १५ ॥

तत्रोदाहरणान्याहुर्नवमे मण्डले बुधा ।
एकर्चिकाणि सूक्तानि 'मन्द्रयो सोम धारया'[4] ॥ १६ ॥

'सुरूपकृत्नुमूतये'[5] इति सूक्तेषु सप्तसु ।
देवतेन्द्र ऋषिश्चैको भिद्यते[6] केन हेतुना ॥ १७ ॥

छन्दश्च षण्णां गायत्री सप्तमेऽनुष्टुबागता ।
'गायन्ति त्वा गायत्रिणो'[7] कामं तत्तेन भिद्यताम् ॥ १८ ॥

नोपपादयितुं शक्यं मनुष्यैरत्र कारणम् ।
'अथापि वासनां कांचित् कथ्यमानामिमां'[8] शृणु ॥ १९ ॥

सुरूपकृत्नु-सूक्तेन[9] यज्ञं[10] आगन्तुमिच्छति ।
आगते सति कर्तव्यम् 'आ त्वेता(ता[11] इ)ति च भाषते ॥ २० ॥

'युञ्जन्ति ब्रध्नम्'[12] इत्यस्मिन् यथा वै सहकारिभिः ।
यस्मिंश्च काल आयाति तत्सर्वं कथितं विदुः ॥ २१ ॥

'इन्द्रमिद् गाथिनो बृहद्'[13] इति सूक्तेन भाषते ।
अनेकाह्वानसद्भावम् इन्द्रमाहात्म्यमेव च ॥ २२ ॥

यद्वदो यद्यपीन्द्र त्वां विह्वयन्त इमे जना ।
तान् सर्वानपहाय त्वम् अस्माकं भव केवलः[14] ॥ २३ ॥

---

१ °मेकतमोभवद् वि[1] अ[1] छ अ २. तु जैब्रा ३,१६८-१७० ३ अर्थानु° वि छ अ. ४ ऋ ९,६,१. ५ ऋ १,४,१. ६ भिद्यते वि[1] छ अ ७ ऋ १,१०,१ ८ ८ तथापि कारणं किंचित् कथ्यमानमिमं वि छ अ ९. °सूक्तेषु छ अ १० यज्ञं वि[1] अ[1]. ११. ऋ १,५,१ १२ ऋ १,६,१. १३. ऋ १,७,१. १४. केवलम् वि[1] अ[1] छ अ

'एन्द्र सानसिम्'[1] इत्यत्र स्तुत्वादिन्द्रात् 'स हीच्छति'[2] ।
धनमात्माभिलषित सञ्जिहीर्षति च स्तुतिम्[3] ॥ २४ ॥

स्तुतमिन्द्र जिगमिषुम् ऋषिस्त्यक्तुमशक्नुवन् ।
'इ हेही("हि"[4] इ)ति पुन स्तौति याचते च धन पुन ॥ २५ ॥

उत्तमर्थमिम सर्व सप्तमेनानुभाषते ।
आनुष्टुभेन सूक्तेन 'गायन्ति त्वे (त्वा'[5] इ)त्यृषि पुनः ॥ २६ ॥

कविरवस्यानुरोधाय[6] तमेवार्थ पुन कश्चित् ।
अन्य प्रकारमाश्रित्य पश्यन्ति च महर्षय ॥ २७ ॥

भेदस्तत्रापि सूक्ताना भवतीति विनिश्चय ।
'नासत्याभ्या बर्हिरिव'[7] सूक्तान्याहुर्निदर्शनम् ॥ २८ ॥

स्तौत्यश्विनावृषिस्तेषु[8] सङ्गृह्य च विगृह्य च ।
कक्षीवान् दैर्घतमस[9] कविरेव सम्प्रदर्शयन् ॥ २९ ॥

पश्यन्ति तास्तानुद्दिश्य कामानपि[10] महर्षय ।
ये ये सूक्तेषु दृश्यन्ते ते च भेदस्य हेतव ॥ ३० ॥

तथा दर्शनकालस्य भेदश्चैषां विभेदक ।
स च भेदो ब्राह्मणेषु मन्त्रेष्वपि च दृश्यते ॥ ३१ ॥

महावाक्यानुसारेण[11] सैषा सूक्ष्मेक्षिका बुधै ।
कार्या भिन्नेषु सूक्तेषु शुद्धमर्थमभीप्सुभि ॥ ३२ ॥ इति[12] ॥

[८१]

[13]वसिष्ठो मैत्रावरुणिर्ऋषि । उषा देवता । प्रगाथश्छन्द (विषमा बृहत्य , समा सतोबृहत्य)[13] ।

प्रत्यु अदर्श्यायत्यु॒१॑च्छन्ती दुहिता दिवः ।
अपो महि व्ययति चक्षसे तमो ज्योतिष्कृणोति सूनरी ॥ १ ॥

प्रति । ऊँ इति । अदर्शि । आऽयती । उच्छन्ती । दुहिता । दिव ।
अपो इति । महि । व्ययति । चक्षसे । तम । ज्योति । कृणोति । सूनरी ॥ १ ॥

१. ऋ १,८,१ २ २. मर्माप्सति बैंकम. ३. स्वयम् मा[2]. ४ ऋ १,३,१ ५ ऋ १,१०,१. ६ ऋषि तस्यानु° वि[1], कविरस्यानु° मा[2] रुम ७ ऋ १,११६,१ ८. सोऽश्विनौ प ऋषि° वि[1] मा[1], सोऽश्विनौ ऋषि° रुम. ९. दैर्घत° वि[1] मा[1] रुम १० कामानिह बैंकम ११ °स्यानुरोधेन बैंकम. १२. नास्ति वि[1] मा[1] रुम १३-१३. नास्ति मूको.

वेङ्कट० वसिष्ठ[१]। प्रति एव दृश्यते आगच्छन्ती[२] व्युच्छन्ती दिवः दुहिता। [३]अप नयति[३] महत् तमः[४] दर्शनाय[५], ज्योतिः च कृणोति उषाः ॥ १ ॥

उदुस्रियाः सृजते सूर्यः सचाँ उद्यन्नक्षत्रमर्चिवत् ।
तवेदुषो व्युषि सूर्यस्य च सं भक्तेन गमेमहि ॥ २ ॥

उत् । उस्रियाः । सृजते । सूर्यः । सचा । उत्ऽयत् । नक्षत्रम् । अर्चिऽवत् ।
तव । इत् । उषः । विऽउषि । सूर्यस्य । च । सम् । भक्तेन । गमेमहि ॥ २ ॥

वेङ्कट० उत् एव सृजते सूर्यः रश्मीन्। [६]तथैव सह उद्यत्[६] नक्षत्रम् अपि तेजस्वि[७] भवति। तव इत् हे उषः! व्युच्छन्ते सूर्यस्य च [८]सम् गमेमहि अन्नेन[८] ॥ २ ॥

प्रति त्वा दुहितर्दिव उषो जीरा अभुत्स्महि ।
या वहसि पुरु स्पार्हं वनन्वति रत्नं न दाशुषे मयः ॥ ३ ॥

प्रति । त्वा । दुहितः । दिवः । उषः । जीराः । अभुत्स्महि ।
या । वहसि । पुरु । स्पार्हम् । वनन्ऽवति । रत्नम् । न । दाशुषे । मयः ॥ ३ ॥

वेङ्कट० प्रति बोधयाम स्याम्, हे दिवः दुहितः! उषः! क्षिप्राः। या त्वम् वहसि बहु स्पृहणीयं धनवति! रत्नम्, यजमानाय[९] [१०]मयः सुखं[१०] प्रयच्छसि इति ॥ ३ ॥

उच्छन्ती या कृणोषि मंहना महि प्रख्यै देवि स्वर्दृशे ।
तस्यास्ते रत्नभाज ईमहे वयं स्याम मातुर्न सूनवः ॥ ४ ॥

उच्छन्ती । या । कृणोषि । मंहना । महि । प्रऽख्यै । देवि । स्वः । दृशे ।
तस्याः । ते । रत्नऽभाजः । ईमहे । वयम् । स्याम । मातुः । न । सूनवः ॥ ४ ॥

वेङ्कट० व्युच्छन्ती या करोषि महत्त्वेन महति! देवि![११] [१२]सर्वं भूतं दर्शनाय[१२] प्रकथनाय च तमसः अपनयनाय। तस्याः तव रत्नप्राप्णानि याचामहे। तथा कुर्वाणा वयम् स्याम मातुः इव पुत्राः तव प्रियाः ॥ ४ ॥

तच्चित्रं राध आ भरोषो यद् दीर्घश्रुत्तमम् ।
यत् ते दिवो दुहितर्मर्तभोजनं तद् रास्व भुनजामहै ॥ ५ ॥

---

१. सिव छ हम; नास्ति वि[१]. २. [१]ऽन्ति मूको ३-३. वधन[१] वि[१]; भवन[१] अ[१]; रत न[१] छ. हम ४. तमो वि[१] अ[१], तम छ हम. ५. [१]दाना वि[१] अ[१], [१]र्शना छ हम ६-६. सह एव तथा उद्यत् वि[१] छ हम ७. [१]स्वी मूको ८-८. सङ्गमेमहि अन्न मूको. ९. [१]माना मूको १०-१०. सुखमयं मूको ११. नास्ति मूको १२-१२. [१]भूतदृ[१] मूको; सर्वभूतदृ[१] छ प्रस्तावः

तत् । चित्रम् । राधः । आ । भर । उषः । यत् । दीर्घश्रुत्ऽतमम् ।
यत् । ते । दिवः । दुहितः । मर्तऽभोजनम् । तत् । रास्व । भुनजामहै ॥ ५ ॥

वेङ्कट० तत् चायनीयम्[1] धनम् आ हर उषः![2], यत् अत्यन्तं दीर्घकालं श्रूयते । यत् च ते हे दिवः दुहितः! मनुष्याणां भोजनसाधनं भवति, तत् अस्मभ्यं प्रयच्छ, तत् वयम् भुनजामहै ॥ ५ ॥

श्रवः सूरिभ्यो अमृतं वसुत्वनं वाजाँ अस्मभ्यं गोमतः ।
चोदयित्री मघोनः सूनृतावत्युषा उच्छदप स्रिधः ॥ ६ ॥

श्रवः । सूरिऽभ्यः । अमृतम् । वसुऽत्वनम् । वाजान् । अस्मभ्यम् । गोऽमतः ।
चोदयित्री । मघोनः । सूनृताऽवती । उषाः । उच्छत् । अप । स्रिधः ॥ ६ ॥

वेङ्कट० श्रवणीयम् स्तोतृभ्यः अन्नम् वसुमत्त्वम्[3] च अस्मभ्यम् च अन्नानि गोयुक्तानि चोदयित्री धनवतः शब्दवती उषाः "अप उच्छतु" शत्रून् । प्रदापयतु आढ्यान् अस्माकं[5] धनम्, विनाशयतु च शत्रून् इति ॥ ६ ॥

[6]इति पञ्चमाष्टके पष्ठाध्याये प्रथमो वर्गः[6] ॥

[८२]

[7]वसिष्ठो मैत्रावरुणिर्ऋषिः । इन्द्रावरुणौ देवता । जगती छन्दः[7] ।

इन्द्रावरुणा युवमध्वराय नो विशे जनाय महि शर्म यच्छतम् ।
दीर्घप्रयज्युमति यो वनुष्यति वयं जयेम पृतनासु दूढ्यः ॥ १ ॥

इन्द्रावरुणा । युवम् । अध्वराय । नः । विशे । जनाय । महि । शर्म । यच्छतम् ।
[8]दीर्घऽप्रयज्युम् । अति । यः । वनुष्यति । वयम् । जयेम । पृतनासु । दुःऽध्यः[8] ॥ १ ॥

वेङ्कट० इन्द्रावरुणौ! युवाम्[9] अस्माकं यज्ञाय विशे दासभूतायै[9] जनाय च पुत्राय च महत् सुखम् दत्तम्[10] । दीर्घप्रततयज्ञम् अति हिनस्ति यः, तादृशान् दुर्बुद्धीन् वयम् सङ्ग्रामेषु जयेम ॥ १ ॥

सम्राळन्यः स्वराळन्य उच्यते वां महान्ताविन्द्रावरुणा महावसू ।
विश्वे देवासः परमे व्योमनि सं वामोजो वृषणा सं बलं दधुः ॥ २ ॥

सम्ऽराट् । अन्यः । स्वऽराट् । अन्यः । उच्यते । वाम् । महान्तौ । इन्द्रावरुणा । महावसू इति महाऽवसू ।
विश्वे । देवासः । परमे । विऽओमनि । सम् । वाम् । ओजः । वृषणा । सम् । बलम् । दधुः ॥ २ ॥

वेङ्कट० सम्राट् इति अन्यः, स्वराट् अन्यः उच्यते युवयोः । सर्वेषां राजा[11] सम्राट् 'इति परणमाह' ।

---

१. चायनीयम् वि[२] छ; चन्नीयम् अ[१]; चायनीयम् छ छम. २. ओ मूको. ३. °माव वि[२] अ[१]. ४-४. अपे°च्छ° मूको. ५. 'स्मान् अ[१]. ६-६. नास्ति मूको. ७-७. भास्करेन (५,२) व्याख्यातः. ८. युवं अ[१]. ९. °ताय छ प्रस्तावः. १०. दत्त छ छम ११. राजा वि[२]; राज्ञ अ[१].

स्वयमेव राजन् स्वराड् इति इन्द्रम्[1] आह। महान्तौ इन्द्रावरुणौ महाधनौ[2]। विश्वे देवाः परमे स्थाने स्थितयोः युवयोः बलम्[3] ओज च सम् दधुः हे वृषणौ[1] इति ॥ २ ॥

अन्वपां खान्यतृन्तमोजसा सूर्यमैरयतं दिवि प्रभुम् ।
इन्द्रावरुणा मदे अस्य मायिनोऽपिन्वतमपितः पिन्वतं धियः ॥ ३ ॥

अनु । अपाम् । खानि । अतृन्तम् । ओजसा । आ । सूर्यम् । ऐरयतम् । दिवि । प्रऽभुम् ।
इन्द्रावरुणा । मदे । अस्य । मायिनः । अपिन्वतम् । अपितः । पिन्वतम् । धियः ॥ ३ ॥

वेङ्कट० मेघस्थानाम् अपाम् द्वाराणि बलेन अनु अतृन्तम्[4]। दिवि च सूर्यम् आ रोहयत प्रापयतम् प्रभुम्। हे इन्द्रावरुणौ[1] मदे अस्य सोमस्य[5] प्रज्ञावत परितः उदकानि अपिन्वतम्[6], पिन्वतम् च कर्माणि। [7]अपिशब्द परिपर्याय[7] ॥ ३ ॥

युवामिद् युत्सु पृतनासु वह्नयो युवां क्षेमस्य प्रसवे मितज्ञवः ।
ईशाना वस्व उभयस्य कारव इन्द्रावरुणा सुहवा हवामहे ॥ ४ ॥

युवाम् । इत् । युत्ऽसु । पृतनासु । वह्नयः । युवाम् । क्षेमस्य । प्रऽसवे । मितऽज्ञवः ।
ईशाना । वस्वः । उभयस्य । कारवः । इन्द्रावरुणा । सुऽहवा । हवामहे ॥ ४ ॥

वेङ्कट० युवाम् एव युद्धेषु सेनासु च वोढार हवामहे। युवाम् एव क्षेमस्य [8]प्रसवनिमित्त मितजानुका[8] अभिगच्छन्त हवामहे। ईशाना वस्वः[9] उभयस्य[9] दिव्यस्य च पार्थिवस्य च स्तोतारः इन्द्रावरुणौ[1] स्वाह्वानौ[10] हवामहे ॥ ४ ॥

इन्द्रावरुणा यदिमानि चक्रथुर्विश्वा जातानि भुवनस्य मज्मना ।
क्षेमेण मित्रो वरुणं दुवस्यति मरुद्भिरुग्रः शुभमन्य ईयते ॥ ५ ॥

इन्द्रावरुणा । यत् । इमानि । चक्रथुः । विश्वा । जातानि । भुवनस्य । मज्मना ।
क्षेमेण । मित्रः । वरुणम् । दुवस्यति । मरुत्ऽभिः । उग्रः । शुभम् । अन्यः । ईयते ॥ ५ ॥

वेङ्कट० हे इन्द्रावरुणौ[1] यत् इमानि चक्रथुः विश्वानि अपि जातानि भुवनस्य अस्य बलेन। तयोः एक वरुणस्य क्षेमार्थम् मित्र देव स परिचरति। मरुद्भिः वसुगणैः कल्याणम् अन्यः इन्द्र गच्छति ॥ ५ ॥

[11]इति पञ्चमाष्टके षष्ठाध्याये द्वितीयो वर्ग[11] ॥

---

१ वरुणम् मूको. २ °धना मूको. ३. सर्वे देवा व° मूको. ४. °तृन्तम् मूको. ५ सोम क° ए एभ, स्तोम वि°. ६. अपिवर्न वि° अ°. ७-७. अपि शब्दपरिचर्याय मूको ८-८ °मितमवका° मूको. ९ नास्ति मूको. १० °ना मूको. ११-११. नास्ति मूको.

महे शुल्काय वरुणस्य नु त्विष ओजो मिमाते ध्रुवमस्य यत् स्वम् ।
अजामिमन्यः श्नथयन्तमातिरद् दभ्रेभिरन्यः प्र वृणोति भूयसः ॥ ६ ॥

महे । शुल्काय । वरुणस्य । नु । त्विषे । ओजः । मिमाते इति । ध्रुवम् । अस्य । यत् । स्वम् ।
अजामिम् । अन्यः । श्नथयन्तम् । आ । अतिरत् । दभ्रेभिः । अन्यः । प्र । वृणोति । भूयसः ॥६॥

वेङ्कट० महते बन्धनाय वरुणस्य क्षिप्रं दीप्ताय बलम् उपबृंहितं कुरुतं[1] इन्द्रावरुणौ, यत् अस्य वरुणस्य ध्रुवम् स्वभूतं भवति बलम् । पापकृतां बन्धनाय वरुणबलम् इन्द्रं च उपबृंहयतीत्यर्थः । इन्द्रावरुणयोः एकः[2] अनाप्तम् अबन्धु भूतानि श्नथयन्तम् 'आ तिरति' । तिरतिः[4] विनाशकर्मा । विनाशयति । स्वल्पैरूपायैः अन्यः 'प्र वारयति बहून् शत्रून्'[5] । 'दभ्रेभिश्चित् समृता हंसि भूयसः' (ऋ १,३१,६) इत्युक्तम् ॥ ६ ॥

न तमंहो न दुरितानि मर्त्यमिन्द्रावरुणा न तपः कुतश्चन ।
यस्य देवा गच्छथो वीथो अध्वरं न तं मर्तस्य नशते परिह्वृतिः ॥ ७ ॥

न । तम् । अंहः । न । दुःऽइतानि । मर्त्यम् । इन्द्रावरुणा । न । तपः । कुतः । चन ।
यस्य । देवा । गच्छथः । वीथः । अध्वरम् । न । तम् । मर्तस्य । नशते । परिऽह्वृतिः ॥७॥

वेङ्कट० न तम् अंहः न च दुरितानि मर्त्यम् हे इन्द्रावरुणौ । 'न अपि तापकम्'[6] अन्यत् कुतः चित् आगच्छति । यस्य देवौ! अभि गच्छथः[6], कामयेथे च यज्ञम्, न तम् मनुष्यस्य व्याप्नोति परिबाधा ॥ ७ ॥

अर्वाङ्नरा दैव्येनावसा गतं शृणुतं हवं यदि मे जुजोषथः ।
युवोर्हि सख्यमुत वा यदाप्यं मार्डीकमिन्द्रावरुणा नि यच्छतम् ॥ ८ ॥

अर्वाक् । नरा । दैव्येन । अवसा । आ । गतम् । शृणुतम् । हवम् । यदि । मे । जुजोषथः ।
युवोः । हि । सख्यम् । उत । वा । यत् । आप्यम् । मार्डीकम् । इन्द्रावरुणा । नि । यच्छतम् ॥

वेङ्कट० अभिमुखम् आ गच्छतम् नरौ! देवयोः युवयोः उचितेन रक्षणेन । शृणुतम् च ह्वानम् यदि मे प्रीयेथे[7] । युवयोः हि सख्यम् अपि च यत् ज्ञातम् सह भवत । तथा सति सुखकरम् इन्द्रावरुणौ! तदुभयम् अस्मासु कुरुतमिति ॥ ८ ॥

अस्माकमिन्द्रावरुणा भरेभरे पुरोयोधा भवतं कृष्ट्योजसा ।
यद् वां हवन्त उभये अध स्पृधि नरस्तोकस्य तनयस्य सातिषु ॥ ९ ॥

---

१ कुरुत वि' अ'; कुरु कुरुतम् ल एक. २. एते मूको. ३-३ अनि मूको. ४. तरति मूको ५५. तुटितम् वि' अ'. ६-६ नास्ति ताव' मूक'. ७. 'थ वि' अ' ल, 'थे एक. ८ प्रिये' वि' अ'.

अस्माकम् । इन्द्रावरुणा । भरेऽभरे । पुरःऽयोधा । भवतम् । कृष्टिऽओजसा ।
यत् । वाम् । हवन्ते । उभये । अध । स्पृधि । नरः । तोकस्य । तनयस्य । सातिषु ॥ ९ ॥

वेङ्कट० अस्माकम् इन्द्रावरुणौ[1] सङ्ग्रामे पुरोयोद्धारौ भवतम् हे कर्षणशीलबलौ[1]। यदा[2] वाम् हवन्त उभये सैनिका सङ्ग्रामे मनुष्या पुत्रस्य तत्पुत्रस्य च लाभेषु इति ॥ ९ ॥

अस्मे इन्द्रो वरुणो मित्रो अर्यमा द्युम्नं यच्छन्तु महि शर्म सप्रथः ।
अवध्रं ज्योतिरदितेर्ऋतावृधो देवस्य श्लोकं सवितुर्मनामहे ॥ १० ॥

अस्मे इति । इन्द्रः । वरुणः । मित्रः । अर्यमा । द्युम्नम् । यच्छन्तु । महि । शर्म । सऽप्रथः ।
अवध्रम् । ज्योतिः । अदितेः । ऋतऽवृधः । देवस्य । श्लोकम् । सवितुः । मनामहे ॥ १० ॥

वेङ्कट० अस्मभ्यम् इन्द्रादयः अन्नम् यच्छन्तु महत् च सुखं सर्वतः पृथुतमम् । बाधकरहितम् ज्योतिः अदितेः यज्ञस्य वर्धयित्र्याः भवतु । देवस्य च सवितुः श्लोकम् अन्वहं ब्रूमः युवयोः प्रसादादिति ॥ १० ॥

[1]इति पञ्चमाष्टके षष्ठाध्याये तृतीयो वर्गः[1] ॥

[८३]

[2]वसिष्ठो मैत्रावरुणिर्ऋषिः । इन्द्रावरुणौ देवता । जगती छन्दः[2] ।

युवां नरा पश्यमानास आप्यं प्राचा गव्यन्तः पृथुपर्शवो ययुः ।
दासा च वृत्रा हतमार्याणि च सुदासमिन्द्रावरुणावसावतम् ॥ १ ॥

युवाम् । नरा । पश्यमानासः । आप्यम् । प्राचा । गव्यन्तः । पृथुऽपर्शवः । ययुः ।
दासा । च । वृत्रा । हतम् । आर्याणि । च । सुऽदासम् । इन्द्रावरुणा । अवसा । अवतम् ॥ १ ॥

वेङ्कट० युवाम् नरौ[3] पश्यमानाः[3] ज्ञातेयम्[4] पुरयो मन्त्रार्थं प्राङ्मुखं बर्हिः आहर्तुं [5]गा इच्छन्तः[5] [6]पृथुपर्शव आत्तपृथ्वक्षपर्शवः[6] यान्ति । दासान् उपक्षपयितॄन् वृत्राणि उपद्रवान्[7] च आर्यैरपि कृतान् विनाशयतम् । पैजवनम् सुदासम् इन्द्रावरुणौ[1] रक्षतम् ॥ १ ॥

यत्रा नरः समयन्ते कृतध्वजो यस्मिन्नाजा भवति किं चन प्रियम् ।
यत्रा भयन्ते भुवना स्वर्दृशस्तत्रा न इन्द्रावरुणाधि वोचतम् ॥ २ ॥

---

१. ०दा वि[1] ल छम. २-२ नास्ति मूको. ३. पश्यन्त क प्रस्तात. ४. ०तेय मूको.
५-५ आगा इच्छन्त ए एका अ[1]; आग छन्त वि[1] ६-६ पृथु पशु पशव आत्तपृथव प पशव वि[1] अ[1] ल; पृथु पर्शव पशव आत्त प्रथम पर्शो लभ ७. "द्रवान् मूको.

यत्रं । नरः । सम्ऽअयन्ते । कृतऽध्वजः । यस्मिन् । आजा । भवति । किम् । चन । प्रियम् ।
यत्रं । भयन्ते । भुवंना । स्वःऽदृशः । तत्रं । नः । इन्द्रावरुणा । अधि । वोचतम् ॥ २ ॥

वेङ्कट० यत्र मनुष्याः सङ्गच्छन्ते उच्छ्रितपताकाः । ध्वजतेः उच्छ्रयतिकर्मणः[1] । यस्मिन् सङ्ग्रामे भवति यत् किञ्चिदपि मनुष्यस्य अभिमतम् अन्नादिकम् । यत्र बिभ्यति भूतानि स्वर्दृशः च देवाः । हिंसासम्भवाद्[2] भयम् । तत्र अस्माकम् इन्द्रावरुणौ । अधि वोचतम् [3]एत एव परान्[3] जयन्तु इति ॥ २ ॥

सं भूम्या अन्ता ध्वसिरा अदृक्षतेन्द्रावरुणा दिवि घोष आरुहत् ।
अस्थुर्जनानामुप मामरातयोऽर्वागवसा हवनश्रुता गतम् ॥ ३ ॥

सम् । भूम्याः । अन्ताः । ध्वसिराः । अदृक्षत । इन्द्रावरुणा । दिवि । घोषः । आ । अरुहत् ।
अस्थुः । जनानाम् । उप । माम् । अरातयः । अर्वाक् । अवसा । हवनऽश्रुता । आ । गतम् ॥३॥

वेङ्कट० भूम्याः अन्ताः ध्वंसनशीलाः सम् दृश्यन्ते । ध्वंसयन्ति चतस्रः दिशः सैनिका अधिष्ठिताः । तथा "इन्द्रावरुणौ! दिवि सैनिकानां" शब्दः आरोहणं करोति । जनानाम् अरातयः च माम् [4]उप तिष्ठन्ति[4] । अभिमुखं रक्षणार्थं हे हवनश्रुतौ! आ गच्छतम् ॥ ३ ॥

इन्द्रावरुणा वधनाभिरप्रति भेदं वन्वन्ता प्र सुदासमावतम् ।
ब्रह्माण्येषां शृणुतं हवीमनि सत्या तृत्सूनामभवत् पुरोहितिः ॥ ४ ॥

इन्द्रावरुणा । वधनाभिः । अप्रति । भेदम् । वन्वन्ता । प्र । सुऽदासम् । आवतम् ।
ब्रह्माणि । एषाम् । शृणुतम् । हवीमनि । सत्या । तृत्सूनाम् । अभवत् । पुरःऽहितिः ॥ ४ ॥

वेङ्कट० हे इन्द्रावरुणौ! वधैः अप्रतिगतशत्रुकं भेत्तारं कुलस्य याचमानं[5] हिंसन्तौ प्र आवतम् सुदासम् । ब्रह्माणि च एषाम् शृणुतम् हवने । सत्यभरा भवतु तृत्सूनाम् पुरोहितिः इति च । यद् अस्मान् पुरो वधः तृत्सवः, तद् फलतु एषाम् इति ॥ ४ ॥

इन्द्रावरुणावभ्या तपन्ति माघान्यर्यो वनुषामरातयः ।
युवं हि वस्व उभयस्य राजथोऽध स्मा नोऽवतं पार्ये दिवि ॥ ५ ॥

इन्द्रावरुणौ । अभि । आ । तपन्ति । मा । अघानि । अर्यः । वनुषाम् । अरातयः ।
युवम् । हि । वस्वः । उभयस्य । राजथः । अध । स्म । नः । अवतम् । पार्ये । दिवि ॥ ५ ॥

वेङ्कट० हे इन्द्रावरुणौ! माम् अभि आ तपन्ति शत्रोः अघानि आहन्तॄणि प्रहरणानि हिंसतां[6] शत्रूणां

1. °च्छ्रयक° वि[1] अ; °च्छ्रायतक° अ[1]; °च्छ्रयक° लभ. 2. °संभाषा° मूको. 3-3. °त एव राजे ल लभ; एतमेवपरान् वि[1] अ[1]. † रागते ह प्रस्तावः. 4-4. °स्तो···से° वि[1] अ[1]; °णी दिश ल लभ, 5-5. उ भवति° मूको. 6. याचना° ल लभ, द्र. ऋ (७,१८,१९ मन्त्र.) भाष्यम्. 7. गुदितम् वि[1] अ[1]; हिंसां ल लभ.

करादीनाम् अप्रदानानि । युवाम् हि उभयस्य दिव्यस्य च पार्थिवस्य च धनस्य राजथः । तथा सति अस्मान् रक्षतम्[1] [2]पार्ये दिवसे अन्तिमे[2] सङ्ग्रामस्य अह्नि ॥ ५ ॥

[3]इति पञ्चमाष्टके षष्ठाध्याये चतुर्थो वर्गः[3] ॥

युवां हवन्त उभयास आजिष्विन्द्रं च वस्वो वरुणं च सातये ।
यत्र राजभिर्दशभिर्निबाधितं प्र सुदासमावतं तृत्सुभिः सह ॥ ६ ॥

युवाम् । हवन्ते । उभयासः । आजिषु । इन्द्रम् । च । वस्वः । वरुणम् । च । सातये ।
यत्र । राजऽभिः । दशऽभिः । निऽबाधितम् । प्र । सुऽदासम् । आवतम् । तृत्सुऽभिः । सह ॥६॥

वेङ्कट० युवाम् हवन्ते उभये सैनिकाः सङ्ग्रामेषु इन्द्रम् [4]वरुणम् च धनस्य भजनाय[4] । यस्मिन् सङ्ग्रामे [5]शत्रुभिः दशभिः † राजभिः नितरां बाधितम्[5] प्र आवतम् सुदासम् राजानं सर्वैः तृत्सुभिः सह ॥६॥

दश राजानः समिता अयज्यवः सुदासमिन्द्रावरुणा न युयुधुः ।
सत्या नृणामद्मसदामुपस्तुतिर्देवा एषामभवन् देवहूतिषु ॥ ७ ॥

दश । राजानः । सम्ऽइताः । अयज्यवः । सुऽदासम् । इन्द्रावरुणा । न । युयुधुः ।
सत्या । नृणाम् । अद्मऽसदाम् । उपऽस्तुतिः । देवाः । एषाम् । अभवन् । देवऽहूतिषु ॥ ७ ॥

वेङ्कट० दश राजानः सङ्गताः अयष्टारः सुदासम् इन्द्रावरुणौ[6] न युयुधुः भवद्भ्यां परिगृहीतम् । सत्या नृणाम् हविषि सीदताम् उपस्तुतिः, फलं प्रयच्छति । एषाम् प्रादुर्भवन्ति देवानामाह्वानेषु[6] देवाः च आहूताः वाम् उपगच्छन्ति ॥ ७ ॥

दाशराज्ञे परियत्ताय विश्वतः सुदास इन्द्रावरुणावशिक्षतम् ।
श्वित्यञ्चो यत्र नमसा कपर्दिनो धिया धीवन्तो असपन्त तृत्सवः ॥ ८ ॥

दाशऽराज्ञे । परिऽयत्ताय । विश्वतः । सुऽदासे । इन्द्रावरुणौ । अशिक्षतम् ।
श्वित्यञ्चः । यत्र । नमसा । कपर्दिनः । धिया । धीऽवन्तः । असपन्त । तृत्सवः ॥ ८ ॥

वेङ्कट० दाशराज्ञे परितो युद्धार्थं यतमानाय सर्वत एव सुदासे हे इन्द्रावरुणौ! बलं प्रायच्छतम्, श्वैतिमानम्[7] अञ्चन्तः यत्र हविषा सह कपर्दिनः कर्मणा कर्मवन्तः देवान् असपृशन् तृत्सवः च । 'श्वित्यञ्चो मा दक्षिणतःकपर्दाः' (ऋ ७ ३३,१) इत्युक्तम् ॥ ८ ॥

वृत्राण्यन्यः समिथेषु जिघ्नते व्रतान्यन्यो अभि रक्षते सदा ।
हवामहे वां वृषणा सुवृक्तिभिरस्मे इन्द्रावरुणा शर्म यच्छतम् ॥ ९ ॥

---

१ रक्षत मूको. २-२ त्रुटितम् वि¹ अ¹. ३-३ नास्ति मूको. ४ वर धन° वि¹; वरुणोर्थ मन अ¹. ५-५ त्रुभि दभि° वि¹ अ¹. † दर्शनी क ख्म. ६ देवानाह्वा° वि¹ अ¹, देवानशाह्वा° लभ. ७ श्वेतिमा° वि¹ अ¹ द; श्वेतिमानां लभ.

वृत्राणि । अन्यः । सम्ऽइथेषु । जिघ्नते । व्रतानि । अन्यः । अभि । रक्षते । सदा ।
हवामहे । वाम् । वृषणा । सुवृक्तिऽभिः । अस्मे इति । इन्द्रावरुणा । शर्म । यच्छतम् ॥ ९ ॥

वेङ्कट० निगदसिद्धेति ॥ ९ ॥

अस्मे इन्द्रो वरुणो मित्रो अर्यमा द्युम्नं यच्छन्तु महि शर्म सप्रथः ।
अवध्रं ज्योतिरदितेर्ऋतावृधो देवस्य श्लोकं सवितुर्मनामहे ॥ १० ॥

अस्मे इति । इन्द्रः । वरुणः । मित्रः । अर्यमा । द्युम्नम् । यच्छन्तु । महि । शर्म । सऽप्रथः ।
अवध्रम् । ज्योतिः । अदितेः । ऋतऽवृधः । देवस्य । श्लोकम् । सवितुः । मनामहे ॥ १० ॥

वेङ्कट० पूर्वं व्याख्याता (ऋ ७,८२,१० द्र.) ॥ १० ॥

[१]इति पञ्चमाष्टके षष्ठाध्याये पञ्चमो वर्गः[१] ॥

[८४]

[१]वसिष्ठो मैत्रावरुणिर्ऋषिः । इन्द्रावरुणौ देवता । त्रिष्टुप् छन्दः[१] ।

आ वां राजानावध्वरे ववृत्यां हव्येभिरिन्द्रावरुणा नमोभिः ।
प्र वां घृताची बाह्वोर्दधाना परि त्मना विषुरूपा जिगाति ॥ १ ॥

आ । वाम् । राजानौ । अध्वरे । ववृत्याम् । हव्येभिः । इन्द्रावरुणा । नमःऽभिः ।
प्र । वाम् । घृताची । बाह्वोः । दधाना । परि । त्मना । विषुऽरूपा । जिगाति ॥ १ ॥

वेङ्कट० आ वर्तयामि वाम् राजानौ । यज्ञे हव्यैः नमस्कारैः च इन्द्रावरुणौ! । परि गच्छति वाम् जुहूः बाह्वोः ध्रियमाणा स्वयमेव नानाविधैः हविर्भिः नानारूपा ॥ १ ॥

युवो राष्ट्रं बृहदिन्वति द्यौर्यौ सेतृभिररज्जुभिः सिनीथः ।
परि नो हेळो वरुणस्य वृज्या उरुं न इन्द्रः कृणवदु लोकम् ॥ २ ॥

युवोः । राष्ट्रम् । बृहत् । इन्वति । द्यौः । यौ । सेतृऽभिः । अरज्जुऽभिः । सिनीथः ।
परि । नः । हेळः । वरुणस्य । वृज्याः । उरुम् । नः । इन्द्रः । कृणवत् । ऊँ इति । लोकम् ॥ २ ॥

वेङ्कट० युवयोः महत् राष्ट्रम् द्यौः वर्षेण प्रीणयति । यौ युवां रज्जुवर्जितैः सेतृभिः[२] बन्धकैः बध्नीथ पापकृतः । ते हि रोगादिना अभिभूयन्ते । वरुणस्य क्रोधः अस्मात् परि वर्जयतु । विस्तीर्णं लोकम् अस्माकम् इन्द्रः च करोतु ॥ २ ॥

१-१. नास्ति मूको. २. सेतुभि मूको.

कृतं नो यज्ञं विदथेषु चारुं कृतं ब्रह्माणि सूरिषु प्रशस्ता ।
उपो रयिर्देवजूतो न एतु प्र णः स्पार्हाभिरूतिभिस्तिरेतम् ॥ ३ ॥

कृतम् । नः । यज्ञम् । विदथेषु । चारुम् । कृतम् । ब्रह्माणि । सूरिषु । प्रऽशस्ता ।
उपो इति । रयिः । देवऽजूतः । नः । एतु । प्र । नः । स्पार्हाभिः । ऊतिऽभिः । तिरेतम् ॥ ३ ॥

वेङ्कट० कुरुतम् अस्माकम् यज्ञम् गृहेषु चारुम्। कुरुतम् च स्तोत्राणि स्तोतृषु प्रशस्तानि[1]। उप[2] गच्छतु अस्मान् रयिः देवप्रेरितः। प्रवर्धयतम् अस्मान् स्पृहणीयैः रक्षणैः ॥ ३ ॥

अस्मे इन्द्रावरुणा विश्ववारं रयिं धत्तं वसुमन्तं पुरुक्षुम् ।
प्र य आदित्यो अनृता मिनात्यमिता शूरो दयते वसूनि ॥ ४ ॥

अस्मे इति । इन्द्रावरुणा । विश्वऽवारम् । रयिम् । धत्तम् । वसुऽमन्तम् । पुरुऽक्षुम् ।
प्र । यः । आदित्यः । अनृता । मिनाति । अमिता । शूरः । दयते । वसूनि ॥ ४ ॥

वेङ्कट० अस्मासु इन्द्रावरुणौ! विश्वैः वरणीयम् रयिम् धत्तम् वासयितृभिः पुरुषैः तद्वन्तं बहूनां शब्दनीयम्। प्र मिनाति यः अदितेः पुत्रः अनृतानि[3] भूतानि सर्वतः[4]। अस्मभ्यं धनानि प्रयच्छतु[5] इति वाक्यशेषः। एवम् अमितानि धनानि शूरः इन्द्रः च प्रयच्छतीति ॥ ४ ॥

इयमिन्द्रं वरुणमष्ट मे गीः प्रावत् तोके तनये तूतुजाना ।
सुरत्नासो देववीतिं गमेम यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

इयम् । इन्द्रम् । वरुणम् । अष्ट । मे । गीः । प्र । आवत् । तोके । तनये । तूतुजाना ।
सुऽरत्नासः । देवऽवीतिम् । गमेम । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥

वेङ्कट० इयम् मदीया स्तुतिः इन्द्रावरुणौ अश्नुते। [6]प्र आगच्छत्[6] पुत्रार्थं पौत्रार्थं[7] च त्वरमाणा। शोभनधनाः वयं प्राप्नुयामेति ॥ ५ ॥

[8]इति पञ्चमाष्टके षष्ठाध्याये षष्ठो वर्गः[8] ॥

[८५]

[8]वसिष्ठो मैत्रावरुणिर्ऋषिः। इन्द्रावरुणौ देवता। त्रिष्टुप् छन्दः[8]।

पुनीषे वामरक्षसं मनीषां सोममिन्द्राय वरुणाय जुह्वत् ।
घृतप्रतीकामुषसं न देवीं ता नो यामन्नुरुष्यतामभीके ॥ १ ॥

१. प्रशस्ता वि[1] छ छम. २. दि उप मूको. ३. अनगानि मूको. ४. मुदितम् वि[1] अ[1]; मदम. छ छम. ५. 'यच्छतु वि[1] अ[1]. ६-६. प्रगच्छत् वि[1]; प्रागच्छत् छ छम. ७. तु. ऋ ७,६७,६ भाष्यम्; पौत्र मूको. ८-८. नास्ति मूको.

पुनीषे । वाम् । अरक्षसम् । मनीषाम् । सोमम् । इन्द्राय । वरुणाय । जुह्वत् ।
घृतऽप्रतीकाम् । उषसम् । न । देवीम् । ता । नः । यामन् । उरुष्यताम् । अभीके ॥ १ ॥

वेङ्कट० शोधयामि अहं युवयोः बाधकरहिताम् स्तुतिम् । न हि अनयोः स्तोतारं कश्चित् बाधते । सोमम् इन्द्रावरुणाभ्याम् जुह्वत्[1] । घृतावयवां घृतसहिताम् स्तुतिम् उषसम् इव देवनशीलाम्[2] । तौ[3] अस्मान्[4] गमने रक्षताम् सङ्ग्रामे[5] ॥ १ ॥

स्पर्धन्ते वा उ देवहूये अत्र येषु ध्वजेषु दिद्यवः पतन्ति ।
युवं ताँ इन्द्रावरुणावमित्रान् हतं पराचः शर्वा विषूचः ॥ २ ॥

स्पर्धन्ते । वै । ऊँ इति । देवऽहूये । अत्र । येषु । ध्वजेषु । दिद्यवः । पतन्ति ।
युवम् । तान् । इन्द्रावरुणौ । अमित्रान् । हतम् । पराचः । शर्वा । विषूचः ॥ २ ॥

वेङ्कट० अस्मिन् देवह्वाने जनाः स्पर्धन्ते, अहमहमिकया वां ह्वयन्ते । येषु जनेषु साङ्ग्रामिकेषु ध्वजेषु आयुधानि पतन्ति । येषां सङ्ग्रामः प्रादुर्भवतीत्यर्थः । युवाम् तान् हे इन्द्रावरुणौ ! अमित्रान् हतम् प्राङ्मुखान्[6] आयुधेन नानादिक्कान् ॥ २ ॥

आपश्चिद्धि स्वयशसः सदःसु देवीरिन्द्रं वरुणं देवता धुः ।
कृष्टीरन्यो धारयति प्रविक्ता वृत्राण्यन्यो अप्रतीनि हन्ति ॥ ३ ॥

आपः । चित् । हि । स्वऽयशसः । सदःऽसु । देवीः । इन्द्रम् । वरुणम् । देवता । धुरिति धुः ।
कृष्टीः । अन्यः । धारयति । प्रऽविक्ताः । वृत्राणि । अन्यः । अप्रतीनि । हन्ति ॥ ३ ॥

वेङ्कट० आपः चित् च अन्तरिक्ष्याः स्वभूतयशसः स्वेषु स्थानेषु देवीः इन्द्रावरुणौ देवते धारयन्ति । मध्यमे स्थाने पठितौ इन्द्रावरुणौ अन्तरिक्षम् धारयति इत्यर्थः । अन्तरिक्षनाम च भवति 'आपः' (निघ १,३) इति । मनुष्यान् एकः वरुणः धारयति प्रकर्षेण व्याप्तान् । शत्रून् अन्यः अप्रतिगतान् इन्द्रः हन्ति ॥ ३ ॥

स सुक्रतुर्ऋतचिदस्तु होता य आदित्या शवसा वां नमस्वान् ।
आववर्तदवसे वां हविष्मानसदित् स सुविताय प्रयस्वान् ॥ ४ ॥

सः । सुऽक्रतुः । ऋतऽचित् । अस्तु । होता । यः । आदित्या । शवसा । वाम् । नमस्वान् ।
आऽववर्तत् । अवसे । वाम् । हविष्मान् । असत् । इत् । सः । सुवितायं । प्रयस्वान् ॥ ४ ॥

वेङ्कट० सः सुप्रज्ञः भवतु सुकर्मा वा सत्यज्ञः होता, यः हे आदित्यौ ! बलेन नमस्कारयुक्तः[7] आवर्तयति वाम् रक्षणार्थम् । पुनः वाम् इति पूरणम् । हविष्मान् भवति एव सः अभ्युदयाय अन्नवान् हविष्मान् इति ॥ ४ ॥

---

१. जुह्वन् मूको. २. °शील मूको. ३. तद वि' ख छम; तद अ'. ४. अस्माद् वि' ख छम. ५. °ङ्ग्रामैः मूको. ६. पराङ्मुखान् वि'. ७. °युक्तम् मूको.

इयमिन्द्रं वरुणमष्ट मे गीः प्रावत् तोके तनये तूतुजाना ।
सुरत्नासो देववीतिं गमेम यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

इयम् । इन्द्रम् । वरुणम् । अष्ट । मे । गीः । प्र । आवत् । तोके । तनये । तूतुजाना ।
सुऽरत्नासः । देवऽवीतिम् । गमेम । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥

वेङ्कट० पूर्वं व्याख्याता (ऋ ७,८४,५ द्र.) ॥ ५ ॥

[१]इति पञ्चमाष्टके षष्ठाध्याये सप्तमो वर्गः[१] ॥

[८६]

[१]वसिष्ठो मैत्रावरुणिर्ऋषिः । वरुणो देवता । त्रिष्टुप् छन्दः[१] ।

धीरा त्वस्य महिना जनूंषि वि यस्तस्तम्भ रोदसी चिदुर्वी ।
प्र नाकमृष्वं नुनुदे बृहन्तं द्विता नक्षत्रं पप्रथच्च भूम ॥ १ ॥[२]

धीरा । तु । अस्य । महिना । जनूंषि । वि । यः । तस्तम्भ । रोदसी इति । चित् । उर्वी इति ।
प्र । नाकम् । ऋष्वम् । नुनुदे । बृहन्तम् । द्विता । नक्षत्रम् । पप्रथत् । च । भूम ॥ १ ॥

वेङ्कट० स्थिराणि अविचालीनि[३] वरुणस्य महत्त्वेन सर्वाणि जातानि भूतानि, यो विस्तीर्णे द्यावापृथिव्यौ वि अस्तभ्नात्[४] । प्र नुनुदे तृतीयं लोकम्, आदित्यं वा दर्शनीयं महान्तं सोमं वरुणः । दिवा नक्षत्रं पृथिव्यां च भूतजातं[५] द्वैधम् पप्रथत उभयत्र प्रथितं करोति ॥ १ ॥

उत स्वया तन्वा३ सं वदे तत् कदा न्व१न्तर्वरुणे भुवानि ।
किं मे हव्यमहृणानो जुषेत कदा मृळीकं सुमना अभि ख्यम् ॥ २ ॥

उत । स्वया । तन्वा । सम् । वदे । तत् । कदा । नु । अन्तः । वरुणे । भुवानि ।
किम् । मे । हव्यम् । अहृणानः । जुषेत । कदा । मृळीकम् । सुऽमनाः । अभि । ख्यम् ॥ २ ॥

वेङ्कट० अपि च आत्मीयेन पुत्रेण सह अहम् एतत् वदामि । कदा अहं वरुणस्य अन्तः भवानीति । किम् च मे हव्यम् वरुणः अक्रुद्धः[६] जुषेत[७] । कदा च अहं सुखयितारम्[८] सुमनाः अभि पश्यामि ॥ २ ॥

पृच्छे तदेनो वरुण दिदृक्षूपो एमि चिकितुषो विपृच्छम् ।
समानमिन्मे कवयश्चिदाहुरयं ह तुभ्यं वरुणो हृणीते ॥ ३ ॥

१-१. नास्ति मूको. २. द्र. ऋ ७,११,२; १०,१२,१. ३. अविचलानि ल वि[१]. ४. °स्तद्भ्नात् मूको. ५. °जात मूको. ६. °क्रुद्ध मूको. ७. जुषे च वि[१] अ[१] द; अजुषेत ऌम. ८. सुखयि° वि[१] भ, सुखयितां ऌम; °तारं चाहं च वि[१] अ[१]; °तारम् अहं च ऌ ऌम.

पृच्छे । तत् । एनः । वरुण । दिदृक्षु[1] । उपो इति । एमि । चिकितुषः । विऽपृच्छम् ।
समानम् । इत् । मे । कवयः । चित् । आहुः । अयम् । ह । तुभ्यम् । वरुणः । हृणीते ॥ ३ ॥

वेङ्कट० पृच्छामि वरुण! तत् पापम् अहम् दिदृक्षुः[1] सर्वं भूतम्। यो मां[2] मद्दिदृक्षयाऽऽगच्छति तं पृच्छामि। तथा अहम् एव अन्यान् चिकितुषः जनान् उप[3] गच्छामि, विविधं च पृच्छामि। तत्र च सर्वे एव कवयः समानम् एव मम आहुः—अयं ह तुभ्यम् वरुणः क्रुध्यति इति ॥ ३ ॥

किमाग आस वरुण ज्येष्ठं यत् स्तोतारं जिघांससि सखायम् ।
प्र तन्मे वोचो दूळभ स्वधावोऽव त्वानेना नमसा तुर इयाम् ॥ ४ ॥

किम् । आगः । आस । वरुण । ज्येष्ठम् । यत् । स्तोतारम् । जिघांससि । सखायम् ।
प्र । तत् । मे । वोचः । दुःऽदभ । स्वधाऽवः । अव । त्वा । अनेनाः । नमसा । तुरः । इयाम् ॥

वेङ्कट० किम् मम प्रवृद्धतरम् पापम् आस वरुण! यत् त्वम् स्तोतारम् जिघांससि पाशैर्बध्नन् सखायम्। प्र ब्रूहि तत् पापं मम हे दुर्दम्भ! बलवन्!। उक्ते तस्मिन् पापे प्रायश्चित्तं "कृत्वा अनेनाः सन् त्वाम्" अभिमुखं गच्छामि हविषा सह त्वरमाणः। अत्र शौनकः—

"वरुणस्य गृहान् रात्रौ वसिष्ठः [4]स्वप्न आचरत्[5]।
प्रविवेशाथ तं तत्र श्वा नदन्[6] अभ्यधावत[7]॥

स तं प्रस्वापयामास जनमन्यं च वारुणम्।
ततस्तु वरुणो राजा स्वैः पाशैः समयवध्यत[8]॥

स बद्धः[9] पितरं सूक्तैश्चतुर्भिरथ उत्तरैः।
अभितुष्टाव 'धीरे(रा'[10] इ)ति मुमोचैनं ततः पिता[11]॥

'ध्रुवासु'[12] त्वे(त्वा'[13] इ)ति चोक्ताया[14] पाशाः[15] [16]मुमुचिरे सुतम्[16] ॥"
(बृदे ६, ११-१५) इति ॥[17]

अव द्रुग्धानि पित्र्या सृजा नोऽव या वयं चकृमा तनूभिः ।
अव राजन् पशुतृपं न तायुं सृजा वत्सं न दाम्नो वसिष्ठम् ॥ ५ ॥

अव । द्रुग्धानि । पित्र्या । सृज । नः । अव । या । वयम् । चकृम । तनूभिः ।
अव । राजन् । पशुऽतृपम् । न । तायुम् । सृज । वत्सम् । न । दाम्नः । वसिष्ठम् ॥ ५ ॥

---

१. वैप १,१५६८ j द्र. २. मा मूको. ३. अप मूको. ३-४. कृत्वानेन सं त्वं मूको. ४-५. स्वप्नमाचरन् मूको. ६. नन्दन् वि[1] अ[1]. ७. अभ्यधावत मूको. ८. "विबुध्य" वि[1] अ[1]. ९. बुध्वा वि[2] अ[1]; बुध्वा स लभ. १०. ऋ ७,८६,१. ११. कवित् मूको. १२. मराम मूको. १३. ऋ ७,८८,७. १४. चोक्तभ्यो मूको. १५. पाशान् मूको. १६-१६. अस्मात्प्रमोचिरे बृदे. १७. द्र. ऋ ७,५५,१ भाष्यम्.

वेङ्कट० पितुरागतान् अस्माक द्रोहान्[1] गर्भस्थेषु अस्मासु यदेन[2] पिता चकार, तत अस्मासु सङ्क्रान्तानि पापानि अव सृज। तथा अव सृज वयम् यानि कृतवन्त शरीरै । यथा राजन्! स्तेन प्रायश्चित्त कुर्वाण तृणपशुक[3] अवसृज्यते[4], यवसे प्रदर्शिते यदि पशवो भक्षयन्ति तत अवसृज्यते । तथा अव सृज वत्साम् इव च दाम्न वसिष्ठम् ॥ ५ ॥

न स स्वो दक्षो वरुण ध्रुतिः सा सुरा मन्युर्विभीदको अचित्तिः ।
अस्ति ज्यायान् कनीयस उपारे स्वप्नश्चनेदनृतस्य प्रयोता ॥ ६ ॥

न । सः । स्वः । दक्षः । वरुण । ध्रुतिः । सा । सुरा । मन्युः । विऽभीदकः । अचित्तिः ।
अस्ति । ज्यायान् । कनीयसः । उपऽअरे । स्वप्नः । चन । इत् । अनृतस्य । प्रऽयोता ॥ ६ ॥

वेङ्कट० न तत् स्व बल वरुण!, अपि तर्हि ध्रुति सा भवति। ध्रुति इति ध्रुवा नियतिम् आह। न पुरुष. स्वैर तदनुतिष्ठति, दैवाभिपन्न अनुतिष्ठतीत्यर्थ । सुरा मन्यु च ब्राह्मणादीना हननिमित्तभूत, विभे (ऽभी) दक च देवनहेतुः, अचित्ति[5] च मान्यामान्यहेतु, अस्ति ज्यायान् देव[6] नाम कनीयस[7] समीपे, तथा स्वप्न अपि पुरुषस्य निरर्थकस्य[8] मिश्रयिता भवति ॥ ६ ॥

अरं दासो न मीळ्हुषे कराण्यहं देवाय भूर्णयेऽनागाः ।
अचेतयदचितो देवो अर्यो गृत्सं राये कवितरो जुनाति ॥ ७ ॥

अरम् । दासः । न । मीळ्हुषे । कराणि । अहम् । देवाय । भूर्णये । अनागाः ।
अचेतयत् । अचितः । देवः । अर्यः । गृत्सम् । राये । कविऽतरः । जुनाति ॥ ७ ॥

वेङ्कट० पर्याप्त कर्म दास[9] इव स्वामिने अहम्[10] सेक्त्रे वरुणाय करोमि देवाय क्षिप्रकारिणे अपाप । ज्ञापयतु[11] अज्ञान् देव । स्वामी[12] स्तोतार धनाय अत्यन्त प्राज्ञ प्रेरयति ॥ ७ ॥

अयं सु तुभ्यं वरुण स्वधावो हृदि स्तोम उपश्रितश्चिदस्तु ।
शं नः क्षेमे शमु योगे नो अस्तु यूयं पात स्वस्तिभिः सदा नः ॥ ८ ॥

अयम् । सु । तुभ्यम् । वरुण । स्वधाऽवः । हृदि । स्तोमः । उपऽश्रितः । चित् । अस्तु ।
शम् । नः । क्षेमे । शम् । ऊँ इति । योगे । नः । अस्तु । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ८ ॥

---

१. द्रोहात् गर्भस्तासु मूको. २. यदेनं वि[1] अ[1]; यदेन ए ऋम. ३. द्र. ऋषु. आर्भव्य च कृते वेप १, १२७८C इ. ४. 'वाग ॰ रो' वि[1] अ[1]. ५. भविक्ति मूको. ६. देवम् मूको. ७. कमनीयः मूको. ८. भनि॰ वि[1] अ[1] ए, अनिर्षं ऋम. ९. दासं वि[1] ए ऋम, दासं अ[1]. १०. इ मूको. ११. ज्ञपय॰ वि[1] अ[1]. १२. स्वामिन् वि[1]; स्वामिन् अ[1]; ॰मिन् ए ऋम.

वेङ्कट० अयम् तुभ्यम् वरुण! बलवन्[1] हृदि स्तोम सुष्ठु उपश्रित[2] भवतु । शङ्कर च अयम् अस्माकम् क्षेमे भवतु शम् एव अस्मदीये योगे ॥ ८ ॥

[3]इति पञ्चमाष्टके षष्ठाध्याये अष्टमो वर्ग[3] ॥

[८७]

[1]वसिष्ठो मैत्रावरुणिर्ऋषिः । वरुणो देवता । त्रिष्टुप् छन्दः[1] ।

रदत् पथो वरुणः सूर्याय प्राणांसि समुद्रिया नदीनाम् ।
सर्गो न सृष्टो अर्वतीर्ऋतायञ्चकार महीरवनीरहभ्यः ॥ १ ॥

रदत् । पथः । वरुणः । सूर्याय । प्र । अर्णांसि । समुद्रियाः । नदीनाम् ।
सर्गः । न । सृष्टः । अर्वतीः । ऋतऽयन् । चकार । महीः । अवनीः । अहऽभ्यः ॥ १ ॥

वेङ्कट० व्यलिखद्[4] अन्तरिक्षे मार्गान् वरुण सूर्याय । 'उरु हि राजा वरुणश्चकार' (ऋ १, २४,८) इत्युक्तम् । प्र असृजत् च उदकानि अन्तरिक्ष्याणि नदी पूरयितुम् । असृष्ट इव अश्व 'उद्युक्तो वडवा' गन्तुमिच्छन् करोति महतो गती वरुण अहोभ्य । अन्वहम् उदित शीघ्र गच्छतीत्यर्थ ॥ १ ॥

आत्मा ते वातो रज आ नवीनोत् पशुर्न भूर्णिर्यवसे ससवान् ।
अन्तर्मही बृहती रोदसीमे विश्वा ते धाम वरुण प्रियाणि ॥ २ ॥

आत्मा । ते । वातः । रजः । आ । नवीनोत् । पशुः । न । भूर्णिः । यवसे । ससऽवान् ।
अन्तरिति । मही इति । बृहती इति । रोदसी इति । इमे इति । विश्वा । ते । धाम । वरुण । प्रियाणि ॥ २ ॥

वेङ्कट० शरीरम् ते गच्छन्[5] सर्वलोक नव कराति पशु इव भर्ता यवसे सम्भजनवान्, भक्षितस्य[6] इत्यर्थः । अन्त महती बृहति द्यावापृथिव्यौ इमे यानि भवन्ति[7] स्थानानि तानि[8] सर्वाणि तव प्रियाणि वरुण! इति ॥ २ ॥

परि स्पशो वरुणस्य स्मदिष्टा उभे पश्यन्ति रोदसी सुमेके ।
ऋतावानः कवयो यज्ञधीराः प्रचेतसो य इषयन्त मन्म ॥ ३ ॥

परि । स्पशः । वरुणस्य । स्मत्ऽइष्टाः । उभे इति । पश्यन्ति । रोदसी इति । सुमेके इति सुऽमेके ।
ऋतऽवानः । कवयः । यज्ञऽधीराः । प्रऽचेतसः । ये । इषयन्त । मन्म ॥ ३ ॥

---

१ °वन् मूको. २ उपश्रित भ°. ३-३. नास्ति मूको. ४. व्यलिख (°रथा इतम) मूको. ५-५ °तो वडवा भ°. ६ भवगच्छन् क इतम; गच्छन् वि° भ°. ७ भक्षित स° मूको. ८ भवन्ति मूको; धामानि भवनानि क मस्थाय. ९. त्रुटितम् इतम

वेङ्कट० परि पश्यन्ति चारा वरुणस्य शोभनगमना उभे द्यावापृथिव्यौ शोभमाने सत्यवन्त क्रान्तकर्माण सम्पूजनीयधैर्या, ये वरुणस्य पूजा मनुष्यै क्रियमाणाम् ऐच्छन् इति ॥ ३ ॥

उवाच मे वरुणो मेधिराय त्रिः सप्त नामाघ्न्या बिभर्ति ।
विद्वान् पदस्य गुह्या न वोचद् युगाय विप्र उपराय शिक्षन् ॥ ४ ॥

उवाच । मे । वरुण । मेधिराय । त्रि । सप्त । नाम । अघ्न्या । बिभर्ति ।
विद्वान् । पदस्य । गुह्या । न । वोचत् । युगाय । विप्र । उपराय । शिक्षन् ॥ ४ ॥

वेङ्कट० उवाच मह्यम् वरुण मधाविने त्रि सप्त एकविंशति नामानि काचिद् गौ बिभर्ति इति पृथिवीम् आह । तस्या हि यास्कपठितानि एकविंशतिर्नामानि (निघ १,१) । किञ्च विद्वान् वरुण पदस्य गुह्यानि च मह्यम् अवोचत् युक्ताय मेधावी आप्तुम्[२] उत्काय दृढमवस्थिताय शिक्षण कुर्वन् । नकार समुच्चयार्थीय । पदाना गुह्यान् अर्थांश्च व्याकरोत् इत्यर्थ ॥ ४ ॥

तिस्रो द्यावो निहिता अन्तरस्मिन् तिस्रो भूमीरुपराः षड्विधानाः ।
गृत्सो राजा वरुणश्चक्र एतं दिवि प्रेङ्खं हिरण्ययं शुभे कम् ॥ ५ ॥

तिस्र । द्याव । निऽहिता । अन्त । अस्मिन् । तिस्र । भूमी । उपरा । षट्ऽविधाना ।
गृत्स । राजा । वरुण । चक्रे । एतम् । दिवि । प्रऽईङ्खम् । हिरण्ययम् । शुभे । कम् ॥ ५ ॥

वेङ्कट० तिस्र द्याव भवन्ति इति । तिस्र च भूमय 'तिस्रो भूमीर्धारयन् त्रीँरुत द्यून्' (ऋ २,२७,८) इत्युक्तम् । तिस्र द्याव अस्मिन् वरुण अन्त निहिता । तथा तिस्र च भूम्य अस्मिन् एव उप्ता[३] । तथा षड्विधाना षड्विधा षट् कार्याणि येषा ऋतूनां ते शोभार्थम् । मेधावी राजा वरुण चक्रे एतम् दिवि प्रेङ्खम् इत्यादित्यम् आह । हिरण्ययम् कम् इति पूरणम् ॥ ५ ॥

अव सिन्धुं वरुणो द्यौरिव स्याद् द्रप्सो न श्वेतो मृगस्तुविष्मान् ।
गम्भीरशंसो रजसो विमानः सुपारक्षत्रः सतो अस्य राजा ॥ ६ ॥

अव । सिन्धुम् । वरुण । द्यौऽइव । स्यात् । द्रप्स । न । श्वेत । मृग । तुविष्मान् ।
गम्भीरऽशंस । रजस । विऽमान । सुपारऽक्षत्र । सत । अस्य । राजा ॥ ६ ॥

वेङ्कट० समुद्रम् वरुण 'अव स्यापयति', यथा वेला न अतिक्रामति, यथा द्यौ सर्वाणि भूतानि अवस्यापयति, द्रवणशील[४] श्वेतवर्ण गौर इव मृग तुविष्मान् प्रवृद्धिमान् वेगवान्

१ पूजा वि[१] ल; पजा ऍम २. आप्नुहि वि[१] अ[१] ल आप्नुनि ऍम ३ उप्ता वि[१] अ[१] ल, उप्त ऍम ४ ४ अधः स्था° वि[१] ल; अव स्था° ऍम, ५ द्रवि° मूको

गम्भीरस्तोत्र[1] अन्तरिक्षस्य परिच्छेत्ता सुपारबलः[2] अस्य बलं सुष्ठु पारयति । सतः[3] अस्य सर्वस्य लोकस्य राजा ॥ ६ ॥

यो मृळयाति चक्रुषे चिदागो वयं स्याम वरुणे अनागाः ।
अनु व्रतान्यदितेर्ऋधन्तो यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

यः । मृळयाति । चक्रुषे । चित् । आगः । वयम् । स्याम । वरुणे । अनागाः ।
अनु । व्रतानि । अदितेः । ऋधन्तः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥

वेङ्कट० यः सुखयति पापं चक्रुषे अपि स्तोत्रे, तस्मिन् वरुणे वयम् स्याम अनागसः[4] अनुक्रमेण अदीनस्य वरुणस्य सन्ध्यावन्दनादीनि वर्धयन्तः[5] ॥ ७ ॥

[6]इति पञ्चमाष्टके षष्ठाध्याये नवमो वर्गः[6] ॥

[८८]

[7]वसिष्ठो मैत्रावरुणिर्ऋषिः । वरुणो देवता । त्रिष्टुप् छन्दः[7] ।

प्र शुन्ध्युवं वरुणाय प्रेष्ठां मतिं वसिष्ठ मीळ्हुषे भरस्व ।
य ईमर्वाञ्चं करते यजत्रं सहस्रामघं वृषणं बृहन्तम् ॥ १ ॥

प्र । शुन्ध्युवम् । वरुणाय । प्रेष्ठाम् । मतिम् । वसिष्ठ । मीळ्हुषे । भरस्व ।
यः । ईम् । अर्वाञ्चम् । करते । यजत्रम् । सहस्रऽमघम् । वृषणम् । बृहन्तम् ॥ १ ॥

वेङ्कट० प्र भरस्व शोधयित्रीं पापकृताम् वरुणाय प्रियतमाम् स्तुतिम् हे वसिष्ठ! सेक्त्रे, यः एनम् आदित्यम् अभिमुखम् कुरुते यष्टव्यम् बहुधनम् वृषणम् महान्तम्। 'दिवि सूर्यमदधात्' (ऋ ५,८५,२) इत्युक्तम् ॥ १ ॥

अधा न्वस्य संदृशं जगन्वानग्नेरनीकं वरुणस्य मंसि ।
स्वर्यदश्मन्नधिपा उ अन्धोऽभि मा वपुर्दृशये निनीयात् ॥ २ ॥

अध । नु । अस्य । सम्ऽदृशम् । जगन्वान् । अग्नेः । अनीकम् । वरुणस्य । मंसि ।
स्वः । यत् । अश्मन् । अधिऽपाः । ऊँ इति । अन्धः । अभि । मा । वपुः । दृशये । निनीयात् ॥

वेङ्कट० अस्य सन्दर्शनम् "प्राप्तोऽहम्", अथ क्षिप्रं तस्य यागार्थम् वरुणस्य अग्नेः ज्वालालक्षणम् अनीकम् सामिधेनीभिः स्तौमि । कल्याणम् अभिषवग्राव्णि निधीयमानं यदा अन्धः सोमलक्षणम् वरुणः अधिपाता भवति, तदानीम् आत्मीयं रूपं मां प्रति नयतु मम दर्शनाय ॥ २ ॥

१. °र स्तोता वि' अ' ख; °रस्तोत्रा लभ. २ सुदार° मूको. ३. सतो वि' ए लभ, सतेत्य अ'. ४. मान्यस वि', मनागस अ' ख लभ. ५ °यन्तम् मूको. ६-६. नास्ति मूको. ७-७ प्रातोनु अ',

आ यद् रुहाव वरुणश्च नावं प्र यत् समुद्रमीरयाव मध्यम् ।
अधि यदपां स्नुभिश्चराव प्र प्रेङ्ख ईङ्खयावहै शुभे कम् ॥ ३ ॥

आ । यत् । रुहाव । वरुणः । च । नावम् । प्र । यत् । समुद्रम् । ईरयाव । मध्यम् ।
अधि । यत् । अपाम् । स्नुऽभिः । चराव । प्र । प्रऽईङ्खे । ईङ्खयावहै । शुभे । कम् ॥ ३ ॥

वेङ्कट० आ रुहाव यदि अहम् वरुण च नावम् । आरोहणानन्तरं च तां मध्यस्थितं समुद्रम् प्रति यदि प्र ईरयाव । समुद्रमध्यस्थानाम् अपाम् उपरि स्थितैः समुत्थितैः ऊर्मिभिः यदि चराव तां ततो वरुणगृहं प्रति नेतुम् ॥ ३ ॥

वसिष्ठं ह वरुणो नाव्याधादृषिं चकार स्वपा महोभिः ।
स्तोतारं विप्रः सुदिनत्वे अह्नां यान्नु द्यावस्ततनन् यादुषासः ॥ ४ ॥

वसिष्ठम् । ह । वरुणः । नावि । आ । अधात् । ऋषिम् । चकार । सुऽअपाः । महःऽभिः ।
स्तोतारम् । विप्रः । सुदिनऽत्वे । अह्नाम् । यात् । नु । द्यावः । ततनन् । यात् । उषसः ॥४॥

वेङ्कट० [1] । ऋषिम् चकार शोभनकर्मा तेजोभिः स्तोतारम् मेधावी अह्नाम् सुदिनत्वे । सुदिनानि अहानि अस्मै चकार इत्यर्थः । यानि अहानि द्यावः ततनन् यानि च उषसः, तेषाम् इति । 'अह्ना नेत्री जनित्री प्रजानाम्' (तै ४,३,११,५) इति औषसो मन्त्रः । द्यावो दीप्ता देवाः । यादिति द्वितीयाबहुवचनस्यादादेशः[2] ॥ ४ ॥

क्व१ त्यानि नौ सख्या बभूवुः सचावहे यदवृकं पुरा चित् ।
बृहन्तं मानं वरुण स्वधावः सहस्रद्वारं जगमा गृहं ते ॥ ५ ॥

क्व । त्यानि । नौ । सख्या । बभूवुः । सचावहे इति । यत् । अवृकम् । पुरा । चित् ।
बृहन्तम् । मानम् । वरुण । स्वधाऽवः । सहस्रऽद्वारम् । जगम । गृहम् । ते ॥ ५ ॥

वेङ्कट० हे वरुण![3] क्व तानि आवयोः सख्यानि अभवन् इति वरुणम् अपश्यन् आह[4] । अभिगच्छावहि 'यत् आवां' स्तेनवर्जितं यथा पुरा । चित् इत्युपमार्थे । बृहन्तम् बहून् अर्थान् सम्भवन्तम् वरुण! बलवन्![5] सहस्रद्वारम् गच्छाव गृहम् तव ॥ ५ ॥

य आपिर्नित्यो वरुण प्रियः सन् त्वामागांसि कृणवत् सखा ते ।
मा त एनस्वन्तो यक्षिन् भुजेम यन्धि ष्मा विप्रः स्तुवते वरूथम् ॥ ६ ॥

यः । आपिः । नित्यः । वरुण । प्रियः । सन् । त्वाम् । आगांसि । कृणवत् । सखा । ते ।
मा । ते । एनस्वन्तः । यक्षिन् । भुजेम । यन्धि । स्म । विप्रः । स्तुवते । वरूथम् ॥ ६ ॥

---

1 मूको प्रथमपादस्य व्याख्याने त्रुटितम् २. वैप १, २५८९ c,d द्र । 'स्यादेश मूको.
३. नास्ति मूको ४-४. ययावां मूको.

वेङ्कट० यः ज्ञातिः नित्यः[1] औरसः[2] वरुण! प्रियः सन् च त्वाम् आगांसि करोति। तव अनिष्टानि करोतीत्यर्थः। समानख्यानः ते। अथ बहुवदाद्। तेऽनागसः[3] वयं तव स्वभूताः मा एनस्वन्तः भुजेम पापफलम् हे पूजावन्![4] प्रयच्छ मेधावी त्वम् स्तुवते मह्यम् ध्रुवं गृहम् ॥ ६ ॥

ध्रुवासु॑ त्वा॒सु क्षि॒तिषु॑ क्षि॒यन्तो॒ व्य१॒॑स्मत् पाशं॒ वरु॑णो मुमोचत् ।
अवो॑ वन्वा॒ना अदि॑तेरु॒पस्था॑द् यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥ ७ ॥

ध्रु॒वासु॑ । त्वा॒ । आ॒सु॒ । क्षि॒तिषु॑ । क्षि॒यन्तः॑ । वि । अ॒स्मत् । पाश॑म् । वरु॑णः । मु॒मो॒च॒त् ।
अवः॑ । व॒न्वा॒नाः । अदि॑तेः । उ॒पऽस्था॑त् । यू॒यम् । पा॒त॒ । स्व॒स्तिऽभिः॑ । सदा॑ । नः॒ ॥ ७ ॥

वेङ्कट० आसु ध्रुवासु निर्गन्तुम् अशक्यासु। त्वेति सप्तमीबहुवचनस्याकारः[5]। क्षितिषु[6] कासुचित् निवसन्तो वयम् इदानीं भवामः। वि मुमोचतु[7] अस्मत्तः पाशम् वरुणः। वयं गमनम् याचमानाः अदितेः उपस्थात्[8] इदानीम्। बद्धोऽदितेः[9] उपस्थे तिष्ठति, विमुक्तः स्वैरं गच्छतीति ॥ ७ ॥

[10]इति पञ्चमाष्टके षष्ठाध्याये दशमो वर्गः[10] ॥

[८९]

[10]वसिष्ठो मैत्रावरुणिर्ऋषिः। वरुणो देवता। गायत्री छन्दः, पञ्चमी जगती[10]।

मो षु व॑रुण मृ॒न्मयं॑ गृ॒हं रा॑जन्न॒हं ग॑मम् । मृ॒ळा सु॑क्षत्र मृ॒ळय॑ ॥ १ ॥

मो इति॑ । सु । व॒रु॒ण॒ । मृ॒त्ऽमय॑म् । गृ॒हम् । रा॒ज॒न् । अ॒हम् । ग॒म॒म् । मृ॒ळ । सु॒ऽक्ष॒त्र॒ । मृ॒ळय॑ ॥

वेङ्कट० मा एव मृन्मयम् गृहम् वरुण![11] राजन्! अहम् गच्छेयम्। किं तर्हि। सौवर्णम् एव। सु इति पूरणम्। सुखितः भव, अस्मान् च हे सुबल! मृळय ॥ १ ॥

यदेमि॑ प्रस्फु॒रन्नि॑व॒ दृति॒र्न ध्मा॒तो अ॑द्रिवः । मृ॒ळा सु॑क्षत्र मृ॒ळय॑ ॥ २ ॥

यत् । एमि॑ । प्र॒स्फु॒रन्ऽइ॑व । दृतिः॑ । न । ध्मा॒तः । अ॒द्रि॒ऽवः॒ । मृ॒ळ । सु॒ऽक्ष॒त्र॒ । मृ॒ळय॑ ॥ २ ॥

वेङ्कट० यत् गच्छामि प्रस्फुरन् इव घोरः समादर्शने, दृतिः[12] इव च उदकेन भयेन आध्मातः[13] हे आयुधवन्![13] ॥ २ ॥

क्रत्वः॑ समह दी॒नता॑ प्रती॒पं ज॑गमा शुचे । मृ॒ळा सु॑क्षत्र मृ॒ळय॑ ॥ ३ ॥

क्रत्वः॑ । स॒म॒ह॒ । दी॒नता॑ । प्र॒ति॒ऽई॒पम् । ज॒ग॒म॒ । शु॒चे॒ । मृ॒ळ । सु॒ऽक्ष॒त्र॒ । मृ॒ळय॑ ॥ ३ ॥

वेङ्कट० हे पूजासहित! कर्मणः दीनतायाम् प्रतीपम् गच्छेम शुचे![14]। दीनं कर्म मा अस्मान् उपतिष्ठतु इत्यर्थः ॥ ३ ॥

---

1. नित्यम् मूको. 2. °रसं मूको. 3. °गस॰ मूको. 4. °वन् मूको. 5. °स्याकारः वि°; °त्याकार अ° ख ह्म 6. नास्ति मूको. 7. नास्ति ख्य. 8. °स्थान् मूको. 9. बध्नो° मूको. 10-10. नास्ति मूको. 11. भूमिम् वि°; इमिम अ° ख ह्म. 12. ध्मातः वि° अ°; आध्मातः ख ह्म. 13. °वन् वि° अ°; °वान् ख ह्म. 14. [illegible]

अपां मध्ये तस्थिवांसं तृष्णाविदज्जरितारम् । मृळा सुक्षत्र मृळय ॥ ४ ॥

अपाम् । मध्ये । तस्थिऽवांसम् । तृष्णा । अविदत् । जरितारम् । मृळ । सुऽक्षत्र । मृळय ॥४॥

वेङ्कट० समुद्रमध्यस्थानाम् अपाम् मध्ये तस्थिवांसम् स्तोतारम् माम् अविन्दत् तृष्णा । तथा सति मृळ, हे सुक्षत्र ! मृळय इति ॥ ४ ॥

यत् किं चेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्याश्चरामसि ।
अचित्ती यत् तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः ॥ ५ ॥

यत् । किम् । च । इदम् । वरुण । दैव्ये । जने । अभिऽद्रोहम् । मनुष्याः । चरामसि ।
अचित्ती । यत् । तव । धर्म । युयोपिम । मा । नः । तस्मात् । एनसः । देव । रिरिषः ॥ ५ ॥

वेङ्कट० यत् किम् च इदम् हे वरुण ! दैव्ये जने मनुष्याः सन्तो वयम् अभिद्रोहम् चरामः । देवदृष्टानि व्रतानि न तथा कुर्म इत्यर्थः । अज्ञानेन[1] यत् च तव धर्माणि युयोपिम । शुभानाम् अशुभानां च समीकरणं योपनम् । मा अस्मान् तस्मात् पापादे-[2] देव ! हिंसीः ॥ ५ ॥

[3]इति पञ्चमाष्टके षष्ठाध्याये एकादशो वर्गः[3] ॥

[९०]

[1]वसिष्ठो मैत्रावरुणिर्ऋषिः । वायुर्देवता, अन्त्यानां तिसृणाम् [2]इन्द्रवायू । त्रिष्टुप् छन्दः[1] ।

प्र वीरया शुचयो दद्रिरे वामध्वर्युभिर्मधुमन्तः सुतासः ।
वह वायो नियुतो याह्यच्छा पिबा सुतस्यान्धसो मदाय ॥ १ ॥

प्र । वीरऽया । शुचयः । दद्रिरे । वाम् । अध्वर्युऽभिः । मधुऽमन्तः । सुतासः ।
वह । वायो इति । निऽयुतः । याहि । अच्छ । पिब । सुतस्य । अन्धसः । मदाय ॥ १ ॥

वेङ्कट० प्रकर्षेण आद्रियन्ते युवयोः वीर्यकरणेच्छया शुचयः अध्वर्युभिः मधुमन्तः सुताः सोमाः । वह वायो ! त्वम् । प्रापय आत्मानं तदर्थम् । नियुतः अभि याहि । पिब सुतं सोमं मदार्थम् इन्द्रेण सहेति ॥ १ ॥

ईशानाय प्रहुतिं यस्त आनट् शुचिं सोमं शुचिपास्तुभ्यं वायो ।
कृणोषि तं मर्त्येषु प्रशस्तं जातोजातो जायते वाज्यस्य ॥ २ ॥

ईशानाय । प्रऽहुतिम् । यः । ते । आनट् । शुचिम् । सोमम् । शुचिऽपाः । तुभ्यम् । वायो इति ।
कृणोषि । तम् । मर्त्येषु । प्रऽशस्तम् । जातःऽजातः । जायते । वाजी । अस्य ॥ २ ॥

---

१. ज्ञानेन वि' अ'. २. पापेः वि'; पादेः क; पादैः अ'. ३-३. नास्ति मूको.

वेङ्कट० ईशानाय प्रकर्षेण होतव्यं प्रमुखे वा होतव्यम् यः तुभ्यं प्रापयति शुचिम् सोमम् हे शुद्धस्य सोमस्य पातः! तुभ्यम् वायो!, करोषि तम् मनुष्येषु प्रशस्तम्। जातोजातः पुत्रः अस्य बलवान् जायते। सर्वः पुत्रः बलवान् भवति॥ २॥

राये नु यं जज्ञतू रोदसीमे राये देवी धिषणा धाति देवम्।
अध वायुं नियुतः सश्चत स्वा उत श्वेतं वसुधितिं निरेके॥ ३॥

राये। नु। यम्। जज्ञतुः। रोदसी इति। इमे इति। राये। देवी। धिषणा। धाति। देवम्।
अध। वायुम्। निऽयुतः। सश्चत। स्वाः। उत। श्वेतम्। वसुऽधितिम्। निरेके॥ ३॥

वेङ्कट० धनार्थम् यम् जनयतः इमे द्यावापृथिव्यौ, तम् देवम् धनार्थम् देवी मदीया बुद्धिः धारयति। तदनन्तरम् एव समागमनार्थम्[1] वायुम् नियुतः सेवन्ते स्वाः अपि श्वेतवर्णं दत्तधनं निर्गमने दारिद्र्ये वा स्तोतॄणामिति॥ ३॥

उच्छन्नुषसः सुदिना अरिप्रा उरु ज्योतिर्विविदुर्दीध्यानाः।
गव्यं चिदूर्वमुशिजो वि वव्रुस्तेषामनु प्रदिवः सस्रुरापः॥ ४॥

उच्छन्। उषसः। सुऽदिनाः। अरिप्राः। उरु। ज्योतिः। विविदुः। दीध्यानाः।
गव्यम्। चित्। ऊर्वम्। उशिजः। वि। वव्रुः। तेषाम्। अनु। प्रऽदिवः। सस्रुः। आपः॥४॥

वेङ्कट० व्युच्छन्ति उषसः सुदिनाः अपापाः[2]। उरु ज्योतिः च लेभिरे दीप्यमानाः ऋषयः। गव्यम् च सङ्घातम् कामयमानाः देवाः विवृतद्वारमकुर्वन्। तान् आपः च दोसा. पुरातनाः वा अनु सस्रुः॥ ४॥

ते सत्येन मनसा दीध्यानाः स्वेन युक्तासः क्रतुना वहन्ति।
इन्द्रवायू वीरवाहं रथं वामीशानयोरभि पृक्षः सचन्ते॥ ५॥

ते। सत्येन। मनसा। दीध्यानाः। स्वेन। युक्तासः। क्रतुना। वहन्ति।
इन्द्रवायू इति। वीरऽवाहम्। रथम्। वाम्। ईशानयोः। अभि। पृक्षः। सचन्ते॥ ५॥

वेङ्कट० ते सत्येन मनसा दीप्यमानाः अमुग्धमनसः स्वेन प्रज्ञानेन युक्ताः वहन्ति। हे इन्द्रवायू! वीरयोः युवयोः वोढारम् रथम्[3] पणीन्[4] जेतुं तथा ईश्वरयोः भवतोः सतोः पणिभ्यः गोलक्षणम् अन्नं च सचन्ते॥ ५॥

ईशानासो ये दधते स्वर्णो गोभिरश्वेभिर्वसुभिर्हिरण्यैः।
इन्द्रवायू सूरयो विश्वमायुरर्वद्भिर्वीरैः पृतनासु सह्युः॥ ६॥

---

1. सम्या ग॰ म॰; मयाग॰ वि॰ अ॰. 2. अपाशा. मूको. 3. नास्ति वि॰ अ॰. 4. पणीन् म॰; पणि वि॰ ख.

ईशानासः । ये । दधते । स्वः । नः । गोभिः । अश्वेभिः । वसुऽभिः । हिरण्यैः ।
इन्द्रवायू इति । सूरयः । विश्वम् । आयुः । अर्वत्ऽभिः । वीरैः । पृतनासु । सह्युः ॥ ६ ॥

वेङ्कट० हे इन्द्रवायू ! शक्ता ये धारयन्ति सर्वम् अस्माकं गवादिभिः सह धनम्, ते सूरयः स्तोतारः अस्मदीयाः शत्रूणाम् विश्वम् अन्नम् अश्वैः वीरैः च सङ्ग्रामेषु अभिभवन्तु ॥ ६ ॥

अर्वन्तो न श्रवसो भिक्षमाणा इन्द्रवायू सुष्टुतिभिर्वसिष्ठाः ।
वाजयन्तः स्ववसे हुवेम यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

अर्वन्तः । न । श्रवसः । भिक्षमाणाः । इन्द्रवायू इति । सुस्तुतिऽभिः । वसिष्ठाः ।
वाजऽयन्तः । सु । अवसे । हुवेम । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥

वेङ्कट० अश्वाः इव घासम् अन्नम् भिक्षमाणाः इन्द्रवायू शोभनाभिः स्तुतिभिः वसिष्ठाः अन्नम् इच्छन्तः 'सुष्ठु आह्वयेम' रक्षणार्थम् इति ॥ ७ ॥

[1]इति पञ्चमाष्टके षष्ठाध्याये द्वादशो वर्गः[2] ॥

[९१]

[1]वसिष्ठो मैत्रावरुणिर्ऋषिः । प्रथमातृतीययोर्वायुर्देवता, शिष्टानाम् इन्द्रवायू । त्रिष्टुप् छन्दः[2] ।

कुविदङ्ग नमसा ये वृधासः पुरा देवा अनवद्यास आसन् ।
ते वायवे मनवे बाधितायावासयन्नुषसं सूर्येण ॥ १ ॥

कुवित् । अङ्ग । नमसा । ये । वृधासः । पुरा । देवाः । अनवद्यासः । आसन् ।
ते । वायवे । मनवे । बाधिताय । अवासयन् । उषसम् । सूर्येण ॥ १ ॥

वेङ्कट० बहु क्षिप्रं हविषा वृद्धाः पुरा ये देवाः अनवद्याः अभवन्, ते शत्रुभिः बाधिताय मनवे राज्ञे तद्धविर्भिः प्रीताः यज्ञमुखं वायुमयं यजतु इति मन्यमानाः यागार्थम् सूर्येण सह उषसम् अवासयन् इति ॥ १ ॥

उशन्ता दूता न दभाय गोपा मासश्च पाथः शरदश्च पूर्वीः ।
इन्द्रवायू सुष्टुतिर्वामियाना मार्डीकमीट्टे सुवितं च नव्यम् ॥ २ ॥

उशन्ता । दूता । न । दभाय । गोपा । मासः । च । पाथः । शरदः । च । पूर्वीः ।
इन्द्रवायू इति । सुऽस्तुतिः । वाम् । इयाना । मार्डीकम् । ईट्टे । सुवितम् । च । नव्यम् ॥ २ ॥

वेङ्कट० कामयमानौ[3] दूतौ न हिंसायै भवथः । गोपायितारौ[4] मासान् च रक्षथः शरदः च बह्वीः ।

---

1. सुष्ठु वा(वा)ह्वये' वि'; सुष्ठु वा ह्वये' अ'. 2-2. नास्ति मूको. 3. माना' मूको. 4. गोपयि' मूको.

हे इन्द्रवायू! सुष्टुतिः वाम् गच्छन्ती सुखम् इच्छति शोभनं च गमनम् नवतरम्। पुत्रो वा सुवितः[1] इति ॥ २ ॥

पीवोअन्नाँ रयिवृधः सुमेधाः श्वेतः सिषक्ति नियुतामभिश्रीः ।
ते वायवे समनसो वि तस्थुर्विश्वेन्नरः स्वपत्यानि चक्रुः ॥ ३ ॥

पीवःऽअन्नान् । रयिऽवृधः । सुऽमेधाः । श्वेतः । सिसक्ति । निऽयुताम् । अभिऽश्रीः ।
ते । वायवे । सऽमनसः । वि । तस्थुः । विश्वा । इत् । नरः । सुऽअपत्यानि । चक्रुः ॥ ३ ॥

वेङ्कट० स्थूलान्नान् रय्या[2] वृद्धान् सुप्रज्ञः श्वेतवर्णः सेवते वायुः नियुताम् अभिगन्ता। ते च अयम् एव यष्टव्य इति सङ्गतमनसः[3] वायवे तिष्ठन्ति विविधम्। विश्वानि एव मनुष्याः कर्माणि वायवे चक्रुः। [4]शोभनान्यपतननिमित्तानि[4] येषु तानि स्वपत्यानि इति ॥ ३ ॥

यावत् तरस्तन्वो यावदोजो यावन्नरश्चक्षसा दीध्यानाः ।
शुचिं सोमं शुचिपा पातमस्मे इन्द्रवायू सदतं बर्हिरेदम् ॥ ४ ॥

यावत् । तरः । तन्वः । यावत् । ओजः । यावत् । नरः । चक्षसा । दीध्यानाः ।
शुचिम् । सोमम् । शुचिऽपा । पातम् । अस्मे इति । इन्द्रवायू इति । सदतम् । बर्हिः । आ । इदम् ॥

वेङ्कट० यावत्प्रमाणः वेगः शरीरस्य यावत् ओजः यावत् च मनुष्याः चक्षुषा पश्यन्ति युवयोः शरीरं दीप्यमाना युवानः, [5]तावता शरीरेण आगतौ[5]। शिष्टं स्पष्टम् इति ॥ ४ ॥

नियुवाना नियुतः स्पार्हवीरा इन्द्रवायू सरथं यातमर्वाक् ।
इदं हि वां प्रभृतं मध्वो अग्रमध प्रीणाना वि मुमुक्तमस्मे ॥ ५ ॥

निऽयुवाना । निऽयुतः । स्पार्हऽवीराः । इन्द्रवायू इति । सऽरथम् । यातम् । अर्वाक् ।
इदम् । हि । वाम् । प्रऽभृतम् । मध्वः । अग्रम् । अध । प्रीणाना । वि । मुमुक्तम् । अस्मे इति ॥

वेङ्कट० निमिश्रयन्तौ[6] नियुतः स्पृहणीयबलाः[7] हे इन्द्रवायू! समानरथम् आगच्छतम् अभिमुखम्। इदम् हि[7] वाम् प्रभृतम् [8]ऐन्द्रवायवाख्यम् मध्वः[8] अग्रम्। अथ प्रीयमाणौ अस्मान् पाशबन्धाद् वि-मुञ्चतम् ॥ ५ ॥

या वां शतं नियुतो याः सहस्रमिन्द्रवायू विश्ववाराः सचन्ते ।
आभिर्यातं सुविदत्राभिरर्वाक् पातं नरा प्रतिभृतस्य मध्वः ॥ ६ ॥

---

१. सुषित मूको. २. नया मूको. ३. सङ्कल्पित ख³. ४-४. शोभना° मूको. ५. ताः य व वि° क; ताः भवता छम. ६. °यन्तो मूको. ७. °णीयं ··· हि° ख³; °णीयं ब° क छम. ८. नि मूको. ९-९. °स्वमुक्तौ वि° ख³.

या । वाम् । शतम् । निऽयुतः । याः । सहस्रम् । इन्द्रवायू इति । विश्वऽवाराः । सचन्ते ।
आ । आभिः । यातम् । सुऽविदत्राभिः । अर्वाक् । पातम् । नरा । प्रतिऽभृतस्य । मध्वः ॥६॥

वेङ्कट० याः वाम् सचन्ते शतम् नियुतः याः च सहस्रम् इन्द्रवायू! सर्वैः वारयितव्याः । आ यातम् आभिः सुधनाभिः अभिमुखम्, पातम् च नरेण(?) सम्भृतम् सोमम् ॥ ६ ॥

अर्वन्तो न श्रवसो भिक्षमाणा इन्द्रवायू सुष्टुतिभिर्वसिष्ठाः ।
वाजयन्तः स्ववसे हुवेम यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

अर्वन्तः । न । श्रवसः । भिक्षमाणाः । इन्द्रवायू इति । सुस्तुतिऽभिः । वसिष्ठाः ।
वाजऽयन्तः । सु । अवसे । हुवेम । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥

वेङ्कट० पूर्वं व्याख्याता (ऋ ७,९०,७ द्र.) ॥ ७ ॥

[1]इति पञ्चमाष्टके षष्ठाध्याये त्रयोदशो वर्गः[1] ॥

[९२]

[1]वसिष्ठो मैत्रावरुणिर्ऋषिः । वायुर्देवता, द्वितीयाचतुर्थ्योरिन्द्रवायू । त्रिष्टुप् छन्दः[1] ।

आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार ।
उपो ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयम् ॥ १ ॥

आ । वायो इति । भूष । शुचिऽपाः । उप । नः । सहस्रम् । ते । निऽयुतः । विश्वऽवार ।
उपो इति । ते । अन्धः । मद्यम् । अयामि । यस्य । देव । दधिषे । पूर्वऽपेयम् ॥ १ ॥

वेङ्कट० उप आ गच्छ अस्मान् वायो! सोमस्य पातः! । सहस्रम् हि ते सन्ति नियुतः हे विश्वैर्वरणीय! । तुभ्यम् उप गमयामि मदकरम् सोमम्, यस्य देव! करोषि पूर्वपानम्[2] ॥ १ ॥

प्र सोता जीरो अध्वरेष्वस्थात् सोममिन्द्राय वायवे पिबध्यै ।
प्र यद् वां मध्वो अग्रियं भरन्त्यध्वर्यवो देवयन्तः शचीभिः ॥ २ ॥

प्र । सोता । जीरः । अध्वरेषु । अस्थात् । सोमम् । इन्द्राय । वायवे । पिबध्यै ।
प्र । यत् । वाम् । मध्वः । अग्रियम् । भरन्ति । अध्वर्यवः । देवऽयन्तः । शचीभिः ॥ २ ॥

वेङ्कट० प्र अस्थात् अभिषोताऽध्वर्युः क्षिप्रः यज्ञेषु प्रागेव यम् सोमम् इन्द्राय वायवे च पानाय । प्र हरन्ति यत् मुख्यम् सोमस्य वाम् अध्वर्यवः देवकामाः कर्मभिः ॥ २ ॥

1-1. नास्ति मूको. 2 पूर्वपानम् मूको.

प्र याभिर्यासि दाश्वांसमच्छा नियुद्भिर्वायविष्टये दुरोणे ।
नि नो रयिं सुभोजसं युवस्व नि वीरं गव्यमश्व्यं च राधः ॥ ३ ॥

प्र । याभिः । यासि । दाश्वांसम् । अच्छ । नियुत्ऽभिः । वायो इति । इष्टये । दुरोणे ।
नि । नः । रयिम् । सुऽभोजसम् । युवस्व । नि । वीरम् । गव्यम् । अश्व्यम् । च । राधः ॥३॥

वेङ्कट० प्र गच्छसि[1] याभिः यजमानं प्रति नियुद्भिः हे वायो! यज्ञार्थम् गृहे, ताभिः नि युवस्व अस्माकम् रयिम् शोभनभोजनम् । वीरम् गव्यम् अश्व्यम्[2] च धनम् नि मिश्रयेति ॥ ३ ॥

ये वायव इन्द्रमादनास आदेवासो नितोशनासो अर्यः ।
घ्नन्तो वृत्राणि सूरिभिः ष्याम सासह्वांसो युधा नृभिरमित्रान् ॥ ४ ॥

ये । वायवे । इन्द्रऽमादनासः । आऽदेवासः । निऽतोशनासः । अर्यः ।
घ्नन्तः । वृत्राणि । सूरिऽभिः । स्याम । ससह्वांसः । युधा । नृऽभिः । अमित्रान् ॥ ४ ॥

वेङ्कट० ये अश्वाः[3] इन्द्रवायुभ्यां मदहेतवः इन्द्रवायू देवाभिमुखाः हन्तारः शत्रोः, तैः सूरिभिः प्राज्ञैः अश्वैः इन्द्रवायू गमयद्भिः शत्रून् घ्नन्तः वयम् स्याम अभिभवन्तः युद्धेन भटैः[4] च अमित्रान् ॥ ४ ॥

आ नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिरुप याहि यज्ञम् ।
वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

आ । नः । नियुत्ऽभिः । शतिनीभिः । अध्वरम् । सहस्रिणीभिः । उप । याहि । यज्ञम् ।
वायो इति । अस्मिन् । सवने । मादयस्व । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥

वेङ्कट० निगदसिद्धा ॥ ५ ॥

[5]इति पञ्चमाष्टके षष्ठाध्याये चतुर्दशो वर्गः[5] ॥

[९३]

[5]वसिष्ठो मैत्रावरुणिर्ऋषिः । इन्द्राग्नी देवता । त्रिष्टुप् छन्दः[5] ।

शुचिं नु स्तोमं नवजातमद्येन्द्राग्नी वृत्रहणा जुषेथाम् ।
उभा हि वां सुहवा जोहवीमि ता वाजं सद्य उशते धेष्ठा ॥ १ ॥

---

१. प्रगच्छ° वि° छ लभ; प्रगच्छति अ° २. अश्व्यम् मूको. ३. नास्ति वि° ४. तु. ऋ (१,१००,९) भाष्यम्; भटैः मूको. ५-५. नास्ति मूको.

शुचिम् । नु । स्तोमम् । नवऽजातम् । अद्य । इन्द्राग्नी इति । वृत्रऽहना । जुषेथाम् ।
उभा । हि । वाम् । सुऽहवा । जोहवीमि । ता । वाजम् । सद्यः । उशते । धेष्ठा ॥ १ ॥

वेङ्कट० निरवद्यम् क्षिप्रम् स्तोमम् नवजननम् अद्य हे इन्द्राग्नी! शत्रूणां हन्तारौ! सेवेथाम्[1] । उभा हि वाम् अहं स्वाह्वानौ भृशम् आह्वयामि । तौ युवाम् अन्नम् सद्यः एव कामयमानाय मह्यं दातृतमौ ॥ १ ॥

ता सानसी शवसाना हि भूतं साकंवृधा शवसा शूशुवांसा ।
क्षयन्तौ रायो यवसस्य भूरेः पृङ्क्तं वाजस्य स्थविरस्य घृष्वेः ॥ २ ॥

ता । सानसी इति । शवसाना । हि । भूतम् । साकम्ऽवृधा । शवसा । शूशुऽवांसा ।
क्षयन्तौ । रायः । यवसस्य । भूरेः । पृङ्क्तम् । वाजस्य । स्थविरस्य । घृष्वेः ॥ २ ॥

वेङ्कट० तौ सम्भजनीयौ हे बलम् आचरन्तौ[2] हि भवतम् सहवृद्धौ बलेन वर्धमानौ ईश्वरौ भवन्तौ धनस्य यवसस्य च बहुनः । तथा सति सम्पर्चयतं प्रयच्छत वा अन्नं वृद्धम् घर्षणशीलम्[2] शत्रूणाम् इति ॥ २ ॥

उपो ह यद् विदथं वाजिनो गुर्धीभिर्विप्राः प्रमतिमिच्छमानाः ।
अर्वन्तो न काष्ठां नक्षमाणा इन्द्राग्नी जोहुवतो नरस्ते ॥ ३ ॥

उपो इति । ह । यत् । विदथम् । वाजिनः । गुः । धीभिः । विप्राः । प्रऽमतिम् । इच्छमानाः ।
अर्वन्तः । न । काष्ठाम् । नक्षमाणाः । इन्द्राग्नी इति । जोहुवतः । नरः । ते ॥ ३ ॥

वेङ्कट० उपगच्छन्ति यदा गृहं हविष्मन्तः कर्मभिः मेधाविनः इन्द्राग्न्योः प्रमतिम्[3] इच्छमानाः अश्वा इव काष्ठाम् व्याप्नुवानाः, तदानीम् इन्द्राग्नी भृशम् आह्वयन्तः भवन्ति ते मनुष्याः इति ॥ ३ ॥

गीर्भिर्विप्रः प्रमतिमिच्छमान ईट्टे रयिं यशसं पूर्वभाजम् ।
इन्द्राग्नी वृत्रहणा सुवज्रा प्र नो नव्येभिस्तिरतं देष्णैः ॥ ४ ॥

गीःऽभिः । विप्रः । प्रऽमतिम् । इच्छमानः । ईट्टे । रयिम् । यशसम् । पूर्वऽभाजम् ।
इन्द्राग्नी इति । वृत्रऽहना । सुऽवज्रा । प्र । नः । नव्येभिः । तिरतम् । देष्णैः ॥ ४ ॥

वेङ्कट० गीर्भिः विप्रः प्रमतिम् इच्छमानः याचते धनम् इच्छति वा यशसा युक्तम् पूर्वमेव भजनीयम् । हे इन्द्राग्नी! शत्रूणां हन्तारौ! स्वायुधौ[1] प्र वर्धयतम् अस्मान् नवतरैः[4] धनैः ॥ ४ ॥

---

१. सेवेथाम् वि[1] अ[1]; वेथाम् ल छम. २. वर्षण° मूको. ३. प्रमितिम् वि[1] अ[1]. ४. नेतरैः वि[1] अ[1]; नोनरैः ल छम.

सं यन्मही मिथती स्पर्धमाने तनूरुचा शूरसाता यतैते ।
अदेवयुं विदथे देवयुभिः सत्रा हतं सोमसुता जनेन ॥ ५ ॥

सम् । यत् । मही इति । मिथती इति । स्पर्धमाने इति । तनूऽरुचा । शूरऽसाता । यतैते इति ।
अदेवऽयुम् । विदथे । देवयुऽभिः । सत्रा । हतम् । सोमऽसुता । जनेन ॥ ५ ॥

वेङ्कट० 'सम् गच्छेते' महत्यौ संयुज्यमाने स्पर्धमाने दीप्तशरीरे सेने सङ्ग्रामे । तदानीम् अयजमानम् देवयुभिः हतम् सङ्ग्रामगृहे । तदेव आह—सत्यम् एव हतम् यजमानेन जनेन च इति ॥ ५ ॥

'इति पञ्चमाष्टके षष्ठाध्याये पञ्चदशो वर्गः' ॥

इमामु षु सोमसुतिमुप न एन्द्राग्नी सौमनसाय यातम् ।
नू चिद्धि परिमम्नाथे अस्माना वां शश्वद्भिर्ववृतीय वाजैः ॥ ६ ॥

इमाम् । ऊँ इति । सु । सोमऽसुतिम् । उप । नः । आ । इन्द्राग्नी इति । सौमनसाय । यातम् ।
नु । चित् । हि । परिमम्नाथे इति परिऽमम्नाथे । अस्मान् । आ । वाम् । शश्वत्ऽभिः । ववृतीय । वाजैः ॥

वेङ्कट० इमाम् एव अस्मदीयाम् सोमसुतिम् हे इन्द्राग्नी! अस्मासु सौमनसं कर्तुं सुष्ठु उप आ गच्छतम् । क्षिप्रम् अस्मान् परिमम्नाथे । आत्मीयाः एते इति बुद्धिः परिमननम् । तथा सति बहुभिः अन्नैः वाम् आ वर्तयेयम् ॥ ६ ॥

सो अग्न एना नमसा समिद्धोऽच्छा मित्रं वरुणमिन्द्रं वोचेः ।
यत् सीमागश्चकृमा तत् सु मृळ तदर्यमादितिः शिश्रथन्तु ॥ ७ ॥

सः । अग्ने । एना । नमसा । सम्ऽइद्धः । अच्छ । मित्रम् । वरुणम् । इन्द्रम् । वोचेः ।
यत् । सीम् । आगः । चकृम । तत् । सु । मृळ । तत् । अर्यमा । अदितिः । शिश्रथन्तु ॥ ७ ॥

वेङ्कट० सः त्वम् अग्ने! अनेन हविषा समिद्धः मित्रादीन् अभिब्रूहि यत् अस्माकम् अभिलषितम् । यत् वयं सर्वतः पापं कृतवन्तः, तत् पापं सुष्ठु सुखय । तत्[1] यत्[1] अर्यमा अदितिः च अन्ये च मित्रादयः श्रथयन्तु ॥ ७ ॥

एता अग्न आशुषाणास इष्टीर्युवोः सचाभ्यश्याम वाजान् ।
मेन्द्रो नो विष्णुर्मरुतः परि ख्यन् यूयं पात स्वस्तिभिः सदा नः ॥ ८ ॥

एताः । अग्ने । आशुषाणासः । इष्टीः । युवोः । सचा । अभि । अश्याम । वाजान् ।
मा । इन्द्रः । नः । विष्णुः । मरुतः । परि । ख्यन् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥८॥

१-१. सङ्गच्छते मूको, २-२. नास्ति मूको. ३. तदा मूको.

वेङ्कट० एता इष्टी अग्ने! व्यापयन्त अपि च स्वभूतानि अस्मानि सह प्राप्नुयाम। युवयो[1] स्वभूतान् अस्मान् इन्द्रादय मा परि ख्यन्। परिवर्जयन्तु इत्यर्थः ॥ ८ ॥

[2]इति पञ्चमाष्टके षष्ठाध्याये षोडशो वर्गः[2] ॥

[९४]

[3]वसिष्ठो मैत्रावरुणिर्ऋषिः । इन्द्राग्नी देवता । गायत्री छन्दः, अन्त्याऽनुष्टुप्[3] ।

इ॒यं वा॑म॒स्य मन्म॑न॒ इन्द्रा॑ग्नी पू॒र्व्यस्तु॑तिः । अ॒भ्राद् वृ॒ष्टिरि॑वाजनि ॥ १ ॥

इ॒यम् । वा॒म् । अ॒स्य । मन्म॑नः । इन्द्रा॑ग्नी॒ इति॑ । पू॒र्व्यऽस्तु॑तिः । अ॒भ्रात् । वृ॒ष्टिःऽइ॑व । अ॒ज॒नि॒ ॥ १ ॥

वेङ्कट० इयम् युवयोः अस्य स्तोतुः[3] हे इन्द्राग्नी! पूर्व्यस्तुतिः मुख्ये काले प्रादुर्भूता स्तुतिः अभ्रात् वृष्टिरिव अजनि ॥ १ ॥

शृ॒णु॒तं ज॑रि॒तुर्हव॒मिन्द्रा॑ग्नी॒ वन॑तं॒ गिरः॑ । ई॒शा॒ना पि॑प्यतं॒ धियः॑ ॥ २ ॥

शृ॒णु॒तम् । ज॒रि॒तुः । हव॑म् । इन्द्रा॑ग्नी॒ इति॑ । वन॑तम् । गिरः॑ । ई॒शा॒ना । पि॒प्य॒त॒म् । धियः॑ ॥ २ ॥

वेङ्कट० शृणुतम् स्तोतुराह्वानम् हे इन्द्राग्नी! भजतम् स्तुतीः[4] । [5]ईश्वरौ पूरयतम् कर्माणि[5] ॥ २ ॥

मा पा॑प॒त्वाय॑ नो नरेन्द्रा॑ग्नी॒ माभिश॑स्तये । मा नो॑ रीरधतं नि॒दे ॥ ३ ॥

मा । पा॒प॒ऽत्वाय॑ । नः॒ । न॒रा॒ । इन्द्रा॑ग्नी॒ इति॑ । मा । अ॒भिऽश॑स्तये । मा । नः॒ । री॒र॒ध॒त॒म् । नि॒दे ॥ ३ ॥

वेङ्कट० हे नरा![6] हे नेतारौ![6] [7]अस्मान् न पापत्वाय[7] विधेयान् कुरुतम् इन्द्राग्नी!, मा च अभिशस्तये, मा च निन्दित्रे शत्रवे ॥ ३ ॥

इन्द्रे॑ अ॒ग्ना नमो॑ बृ॒हत् सु॑वृ॒क्तिमेर॑यामहे । धि॒या धेना॑ अव॒स्यवः॑ ॥ ४ ॥

इन्द्रे॑ । अ॒ग्ना । नमः॑ । बृ॒हत् । सु॒ऽवृ॒क्तिम् । आ । ई॒र॒या॒म॒हे॒ । धि॒या । धेना॑ । अ॒व॒स्यवः॑ ॥ ४ ॥

वेङ्कट० वयम् इन्द्राग्न्योः महत् हविः सुप्रवृत्तम् आभिमुख्येन प्रापयाम कर्मणा स्तुतीः च रक्षणम् इच्छन्तः ॥ ४ ॥

ता हि शश्व॑न्त॒ ईळ॑त इ॒त्था विप्रा॑स ऊ॒तये॑ । स॒बाधो॒ वाज॑सातये ॥ ५ ॥

ता । हि । शश्व॑न्तः । ईळ॑ते । इ॒त्था । विप्रा॑सः । ऊ॒तये॑ । स॒ऽबाधः॑ । वाज॑ऽसातये ॥ ५ ॥

1. युवयो मूको. २-२ नास्ति मूको. ३ स्तोतु मूको ४. स्तुति. मूको, ५-५ ईश्वरौ पूरयतं कर्माणि वि' अ', ईश्वरो पूरयन क' ह लभ, ६. नास्ति एम अ', ७-७, "समानपाप" वि' अ'.

वेङ्कट० तौ हि बह्वृचः स्तुवन्ति यथा वयम्, इत्थं मेधातिथिः रक्षणाय, बाधासहिताः[1] युद्धप्राप्तये च ॥ ५ ॥

ता वां गीर्भिर्विपन्यवः प्रयस्वन्तो हवामहे । मेधसाता सनिष्यवः ॥ ६ ॥

ता । वाम् । गीःऽभिः । विपन्यवः । प्रयस्वन्तः । हवामहे । मेधऽसाता । सनिऽष्यवः ॥ ६ ॥

वेङ्कट० तौ वाम् गीर्भिः स्तोतारः हविष्मन्तः ह्वयामहे यज्ञे धनकामाः ॥ ६ ॥

[2]इति पञ्चमाष्टके षष्ठाध्याये सप्तदशो वर्गः[2] ॥

इन्द्राग्नी अवसा गतमस्मभ्यं चर्षणीसहा । मा नो दुःशंस ईशत ॥ ७ ॥

इन्द्राग्नी इति । अवसा । आ । गतम् । अस्मभ्यम् । चर्षणिऽसहा । मा । नः । दुःऽशंसः । ईशत ॥७॥

वेङ्कट० इन्द्राग्नी! रक्षणेन आ गच्छतम् अस्मदर्थं हे शत्रूणां सोढारौ! । मा अस्माकं शत्रुः ईशिष्ट ॥ ७ ॥

मा कस्य नो अररुषो धूर्तिः प्रणङ् मर्त्यस्य । इन्द्राग्नी शर्म यच्छतम् ॥ ८ ॥

मा । कस्य । नः । अररुषः । धूर्तिः । प्र । नक् । मर्त्यस्य । इन्द्राग्नी इति । शर्म । यच्छतम् ॥८॥

वेङ्कट० मा कस्य चित्[3] अपि अदातुः हिंसा अस्मान् प्र आप्नोतु मनुष्यस्य । तथा अस्माकं सुखं प्र यच्छतम् इन्द्राग्नी! ॥ ८ ॥

गोमद्धिरण्यवद्वसु यद्वामश्वावदीमहे । इन्द्राग्नी तद्वनेमहि ॥ ९ ॥

गोऽमत् । हिरण्यऽवत् । वसु । यत् । वाम् । अश्वऽवत् । ईमहे । इन्द्राग्नी इति । तत् । वनेमहि ॥

वेङ्कट० निगदसिद्धेति ॥ ९ ॥

यत्सोम आ सुते नर इन्द्राग्नी अजोहवुः । सप्तीवन्ता सपर्यवः ॥ १० ॥

यत् । सोमे । आ । सुते । नरः । इन्द्राग्नी इति । अजोहवुः । सप्तिऽवन्ता । सपर्यवः ॥ १० ॥

वेङ्कट० यदा सोमे अभिषुते मनुष्याः इन्द्राग्नी भृशम् आ ह्वयन्ति अश्ववन्तौ[4] पूजाकामाः । पूर्वत्र वाक्यसमाप्तिः ॥ १० ॥

उक्थेभिर्वृत्रहन्तमा या मन्दाना चिदा गिरा । आङ्गूषैराविवासतः ॥ ११ ॥

उक्थेभिः । वृत्रहन्ऽतमा । या । मन्दाना । चित् । आ । गिरा । आङ्गूषैः । आऽविवासतः ॥११॥

---

१. बाधास° मूको. २-२. नास्ति मूको. ३. कस्यकामस्यचित् अ'. ४. अश्ववन्त वि' अ; धनवन्तौ अ'; मश्ववन्तौ छम

वेङ्कट० शस्त्रैः वृत्राणां हन्तारौ यौ स्तुत्यौ मोदमानौ आङ्गूषे आघोषे उच्चैः शब्दितैः शस्त्रैः (तु या ५,११) आभिमुख्येन वसतः[1] यजमानेषु । उत्तरत्र सम्बन्धः ॥ ११ ॥

ताविद् दुःशंसं मर्त्यं दुर्विद्वांसं रक्षस्विनम् ।
आभोगं हन्मना हतमुदधिं हन्मना हतम् ॥ १२ ॥

तौ । इत् । दुःऽशंसम् । मर्त्यम् । दुःऽविद्वांसम् । रक्षस्विनम् ।
आऽभोगम् । हन्मना । हतम् । उदऽधिम् । हन्मना । हतम् ॥ १२ ॥

वेङ्कट० तौ एव युवाम् दुःशंसम् मनुष्यम् दुर्विद्वांसम् दुर्बुद्धिमित्यर्थः[2] । रक्षः बल तद्वन्तम् अभिभूय भोक्तारम् इमम् आयुधेन हतम् । उदधिम् इव 'घटम् अनायासेन' हतम् इति ॥ १२ ॥

"इति पञ्चमाष्टके पञ्चमाध्याये अष्टादशो वर्गः" ॥

[९५]

"वसिष्ठो मैत्रावरुणिर्ऋषिः । सरस्वती देवता, तृतीयायाः सरस्वान् । त्रिष्टुप् छन्दः" ।

प्र क्षोदसा धायसा सस्र एषा सरस्वती धरुणमायसी पूः ।
प्रबाबधाना रथ्येव याति विश्वा अपो महिना सिन्धुरन्याः ॥ १ ॥

प्र । क्षोदसा । धायसा । सस्रे । एषा । सरस्वती । धरुणम् । आयसी । पूः ।
प्रऽबाबधाना । रथ्याऽइव । याति । विश्वाः । अपः । महिना । सिन्धुः । अन्याः ॥ १ ॥

वेङ्कट० प्र सरति[3] उदकेन वा पानार्हेण सहिता एषा सरस्वती धारयन्ती[4] लोकस्य लोहमयी च नगरी इति औपमिकम्, प्रकर्षेण बध्नती आत्मनि एकीकुर्वती[5] । राजमार्गे इव गच्छति सर्वाणि एव अन्यानि उदकानि महत्त्वेन प्रबाधमाना सिन्धुः इति ॥ १ ॥

एकाचेतत् सरस्वती नदीनां शुचिर्यती गिरिभ्य आ समुद्रात् ।
रायश्चेतन्ती भुवनस्य भूरेर्घृतं पयो दुदुहे नाहुषाय ॥ २ ॥

एका । अचेतत् । सरस्वती । नदीनाम् । शुचिः । यती । गिरिऽभ्यः । आ । समुद्रात् ।
रायः । चेतन्ती । भुवनस्य । भूरेः । घृतम् । पयः । दुदुहे । नाहुषाय ॥ २ ॥

वेङ्कट० एका बुबुधे सरस्वती एव नदीनाम् मध्ये शुचिः गच्छन्ती पर्वतेभ्यो निस्सृता यावत् पश्चिम समुद्रम् । धनं बहु प्रज्ञापयन्ती भुवनस्य गौः भूत्वा घृतम् पयः च दुदुहे नहुषपुत्राय । नाहुषोक्त वचन न अन्या शुश्रुवुः मम, सरस्वती तु शुश्रावेति

1 वसतो मूको. 2. अस्यर्थ वि'; आदन्न अ'. ३ ३. याम् एताया' मूको. ४ ४. नास्ति मूको ५. प्रसरस्वति मूको. ६ 'यती मूको ७ कुर्वन्ति वि' अ' द, र्वन्तीति लभ.

शौनक —

राजा वर्षसहस्राय दीक्षिष्यन्नाहुष[1] पुरा ।
चचारैकरथेनेमाः ब्रुवन्[2] सर्वाः समुद्रगाः ॥

यक्ष्ये वहत मा सर्वाः[3] इन्द्रशो वाऽथवैकशः ।
प्रत्यूचुस्तं नृप नद्यः स्वल्पवीर्याः कथं वयम् ॥

वहेम सर्वान् भोगांस्ते सत्रे वार्षसहस्रिके ।
सरस्वतीं प्रपद्यस्व सा ते[4] वक्ष्यति नाहुष ! ॥

तथेत्युक्त्वा [5]जगामाशु आपगां[5] च सरस्वतीम् ।
सा चैनं प्रतिजग्राह दुदुहे च पयो घृतम् ॥

एतदत्यद्भुतं कर्म सरस्वत्या नृपं प्रति ।
वारुणि कीर्तयामास प्रथमस्य द्वितीयया ॥ (बृदे ६,२०-२४) इति ॥२॥

स वावृधे नर्यो योषणासु वृषा शिशुर्वृषभो यज्ञियासु ।
स वाजिनं मघवद्भ्यो दधाति वि सातये तन्वं मामृजीत ॥ ३ ॥

स । ववृधे । नर्यः । योषणासु । वृषा । शिशुः । वृषभः । यज्ञियासु ।
स । वाजिनम् । मघवत्ऽभ्यः । दधाति । वि । सातये । तन्वम् । ममृजीत ॥ ३ ॥

वेङ्कट० स सरस्वान् वावृधे नृहितः नदीषु पुमान् शिशुः सेक्ता यज्ञार्हासु । स बलिनं हविष्मद्भ्य[6] प्रयच्छति । वि शोधयतु सोऽस्मदीयां तनुम् लाभाय संभक्तु ॥ ३ ॥

उत स्या नः सरस्वती जुषाणोप श्रवत् सुभगा यज्ञे अस्मिन् ।
मितज्ञुभिर्नमस्यैरियाना राया युजा चिदुत्तरा सखिभ्यः ॥ ४ ॥

उत । स्या । नः । सरस्वती । जुषाणा । उप । श्रवत् । सुऽभगा । यज्ञे । अस्मिन् ।
मितज्ञुऽभिः । नमस्यैः । इयाना । राया । युजा । चित् । उत्ऽतरा । सखिऽभ्यः ॥ ४ ॥

वेङ्कट० अपि च सा सरस्वती अस्मान् सेवमाना स्तुतीः उप शृणोतु सुधना अस्मिन् यज्ञे प्रमाणार्थं मितजानुके नमस्कारं कुर्वद्भिः अभिगम्यमाना धनेन सहायवर्गेण[7] च अस्माभ्यो नदीभ्य सखिभ्य उत्कृष्टा[8] स्तोतृभ्य वा सुप्रशस्तेति ॥ ४ ॥

---

१ दीक्षि° मूको. २ वदन् मूको. ३ भगन् मे बृदे. ४. ता मूको. ५-५. जगामाश्वापगा मूको. ६. हविष्मद्भ्यम् मूको. ७. °णेन सहायवर्गेण वि° इ. °णेन सहायवर्गेण छम. ८. °कृष्ट वि° इ छम.

इमा जुह्वाना युष्मदा नमोभिः प्रति स्तोमं सरस्वति जुषस्व ।
तव शर्मन् प्रियतमे दधाना उप स्थेयाम शरणं न वृक्षम् ॥ ५ ॥

इमा । जुह्वानाः । युष्मत् । आ । नमःऽभिः । प्रति । स्तोमम् । सरस्वति । जुषस्व ।
तव । शर्मन् । प्रियऽतमे । दधानाः । उप । स्थेयाम । शरणम् । न । वृक्षम् ॥ ५ ॥

वेङ्कट० इमानि हवींषि जुह्वानाः वयं भजाम नमस्कारैः । प्रति सेवस्व त्वम् स्तोमम् सरस्वति ! । तव सुखे प्रिये निधीयमानाः त्वाम् उप स्थेयाम प्रतिश्रयभूतं महान्तम् इव वृक्षम् ॥ ५ ॥

अयमु ते सरस्वति वसिष्ठो द्वारावृतस्य सुभगे व्यावः ।
वर्ध शुभ्रे स्तुवते रासि वाजान् यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

अयम् । ऊँ इति । ते । सरस्वति । वसिष्ठः । द्वारौ । ऋतस्य । सुऽभगे । वि । आवरित्यावः ।
वर्ध । शुभ्रे । स्तुवते । रासि । वाजान् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥

वेङ्कट० अयम् उ ते सरस्वति ! वसिष्ठः ऋतस्य यज्ञस्य पूर्वापरौ वि आवः द्वारौ संस्तवनार्थम् सुभगे ! । वर्ध शोभमाने !, स्तुवते च प्रयच्छ अन्नानि इति ॥ ६ ॥

'इति पञ्चमाष्टके षष्ठाध्याये एकोनविंशो वर्गः' ॥

[९६]

'वसिष्ठो मैत्रावरुणिर्ऋषिः । सरस्वती देवता, चतुर्थ्यादिषष्ठ्यन्तानां सरस्वान् । आद्याद्वितीययोः प्रगाथश्छन्दः (प्रथमा बृहती, द्वितीया सतोबृहती), तृतीया प्रस्तारपङ्क्तिः, शिष्टा गायत्र्यः' ।

बृहदु गायिषे वचोऽसुर्या नदीनाम् ।
सरस्वतीमिन्महया सुवृक्तिभिः स्तोमैर्वसिष्ठ रोदसी ॥ १ ॥

बृहत् । ऊँ इति । गायिषे । वचः । असुर्या । नदीनाम् ।
सरस्वतीम् । इत् । महय । सुवृक्तिऽभिः । स्तोमैः । वसिष्ठ । रोदसी इति ॥ १ ॥

वेङ्कट० हे वसिष्ठ ! महत् वचः[1] एवं ब्रवीषि बलवती नदीनाम् सरस्वती इति । ताम् एव सरस्वतीम् पूजय स्तुतिभिः सुप्रवृत्ताभिः वसिष्ठ ! द्यावापृथिव्योः उपगन्त्र्योः[4] ॥ १ ॥

उभे यत् ते महिना शुभ्रे अन्धसी अधिक्षियन्ति पूरवः ।
सा नो बोध्यवित्री मरुत्सखा चोद राधो मघोनाम् ॥ २ ॥

---

१. सरस्वत्या° वि° अ°; संस्वत्या° क; स्वरया° ख. २-२. नास्ति मूको. ३. वर्चः मूको. ४. °स्यो° मूको.

उभे इति । यत् । ते । महिना । शुभ्रे । अन्धसी इति । अधिऽक्षियन्ति । पूरवः ।
सा । नः । बोधि । अवित्री । मरुत्ऽसखा । चोद । राधः । मघोनाम् ॥ २ ॥

वेङ्कट० उभे यस्याः ते महत्त्वेन हे शोभमाने! अन्ने दिव्यं पार्थिवं च, यद्वा कृष्टपच्यं च अकृष्टपच्यं च, अधिगच्छन्ति मनुष्याः। सा अस्माकं बुध्यस्व अवित्री भवामीति, यस्याः ते मरुतः सखायः। चोदय धनं हविष्मताम् ॥ २ ॥

भद्रमिद् भद्रा कृणवत् सरस्वत्यकवारी चेतति वाजिनीवती ।
गृणाना जमदग्निवत् स्तुवाना च वसिष्ठवत् ॥ ३ ॥

भद्रम् । इत् । भद्रा । कृणवत् । सरस्वती । अकवऽअरी । चेतति । वाजिनीऽवती ।
गृणाना । जमदग्निऽवत् । स्तुवाना । च । वसिष्ठऽवत् ॥ ३ ॥

वेङ्कट० भद्रम् एव भद्रा कृणोतु सरस्वती। अकुत्सितगमना बुध्यताम्[1] अन्नवती स्तूयमाना जमदग्निना इव ऋषिणा, तथा, यथा वसिष्ठः स्तौति तद्वत् च स्तूयमानेत्यात्मानं परोक्षम् आह ॥ ३ ॥

जनीयन्तो न्वग्रवः पुत्रीयन्तः सुदानवः । सरस्वन्तं हवामहे ॥ ४ ॥

जनिऽयन्तः । नु । अग्रवः । पुत्रिऽयन्तः । सुऽदानवः । सरस्वन्तम् । हवामहे ॥ ४ ॥

वेङ्कट० जायाम् आत्मनः इच्छन्तः क्षिप्रं गमनशीलाः पुत्रीयन्तः च वयं शोभनदानाः सरस्वन्तम् हवामहे ॥ ४ ॥

ये ते सरस्व ऊर्मयो मधुमन्तो घृतश्चुतः । तेभिर्नोऽविता भव ॥ ५ ॥

ये । ते । सरस्वः । ऊर्मयः । मधुऽमन्तः । घृतऽश्चुतः । तेभिः । नः । अविता । भव ॥ ५ ॥

वेङ्कट० ये ते हे सरस्वः! ऊर्मयः सिन्धुरूपस्य मधुरसवन्तः उदकश्चुतः, तेभिः नः अविता भव ॥ ५ ॥

पीपिवांसं सरस्वतः स्तनं यो विश्वदर्शतः । भक्षीमहि प्रजामिषम् ॥ ६ ॥

पीपिवांसम् । सरस्वतः । स्तनम् । यः । विश्वऽदर्शतः । भक्षीमहि । प्रऽजाम् । इषम् ॥ ६ ॥

वेङ्कट० वर्धमानम् सरस्वतः स्तनम् भजामहे प्रजाम् अन्नं च। ततः भुक्षीमहि इत्यर्थः। यः स्तनः विश्वैर्दर्शनीयः ॥ ६ ॥

[2]इति पञ्चमाष्टके पञ्चाध्याये त्रिंशो वर्गः[2] ॥

---

१. बुध्यतां मूको. २-२. नास्ति मूको.

[९७]

[१]वसिष्ठो मैत्रावरुणिर्ऋषिः । आद्याया इन्द्रो देवता, द्वितीयस्याश्चतुर्थ्यादिपञ्चम्यन्तानां च बृहस्पतिः, तृतीयानवम्योरिन्द्राब्रह्मणस्पती, दशम्या इन्द्राबृहस्पती । त्रिष्टुप् छन्दः[२] ।

यज्ञे दिवो नृषदने पृथिव्या नरो यत्र देवयवो मदन्ति ।
इन्द्राय यत्र सवनानि सुन्वे गमन्मदाय प्रथमं वयश्च ॥ १ ॥

यज्ञे । दिवः । नृऽसदने । पृथिव्याः । नरः । यत्र । देवऽयवः । मदन्ति ।
इन्द्राय । यत्र । सवनानि । सुन्वे । गमत् । मदाय । प्रथमम् । वयः । च ॥ १ ॥

वेङ्कट० ऐन्द्र्याद्या[३] । सूक्तं बार्हस्पत्यम् । अन्त्यैन्द्री (द्र ऋअ २,७,१७) च । यज्ञे दिवः आगत्य निषीदतु पृथिव्याः नृषदने मनुष्याणां सदनस्थाने । तदेव आह— नरः ऋत्विजः यस्मिन् यज्ञे देवकामाः मदन्ति, इन्द्राय यस्मिन् यज्ञे त्रीणि सवनानि सुषुविरे । तत्र इन्द्रः मदाय गच्छतु, प्रथमम् एव 'तस्य च अश्वाः[४] गच्छन्तु' ॥ १ ॥

आ दैव्या वृणीमहेऽवांसि बृहस्पतिर्नो मह आ सखायः ।
यथा भवेम मीळ्हुषे अनागा यो नो दाता परावतः पितेव ॥ २ ॥

आ । दैव्या । वृणीमहे । अवांसि । बृहस्पतिः । नः । महे । आ । सखायः ।
यथा । भवेम । मीळ्हुषे । अनागाः । यः । नः । दाता । पराऽवतः । पिताऽइव ॥ २ ॥

वेङ्कट० आ वृणीमहे दैव्यानि रक्षणानि । बृहस्पतिः अस्मान् आ पूजयति हे सखायः ! । यथा भवेम वयं कामानां सेक्त्रे अनागसः । यः अस्मान् दाता परावतः दूरात् पिता इव आगच्छति ॥ २ ॥

तमु ज्येष्ठं नमसा हविर्भिः सुशेवं ब्रह्मणस्पतिं गृणीषे ।
इन्द्रं श्लोको महि दैव्यः सिषक्तु यो ब्रह्मणो देवकृतस्य राजा ॥ ३ ॥

तम् । ऊँ इति । ज्येष्ठम् । नमसा । हविःऽभिः । सुऽशेवम् । ब्रह्मणः । पतिम् । गृणीषे ।
इन्द्रम् । श्लोकः । महि । दैव्यः । सिसक्तु । यः । ब्रह्मणः । देवऽकृतस्य । राजा ॥ ३ ॥

वेङ्कट० तम् एव ज्येष्ठम् नमस्कारेण हविर्भिः च सुसुखम् ब्रह्मणः पतिम्[५] स्तुहि । इन्द्रम् च श्लोकः महान् देवार्हः सेवताम्, यः ब्रह्मणः देवैः उत्पादितस्य सर्वस्य राजा ॥ ३ ॥

स आ नो योनिं सदतु प्रेष्ठो बृहस्पतिर्विश्ववारो यो अस्ति ।
कामो रायः सुवीर्यस्य तं दात्पर्षन्नो अति सश्चतो अरिष्टान् ॥ ४ ॥

---

१ १. नास्ति मूको. २. ऐन्द्राद्याद्या मूको. ३ ३. तस्याश्चादयः वि' अ', तस्यादयः ना क; तस्यादयः व कअ. ४ °तु स्तर्थ अ'. ५ बृहस्पतिं वि' अ'.

सः । आ । नः । योनिम् । सदतु । प्रेष्ठः । बृहस्पतिः । विश्वऽवारः । यः । अस्ति ।
कामः । रायः । सुऽवीर्यस्य । तम् । दात् । पर्षत् । नः । अति । सश्चतः । अरिष्टान् ॥ ४ ॥

वेङ्कट० सः अस्माकं बर्हिः आ सीदतु प्रियतमः बृहस्पतिः, विश्वैः वरणीयः यः भवति । सुवीर्यस्य धनस्य यः अस्माकम् कामः तम् प्रयच्छतु । अति पारयतु नः शत्रुभिः संसक्तान् अहिंसितान् एव ॥ ४ ॥

तमा नो अर्कममृताय जुष्टमिमे धासुरमृतासः पुराजाः ।
शुचिक्रन्दं यजतं पस्त्यानां बृहस्पतिमनर्वाणं हुवेम ॥ ५ ॥

तम् । आ । नः । अर्कम् । अमृताय । जुष्टम् । इमे । धासुः । अमृतासः । पुराऽजाः ।
शुचिऽक्रन्दम् । यजतम् । पस्त्यानाम् । बृहस्पतिम् । अनर्वाणम् । हुवेम ॥ ५ ॥

वेङ्कट० तम् अन्नम् अस्मभ्यम् आ प्रयच्छन्तु अमरणाय पर्याप्तम् इमे देवाः पुराणाः । शुद्धस्तोत्रं यष्टव्यं गृहाणाम् । [1]"विशः पस्त्याः"[1] (तु. माश ५,३,५,१९) इति च ब्राह्मणम् । [2]बृहस्पतिम् अप्रत्यृतम्[2] अन्यस्मिन् (तु. या ६,२३) हुवेम[3] ॥ ५ ॥

[4]इति पञ्चमाष्टके पञ्चाध्याये एकविंशो वर्गः[4] ॥

तं शग्मासो अरुषासो अश्वा बृहस्पतिं सहवाहो वहन्ति ।
सहश्चिद् यस्य नीलवत् सधस्थं नभो न रूपमरुषं वसानाः ॥ ६ ॥

तम् । शग्मासः । अरुषासः । अश्वाः । बृहस्पतिम् । सहऽवाहः । वहन्ति ।
सहः । चित् । यस्य । नीलऽवत् । सधऽस्थम् । नभः । न । रूपम् । अरुषम् । वसानाः ॥ ६ ॥

वेङ्कट० तम् शक्ताः आरोचमानाः अश्वाः बृहस्पतिम् सहवहन्तः वहन्तु । सहः शरीरम्, सहनात् । रथे शरीरम् यस्य नीलवर्णयुक्तम् । 'आ वेधस नीलपृष्ठम्' (ऋ ५,४३,१२) इति उक्तम् । रथे सहस्थितम् [5]नभः न[5] आदित्य इव रूपम् [6]आरोचमानम् आच्छादयन्तः[6] ॥ ६ ॥

स हि शुचिः शतपत्रः स शुन्ध्युर्हिरण्यवाशीरिषिरः स्वर्षाः ।
बृहस्पतिः स स्वावेश ऋष्वः पुरू सखिभ्य आसुतिं करिष्ठः ॥ ७ ॥

सः । हि । शुचिः । शतऽपत्रः । सः । शुन्ध्युः । हिरण्यऽवाशीः । इषिरः । स्वःऽसाः ।
बृहस्पतिः । सः । सुऽआवेशः । ऋष्वः । पुरु । सखिऽभ्यः । आऽसुतिम् । करिष्ठः ॥ ७ ॥

---

१. विश प° स लभ; विशत्या प° वि° श भ, विशप° अ°. २-२. °मिम् आ प्रत्यु° स लभ; °मिप्रत्यु° अ°; °मिप्रत्यु° वि°. ३. भूमय मूको. ४-४. नास्ति मूको. ५-५. सहन वि° अ°. ६. °चमानाच्छा° वि° अ°; °चमानमाच्छा° स लभ.

वेङ्कट० सः हि शुचिः शतपत्रनः। सः हि शोधकः हितरमणीयवचनः[1], आयुधं वा[2] वाशी[3], गमनशीलः[4] स्वर्गस्य सम्भक्ता। बृहस्पतिः सः शोभनावेशः दर्शनीयः स्तोतृभ्यः महतीम् आस्तुतिम् धनस्य प्रसवम् अत्यन्तं तस्कर्ता ॥ ७ ॥

दे॒वी दे॒वस्य॒ रोद॑सी॒ जनि॑त्री॒ बृह॒स्पतिं॑ वावृधतुर्महि॒त्वा ।
द॒क्षाय्या॑य दक्षता सखायः॒ कर॑द् ब्रह्म॑णे सु॒तरा॑ सु॒गाधा ॥ ८ ॥

दे॒वी इति॑ । दे॒वस्य॑ । रोद॑सी॒ इति॑ । जनि॑त्री॒ इति॑ । बृह॒स्पति॑म् । व॒वृ॒ध॒तुः॒ । म॒हि॒ऽत्वा ।
द॒क्षाय्या॑य । द॒क्ष॒त॒ । स॒खा॒यः॒ । कर॑त् । ब्रह्म॑णे । सु॒ऽतरा॑ । सु॒ऽगा॒धा ॥ ८ ॥

वेङ्कट० देव्यौ देवस्य जनयित्र्यौ द्यावापृथिव्यौ बृहस्पतिम् वर्धयामासतुः महत्त्वेन। पूज्याय पूजां कुरुत हे सखायः[5]। करोतु ब्राह्मणाय मह्यं सुतराणि सुगाधानि च उदकानि ॥ ८ ॥

इ॒यं वां॑ ब्रह्मणस्पते सुवृ॒क्तिर्ब्रह्मेन्द्रा॑य व॒ज्रिणे॑ अकारि ।
अ॒वि॒ष्टं धियो॑ जिगृ॒तं पुर॑न्धीर्जज॒स्तम॒र्यो व॒नुषा॒मरा॑तीः ॥ ९ ॥

इ॒यम् । वा॒म् । ब्र॒ह्म॒णः॒ । प॒ते॒ । सु॒ऽवृ॒क्तिः । ब्रह्म॑ । इन्द्रा॑य । व॒ज्रिणे॑ । अ॒का॒रि॒ ।
अ॒वि॒ष्टम् । धियः॑ । जि॒गृ॒तम् । पुर॑म्ऽधीः । ज॒ज॒स्तम् । अ॒र्यः । व॒नुषा॑म् । अरा॑तीः ॥ ९ ॥

वेङ्कट० इयम् वाम् ब्रह्मणः पते! सुवृक्तिः इन्द्राय वज्रिणे तुभ्यं च अकारि हविः च। अविष्टम् इति गतम् (ऋ ४,५०,११ द्र.) ॥ ९ ॥

बृह॑स्पते यु॒वमिन्द्र॑श्च॒ वस्वो॑ दि॒व्यस्ये॑शाथे उ॒त पार्थि॑वस्य ।
ध॒त्तं र॒यिं स्तु॑व॒ते की॒रये॑ चिद् यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥ १० ॥

बृह॑स्पते । यु॒वम् । इन्द्रः॑ । च॒ । वस्वः॑ । दि॒व्यस्य॑ । ई॒शा॒थे॒ इति॑ । उ॒त । पार्थि॑वस्य ।
ध॒त्तम् । र॒यिम् । स्तु॒व॒ते । की॒रये॑ । चि॒त् । यू॒यम् । पा॒त॒ । स्व॒स्तिऽभिः॑ । सदा॑ । नः॒ ॥ १० ॥

वेङ्कट० 'बृहस्पते! त्वं च' इन्द्रः च युवां धनस्य दिव्यस्य पार्थिवस्य" च उभयस्य ईश्वरौ भवतः। तथा सति प्रयच्छतं' तद्' धनम् स्तुवते स्तोत्रे ॥ १० ॥

'इति पञ्चमाष्टके षष्ठाध्याये द्वाविंशो वर्गः' ॥

[९८]

'वसिष्ठो मैत्रावरुणिर्ऋषिः। इन्द्रो देवता, अन्त्याया इन्द्राबृहस्पती। त्रिष्टुप् छन्दः'।

अध्व॑र्यवोऽरु॒णं दु॒ग्धम॒ंशुं जु॒होत॑न वृष॒भाय॑ क्षिती॒नाम् ।
गौ॒राद् वेदी॑याँ अव॒पान॒मिन्द्रो॑ वि॒श्वाहेद् या॑ति सु॒तसो॑मम॒िच्छन् ॥ १ ॥

---

1. 'वीर वचनम् ख छम. २. नास्ति वि' भ'. ३. वाशनी मूको. ४. °शील मूको, ५-५. नास्ति मूको. ६-६. तत्र वि' भ'. ७. नास्ति मूको, ८. °च्छत मव मूको, ९-९. नास्ति मूको.

अध्वर्यवः । अरुणम् । दुग्धम् । अंशुम् । जुहोतन । वृषभाय । क्षितीनाम् ।
गौरात् । वेदीयान् । अवऽपानम् । इन्द्रः । विश्वाहा । इत् । याति । सुतऽसोमम् । इच्छन् ॥१॥

वेङ्कट० अध्वर्यवः ! आरोचमानम् दुग्धम् अंशुम् जुहुत क्षितीनाम् वर्षित्रे । गौरात् अपि मृगाद् अतिशयेन दूरस्थं विन्दन् अधोमुखेन पातव्यम् इन्द्रः सर्वदैव गच्छति सुतसोमम् यजमानम् इच्छन् ॥ १ ॥

यद् दंधिषे प्रदिवि चार्वन्नं दिवेदिवे पीतिमिदस्य वक्षि ।
उत हृदोत मनसा जुषाण उशन्निन्द्र प्रस्थितान् पाहि सोमान् ॥ २ ॥

यत् । दधिषे । प्रऽदिवि । चारु । अन्नम् । दिवेऽदिवे । पीतिम् । इत् । अस्य । वक्षि ।
उत । हृदा । उत । मनसा । जुषाणः । उशन् । इन्द्र । प्रऽस्थितान् । पाहि । सोमान् ॥ २ ॥

वेङ्कट० यत् धारयसि 'गते काले'[1] चारु त्वम् अन्नम्, तस्य इदानीम् अपि अन्वहं पानं वह, पिब तम् । अधुना अपि च हृदयेन मनसा अपि च सेवमानः कामयमानः इन्द्र ! प्रस्थितान् पिब सोमान् ॥ २ ॥

जज्ञानः सोमं सहसे पपाथ प्र ते माता महिमानमुवाच ।
एन्द्र पप्राथोर्वन्तरिक्षं युधा देवेभ्यो वरिवश्चकर्थ ॥ ३ ॥

जज्ञानः । सोमम् । सहसे । पपाथ । प्र । ते । माता । महिमानम् । उवाच ।
आ । इन्द्र । पप्राथ । उरु । अन्तरिक्षम् । युधा । देवेभ्यः । वरिवः । चकर्थ ॥ ३ ॥

वेङ्कट० प्रादुर्भवन् त्वम् सोमम् पपाथ बलाय[2] । प्र उवाच ते महिमानम् माता पृथिवी त्वया पाल्यमाना । आ पप्राथ च विस्तीर्णम् अन्तरिक्षम् इन्द्र ! । युधा देवेभ्यः त्वं धनम् चकर्थ ॥ ३ ॥

यद् योधया महतो मन्यमानान्त्साक्षाम तान् बाहुभिः शाशदानान् ।
यद् वा नृभिर्वृत इन्द्राभियुध्यास्तं त्वयाजिं सौश्रवसं जयेम ॥ ४ ॥

यत् । योधयाः । महतः । मन्यमानान् । साक्षाम । तान् । बाहुऽभिः । शाशदानान् ।
यत् । वा । नृऽभिः । वृतः । इन्द्र । अभिऽयुध्याः । तम् । त्वया । आजिम् । सौश्रवसम् । जयेम ॥

वेङ्कट० यान्[3] अयोधयः "त्वम् अस्मान् महतः अभिमन्यमानान्"[4] । सहेमहि तान् बाहुभिः "हिंसतः शत्रून्"[5] । शादिः शातनकर्मा । यद् वा त्वं मरुद्भिः परिवृतः इन्द्र ! अभियुध्याः । तदः त्वया तम् वयं सङ्ग्रामं कीर्तिनिमित्तम् जयेम ॥ ४ ॥

---

१. काले गते वि' अ'.   २. पाल्य मूको.   ३. यत् मूको.   ४. त्वं महतोऽस्मानभि' मूको.
५. हिंसितशत्रून् मूको.

प्रेन्द्रस्य वोचं प्रथमा कृतानि प्र नूतना मघवा या चकार ।
यदेददेवीरसहिष्ट माया अथाभवत् केवलः सोमो अस्य ॥ ५ ॥

प्र । इन्द्रस्य । वोचम् । प्रथमा । कृतानि । प्र । नूतना । मघऽवा । या । चकार ।
यदा । इत् । अदेवीः । असहिष्ट । मायाः । अथ । अभवत् । केवलः । सोमः । अस्य ॥ ५ ॥

वेङ्कट० प्र अवोचम् इन्द्रस्य पुरातनानि कर्माणि । प्र अवोचम् नूतनानि मघवा यानि चक्रे । यदा [1]एवेन्द्र आसुरी[1] माया असहिष्ट । अनन्तरम् एव अस्य अभवत् असाधारण सोम[2] ॥ ५ ॥

तवेदं विश्वमभितः पशव्यं यत् पश्यसि चक्षसा सूर्यस्य ।
गवामसि गोपतिरेक इन्द्र भक्षीमहि ते प्रयतस्य वस्वः ॥ ६ ॥

तव । इदम् । विश्वम् । अभितः । पशव्यम् । यत् । पश्यसि । चक्षसा । सूर्यस्य ।
गवाम् । असि । गोऽपतिः । एकः । इन्द्र । भक्षीमहि । ते । प्रऽयतस्य । वस्वः ॥ ६ ॥

वेङ्कट० तव एव इदम् सर्वम् अभित दृश्यमानम् पशव्यम् पशुभ्यः सुसुखं[1] भवति । यदा त्वम् सूर्यस्य तेजसा पशून् पश्यसि । तत च गवाम् असि गोपति त्वम् एक एव इन्द्र ! । भजेमहि त्वया प्रत्त धनम् ॥ ६ ॥

बृहस्पते युवमिन्द्रश्च वस्वो दिव्यस्येशाथे उत पार्थिवस्य ।
धत्तं रयिं स्तुवते कीरये चिद् यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

बृहस्पते । युवम् । इन्द्रः । च । वस्वः । दिव्यस्य । ईशाथे इति । उत । पार्थिवस्य ।
धत्तम् । रयिम् । स्तुवते । कीरये । चित् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥

वेङ्कट० पूर्वं व्याख्याता (ऋ ७ ९७,१० द) ॥ ७ ॥

[3]इति पञ्चमाष्टके षष्ठाध्याये त्रयोविंशो वर्गः[4] ॥

[९९]

[5]वसिष्ठो मैत्रावरुणिर्ऋषिः । विष्णुर्देवता, चतुर्थ्यादिपञ्चयन्तानाम् इन्द्राविष्णू । त्रिष्टुप् छन्दः[5] ।

परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति ।
उभे ते विद्म रजसी पृथिव्या विष्णो देव त्वं परमस्य वित्से ॥ १ ॥

परः । मात्रया । तन्वा । वृधान । न । ते । महिऽत्वम् । अनु । अश्नुवन्ति ।
उभे इति । ते । विद्म । रजसी इति । पृथिव्याः । विष्णो इति । देव । त्वम् । परमस्य । वित्से ॥ १ ॥

---

१. एवेन्द्रा यदि: मूको. २. सोम वि॰. ३. सुसुखं वि॰ ह स्भ, सुसुखं भ॰ ४-४. नास्ति मूको.

वेङ्कट० [1]अपीपरः त्वं[1] मानसाधनेन[2] शरीरेण त्रीन् लोकान् हे वर्धमान! । वामनो हि भूत्वा ववृधे विष्णुः । तव शरीरस्य महत्त्वम् न अन्ये केचन [3]व्याप्नुवन्ति । तव स्वभूतौ[3] द्वौ एव लोकौ वयं जानीमः पृथिवीम् अन्तरिक्षं च । हे देव! विष्णो! त्वम् एव तृतीयं लोकं जानासि ॥ १ ॥

न ते॑ विष्णो॒ जाय॑मानो॒ न जा॒तो देव॑ महि॒म्नः प॒रमन्त॑माप ।
उद॑स्तभ्ना॒ नाक॑मृ॒ष्वं बृ॒हन्तं॑ दा॒धर्थ॒ प्राचीं॑ क॒कुभं॑ पृथि॒व्याः ॥ २ ॥

न । ते॒ । वि॒ष्णो॒ इति॑ । जाय॑मानः । न । जा॒तः । देव॑ । म॒हि॒म्नः । पर॑म् । अन्त॑म् । आ॒प॒ ।
उत् । अ॒स्त॒भ्ना॒ः । नाक॑म् । ऋ॒ष्वम् । बृ॒हन्त॑म् । दा॒धर्थ॑ । प्राची॑म् । क॒कुभ॑म् । पृ॒थि॒व्याः ॥२॥

वेङ्कट० न ते विष्णो! जायमानः न अपि जातः देव! महिम्नः परम् अन्तम् [4]प्र आप । उत्तम्भित-वान्[4] असि तृतीयं लोकं दर्शनीयं महान्तम् । धारयः च पृथिव्याः प्राचीम् दिशम् ॥ २ ॥

इरा॑वती धेनु॒मती॒ हि भू॒तं सू॑यव॒सिनी॒ मनु॑षे दश॒स्या ।
व्य॑स्तभ्ना॒ रोद॑सी विष्णवे॒ते दा॒धर्थ॑ पृथि॒वीम॒भितो॑ म॒यूखैः॑ ॥ ३ ॥

इरा॑वती॒ इतीरा॑ऽवती । धे॒नु॒मती॒ इति॑ धे॒नु॒ऽमती॑ । हि । भू॒तम् । सु॒य॒व॒सिनी॒ इति॑ सु॒ऽय॒व॒सिनी॑ ।
मनु॑षे । द॒श॒स्या । वि । अ॒स्त॒भ्ना॒ः । रोद॑सी॒ इति॑ । वि॒ष्णो॒ इति॑ । ए॒ते इति॑ । दा॒धर्थ॑ ।
पृ॒थि॒वीम् । अ॒भितः॑ । म॒यूखैः॑ ॥ ३ ॥

वेङ्कट० अन्नवत्यौ पशुमत्यौ च हि अभवतं शोभनयवसे सर्वस्मै मनुष्याय[5] मनवे राज्ञे वा दानम्[6] इच्छन्त्यौ । त्वं च एते रोदसी[6] हे विष्णो! वि अस्तभ्नाः । दाधर्थ च इमाम् पृथिवीम् परितः तेजोभिः शङ्कुभिः ॥ ३ ॥

उ॒रुं य॒ज्ञाय॑ चक्रथुरु लो॒कं ज॒नय॑न्ता॒ सूर्य॑मु॒षास॑म॒ग्निम् ।
दास॑स्य चिद् वृषशि॒प्रस्य॑ मा॒या ज॒घ्नथु॑र्नरा पृत॒नाज्ये॑षु ॥ ४ ॥

उ॒रुम् । य॒ज्ञाय॑ । च॒क्र॒थुः॒ । ऊँ॒ इति॑ । लो॒कम् । ज॒नय॑न्ता । सूर्य॑म् । उ॒षस॑म् । अ॒ग्निम् ।
दास॑स्य । चि॒त् । वृ॒ष॒ऽशि॒प्रस्य॑ । मा॒याः । ज॒घ्नथुः॑ । न॒रा॒ । पृ॒त॒नाज्ये॑षु ॥ ४ ॥

वेङ्कट० उरुम् [7]यज्ञाय चक्रथुः उ[7] लोकम् स्थानं जनयन्तौ हे इन्द्राविष्णू! सूर्यम् उषसम् अग्निम् च दासस्य [8]चित् वृषशिप्राख्यस्य[8] युवाम् जघ्नथुः मायाः सङ्ग्रामेषु[9] नेतारौ! ॥ ४ ॥

१-१. अपीपररत्व वि[1] अ[1]; परस्त्वम् ल ख. २. मानसाधारणेन अ[1]. ३-३. °वन्तः वि[1] अ[1]; °वन्तः तव ल ख. ४-४. प्रापोत्तम्भितवान् वि[1]; प्रापोभितवान् अ[1]; प्राप । ऊत्तम्भितवान् ल; प्राप ऊत्तम्भितवान् ख. °ऊर्ध्वम् अभि° ल प्रस्तावः. ५. मनुष्या मूको. ६. दासी वि[1]; दानी अ[1] ल ख. ७. नास्ति अ[1]. ८-८. कुरुत यज्ञाय अ[1]. ९-९. चित्कुरुशिप्राख्यस्य अ[1]; चित् वृषशिप्राय वि[1]. १०. °षु हे वि[1] अ[1].

इन्द्राविष्णू दृंहिताः शम्बरस्य नव पुरो नवतिं च श्नथिष्टम् ।
शतं वर्चिनः सहस्रं च साकं हथो अप्रत्यसुरस्य वीरान् ॥ ५ ॥

इन्द्राविष्णू इति । दृंहिताः । शम्बरस्य । नव । पुरः । नवतिम् । च । श्नथिष्टम् ।
शतम् । वर्चिनः । सहस्रम् । च । साकम् । हथः । अप्रति । असुरस्य । वीरान् ॥ ५ ॥

वेङ्कट० हे इन्द्राविष्णू! शिलाभिः दृंहिताः शम्बरासुरस्य नव पुरः नवतिम् च श्नथिष्टम् । तथा वर्चिनः असुरस्य शतम् सहस्रम् च पुरः साकम् हथः, शत्रुभिः अप्रतिहतान् असुरस्य वीरान् च ॥ ५ ॥

इयं मनीषा बृहती बृहन्तोरुक्रमा तवसा वर्धयन्ती ।
ररे वां स्तोमं विदथेषु विष्णो पिन्वतमिषो वृजनेष्विन्द्र ॥ ६ ॥

इयम् । मनीषा । बृहती । बृहन्ता । उरुऽक्रमा । तवसा । वर्धयन्ती ।
ररे । वाम् । स्तोमम् । विदथेषु । विष्णो इति । पिन्वतम् । इषः । वृजनेषु । इन्द्र ॥ ६ ॥

वेङ्कट० इयम् स्तुतिः महती महान्तौ उरुक्रमणौ इति विष्णुसाहचर्यात् उभावाह[1], वर्धनेन वर्धयन्ती भवति । तथा प्रयच्छामि च स्तोमम् युवाभ्यां यज्ञेषु विष्णो! । तथा सति इन्द्र! त्वं च विष्णुः च अन्नानि अस्मभ्यम् पिन्वतम्[2] सङ्ग्रामे ॥ ६ ॥

वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् ।
वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

वषट् । ते । विष्णो इति । आसः । आ । कृणोमि । तत् । मे । जुषस्व । शिपिऽविष्ट । हव्यम् ।
वर्धन्तु । त्वा । सुऽस्तुतयः । गिरः । मे । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥

वेङ्कट० वषट्कारं तव हे विष्णो! आसः आस्यात्[3] आभिमुख्येन करोमि । तथा वषट्कृतं मम हव्यम् हे शिपिविष्ट! सेवस्व । शिपिविष्टः यज्ञः इति द्वे यज्ञनामनी इत्युक्तम् (द्र. ऋ ५,७) । वर्धन्तु इति स्पष्टम् ॥ ७ ॥

[4]इति पञ्चमाष्टके षष्ठाध्याये चतुर्विंशो वर्गः[5] ॥

[१००]

[4]वसिष्ठो मैत्रावरुणिर्ऋषिः । विष्णुर्देवता । त्रिष्टुप् छन्दः[5] ।

नू मर्तो दयते सनिष्यन् यो विष्णव उरुगायाय दाशत् ।
प्र यः सत्राचा मनसा यजात एतावन्तं नर्यमाविवासात् ॥ १ ॥

१. उभावाह वि[1] अ[1]; उभावाह छ हस्त. २. पिन्वतम् वि[1] अ[1] हस्त. ३. आस्यादि मूको. ४-४. नास्ति मूको.

नु । मर्तः । दयते । सनिष्यन् । यः । विष्णवे । उरुऽगायाय । दाशत् ।
प्र । यः । सत्राचा । मनसा । यजाते । एतावन्तम् । नर्यम् । आऽविवासात् ॥ १ ॥

वेङ्कट० क्षिप्रं मनुष्यः प्रयच्छति हवि, धन तद्द्वारेण स सनिष्यन्, यः विष्णवे उरुकीर्तये हवि प्रयच्छति। स अन्येभ्य च देवेभ्यः विङम्बते । यः महत्त्वम् अत्रत्ता मनसा विष्णुम् प्र यजते । यः च एतावन्तम् नर्यम् आविवासति अधितिष्ठति । एतावन्तम् इति महान्तमित्यर्थः ॥ १ ॥

त्वं विष्णो सुमतिं विश्वजन्यामप्रयुतामेवयावो मतिं दाः ।
पर्चो यथा नः सुवितस्य भूरेरश्वावतः पुरुश्चन्द्रस्य रायः ॥ २ ॥

त्वम् । विष्णो इति । सुऽमतिम् । विश्वऽजन्याम् । अप्रऽयुताम् । एवऽयावः । मतिम् । दाः ।
पर्चः । यथा । नः । सुवितस्य । भूरेः । अश्वऽवतः । पुरुऽचन्द्रस्य । रायः ॥ २ ॥

वेङ्कट० त्वम् विष्णो! सुमतिम् विश्वजनहिताम् अप्रमत्ताम् हे एवयाव !, एवान्[1] गच्छति, देहि । पर्च यथा न शोभनगमनस्य बहो॰ अश्वावत बहुसुवर्णस्य धनस्य भवेत् । पर्च॰[2] सम्पर्क इति ॥ २ ॥

त्रिर्देवः पृथिवीमेष एतां वि चक्रमे शतर्चसं महित्वा ।
प्र विष्णुरस्तु तवसस्तवीयान्त्वेषं ह्यस्य स्थविरस्य नाम ॥ ३ ॥

त्रिः । देवः । पृथिवीम् । एषः । एताम् । वि । चक्रमे । शतऽअर्चसम् । महिऽत्वा ।
प्र । विष्णुः । अस्तु । तवसः । तवीयान् । त्वेषम् । हि । अस्य । स्थविरस्य । नाम ॥ ३ ॥

वेङ्कट० त्रि देवः पृथिवीम् एष एताम् वि चक्रमे बहुस्तुतिकाम् महत्त्वेन । प्र भवतु विष्णुः वृद्धादपि[3] 'वृद्धतर.। त्वेषम्† हि अस्य' स्थविरस्य नाम विष्णु इति ॥ ३ ॥

वि चक्रमे पृथिवीमेष एतां क्षेत्राय विष्णुर्मनुषे दशस्यन् ।
ध्रुवासो अस्य कीरयो जनास उरुक्षितिं सुजनिमा चकार ॥ ४ ॥

वि । चक्रमे । पृथिवीम् । एषः । एताम् । क्षेत्राय । विष्णुः । मनुषे । दशस्यन् ।
ध्रुवासः । अस्य । कीरयः । जनासः । उरुऽक्षितिम् । सुऽजनिमा । चकार ॥ ४ ॥

वेङ्कट० वि चक्रमे पृथिवीम् एष. विष्णु एताम् मनुषे. आक्रान्ता[5] निवासार्थम् असुरान् अवजित्य[6] पृथिवीं

---

१ एवन् ख लभ, एव नृ वि[२] अ[२] मूको. २. वर्च मूको. ३ वृद्धोदपि भ[२] ख एभ, वृद्धोऽपि वि[२]. ४-४. वृद्धोतमस्य वि[२] अ[२] † नास्ति मूको. ५. अक्रम्यमाण् वि[२] ख, माक्रम्यन्ताद् एभ, आक्रान्तान् ख महताय . ६. अपजित्य अ[२].

मनुष्याय दातुमिच्छन् । स्थिताः अस्य स्तोतारः जनाः अयम् एव स्तोतव्य इति एकमनसः तिष्ठन्ति । सोऽयं शोभनजन्मा विस्तीर्णनिवासाम्[1] असुरापनयनेन चकार ॥ ४ ॥

प्र तत् ते अ॒द्य शि॑पिविष्ट॒ नामा॒ऽर्यः शं॑सामि व॒युना॑नि वि॒द्वान् ।
तं त्वा॑ गृणामि त॒वस॒मत॑व्यान् क्षय॑न्तम॒स्य रज॑सः परा॒के ॥ ५ ॥[2]

प्र । तत् । ते॒ । अ॒द्य । शि॒पि॒ऽवि॒ष्ट॒ । नाम॑ । अ॒र्यः । शं॒सा॒मि॒ । व॒युना॑नि । वि॒द्वान् ।
तम् । त्वा॒ । गृ॒णा॒मि॒ । त॒वस॑म् । अत॑व्यान् । क्षय॑न्तम् । अ॒स्य । रज॑सः । प॒रा॒के ॥ ५ ॥

वेङ्कट० प्र शंसामि तत्[3] ते अद्य शिपिविष्ट! नाम अर्यः स्तोमानाम् ईश्वरः । "महेश्वरः" त्वम् असि "[4]इति वा । प्रज्ञानानि जानन्[5] । त्वां स्तौमि तवसम् अतवान् । 'तवसः' (निघ ३.३) इति महतो नामधेयं भवति । निवसन्तम् अस्य लोकस्य पराक्रान्ते दूरे देशे ॥ ५ ॥

किमित् ते॑ विष्णो परि॒चक्ष्यं॑ भू॒त् प्र यद् व॑वक्षे शि॑पिवि॒ष्टो अ॑स्मि ।
मा वर्पो॑ अ॒स्मदप॑ गूह ए॒तद् यद॒न्यरू॑पः समि॒थे ब॒भूथ॑ ॥ ६ ॥

किम् । इ॒त् । ते॒ । वि॒ष्णो॒ इति॑ । प॒रि॒ऽचक्ष्य॑म् । भू॒त् । प्र । यत् । व॒वक्षे॑ । शि॒पि॒ऽवि॒ष्टः । अ॒स्मि॒ ।
मा । वर्पः॑ । अ॒स्मत् । अप॑ । गू॒हः॒ । ए॒तत् । यत् । अ॒न्यऽरू॑पः । स॒म्ऽइ॒थे । ब॒भूथ॑ ॥ ६ ॥

वेङ्कट० यास्कः—'शिपिविष्टो विष्णुरिति विष्णोर्द्वे[6] नामनी भवतः । कुत्सितार्थीयं पूर्वं भवतीति[7] औपमन्यवः । किं ते विष्णोऽप्रख्यातम्[8] एतद् भवत्यप्रख्यापनीयं यन् नः प्रब्रूषे शेप इव निर्वेष्टितोऽस्मीत्यप्रतिपन्नरश्मिः । अपि वा प्रशंसानामैवाभिप्रेतं स्यात् । किं ते विष्णो! प्रख्यातमेतद् भवति प्रख्यापनीयं यदुत प्रब्रूषे शिपिविष्टोऽस्मीति प्रतिपन्नरश्मिः । शिपयोऽत्र[9] रश्मय उच्यन्ते, तैराविष्टो भवति । मा वर्पो अस्मद् अप गूह एतत्[10] । वर्पः इति[11] रूपनाम, वृणोतीति सतः । यदन्यरूपः समिथे सङ्ग्रामे भवसि संयतरश्मिः (या ५,७;८) इति ।

औपमन्यवपक्षे अयमर्थः—प्रच्छन्नरूपः सन् युद्धे वसिष्ठस्य विष्णुः साहाय्यम् अकरोत् । तं वसिष्ठः प्रच्छन्नरूपम् आह—"किम् इत् ते" इति । यद्यपि त्वं परिस्पन्नरश्मिः प्रच्छादनार्थम् इह वर्तमानः तत् तव व्रीडाम्[12] आवहति महतः । तथा सति मा वर्पो अस्मद् अपगूहनाय तद् यत् त्वम् इदम् अस्मिन् सङ्ग्रामे अन्यरूपः भवसि इति । प्रशंसानामपक्षे तु—मानुषे युद्धे समागतस्य स्वरूपप्रच्छादनार्थम् आत्मीयं तेजः अपगूहितुम् इच्छतः विष्णोः अनुशासनम् किम् इत् ते इति ॥ ६ ॥

---

1. विस्तीर्णमसि[?]" मूको. २. यास्केन (५,८) व्याख्याता. ३. तं वि' अ'. ४-४. महेश्वरः मूको; इतिपाठीयरः क प्रस्तावः. ५. नास्ति मूको. ६. जानानः वि'; जानन् अ'. ७. "गोपेपन्नां" मूको. ८. "नि नास्ति अ'. ९. प्रख्यापनीयम् मूको. १०. शिवयो" मूको. ११. एतदिव मूको. १२. "ति य मूको. १३-१३. "वैमित्य वि' अ'; "मित्राम् कम. १४. व्रीडं मूको.

वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् ।
वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

वषट् । ते । विष्णो इति । आसः । आ । कृणोमि । तत् । मे । जुषस्व । शिपिऽविष्ट । हव्यम् ।
वर्धन्तु । त्वा । सुऽस्तुतयः । गिरः । मे । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥

वेङ्कट० पूर्वं व्याख्याता (ऋ ७,९९,७ द्र.) ॥ ७ ॥

'इति पञ्चमाष्टके षष्ठाध्याये पञ्चविंशो वर्गः' ॥

व्याकरोत् षष्ठमध्यायं पञ्चमस्याष्टकस्य सः ।
भरतस्य कुले जातो माधवो वेङ्कटात्मजः ॥ २ ॥

इति वेङ्कटमाधवाचार्यविरचिते ऋक्संहिताव्याख्याने पञ्चमाष्टके षष्ठोऽध्यायः ॥

—*—

इति ऋग्वेदे सभाष्ये पञ्चमाष्टके षष्ठोऽध्यायः ॥

१-१. नास्ति मूको०

अथ सप्तमोऽध्यायः ।

वेङ्कट० 'तिस्रो वाचो' ऽधुनाऽध्यायं व्याचिख्यासति माधवः ।
[१]ऋषी चार्षे[१] च वक्तव्यं प्रागनुक्तं प्रदर्शयन् ॥ १ ॥

मनुष्यत्वे मन्त्रकृत ऋषयः परिकीर्तिताः ।
आर्षेयवरणं तेषां[२] तथा च ब्राह्मणं शृणु ॥ २ ॥

'न देवैर्न मनुष्यैरार्षेयं वृणीत ऋषिभिरेवार्षेयं वृणीत' (आपश्रौ २४,५,१) इति ।

न मन्त्रदर्शनात्पूर्वम् ऋषित्वं प्रत्यपद्यत ।
श्यावाश्व इत्यवोचाम पञ्चमे मण्डले वयम् ॥ ३ ॥

तेषामृषीणां ज्ञातव्यं गोत्रमित्याह शौनकः ।
देवा देव्योऽप्सरोनद्यो गन्धर्वाश्च स्वयम्भुवः ॥ ४ ॥

कार्याण्युद्दिश्य[३] जायन्ते यदि देवादयोऽपि च ।
मानुषेषु कुलेष्वेषां गोत्रं ज्ञेयमिति स्थितिः ॥ ५ ॥

विपाट्छुतुद्र्योरिन्द्रस्य[४] मरुतामदितेस्तथा ।
नोवाच[५] शौनको गोत्रम् इति तत्र निदर्शनम् ॥ ६ ॥

इच्छन्निन्द्रसमं पुत्रम् अभ्यधादङ्गिरा ऋषिः ।
अभूदिन्द्रः[६] स्वयं तस्य तनयः सव्यनामकः ॥ ७ ॥

इच्छन्निन्द्रसमं पुत्रं चचार कुशिकः पुरा ।
ऐषीरथिर्ब्रह्मचर्यं[७] गाधिनोऽस्य सुतोऽभवत् ॥ ८ ॥

ज्ञातव्यमनयोर्गोत्रं विद्यमानमिति स्थितिः ।
नामार्षेयोस्तु विज्ञानं कार्यं सर्वत्र पण्डितैः ॥ ९ ॥

ऋषिः शाक्त्यो गौरिवीतिस्त्रीणां मण्डले कथम् ।
आजगाम परित्यज्य वासिष्ठं मण्डलं स्वकम् ॥ १० ॥

---

१. ऋषिरार्षे वि[१] अ[१]. २. तेषा वि[१] अ[१] ख खम. ३. ताधा सिद्दिश्य वि[१]; ताधाश्विदिश्य अ[१]; तार्वा[०] खम. ४. दिपाद्छुतुद्यो[०] वि[१]; द्विपाच्छुतुद्यो[०] अ[१]. ५. प्रोवाच ख प्रस्तावः. ६. भारोविन्द अ[१]; भारोविन्द वि[१]. ७. रथी म[०] वि[१] अ[१] खम। गाथीन्द्रोस्य वि[१] अ[१]; गाधीन्द्रोस्य खम.

'समिद्धो अग्निर्दिवी(वि[1] इ)ति विश्ववारायमुच्यते।
तस्याः पतिर्गौरिवीतिरपश्यत् सूक्तमुत्तरम् ॥ ११ ॥

'सत्रासाहम्[2]' इति सूक्ते विश्ववारा ततो वयम्।
मन्यामहे पतिं तस्या गौरिवीतिमिहागतम् ॥ १२ ॥

मध्येऽत्रीणामाङ्गिरसो धरुणो नाम कश्चन।
सूक्तं 'प्र वेधसे[3]' इति प्रसङ्गाद् दृष्टवानृषि ॥ १३ ॥

तेनाभिपश्यत्[4] सूक्तेन धरुणोऽत्रिमृषिं पुरा।
तथैव तत्रात्रिम् 'अस्मर्[5]' इति सूक्तान्तरे[6] श्रुतम् ॥ १४ ॥

वर्तमाना मातृकुले तत्रत्यैर्ऋषिभि सह।
तादृशान्[7] ददृशुर्मन्त्रान् इति केचिद्व्यवस्थिता ॥ १५ ॥

समानोदकसामान्याच्छ्रावाश्च[8] कण्वमण्डले।
अग्निनेन्द्रेण[9] सूक्तानि ददर्श पुनरागत ॥ १६ ॥

उक्तानि[10] कारणान्येव मण्डलान्तरसङ्क्रमे।
अन्येषामपि दृष्टानामिति वृद्धेभ्य आगम ॥ १७ ॥

ऋषयो बह्वृचैरित्थं स्मर्यन्ते सामगैरपि[11]।
स्मरन्त्यध्वर्यव[12] नैवं[13] तत्र किं कारणं भवेत्[14] ॥ १८ ॥

प्रजापतिश्च सोमश्च तृतीयोऽग्निस्तथैव च।
विश्वेदेवा स्वयम्भूश्च तेषां काण्डर्षयो मता[15] ॥ १९ ॥

यजूंष्यृचश्च[16] बहुभि दृष्टा ह्येतैर्महर्षिभि[17]।
काण्डान्यकुर्वन्नृषय स्मर्यन्तेऽध्वर्युभिश्च ते ॥ २० ॥

पठन्त्यवान्तरानादौ ब्राह्मणानां कठा[18] पुन।
ऋषीन् व्याख्यानभूतानाम् अनेकान् यजुषामपि ॥ २१ ॥

---

१. ऋ ५,२८,१. २. ऋ ५,२८,३ ३. ऋ ५,१५,१ ४. अभिपश्य वि¹ म² ख छम ५. ऋ ५,१५,५ ६. सूक्त तया वि¹ म², सूक्त तत्रा एम. ७. °शा वि¹ म² ए छम, ८. °दक° वि¹ म². ९. ऋ ८,३५,१ १० औक्त° वि¹ म². ११ सागमै° वि¹ म²; सागमे° एम १२. °रन्त्याध्वर्यव पॆक्रम; °रन्त्यध्वर्यवे वि¹ म² ख, °रन्त्यर्ये एम १३. नैव वि¹ म² १४ भवेत् वॆक्रम १५ विदु वॆक्रम. १६. यजुष्टृ° वि¹ म² वॆक्रम ए, यजूंष्यृ च एम. १७. नैतै म° वि¹ म² एम, एतैर्म° वॆक्रम. १८. कथा वि¹ म² ख छम.

काण्डर्षिस्मरणादेव भवत्यभ्युदयस्तत[1] ।
स्मरन्त्यवान्तरर्षीन इति वृद्धेभ्य आगम ॥ २२ ॥

ब्राह्मणाम्नानधेयाच्च शाखास्वन्यास्वपि द्विजा ।
तानेवर्षीन् विजानन्ति च ऋग्वेदे व्यवस्थिता ॥ २३ ॥

साम्ना रथन्तरादीना भिन्नैवात्यन्तमाकृति[2] ।
ताण्डके शाट्यायनके भिद्यन्त ऋषयो न तु ॥ २४ ॥

भरद्वाजोऽकामयत वसिष्ठोऽकामयतेति ।
उभयत्रार्थवादाना पश्यामो ह्येकरूपताम् ॥ २५ ॥

अध्वर्यूणां ब्राह्मणानि—'कृणुष्व पाज'[3] इत्यत्र वामदेवस्यर्चो याज्यानुवाक्या भवन्तीत्युक्तम् 'दिवस्परि प्रथमम्'[4] इत्यग्नेतेन वै वत्सप्रीर्भालन्दन इत्युक्तम् । 'अयं सो अग्नि'[5] इति विश्वामित्रस्य सूक्त भवतीत्युक्तम् । ऋषेर्ऋषेर्वा एता निर्मिता यत् सामिधेन्य इत्युक्तम् ।

एवमैक्ये रूपभेद पाठभेदश्च किंकृत ।
साङ्गामृचा च विविध कथयन्त्यत्र वैदिका ॥ २६ ॥

भूयोभूयस्तपस्तप्त्वा वेदाम्नानविधानिति ।
ऋषयो ददृशु पूर्वं ततमर्थमभीप्सव ॥ २७ ॥

पञ्चस्वृक्षु च वैरूप्ये रूपस्वरकृते बुधा ।
अर्थवैरूप्यमपि च कारणं प्रतिजानते ॥ २८ ॥

ऋग् 'विश्वो देवस्य नेतु'[6] भवेत्तत्र निदर्शनम् ।
'विश्वे' बहुवचनान्त पठन्त्यध्वर्यव[7] पदम् ॥ २९ ॥ इति ॥

[१०१]

[8]वसिष्ठो मैत्रावरुणि (वृष्टिकाम) ऋषि, कुमार आग्नेयो वा । पर्जन्यो देवता । त्रिष्टुप् छन्द[8] ।

ति॒स्रो वाच॒: प्र व॑द॒ ज्योति॑रग्रा॒ या ए॒तद् दु॒ह्रे म॑धुदो॒घमूध॑: ।
स व॒त्सं कृ॒ण्वन् गर्भ॒मोष॑धीनां स॒द्यो जा॒तो वृ॑ष॒भो रो॑रवीति ॥ १ ॥

ति॒स्र । वाच॑ । प्र । व॒द॒ । ज्योति॑ऽअग्रा । या । ए॒तत् । दु॒ह्रे । म॒धु॒ऽदो॒घम् । ऊध॑ ।
स । व॒त्सम् । कृ॒ण्वन् । गर्भ॑म् । ओष॑धीनाम् । स॒द्य । जा॒त । वृ॒ष॒भ । रो॒र॒वी॒ति॒ ॥ १ ॥

१ °स्तया अ° क ख ग. २. भिन्नैवायन्त° वि° अ°. ३. ऋ ४,४,१ ४. ऋ १०,४५,१. ५ ऋ ३,२२,१. ६ ऋ ५,५१,१ ७. °त्याध्व° वेंकट. ८-८. नास्ति मूको.

वेङ्कट० आग्नेयः कुमारो नाम सूक्तयोः, वसिष्ठ एव वा वृष्टिकामः । तिस्रः वाचः 'प्र वद[1] विद्युन्मुखाः[1] । 'तद्येते वषट्कारा यत् स्तनयति यद्विद्योतते ततो यदवस्फूर्जते[2] यद्वातो वाति'[2] (तु. माश ११,५,६,९) इति ब्राह्मणम् । याः[3] एतत्[3] दुहते मधुक्षारि मेघस्योधः । यः सः[4] आत्मीयम् वत्सम् उदकम्[5] ओषधीनाम् गर्भम् कृण्वन्, अपि वाग्निर्वत्सः पर्जन्यस्य तमोषधीनां[6] गर्भम् कृण्वन्, सद्यः जातः वृषभः शब्दायते ॥ १ ॥

यो वर्धन ओषधीनां यो अपां यो विश्वस्य जगतो देव ईशे ।
स त्रिधातु शरणं शर्म यंसत् त्रिवर्तु ज्योतिः स्वभिष्ट्यस्मे ॥ २ ॥

यः । वर्धनः । ओषधीनाम् । यः । अपाम् । यः । विश्वस्य । जगतः । देवः । ईशे ।
सः । त्रिऽधातु । शरणम् । शर्म । यंसत् । त्रिऽवर्तु । ज्योतिः । सुऽअभिष्टि । अस्मे इति ॥ २ ॥

वेङ्कट० यः ओषधीनाम् अपाम् च वर्धनः, यः च देवः विश्वस्य जगतः ईष्टे, सः त्रिबन्धनं गृहं च सुखं च यच्छतु । 'त्रिवर्तु च ज्योतिः[7] स्वभ्येषणम्[7] अस्मभ्यं प्रयच्छतु । त्रिवर्तनं भवत्यादित्याद् ज्योतिषो 'वसन्ता प्रातर्ग्रीष्मे मध्यन्दिने शरद्यपराह्ने' (तै २१,२,५) त्रिप्रकारं तप्यमानमिति ॥ २ ॥

स्तरीरु त्वद् भवति सूत उ त्वद् यथावशं तन्वं चक्र एषः ।
पितुः पयः प्रति गृभ्णाति माता तेन पिता वर्धते तेन पुत्रः ॥ ३ ॥

स्तरीः । ऊँ इति । त्वत् । भवति । सूते । ऊँ इति । त्वत् । यथाऽवशम् । तन्वम् । चक्रे । एषः ।
पितुः । पयः । प्रति । गृभ्णाति । माता । तेन । पिता । वर्धते । तेन । पुत्रः ॥ ३ ॥

वेङ्कट० निवृत्तप्रसवम्[8] एकम् भवति । सूते अन्यत् । यथाकामम् आत्मीयं शरीरम् उभयोः करोति एषः देवः पर्जन्यः । दिवि च पृथिव्यां चात्मीयमुदकं विस्तारयति, तत्र पृथिव्योषधीः[11] जनयतीत्यर्थः । पितुः पयः प्रति गृह्णाति माता द्युलोकात् पृथिवी उदकम् । तेन उदकेन पिता च वर्धते पुत्रः चायं लोकः । पितृप्रदानं हि देवाश्च उपजीवन्तीति ॥ ३ ॥

यस्मिन् विश्वानि भुवनानि तस्थुस्तिस्रो द्यावस्त्रेधा सस्रुरापः ।
त्रयः कोशास उपसेचनासो मध्वः श्चोतन्त्यभितो विरप्शम् ॥ ४ ॥

यस्मिन् । विश्वानि । भुवनानि । तस्थुः । तिस्रः । द्यावः । त्रेधा । सस्रुः । आपः ।
त्रयः । कोशासः । उपऽसेचनासः । मध्वः । श्चोतन्ति । अभितः । विऽरप्शम् ॥ ४ ॥

१-१. प्रावदकम्[°] वि[१]. २. यदः प्रस्फूर्जे[°] वि[१]; यदवस्फू[°] अ[१]. ३. नास्ति मूको. ४. नास्ति वि[१]. ५. स १ मूको. ६. उदात् मूको. ७. तनीय[°] मूको. ८-८. ज्योतिष्पत्य कृते तु. शौ ९,५,८;१०,७, १२;४०; मा ८,३६; माश ११,५,८,२; शांश्रौ १६,२१,२. ९. अभ्ये[°] वि[१]. १०. निवृत्तः प्र[°] वि[१]; निवृत्त प्र[°] अ[१]; एतत्१[°] ह कम. ११. [°]ध्यो,षं मूको.

वेङ्कट० यस्मिन् विश्वानि भूतानि तिष्ठन्ति, त्रयश्च लोकाः । यस्माच्च त्रेधा स्रवन्ति आप आज्यौषधिसोमरूपाः । त्रय कोशा अग्निवायुसूर्याख्याः पर्जन्यस्य उपसेचनाः, उदकानि क्षरन्ति परितो महान्त पर्जन्यम् ॥ ४ ॥

इदं वचः पर्जन्याय स्वराजे हृदो अस्त्वन्तरं तज्जुजोषत् ।
मयोभुवो वृष्टयः सन्त्वस्मे सुपिप्पला ओषधीर्देवगोपाः ॥ ५ ॥

इदम् । वचः । पर्जन्याय । स्वऽराजे । हृदः । अस्तु । अन्तरम् । तत् । जुजोषत् ।
मयःऽभुवः । वृष्टयः । सन्तु । अस्मे इति । सुऽपिप्पलाः । ओषधीः । देवऽगोपाः ॥ ५ ॥

वेङ्कट० इदम् वच पर्जन्याय स्वराजे हृदयस्य अन्तरङ्गम् अस्तु । तत् स सेवताम् । सुखस्य भावयित्र्य वृष्टय 'अस्मासु सन्तु सुफला ओषधय'[1] च देवेन पर्जन्येन गुप्ता ॥ ५ ॥

स रेतोधा वृषभः शश्वतीनां तस्मिन्नात्मा जगतस्तस्थुषश्च ।
तन्म ऋतं पातु शतशारदाय यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

स । रेतःऽधाः । वृषभः । शश्वतीनाम् । तस्मिन् । आत्मा । जगतः । तस्थुषः । च ।
तत् । मा । ऋतम् । पातु । शतऽशारदाय । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥

वेङ्कट० पर्जन्य रेतसो निधाता वर्षिता च बह्वीनामपाम् । तस्मिन् आत्मा जङ्गमस्य स्थावरस्य च । यद्वा बह्वीनामोषधीनां पर्जन्य । तत् उदकम् अस्मान् रक्षतु शतशारदाय[2] जीवितार ॥ ६ ॥

'इति पञ्चमाष्टके सप्तमाध्याये प्रथमो वर्ग'[3] ॥

[१०२]

[3]वसिष्ठो मैत्रावरुणि (वृष्टिकाम) ऋषि, कुमार आग्नेयो वा । पर्जन्यो देवता ।
गायत्री छन्द, द्वितीया पादनिचृत्[3] ।

पर्जन्याय प्र गायत दिवस्पुत्राय मीळ्हुषे । स नो यवसमिच्छतु ॥ १ ॥

पर्जन्याय । प्र । गायत । दिवः । पुत्राय । मीळ्हुषे । सः । नः । यवसम् । इच्छतु ॥ १ ॥

वेङ्कट० पर्जन्याय प्र गायत अन्तरिक्षे प्रादुर्भूताय सेक्त्रे । स अस्माकम् यवसम् इच्छतु ॥ १ ॥

यो गर्भमोषधीनां गवां कृणोत्यर्वताम् । पर्जन्यः पुरुषीणाम् ॥ २ ॥

यः । गर्भम् । ओषधीनाम् । गवाम् । कृणोति । अर्वताम् । पर्जन्यः । पुरुषीणाम् ॥ २ ॥

वेङ्कट० निगदसिद्धा ॥ २ ॥

---

१ °स्मासु बलाज्यौषध्य वि[1] °स्मासु बलाज्योषध्य अ[1], °स्मासु सुबलाज्यौषध्य क, °स्मासु छबलाज्योषध्य लभ † आज्यौषध्य क मस्ताव २ 'शार' क लभ ३-३ नास्ति मूको

तस्मा इदास्ये हविर्जुहोता मधुमत्तमम् । इळां नः संयतं करत् ॥ ३ ॥

तस्मै । इत् । आस्ये । हविः । जुहोत । मधुमत्ऽतमम् । इळाम् । नः । सम्ऽयतम् । करत् ॥ ३ ॥

वेङ्कट० अन्नं सम्यगतं करोत्विति ॥ ३ ॥

[2]इति पञ्चमाष्टके सप्तमाध्याये द्वितीयो वर्गः[2] ॥

[१०३]

[3]वसिष्ठो मैत्रावरुणिर्ऋषिः । मण्डूका देवता । त्रिष्टुप् छन्दः, आद्यानुष्टुप्[3] ।

संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः ।
वाचं पर्जन्यजिन्वितां प्र मण्डूका अवादिषुः ॥ १ ॥

संवत्सरम् । शशयानाः । ब्राह्मणाः । व्रतऽचारिणः ।
वाचम् । पर्जन्यऽजिन्विताम् । प्र । मण्डूकाः । अवादिषुः ॥ १ ॥

वेङ्कट० संवत्सरम् शिश्याना ब्राह्मणा व्रतचारिणः अनश्नन्तः वाचम् पर्जन्यप्रीताम् प्र अवादिषुः मण्डूकाः । अत्र यास्कः (९,६)—'ब्राह्मणा ब्रुवाणाः[1] । अपि वोपमार्थे स्यात् । ब्राह्मणा इव व्रतचारिण इति' ॥ १ ॥

दिव्या आपो अभि यदेनमायन् दृतिं न शुष्कं सरसी शयानम् ।
गवामह न मायुर्वत्सिनीनां मण्डूकानां वग्नुरत्रा समेति ॥ २ ॥

दिव्याः । आपः । अभि । यत् । एनम् । आयन् । दृतिम् । न । शुष्कम् । सरसी इति । शयानम् ।
गवाम् । अह । न । मायुः । वत्सिनीनाम् । मण्डूकानाम् । वग्नुः । अत्र । सम् । एति ॥ २ ॥

वेङ्कट० दिव्याः आपः अभि आयन् यत् एनम् मण्डूकम् दृतिम् इव शुष्कम् सलिले महति सरसि शयानम् । गवाम् इव शब्दः वत्सयुक्तानाम् मण्डूकानाम् शब्दः अत्र पर्जन्ये वर्षासु वा सम् गच्छते । अह इति पूरणम् ॥ २ ॥

यदीमेनाँ उशतो अभ्यवर्षीत् तृष्यावतः प्रावृष्यागतायाम् ।
अख्खलीकृत्या पितरं न पुत्रो अन्यो अन्यमुप वदन्तमेति ॥ ३ ॥

यत् । ईम् । एनान् । उशतः । अभि । अवर्षीत् । तृष्याऽवतः । प्रावृषि । आऽगतायाम् ।
अख्खलीऽकृत्य । पितरम् । न । पुत्रः । अन्यः । अन्यम् । उप । वदन्तम् । एति ॥ ३ ॥

---

1. अनश्नन्तः वि' अ'. २-२. नास्ति मूको. ३-३. प्रपाठः मूको

वेङ्कट० यदि एनान् कामयमानान् उदकम् अभि वर्षति पर्जन्य तृष्णायुक्तान् प्रावृषि आगतायाम्। अक्खलीकृत्य इति शब्दानुकरणमाहु । पितरम् इव पुत्र अन्य अन्यम् उप गच्छति वदन्तम् शब्दायमानमिति ॥ ३ ॥

अ॒न्यो अ॒न्यमनु॑ गृ॒भ्णात्ये॑नोर॒पां प्र॑स॒र्गे यदम॑न्दिषाताम् ।
मण्डू॑को॒ यद॒भिवृ॑ष्टः॒ कनि॑ष्कन्पृ॒श्निः॑ संपृ॒ङ्क्ते हरि॑तेन॒ वाच॑म् ॥ ४ ॥

अ॒न्य । अ॒न्यम् । अनु॑ । गृ॒भ्णा॒ति॒ । ए॒नो॒ । अ॒पाम् । प्र॒ऽस॒र्गे । यत् । अम॑न्दिषाताम् ।
म॒ण्डूक॑ । यत् । अ॒भिऽवृ॑ष्ट । कनि॑स्कन् । पृश्नि॑ । स॒म्ऽपृ॒ङ्क्ते । हरि॑तेन । वाच॑म् ॥ ४ ॥

वेङ्कट० अन्य अन्यम् अनयोर्मण्डूकयो अनुगम्य गृह्णाति, अपाम् प्रसर्गे[1] यदा अमन्दिषाताम् मण्डूकौ[2]। यदा मण्डूक अभिवृष्ट शब्द कुर्वन् पृश्निवर्णं सम्पृङ्क्ते हरितवर्णेनान्येन आत्मीयाम् वाचम् समिश्रयति ॥ ४ ॥

यदे॑षाम॒न्यो अ॒न्यस्य॒ वाचं॑ शा॒क्तस्ये॑व॒ वद॑ति॒ शिक्ष॑माणः ।
सर्वं॒ तदे॑षां स॒मृधे॑व॒ पर्व॒ यत्सु॒वाचो॒ वद॑थ॒नाध्य॒प्सु ॥ ५ ॥

यत् । ए॒षा॒म् । अ॒न्य । अ॒न्यस्य॑ । वाच॑म् । शा॒क्तस्य॑ऽइव । वद॑ति । शिक्ष॑माण ।
सर्व॑म् । तत् । ए॒षा॒म् । स॒मृधा॑ऽइव । पर्व॑ । यत् । सु॒ऽवाच॑ । वद॑थन । अधि॑ । अ॒प्ऽसु ॥ ५ ॥

वेङ्कट० यत् एषाम्[3] अन्य अन्यस्य वाचम् वदति शक्तियुक्तस्येव "शिष्य शिक्षन् आचार्यस्य[4]"। सर्वम् तत् एषाम् भवतां समृद्धमिव पर्व अज्ञानाम् उदकाप्यायितानाम्[5], यत् सुवाच यूयम् अप्सु स्थिता शब्द[6] कुरुतेति ॥ ५ ॥

[7]इति पञ्चमाष्टके सप्तमाध्याये तृतीयो वर्ग[7] ॥

गोमा॑युरेको॑ अ॒जमा॑युरेकः॒ पृश्नि॑रेको॒ हरि॑त॒ एक॑ एषाम् ।
स॒मा॒नं नाम॒ बिभ्र॑तो॒ विरू॑पाः पुरु॒त्रा वाचं॑ पिपिशु॒र्वद॑न्तः ॥ ६ ॥

गोऽमा॑यु । एक॑ । अ॒जऽमा॑यु । एक॑ । पृश्नि॑ । एक॑ । हरि॑त । एक॑ । ए॒षा॒म् ।
स॒मा॒नम् । नाम॑ । बिभ्र॑त । विऽरू॑पा । पु॒रु॒ऽत्रा । वाच॑म् । पि॒पि॒शु॒ । वद॑न्त ॥ ६ ॥

वेङ्कट० गोशब्द एक, अजशब्द एक, पृश्निवर्णं एक हरितवर्णं एक एषाम् मण्डूकानाम्। समानम् मण्डूकाख्यम् नाम बिभ्रत नानारूपा बहुदेशेषु वाचम् मिश्रयन्ति शब्दयन्त[8] ॥ ६ ॥

---

१ प्रसर्गे मू॰. २. °कौ मूको ३ यषाम् ए लभ. ४. शिष्यस्य शिष्यन्नाचाय मूको
५. वदकाप्य यितम् मूको ६ शं मूको. ७-७ नास्ति मूको. ८ °ब्दा° मूको

ब्राह्मणासो अतिरात्रे न सोमे सरो न पूर्णमभितो वदन्तः ।
संवत्सरस्य तदहः परि ष्ठ यन्मण्डूकाः प्रावृषीणं बभूव ॥ ७ ॥

ब्राह्मणासः । अतिऽरात्रे । न । सोमे । सरः । न । पूर्णम् । अभितः । वदन्तः ।
संवत्सरस्य । तत् । अहः । परि । स्थ । यत् । मण्डूकाः । प्रावृषीणम् । बभूव ॥ ७ ॥

वेङ्कट० ब्राह्मणाः इव अतिरात्रे सोमे भूयिष्ठस्तोत्रशस्त्रे सरः इव पूर्णम् अभितः स्तोत्रशस्त्राणि वदन्तः । सरःशब्दः सोमवचन[1] । संवत्सरस्य तत् दिनं परितो भवथ, यत् दिनं हे मण्डूकाः । प्रावृषेण्यं भवति प्रादुर्भवति चेति ॥ ७ ॥

ब्राह्मणासः सोमिनो वाचमक्रत ब्रह्म कृण्वन्तः परिवत्सरीणम् ।
अध्वर्यवो घर्मिणः सिष्विदाना आविर्भवन्ति गुह्या न के चित् ॥ ८ ॥

ब्राह्मणासः । सोमिनः । वाचम् । अक्रत । ब्रह्म । कृण्वन्तः । परिवत्सरीणम् ।
अध्वर्यवः । घर्मिणः । सिस्विदानाः । आविः । भवन्ति । गुह्याः । न । के । चित् ॥ ८ ॥

वेङ्कट० ब्राह्मणासः सोमिनः इत्यौपमिकम् । कर्म कृण्वन्तः संवत्सरान्तर्भवम् वाचम् अकुर्वन्[2] । अध्वर्यवः घर्मेण चरन्तः स्विद्यच्छरीराः आविः भवन्ति गुह्याः इदानीम् के चित् बिलादुत्थिता मण्डूकाः । न इति सम्प्रत्यर्थः ॥ ८ ॥

देवहितिं जुगुपुर्द्वादशस्य ऋतुं नरो न प्र मिनन्त्येते ।
संवत्सरे प्रावृष्यागतायां तप्ता घर्मा अश्नुवते विसर्गम् ॥ ९ ॥

देवऽहितिम् । जुगुपुः । द्वादशस्य । ऋतुम् । नरः । न । प्र । मिनन्ति । एते ।
संवत्सरे । प्रावृषि । आऽगतायाम् । तप्ताः । घर्माः । अश्नुवते । विऽसर्गम् ॥ ९ ॥

वेङ्कट० द्वादशमासस्य संवत्सरस्य देवहितिम् हवीरूपम् जुगुपुः एते । तदेवाह—न हिंसन्ति वार्षिकम् ऋतुम् नेतार इति । प्रकाशीभवन्तः ऋतुं प्रकाशयन्तीत्यर्थः । संवत्सरे प्रावृषि आगतायाम् तप्ताः केचन घर्माः बिलात् विसर्गम् प्राप्नुवन्ति । तप्ता घर्मा इत्यौपमिकम् ॥ ९ ॥

गोमायुरदादजमायुरदात् पृश्निरदाद्धरितो नो वसूनि ।
गवां मण्डूका ददतः शतानि सहस्रसावे प्र तिरन्त आयुः ॥ १० ॥

गोऽमायुः । अदात् । अजऽमायुः । अदात् । पृश्निः । अदात् । हरितः । नः । वसूनि ।
गवाम् । मण्डूकाः । ददतः । शतानि । सहस्रऽसावे । प्र । तिरन्ते । आयुः ॥ १० ॥

---

१. सोम° मूको, २. अकृत वि°; अर्वं अ° एभ; महान् क प्रस्तावः.

वेङ्कट० गोमायुः अदात् । एवमन्ये च धनानि अस्मभ्यम् गवाम् शतानि प्रयच्छन्तः मण्डूका सहस्रसावे बहूनां प्रसवे वर्धन्तम् प्र वर्धयन्ति आयुः अस्माकम् इति ॥ १० ॥

[1]इति पञ्चमाष्टके सप्तमाध्याये चतुर्थो वर्गः[1] ॥

[१०४]

[1]वसिष्ठो मैत्रावरुणिर्ऋषिः । इन्द्रासोमौ देवता, अष्टमीषोडश्यो. एकोनविंश्यादितिस्रविंश्यन्तानां च इन्द्रः, नवमीद्वादशीत्रयोदशीनां सोमः, दशमीचतुर्दश्योरग्निः, एकादश्या देवाः, सप्तदश्या ग्रावाणः, अष्टादश्या मरुतः, त्रयोविंश्या (पूर्वार्धस्य) वसिष्ठाशीः, (उत्तरार्धस्य) पृथिव्यन्तरिक्षे । त्रिष्टुप् छन्दः, आद्यादिषड्चन्ता अष्टादश्येकविंशीत्रयोविंश्यश्च जगत्यः, सप्तमी जगती त्रिष्टुब् वा, पञ्चविंशी अनुष्टुप्[1] ।

इन्द्रासोमा तपतं रक्ष उब्जतं न्यर्पयतं वृषणा तमोवृधः ।
परा शृणीतमचितो न्योषतं हतं नुदेथां नि शिशीतमत्रिणः ॥ १ ॥

इन्द्रासोमा । तपतम् । रक्षः । उब्जतम् । नि । अर्पयतम् । वृषणा । तमःऽवृधः ।
परा । शृणीतम् । अचितः । नि । ओषतम् । हतम् । नुदेथाम् । नि । शिशीतम् । अत्रिणः ॥ १ ॥

वेङ्कट० शौनक — संवत्सरं तु मण्डूकम् ऐन्द्रासोमं परं तु यत् ।
ऋषिर्ददर्श राक्षोघ्नं पुत्रशोकपरिप्लुतः ॥
'ये पाकशंसम् [९]'[2] ऋक् सौम्या[3] आग्नेयी तत उत्तरा ।
एकादशी वैश्वदेवी सौम्यस्तस्याः[4] परो द्वृचः ॥
'यदि वाहम् [१४]' ऋगाग्नेयी ऐन्द्री[5] 'यो मे(मा [१६]' इ)ति तु स्मृता[6] ।
ग्राव्यो 'प्र या जिगाति' (ति [१७]' इ)ति 'वि तिष्ठध्वम् [१८]' तु मारुती ॥
'प्र वर्तय' (य [१९]' इ)ति पञ्चैन्द्र्य [7]ऐन्द्रासोमी त्वृगुत्तरा[7] ।
ऋषिस्त्वाशिषमाशास्ते 'मा नो रक्षः [२३]' इति त्वृचि ॥
पञ्चदश्यां तु सूक्तस्य अष्टम्यां चैव वारुणिः[8] ।
दुःखशोकपरीतात्मा शपते[9] विलपन्निव ॥ (बृदे ६,२७-३१,३२) इति ॥

हे इन्द्रासोमौ[1] तेजोभिः तपतम् रक्षः उब्जतम् च । उब्जतिर्वधकर्मा । नि अर्पयतम् अधो नयत वर्षितारौ[1] तमसा वर्धयितॄन् राक्षसान् । परा शृणीतम् पराङ्मुखान् नीत्वा विशीर्णान् कुरुतम् । अज्ञान् निर्दहत च । हतम् । नुदेथाम् । नितरां च तनूकुरुतम् अदनशीलानिति ॥ १ ॥

१-१. नास्ति मूको. २. ये वा कदी समदौम्या वि' अ' छन्न. ३. ऋग्सौम्या मूको. ४. °यस्तस्माद् मूको. ५. ऐन्द्र्यौ मूको. ६. स्मृतौ मूको. ७-७. °स्युगु° मूको. ८. 'णि अ'; °णी वि' छच; वरुणी छम °णी छु प्रस्ताव. ९. शपथे मूको.

इन्द्रासोमा समघशंसमभ्यघं तपुर्ययस्तु चरुरग्निवाँइव।
ब्रह्मद्विषे क्रव्यादे घोरचक्षसे द्वेषो धत्तमनवायं किमीदिने ॥ २ ॥

इन्द्रासोमा । सम् । अघऽशंसम् । अभि । अघम् । तपुः । ययस्तु । चरुः । अग्निवान्ऽइव ।
ब्रह्मऽद्विषे । क्रव्यऽअदे । घोरऽचक्षसे । द्वेषः । धत्तम् । अनवायम् । किमीदिने ॥ २ ॥

वेङ्कट० इन्द्रासोमौ! अघस्य शंसितारम् सम् अभि भवतम् अघम् आहृत्य तापकः राक्षसः युवयोस्तेजसा आयस्तो भवतु, यथाऽग्निना तप्यमानः[1] चरुः। ब्राह्मणद्वेषिणे क्रव्यादे घोरख्याताय द्वेषः धत्तम्। अव्यपेयम् अनवयवं वा यदन्ये न व्यवेयुः[2]। 'किमीदिने किमिदानीमिति चरते[3] किम्[4] इदं[5] किमिदमिति वा पिशुनाय चरते' इति यास्कः (६,११) ॥ २ ॥

इन्द्रासोमा दुष्कृतो वव्रे अन्तरनारम्भणे तमसि प्र विध्यतम्।
यथा नातः पुनरेकश्चनोदयत् तद् वामस्तु सहसे मन्युमच्छवः ॥ ३ ॥

इन्द्रासोमा । दुःऽकृतः । वव्रे । अन्तः । अनारम्भणे । तमसि । प्र । विध्यतम् ।
यथा । न । अतः । पुनः । एकः । चन । उत्ऽअयत् । तत् । वाम् । अस्तु । सहसे । मन्युऽमत् । शवः ॥

वेङ्कट० इन्द्रासोमौ! दुष्टस्य कर्मणः कर्तॄन् वारके[6] अन्तः अनालम्बने तमसि "प्र विध्यतम्" प्रक्षिपतम्, यथा न अतः तमसः पुनः एकः अपि 'राक्षस उद्गच्छेत्'[7]। तद् युवयोः[8] अस्तु अभिभवाय रक्षसां[9] क्रोधयुक्तम्[10] बलम् ॥ ३ ॥

इन्द्रासोमा वर्तयतं दिवो वधं सं पृथिव्या अघशंसाय तर्हणम्।
उत् तक्षतं स्वर्यं पर्वतेभ्यो येन रक्षो वावृधानं निजूर्वथः ॥ ४ ॥

इन्द्रासोमा । वर्तयतम् । दिवः । वधम् । सम् । पृथिव्याः । अघऽशंसाय । तर्हणम् ।
उत् । तक्षतम् । स्वर्यम् । पर्वतेभ्यः । येन । रक्षः । वावृधानम् । निऽजूर्वथः ॥ ४ ॥

वेङ्कट० इन्द्रासोमौ! द्युलोकाद् वज्रम् सम् वर्तयतम् पृथिव्याः अघशंसाय रक्षसे हिंसकम्। उत् तक्षतम् पृथक् कुरुतं स्वरणकुशलम् अशनिं[12] मेघेभ्यः, यथा काष्ठेभ्यः शकलम् तक्षन्ति[13]। येन वज्रेण रक्षः वर्धमानं निहथः[14] ॥ ४ ॥

इन्द्रासोमा वर्तयतं दिवस्पर्यग्नितप्तेभिर्युवमश्महन्मभिः।
तपुर्वधेभिरजरेभिरत्रिणो नि पर्शाने विध्यतं यन्तु निस्वरम् ॥ ५ ॥

---

१. °माना: मूको. २. व्यपेयुः ल छभ; व्या पयेयुः वि[1]; वार्येयुः अ[1]. ३. °रते: मूको. ४. नास्ति मूको. ५. इमे मूको. ६. तु. वैप १,२३८५]; नास्ति वि[1]. ७-७ प्रवर्धते मूको. ८. °सो न च° मूको. ९. उभयोः वि[1] अ[1]; युभयो. ल छभ. १०. रक्षांसि वि[1] अ[1]. ११. धियुतम् ल छभ; युकम् वि[1] अ[1]. १२. अशनं वि[1] ल छभ; अर्न अ[1]. १३. उतक्ष° ल छभ; भक्ष° वि[1] अ[1]. १४. निहम मूको.

इन्द्रासोमा । वर्तयतम् । दिवः । परि । अग्निऽतप्तेभिः । युवम् । अश्महन्मऽभिः ।
तपुःऽवधेभिः । अजरेभिः । अत्रिणः । नि । पर्शाने । विध्यतम् । यन्तु । निऽस्वरम् ॥ ५ ॥

वेङ्कट० [1]इन्द्रासोमौ! परि वर्तयतम् अन्तरिक्षाद् आगच्छथः । अग्निना तप्तास्त्रैः व्याप्तहननैः तापनशील- प्रहारैः अदनशीलान् राक्षसान् शस्त्रैः नि विध्यतम् पर्शाने† पार्श्वस्थे अपि । नि यन्तु राक्षसाः निस्वरम् शब्दायमानाः(?)‡[1] ॥ ५ ॥

[2]इति पञ्चमाष्टके सप्तमाध्याये पञ्चमो वर्गः[2] ॥

इन्द्रासोमा परि वां भूतु विश्वत इयं मतिः कक्ष्याश्वेव वाजिना ।
यां वां होत्रां परिहिनोमि मेधयेमा ब्रह्माणि नृपतीव जिन्वतम् ॥ ६ ॥

इन्द्रासोमा । परि । वाम् । भूतु । विश्वतः । इयम् । मतिः । कक्ष्या । अश्वाऽइव । वाजिना ।
याम् । वाम् । होत्राम् । परिऽहिनोमि । मेधया । इमा । ब्रह्माणि । नृपती इवेति नृपतीऽइव । जिन्वतम् ॥

वेङ्कट० इन्द्रासोमौ![3] परि भवतु वाम् सर्वतः इयम् स्तुतिः अश्वाविव बलिनौ[4] कक्ष्या, याम् युवयोः अहं प्रेरयामि प्रज्ञया । अतो युवाम् इमानि स्तोत्राणि राजानाविव[5] कामप्रदानेन प्रीणयतम् ॥ ६ ॥

प्रति स्मरेथां तुजयद्भिरेवैर्हतं द्रुहो रक्षसो भङ्गुरावतः ।
इन्द्रासोमा दुष्कृते मा सुगं भूद् यो नः कदा चिदभिदासति द्रुहा ॥ ७ ॥

प्रति । स्मरेथाम् । तुजयत्ऽभिः । एवैः । हतम् । द्रुहः । रक्षसः । भङ्गुरऽवतः ।
इन्द्रासोमा । दुःऽकृते । मा । सुऽगम् । भूत् । यः । नः । कदा । चित् । अभिऽदासति । द्रुहा ॥७॥

वेङ्कट० [6]'अस्मान् प्रति'[6] स्मरेथाम् । आगच्छतमित्यर्थः । क्षिप्रमाचरद्भिः गमनैः । हतम् च द्रोग्धॄन्[7] राक्षसान् भङ्गुरावतः भञ्जनशीलकर्मयुक्तान् । हे इन्द्रासोमौ! दुष्कर्मणे मा सुगम् भवतु । सुगम् इति सुखनाम । यः नः कदा चित् अपि अभिहिनस्ति द्रोहेण ॥ ७ ॥

यो मा पाकेन मनसा चरन्तमभिचष्टे अनृतेभिर्वचोभिः ।
आप इव काशिना संगृभीता असन्नस्त्वासत इन्द्र वक्ता ॥ ८ ॥

यः । मा । पाकेन । मनसा । चरन्तम् । अभिऽचष्टे । अनृतेभिः । वचःऽभिः ।
आपःऽइव । काशिना । सम्ऽगृभीताः । असन् । अस्तु । असतः । इन्द्र । वक्ता ॥ ८ ॥

१-१. नास्ति वि[2] अ[1]. † परिशाने मूको. ‡ तु. ऋ ७,१,७ भाष्यम्. २-२. नास्ति मूको. ३. इन्द्रासोमा अ[1]. ४. बले अ[1]; अन्यत्र बलौ; स्थलौ वा ल प्रस्तावः. ५. °जमाना° मूको. ६-६. प्रत्यस्माम् वि[2] अ[1]; अस्मात् प्र° क छम. ७. दोग्धृन् वि[2] अ[1] ख; द्राद्धृन् लभ.

वेङ्कट० यः मां पक्वेन त्यक्तानृतेन मनसा चरन्तम् ऋजुभिः वदति अनृतैः वचोभिः, उदकानीव[1] आकाशवता पात्रेण सङ्गृहीतानि, यद्वा काशिमुष्टिः, असन्[2] भवतु असतस्य इन्द्र! वक्ता। 'यो मा[3] मोघं यातुधानेत्याह[4] (ऋ ७,१०४,१५) इति वक्ष्यति ॥ ८ ॥

ये पा॑कशं॒सं वि॒हर॑न्त॒ एवै॒र्ये वा॑ भ॒द्रं दू॒षय॑न्ति स्व॒धाभिः॑ ।
अह॑ये वा॒ तान् प्र॒ददा॑तु॒ सोम॒ आ वा॑ दधातु॒ निर्ऋ॑तेरु॒पस्थे॑ ॥ ९ ॥

ये । पा॒क॒ऽशं॒सम् । वि॒ऽहर॑न्ते । एवैः॑ । ये । वा॒ । भ॒द्रम् । दू॒षय॑न्ति । स्व॒धाभिः॑ ।
अह॑ये । वा॒ । तान् । प्र॒ऽददा॑तु । सोमः॑ । आ । वा॒ । द॒धा॒तु॒ । निःऽऋ॑तेः । उ॒पऽस्थे॑ ॥ ९ ॥

वेङ्कट० ये पक्वानां वचसां शंसितारम् विविधं हरन्ति गमनैः, ये वा भद्रम् माम् दूषयन्ति बलैः, तान् सर्पाय वा परिददातु सोमः, आ दधातु वा निर्ऋतेः उपस्थे ॥ ९ ॥

यो नो॒ रसं॒ दिप्स॑ति पि॒त्वो अ॑ग्ने॒ यो अश्वा॑नां॒ यो गवां॒ यस्त॒नूना॑म् ।
रि॒पुः स्ते॒नः स्ते॑य॒कृद् द॒भ्रमे॑तु॒ नि ष ही॑यतां त॒न्वा॒३॒॑ तना॑ च ॥ १० ॥

यः । नः॒ । रस॑म् । दिप्स॑ति । पि॒त्वः । अ॒ग्ने॒ । यः । अश्वा॑नाम् । यः । गवा॑म् । यः । त॒नूना॑म् ।
रि॒पुः । स्ते॒नः । स्ते॒य॒ऽकृत् । द॒भ्रम् । ए॒तु॒ । नि । सः । ही॒य॒ता॒म् । त॒न्वा॑ । तना॑ । च॒ ॥ १० ॥

वेङ्कट० यः अस्माकम् अन्नस्य रसम् विनाशयति अग्ने!, यः चाश्वादीनाम् रिपुः स्तेनः स्तेयस्य कर्ता भवति, सः दभ्रम् एतु दभ्रत्वं प्राप्नोतु अल्पो भवतु। नि हीयताम् च सः आत्मना पुत्रेण च, यद्वा पुत्रेण धनेन चेति ॥ १० ॥

[5]इति पञ्चमाष्टके सप्तमाध्याये षष्ठो वर्गः[5] ॥

प॒रः सो अ॑स्तु त॒न्वा॒३॒॑ तना॑ च ति॒स्रः पृ॑थि॒वीर॒धो अ॑स्तु॒ विश्वाः॑ ।
प्रति॑ शुष्यतु॒ यशो॑ अस्य देवा॒ यो नो॒ दिवा॒ दिप्स॑ति॒ यश्च॒ नक्त॑म् ॥ ११ ॥

प॒रः । सः । अ॒स्तु॒ । त॒न्वा॑ । तना॑ । च॒ । ति॒स्रः । पृ॒थि॒वीः । अ॒धः । अ॒स्तु॒ । विश्वाः॑ ।
प्रति॑ । शु॒ष्य॒तु॒ । यशः॑ । अ॒स्य॒ । दे॒वाः॒ । यः । नः॒ । दिवा॑ । दिप्स॑ति । यः । च॒ । नक्त॑म् ॥ ११ ॥

वेङ्कट० परस्ताद् भवतु सः आत्मना पुत्रेण च। तथा तिस्रः च पृथिवीः सर्वाः अधस्तात् अस्तु। प्रति शुष्यतु च अस्य यशः कीर्तिः अन्नं वा हे देवाः! । यः नः इति स्पष्टम् ॥ 11 ॥

सु॒वि॒ज्ञा॒नं चि॑कि॒तुषे॒ जना॑य॒ सच्चास॑च्च॒ वच॑सी पस्पृधाते ।
तयो॒र्यत् स॒त्यं य॑त॒रदृजी॑य॒स्तदित् सोमो॑ऽवति॒ हन्त्यास॑त् ॥ १२ ॥

---

१. कक्षानीव स लभ; उज्ञानीव वि' अ'. २. असद् वि' अ'. ३. नास्ति मूको. ४. मानोति अ' लभ. ५-५. नास्ति मूको.

सुऽविज्ञानम् । चिकितुषे । जनाय । सत् । च । असत् । च । वचसी इति । पस्पृधाते इति ।
तयोः । यत् । सत्यम् । यतरत् । ऋजीयः । तत् । इत् । सोमः । अवति । हन्ति । असत् ॥१२॥

वेङ्कट० सुविज्ञानम् चिकितुषे जनाय इति विद्वांसम् आत्मानम् आह। तस्मै मह्यं सत्यम् असत्यम् च वचसी स्पर्धमाने भवत। केचिन्मां यातुधान इति वदन्ति न तथेत्यपरे। ते वचने मिथः स्पर्धयेते[1] किमिदम् सत्यम् उतेदमिति। तयोः वचसोः यत् सत्यम् 'यतरत् च ऋजुतरम् अनृतवर्जितम्'[2] तत् एव सोम रक्षति, तथा स्थापयति। हन्ति असत्यमिति ॥ १२ ॥

न वा उ सोमो वृजिनं हिनोति न क्षत्रियं मिथुया धारयन्तम् ।
हन्ति रक्षो हन्त्यासद्वदन्तमुभाविन्द्रस्य प्रसितौ शयाते ॥ १३ ॥

न । वै । ऊँ इति । सोमः । वृजिनम् । हिनोति । न । क्षत्रियम् । मिथुया । धारयन्तम् ।
हन्ति । रक्षः । हन्ति । असत् । वदन्तम् । उभौ । इन्द्रस्य । प्रऽसितौ । शयाते इति ॥ १३ ॥

वेङ्कट० न एव सोम पापकारिणं विसृजति न अपि क्षत्रियम् असत्यम् धारयन्तम्। किं तर्हि करोति। हन्ति रक्ष, हन्ति च असत्यम् वदन्तम्[3]। उभौ इन्द्रस्य जालेन परिगृहीतौ वदन्त. शयाते ॥ १३ ॥

यदि वाहमनृतदेव आस मोघं वा देवाँ अप्यूहे अग्ने ।
किमस्मभ्यं जातवेदो हृणीषे द्रोघवाचस्ते निर्ऋथं सचन्ताम् ॥ १४ ॥

यदि । वा । अहम् । अनृतऽदेवः । आस । मोघम् । वा । देवान् । अपिऽऊहे । अग्ने ।
किम् । अस्मभ्यम् । जातऽवेदः । हृणीषे । द्रोघऽवाचः । ते । निःऽऋथम् । सचन्ताम् ॥१४॥

वेङ्कट० यदि वा अहम् अनृतदेव भवामि। असत्येन य क्रीडति सोऽनृतदेव। मोघम् वा देवान् अपिनयामि[4] अग्ने! असत्यम्[5] निवेदयामि देवेभ्य, तत् त्वं जानासीति वाक्यशेष। नाहं तथाविध। तथा सति किम् अस्मभ्यम् जातवेद![6] क्रुध्यसि। द्रोघवाच राक्षसा तव निर्ऋथम् सेवन्ताम्। यां त्व निर्ऋतिम् उत्पादयसि[7] तां प्राप्नुवन्त्विति ॥ १४ ॥

अद्या मुरीय यदि यातुधानो अस्मि यदि वायुस्ततप पूरुषस्य ।
अधा स वीरैर्दशभिर्वि यूया यो मा मोघं यातुधानेत्याह ॥ १५ ॥[8]

अद्य । मुरीय । यदि । यातुऽधानः । अस्मि । यदि । वा । आयुः । ततप । पुरुषस्य ।
अध । सः । वीरैः । दशऽभिः । वि । यूयाः । यः । मा । मोघम् । यातुऽधान । इति । आह ॥

---

१ स्पर्धयेते मूको. २ 'तरचानृतमशर्जित° वि[1] अ[1], 'तरथानृमेव अपार्जि' रु लक्ष ३. वदन्तौ वि[1] अ[1] ४ नयानि मूको. ५ सत्यं रु ६ जातवेदस वि[1] अ[1], °वेदसं रुक्ष. ७. उत्पादयसि वि[1], उत्पादयति अ[1] क लक्ष. ८. तु. या ७,३

वेङ्कट० अद्य एवाहं म्रियेय यदि अहम् यातुधानः अस्मि, यदि वा राक्षसो भूत्वा पुरुषस्य आयुः जीवितम् अहम् ततप । अथ सः च वीरैः पुत्रैः दशभिः पृथक्कृतो भवतु, यः मा अनृतमेव यातुधान! इति वदति ॥ १५ ॥

[1]इति पञ्चमाष्टके सप्तमाध्याये सप्तमो वर्गः[1] ॥

यो मायातुं यातुधानेत्याह यो वा रक्षाः शुचिरस्मीत्याह ।
इन्द्रस्तं हन्तु महता वधेन विश्वस्य जन्तोरधमस्पदीष्ट ॥ १६ ॥

यः । मा । अयातुम् । यातुऽधान । इति । आह । यः । वा । रक्षाः । शुचिः । अस्मि । इति । आह ।
इन्द्रः । तम् । हन्तु । महता । वधेन । विश्वस्य । जन्तोः । अधमः । पदीष्ट ॥ १६ ॥

वेङ्कट० [2]यः माम् अहिंसकम् यातुधान! इति वदति, यः वा स्वैरं राक्षसः शुचिः अहम् अस्मि इति वदति, इन्द्रः तम् हन्तु महता वधेन। सः विश्वस्य जन्तोः अधमः पततु †सर्वस्याधः भवतु† इति[2] ॥ १६ ॥

प्र या जिगाति खर्गलेव नक्तमप द्रुहा तन्वं१ गूहमाना ।
वव्राँ अनन्ताँ अव सा पदीष्ट ग्रावाणो घ्नन्तु रक्षस उपब्दैः ॥ १७ ॥

प्र । या । जिगाति । खर्गलाऽइव । नक्तम् । अप । द्रुहा । तन्वम् । गूहमाना ।
वव्रान् । अनन्तान् । अव । सा । पदीष्ट । ग्रावाणः । घ्नन्तु । रक्षसः । उपब्दैः ॥ १७ ॥

वेङ्कट० [3]प्र गच्छति[3] या नक्तम् । खर्गलेत्युलूकीमाहुः । उलूकीव‡ नक्तम्[3] द्रोहार्थं मनुष्याणां शरीरम् अप[4] गूहमाना, सा अपर्यन्तान् कूपान् अव पदीष्ट कूपेष्ववाङ्[5] पततत्वगाधेषु । ग्रावाणः घ्नन्तु राक्षसान् शब्दैः ॥ १७ ॥

वि तिष्ठध्वं मरुतो विक्ष्वि१च्छत गृभायत रक्षसः सं पिनष्टन ।
वयो ये भूत्वी पतयन्ति नक्तभिर्ये वा रिपो दधिरे देवे अध्वरे ॥ १८ ॥

वि । तिष्ठध्वम् । मरुतः । विक्षु । इच्छत । गृभायत । रक्षसः । सम् । पिनष्टन ।
वयः । ये । भूत्वी । पतयन्ति । नक्तऽभिः । ये । वा । रिपः । दधिरे । देवे । अध्वरे ॥ १८ ॥

वेङ्कट० विविधं गच्छत[6] हे मरुतः! । प्रजासु हविः इच्छत । तदनन्तरं रक्षांसि गृह्णीत । तानि च चूर्णयत । पक्षिणः[7] भूत्वा ये रात्रिभिः पतयन्ति, ये वा पापानि[8] उत्पादयन्ति देवनशीले यज्ञे, तान् रक्षसः[9] इति ॥ १८ ॥

१-१. नास्ति मूको. २-२. नास्ति वि[1] अ[1]. †-† °स्याद् मर-द मूको ३-३. नास्ति वि[1] अ[1]. † यस्य° ल लभ. ‡ °कीमिव मूको. ४. उप वि[1] अ[1]. ५. °वाङ् वि[1] अ[1]. ६. गच्छ अ[1] लभ, गच्छथ वि[1] ल. ७. पक्षिणः मूको. ८. पापानि मको. ९. राक्षस. ल लभ.

प्र वर्तय दिवो अश्मानमिन्द्र सोमशितं मघवन्त्सं शिशाधि ।
प्राक्तादपाक्तादधरादुदक्तादभि जहि रक्षसः पर्वतेन ॥ १९ ॥

प्र । वर्तय । दिवः । अश्मानम् । इन्द्र । सोमऽशितम् । मघऽवन् । सम् । शिशाधि ।
प्राक्तात् । अपाक्तात् । अधरात् । उदक्तात् । अभि । जहि । रक्षसः । पर्वतेन ॥ १९ ॥

वेङ्कट० प्र वर्तय दिवः अश्मानम् इन्द्र! वज्रम् । इन्द्र! पीतेन सोमेन शितमात्मीयं[1] वज्रं निशितीकुरु[2] । वज्रेण प्राच्याः प्रतीच्याः अधरात् उत्तरतश्च[3] अभि जहि राक्षसान् ॥ १९ ॥

एत उ त्ये पतयन्ति श्वयातव इन्द्रं दिप्सन्ति दिप्सवोऽदाभ्यम् ।
शिशीते शक्रः पिशुनेभ्यो वधं नूनं सृजदशनिं यातुमद्भ्यः ॥ २० ॥

एते । ऊँ इति । त्ये । पतयन्ति । श्वऽयातवः । इन्द्रम् । दिप्सन्ति । दिप्सवः । अदाभ्यम् ।
शिशीते । शक्रः । पिशुनेभ्यः । वधम् । नूनम् । सृजत् । अशनिम् । यातुमत्ऽभ्यः ॥ २० ॥

वेङ्कट० ते एते पतयन्ति[4] श्वयातवः, इन्द्रम् च[5] दिप्सन्ति दम्भितुमिच्छन्तः शत्रुभिरभिभवितुमशक्यम्[6] । अथ इन्द्रश्च तीक्ष्णीकरोति शक्रः राक्षसेभ्यः वज्रम् । स क्षिप्रं विसृजतु अशनिम् हिंसावद्भ्यः[7] ॥ २० ॥

'इति पञ्चमाष्टके सप्तमाध्याये अष्टमो वर्गः' ॥

इन्द्रो यातूनामभवत् पराशरो हविर्मथीनामभ्याविवासताम् ।
अभीदु शक्रः परशुर्यथा वनं पात्रेव भिन्दन्त्सत एति रक्षसः ॥ २१ ॥

इन्द्रः । यातूनाम् । अभवत् । पराऽशरः । हविःऽमथीनाम् । अभि । आऽविवासताम् ।
अभि । इत् । ऊँ इति । शक्रः । परशुः । यथा । वनम् । पात्राऽइव । भिन्दन् । सतः ।
एति । रक्षसः ॥ २१ ॥

वेङ्कट० 'इन्द्रोऽपि पराशर उच्यते । परा शातयिता यातूनाम्' इति यास्कः (६, २०) । इन्द्रः यातूनाम् हविर्मथीनाम् आभिमुख्येन सञ्चरताम् अभिभवं करोति । अभि एव गच्छति शक्रः, परशुः यथा वनम् अभिगच्छति, पात्राणि इव भिन्दन् मृन्मयान्यपक्वानि, विद्यमानान्[9] प्रादुर्भूतान्[10] राक्षसान्[11] । पुंलिङ्गश्च रक्षश्शब्दो दृष्ट इति ॥ २१ ॥

---

१ शीत° मूको. २ निशीती° मूको. ३. उदक् च वि' ल लभ; उत्तरश्च अ'. ४. पतन्ति मूको. ५. नास्ति वि' अ'. ६. आभिभवितुं शत्रुभिः अशक्य° अ'; शत्रुभिभि° वि'. ७. अहिंसा° वि' ल अहिंसापद्य अ' लभ. ८-८. नास्ति मूको. ९. °माना वि' अ'. १०. °ताद् वि' अ'. ११. रक्षसाम् वि' अ'.

उलूकयातुं शुशुलूकयातुं जहि श्वयातुमुत कोकयातुम् ।
सुपर्णयातुमुत गृध्रयातुं दृषदेव प्र मृण रक्ष इन्द्र ॥ २२ ॥

उलूकऽयातुम् । शुशुलूकऽयातुम् । जहि । श्वऽयातुम् । उत । कोकऽयातुम् ।
सुपर्णऽयातुम् । उत । गृध्रऽयातुम् । दृषदाऽइव । प्र । मृण । रक्षः । इन्द्र ॥ २२ ॥

वेङ्कट० उलूकादयो रात्रिञ्चराः प्राणिनो[1] हिंसकाः । येषां हिंसासाधनानि भवन्ति ते तयोक्ता इति । एतान् दृषदुपलाभ्यामिव व्रीह्यादिकं संचूर्णय इन्द्र ! इति ॥ २२ ॥

मा नो रक्षो अभि नड् यातुमावतामपोच्छतु मिथुना या किमीदिना ।
पृथिवी नः पार्थिवात् पात्वंहसोऽन्तरिक्षं दिव्यात् पात्वस्मान् ॥ २३ ॥

मा । नः । रक्षः । अभि । नट् । यातुऽमावताम् । अप । उच्छतु । मिथुना । या । किमीदिना ।
पृथिवी । नः । पार्थिवात् । पातु । अंहसः । अन्तरिक्षम् । दिव्यात् । पातु । अस्मान् ॥ २३ ॥

वेङ्कट० 'रक्षः रक्षितव्यमस्मात्' (या ४,१८) इत्युक्तम् । मा अस्मान् अभि व्याप्नोतु हिंसावतां बलम् । पृथक् करोतु मिथुनानि किमिदं किमिदमित्याचरन्ति राक्षसानाम् । तानिन्द्रोऽपोहतु । पृथिवी नः इति स्पष्टम् ॥ २३ ॥

इन्द्र जहि पुमांसं यातुधानमुत स्त्रियं मायया शाशदानाम् ।
विग्रीवासो मूरदेवा ऋदन्तु मा ते दृशन्त्सूर्यमुच्चरन्तम् ॥ २४ ॥

इन्द्र । जहि । पुमांसम् । यातुऽधानम् । उत । स्त्रियम् । मायया । शाशदानाम् ।
विऽग्रीवासः । मूरऽदेवाः । ऋदन्तु । मा । ते । दृशन् । सूर्यम् । उत्ऽचरन्तम् ॥ २४ ॥

वेङ्कट० इन्द्र ! जहि पुमांसम् यातुधानम् अपि च स्त्रियम् तेन सहाऽऽगच्छन्तीम् मायया प्रजाः पीडयन्तीम् । विगतग्रीवाः[2] मूरदेवाः मरणक्रीडा राक्षसाः । ऋदति[3] गमनकर्मा नाशकर्मा[4] वा । गच्छन्तु नश्यन्तु चेति । मा ते द्राक्षुः सूर्यम् उद्यन्तम् ॥ २४ ॥

प्रति चक्ष्व वि चक्ष्वेन्द्रश्च सोम जागृतम् ।
रक्षोभ्यो वधमस्यतमशनिं यातुमद्भ्यः ॥ २५ ॥

प्रति । चक्ष्व । वि । चक्ष्व । इन्द्रः । च । सोम । जागृतम् ।
रक्षःऽभ्यः । वधम् । अस्यतम् । अशनिम् । यातुमत्ऽभ्यः ॥ २५ ॥

---

१. °णिनो रु; °णिना लभ. २. विगतग्रीवो वि° अ°; °तग्रीवा रु लभ. ३. ऋषदिति: वि° अ°; ऋदितिः रु लभ. ४. नास्ति लभ.

वेङ्कट० प्रति पश्य वि पश्य इन्द्रः त्वं च सोम।[1], युवाम्[2] जागरणं कुरुतम्[3]। रक्षोभ्यः हन्तारम् आयतम् अशनिम् हिंसावद्भ्यः इति ॥ २५ ॥

[4]इति पञ्चमाष्टके सप्तमाध्याये नवमो वर्गः[4] ॥

इति ऋग्वेदे सभाष्ये सप्तमं मण्डलं समाप्तम् ॥

---

१. मरप वि[1] अ[1]. २. नास्ति वि[1] अ[1] ३. इन्द्रः मूको. ४-४. नास्ति मूको,

अथ

ऋग्वेदे सभाष्ये

अष्टमं मण्डलम्

[१]

[1]प्रथमाद्वितीययोः प्रगाथो घौरः काण्व ऋषिः, त्रिंश्यादित्रयस्त्रिंश्यन्तानां प्लायोगिरासङ्गः, अन्त्याया आङ्गिरसी शश्वती, शिष्टानाम् मेधातिथि-मेध्यातिथी काण्वौ। इन्द्रो देवता, अन्त्यानां पञ्चानाम् आसङ्गः। आद्यानां चतसृणां प्रगाथश्छन्दः (विषमे बृहत्यौ, समे सतोबृहत्यौ), अन्त्ये द्वे त्रिष्टुभौ, शिष्टा बृहत्यः[1]।

मा चि॑द॒न्यद् वि शं॑सत॒ सखा॑यो॒ मा रि॑षण्यत ।
इन्द्र॒मित् स्तो॑ता॒ वृष॑णं॒ सचा॑ सु॒ते मुहु॑रु॒क्था च॑ शंसत ॥ १ ॥

मा । चि॒त् । अ॒न्यत् । वि । शं॒स॒त॒ । सखा॑यः । मा । रि॒ष॒ण्य॒त॒ ।
इन्द्र॑म् । इत् । स्तो॒त॒ । वृष॑णम् । सचा॑ । सु॒ते । मुहुः॑ । उ॒क्था । च॒ । शं॒स॒त॒ ॥ १ ॥

वेङ्कट० शौनकः— 'कण्वश्चैव प्रगाथश्च घोरपुत्रौ[2] बभूवतुः ।
गुरुणा तावनुज्ञातावूषतुः सहितौ वने ॥

वसतोस्तु तयोस्तत्र कण्वपत्न्याः शिरः स्वपन्[3] ।
कृत्वा कनीयान् कण्वस्य उत्सङ्गे नान्वबुध्यत[4] ॥

शप्तुकामस्तु तं कण्वः क्रुद्धः पापाभिशङ्कया ।
बोधयामास पादेन दिधक्षन्निव तेजसा ॥

विदित्वा तस्य तं भावं प्रगाथः प्राञ्जलिः स्थितः ।
मातृत्वे च पितृत्वे च वरयामास तावुभौ ॥

स घौरो[5] वाऽथ काण्वो[6] वा वंशजैर्बहुभिः सह ।
ददर्शान्यैश्च सहित मृषिर्मण्डलमष्टमम्[7]' (बृदे ६,३५-३९) इति ॥

तत्राद्यं द्वृचं प्रगाथोऽपश्यत्। अवशिष्टस्य मेधातिथिर्मेध्यातिथिश्च द्रष्टारौ। 'स्तुहि स्तुहि'

१-१. नास्ति मूको. २. घोरपु॰ मूको. ३. स्वपन् मूको. ४. ॰बुध्यत मूको. ५. घौरो मूको. ६. काण्वो मूको. ७. ॰ष्टकम् मूको.

इत्यादीनां चतसृणाम् आसङ्गो नाम प्रायोगिः । तस्य पत्नी[1] स्वन्त्यामृचमपश्यत् । 'प्राग्गत्स्यादः मुक्तगोत्रः काण्वो वेदितव्यः' (तु. ऋअ ८,१,१) इति ।

मा चित् इन्द्रात् अन्यत् वि शंसत । हे सखायः! मा विनष्टा भवत । इन्द्रम् एव स्तुत वर्षितारम्[2] सङ्गताः सुते सोमे । मुहुः शस्त्राणि च तस्मै शंसत ॥ १ ॥

अवक्रक्षिणं वृषभं यथाजुरं गां न चर्षणीसहम् ।
विद्वेषणं संवननोभयंकरं मंहिष्ठमुभयाविनम् ॥ २ ॥

अवऽक्रक्षिणम् । वृषभम् । यथा । अजुरम् । गाम् । न । चर्षणिऽसहम् ।
विऽद्वेषणम् । सम्ऽवनना । उभयम्ऽकरम् । मंहिष्ठम् । उभयाविनम् ॥ २ ॥

वेङ्कट० अवकर्षणशीलम्[3] वृषभम् इव अजीर्णम् गाम् इव चर्षणीनां सोढारम् विद्वेषणम् संवननम्[4] उभयस्य कर्तारम् दातृतमम् हिंसानुशंसाभ्यां तद्वन्तम् । पूर्वेण सम्बन्धः ॥ २ ॥

यच्चिद्धि त्वा जना इमे नाना हवन्त ऊतये ।
अस्माकं ब्रह्मेदमिन्द्र भूतु तेऽहा विश्वा च वर्धनम् ॥ ३ ॥

यत् । चित् । हि । त्वा । जनाः । इमे । नाना । हवन्ते । ऊतये ।
अस्माकम् । ब्रह्म । इदम् । इन्द्र । भूतु । ते । अहा । विश्वा । च । वर्धनम् ॥ ३ ॥

वेङ्कट० यत् चित् हि त्वा जनाः इमे नाना हवन्ते[5] रक्षणाय, तथापि अस्माकम् इदम्[6] स्तोत्रम् इन्द्र! भवतु ते अहानि च सर्वाणि सौमिकानि वर्धमानानीति ॥ ३ ॥

वि तर्तूर्यन्ते मघवन् विपश्चितोऽर्यो विपो जनानाम् ।
उप क्रमस्व पुरुरूपमा भर वाजं नेदिष्ठमूतये ॥ ४ ॥

वि । तर्तूर्यन्ते । मघऽवन् । विपःऽचितः । अर्यः । विपः । जनानाम् ।
उप । क्रमस्व । पुरुऽरूपम् । आ । भर । वाजम् । नेदिष्ठम् । ऊतये ॥ ४ ॥

वेङ्कट० उपद्रवेभ्यः वि तर्तूर्यन्ते विशेषेण तार्यन्ते[7] मघवन्! त्वया विपश्चितः अभिगन्तारः मेधाविनः जनानाम् मध्ये । तथा सति उप गच्छ, पुरुरूपम् च आ हर अन्नम् सवासन्नतमम् अस्माकं रक्षणाय ॥ ४ ॥

महे चन त्वामद्रिवः परा शुल्काय देयाम् ।
न सहस्राय नायुताय वज्रिवो न शताय शतामघ ॥ ५ ॥

---

१. नास्ति मूको. २. °तारः मूको. ३. वृषक° मूको. ४. °ननम् इति मूको. ५. वहन्ते मूको. ६. इन्द्रं मूको. ७. तार्यन्ते मूको.

म॒हे । च॒न । त्वाम् । अ॒द्रि॒ऽवः॒ । परा॑ । शु॒ल्काय॑ । दे॒या॒म् ।
न । स॒हस्रा॑य । न । अ॒युता॑य । व॒ज्रि॒ऽवः॒ । न । श॒ताय॑ । श॒त॒ऽम॒घ॒ ॥ ५ ॥

वेङ्कट॰ महते खलु वज्रिन्! त्वाम् मूल्याय परा दद्याम् क्रीणानाय [1]विक्रीणानः, न तु[1] सहस्राय [2]दद्याम्, न अपि अयुताय वज्रवन्!, न अपि[2] शताय बहुधन! ॥ ५ ॥

[3]इति पञ्चमाष्टके सप्तमाध्याये दशमो वर्गः[3] ॥

वस्याँ॑ इन्द्रासि मे पि॒तुरु॒त भ्रातु॒रभु॑ञ्जतः ।
मा॒ता च॑ मे छदयथः स॒मा व॑सो वसुत्व॒नाय॒ राध॑से ॥ ६ ॥

वस्या॑न् । इ॒न्द्र॒ । अ॒सि॒ । मे॒ । पि॒तुः । उ॒त । भ्रातुः॑ । अभु॑ञ्जतः ।
मा॒ता । च॒ । मे॒ । छ॒द॒य॒थः॒ । स॒मा । व॒सो॒ इति॑ । व॒सु॒ऽत्व॒नाय॑ । राध॑से ॥ ६ ॥

वेङ्कट॰ वस्यान् ननु इन्द्र! असि मम पितुः अपि च भ्रातुः अपालयतः । नहि तौ रक्षतः, यथा त्वं रक्षसीति । मम माता त्वम् च ममोपच्छन्दनं कुरुथः समानौ[4] हे वासयितः! वसुमत्त्वार्थम् धनार्थं च । उभये प्रयच्छथ इत्यर्थः ॥ ६ ॥

क्वे॑यथ॒ क्वेद॑सि पुरु॒त्रा चि॒द्धि ते॒ मनः॑ ।
अल॑र्षि युध्म खजकृत् पुरंदर॒ प्र गा॑य॒त्रा अ॑गासिषुः ॥ ७ ॥

क्व॑ । इ॒य॒थ॒ । क्व॑ । इत् । अ॒सि॒ । पु॒रु॒ऽत्रा । चि॒त् । हि । ते॒ । मनः॑ ।
अल॑र्षि । यु॒ध्म॒ । ख॒ज॒ऽकृ॒त् । पु॒र॒म्ऽद॒र॒ । प्र । गा॒य॒त्राः । अ॒गा॒सि॒षुः॒ ॥ ७ ॥

वेङ्कट॰ क्व गतवानसि । क्व सम्प्रति भवसि । बहुषु हि स्थानेषु ते मनः भवति । परितो गच्छसि । अर्तेः चर्करीतम्[5] । हे युद्धकुशल! सङ्ग्रामस्य कर्तः! पुराणां दारयितः! । प्र अगासिषुः त्वां[6] गायत्रिण उद्गातारः ॥ ७ ॥

प्रास्मै॑ गाय॒त्रम॑र्चत वा॒वातु॒र्यः पु॑रंद॒रः ।
याभिः॑ का॒ण्वस्योप॑ ब॒र्हिरा॒सदं॒ यास॑द् व॒ज्री भि॒नत् पुरः॑ ॥ ८ ॥

प्र । अ॒स्मै॒ । गा॒य॒त्रम् । अ॒र्च॒त॒ । व॒वातुः॑ । यः । पु॒र॒म्ऽद॒रः ।
याभिः॑ । का॒ण्वस्य॑ । उप॑ । ब॒र्हिः । आ॒ऽसद॑म् । यास॑त् । व॒ज्री । भि॒नत् । पुरः॑ ॥ ८ ॥

वेङ्कट॰ प्र उच्चारयत इन्द्राय गायनम् साम, गमनशीलः यः पुरां [7]दारयिता । याभिः[7] काण्वस्य मेधातिथेः बर्हिः उप याति[8] तदासनार्थम्, वज्री भिनत्ति च पुरीः, [9]तास्वृक्षु गायत्रमिति[9] ॥ ८ ॥

१-१. °णानोऽस्तु मूको. २-२. मचात्वान्त्रुपुनरवत्तूपता मूको. ३-३. नास्ति मूको. ४. समानो मूको. ५. चरितम् मूको. ६. त्वम् अ[1]. ७-७. °यितरभि वि[२]; °यितााभि अ[1]. ८. °यात मूको. ९-९. ताः स्वृयोऽभि° वि[1]; ताः स्वृग्गायनि अ[1].

ये ते सन्ति दशग्विनः शतिनो ये सहस्रिणः ।
अश्वासो ये ते वृषणो रघुद्रुवस्तेभिर्नस्तूयमा गहि ॥ ९ ॥

ये । ते । सन्ति । दशऽग्विनः । शतिनः । ये । सहस्रिणः ।
अश्वासः । ये । ते । वृषणः । रघुऽद्रुवः । तेभिः । नः । तूयम् । आ । गहि ॥ ९ ॥

वेङ्कट० ये ते भवन्ति दशादिसङ्ख्यायुक्ताः, बहव इत्यर्थः, अश्वाः, ये ते वृषणः क्षिप्रगामिनः, तैः अस्मान् क्षिप्रम् आ गच्छ ॥ ९ ॥

आ त्व१द्य सबर्दुघां हुवे गायत्रवेपसम् ।
इन्द्रं धेनुं सुदुघामन्यामिषमुरुधारामरंकृतम् ॥ १० ॥

आ । तु । अद्य । सबःऽदुघाम् । हुवे । गायत्रऽवेपसम् ।
इन्द्रम् । धेनुम् । सुऽदुघाम् । अन्याम् । इषम् । उरुऽधाराम् । अरम्ऽकृतम् ॥ १० ॥

वेङ्कट० आ ह्वयामि क्षिप्रम् अद्य अमृतस्य दोग्ध्रीम्, गायत्रं साम यस्याः धेनोर्वेगमुत्पादयति[1]। इन्द्रम् धेनुम् सुदुघाम् अन्याम् इषम्। यथा '[2]प्रत्यक्षमन्नमेवमिन्द्रश्चान्यदन्नं[2] भवति, तस्यान्यभिचारेण[3] दानात्, महाधारां पर्याप्तकारिणीम्[4] ॥ १० ॥

[5]इति पञ्चमाष्टके सप्तमाध्याये एकादशो वर्गः[5] ॥

यत् तुदत् सूर एतशं वङ्कू वातस्य पर्णिना ।
वहत् कुत्समार्जुनेयं शतक्रतुः त्सरद् गन्धर्वमस्तृतम् ॥ ११ ॥

यत् । तुदत् । सूरः । एतशम् । वङ्कू इति । वातस्य । पर्णिना ।
वहत् । कुत्सम् । आर्जुनेयम् । शतऽक्रतुः । त्सरत् । गन्धर्वम् । अस्तृतम् ॥ ११ ॥

वेङ्कट० यदा तुदत् सूर्यो देवः एतशम्[6] ऋषिम्, तदानीम् वङ्कू "[7]वङ्कुतरौ चाश्वौ[7]" वातस्य सदृशेन पतनेन तद्गन्तो कुत्सम् अर्जुन्याः पुत्रं प्रति अवहत्[8] शतक्रतुः। अथ कुत्सेन सहाभ्यगच्छत् आदित्यम् अन्यैरहिंसितम् एतशं तस्मादक्षितुम् (तु. ऋ १,६१,१५) ॥ ११ ॥

य ऋते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः ।
संधाता संधिं मघवा पुरूवसुरिष्कर्ता विह्रुतं पुनः ॥ १२ ॥

यः । ऋते । चित् । अभिऽश्रिषः । पुरा । जत्रुऽभ्यः । आऽतृदः ।
सम्ऽधाता । सम्ऽधिम् । मघऽवा । पुरुऽवसुः । इष्कर्ता । विऽह्रुतम् । पुनरिति ॥ १२ ॥

---

१. 'वन्ति मूको. २. "प्रमन्नमिन्द्रश्चेत्यन्य" भ[१]. ३. स्यादभिचा° भ[१]. ४. पर्याप्ति° भ.
५-५. नास्ति मूको. ६. एवम् मूको. ७-७. °तरं पावको मूको. ८. प्रत्यगात् मूको.

वेङ्कट० यः विनापि अभिश्लेषेण श्लेष्मणा। येन विच्छिन्नः पुनः सन्धीयते तच्छ्लेष्म, तेन विनापि पुरा एव जत्रूणां[1] मर्दनात्[2]। जत्रवो[3] ग्रीवाः। विच्छिन्नस्य[4] शिरसो यावदातृण्णात्[5] लोहितं निरस्यति ततः प्रागेव सन्धातुं शक्तः सन्धेयं शिरः मघवा बहुधनः तथा निह्रुतम् शिथिलीकृतमपि पुनः संस्कर्तेति ॥ १२ ॥

मा भूम निष्ट्या इवेन्द्र त्वदरणा इव ।
वनानि न प्रजहितान्यद्रिवो दुरोषासो अमन्महि ॥ १३ ॥

मा । भूम । निष्ट्याःऽइव । इन्द्र । त्वत् । अरणाःऽइव ।
वनानि । न । प्रऽजहितानि । अद्रिऽवः । दुरोषासः । अमन्महि ॥ १३ ॥

वेङ्कट० मा वयम् भूम नीचाः[6] इव इन्द्र!, मा च भूम अरमणाः इव[6] स्तोतारः, "मा च" वनानि इव इतरेतरविश्लिष्टानि[7] दवाग्निना। वज्रिन्! शत्रुभिर्दग्धुमशक्याः त्वां स्तुमः ॥ १३ ॥

अमन्महीदनाशवोऽनुग्रासश्च वृत्रहन् ।
सकृत् सु ते महता शूर राधसानु स्तोमं मुदीमहि ॥ १४ ॥

अमन्महि । इत् । अनाशवः । अनुग्रासः । च । वृत्रऽहन् ।
सकृत् । सु । ते । महता । शूर । राधसा । अनु । स्तोमम् । मुदीमहि ॥ १४ ॥

वेङ्कट० स्तुमः त्वाम् अशुत्वोद्गूर्णत्ववर्जिताः[8] शनैश्शनैः हे वृत्रहन्!। सकृत् सदैव सुष्ठु तुभ्यम् महता हविषा सह शूर! स्तोमम् च अनु ब्रूमः, प्रयच्छन्तो हविः स्तुमः[9] इति। मदिरित्यनुमुदितवचनकर्मेति[10] ॥ १४ ॥

यदि स्तोमं मम श्रवदस्माकमिन्द्रमिन्दवः ।
तिरः पवित्रं ससृवांस आशवो मन्दन्तु तुग्र्यावृधः ॥ १५ ॥

यदि । स्तोमम् । मम । श्रवत् । अस्माकम् । इन्द्रम् । इन्दवः ।
तिरः । पवित्रम् । ससृऽवांसः । आशवः । मन्दन्तु । तुग्र्यऽवृधः[11] ॥ १५ ॥

वेङ्कट० यदि स्तोमम् मदीयं शृणुयात्, अथ इन्द्रम् अस्माकम् सोमाश्च मन्दन्तु इति। स्तुतिं चेच्छृणोति पिबति सोममित्यर्थः। तिरः पवित्रम् ससृवांसः पूताः क्षिप्रं प्राप्नुवन्तः वसतीवरीभिरतिवृद्धाः[12]। 'तुग्र्या'[13] (निघ १,१२) इति उदकनामेति ॥ १५ ॥

[14]इति पञ्चमाष्टके सप्तमाध्याये द्वादशो वर्गः[14] ॥

---

१. जत्रुणा वि[1]. २. °मर्दनात् अ[1]; मर्दनान् वि[1]. ३. जत्रो मूको. ४. विच्छिन्नस्य अ[1]. ५. °तृणात् मूको. ६-६. इममाचार्यभरणा मूको. ७-७. किन्तु मूको. ८. °तराश्लि° ए. ९. °द्गूर्णत्वात्° मूको. १०-१०. इत्यनुमु° मूको. ११. तु. वैप १,१४८५ d. १२. °ऽतिवरीरिति वि[1]; °तीवरीति अ[1]. १३. तुग्रा मूको. १४-१४. नास्ति मूको.

आ त्व१॒द्य स॒धस्तु॑तिं वा॒वातुः॒ सख्यु॒रा ग॑हि ।
उप॑स्तुतिर्म॒घोनां॒ प्र त्वा॑वत्व॒धा॑ ते वश्मि सुष्टु॒तिम् ॥ १६ ॥

आ । तु । अ॒द्य । स॒धऽस्तु॑तिम् । व॒वातुः॑ । सख्युः॑ । आ । ग॒हि ।
उप॑ऽस्तुतिः । म॒घोना॑म् । प्र । त्वा॒ । अ॒व॒तु॒ । अध॑ । ते॒ । व॒श्मि॒ । सु॒ऽस्तु॒तिम् ॥ १६ ॥

वेङ्कट० आ गच्छ क्षिप्रम् अद्य यत्र सह स्तुवन्ति यशे प्रियतमस्य[1] सख्युः[1]। उपस्तुतिः हविष्मताम् प्र गच्छतु[2] त्वाम्। अथाहं च कामये तव सुस्तोत्रम् ॥ १६ ॥

सोता॒ हि सोम॒मद्रि॑भि॒रेमे॑नम॒प्सु धा॑वत ।
ग॒व्या वस्त्रे॑व वा॒सय॑न्त॒ इन्न॒रो निर्धु॑क्षन् व॒क्षणा॑भ्यः ॥ १७ ॥

सोत॑ । हि । सोम॑म् । अद्रि॑ऽभिः । आ । ई॒म् । ए॒न॒म् । अ॒प्ऽसु । धा॒व॒त॒ ।
ग॒व्या । वस्त्रा॑ऽइव । वा॒सय॑न्तः । इत् । नरः॑ । निः । धु॒क्ष॒न् । व॒क्षणा॑भ्यः ॥ १७ ॥

वेङ्कट० अभिषुणुत[3] सोमम् ग्रावभिः आ धावत एनम् अप्सु इति वसतीवरीभिः संसर्गमाह। तथा[4] कुर्वन्तः सोत। गव्यानि च सोममिश्रणानि सोमस्योपरि[5] वस्त्राणीव वासयन्तः मनुष्याः नि. धुक्षयन्ति सोमात् अद्भ्यः (तु. निघ १,१३)। तथा यूयं च कुरुतेति ॥ १७ ॥

अध॒ ज्मो अध॑ वा दि॒वो बृ॑ह॒तो रो॑च॒नादधि॑ ।
अ॒या व॑र्धस्व त॒न्वा॑ गि॒रा ममा जा॒ता सु॑क्रतो पृण ॥ १८ ॥

अध॑ । ज्मः । अध॑ । वा॒ । दि॒वः । बृ॒ह॒तः । रो॒च॒नात् । अधि॑ ।
अ॒या । व॒र्ध॒स्व॒ । त॒न्वा॑ । गि॒रा । मम॑ । आ । जा॒ता । सु॒क्र॒तो॒ इति॑ सुऽक्रतो । पृ॒ण॒ ॥ १८ ॥

वेङ्कट० पृथिव्या. अन्तरिक्षात् बृहतः रोचनात् दिवः वा 'आगत्य अनया' तायमानया मम स्तुत्या वर्धस्व, आ पूरय च हे सुक्रतो। जातानि भूतानि कामैः ॥ १८ ॥

इन्द्रा॑य सु म॒दिन्त॑मं॒ सोमं॑ सोता॒ वरे॑ण्यम् ।
श॒क्र ए॑णं पीपय॒द् विश्व॑या धि॒या हि॑न्वा॒नं न वा॑ज॒युम् ॥ १९ ॥

इन्द्रा॑य । सु । म॒दिन्ऽत॑मम् । सोम॑म् । सो॒त॒ । वरे॑ण्यम् ।
श॒क्रः । ए॒न॒म् । पी॒प॒य॒त् । विश्व॑या । धि॒या । हि॒न्वा॒नम् । न । वा॒ज॒ऽयुम् ॥ १९ ॥

वेङ्कट० इन्द्राय सुष्ठु मदयितारम् सोमम् सोत[7] वरणीयम्[8]। शक्रः एनम् वर्धयतु अभिषोतारं सर्वया प्रज्ञया यजमानं प्रीणयितारम् इदानीम् अन्नमिच्छमानम् ॥ १९ ॥

---

१. °यमस्य अ[1]. २. यच्छतु मूको. ३. अभिषुत मूको. ४. अथा मूको. ५. सोमस्यापरि मूको. ६-६. 'गत्याप वि[1]. ७. सोता वि[1]; सोतार अ[1]. ८. वरेण्यम् वि[1].

मा त्वा सोमस्य गल्दया सदा याचन्नहं गिरा ।
भूर्णिं मृगं न सवनेषु चुक्रुधं क ईशानं न याचिषत् ॥ २० ॥[1]

मा । त्वा । सोमस्य । गल्दया । सदा । याचन् । अहम् । गिरा ।
भूर्णिम् । मृगम् । न । सवनेषु । चुक्रुधम् । कः । ईशानम् । न । याचिषत् ॥ २० ॥

वेङ्कट० मा त्वा सोमस्य गल्दया, सोममिन्द्रस्य च उदरे प्रवेशयति यदा, तदा याचन् अहम् गिरा भरणशीलम् मृगम् सिंहम् इव दण्डताडनादिना सवनेषु चुक्रुधम् नैव क्रोधयेयम्[2]। कः हि ईशानम् धनानाम् न याचिषत् । 'आ त्वा विशन्त्विन्दव आ गल्दा धमनीनाम्'[3] (माश्रौ १, ७, ३, १८) इति मन्त्रः । तत्र गल्दा इन्दवो भवन्ति नाडीनां गालना-निवारणकर्तारः ॥ २० ॥

[4]इति पञ्चमाष्टके सप्तमाध्याये त्रयोदशो वर्गः[4] ॥

मदेनेषितं मदमुग्रमुग्रेण शवसा ।
विश्वेषां तरुतारं मदच्युतं मदे हि ष्मा ददाति नः ॥ २१ ॥

मदेन । इषितम् । मदम् । उग्रम् । उग्रेण । शवसा ।
विश्वेषाम् । तरुतारम् । मदऽच्युतम् । मदे । हि । स्म । ददाति । नः ॥ २१ ॥

वेङ्कट० मदेन प्रेरितम् मदम् उद्गूर्णम्- उद्गूर्णेन शवसा विश्वेषाम् शत्रूणां तारकम् मदस्य[5] प्रच्यावकम् सोमस्य पीतस्य मदे प्रयच्छति अस्मभ्यम् इन्द्रः[6]। पीत्वा सोमं मदम् अस्माकम् उत्पादयतीत्यर्थः ॥ २१ ॥

शेवारे वार्या पुरु देवो मर्ताय दाशुषे ।
स सुन्वते च स्तुवते च रासते विश्वगूर्तो अरिष्टुतः ॥ २२ ॥

शेवारे । वार्या । पुरु । देवः । मर्ताय । दाशुषे ।
सः । सुन्वते । च । स्तुवते । च । रासते । विश्वऽगूर्तः । अरिऽस्तुतः ॥ २२ ॥

वेङ्कट० सोमो[7] यज्ञः स्तोत्रं वा शेवारः, 'सुखं पर्याप्तं[8]' यस्मिन् भवतीति । सर्वैः स्तुतः विश्वगूर्तः । अरिभिरभिष्टुतः[9] । शिष्टं स्पष्टमिति ॥ २२ ॥

एन्द्र याहि मत्स्व चित्रेण देव राधसा ।
सरो न प्रास्युदरं सपीतिभिरा सोमेभिरुरु स्फिरम् ॥ २३ ॥

१. यास्केन (६,२४) व्याख्याता. २. क्रोधते वयम् अ[1]. ३. धवनीनाम् अ[1]. ४-४. नास्ति मूको. ५. मदनस्य मूको. ६. इन्द्र मूको. ७. सोमे मूको. ८-८. सुखपर्याप्तं मूको. ९. अरिहिरभिष्टुत मूको.

आ । इन्द्र । याहि । मत्स्व । चित्रेण । देव । राधसा ।
सरः । न । प्रासि । उदरम् । सपीतिऽभिः । आ । सोमेभिः । उरु । स्फिरम् ॥ २३ ॥

वेङ्कट० आ याहि [1]इन्द्र! मत्स्व[1] च चित्रेण देव!, सोमाख्येन । सरः इव आ पूरय आत्मीयम् उदरम् समानपानैरन्यैः सह देवैः सोमेभिः[2] विस्तीर्णं वृद्धम् । [3]स्फिरम् स्फायतेर्वृद्धिकर्मणः[3] ॥ २३ ॥

आ त्वा सहस्रमा शतं युक्ता रथे हिरण्यये ।
ब्रह्मयुजो हरय इन्द्र केशिनो वहन्तु सोमपीतये ॥ २४ ॥

आ । त्वा । सहस्रम् । आ । शतम् । युक्ताः । रथे । हिरण्यये ।
ब्रह्मऽयुजः । हरयः । इन्द्र । केशिनः । वहन्तु । सोमऽपीतये ॥ २४ ॥

वेङ्कट० मन्त्रैर्युक्ताः ब्रह्मयुजः[4] । शिष्टं स्पष्टम् ॥ २४ ॥

आ त्वा रथे हिरण्यये हरी मयूरशेप्या ।
शितिपृष्ठा वहतां मध्वो अन्धसो विवक्षणस्य पीतये ॥ २५ ॥

आ । त्वा । रथे । हिरण्यये । हरी इति । मयूरऽशेप्या ।
शितिऽपृष्ठा । वहताम् । मध्वः । अन्धसः । विवक्षणस्य । पीतये ॥ २५ ॥

वेङ्कट० आ वहताम् त्वाम् रथे हिरण्मये अश्वौ मयूररोमाणौ । शेपतिर्निर्गमनकर्मा[5] । श्वेतपृष्ठौ मदकरस्य सोमस्य वहनशीलस्य पानाय ॥ २५ ॥

[6]इति पञ्चमाष्टके सप्तमाध्याये चतुर्दशो वर्गः[6] ॥

पिबा त्वस्य गिर्वणः सुतस्य पूर्वपा इव ।
परिष्कृतस्य रसिन इयमासुतिश्चारुर्मदाय पत्यते ॥ २६ ॥

पिब । तु । अस्य । गिर्वणः । सुतस्य । पूर्वपाःऽइव ।
परिऽकृतस्य । रसिनः । इयम् । आऽसुतिः । चारुः । मदाय । पत्यते ॥ २६ ॥

वेङ्कट० [7]पिब क्षिप्रम् अमुं[7] हे गीर्भिर्वननीय! सुतम् पूर्वपाः इव यथा तदादि प्रथमं[8] पिबति तद्वत् । संस्कृतस्य अङ्गिरेण रसवतः इयम् आसूयमाना प्रेर्यमाणा आहुतिः चारुः[9] मदाय हविर्धानात् गच्छति ॥ २६ ॥

य एको अस्ति दंसना महाँ उग्रो अभि व्रतैः ।
गमत् स शिप्री न स योषदा गमद्धवं न परि वर्जति ॥ २७ ॥

१-१. मन्दमस्व मूको. २. नास्ति मूको. ३-३. स्फीरस्फाने: वि[1]; स्फीरस्फाते: अ[1]. ४. तु. ऋ ८, २,१५; मकरिद मूको. ५. शेवति[°] मूको. ६-६. नास्ति मूको. ७-७. [°]म मुम्र मूको. ८. [°]मं ससतिति अ[1]. ९. पाः मूको.

यः । एकः । अस्ति । दंसना । महान् । उग्रः । अभि । व्रतैः ।
गमत् । सः । शिप्री । न । सः । योषत् । आ । गमत् । हवम् । न । परि । वर्जति ॥ २७ ॥

वेङ्कट० यः एकः भवति कर्मणा । महान् 'उद्‌गूर्णः अभि[1] भवति कर्मभिः । गच्छतु[2] सः शिप्रवान्[3], न तु सः पृथग्भवतु, किन्तु आ गच्छतु सह । इन्द्रो ह्वानम् न परि वर्जयति ॥ २७ ॥

त्वं पुरं चरिष्ण्वं वधैः शुष्णस्य सं पिणक् ।
त्वं भा अनु चरो अध द्विता यदिन्द्र हव्यो भुवः ॥ २८ ॥

त्वम् । पुरम् । चरिष्ण्वम् । वधैः । शुष्णस्य । सम् । पिणक् ।
त्वम् । भाः । अनु । चरः । अध । द्विता । यत् । इन्द्र । हव्यः । भुवः ॥ २८ ॥

वेङ्कट० त्वम् पुरम् चरणशीलं प्रहारैः शुष्णासुरस्य[4] सञ्चूर्णितवानसि । त्वम् भासमानः अनु अचरः । अनन्तरमेव द्वैधमन्तरिक्षमध्ये[5] मार्गं[6] पृथक्कुर्वन् यदा[7] इन्द्र । हव्यः भवसि यजमानैः ॥ २८ ॥[8]

मम त्वा सूर उदिते मम मध्यंदिने दिवः ।
मम प्रपित्वे अपिशर्वरे वसवा स्तोमासो अवृत्सत ॥ २९ ॥

मम । त्वा । सूरे । उत्ऽइते । मम । मध्यन्दिने । दिवः ।
मम । प्रऽपित्वे । अपिऽशर्वरे । वसो इति । आ । स्तोमासः । अवृत्सत ॥ २९ ॥

वेङ्कट० मम त्वाम् उदिते सूर्ये, मम मध्यन्दिने च अह्नः मम प्रपित्वे, प्रपित्वं प्राप्तिः, अपिशर्वरे शर्वर्या अह्ना सङ्गमे अपिशर्वरे[9] रात्रिमुखे[10] सायं हे वासयितः! आ वर्तयन्तु स्तोमाः ॥ २९ ॥

स्तुहि स्तुहीदेते घा ते मंहिष्ठासो मघोनाम् ।
निन्दिताश्वः प्रपथी परमज्या मघस्य मेध्यातिथे ॥ ३० ॥

स्तुहि । स्तुहि । इत् । एते । घ । ते । मंहिष्ठासः । मघोनाम् ।
निन्दितऽअश्वः । प्रऽपथी । परमऽज्याः । मघस्य । मेध्यऽअतिथे ॥ ३० ॥

वेङ्कट० अत्र कात्यायनः—"प्रायोगिश्वासङ्गो यः स्त्री भूत्वा पुमानभूत्, स मेध्यातिथये दानं दत्त्वा 'स्तुहि स्तुहि' इति चतसृभिरात्मानं तुष्टाव । पत्नी चास्याङ्गिरसी शश्वती पुंस्त्वमुपलभ्यैनं प्रीताऽन्त्यया तुष्टाव" (ऋअ २,८,१) इति । यथापूर्वं पुन. स्तुहि एव इन्द्रम् । एते खलु तुभ्यं

१-१. °र्णो हि मूको. २. गच्छति अ[1]. ३. °प्रवान् मूको. ४. शुष्णासु° मूको. ५. °रिक्षमार्गे अ[1]. ६. मार्गः मूको. ७. यथा मूको. ८. तु. ऋ १,१२१,१०; ५,५१,७. ९. अपिशर्वो मूको. १०. रात्रिमुखेन अ[1].

धनवतां मध्ये अत्यन्तं दरिद्रेभ्यो दातार निन्दिताश्वः प्रथशी परमज्या इति त्रयो 'राजानो मघ' प्रयच्छन्ति, यथाहं प्रायच्छम्, हे मेध्यातिथे! ॥ ३० ॥

[1]इति पञ्चमाष्टके सप्तमाध्याये पञ्चदशो वर्गः[1] ॥

आ यदश्वा॒न् वन॑न्वतः श्र॒द्धया॒हं रथे॑ रु॒हम् ।
उ॒त वा॒मस्य॒ वसु॑नश्चिकेतति॒ यो अस्ति॒ याद्वः॑ प॒शुः ॥ ३१ ॥

आ । यत् । अश्वा॑न् । वन॑न्ऽवतः । श्र॒द्धया॑ । अ॒हम् । रथे॑ । रु॒हम् ।
उ॒त । वा॒मस्य॑ । वसु॑नः । चि॒के॒त॒ति॒ । यः । अस्ति॑ । याद्वः॑ । प॒शुः ॥ ३१ ॥

वेङ्कट० यदि अहम् अश्वान्[2] भजनवत शत्रुभ्यो धनाहरणश्रद्धया 'रथे आ रुहम्। आयोजयामि" सङ्ग्राम जिगमिषुरित्यर्थः[4]। तदनन्तरमेव वाम धनं लब्धं बुध्यते। यः भवति मनुष्यो द्रष्टा, धनवीप्सया मां पश्यति। यदुषु भव याद्व । 'यदु' (निघ २,३) इति मनुष्यनामेति ॥ ३१॥

य ऋ॒ज्रा मह्यं॑ माम॒हे स॒ह त्व॒चा हि॑र॒ण्यया॑ ।
ए॒ष विश्वा॑न्य॒भ्य॑स्तु॒ सौभ॑गास॒ङ्गस्य॑ स्व॒नद्र॑थः ॥ ३२ ॥

यः । ऋ॒ज्रा । मह्य॑म् । म॒म॒हे । स॒ह । त्व॒चा । हि॒र॒ण्यया॑ ।
ए॒षः । विश्वा॑नि । अ॒भि । अ॒स्तु॒ । सौभ॑गा । आ॒ऽस॒ङ्गस्य॑ । स्व॒नत्ऽर॑थः ॥ ३२ ॥

वेङ्कट० य ऋजूनि धनानि[6] मह्यम् प्रायच्छत्[7] सह त्वचा[8] हिरण्यया कक्ष्यया युक्त । एषः शत्रूणाम् विश्वानि एव सौभगानि अभि भवतु आसङ्गस्य स्वनद्रथः अश्व.। यथा स्वनद्रथो नाम कश्चिद्राजा येन धनानि[9] धनाम्यासङ्गो मेध्यातिथये प्रादादिति ॥ ३२ ॥

अध॑ प्ला॒योगि॒रति॑ दासद॒न्याना॑स॒ङ्गो अ॑ग्ने द॒शभिः॑ स॒हस्रैः॑ ।
अधो॒क्षणो॒ दश॒ मह्यं॒ रुश॑न्तो न॒ळा इ॑व॒ सर॑सो॒ निर॑तिष्ठन् ॥ ३३ ॥

अध॑ । प्ला॒योगिः॑ । अति॑ । दा॒स॒त् । अ॒न्यान् । आ॒ऽस॒ङ्गः । अ॒ग्ने॒ । द॒शऽभिः॑ । स॒हस्रैः॑ ।
अध॑ । उ॒क्षणः॑ । दश॑ । मह्य॑म् । रुश॑न्तः । न॒ळाःऽइ॑व । सर॑सः । निः । अ॒ति॒ष्ठ॒न् ॥ ३३ ॥

वेङ्कट० इदानीम् प्लायोगि आसङ्ग. अन्यान् राज्ञ अति अदात् अग्ने! दशभि साहस्रै गवा मेध्यातिथये भर्त्रे । सहस्राणि प्रायच्छदित्यर्थः[10]। अध उक्षण. दश मह्यम् श्वेतवर्णाः सरसः नळा इव नि. अतिष्ठन् मेध्यातिथये, मया भर्त्तं धनं वहन्त यद्वा दानप्रीतेनेन्द्रेण मह्य प्रत्ता इति ॥ ३३ ॥

१-१. 'गोध ज', 'नो रद वि'. २-२. नास्ति मूको. ३. भश्वा मूको. ४-४. रथचनमारुहमा- मेघाजयामि मूको. ५ मिगीषु' वि'. ६. 'जानि म ज'. ७. 'च्छत् तद वि'; 'च्छद् तद ज'. ८. त्वाच ज', त्वाचा वि'. ९. भत्नानि मूको. १०. प्रयच्छन्ति' मूको.

अन्वस्य स्थूरं ददृशे पुरस्तादनस्थ ऊरुरवरम्बमाणः ।
शश्वती नार्यभिचक्ष्याह सुभद्रमर्य भोजनं बिभर्षि ॥ ३४ ॥

अनु । अस्य । स्थूरम् । ददृशे । पुरस्तात् । अनस्थः । ऊरुः । अवऽरम्बमाणः ।
शश्वती । नारी । अभिऽचक्ष्य । आह । सुऽभद्रम् । अर्य । भोजनम् । बिभर्षि ॥ ३४ ॥

वेङ्कट० अनु ददृशे अस्य स्थूलमुदरम् पुरस्तात् । स्त्रियो हि सन्नतमध्या भवन्ति पुमांसस्तु स्थूलमध्याः । अस्थिवर्जितः महान् अवलम्बमानः शिश्नश्चानुददृशे । शश्वती नारी पतिमिमम् अभिसमीक्ष्य वदति हे स्वामिन् ! पते ! महम् सुभद्रम् भोजनम् भोगम् [1]अन्नपानादिकं वा भरेति[1] ॥ ३४ ॥

[2]इति पञ्चमाष्टके सप्तमाध्याये षोडशो वर्गः[2] ॥

[२]

[3]मेधातिथिः काण्व आङ्गिरसश्च प्रियमेध ऋषिः, एकचत्वारिंशीद्वाचत्वारिंशयोर्मेधातिथिः काण्वः ।
इन्द्रो देवता, एकचत्वारिंशीद्वाचत्वारिंशयोर्विभिन्दुः । गायत्री छन्दः, अष्टाविंश्यनुष्टुप्[3] ।

इदं वसो सुतमन्धः पिबा सुपूर्णमुदरम् । अनाभयिन् ररिमा ते ॥ १ ॥

इदम् । वसो इति । सुतम् । अन्धः । पिब । सुऽपूर्णम् । उदरम् । अनाभयिन् । ररिम । ते ॥ १ ॥

वेङ्कट० मेधातिथिः आङ्गिरसश्च प्रियमेधः । इदम् वासयितः ! अभिषुतम् अन्धः, तत् पिब । सुपूर्णम् कुरु उदरम् । हे अनाभयिन् ! आभयवर्जित ! । मत्वर्थीया वृत्तिर्वाजिनीवतीत्यादिवत् । दद्मः तुभ्यम् ॥ १ ॥

नृभिर्धूतः सुतो अश्नैरव्यो वारैः परिपूतः । अश्वो न निक्तो नदीषु ॥ २ ॥

नृऽभिः । धूतः । सुतः । अश्नैः । अव्यः । वारैः । परिऽपूतः । अश्वः । न । निक्तः । नदीषु ॥ २ ॥

वेङ्कट० ऋत्विग्भिः प्रक्षालितः, अभिषुतश्च अश्मभिः, अवेर्वालैश्च परिपूतः अश्वः इव निर्णिक्तशरीरः[4] नदीषु ॥ २ ॥

तं ते यवं यथा गोभिः स्वादुमकर्म श्रीणन्तः । इन्द्र त्वास्मिन्त्सधमादे ॥ ३ ॥

तम् । ते । यवम् । यथा । गोभिः । स्वादुम् । अकर्म । श्रीणन्तः । इन्द्र । त्वा । अस्मिन् । सधऽमादे ॥ ३ ॥

वेङ्कट० तम् तुभ्यं यवान्नमिव गोविकारैः स्वादुम्[5] अकर्म[6] श्रीणन्तः । इन्द्र ! त्वाम् अस्मिन् यज्ञे तेन तर्पयामश्चेति[7] ॥ ३ ॥

इन्द्र इत् सोमपा एक इन्द्रः सुतपा विश्वायुः । अन्तर्देवान् मर्त्यांश्च ॥ ४ ॥

इन्द्रः । इत् । सोमऽपाः । एकः । इन्द्रः । सुतऽपाः । विश्वऽआयुः । अन्तः । देवान् । मर्त्यान् । च ॥ ४ ॥

१-१. °कं वहरतेति मूको. २-२. नास्ति मूको ३. निर्णिक्त° मूको. ४. स्वादं मूको. ५. कर्म मूको. ६. °मवमेस्पर्यः अ°.

वेङ्कट० एकः एव इन्द्रः सोमपाः, इन्द्रः सुतपाः, सर्वस्याभिगन्ता, देवान् मनुष्यान् च अन्तः वर्तमानः ॥ ४ ॥

न यं शुक्रो न दुराशीर्न तृप्रा उरुव्यचसम् । अपस्पृण्वते सुहार्दम् ॥ ५ ॥

न । यम् । शुक्रः । न । दुःऽआशीः । न । तृप्राः । उरुऽव्यचसम् । अपऽस्पृण्वते । सुऽहार्दम् ॥ ५ ॥

वेङ्कट० न यम् अभिषुतमात्रः, न च दुराशीः अशोभनाशिरः, न च तृप्राः च उदरात् पीता निर्गच्छन्ति इति, उरुव्याप्तिम् अपस्पृशन्ति[1] शोभनहृदयम् ॥ ५ ॥

[2]इति पञ्चमाष्टके सप्तमाध्याये सप्तदशो वर्गः[2] ॥

गोभिर्यदीमन्ये अस्मन् मृगं न व्रा मृगयन्ते । अभित्सरन्ति धेनुभिः ॥ ६ ॥

गोभिः । यत् । ईम् । अन्ये । अस्मत् । मृगम् । न । व्राः । मृगयन्ते । अभिऽत्सरन्ति । धेनुऽभिः ॥ ६ ॥

वेङ्कट० गवां लाभाय यदि अस्मत्तः अन्ये एनम् मृगयन्ते मृगम् इव [3]व्राताः (तु. या ५,३), यदि च[3] स्तुतिभिः एनम् अभित्सरन्ति[4] । स तान् अपहायास्मान्[5] एव अभिगच्छतु[6] इति ॥ ६ ॥

त्रय इन्द्रस्य सोमाः सुतासः सन्तु देवस्य । स्वे क्षये सुतपाव्नः ॥ ७ ॥

त्रयः । इन्द्रस्य । सोमाः । सुतासः । सन्तु । देवस्य । स्वे । क्षये । सुतऽपाव्नः ॥ ७ ॥

वेङ्कट० त्रिषु सवनेषु त्रयः सोमाः सुताः भवन्तु[7] देवस्य मदीये यज्ञे सुतं सोमं पिबतः[8] ॥ ७ ॥

त्रयः कोशासः श्चोतन्ति तिस्रश्चम्वः सुपूर्णाः । समाने अधि भार्मन् ॥ ८ ॥

त्रयः । कोशासः । श्चोतन्ति । तिस्रः । चम्वः । सुऽपूर्णाः । समाने । अधि । भार्मन् ॥ ८ ॥

वेङ्कट० द्रोणकलशः आधवनीयः पूतभृदिति त्रयः कोशाः श्चोतन्ति । तिस्रः चम्वः मरुत्वतीयाख्याः सुपूर्णाः एकस्मिन् भरणे । भरणं सवनं माध्यन्दिनमिति ॥ ८ ॥

शुचिरसि पुरुनिःष्ठाः क्षीरैर्मध्यत आशीर्तः । दध्ना मन्दिष्ठः शूरस्य ॥ ९ ॥

शुचिः । असि । पुरुनिःऽस्थाः । क्षीरैः । मध्यतः । आऽशीर्तः । दध्ना । मन्दिष्ठः । शूरस्य ॥ ९ ॥

वेङ्कट० पूतो भवसि बहुषु पात्रेषु निष्ठितः क्षीरैः मध्यतः मिश्रितः दध्ना च अत्यन्तं मदयिता इन्द्रस्य इति हविःस्तुतिः ॥ ९ ॥

इमे त इन्द्र सोमास्तीव्रा अस्मे सुतासः । शुक्रा आशिरं याचन्ते ॥ १० ॥

इमे । ते । इन्द्र । सोमाः । तीव्राः । अस्मे इति । सुतासः । शुक्राः । आऽशिरम् । याचन्ते ॥ १० ॥

---

१. उप° मूको. २-२. नास्ति मूको. ३. व्रातायदि वि°. ४. अभिक्षरन्ति मूको. ५. °यास्मा° मूको. ६. °गच्छन्तु मूको. ७. °वन्तु सोमस्य अ°. ८. पिबन मूको.

वेङ्कट० निगदसिद्धा ॥ १० ॥

[1]इति पञ्चमाष्टके सप्तमाध्याये अष्टादशो वर्गः[1] ॥

ताँ आशिरं पुरोळाशमिन्द्रेमं सोमं श्रीणीहि । रेवन्तं हि त्वा शृणोमि ॥ ११ ॥

तान् । आऽशिरम् । पुरोळाशम् । इन्द्र । इमम् । सोमम् । श्रीणीहि । रेवन्तम् । हि । त्वा । शृणोमि ॥ ११ ॥

वेङ्कट० आशिरम् पुरोडाशम् इमम् सोमम् इति तान् एतान् इन्द्र । उदरे श्रीणीहि । धनवन्तम् हि त्वाम् अहम् शृणोमि ॥ ११ ॥

हृत्सु पीतासो युध्यन्ते दुर्मदासो न सुरायाम् । ऊधर्न नग्ना जरन्ते ॥ १२ ॥

हृत्ऽसु । पीतासः । युध्यन्ते । [2]दुःऽमदासः । न । सुरायाम्[2] । ऊधः । न । नग्नाः । जरन्ते ॥ १२ ॥

वेङ्कट० हृत्सु[3] पीताः सोमा इतरेतरं [4]मिश्रिता भवन्ति, यथा सुरानिमित्तं सुरापा इतरेतरम्[4] युध्यन्ते । ऊधः[5] तवोदरे न जीर्णा भवन्ति नग्नाः आशिरवर्जिता[6] इति ॥ १२ ॥

रेवाँ इद् रेवतः स्तोता स्यात् त्वावतो मघोनः । प्रेदु हरिवः श्रुतस्य ॥ १३ ॥

रेवान् । इत् । रेवतः । स्तोता । स्यात् । त्वाऽवतः । मघोनः । प्र । इत् । ऊँ इति । हरिऽवः । श्रुतस्य ॥

वेङ्कट० धनवान् एव धनवतः स्तोता भवितुमर्हति[7] । त्वत्सदृशस्य मघवतो विश्रुतस्य भवतः स्तोता हरिवः ! प्र एव भवति रेवान् गोमानिति ॥ १३ ॥

उक्थं चन शस्यमानमगोररिरा चिकेत । न गायत्रं गीयमानम् ॥ १४ ॥

उक्थम् । चन । शस्यमानम् । अगोः । अरिः । आ । चिकेत । न । गायत्रम् । गीयमानम् ॥ १४ ॥

वेङ्कट० उक्थम् अपि शस्यमानम् अगोः[8] अपशोः अभिगन्ता[9] जानाति । न केवलम् गायत्रम् एव शस्यमानम् । उभयं शृणोतीत्यर्थः ॥ १४ ॥

मा न इन्द्र पीयत्नवे मा शर्धते परा दाः । शिक्षा शचीवः शचीभिः ॥ १५ ॥

मा । नः । इन्द्र । पीयत्नवे । मा । शर्धते । परा । दाः । शिक्ष । शचीऽवः । शचीभिः ॥ १५ ॥

वेङ्कट० मा अस्मान् इन्द्र ! हिंसित्रे, मा च वेगं कुर्वते परा दाः । प्रयच्छ धनं प्रज्ञावन्![10] प्रज्ञाभिः ॥ १५ ॥

[1]इति पञ्चमाष्टके सप्तमाध्याये एकोनविंशो वर्गः[1] ॥

१-१. नास्ति मूको. २-२. मु. या ६,४. ३. नास्ति वि[1]. ४-४. नास्ति अ[1]. ५. ऊधः मूको. ६. आशिर° मूको. ७. °भवतु मर्हीति मूको. ८. अगोः मूको. ९. अदिहन्ता अ[1]; अभिहन्ता वि[1]. १०. प्रज्ञावत मूको.

वयमु त्वा तदिदर्था इन्द्र त्वायन्तः सखायः । कण्वा उक्थेभिर्जरन्ते ॥ १६ ॥

वयम् । ऊँ इति । त्वा । तदित्ऽअर्थाः । इन्द्र । त्वाऽयन्तः । सखायः । कण्वाः । उक्थेभिः । जरन्ते ॥ १६ ॥

वेङ्कट० वयम् उ त्वा तत्प्रयोजनाः स्तुतिपराः इन्द्र ! त्वत्कामाः सखायः । अथ परोक्षः — कण्वाः शस्त्रैः स्तुवन्तीति ॥ १६ ॥

न घेमन्यदा पपन वज्रिन्नपसो नविष्टौ । तवेदु स्तोमं चिकेत ॥ १७ ॥

न । घ । ईम् । अन्यत् । आ । पपन । वज्रिन् । अपसः । नविष्टौ । तव । इत् । ऊँ इति । स्तोमम् । चिकेत ॥ १७

वेङ्कट० न खलु अहम् अन्यत् आ पपन आभिमुख्येन स्तौमि वज्रिन् ! अपसः[1] उदकस्य अन्वेषणे[2] । तव[3] एव स्तोमम् अहम् चिकेत ॥ १७ ॥

इच्छन्ति देवाः सुन्वन्तं न स्वप्नाय स्पृहयन्ति । यन्ति प्रमादमतन्द्राः ॥ १८ ॥

इच्छन्ति । देवाः । सुन्वन्तम् । न । स्वप्नाय । स्पृहयन्ति । यन्ति । प्रऽमादम् । अतन्द्राः ॥ १८ ॥

वेङ्कट० इच्छन्ति देवाः सुन्वन्तम्, न स्वप्नाय स्पृहयन्ति[4] । स्वप्नमपहाय सुन्वन्तम् अभिगच्छन्ति[5] प्रकर्षेण मदयितारम् अनलसाः[6] ॥ १८ ॥

ओ षु प्र याहि वाजेभिर्मा हृणीथा अभ्य१स्मान् । महाँइव युवजानिः ॥ १९ ॥

ओ इति । सु । प्र । याहि । वाजेभिः । मा । हृणीथाः । अभि । अस्मान् । महान्ऽइव । युवऽजानिः ॥ १९ ॥

वेङ्कट० आ प्र याहि अन्नैः, अस्मान् अभि मा क्रुध[7], यथा वृद्धः युवजानिः जायां प्रति आगच्छति, न च कुप्यति ॥ १९ ॥

मो ष्व१द्य दुर्हणावान्त्सायं करदारे अस्मत् । अश्रीरइव जामाता ॥ २० ॥

मो इति । सु । अद्य । दुःऽहनावान् । सायम् । करत् । आरे । अस्मत् । अश्रीरःऽइव । जामाता ॥

वेङ्कट० मा अस्मान् अद्य समीपे करोतु हिंसावान् 'राक्षसः सायम्[8]' । स हि रक्षसां कालः । यथा विगुणः जामाता कन्यां[9] समीपे करोति अनिच्छन्तम् ॥ २० ॥

[10]इति पञ्चमाष्टके सप्तमाध्याये विंशो वर्गः[10] ॥

विद्मा ह्यस्य वीरस्य भूरिदावरीं सुमतिम् । त्रिषु जातस्य मनांसि ॥ २१ ॥

विद्म । हि । अस्य । वीरस्य । भूरिऽदावरीम् । सुऽमतिम् । त्रिषु । जातस्य । मनांसि ॥ २१ ॥

---

१. ष्पपस्य मूको. २. °न्वेषणाय भ°. ३. वै मूको. ४. °हयनी मूको. ५. °च्छन्ती वि°. ६. °लसा मूको. ७. क्रुद्धे भ°. ८-८. राक्षसाय वि°; रक्षसाय भ°. ९. कायन मूको. १०-१०. नास्ति मूको.

वेङ्कट० जानीमः हि अस्य वीरस्य बहुनो धनस्य दात्रीम् सुमतिम्[1]। त्रिषु स्थानेषु प्रादुर्भवतः मनांसि विद्म इति पूर्वार्धोक्तमेवोक्तमिति[2] ॥ २१ ॥

आ तू षिञ्च कण्वमन्तं न घा विद्म शवसानात् । यशस्तरं शतमूतेः ॥ २२ ॥

आ । तु । सिञ्च । कण्वऽमन्तम् । न । घ । विद्म । शवसानात् । यशःऽतरम् । शतम्ऽऊतेः ॥

वेङ्कट० आ सिञ्च क्षिप्रं स्तोतृभिः ऋत्विग्भिरस्तद्वन्तम् । न खलु विद्म[3] वयं बलमाचरत[4] बहुरक्षणाद् इन्द्राद् अन्यम् अत्यन्तम् यशस्विनम् ॥ २२ ॥

ज्येष्ठेन सोतरिन्द्राय सोमं वीराय शक्राय । भरा पिबन्नर्याय ॥ २३ ॥

ज्येष्ठेन । सोतः । इन्द्राय । सोमम् । वीराय । शक्राय । भर । पिबत् । नर्याय ॥ २३ ॥

वेङ्कट० श्रेष्ठेन पात्रेण हे [5]अभिषोतः नृहिताय[5] वीराय शक्राय इन्द्राय सोमम् । 'वीरः वीरयत्यमित्रान्' (या १,७) । शक्रः[6] शक्नोतेः । [7]भर । सः[7] पिबतु सोममिति ॥ २३ ॥

यो वेदिष्ठो अव्यथिष्वश्वावन्तं जरितृभ्यः । वाजं स्तोतृभ्यो गोमन्तम् ॥२४॥

यः । वेदिष्ठः । अव्यथिषु । अश्वऽवन्तम् । जरितृऽभ्यः । वाजम् । स्तोतृऽभ्यः । गोऽमन्तम् ॥२४॥

वेङ्कट० यः अत्यन्तं लम्भयिता व्यथारहितानां देवानां मध्ये अश्वावन्तम् स्तोतृभ्यः वाजम् अन्नम् स्तोतृभ्यः गोमन्तम् । स्तोतृभ्य इति पूरणः ॥ २४ ॥

पन्यंपन्यमित् सोतार आ धावत मद्याय । सोमं वीराय शूराय ॥ २५ ॥

पन्यम्ऽपन्यम् । इत् । सोतारः । आ । धावत । मद्याय । सोमम् । वीराय । शूराय ॥ २५ ॥

वेङ्कट० स्तोतव्यं स्तोतव्यम्[8] एव[9] हे सोतारः![10] । सोमम् आ धावत वसतीवरीषु [11]अभिषुतं मदाहाय[11] वीराय शूराय । शूरः शृणातेः[12] ॥ २५ ॥

[13]इति पञ्चमाष्टके सप्तमाध्याये एकविंशो वर्गः[13] ॥

पाता वृत्रहा सुतमा घा गमन्नारे अस्मत् । नि यंमते शतमूतिः ॥ २६ ॥

पाता । वृत्रऽहा । सुतम् । आ । घ । गमत् । न । आरे । अस्मत् । नि । यमते । शतम्ऽऊतिः ॥२६॥

वेङ्कट० सुतस्य पानशीलः इन्द्रः आ गच्छतु । मा अस्माकम् दूरे भवतु । नि यच्छतु धनं शतरक्षणम् ॥ २६ ॥

---

१. सुदती मूको. २. °मित्यर्थः अ[1]. ३. विद्मो मूको. ४. आचरन्तः मूको. ५-५. येभिषा-शुदि° मूको. ६. शक्र मूको. ७-७. भरत मूको. ८. नास्ति अ[1]. ९. एति न मूको. १०. सोतारः मूको. ११-११. °भुतमदाहाय मूको. १२. शृणोते वि[2]; शृणुते अ[1]. १३-१३. नास्ति मूको.

एह हरी ब्रह्मयुजा शग्मा वक्षतः सखायम् । गीर्भिः श्रुतं गिर्वणसम् ॥ २७॥

आ । इह । हरी इति । ब्रह्मऽयुजा । शग्मा । वक्षतः । सखायम् । गीःऽभिः । श्रुतम् । गिर्वणसम् ॥२७॥

वेङ्कट० आ वहताम् इह[1] अश्वौ [2]ब्रह्मणा युक्तौ[2] शक्तौ सखायम् स्तुतिश्रवणार्थं[3] विश्रुतं गीर्भिर्वननीयम् ॥ २७ ॥

स्वादवः सोमा आ याहि श्रीताः सोमा आ याहि ।
शिप्रिन्नृषीवः शचीवो नायमच्छा सधमादम् ॥ २८ ॥

स्वादवः । सोमाः । आ । याहि । श्रीताः । सोमाः । आ । याहि ।
शिप्रिन् । ऋषिऽवः । शचीऽवः । [4]न । अयम् ।[4] अच्छ । सधऽमादम् ॥ २८ ॥

वेङ्कट० स्वादवः इमे सोमाः, आ गच्छ । गोभिः †श्रीताः सोमाः, आ† याहि । शिप्रिन् ! दर्शनवन् !‡ प्रज्ञावन् ![5] सधमादम् त्वाम्[6] निरीक्ष्य आस्ते, तस्मादायाहि ॥ २८ ॥

स्तुतश्च यास्त्वा वर्धन्ति महे राधसे नृम्णाय । इन्द्र कारिणं वृधन्तः ॥ २९ ॥

स्तुतः । च । याः । त्वा । वर्धन्ति । महे । राधसे । नृम्णाय । इन्द्र । कारिणम् । वृधन्तः ॥२९॥

वेङ्कट० स्तुतयः[7] च याः त्वां वर्धयन्ति महते धनाय बलाय च । ताश्च त्वां न वर्धयन्ति करणशीलम् [8]अन्यत्र वर्तेस[8] इति ॥ २९ ॥

गिरश्च यास्ते गिर्वाह उक्था च तुभ्यं तानि । सत्रा दधिरे शवांसि ॥ ३० ॥

गिरः । च । याः । ते । गिर्वाहः । उक्था । च । तुभ्यम् । तानि । सत्रा । दधिरे । शवांसि ॥३०॥

वेङ्कट० गिरः च याः भवन्ति तुभ्यम् गीर्भिरुह्यमान ! तथा उक्थानि च तानि, यानि सत्यमेव तुभ्यं बलानि धारयन्ति । तानि च न वर्धयन्ति अन्यत्र गते त्वयीति ॥ ३० ॥

[9]इति पञ्चमाष्टके सप्तमाध्याये द्वाविंशो वर्गः[9] ॥

एवेदेष तुविकूर्मिर्वाजाँ एको वज्रहस्तः । सनादमृक्तो दयते ॥ ३१ ॥

एव । इत् । एषः । तुविऽकूर्मिः । वाजान् । एकः । वज्रऽहस्तः । सनात् । अमृक्तः । दयते ॥ ३१ ॥

वेङ्कट० एवमेव एषः बहोः कर्ता [10]अन्नानि एकः[10] वज्रहस्तः चिरादेवारभ्य शत्रुभिरप्रमृष्टः प्रयच्छति ॥ ३१ ॥

हन्ता वृत्रं दक्षिणेनेन्द्रः पुरू पुरुहूतः । महान् महीभिः शचीभिः ॥ ३२ ॥

---

१. इव मूको. २-२. ब्राह्मणायुक्तौ अ[1]; ब्राह्मणयुक्तौ वि[1]. ३. स्तुतिरश्रवणार्थं मूको. ४-४. तु. ऋ १, ११०,१[b]; सा. संभावयें नेति. ५-५. नास्ति वि[1]. †-† शिता सोमाया" अ[1]. ‡ °वद् अ[1]. ६. पिबः मूको. ७. स्तुतः मूको. ८-८. मन्ये वर्तेय मूको. ९-९. नास्ति मूको. १०-१०. नान्ये को मूको.

हन्ता । वृत्रम् । दक्षिणेन । इन्द्र । पुरुऽहूत । महान् । महीभिः । शचीभिः ॥ ३२ ॥

वेङ्कट० हन्ता शत्रून् दक्षिणेन एकनैव हस्तेन इन्द्र बहुभिः आहूत[1] महान् महतीभिः प्रज्ञाभिः ॥ ३२ ॥

यस्मिन् विश्वाश्चर्षणय उत च्यौत्ना ज्रयांसि च । अनु घेन्मन्दी मघोनः ॥३३॥

यस्मिन् । विश्वाः । चर्षणयः । उत । च्यौत्ना । ज्रयांसि । च । अनु । घ । इत् । मन्दी । मघोनः ॥

वेङ्कट० यस्मिन् विश्वाः प्रजाः अपि च बलानि वेगाः च संश्रितानि । तस्य मघवतः स्तोता अनु हरति सोममिति ॥ ३३ ॥

एष एतानि चकारेन्द्रो विश्वा योऽति शृण्वे । वाजदावा मघोनाम् ॥ ३४ ॥

एषः । एतानि । चकार । इन्द्रः । विश्वा । यः । अति । शृण्वे । वाजऽदावा । मघोनाम् ॥३४॥

वेङ्कट० एषः[2] एतानि सर्वाणि भूतानि चकार इन्द्रः, यः अत्यन्तं श्रूयते अन्नस्य च दाता हविष्मताम् ॥ ३४ ॥

प्रभर्ता रथं दाशुष उपाक उद्यन्ता गिरः ...

प्रभर्ता रथं गव्यन्तमपाकाच्चिद् यमवति । इनो वसु स हि वोळ्हा ॥ ३५ ॥

प्रऽभर्ता । रथम् । गव्यन्तम् । अपाकात् । चित् । यम् । अवति । इनः । वसु । सः । हि । वोळ्हा ॥३५॥

वेङ्कट० प्रभर्ता रथम् गाः[3] इच्छन्तं धनेन[3] रथं गोभिः पूरयति[4] अनल्पादपि शत्रोः, यम् यजमानं रक्षति । तस्मात् ईश्वरः[5] सः हि[5] धनस्य वोढा भवति । यद्वा शत्रून् प्रति नयन् प्रभरणशील इति ॥३५॥

[6]इति पञ्चमाष्टके सप्तमाध्याये त्रयोविंशो वर्गः[6] ॥

सनिता विप्रो अर्वद्भिर्हन्ता वृत्रं नृभिः शूरः । सत्योऽविता विधन्तम् ॥३६॥

सनिता । विप्रः । अर्वत्ऽभिः । हन्ता । वृत्रम् । नृऽभिः । शूरः । सत्यः । अविता । विधन्तम् ॥

वेङ्कट० अश्वैः सम्भक्ता मेधावी अश्वैः हन्ता च वृत्रम् नरैः[7] शूरः सत्यकर्मा रक्षिता च परिचरन्तम् इन्द्रो भवति ॥ ३६ ॥

यजध्वैनं प्रियमेधा इन्द्रं सत्राचा मनसा । यो भूत् सोमैः सत्यमद्वा ॥ ३७ ॥

यजध्वम् । एनम् । प्रियऽमेधाः । इन्द्रम् । सत्राचा । मनसा । यः । भूत् । सोमैः । सत्यऽमद्वा ॥३७॥

वेङ्कट० यजध्वम् एनम् हे प्रियमेधस्य पुत्राः[1] इन्द्रम् महद्धनम् अक्षता मनसा, यः भवति सोमैः सत्य-मदनः[8] ॥ ॥ ३७ ॥

गाथश्रवसं सत्पतिं श्रवस्कामं पुरुत्मानम् । कण्वासो गात वाजिनम् ॥ ३८ ॥

गाथऽश्रवसम् । सत्ऽपतिम् । श्रवःऽकामम् । पुरुऽत्मानम् । कण्वासः । गात । वाजिनम् ॥३८॥

---

१ आहतो वि॰, मानतो अ॰ २ एता वि॰ ३-३ इच्छन्तःधनेन वि॰, इच्छन्धनेन अ॰ ४ पूरयतु अ॰ ५-५ नास्ति मूको ६-६ नास्ति मूको ७ भगैः मूको ८ °मदन अ॰, °मद्धनम् वि॰

वेङ्कट० सङ्कीर्तनीयकीर्तिम् सत्पतिम्[1] अन्नकामम् बहुशरीरम् हे कण्वासः! स्तुत बलिनम् इन्द्रम् ॥ ३८ ॥

य ऋते चिद् गास्पदेभ्यो दात् सखा नृभ्यः शचीवान् । ये अस्मिन् काममश्रियन् ॥३९॥

यः । ऋते । चित् । गाः । पदेभ्यः । दात् । सखा । नृऽभ्यः । शचीऽवान् ।
ये । अस्मिन् । कामम् । अश्रियन् ॥ ३९ ॥

वेङ्कट० यः यज्ञे पद्भ्यः अभिगन्तृभ्यः प्रयच्छति सखा नेतृभ्यः प्रज्ञावान्, ये नरः इन्द्रे[2] कामम् कमनीयं सोमम् श्रयन्ते संमिश्रयन्ति ॥ ३९ ॥

इत्था धीवन्तमद्रिवः काण्वं मेध्यातिथिम् । मेषो भूतोऽभि यन्नयः ॥ ४० ॥

इत्था । धीऽवन्तम् । अद्रिऽवः । काण्वम् । मेध्यऽअतिथिम् । मेषः । भूतः । अभि । [3]यन् । अयः[3] ॥

वेङ्कट० इत्थमेव कर्मवन्तम् वज्रिन्! कण्वपुत्रम् मेध्यातिथिम् मेषः [4]भूत्वा अभि गच्छन्[4] [5]अभिगच्छ त्वं यजमानानिति[5] ॥ ४० ॥

शिक्षा विभिन्दो अस्मै चत्वार्ययुता ददत् । अष्टा परः सहस्रा ॥ ४१ ॥

शिक्ष । विभिन्दो इति विऽभिन्दो । अस्मै । चत्वारि । अयुता । ददत् । अष्ट । परः । सहस्रा ॥४१॥

वेङ्कट० अत्र कात्यायनः—अन्त्याभ्यां मेधातिथिः (ऋअ २,८,२)। देहि विभिन्दो! अस्मै गवाम् चत्वारि अयुतानि प्रयच्छन् अष्टौ च सहस्राणि परस्तात्, अधिकानीत्यर्थः ॥ ४१ ॥

उत सु त्ये पयोवृधा माकी रणस्य नप्त्या । जनित्वनाय मामहे ॥ ४२ ॥

उत । सु । त्ये इति । पयःऽवृधा । माकी इति । रणस्य । नप्त्या । जनिऽत्वनाय । ममहे ॥४२॥

वेङ्कट० अपि च एते पयसो वर्धयित्र्यौ धेनू माकी[6] च युद्धस्य नेत्र्यौ। [7]माकिः अस्मा अध्वनो[7] मिमीते गमम इति। जनित्वनाय अस्माकं प्रादुर्भावाय[8] प्रायच्छदिति ॥ ४२ ॥

[9]इति पञ्चमाष्टके सप्तमाध्याये चतुर्विंशो वर्गः[9] ॥

[२]

[1]मेधातिथिः काण्व ऋषिः। इन्द्रो देवता, अन्त्यानां चतसृणां पाकस्थामा कौरयाणः।
प्रगाथच्छन्दः (=विषमा बृहत्यः, समाः सतोबृहत्यः), एकविंश्यनुष्टुप्,
द्वाविंशीत्रयोविंश्यौ गायत्र्यौ, चतुर्विंशी बृहती[1]।

पिबा सुतस्य रसिनो मत्स्वा न इन्द्र गोमतः ।
आपिर्नो बोधि सधमाद्यो वृधेऽस्माँ अवन्तु ते धियः ॥ १ ॥

---

१. सत्पतिम् मूको. २. इन्द्र वि[1]. ३-३. पाठः? (तु. वैप १,२५७५d). ४-४. भूत्वाभिगच्छन् वि[1], °भिगच्छ गच्छन् अ[1]. ५-५. °भिगच्छमोयज° मूको. ६. माकि अ[1]. ७-७. माकीरदत्ताध्वनो मूको. ८. °र्भाय अ[1]. ९-९. नास्ति मूको.

पिबे । सुतस्यं । रुसिनः । मत्स्वं । नः । इन्द्र । गोऽमत ।

आपि. । नः । बोधि । सधऽमार्द्य । वृधे । अस्मान् । अवन्तु । ते । धियं ॥ १ ॥

वेङ्कट० मेध्यातिथि । पिब[1] 'सुतं रसवन्तम्'[2], माद्य अस्माकं स्वभूतेन इन्द्र[3] गोमिश्रितेन। बन्धु सन् बुध्यस्व अस्माकं वर्धनाय सहितैः ऋत्विग्भि मदनीय । अस्मान् रक्षन्तु तव कर्माणि ॥1॥

भूयामं ते सुमतौ वाजिनों वयं मा नः स्तरभिमांतये ।

अस्माञ् चित्राभिरवतादभिष्टिभिरा नः सुम्नेषु यामय ॥ २ ॥

भूयामं । ते । सुऽमतौ । वाजिनं । वयम् । मा । नः । स्तः । अभिऽमांतये ।

अस्मान् । चित्राभिः । अवतात् । अभिष्टिऽभि । आ । नः । सुम्नेषु । यमय ॥ २ ॥

वेङ्कट० भवाम तव सुमतौ हविष्मन्त[2] वयम् । आत्मानमभिमन्यमानाय शत्रवे स्तरण सत्साम्यतो निधानम् 'अस्मास्मु मा भवतु'[1] । अस्मान् चित्रै अभ्येषणै रक्ष। अस्मान् सुखेषु च आ यमय सयोजय ॥ २ ॥

इमा उं त्वा पुरूवसो गिरों वर्धन्तु या मर्म ।

पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत ॥ ३ ॥

इमा । ऊँ इति । त्वा । पुरुवसो इति पुरुऽवसो । गिरं । वर्धन्तु । या । मर्म ।

पावकऽवर्णा । शुचय । विपःऽचितः । अभि । स्तोमैः । अनूषत ॥ ३ ॥

वेङ्कट० इमा एव त्वा हे बहुधन[1] स्तुतय वर्धयन्तु, या मम स्वभूता[4]। पावकसदृशवर्णा[5]। शुचि शोचतेर्ज्वलतिकर्मण । ज्वलन्त मेधाविन इन्द्रम् स्तोमै अभि अनूषत अस्तुवत[6] ॥ ३ ॥

अयं सहस्रमृषिभिः सहस्कृतः समुद्र इव पप्रथे ।

सत्यः सो अस्य महिमा गृणे शवों यज्ञेषु विप्रराज्ये ॥ ४ ॥

अयम् । सहस्रम् । ऋषिऽभि । सहःऽकृत । समुद्रःऽइव । पप्रथे ।

सत्य । स । अस्य । महिमा । गृणे । शवं । यज्ञेषु । विप्रऽराज्ये ॥ ४ ॥

वेङ्कट० अयम् ऋषिभि बहुभि बलेन 'कृत अन्तरिक्षमिव'[7] प्रथितोऽभूत् वृद्धशरीर । सत्यभूत स अस्य महिमा स्तुत ऋषिभि, बल च। तुरीयपाद प्रत्यक्ष —यज्ञेषु हे मेधाविन्[1](?) इन्द्र[1] राज्ये (?) च सर्वस्मिन् ॥ ४ ॥

---

1. सुत पिब मूको २-२. सुतसुत° मूको ३ ३. नास्ति मूको ४. स्वभूता मूको ५. °वर्णा मूको. ६. अस्तुवन्त मूको. ७ ७. कृतकृत्यन्तरिक्षमौपमिकमिव - वि°, इतकृत्यौपमिकमन्तरिक्षमिव अ°,

इन्द्रमिद् देवतातय इन्द्रं प्रयत्यध्वरे ।
इन्द्रं समीके वनिनो हवामह इन्द्रं धनस्य सातये ॥ ५ ॥

इन्द्रम् । इत् । देवऽतातये । इन्द्रम् । प्रऽयति । अध्वरे ।
इन्द्रम् । समऽईके । वनिनः । हवामहे । इन्द्रम् । धनस्य । सातये ॥ ५ ॥

वेङ्कट० इन्द्रम् एव यज्ञतननार्थम्[1], इन्द्रम् एव वर्तमाने च यज्ञे, इन्द्रम् सङ्ग्रामे हविष्मन्तः हवामहे, इन्द्रम् एव वाऽर्थस्य लाभाय ॥ ५ ॥

इति पञ्चमाष्टके सप्तमाध्याये पञ्चविंशो वर्गः ॥

इन्द्रो मह्ना रोदसी पप्रथच्छव इन्द्रः सूर्यमरोचयत् ।
इन्द्रे ह विश्वा भुवनानि येमिर इन्द्रे सुवानास इन्दवः ॥ ६ ॥

इन्द्रः । मह्ना । रोदसी इति । पप्रथत् । शवः । इन्द्रः । सूर्यम् । अरोचयत् ।
इन्द्रे । ह । विश्वा । भुवनानि । येमिरे । इन्द्रे । सुवानासः । इन्दवः ॥ ६ ॥

वेङ्कट० इन्द्रः महता शवसा "द्यावापृथिव्यौ अप्रथयत्"[2]। इन्द्रः सूर्यम् अरोचयत्। इन्द्रे खलु विश्वानि भूतानि संयतानि, इन्द्रे एव अभिषूयमाणाः सोमाश्च ॥ ६ ॥

अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः ।
समीचीनास ऋभवः समस्वरन् रुद्रा गृणन्त पूर्व्यम् ॥ ७ ॥

अभि । त्वा । पूर्वऽपीतये । इन्द्र । स्तोमेभिः । आयवः ।
समऽईचीनासः । ऋभवः । सम् । अस्वरन् । रुद्राः । गृणन्त । पूर्व्यम् ॥ ७ ॥

वेङ्कट० अभि सम् अस्वरन् सङ्गताः अभिष्टुवन्ति त्वां प्रथममेव पानाय इन्द्र। स्तोमैः मनुष्याः सन्तः। सङ्गताः सौधन्वनाः ऋभवः स्तोतारः अस्तुवन् प्रत्नमिति ॥ ७ ॥

अस्येदिन्द्रो वावृधे वृष्ण्यं शवो मदे सुतस्य विष्णवि ।
अद्या तमस्य महिमानमायवोऽनु ष्टुवन्ति पूर्वथा ॥ ८ ॥

अस्य । इत् । इन्द्रः । ववृधे । वृष्ण्यम् । शवः । मदे । सुतस्य । विष्णवि ।
अद्य । तम् । अस्य । महिमानम् । आयवः । अनु । स्तुवन्ति । पूर्वऽथा ॥ ८ ॥

वेङ्कट० अस्य एव सुतस्य सोमस्य मदे[3] वर्धयति इन्द्रः वृष्ण्यः पुंस आत्मनः स्वभूतं बलं यज्ञे। 'विष्णु' (निघ ३, १७) इति यज्ञनाम[4]। अद्य तम् अस्य महिमानम् सोमजनितं मनुष्याः अनु स्तुवन्ति, यथा पूर्वे तम् अभ्यष्टुवन् ॥ ८ ॥

---

1. 'तननार्थेन' अ॰. २-२. 'दिवौ अथय' अ॰. ३. मदे मूको. ४. यज्ञनाम मूको.

तत् त्वा यामि सुवीर्यं तद् ब्रह्म पूर्वचित्तये ।
येना यतिभ्यो भृगवे धने हिते येन प्रस्कण्वमाविथ ॥ ९ ॥

तत् । त्वा । यामि । सुऽवीर्यम् । तत् । ब्रह्म । पूर्वऽचित्तये ।
येन । यतिऽभ्यः । भृगवे । धने । हिते । येन । प्रस्कण्वम् । आविथ ॥ ९ ॥

वेङ्कट० तम् त्वा याचे सुवीर्यम्. तत् च अन्नम्[1] पूर्वज्ञानाय, यथा ग्रामादयं प्रथममेव[2] सर्वे जानन्ति । येन यतिभ्यः प्रदातृभ्यो राजभ्यः भृगवे याचकाय निहितं धनं रक्षितवानसि, येन च सुवीर्येण प्रस्कण्वम्[3] इति ॥ ९ ॥

येना समुद्रमसृजो महीरपस्तदिन्द्र वृष्णि ते शवः ।
सद्यः सो अस्य महिमा न संनशे यं क्षोणीरनुचक्रदे ॥ १० ॥

येन । समुद्रम् । असृजः । महीः । अपः । तत् । इन्द्र । वृष्णि । ते । शवः ।
सद्यः । सः । अस्य । महिमा । न । सम्ऽनशे । यम् । क्षोणीः । अनुऽचक्रदे ॥ १० ॥

वेङ्कट० येन समुद्रम् प्रति महतीः[4] "अपः वृष्टिलक्षणाः[5] वि असृजः, तत् इन्द्र! तव बलम् वर्षणशीलम्[6] । सदनार्हः सः अस्य महिमा कैश्चित् न संनाशयितुं शक्यः, यम् इमं पृथिवी अनुक्रमेण क्रन्दते । कामानाम् अभिमतानां याचनं क्रन्दनमिति ॥ १० ॥

[7]इति पञ्चमाष्टके सप्तमाध्याये षड्विंशो वर्गः[7] ॥

शग्धी न इन्द्र यत् त्वा रयिं यामि सुवीर्यम् ।
शग्धि वाजाय प्रथमं सिषासते शग्धि स्तोमाय पूर्व्य ॥ ११ ॥

शग्धि । नः । इन्द्र । यत् । त्वा । रयिम् । यामि । सुऽवीर्यम् ।
शग्धि । वाजाय । प्रथमम् । सिसासते । शग्धि । स्तोमाय । पूर्व्य ॥ ११ ॥

वेङ्कट० शक्तो भवसि अस्माकम् इन्द्र! तत्कर्तुं, यथा त्वा अहम् रयिम् याचे सुवीर्यम् । शग्धि चान्नार्थम् प्रथमम् एव त्वां सम्भक्तुमिच्छते । शग्धि च स्तोमाय, स्तोमः स्तोता तत्कार्यार्थम्, हे प्रत्न! इति ॥ ११ ॥

शग्धी नो अस्य यद्ध पौरमाविथ धिय इन्द्र सिषासतः ।
शग्धि यथा रुशमं श्यावकं कृपमिन्द्र प्रावः स्वर्णरम् ॥ १२ ॥

शग्धि । नः । अस्य । यत् । ह । पौरम् । आविथ । धियः । इन्द्र । सिसासतः ।
शग्धि । यथा । रुशमम् । श्यावकम् । कृपम् । इन्द्र । प्र । आवः । स्वःऽनरम् ॥ १२ ॥

---

1. अन्य मूको. 2. प्रथमेव मूको. 3-3. °प्रस्कण्वम् मूको. 4. महती मूको. 5. वृष्टिरपो ल° मूको. 6. तु. ऋ ५,३५,४. 7-7. नास्ति मूको.

वेङ्कट० शग्धि अस्माकम् अस्य अभिलषितस्य, यथा त्वम् पौरम् रक्षितवान् असि आत्रेयम्। कर्माणि इन्द्र! सम्भक्तुमिच्छत यथा रुशमादीश्च[1] ॥ १२ ॥[2]

कन्नव्यो॑ अत॒सीनां॑ तु॒रो गृ॑णीत॒ मर्त्यः॑ ।
न॒ही न्व॑स्य महि॒मान॑मिन्द्रि॒यं स्व॑र्गृ॒णन्त॑ आन॒शुः ॥ १३ ॥

कत्। नव्य॑ । अ॒त॒सीना॑म् । तु॒र । गृ॒णी॒त॒ । मर्त्य॑ ।
न॒हि । नु । अ॒स्य॒ । म॒हि॒मान॑म् । इ॒न्द्रि॒यम् । स्व॑ । गृ॒णन्त॑ । आ॒न॒शु ॥ १३ ॥

वेङ्कट० [3]क नव्य अतन्तीना[3] स्तुतीना प्रेरयिता स्तुवीत मनुष्य । नहि अस्य महिमानम् इन्द्रियम् च सर्वम् स्तुवन्त पूर्वे कवय आनशु ॥ १३ ॥

कदु॑ स्तु॒वन्त॑ ऋतयन्त दे॒वत॒ ऋषिः॒ को विप्र॑ ओहते ।
क॒दा हवं॑ मघवन्निन्द्र सु॒न्व॒तः कदु॑ स्तुव॒त आ ग॑मः ॥ १४ ॥

कत् । ऊँ॒ इति॑ । स्तु॒वन्त॑ । ऋ॒त॒ऽय॒न्त॒ । दे॒वता॑ । ऋषि॑ । क । विप्र॑ । ओ॒ह॒ते ।
क॒दा । हव॑म् । म॒घ॒ऽव॒न् । इ॒न्द्र॒ । सु॒न्व॒त । कत् । ऊँ॒ इति॑ । स्तु॒व॒त । आ । ग॒म॒ ॥ १४ ॥

वेङ्कट० कदा स्तुवत ववम् ऋतमैच्छन् । ऋषि[4] क मेधावी[4] च स्तुवत च आ गम ॥ १४ ॥

उदु॒ त्ये मधु॑मत्तमा॒ गिरः॒ स्तोमा॑स ईरते ।
स॒त्रा॒जितो॑ धन॒सा अक्षि॑तोतयो वा॒जय॑न्तो॒ रथा॑ इव ॥ १५ ॥

उत् । ऊँ॒ इति॑ । त्ये । मधु॑मत्ऽतमा । गिर॑ । स्तोमा॑स । ईर॒ते॒ ।
स॒त्रा॒ऽजित॑ । ध॒न॒ऽसा । अक्षि॑तऽऊतय । वा॒ज॒ऽयन्त॑ । रथा॑ऽइव ॥ १५ ॥

वेङ्कट० उत् ईरते अमी मधुमत्तमा स्तुती स्तोमा स्तोतार सर्वस्य जेतार[5] धनस्य सम्भक्तार अक्षितरक्षणा अन्नमिच्छन्त । यथा रथा एवविधा सङ्ग्राम प्रविशन्तोऽक्षशब्द कुर्वन्ति ॥ १५ ॥

[6]इति पञ्चमाष्टके सप्तमाध्याये सप्तविंशो वर्ग [6] ॥

कण्वा॑ इव॒ भृग॑वः॒ सूर्या॑ इव॒ विश्व॒मिद् धी॒तमा॑नशुः ।
इन्द्रं॒ स्तोमे॑भि॒र्म॒हय॑न्त आ॒यवः॑ प्रि॒यमे॑धासो अस्वरन् ॥ १६ ॥

कण्वा॑ऽइव । भृग॑व । सूर्या॑ऽइव । विश्व॑म् । इत् । धी॒तम् । आ॒न॒शु ।
इन्द्र॑म् । स्तोमे॑भि । म॒हय॑न्त । आ॒यव॑ । प्रि॒यऽमे॑धास । अ॒स्व॒र॒न् ॥ १६ ॥

---

१. रुशमादी वि[1]. २ सु ऋ ८,४,२,१२,२ ३ ३ · तानां मूको ४. ऋषी अ[1], ऋषी वि[1]. ५ मेधा मूको । मत्र ग्रन्थपातोऽनुमीयते ६ चेनारो मूको ७ ७. नास्ति मूको

वेङ्कट० भृगुकुलजाः कण्वकुलजाताः इव तथा सूर्याः इव च विश्वम् एव प्रीतम् आनशुः चिन्तयन्तः प्रापुः। कम् इत्याह—इन्द्रमिति। इन्द्रम् स्तोत्रैः पूजयन्तः, आयवः प्रियमेधस्य पुत्राः अकीर्तयन्नाह्वयन्, प्रीतं च आनशुरिति ॥ १६ ॥[1]

युक्ष्वा हि वृत्रहन्तम हरी इन्द्र परावतः ।
अर्वाचीनो मघवन्त्सोमपीतय 'उग्र ऋष्वेभिरा गहि' ॥ १७ ॥

युक्ष्व । हि । वृत्रहन्ऽतम । हरी इति । इन्द्र । पराऽवतः ।
अर्वाचीनः । मघऽवन् । सोमऽपीतये । 'उग्रः । ऋष्वेभिः । आ । गहि' ॥ १७ ॥

वेङ्कट० योजय हे वृत्राणाम्[3] अतिशयेन 'हन्तः! अश्वौ'[4] इन्द्र! दूरात् आगन्तुम्[5]। अभिमुखः मघवन्! सोमपानाय उद्गूर्णः दर्शनीयैः अन्यैर्देवैः सह आ गच्छ ॥ १७ ॥

इमे हि ते कारवो वावशुर्धिया विप्रासो मेधसातये ।
स त्वं नो मघवन्निन्द्र गिर्वणो वेनो न शृणुधी हवम् ॥ १८ ॥

इमे । हि । ते । कारवः । वावशुः । धिया । विप्रासः । मेधऽसातये ।
सः । त्वम् । नः । मघऽवन् । इन्द्र । गिर्वणः । वेनः । न । शृणुधि । हवम् ॥ १८ ॥

वेङ्कट० इमे हि स्तोतारः त्वां कामयन्ते 'बुद्ध्या मेधाविनः'[6] यज्ञभजनाय कथं त्वं[6] यज्ञमागच्छेरिति। सः त्वम् नः हे मघवन्! इन्द्र! गीर्भिर्वननीय! कामी इव शृणु ह्वानम् ॥ १८ ॥

निरिन्द्र बृहतीभ्यो वृत्रं धनुभ्यो अस्फुरः ।
निरर्बुदस्य मृगयस्य मायिनो निः पर्वतस्य गा आजः ॥ १९ ॥

निः । इन्द्र । बृहतीभ्यः । वृत्रम् । धनुऽभ्यः । अस्फुरः ।
निः । अर्बुदस्य । मृगयस्य । मायिनः । निः । पर्वतस्य । गाः । आजः ॥ १९ ॥

वेङ्कट० यदा त्वम् इन्द्र! बृहतीभ्यः धनुभ्यः[8] महतोऽन्तरिक्षात् वृत्रम् निः अस्फुरः निरगमयः, तदानीम् अर्बुदादीनाम्[9] असुराणां मायावतां पशून् निः आज इति ॥ १९ ॥

निरग्नयो रुरुचुर्निरु सूर्यो निः सोम इन्द्रियो रसः ।
निरन्तरिक्षादधमो महामहिं कृषे तदिन्द्र पौंस्यम् ॥ २० ॥

निः । अग्नयः । रुरुचुः । निः । ऊँ इति । सूर्यः । निः । सोमः । इन्द्रियः । रसः ।
निः । अन्तरिक्षात् । अधमः । महाम् । अहिम् । कृषे । तत् । इन्द्र । पौंस्यम् ॥ २० ॥

---

१. तु. ऋ ८,३,७,४०,३. २-२. ऋ ८,५०,५. ३. शिशत्राणाम् मूको. ४-४. हन्तारश्च वि[2]; हन्तश्वौ अ[1]. ५. गन्तुमिच्छन्तो अ[1]. ६-६. मेधाविनो बुध्या अ[1]. ७. त्वत् मूको. ८. =धन्वभ्यः (तु. ऋ १,१४४,५ भाष्यम्, इह मान्तरीयोत्तरो मन्त्रश्च), धनुर्भ्यः मूको. ९. अर्बुदा" मूको.

वेङ्कट० अग्नयः निः[1] हरन्तु निरगच्छन्। निः एव सूर्यः। निः[1] हरुचे सोमः चन्द्रमाश्च इन्द्रस्य जुष्टः रसात्मकः[2]। कदा इत्याह—निः अधमः त्वम् अन्तरिक्षात् महान्तम् अहिम् असुरम् तदानीमिति। तत् इदं सर्वम् अवश्यम् अकृथाः त्वम् इन्द्र। इति ॥ २० ॥[3]

[4]इति पञ्चमाष्टके सप्तमाध्याये अष्टाविंशो वर्गः[4] ॥

यं मे दुरिन्द्रो मरुतः पाकस्थामा कौरयाणः ।
विश्वेषां त्मना शोभिष्ठमुपेव दिवि धावमानम् ॥ २१ ॥

यम् । मे । दुः । इन्द्रः । मरुतः । पाकऽस्थामा । कौरयाणः ।
विश्वेषाम् । त्मना । शोभिष्ठम् । उपऽइव । दिवि । धावमानम् ॥ २१ ॥

वेङ्कट० यम् मे प्रायच्छन् इन्द्रः मरुतः पाकस्थामा च कौरयाणः त्वत्प्रेषितः विश्वेषाम् अश्वानाम् आत्मना अत्यन्तं शोभयितारम् अन्यानश्वान् सहकारिणः शोभमन्तम् वेगमहत्तया [5]दिवि धावमानम्[5], तम् अहं प्रत्यगृह्णामिति वाक्यशेषः ॥ २१ ॥

रोहितं मे पाकस्थामा सुधुरं कक्ष्यप्राम् । अदाद् रायो विबोधनम् ॥ २२ ॥

रोहितम् । मे । पाकऽस्थामा । सुऽधुरम् । कक्ष्यऽप्राम् ।
अदात् । रायः । विऽबोधनम् ॥ २२ ॥

वेङ्कट० रोहितम्[6] मह्यम् पाकस्थामा शोभनधुरम्[7] कक्ष्यायाः पूरयितारम् अदात्[8] धनस्य विशेषेण बोधयितारं प्रापकमिति ॥ २२ ॥

यस्मा अन्ये दश प्रति धुरं वहन्ति वह्नयः । अस्तं वयो न तुग्र्यम् ॥ २३ ॥

यस्मै । अन्ये । दश । प्रति । धुरम् । वहन्ति । वह्नयः । अस्तम् । वयः । न । तुग्र्यम् ॥ २३ ॥

वेङ्कट० यस्मै रोहिताय अन्ये दश अश्वाः प्रति वहन्ति धुरम् वोढारः, सोऽयमेको धुरं वहति, अपरां धुरं दश वहन्ति, सोऽयं रथम् अत्यन्तशीघ्रं वहति[9], यथा तुग्रपुत्रं भुज्युं गृहं प्रति नयन्तः अश्विनोरश्वाः तद्वत् शीघ्रमवहन्निति[10] ॥ २३ ॥

आत्मा पितुस्तनूर्वास ओजोदा अभ्यञ्जनम् ।
तुरीयमिद् रोहितस्य पाकस्थामानं भोजं दातारमब्रवम् ॥ २४ ॥

आत्मा । पितुः । तनूः । वासः । ओजःऽदाः । अभिऽअञ्जनम् ।
तुरीयम् । इत् । रोहितस्य । पाकऽस्थामानम् । भोजम् । दातारम् । अब्रवम् ॥ २४ ॥

१-१. नि मूको. २. तु. ऋ ९,४७,१; रसात्मक मूको. ३. तु. ऋ ८,१२,२;९१,८ प्रभृ. ४-४. नास्ति मूको. ५-५. दिवी त्वावधत्वमानम् अ[1]. ६. पुरोहितं अ[1]. ७. शोभनमधुर मूको. ८. मदात् मूको. ९. वहन्ति मूको. १०. तु. ऋ ८,७४,१४ प्रभृ.

वेङ्कट० 'शरीरभूतम् अन्नम्', तनुभूतम् वासः । स्वद्गो[2] हि भवति 'वाससा संवीतः[3]' । बलस्य साधकम् अभ्यञ्जनम्[4] तैलमिति त्रीणि । तुरीयम् किमपेक्षितमिति पृच्छ्यमानोऽहं रोहितवर्णस्य अश्वस्य दातारम् पाकस्थामनामानं[5] भोजम् ब्रवीमि । अयं चापेक्षित इति सर्वप्रदातारमिमं च ब्रवीमीति[6] ॥ २४ ॥

[7]इति पञ्चमाष्टके सप्तमाध्याये एकोनत्रिंशो वर्गः[7] ॥

[४]

[7]देवातिथिः काण्व ऋषिः । इन्द्रो देवता, पञ्चदश्याद्यष्टादश्यन्तानां पूषा वा, अन्त्यानां तिसृणां कुरुङ्गः । प्रगाथश्छन्दः (=विषमा बृहत्यः, समाः सतोबृहत्यः), अन्त्या पुरउष्णिक्[7] ।

यदि॑न्द्र॒ प्रागपा॒गुद॒ङ् न्य॑ग् वा हू॒यसे॒ नृभिः॑ ।
सिमा॑ पु॒रू नृषू॑तो अ॒स्यान॒वेऽसि॑ प्रशर्ध तु॒र्वशे॑ ॥ १ ॥

यत् । इ॒न्द्र॒ । प्राक् । अपा॑क् । उद॑क् । न्य॑क् । वा॒ । हू॒यसे॑ । नृऽभिः॑ ।
सिमे॑ । पु॒रु । नृऽसू॑तः । अ॒सि॒ । आन॑वे । असि॑ । प्र॒ऽश॒र्ध॒ । तु॒र्वशे॑ ॥ १ ॥

वेङ्कट० देवातिथिः[8] । यद्यपि इन्द्र ! त्वं सर्वतो मनुष्यैः आ हूयसे । हे स्तोतृभिर्बध्यमान ! पुरुषु देवेषु स्तोतृभिः प्रेरितः आनवे भवसि[9] । अनोः[10] पुत्र आनवः । तथा भवसि हे प्रकृष्टवेग ! तुर्वशे च । देवातिथेर्याज्यौ नूनमिमाविति ॥ १ ॥

यद् वा॒ रुमे॒ रुश॑मे॒ श्याव॑के॒ कृप॒ इन्द्र॑ मा॒दय॑से॒ सचा॑ ।
कण्वा॑सस्त्वा॒ ब्रह्म॑भिः॒ स्तोम॑वाहस॒ इन्द्रा य॑च्छ॒न्त्या ग॑हि ॥ २ ॥

यत् । वा॒ । रुमे॑ । रुश॑मे । श्याव॑के । कृपे॑ । इन्द्र॑ । मा॒दय॑से । सचा॑ ।
कण्वा॑सः । त्वा॒ । ब्रह्म॑ऽभिः । स्तोम॑ऽवाहसः । इन्द्र॑ । आ । य॒च्छ॒न्ति॒ । आ । ग॒हि॒ ॥ २ ॥

वेङ्कट० यत् वा रुमे रुशमादिष्वन्यतमे इन्द्र ! मादयसि सहायम् । कण्वासः त्वां स्तोत्रैः[11] स्तोत्रवाहनाः स्तोत्रेण त्वां वहन्तः इन्द्र ! आ यच्छन्ति । अतः आ गच्छ ॥ २ ॥

यथा॑ गौ॒रो अ॒पा कृ॒तं तृष्य॒न्नेत्यवेरि॑णम् ।
आ॒पि॒त्वे नः॑ प्रपि॒त्वे तूय॒मा ग॑हि॒ कण्वे॑षु॒ सु सचा॒ पिब॑ ॥ ३ ॥

यथा॑ । गौ॒रः । अ॒पा । कृ॒तम् । तृष्य॑न् । एति॑ । अव॑ । इरि॑णम् ।
आ॒ऽपि॒त्वे । नः॒ । प्र॒ऽपि॒त्वे । तूय॑म् । आ । ग॒हि॒ । कण्वे॑षु । सु । सचा॑ । पिब॑ ॥ ३ ॥

१-१. शरीरमन्नमूतम् वि[?]. २. स्वङ्गे मूको. ३-३. वाससा संवीतः मूको. ४. अभ्यञ्जनं मूको. ५. पाकस्थामना° वि[?]. ६. ब्रवीति मूको. ७-७. नास्ति मूको. ८. देवातिथि मूको. ९. इवसि मूको. १०. अनो मूको. ११. सोमैः मूको.

वेङ्कट० यथा गौर मृग उदकेन कृतम् इरिणम्[1] मृगतृष्णाम् उदकमिति मन्यमान तृष्यन् अव गच्छति, तथा त्वम् अन्नम् आपित्वे प्रपित्वे च प्रातश्च सायं च अस्माकं तूर्णम् आ गच्छ । यज्ञेषु सुष्ठु पिब सोम सहायभूतम् ॥ ३ ॥

मन्दन्तु त्वा मघवन्निन्द्रेन्दवो राधोदेयाय सुन्वते ।
आमुष्या सोममपिबश्चमू सुतं ज्येष्ठं तद् दधिषे सहः ॥ ४ ॥

मन्दन्तु । त्वा । मघऽवन् । इन्द्र । इन्दवः । राधःऽदेयाय । सुन्वते ।
आऽमुष्य । सोमम् । अपिबः । चमू इति । सुतम् । ज्येष्ठम् । तत् । दधिषे । सहः ॥ ४ ॥

वेङ्कट० मदन्तु त्वाम् मघवन्! इन्द्र! सोमा धन दातु यजमानाय । "आमुष्य सोमम्। आमोषणम्[2] आदानम् । अपिब अधिषवणफलकयो सुतम् । तदानीम् ज्येष्ठम् बलम् धारयसि ॥ ४ ॥

प्र चक्रे सहसा सहो बभञ्ज मन्युमोजसा ।
विश्वे त इन्द्र पृतनायवो यह्वो नि वृक्षा इव येमिरे ॥ ५ ॥

प्र । चक्रे । सहसा । सहः । बभञ्ज । मन्युम् । ओजसा ।
विश्वे । ते । इन्द्र । पृतनाऽयवः । यह्वो इति । नि । वृक्षाःऽइव । येमिरे ॥ ५ ॥

वेङ्कट० प्र करोति बलेन अभिभवनम्[3] शत्रूणाम् । तथा बभञ्ज च अभिमन्तार शत्रुम् बलेन । विश्वे "तव इन्द्र!" पृतनाकामा शत्रव हे महन्[1] वृक्षा इव नियता भवन्ति । तव बल दृष्ट्वा स्वेस्वे स्थाने निश्चला आसत इति ॥ ५ ॥

[4]इति पञ्चमाष्टके सप्तमाध्याये त्रिंशो वर्ग[5] ॥

सहस्रेणेव सचते यवीयुधा यस्त आनळुपस्तुतिम् ।
पुत्रं प्रावर्गं कृणुते सुवीर्ये दाश्नोति नमउक्तिभिः ॥ ६ ॥

सहस्रेणऽइव । सचते । यविऽयुधा । यः । ते । आनट् । उपऽस्तुतिम् ।
पुत्रम् । प्रावर्गम्[6] । कृणुते । सुऽवीर्ये । दाश्नोति । नमउक्तिऽभिः ॥ ६ ॥

वेङ्कट० सहस्रेण इव संसृष्टो भवति "पुन पुन योद्धा" पुत्रेण, य ते प्राप्नोति उपस्तुतिम्, पुत्रम् प्रच्छदनकुशलम्[8] करोति च सुवीर्ये युद्धे पुरस्करोति, य प्रयच्छति तुभ्य हवि स्तुतिभि सह ॥ ६ ॥

---

१. यथ तु या (९,८), इरिण मूको २ २. मुष्यतो ममघोष° मूको. ३. °भिमवना मूको ३ ४. तदेव मूको. ५ ५ नास्ति मूको. ६. प्र(<प्र) -व° इति पदविभाग द्र ७ ७. युध्यते-अकरीतवृत्तम् (तु वेप १,२९०० n), पुत्रयोधा वि[3], पुना योद्धा अ[2]. ८ पुच्छेदकुशलम् वि[1].

मा भेम मा श्रमिष्मोग्रस्य सख्ये तव ।
महत् ते वृष्णो अभिचक्ष्यं कृतं पश्येम तुर्वशं यदुम् ॥ ७ ॥

मा । भेम । मा । श्रमिष्म । उग्रस्य । सख्ये । तव ।
महत् । ते । वृष्णः । अभिऽचक्ष्यम् । कृतम् । पश्येम । तुर्वशम् । यदुम् ॥ ७ ॥

वेङ्कट० मा बिभिम[1], मा च श्रमिष्म उद्गूर्णस्य तव सख्ये सति । महत् हि ते वर्षितुः अभिदर्शनीयम् कर्म । पश्येम वयम् तुर्वशम् यदुम् च धनलिप्सवः (द्र. ऋ ५,३१,८) ॥ ७ ॥

सव्यामनु स्फिग्यं वावसे वृषा न दानो अस्य रोषति ।
मध्वा संपृक्ताः सारघेण धेनवस्तूयमेहि द्रवा पिब ॥ ८ ॥

सव्याम् । अनु । स्फिग्यम् । वावसे । वृषा । न । दानः । अस्य । रोषति ।
मध्वा । सम्ऽपृक्ताः । सारघेण । धेनवः । तूयम् । आ । इहि । द्रव । पिब ॥ ८ ॥

वेङ्कट० दोहार्थम् सव्याम् स्फिजम् अनु यः वावसे[2] वृषा वसति । तत्र ब्रूमो यो दोग्धि । न च दुग्धस्य तुभ्यं दाता रुषितो भवति त्वया फलेन संयोज्यमानः । दुग्धेन पयसा प्रीणयितारः सोमाश्च सम्पृक्ताः मधुना सारघेण इत्यौपमिकम् । अथ हे इन्द्र! क्षिप्रम् आ इहि, द्रव, पिब च । आगतस्य पानस्थानम् प्रति [3]गमनं द्रवणम्[3] । आ पिब वा त्वरमाणम् इति ॥ ८ ॥

अश्वी रथी सुरूप इद् गोमाँ इदिन्द्र ते सखा ।
श्वात्रभाजा वयसा सचते सदा चन्द्रो याति सभामुप ॥ ९ ॥

अश्वी । रथी । सुऽरूपः । इत् । गोऽमान् । इत् । इन्द्र । ते । सखा ।
श्वात्रऽभाजा । वयसा । सचते । सदा । चन्द्रः । याति । सभाम् । उप ॥ ९ ॥

वेङ्कट० अश्वी रथी सुरूप: एव गोमान् एव इन्द्र! तव सखा सुखभाजा पुष्करेन पयसा संसृष्टो भवति । सदा आह्लादकश्च[4] उप गच्छति सभाम्[5] ॥ ९ ॥

ऋश्यो न तृष्यन्नवपानमा गहि पिबा सोमं वशाँ अनु ।
निमेघमानो मघवन् दिवेदिव ओजिष्ठं दधिषे सहः ॥ १० ॥

ऋश्यः । न । तृष्यन् । अवऽपानम् । आ । गहि । पिब । सोमम् । वशान् । अनु ।
निऽमेघमानः । मघऽवन् । दिवेऽदिवे । ओजिष्ठम् । दधिषे । सहः ॥ १० ॥

---

१. बिभिहि वि[1]; बिभिहिम अ[1]. २. वा मूको. ३-३. गमन '' वणम् वि[1]; गमन ''' वणम अ[1]. ४. ह्लादकाश्च मूको. ५. सुमहान्तम् अ[1].

वेङ्कट० 'ऋष्यः इव मृगः[1] तृष्यन् उदकपानस्थानम् आ गच्छ सोमपानस्थानम्, पिब सोमम्[2] कामान् अनु, सोमं स्थितं निषिञ्चन्[3] । अन्वहम्[4] ममत्रन्[5] ओजस्वितमम् धारयसि बलम् ॥ १० ॥

[5]इति पञ्चमाष्टके सप्तमाध्याये एकत्रिंशो वर्गः[5] ॥

अध्वर्यो द्रावया त्वं सोममिन्द्रः पिपासति ।
उप नूनं युयुजे वृषणा हरी आ च जगाम वृत्रहा ॥ ११ ॥

अध्वर्यो इति । द्रवय । त्वम् । सोमम् । इन्द्रः । पिपासति ।
उप । नूनम् । युयुजे । वृषणा । हरी इति । आ । च । जगाम । वृत्रऽहा ॥ ११ ॥

वेङ्कट० 'अध्वर्यो! अंशुभ्यः[6] द्रावय त्वम् सोमम् अभिषुणु सोमम् । इन्द्रः पिपासति । उप युयुजे च स्वरथे इदानीं पुमांसौ अश्वौ । आ जगाम वृत्रहा तदानीमेव ॥ ११ ॥

स्वयं चित् स मन्यते दाशुरिर्जनो यत्रा सोमस्य तृम्पसि ।
इदं ते अन्नं युज्यं समुक्षितं तस्येहि प्र द्रवा पिब ॥ १२ ॥

स्वयम् । चित् । सः । मन्यते । दाशुरिः । जनः । [7]यत्र । सोमस्य । तृम्पसि[7] ।
इदम् । ते । अन्नम् । युज्यम् । सम्ऽउक्षितम् । तस्य । आ । इहि । प्र । द्रव । पिब ॥ १२ ॥

वेङ्कट० स्वयम् एव दाता [8]सः जनः[8] भवन्(?)[8] मन्यते, क्षिप्रं दित्सति, यत्र यज्ञे त्वं सोमेन तृप्तो भवसि तत्र वर्तमानः । इदम् ते अन्नम् पानयोग्यं पात्रेषु समुक्षितम् । तत् आ गच्छ, प्र द्रव, तत् पिब, चेति ॥ १२ ॥

रथेष्ठायाध्वर्यवः सोममिन्द्राय सोतन ।
अधि ब्रध्नस्याद्रयो वि चक्षते सुन्वन्तो दाश्वध्वरम् ॥ १३ ॥

रथेऽस्थाय । अध्वर्यवः । सोमम् । इन्द्राय । सोतन ।
अधि । ब्रध्नस्य । अद्रयः । वि । चक्षते । सुन्वन्तः । दाशुऽअध्वरम् ॥ १३ ॥

वेङ्कट० रथे स्थिताय हे अध्वर्यवः! सोमम् इन्द्राय अभिषुणुत । अधि वि चक्षते निवेदयन्ति महतः इन्द्रस्य ग्रावाणः[9] सोमम् अभिषुण्वन्तः दाश्वध्वरम् । एतयज्ञ[10] यजमानमुच्चैर्घुष्यन्तो यजतेऽयम् इति निवेदयन्ति[11] । 'वग्नुनेन्द्रं ह्वयत । घोषेणामीवाश्चातयत' (तैमा ३,७,९,१) इति मन्त्र. ॥ १३ ॥

१-१. ऋश्य एव मृ° वि[1]; ऋश्यगो ··· मृ° अ[1]. २. सोमेषु मूको. ३. निषिञ्च मूको. ४. कामानवर्द मूको. ५-५. नास्ति मूको. ६-६. 'याग्र° मूको. ७-७. द्र. ऋ ८,५२,४. ८. भवान मूको. ९ °वाणस्ते अ[1]. १०. यद्दी यज्ञं मूको. ११. °वन्तीति अ[1].

उप॑ ब्र॒ध्नं वा॒वाता॒ वृष॑णा॒ हरी॒ इन्द्र॑म॒पसु॑ वक्षतः ।
अ॒र्वाञ्चं॑ त्वा॒ सप्त॑योऽध्वर॒श्रियो॒ वह॑न्तु॒ सव॒नेदुप॑ ॥ १४ ॥

उप॑ । ब्र॒ध्नम् । व॒वाता॑ । वृष॑णा । हरी॒ इति॑ । इन्द्र॑म् । अ॒पऽसु॑ । व॒क्षत॒ः ।
अ॒र्वाञ्च॑म् । त्वा॒ । सप्त॑यः । अ॒ध्व॒र॒ऽश्रियः॑ । वह॑न्तु । सव॑ना । इत् । उप॑ ॥ १४ ॥

वेङ्कट० उप वहतः महान्तम् गमनशीलौ पुमांसौ अश्वौ इन्द्रम् अप्सु कर्मसु । 'सकारलोपश्छान्दसः ।
अर्वाञ्चम् त्वाम्' अश्वा यज्ञ श्रयन्तः वहन्तु सवनानां समीपे ॥ १४ ॥

प्र पू॒षणं॑ वृणीमहे॒ युज्या॑य पुरू॒वसु॑म् ।
स श॑क्र शिक्ष पुरुहूत नो धि॒या तुजे॑ रा॒ये वि॑मोचन ॥ १५ ॥

प्र । पू॒षण॑म् । वृ॒णी॒म॒हे॒ । युज्या॑य । पु॒रु॒ऽवसु॑म् ।
सः । श॒क्र॒ । शि॒क्ष॒ । पु॒रु॒ऽहू॒त॒ । नः॒ । धि॒या । तुजे॑ । रा॒ये । वि॒ऽमो॒च॒न॒ ॥ १५ ॥

वेङ्कट० शौनक — "पौष्णी प्रे('प्र' इ)ति प्रगाथौ द्वौ मन्यते शाकटायनः ।
ऐन्द्रमेवाद्य[1] पूर्वं तु गालवः[2] पौष्णमुत्तरम्" ॥ (बृदे ६,४२) ॥

कात्यायनस्तु — 'नराशं "पौष्णो वा' (ऋअ २,८,४) इति[3] वदति ।
प्र वृणीमहे पूषणम् युज्याय सहायाय इन्द्राय बहुधनम् । इन्द्रो धनं प्रयच्छन्[4] पूष्ण. प्रयच्छति ततस्तस्य प्रथममाह्वानम्[5] । स त्वम् शक्र । पूष्णो धनमादाय पुरुहूत[1] प्रयच्छ अस्मभ्यं कर्मणा पुत्राय धनाय च हे विशेषेण प्रदात. ! ॥ १५ ॥

"इति पञ्चमाष्टके सप्तमाध्याये द्वात्रिंशो वर्गः" ॥

सं नः॑ शिशीहि भु॒रिजो॑रिव क्षु॒रं रास्व॑ रा॒यो वि॑मोचन ।
त्वे तन्नः॑ सु॒वेद॑मु॒स्रियं॒ वसु॒ यं त्वं हि॒नोषि॒ मर्त्य॑म् ॥ १६ ॥

सम् । न॒ । शि॒शी॒हि॒ । भु॒रिजो॑ऽइव । क्षु॒रम् । रास्व॑ । रा॒य । वि॒ऽमो॒च॒न॒ ।
त्वे इति॑ । तत् । न॒ । सु॒ऽवेद॑म् । उ॒स्रिय॑म । वसु॑ । यम् । त्वम् । हि॒नोषि॑ । मर्त्य॑म् ॥ १६ ॥

वेङ्कट० तीक्ष्णीकुरु अस्मान्, यथा नापित[6] प्रवृद्धकेशस्य क्षुरम्[7] तीक्ष्णीकरोति । देहि धनानि हे विमोचनशील ! । त्वयि अस्मभ्य[8] गवात्मक धन सुलभ भवति, यम् च त्वम् प्रीणयसि मर्त्यम् । यद् अस्मभ्यं[11] त्वयि सुलभ धनम्, य चास्मत्तोऽन्य युद्धे प्रेरयसि तस्य सुलभमिति ॥१६॥

वेमि॑ त्वा पूषन्नृ॒ञ्जसे॒ वेमि॒ स्तोत॑व आघृणे ।
न तस्य॑ वेम्यर॑णं॒ हि तद् व॑सो स्तु॒षे प॒ज्राय॒ साम्ने॑ ॥ १७ ॥

---

१ १. 'न्द्रस्त ··· त्वाम् मूको. २. ऐन्द्रमेवाथ अ'. ३ °ल्वा वि'; °लवा अ'. ४-४. पौष्णी चेति वि'; पौष्णश्चेति अ'. ५. °च्छत् मूको. ६ °ह्वान मूको. ७-७. नास्ति मूको. ८ नापितः मूको. ९. (नापितस्य) हस्तयो. (तु. निघ २,४) क्षुरमिव सा. प्रभृ १०. मध्य मूको. ११. यदास्म° मूको.

वेमि । त्वा । पूषन् । ऋञ्जसे । वेमि । स्तोतवे । आघृणे ।
न । तस्य । वेमि । अरणम् । हि । तत् । वसो इति । स्तुषे । पज्राय । साम्ने ॥ १७ ॥

वेङ्कट० अभिगच्छामि त्वा[1] पूषन्! हविर्भिः प्रसाधयितुम् । वेमि स्तोतुं त्वा हे आगतदीप्ते![2] । न तत् गच्छामि त्वत्तोऽप्यतिरिक्तम् । अरणम् 'हि तत्' भवति । [3]यद्वा कामये त्वां प्रसाधयितुं स्तोतुं च । न तत् कामये यद् अरमणं भवति[3] । वसो! स्तौमि च वेगवते तुभ्यम् साम्ने संनमयते[4] ॥ १७ ॥

परा गावो यवसं कच्चिदाघृणे नित्यं रेक्णो अमर्त्य ।
अस्माकं पूषन्नविता शिवो भव मंहिष्ठो वाजसातये ॥ १८ ॥

परा । गावः । यवसम् । कत् । चित् । आघृणे । नित्यम् । रेक्णः । अमर्त्य ।
अस्माकम् । पूषन् । अविता । शिवः । भव । मंहिष्ठः । वाजऽसातये ॥ १८ ॥

वेङ्कट० परा गच्छेयुः यवसम् आगतदीप्ताः गाव कदा चित् अपि यवसमेव प्रति गच्छेयुः आगतदीप्ते! । नित्यम् धनम् अस्माकं गावः हे अमर्त्य! । अस्माकम् हे पूषन्! अविता कल्याणः भव[5] दातृतमः धनलाभाय ॥ १८ ॥

स्थूरं राधः शताश्वं कुरुङ्गस्य दिविष्टिषु ।
राज्ञस्त्वेषस्य सुभगस्य रातिषु तुर्वशेष्वमन्महि ॥ १९ ॥

[6]स्थूरम् । राधः । शतऽअश्वम् । कुरुङ्गस्य । दिविष्टिषु ।[6]
राज्ञः । त्वेषस्य । सुऽभगस्य । रातिषु । तुर्वशेषु । अमन्महि ॥ १९ ॥

वेङ्कट० 'ऐन्द्राणामिह सूक्तानाम् [7]उत्तमस्योत्तमे तृचे[7] । दानं राज्ञः कुरुङ्गस्य स्थूरं राध इति स्तुतम्' (बृदे ६,४४) । स्थूलं धनं महद्धनं बह्वश्वम् कुरुङ्गस्य दिवसागमनेषु[8] बहुदानं[9] भवति । राज्ञः दीप्तस्य सुधनस्य कुरुङ्गस्य रातिषु तुर्वशेषु मनुष्येषु स्तुमः — एतावन्महद्धनं दत्तमिति ॥ १९ ॥

धीभिः सातानि काण्वस्य वाजिनः प्रियमेधैरभिद्युभिः ।
षष्टिं सहस्रानु निर्मजामजे निर्यूथानि गवामृषिः ॥ २० ॥

धीभिः । सातानि । काण्वस्य । वाजिनः । प्रियऽमेधैः । अभिद्युऽभिः ।
षष्टिम् । सहस्रा । अनु । निःऽमजाम् । अजे । निः । यूथानि । गवाम् । ऋषिः ॥ २० ॥

वेङ्कट० कर्मभिः भक्तानि काण्वस्य [10]देवातिथेः वाजिनः[10] प्रियमेधैः अभिगतदीप्तिभिः[11] नितरां शुद्धानाम् गवाम् षष्टिम् सहस्राणि प्रियमेधेभ्यो देवातिथिः ऋषिः यूथभूतानि अनुक्रमेण नि. अजे इति ॥ २० ॥

---

१. त्वा अ[1]. २. दगन° अ[1]. ३-३. नास्ति अ[1]'. ४. °वनीति अ[1]. ५ भवथा अ[1]. ६-६. तु. यास्कः (६,२२) ७-७. तदेतत् वृ° मूको. ८. =अहर्मुखेषु, उषस्सु (तु. ऋ १,४५,७ प्रभृ. ७,४,१ च); दिवसेष्वग्नु वि[1]; दिवसेषु अह्नस्सु अ[1]. ९. भहिदान अ[1]; बहिदा° वि[1]. १०-१०. °तिथे··· वि[1] अ[1]. ११. अभिग. अ[1].

वृक्षाश्चिन्मे अभिपित्वे अरारणुः ।
गां भजन्त मेहनाश्वं भजन्त मेहना ॥ २१ ॥

वृक्षाः । चित् । मे । अभिऽपित्वे । अरारणुः ।
गाम् । भजन्त । मेहना । अश्वम् । भजन्त । मेहना ॥ २१ ॥

वेङ्कट० वृक्षाः अपि आश्रमगताः मम अभिप्राप्तौ अरारणुः हर्षाच्छब्दमकुर्वन् । यद्वा रेमिरे । मया प्रतिगृहीताम् गाम् भजन्त मेहनानि सेचमानानि[१], एवम् अश्वम् च । गावोऽश्वाश्च आश्रमस्थिता मूत्रयन्त इति ॥ २१ ॥

[२]इति पञ्चमाष्टके सप्तमाध्याये त्रयस्त्रिंशो वर्गः[२] ॥

व्याख्यत् सप्तममध्यायं पञ्चमस्याष्टकस्य सः ।
गोवर्धनकुले जातो माधवः सुन्दरीसुतः ॥

इति वेङ्कटमाधवाचार्यविरचिते ऋक्संहिताव्याख्याने पञ्चमाष्टके सप्तमोऽध्यायः ॥

—*—

इति ऋग्वेदे सभाष्ये पञ्चमाष्टके सप्तमोऽध्यायः ॥

१. वैतु. द्र. SEY ११७; यास्कः (४,४). २-२. नास्ति मूको.

अथ अष्टमोऽध्यायः ।

वेङ्कट० 'दूरादिहेव यत्सती'[१] स्याचिख्यासति माधवः ।
पितृपुत्रसमावेशे वक्तव्यं सम्प्रदर्शयन् ॥ १ ॥

कण्वस्य पुत्रः प्रस्कण्वः '[२]प्र वो यह्वम्'† पितुः[२] स्मृतम्[३] ।
आर्षम् 'अग्ने विवस्वत्'[४] च पुत्रस्य तदनन्तरम् ॥ २ ॥

मधुच्छन्दाः पिता पुत्रम् आहुस्तस्य धनञ्जयम्[५] ।
'अग्निमीळे'[६] मधुच्छन्दाः 'इन्द्रं विश्वाः'[७] धनञ्जयः ॥ ३ ॥

विश्वामित्रः पिता पुत्र ऋषभस्तस्य कीर्तितः ।
पितुः 'सोमस्य'[८] इत्यार्षम् ऋषभस्य 'प्र वः'[९] स्मृतम् ॥ ४ ॥

अर्चनानाः पिता पुत्रः श्यावाश्वस्तस्य[१०] कीर्तितः ।
'ऋतस्य गोपावधि तिष्ठथः'[११] पितुरार्षं विदुः ॥ ५ ॥

'प्र श्यावाश्व'[१२] पितुः पूर्वं पुत्रः श्यावाश्व आगतः ।
पितृपुत्रविपर्यासे किन्तु स्यादत्र कारणम् ॥ ६ ॥

बहूनि पश्यन् सूक्तानि श्यावाश्वः पूर्वमागतः ।
अर्चनाना[१३] पिता पश्चाद् इति वृद्धेभ्य आगमः ॥ ७ ॥

विश्वामित्रपिता गाथिः स विश्वामित्रमण्डले ।
पश्चात् पुत्राद् आजगाम स चासीदपिरल्पदृक्[१४] ॥ ८ ॥

कतस्य[१५] "पुत्र उत्कीलस्तस्य[१६] सूक्ते 'वि पाजसा'[१७] ।
पितुश्च सूक्ते द्वे एव 'समिध्यमानः'[१८], 'भवा नः'[१९] ॥ ९ ॥

ऋषयस्त्रयोदशाऽपश्यन् सुनुदंश[२०] पिता ततः ।
बलाधिक्य सूक्तसाम्यं पिता पश्चात् समागतः ॥ १० ॥

---

१. यत्पेति मू[१] वैङ्कम. २-२. प्रतीऽवं ··· वि[१] ··· मू[१]. † ऋ १, ३६, १.
३. मतम् वैङ्कम. ४. ऋ १,४४,१. ५. धनञ्जयम् वैङ्कम. ६. ऋ १,१,१. ७. ऋ १,११,१.
८. ऋ ३ १,१. ९. ऋ ३,१३,१. १०. श्यावाश्व° वि[१] मू[१]. ११. ऋ ५,६३,१. १२. ऋ ५,५२,१.
१३. °नना मू[१]; °नना वि[१]. १४. °पिरल्प° वि[१] मू[१], १५ कतस्य वि[१] मू[१]. १६-१६. तनयोत्की° वि[१];
तनयोत्की° मू[१]. १७. ऋ ३,१४,१. १८. ऋ ३,१७,१. १९. ऋ ३,१८,१. २०. °सुरदंशे वि[१];
°सुदंशे मू[१].

सुहोत्रश्शुनहोत्रश्च भारद्वाजा[१] नरस्तथा ।
समागता यथाज्येष्ठं भरद्वाजस्य मण्डले ॥ ११ ॥

'अभूरेको रयिपते'[२] षट् सूक्तानि यथाक्रमम् ।
अपश्यन्नृषयो द्वन्द्वे सन्त्यन्यश्च च तादृशाः ॥ १२ ॥

भ्रातृणामपरो मध्य ऋषिः कश्चिन्न दृश्यते ।
त्रिशोकनाभाकमध्ये[३] विरूपः कथमागतः ॥ १३ ॥

'अग्निर्महस्तोम्यूग्मियम्'[४] नाभाकार्षं विदुर्बुधाः ।
एवमादीनि सूक्तानि विरूपस्तत[५] आगतः ॥ १४ ॥

'इमे विप्रस्य वेधसः'[६] सद्भिरूपार्षमुच्यते ।
[७]'आ घा ये अग्निमिन्धते'† त्रैशोकं सूक्तमुच्यते[७] ॥ १५ ॥

नाभाकश्च त्रिशोकश्च[८] भ्रातराविति कोऽब्रवीत ।
शाट्यायने[९] श्रूयते हि त्रैशोकब्राह्मणे तथा ॥ १६ ॥

अत्र शाट्यायनकम्—'कण्वो वै नार्षदो[१०] भकस्यासुरस्य दुहितरमविन्दत । तस्यां हास्य त्रिशोकनाभाकौ[११] पुत्रौ जज्ञाते' । इति ।

श्रूयतां परिहारोऽत्र 'यो यजाति यजात इत्'[१२] ।
इत्येवमादिकः कश्चिदनुवाकः स्मृतो बुधैः ॥ १७ ॥

अन्ते तस्यानुवाकस्य नाभाकः[१३] पर्यवस्थितः ।
उत्तरस्यानुवाकस्य विरूपो मुखतः स्थितः ॥ १८ ॥

'इमे विप्रस्य वेधसः'[१४] सूक्तमाग्नेयमुच्यते ।
[१५]'आ घा ये अग्निमिन्धते'† ऐन्द्रं त्रैशोकमुच्यते[१५] ॥ १९ ॥

मण्डलादिष्विवाग्नेयम् ऐन्द्रात्प्राक् स्यादितं बुधैः ।
अनुवाकान्तरत्वाच्च न आनुरूपं नियामकम् ॥ २० ॥

१. भारद्वाजे वि[२], भरद्वाजे अ[१]. २. ऋ ६,३१,१. ३. °नाभा तं मध्ये वि[१] अ[१]. ४. ऋ ८, २६,१. ५. °स्तत्र वि[२] अ[१]. ६. ऋ ८,४३,१. ७-७ नास्ति अ[१]. † ऋ ८,४५,१. ८. त्रिशो° वि[१]; त्रिशो° अ[१]. ९. °यानि वि[१] अ[१]. १०. नार्षः द्वौ वि[१] अ[१]. ११. त्रिशोकनाभागौ वि[१]; त्रिशोकनाभागो अ[१], °कनभ° वैप २. १२. ऋ ८,३१,१. १३. नाभाग. वि[१]. १४. ऋ ८,४३,१. १५-१५. नास्ति अ[१]. † ऋ ८,४५,१. १६. °भपा° वि[१] अ[१].

अथायं केन विन्यासः सर्वो दृष्टो महर्षिणा ।
सर्वस्यां संहितायां यः सर्वैरिति विपश्चितः ॥ २१ ॥

मण्डलान्यृषयो[1] दृष्ट्वा[2] सर्वं एव समागता ।
विन्यासं ददृशुः पश्चादिति [3]वृद्धेभ्य आगमः[3] ॥ २२ ॥

कल्पनं चानुवाकानाम् ऋषिदृष्टमिति[4] स्थितिः ।
[5]नह्यनार्षमिदं[5] युक्तं यद् दृष्टं ब्राह्मणेष्विति ॥ २३ ॥

'स्वादिष्ठया मदिष्ठया'[6] तासामध्ययने फलम् ।
प्रादर्शयद्वसिष्ठोऽन्ते 'यः पावमानीरध्येति'[7] ॥ २४ ॥

एवं सर्वे. प्रदृष्टानां[8] सूक्तानां क्रमदर्शनम् ।
युक्तमन्ये सङ्गतानाम् अत्र[9] वृद्धेषु निर्णयः ॥ २५ ॥

तथैवान्येन[10] दृष्टेषु मन्त्रेष्वन्ये महर्षयः ।
नानाविधानि सूक्तानि[11] पश्यन्त्यपि च सङ्गताः ॥ २६ ॥

अचिन्त्यमद्भुतं वेदं साङ्गोपाङ्गमधीयते ।
अत्यागमं यथातत्त्वम् ऋषिरेवात्रगच्छति ॥ २७ ॥

ऋषिनामार्षगोत्रेषु[12] पञ्चमेऽस्माभिरष्टके ।
अध्यायादिषु वक्तव्यं विभज्योक्तं क्रमादिति ॥ २८ ॥

[५]

[13]मेधातिथिः काण्व ऋषिः । अश्विनौ देवता, आद्यानां पञ्चानाम् उत्तरार्धर्चानां कशुश्चैद्यः । गायत्री छन्द, सप्तत्रिंश्यष्टात्रिंश्यौ बृहत्यौ, अन्त्यानुष्टुप्[13] ।

दूरादिहेव यत् सत्यरुणप्सुरशिश्वितत् । वि भानुं विश्वधातनत् ॥ १ ॥

दूरात् । इहऽइव । यत् । सती । अरुणऽप्सुः । अशिश्वितत् । वि । भानुम् । विश्वधा । अतनत् ॥१॥

वेङ्कट० मेधातिथिः । दूरात् इह इव [14]"यदा भवन्ती[14] दूरे स्थिताऽपीहेव भवन्ती[15] प्रकाशाद् अरुणरूपा आप्याम् अशिश्वितत्[16], तदानीम् वि अतनत् दीप्तिम्[17] सर्वेषु देशेषु ॥ १ ॥

1. °लाह्य° वि[1] अ[1]. 2. दृष्टाः वि[1] अ[1]. 3-3. वृद्धो समागत वि[1]. 4. °काना अ[1]. 5-5. न च आर्षं° वि[1]; नह्यावर्षं° अ[1]. 6. ऋ ९,१,१. 7. ऋ ९,६७,३१. 8. प्रदिष्टानां वि[1] अ[1]. 9. इति वेङ्कट. 10. नान्येषु दृष्टेष्वन्येषु अ[1], प्रदिष्टानान्येन वि[1]. 11. सामानि वि[1] अ[1]. 12-12. ऋषिणामार्षगोत्राणि अ[1]; ऋषिनांमा° वि[1]. 13-13. नास्ति मूको. 14-14. यथा भवन्ति मूको. 15. भवति वि[1], भवन्ति अ[1]. 16. नास्ति अ[1]. 17. दीप्त वि[1].

नृवद् दस्रा मनोयुजा रथेन पृथुपाजसा । सचेथे अश्विनोषसम् ॥ २ ॥

नृऽवत् । दस्रा । मनःऽयुजा । रथेन । पृथुऽपाजसा । सचेथे इति । अश्विना । उषसम् ॥ २ ॥

वेङ्कट० मनुष्यराजवद् हे दर्शनीयौ[1] मनसा युज्यमानेन रथेन पृथुबलेन सचेथे हे अश्विनौ[1] उषसम् इमाम् ॥ २ ॥

युवाभ्यां वाजिनीवसू प्रति स्तोमा अदृक्षत । वाचं दूतो यथोहिषे ॥ ३ ॥

युवाभ्याम् । वाजिनीवसू इति वाजिनीऽवसू । प्रति । स्तोमाः । अदृक्षत । वाचम् । दूतः । यथा । ओहिषे ॥

वेङ्कट० हे अन्नवद्धनौ[1] युवाभ्याम् अस्मदीयाः स्तोमाः प्रति दृश्यन्ते । दूतः यथा वाचम् प्रापयति तद्वद् वाचमहं प्रापयामि ॥ ३ ॥

पुरुप्रिया ण ऊतये पुरुमन्द्रा पुरूवसू । स्तुषे कण्वासो अश्विना ॥ ४ ॥

पुरुऽप्रिया । नः । ऊतये । पुरुऽमन्द्रा । पुरुवसू इति पुरुऽवसू । स्तुषे । कण्वासः । अश्विना ॥ ४ ॥

वेङ्कट० बहूनां प्रियौ बहूनां मोदनौ अस्माकं रक्षणाय बहूनां वासयितारौ अश्विनौ स्तौतु प्रवृत्ताः कण्वाः इति ॥ ४ ॥

मंहिष्ठा वाजसातमेषयन्ता शुभस्पती । गन्तारा दाशुषो गृहम् ॥ ५ ॥

मंहिष्ठा । वाजऽसातमा । इषयन्ता । शुभः । पती इति । गन्तारा । दाशुषः । गृहम् ॥ ५ ॥

वेङ्कट० दातृतमौ अन्नानाम् अत्यन्तं दातारौ अन्नमिच्छन्तौ उदकस्य पती गन्तारौ[2] यजमानस्य गृहम् ॥ ५ ॥

[3]इति पञ्चमाष्टके अष्टमाध्याये प्रथमो वर्गः[3] ॥

ता सुदेवाय दाशुषे सुमेधामवितारिणीम् । घृतैर्गव्यूतिमुक्षतम् ॥ ६ ॥

ता । सुऽदेवाय । दाशुषे । सुऽमेधाम् । अविऽतारिणीम् । घृतैः । गव्यूतिम् । उक्षतम् ॥ ६ ॥

वेङ्कट० तौ शोभनदेवाय[4] यजमानाय सुप्रज्ञाम् आवतारिणीम् या[5] विविधं न गच्छति तां निश्चलां बुद्धिं प्रयच्छथ । तावस्माकम् उदकैः गोमार्गम् सिञ्चतम् ॥ ६ ॥

आ नः स्तोममुप द्रवत् तूयं श्येनेभिराशुभिः । यातमश्वेभिरश्विना ॥ ७ ॥

आ । नः । स्तोमम् । उप । द्रवत् । तूयम् । श्येनेभिः । आशुऽभिः । यातम् । अश्वेभिः । अश्विना ॥७॥

वेङ्कट० उप आ यातम् अस्माकम् स्तोमम् तूयं क्षिप्रम् श्येनेभिः[6] आशुभिः । 'श्येन, आशु'[7] (तु निघ १,१४) इत्यश्वनामनी । श्येनः शंसनीयगमनः । आशुः अशनात्यध्वानम्[8] । तैः अश्वैः आयातम् हे अश्विनौ[1] इति ॥ ७ ॥

---

१ नास्ति वि[1] २ गन्तारो मूको. ३-३ नास्ति मूका ४ शोभनदेवा मूको ५ यां मूको ६ तवास्मा° मूको ७ आशु मूको. ८ आशुर° मूको

येभिस्तिस्रः परावतो दिवो विश्वानि रोचना । त्रीँरक्तून् परिदीयथः ॥ ८ ॥

येभि । तिस्र । पराऽवत । दिव । विश्वानि । रोचना । त्रीन् । अक्तून् । परिऽदीयथ ॥ ८ ॥

वेङ्कट० येभि[1] अश्वै तिस्र परावत परि-गच्छथ दिव च विश्वानि रोचनानि । दूरे द्युस्थानत्रयो लोकास्तिस्र परावत । त्रीन् अक्तून्[2] '[3]इत्यग्निवायुसूर्यान् नूनमाहेति[3] । सर्वमिदं परितो गच्छथ यैरश्वैरिति ॥ ८ ॥

उत नो गोमतीरिष उत सातीरहर्विदा । वि पथः सातये सितम् ॥ ९ ॥

उत । न । गोऽमती । इष । उत । साती । अहऽविदा । वि । पथ । सातये । सितम् ॥ ९ ॥

वेङ्कट० अपि च अस्मभ्य गोमन्ति अन्नानि, अपि च धनानि हे अह्ना लम्भयितारौ[4] प्रयच्छतम्[5] । तल्लाभाय गमनमार्गांश्च भिक्षूणामस्माकम् वि सितम् । विपूर्वं सिनातिर्विमोचने । प्रतिबन्धकान् अपनयतम्[6] मार्गेभ्य इति ॥ ९ ॥

आ नो गोमन्तमश्विना सुवीरं सुरथं रयिम् । वोळ्हमश्वावतीरिषः ॥ १० ॥

आ । न । गोऽमन्तम् । अश्विना । सुऽवीरम् । सुऽरथम् । रयिम् । वोळ्हम् । अश्वऽवती । इष ॥

वेङ्कट० आ वहतम् अस्माकम्[7] गोमन्तम् हे अश्विनौ[7] सुपुत्रम् सुरथम् च रयिम् धनम् अश्ववन्ति अन्नानि च ॥ १० ॥

°इति पञ्चमाष्टके अष्टमाध्याये द्वितीयो वर्गः° ॥

वावृधाना शुभस्पती दस्रा हिरण्यवर्तनी । पिबतं सोम्यं मधु ॥ ११ ॥

वावृधाना । शुभ । पती इति । दस्रा । हिरण्यवर्तनी इति हिरण्यऽवर्तनी । पिबतम् । सोम्यम् । मधु ॥

वेङ्कट० वर्धमानौ हे उदकपती[8] दर्शनीयौ[9] हिरण्मयशुक्लमार्गौ पिबतम् सोममयम् मधु ॥ ११ ॥

अस्मभ्यं वाजिनीवसू मघवद्भ्यश्च सप्रथः । छर्दिर्यन्तमदाभ्यम् ॥ १२ ॥

अस्मभ्यम् । वाजिनीवसू इति वाजिनीऽवसू । मघवत्ऽभ्य । च । सऽप्रथ । छर्दि । यन्तम् । अदाभ्यम् ॥

वेङ्कट० हे अस्मभ्यम् हे अन्नयुक्तधनौ[9] हविष्मद्भ्य च[9] सर्वत पृथुतमम् गृहम् प्रयच्छतम् अनभिभवनीय शत्रुभि ॥ १२ ॥

नि षु ब्रह्म जनानां याविष्टं तूयमा गतम् । मो ष्वन्याँ उपारतम् ॥ १३ ॥

नि । सु । ब्रह्म । जनानाम् । या । अविष्टम् । तूयम् । आ । गतम् । मो इति । सु । अन्यान् । उप । अरतम् ॥

---

१ ये अ॰ २ अप्तून् मूको ३,३ °रौतमा° अ॰ ४ यच्छतम् अ॰ ५ °नयति अ॰
६ मारुत° मूको ७,७ नास्ति मूको ८. °कत्री मूको ९ नयुक्तधनौ च मूको

वेङ्कट० नितरां रक्षितवन्तौ कर्म जनानाम् यौ तौ क्षिप्रम् अस्मानपि आ [1]गच्छतम्। मा एव अन्यान् उप गच्छतम्। [1] पुरण इति[2] ॥ १३ ॥

अस्य पिबतमश्विना युवं मदस्य चारुणः । मध्वो रातस्य धिष्ण्या ॥ १४ ॥

अस्य । पिबतम् । अश्विना । युवम् । मदस्य । चारुणः । मध्वः । रातस्य । धिष्ण्या ॥ १४ ॥

वेङ्कट० अमुम् पिबतम् अश्विनौ! युवाम् सोमम् चारुम् मधुसदृशम् अस्माभिः प्रत्तम् हे धिषणार्हौ![2] इति ॥ १४ ॥

अस्मे आ वहतं रयिं शतवन्तं सहस्रिणम् । पुरुक्षुं विश्वधायसम् ॥ १५ ॥

अस्मे इति । आ । वहतम् । रयिम् । शतऽवन्तम् । सहस्रिणम् । पुरुऽक्षुम् । विश्वऽधायसम् ॥ १५ ॥

वेङ्कट० अस्मभ्यम् आ वहतम् रयिम् [3]शतसहस्रसङ्ख्याकम् बहुशब्दम्[3] प्रसिद्धम् सर्वेषां धर्तारम् (तु. ऋ ८,७,१३) ॥ १५ ॥

[4]इति पञ्चमाष्टके अष्टमाध्याये तृतीयो वर्गः[4] ॥

पुरुत्रा चिद्धि वां नरा विह्वयन्ते मनीषिणः । वाघद्भिरश्विना गतम् ॥ १६ ॥

पुरुऽत्रा । चित् । हि । वाम् । नरा । विऽह्वयन्ते । मनीषिणः । वाघत्ऽभिः । अश्विना । आ । गतम् ॥ १६ ॥

वेङ्कट० बहुषु [5]देशेषु हि[5] वाम् नरौ! विविधम् ह्वयन्ते स्तोतारः। वोढृभिरश्वैः हे अश्विनौ! आ गच्छतम् ॥ १६ ॥

जनासो वृक्तबर्हिषो हविष्मन्तो अरंकृतः । युवां हवन्ते अश्विना ॥ १७ ॥

जनासः । वृक्तऽबर्हिषः । हविष्मन्तः । अरम्ऽकृतः । युवाम् । हवन्ते । अश्विना ॥ १७ ॥

वेङ्कट० जनाः छिन्नबर्हिषः हविष्मन्तः पर्याप्तकारिणः[6] युवाम् ह्वयन्ते हे अश्विनौ! ॥ १७ ॥

अस्माकमद्य वामयं स्तोमो वाहिष्ठो अन्तमः । युवाभ्यां भूत्वश्विना ॥ १८ ॥

अस्माकम् । अद्य । वाम् । अयम् । स्तोमः । वाहिष्ठः । अन्तमः । युवाभ्याम् । भूतु । अश्विना ॥ १८ ॥

वेङ्कट० युवयोः अत्यन्तं वोढा अस्माकम् अयम् स्तोमः अद्य अन्तिकतमः भवतु युवाभ्याम् हे अश्विनौ! ॥ १८ ॥

यो ह वां मधुनो दृतिराहितो रथचर्षणे । ततः पिबतमश्विना ॥ १९ ॥

यः । ह । वाम् । मधुनः । दृतिः । आऽहितः । रथऽचर्षणे । ततः । पिबतम् । अश्विना ॥ १९ ॥

वेङ्कट० यः[7] खलु युवयोः मधुनः पूर्णः दृतिः आहितः रथचर्षणे नीडे रथस्य, ततः दृतेः पिबतम् मधु हे अश्विनौ!। रथोपस्थेऽश्विनोर्यजमानेन प्रदत्तेन[8] सोमेन पूर्णो दृतिर्दृश्यते[9] इति ॥ १९ ॥

१-१. °छन्नेवान्यानुपगच्छतं प्रदूरणाविति मूको. २. धिषणार्हौ मूको. ३-३. °ङ्ख्याकबहु° वि[1]. ४-४. नास्ति मूको. ५-५. हि देशेषु अ[1]. ६. पर्याप्तकारणौ मूको. ७. यः स अ[1]. ८ प्रदत्तेन मूको. ९. दृतिश्चेन मूको.

तेन नो वाजिनीवसू पश्वे तोकाय शं गवे । वहतं पीवरीरिषः ॥ २० ॥

तेन । नः । वाजिनीवसू इति वाजिनीऽवसू । पश्वे । तोकाय । शम् । गवे । वहतम् । पीवरीः । इषः ॥२०॥

वेङ्कट० तेन पीतेन सोमेन अस्माकम् हे अन्नवद्वसू[1] 'पश्वे अजाविकादिने'[1] पुत्राय च गवे च सुखम् वहतम्, स्थूलानि चान्नानि ॥ २० ॥

'इति पञ्चमाष्टके अष्टमाध्याये चतुर्थो वर्गः' ॥

उत नो दिव्या इष उत सिन्धूँरहर्विदा । अप द्वारेव वर्षथः ॥ २१ ॥

उत । नः । दिव्याः । इषः । उत । सिन्धून् । अहःऽविदा । अप । द्वाराऽइव । वर्षथः ॥ २१ ॥

वेङ्कट० अपि च अस्माकं दिव्यानि अन्नानि अपि च उदकानि, हे अहर्विदौ[2] अह्नो[3] ज्ञातारौ[2] "द्वारेण इव"[4] अप वर्षथ । यथा[5] अन्तर्निहितं कश्चिद् द्वारेणापगमयति तथा प्रयच्छतमिति ॥ २१ ॥

कदा वां तौग्र्यो विधत् समुद्रे जहितो नरा । यद् वां रथो विभिष्पतात् ॥२२॥

कदा । वाम् । तौग्र्यः । विधत् । समुद्रे । जहितः । नरा । यत् । वाम् । रथः । विऽभिः । पतात् ॥२२॥

वेङ्कट० कदा वाम् तौग्र्य पर्यचरत् समुद्रे सहायै त्यक्त हे नरौ[6] । यदा[7] युवयो रथ अश्वैर्युक्त अपतत्[7] अभ्रत प्रादुरभूत् । परिचरणावसरस्तत्र न विद्यत इति "परिचरणसमकालमेव प्रादुरभवदिति" ॥ २२ ॥

युवं कण्वाय नासत्यापिरिप्ताय हर्म्ये । शश्वदूतीर्दशस्यथः ॥ २३ ॥

युवम् । कण्वाय । नासत्या । अपिऽरिप्ताय । हर्म्ये । शश्वत् । ऊती । दशस्यथः ॥ २३ ॥

वेङ्कट० युवम् कण्वाय नार्षदाय[8] हे नासत्यौ[1] असुरैर्गृहे प्रक्षिप्ताय बहूनि रक्षणानि प्रयच्छतम् । 'नार्षदाय श्रवो अध्यधत्तम्' (ऋ १,११७,८) इत्युक्तम् ॥ २३ ॥

ताभिरा यातमूतिभिर्नव्यसीभिः सुशस्तिभिः । यद् वां वृषण्वसू हुवे ॥ २४ ॥

ताभिः । आ । यातम् । ऊतिऽभिः । नव्यसीभिः । सुशस्तिऽभिः ।
यत् । वाम् । वृषण्वसू इति वृषण्ऽवसू । हुवे ॥ २४ ॥

वेङ्कट० तैः आ यातम् रक्षणैः नवतरैः सुस्तोत्रैः कल्याणैः । यदा वाम् हे वृषण्वसू । ह्वयामि ॥ २४ ॥

यथा चित् कण्वमावतं प्रियमेधमुपस्तुतम् । अत्रिं शिञ्जारमश्विना ॥ २५ ॥

यथा । चित् । कण्वम् । आवतम् । प्रियऽमेधम् । उपऽस्तुतम् । अत्रिम् । शिञ्जारम् । अश्विना ॥ २५ ॥

---

१ पश्वऽश्वाविकादिन वि॰ पश्वेऽध्याविकादि॰ अ॰ २-२ नास्ति मूको ३ अस्रो वि॰, अह्नो अ॰. ४-४ द्वारणव मूको ५ यथा मूको ६ पतात् वि॰ ७-७ °मव सहायैस्त्यक्त तूग्रपुत्रे द्वाग्विव युवयो रथ प्रादुरभूत् अ॰ ८ नार्षदाय मूको

वेङ्कट० यथा विन् कण्वम् अरक्षतम्, यथा वा प्रियमेधम्, यथा वा उपस्तुतम्, यथा [1]वा अत्रिम्[1], यथा वा शिञ्जारम्[2] हे अश्विनौ! ॥ २५ ॥

[1]इति पञ्चमाष्टके अष्टमाध्याये पञ्चमो वर्गः[1] ॥

यथोत कृत्व्ये धनेंऽशुं गोष्वगस्त्यम् । यथा वाजेषु सोभरिम् ॥ २६ ॥

यथा । उत । कृत्व्ये । धने । अंशुम् । गोषु । अगस्त्यम् । यथा । वाजेषु । सोभरिम् ॥ २६ ॥

वेङ्कट० यथा अपि च कर्तव्ये धने अंशुम् नाम राजानम्, गोनिमित्तं स्तुवन्तम् अगस्त्यम् च, यथा[3] वा युद्धेषु सोभरिम् नाम आवतम्[3]। तथा अस्मानपि रक्षतमिति ॥ २६ ॥

एतावद् वां वृषण्वसू अतो वा भूयो अश्विना । गृणन्तः सुम्नमीमहे ॥ २७ ॥

एतावत् । वाम् । वृषण्वसू इति वृषण्ऽवसू । अतः । वा । भूयः । अश्विना । गृणन्तः । सुम्नम् । ईमहे ॥ २७ ॥

वेङ्कट० हे प्रदीयमानधनौ! वयं स्तुवन्तः एतावत् सुखं याचामहे यावदुक्तेभ्यः ऋषिभ्यः भवद्भ्यां कृतम्, अपि वा अतः अपि भूयः इति ॥ २७ ॥

रथं हिरण्यवन्धुरं हिरण्याभीशुमश्विना । आ हि स्थाथो दिविस्पृशम् ॥ २८ ॥

रथम् । हिरण्यऽवन्धुरम् । हिरण्यऽअभीशुम् । अश्विना । आ । हि । स्थाथः । दिविऽस्पृशम् ॥ २८ ॥

वेङ्कट० रथम् हिरण्मयबन्धुरम् हिरण्मयाऽभीशुम् हे अश्विनौ! आ हि तिष्ठथः दिविस्पृशम् ॥ २८ ॥

हिरण्ययी वां रभिरीषा अक्षो हिरण्ययः । उभा चक्रा हिरण्यया ॥ २९ ॥

हिरण्ययी । वाम् । रभिः । ईषा । अक्षः । हिरण्ययः । उभा । चक्रा । हिरण्यया ॥ २९ ॥

वेङ्कट० युवयोः रथस्य सर्वमङ्गं हिरण्मयमिति । रभिः[6] उपस्तम्भनमित्याहुः ॥ २९ ॥

तेन नो वाजिनीवसू परावतश्चिदा गतम् । उपेमां सुष्टुतिं मम ॥ ३० ॥

तेन । नः । वाजिनीवसू इति वाजिनीऽवसू । पराऽवतः । चित् । आ । गतम् ।
उप । इमाम् । सुऽस्तुतिम् । मम ॥ ३० ॥

वेङ्कट० तेन अस्माकम् हे अन्नवद्धनौ![7] दूरादपि आ गच्छतम्, आगतौ च इमाम् मम सुष्टुतिम् उप आगच्छतम् ॥ ३० ॥

[1]इति पञ्चमाष्टके अष्टमाध्याये षष्ठो वर्गः[1] ॥

१-१. पात्र मूको. २. नास्ति मूको. ३-३. नास्ति मूको. ४. तथा मूको. ५. पततम् मूको. ६. रश्मिभिः वि[°]. ७. अन्नवर्धनौ मूको.

आ वंहेथे पराकात् पूर्वीरश्नन्तावश्विना । इषो दासीरमर्त्या ॥ ३१ ॥

आ । वहेथे इति । पराकात् । पूर्वीः । अश्नन्तौ । अश्विना । इषः । दासीः । अमर्त्या ॥ ३१ ॥

वेङ्कट० आ गच्छथ दूरात् बहूनि अश्नन्तौ अश्विनौ! असुराणां स्वभूतान्यन्नानि हे अमर्त्यौ!। तेषां जयार्थमागच्छतमित्यर्थः । अशिभ्यांसिकर्मेति ॥ ३१ ॥

आ नो द्युम्नैरा श्रवोभिरा राया यातमश्विना । पुरुश्चन्द्रा नासत्या ॥ ३२ ॥

आ । नः । द्युम्नैः । आ । श्रवःऽभिः । आ । राया । यातम् । अश्विना । पुरुऽचन्द्रा । नासत्या ॥ ३२ ॥

वेङ्कट० आ यातम् अस्मान् अन्नैः 'कीर्तिभिः धनेन' हे अश्विनौ! बहुहिरण्यौ' नासत्यौ' ॥ ३२ ॥

एह वां प्रुषितप्सवो वयो वहन्तु पर्णिनः । अच्छा स्वध्वरं जनम् ॥ ३३ ॥

आ । इह । वाम् । प्रुषितऽप्सवः । वयः । वहन्तु । पर्णिनः । अच्छ । सुऽअध्वरम् । जनम् ॥ ३३ ॥

वेङ्कट० आ वहन्तु इह वाम् दीप्तिरूपा अश्वाः पतनवन्त' सुयज्ञम् यजमानम् प्रति ॥ ३३ ॥

रथं वामनुगायसं य इषा वर्तते सह । न चक्रमभि बाधते ॥ ३४ ॥

रथम् । वाम् । अनुऽगायसम् । यः । इषा । वर्तते । सह । न । चक्रम् । अभि । बाधते ॥ ३४ ॥

वेङ्कट० रथम् वाम्' 'स्तोतृभिरनुगीयमानम् यः हविषा' सह वर्तयति, न तं' 'परचक्रम् अभि भवति' ॥ ३४ ॥

हिरण्ययेन रथेन द्रवत्पाणिभिरश्वैः । न धीजवना नासत्या ॥ ३५ ॥

हिरण्ययेन । रथेन । द्रवत्पाणिऽभिः । अश्वैः । धीऽजवना । नासत्या ॥ ३५ ॥

वेङ्कट० हिरण्मयेन रथेन द्रवत्पाणिभिः च अश्वैः तस्मिन् युक्तैः हे धीजवनौ!' कर्मभिर्जवं कुर्वाणौ!' नासत्यौ! आगच्छतमिति ॥ ३५ ॥

'इति पञ्चमाष्टके अष्टमाध्याये सप्तमो वर्गः' ॥

युवं मृगं जागृवांसं स्वदथो वा वृषण्वसू । ता नः पृङ्क्तमिषा रयिम् ॥ ३६ ॥

युवम् । मृगम् । जागृऽवांसम् । स्वदथः । वा । वृषण्वसू इति वृषण्ऽवसू ।
ता । नः । पृङ्क्तम् । इषा । रयिम् ॥ ३६ ॥

१-१. °भिर्वंध° मूको. २ वहन्तु वि° ३ वा मूको ४-४ °नयोर्ह° अ° ५ क वि°
६-६ पेरच कर्मभिभवति मूको ७. °वन वि°, °वनो अ° ८ कुर्वाण मूको. ९-९ नास्ति मूको

वेङ्कट० मृग[1] मृगयते[2] (तु. या ९,१९)। शुभं[3] मृगयमाण स्तोतारम् जागरणपरम् सदृश. च हे शुभस्पती[4]। तौ "अस्मभ्याम् अन्नेन" रयिम् सम्पृञ्चेथाम् ॥ ३६ ॥

ता मे अश्विना सनीनां विद्यातं नवानाम् ।
यथा चिच्चैद्यः कशुः शतमुष्ट्रानां ददत् सहस्रा दश गोनाम् ॥ ३७ ॥

ता । मे । अश्विना । सनीनाम् । विद्यातम् । नवानाम् ।
यथा । चित् । चैद्यः । कशुः । शतम् । उष्ट्रानाम् । ददत् । सहस्रा । दश । गोनाम् ॥ ३७ ॥

वेङ्कट० तौ[5] हे अश्विनौ[6] नवभिक्षैरालब्धानि[6] नवानि[7] धनानि जानीतमिति। चैद्यात् कशोर्लब्धं धनमश्विनोरेव निवेदयति। यथा चित् 'चैद्य कशु उष्ट्राणाम्'[8] शतम् प्रायच्छत् सहस्राणि दश वा गवां च।

शौनक — "[9]'द्वाद' इत्याश्विने सूक्ते सप्तत्रिंशत्तमी तु या।
'तत्रार्धर्चो द्वयृचश्चान्त्य कशोर्दानस्तव.'[9] स्मृत. ॥" (तु. बृदे ६,४५) इति ॥३७॥

यो मे हिरण्यसंदृशो दश राज्ञो अमंहत ।
अधस्पदा इच्चैद्यस्य कृष्टयश्चर्मम्ना अभितो जनाः ॥ ३८ ॥

य । मे । हिरण्यऽसदृश । दश । राज्ञ । अमंहत ।
अधःऽपदा । इत् । चैद्यस्य । कृष्टयः । चर्मऽम्ना । अभितः । जनाः ॥ ३८ ॥

वेङ्कट० य. मे[10] [11]हिरण्यसन्दर्शनान् अलङ्कृतान्[11] दश राज्ञ[12] मायच्छत्, अस्माभिरर्पित भवद्भि कर्तव्यमिति, यद्वा मम प्रदीयमान[13] शुल्कमस्मै दातव्यमिति। तस्य चैद्यस्य अन्ये सर्वे अधस्पदा एव भवन्तु [14]चर्मम्ना अभित[14] धर्ममाना जना। ये दृष्टे राजनि पादुकां तस्य विदधत ते चर्मम्ना इति ॥३८॥

माकिरेना पथा गाद् येनेमे यन्ति चेदयः ।
अन्यो नेत् सूरिरोहते भूरिदावत्तरो जनः ॥ ३९ ॥

माकिः । एना । पथा । गात् । येन । इमे । यन्ति । चेदयः ।
अन्यः । न । इत् । सूरिः । ओहते । भूरिदावत्ऽतर । जनः ॥ ३९ ॥

वेङ्कट० मा गच्छतु अनेन पथा कश्चिद्धिंसक, येन पथा इमे चेदय यन्ति। यथा चैद्य[15] कशुर्धनं प्रापयति, एवम् अन्य नैव[16] प्रापयति सूरि प्रेरयिता धनस्य अत्यन्त दाताऽपि[17] जन ॥ ३९ ॥

[18]इति पञ्चमाष्टके षष्ठमाध्याये अष्टमो वर्ग[18] ॥

---

१. नास्ति मूको. २ °यते वि². ३. शुभं अ¹. ४-४ अभ्यसावेन अ¹. ५. एतौ वि². ६-६ नवभि क्षणैर्ल° वि² नवभिक्षणल° अ¹ ७ नव्यानि वि¹. ८-८. चैद्यक उष्ट्रा° वि², छैद्यक उष्ट्रा° अ¹ ९-९ कत्रर्धर्चौर्धचान्तिकशोदनिस्तव° वि², कत्रार्धर्चौर्धचान्तकशो° अ¹. १० द्वे वि². ११-११ °र्धनालङ्कृता मूको १२ राज्ञे मूको. १३ °मान अ¹ १४-१४. चमताश्चाभिदितो मूको १५ चैद्य वि¹, चैय अ¹. १६ नाव मूको १७-१७ °तापि मूको. १८ १८ नास्ति मूको.

[६]

[1]वत्सः काण्व ऋषिः । इन्द्रो देवता, अन्त्यानां तिसृणां तिरिन्दिरः पार्शव्यः । गायत्री छन्दः[1] ।

महाँ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाँ इव । स्तोमैर्वत्सस्य वावृधे ॥ १ ॥

महान् । इन्द्रः । यः । ओजसा । पर्जन्यः । वृष्टिमान्ऽइव । स्तोमैः । वत्सस्य । वृवृधे ॥ १ ॥

वेङ्कट० वत्सः[2] । महान् सः इन्द्रः भवति, यः ओजसा परिवृतः पर्जन्यः वृष्टिमान् इव लक्ष्यते । सः[3] स्तोमैः वत्सस्य वर्धताम् ॥ १ ॥

प्रजामृतस्य पिप्रतः प्र यद् भरन्त वह्नयः । विप्रा ऋतस्य वाहसा ॥ २ ॥

प्रऽजाम् । ऋतस्य । पिप्रतः । प्र । यत् । भरन्त । वह्नयः । विप्राः । ऋतस्य । वाहसा ॥ २ ॥

वेङ्कट० सर्वाम् प्रजाम् यज्ञेन पूरयतः इन्द्रस्य प्र भरन्त हविः यदा[4] वोढार ऋत्विजः मेधाविनः यज्ञस्य वाहकेन[5] सह, तदा स्तोमैः वत्सस्य वावृधे[6] इति ॥ २ ॥

कण्वा इन्द्रं यदक्रत स्तोमैर्यज्ञस्य साधनम् । जामि ब्रुवत आयुधम् ॥ ३ ॥

कण्वाः । इन्द्रम् । यत् । अक्रत । स्तोमैः । यज्ञस्य । साधनम् । जामि । ब्रुवते । आयुधम् ॥ ३ ॥

वेङ्कट० कण्वाः यदा इन्द्रम् कुर्वन्ति स्तोमैः यज्ञस्य साधयितारम्, तदानीम् अस्य "जामि आयुधम्" स्तुवन्ति । जामिर्जमते. गतिकर्मणः (तु. या ३,६) ॥ ३ ॥

समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः । समुद्रायेव सिन्धवः ॥ ४ ॥

सम् । अस्य । मन्यवे । विशः । विश्वाः । नमन्त । कृष्टयः । समुद्रायऽइव । सिन्धवः ॥ ४ ॥

वेङ्कट० सम् नमन्त अस्य क्रोधाय विश विश्वाः कृष्टयः । विशः परितो निविशन्तीति । समुद्राय इव सिन्धवः (=ऋ ८,४४,२५) ॥ ४ ॥

ओजस्तदस्य तित्विष उभे यत् समवर्तयत् । इन्द्रश्चर्मेव रोदसी ॥ ५ ॥

ओजः । तत् । अस्य । तित्विषे । उभे इति । यत् । सम्ऽअवर्तयत् । इन्द्रः । चर्मऽइव । रोदसी इति ॥

वेङ्कट० बलम् तत् अस्य दीप्यते, येन[8] बलेन इन्द्रः द्यावापृथिव्यौ उभे संवर्तयति पिण्डीकरोति चर्म इव[9] ॥ ५ ॥

[1]इति पञ्चमाष्टके अष्टमाध्याये नवमो वर्गः[1] ॥

१-१. नास्ति मूको. २. वत्स मूको. ३. नास्ति मूको. ४. यथा अ[1]. ५. =अग्निना (तु. (ऋ ३,११,७ भाष्यम्); हवनेन मूको. ६. वावृधा मूको. ७-७. तु. ऋ १०,८,५;८; अन्यायुधन अ[1]. ८. यस्मात् मूको. ९. तु. ऋ ६,८,३; ७,६३,१.

वि चिद् वृत्रस्य दोधतो वज्रेण शतपर्वणा । शिरो बिभेद वृष्णिना ॥ ६ ॥

वि । चित् । वृत्रस्य । दोधतः । वज्रेण । शतऽपर्वणा । शिरः । बिभेद । वृष्णिना ॥ ६ ॥

वेङ्कट० वृत्रस्य कम्पयतः वज्रेण शतपर्वणा शिरः वि[1] बिभेद वर्षणशीलेन ॥ ६ ॥

इमा अभि प्र णोनुमो विपामग्रेषु धीतयः । अग्नेः शोचिर्न दिद्युतः ॥ ७ ॥

इमाः । अभि । प्र । नोनुमः । विपाम् । अग्रेषु । धीतयः । अग्नेः । शोचिः । न । दिद्युतः ॥७॥

वेङ्कट० इमानि अभि प्र नोनुमः मेधाविनाम् अग्रेषु कर्माणि इन्द्रस्य । यानि अग्नेः तेजांसि इव द्योतमानानि ॥ ७ ॥

गुहा सतीरुप त्मना प्र यच्छोचन्त धीतयः । कण्वा ऋतस्य धारया ॥ ८ ॥

गुहा । सतीः । उप । त्मना । प्र । यत् । शोचन्त । धीतयः । कण्वाः । ऋतस्य । धारया ॥८॥

वेङ्कट० गुहायां वर्तमानानि इन्द्रस्य कर्माणि मेधाविभिरेव ज्ञातुं शक्यानि उप[2] प्र शोचन्त प्रज्वलयन्ति स्वयमेव, यदा प्रकटीकुर्वन्ति कण्वाः सत्यस्य धारयित्र्या वाचा । उत्तरत्र सम्बन्धः ॥ ८ ॥

प्र तमिन्द्र नशीमहि रयिं गोमन्तमश्विनम् । प्र ब्रह्म पूर्वचित्तये ॥ ९ ॥

प्र । तम् । इन्द्र । नशीमहि । रयिम् । गोऽमन्तम् । अश्विनम् । प्र । ब्रह्म । पूर्वऽचित्तये ॥ ९ ॥

वेङ्कट० निगदसिद्धा । [3]'ब्रह्म अयम्'[3] । पूर्वचित्तिरन्यैः[4] पूर्वमेव ज्ञानम् । अजयन्तं हि प्रथममेव जानन्ति । नशिर्व्याप्तिकर्मेति ॥ ९ ॥

अहमिद्धि पितुष्परि मेधामृतस्य जग्रभ । अहं सूर्य इवाजनि ॥ १० ॥

अहम् । इत् । हि । पितुः । परि[5] । मेधाम् । ऋतस्य । जग्रभ । अहम् । सूर्यःऽइव । अजनि ॥१०॥

वेङ्कट० अहम् एव हि पितुः कण्वस्य[6] सत्यज्ञानस्य सत्यस्य प्रज्ञाम् जगृहे गृहीतवानस्मि । अहम् सूर्यः इव दीप्यमानः अजनि ॥ १० ॥

[7]इति पञ्चमाष्टके अष्टमाध्याये दशमो वर्गः[7] ॥

अहं प्रत्नेन मन्मना गिरः शुम्भामि कण्ववत् । येनेन्द्रः शुष्ममिद् दधे ॥ ११ ॥

अहम् । प्रत्नेन । मन्मना । गिरः । शुम्भामि । कण्वऽवत् । येन । इन्द्रः । शुष्मम् । इत् । दधे ॥ ११ ॥

---

१. नास्ति मूको. २. उप वि[2]; अप अ[1]. ३-३. म ब्रह्मणम् मूको. ४. रन्यैः पूर्वचिनिः अ[1]. ५. तु. वैप १,१६२१g. ६. कण्वाः वि[1]; कण्वा अ[1]. ७-७. नास्ति मूको.

वेङ्कट० अहम् पुराणेन विद्येण ज्ञानेन 'स्तुती अलङ्करोमि'[1] अध्यवत् । येन मन्मना[2] इन्द्रः बलं धारयति ॥ ११ ॥

ये त्वामिन्द्र न तुष्टुवुर्ऋषयो ये च तुष्टुवुः । ममेद् वर्धस्व सुष्टुतः ॥ १२ ॥

ये । त्वाम् । इन्द्र । न । तुस्तुवुः । ऋषयः । ये । च । तुस्तुवुः । मम । इत् । वर्धस्व । सुऽस्तुतः ॥

वेङ्कट० ये त्वाम् इन्द्र! न तुष्टुवुः, ये च स्तुवन्ति[3] ऋषयः, सर्वानपहाय मम एवाभिज्ञमित्थम् इति गम्यते, वर्धस्व सुष्टुत. ॥ १२ ॥

यदस्य मन्युरध्वनीद् वि वृत्रं पर्वशो रुजन् । अपः समुद्रमैरयत् ॥ १३ ॥

यत् । अस्य । मन्युः । अध्वनीत् । वि । वृत्रम् । पर्वऽशः । रुजन् । अपः । समुद्रम् । ऐरयत् ॥ १३ ॥

वेङ्कट० यदा अस्य मन्युः अध्वनीत् । ध्वनतिः शब्दकर्मा । स्वनितशब्दमुत्पादयतीत्यर्थः । वृत्रम् मेघरूपम् पर्वशः वि रुजन् तदा अपः उदकानि अन्तरिक्षम् (तु. निघ १,३) प्रति प्रेरयति । यद्वेह ध्वनिः प्रकाशीभावकर्मेति ॥ १३ ॥

नि शुष्ण इन्द्र धर्णसिं वज्रं जघन्थ दस्यवि । वृषा ह्युग्र शृण्विषे ॥ १४ ॥

नि । शुष्णे । इन्द्र । धर्णसिम् । वज्रम् । जघन्थ । दस्यवि । वृषा । हि । उग्र । शृण्विषे ॥ १४ ॥

वेङ्कट० नि जघन्थ शुष्णे दस्यौ[3] लोकस्य धारकम् वज्रम् । 'वर्षिता हि हे उग्र!'[4] एव लोके श्रूयसे[5] (तु. ऋ ८,३३,१०) ॥ १४ ॥

न द्याव इन्द्रमोजसा नान्तरिक्षाणि वज्रिणम् । न विव्यचन्त भूमयः ॥ १५ ॥

न । द्यावः । इन्द्रम् । ओजसा । न । अन्तरिक्षाणि । वज्रिणम् । न । विव्यचन्त । भूमयः ॥ १५ ॥

वेङ्कट० न द्युलोकाः[6] इन्द्रम् बलेन व्याप्नुवन्ति वज्रिणम्, न अपि अन्तरिक्षाणि, न च भूमयः । 'तिस्रो भूमीर्धारयन् त्रीँरुत द्यून्' (ऋ २,२७,८) इति मन्त्रः ॥ १५ ॥

[7]इति पञ्चमाष्टके अष्टमाध्याये एकादशो वर्गः[7] ॥

यस्त इन्द्र महीरपः स्तभूयमान आशयत् । नि तं पद्यासु शिश्नथः ॥ १६ ॥

यः । ते । इन्द्र । महीः । अपः । स्तभुऽयमानः । आ । अशयत् । नि । तम् । पद्यासु । शिश्नथः ॥ १६ ॥

वेङ्कट० 'यः ते इन्द्र! महतीः अपः[8] स्तम्भयन् वृत्रः आ अशयत्, तम् पद्यासु अङ्गुलीषु त्वम् नि शिश्नथ । श्नथयन् हि मारणमिति[8] ॥ १६ ॥

१-१ स्तुतीरलङ्करोति वि[3], अलङ्करोति स्तुती भ[1]. २. मया मूको. ३ दस्यो मूको. ४-४. वर्षितासुग्र मूको ५ श्रवसे मूको. ६ द्युलोके मूको. ७-७ नास्ति मूको. ८-८. नास्ति वि[3], न-द ··· भ[1].
९. ... मूको.

य इमे रोदसी मही संमीची समजंग्रभीत् । तमोभिरिन्द्र तं गुहः ॥ १७ ॥

यः । इमे इति । रोदसी इति । मही इति । समीची इति सम्ऽईची । समऽअजंग्रभीत् ।
तमःऽभिः । इन्द्र । तम् । गुहः ॥ १७ ॥

वेङ्कट० [1]'यः इमे'[1] द्यावापृथिव्यौ महत्यौ सङ्गते हस्तेन सङ्गृह्णाति, तम् अन्धकारैः इन्द्र! तिरस्कुरु वृत्रम् ॥ १७ ॥

य इन्द्र यतयस्त्वा भृगवो ये च तुष्टुवुः । ममेदुग्र श्रुधी हवम् ॥ १८ ॥

ये । इन्द्र । यतयः । त्वा । भृगवः । ये । च । तुस्तुवुः । मम । इत् । उग्र । श्रुधि । हवम् ॥ १८ ॥

वेङ्कट० [2]'ये इन्द्र!'[2] यतयः[3] त्वा तुष्टुवुः, ये च भृगवः, तान् अतीत्य मम एव हे उद्गूर्ण! श्रुधि ह्वानम् ॥ १८ ॥

इमास्त इन्द्र पृश्नयो घृतं दुहत आशिरम् । एनामृतस्य पिप्युषीः ॥ १९ ॥

इमाः । ते । इन्द्र । पृश्नयः । घृतम् । दुहते । आऽशिरम् । एनाम् । ऋतस्य । पिप्युषीः ॥ १९ ॥

वेङ्कट० इमाः ते इन्द्र! गावः घृतम् आशिरम् च दुहते भूमिम् उदकेन यज्ञसाधितेन पूरयन्त्यः ॥ १९ ॥

या इन्द्र प्रस्वस्त्वासा गर्भमचक्रिरन् । परि धर्मेव सूर्यम् ॥ २० ॥

याः । इन्द्र । प्रऽस्वः । त्वा । आसा । गर्भम् । अचक्रिरन् । परि । धर्मऽइव । सूर्यम् ॥ २० ॥

वेङ्कट० याः इमाः प्रजाताः पृश्नयः त्वां पयसो निरसनेन गर्भभूतम् परि अचक्रिरन् परिष्कुर्वन्ति । यथा धर्म[4] सूर्यम् परितः करोति । धर्मं हि धारयति[5] दिवि सूर्यमिति ॥ २० ॥

[6]इति पञ्चमाष्टके अष्टमाध्याये द्वादशो वर्गः[6] ॥

त्वामिच्छवसस्पते कण्वा उक्थेन वावृधुः । त्वां सुतास इन्दवः ॥ २१ ॥

त्वाम् । इत् । शवसः । पते । कण्वाः । उक्थेन । ववृधुः । त्वाम् । सुतासः । इन्दवः ॥ २१ ॥

वेङ्कट० निगदसिद्धेति ॥ २१ ॥

तवेदिन्द्र प्रणीतिषूत प्रशस्तिरद्रिवः । यज्ञो वितन्तसाय्यः ॥ २२ ॥

तव । इत् । इन्द्र । प्रऽनीतिषु । उत । प्रऽशस्तिः । अद्रिऽवः । यज्ञः । वितन्तसाय्यः ॥ २२ ॥

१-१. नास्ति मू'. २-२. ··· इन्द्र मूको. ३. यत्तयः मूको. ४ कर्म मूको. ५, °यन्ति मूको.
६-६. नास्ति मूको.

वेङ्कट० तव एव इन्द्र ! प्रणयनेषु यजमानानाम् प्रशस्तिः भवति अद्रिवः ! । यशः तव प्रणीतिषु एव [1]'आयन्तं तान्तैः सेवितव्यो[‡]'[1] भवति ॥ २२ ॥

आ नं इन्द्र महीमिषं पुरं न दर्षि गोमतीम् । उत प्रजां सुवीर्यम् ॥ २३ ॥

आ । नः । इन्द्र । महीम् । इषम् । पुरम् । न । दर्षि । गोऽमतीम् । उत । प्रऽजाम् । सुऽवीर्यम् ॥

वेङ्कट० आभिमुख्येन विदारय अस्माकम् इन्द्र ! महद् अन्नं त्वयि स्थितं विवृतद्वारम् पुरम् इव पशुमतीम् । अपि च प्रजाम् सुवीर्यम् च प्रयच्छेति ॥ २३ ॥

[2]'उत त्यदाश्वश्व्यं यदिन्द्र नाहुंषीष्वा'[2] । अग्रे विक्षु प्रदीदयत् ॥ २४ ॥

उत । त्यत् । आशुऽअश्व्यम् । यत् । इन्द्र । नाहुंषीषु । आ । अग्रे । विक्षु । प्रऽदीदयत् ॥ २४ ॥

वेङ्कट० अपि च तत् आश्वश्व्यम् [3]'अश्ववृन्दम् आशु, यत् इदम्'[3] इन्द्र ! नहुषस्य स्वभूतासु विक्षु स्थितम्, तत्र आत् अकर्षीदिति । अग्रे प्रकर्षेण दीप्तं भवति । ॥ २४ ॥

अभि व्रजं न तत्निषे सूर उपाकचक्षसम् । यदिन्द्र मृळयासि नः ॥ २५ ॥

अभि । व्रजम् । न । तत्निषे । सूरः । उपाकऽचक्षसम् । यत् । इन्द्र । मृळयासि । नः ॥ २५ ॥

वेङ्कट० न[4] अभि तनोषि[5] व्रजम् गवां सरणशीलः त्वम्[6] उपाकचक्षसम् । 'उपाके' (निघ ३,१६) इत्यन्तिकनाम । अन्तिके दर्शनं यस्य । अस्मत्समीपे न वितनोषि, यदि इन्द्र ! अस्मान् सुखयसि ॥२५॥

[7]'इति पञ्चमाष्टके अष्टमाध्याये त्रयोदशो वर्गः'[7] ॥

यदङ्ग तविषीयस इन्द्र प्रराजसि क्षितीः । महाँ अपार ओजसा ॥ २६ ॥

यत् । अङ्ग । तविषीऽयसे । इन्द्र । प्रऽराजसि । क्षितीः । महान् । अपारः । ओजसा ॥ २६ ॥

वेङ्कट० यत् अङ्ग इन्द्र ! त्वं बलमिच्छसि, यस्माच्च प्रकर्षेण राजयसि मनुष्यान् महान् अपर्यन्तः बलेन । उत्तरेण सम्बन्धः ॥ २६ ॥

तं त्वा हविष्मतीर्विश उप ब्रुवत ऊतये । उरुज्रयसमिन्दुभिः ॥ २७ ॥

तम् । त्वा । हविष्मतीः । विशः । उप । ब्रुवते । ऊतये । उरुऽज्रयसम् । इन्दुऽभिः ॥ २७ ॥

वेङ्कट० निगदव्याख्याता । तस्माद् बहुवेगम् उपस्तुवन्तीति ॥ २७ ॥

उपह्वरे गिरीणां संगथे च नदीनाम् । धिया विप्रो अजायत ॥ २८ ॥

१-१. आयान्ते सेवितो मूको. ‡ <वि √ तंस् इति वैप १,२८४३. २-२. तु. ऋ ५,७,१०; ६,४६,७. ३-३. च वृन्दं अशुं यदि तम् मूको. ४. सा, संप्रत्यर्थे नेति. ५. °नोषि मूको. ६. तम् मूको. ७-७. नास्ति मूको.

उ॒प॒ऽह्व॒रे । गि॒री॒णाम् । स॒म्ऽग॒थे । च॒ । न॒दीना॑म् । धि॒या । विप्रः॑ । अ॒जा॒य॒त॒ ॥ २८ ॥

वेङ्कट० समीपे पर्वतानां सङ्गमे च नदीनाम् कर्मणा हेतुना मेधावी इन्द्रः प्रादुर्भवति ॥ २८ ॥

अतः॑ समु॒द्रमु॒द्वत॑श्चिकि॒त्वाँ अव॑ पश्यति । यतो॑ विपा॒न एज॑ति ॥ २९ ॥

अतः॑ । स॒मु॒द्रम् । उ॒त्ऽवतः॑ । चि॒कि॒त्वान् । अव॑ । प॒श्य॒ति॒ । यतः॑ । वि॒पा॒नः । एज॑ति ॥ २९ ॥

वेङ्कट० अतः उद्वतः स्वर्गाद् अमुष्मात् [1]प्राज्ञः अव[1] पश्यति अन्तरिक्षम्, यतः स्तूयमानः जानन् वा देवः चलति ॥ २९ ॥

आदित्प्र॒त्नस्य॒ रेत॑सो॒ ज्योति॑ष्पश्यन्ति वास॒रम् । प॒रो यदि॒ध्यते॑ दि॒वा ॥ ३० ॥

आत् । इत् । प्र॒त्नस्य॑ । रेत॑सः । ज्योतिः॑ । प॒श्य॒न्ति॒ । वा॒स॒रम् । प॒रः । यत् । इ॒ध्यते॑ । दि॒वा ॥ ३० ॥

वेङ्कट० अनन्तरमेव[2] प्रत्नस्य उदकस्य सम्बन्धि ज्योतिः पश्यन्ति वासयितृ, यदा इन्द्रः[3] परस्तात् सम् इध्यते आदित्येन अन्तरिक्षस्थानः ॥ ३० ॥

[4]इति पञ्चमाष्टके अष्टमाध्याये चतुर्दशो वर्गः[4] ॥

कण्वा॑स इन्द्र ते म॒तिं विश्वे॑ वर्धन्ति॒ पौंस्य॑म् । उ॒तो श॑विष्ठ॒ वृष्ण्य॑म् ॥ ३१ ॥

कण्वा॑सः । इ॒न्द्र॒ । ते॒ । म॒तिम् । विश्वे॑ । व॒र्ध॒न्ति॒ । पौंस्य॑म् । उ॒तो इति॑ । श॒वि॒ष्ठ॒ । वृष्ण्य॑म् ॥ ३१ ॥

वेङ्कट० कण्वासः इन्द्र! ते सुमतिम् विश्वे वर्धयन्ति पौंस्यम्[5] च, अपि च हे बलवत्तर! वृष्ण्यम् ॥ ३१ ॥

इ॒मां म॑ इन्द्र सुष्टु॒तिं जु॑षस्व॒ प्र सु माम॑व । उ॒त प्र व॑र्धया म॒तिम् ॥ ३२ ॥

इ॒माम् । मे॒ । इ॒न्द्र॒ । सु॒ऽस्तु॒तिम् । जु॒षस्व॑ । प्र । सु । माम् । अ॒व॒ । उ॒त । प्र । व॒र्ध॒य॒ । म॒तिम् ॥ ३२ ॥

वेङ्कट० इमाम् मे इन्द्र! सुष्टुतिम् सेवस्व। प्रकर्षेण सुष्ठु माम् रक्ष। अपि च वर्धय स्तोतारम् ॥ ३२ ॥

उ॒त ब्र॑ह्म॒ण्या व॒यं तुभ्यं॑ प्रवृद्ध वज्रिवः । विप्रा॑ अतक्ष्म जी॒वसे॑ ॥ ३३ ॥

उ॒त । ब्र॒ह्म॒ण्या । व॒यम् । तुभ्य॑म् । प्र॒ऽवृ॒द्ध॒ । व॒ज्रि॒ऽवः॒ । विप्राः॑ । अ॒त॒क्ष्म॒ । जी॒वसे॑ ॥ ३३ ॥

वेङ्कट० अपि च ब्रह्माणि[6] वयम् तुभ्यम् हे प्रवृद्ध! वज्रिन्! मेधाविनः संस्कृतवन्तः जीवनाय ॥ ३३ ॥

अ॒भि कण्वा॑ अनूष॒तापो॒ न प्र॒वता॑ य॒तीः । इन्द्रं॒ वन॑न्वती म॒तिः ॥ ३४ ॥

१-१. प्राज्ञाव मूको. २. अन्तर° मूको. ३. इन्द्र मूको. ४-४. नास्ति मूको. ५. वीर्य मूको. ६. ब्रह्माणि कर्माणि अ°, कर्माणि वि°.

अभि । कण्वाः । अनूषत । आपः । न । प्रऽवता । यतीः । इन्द्रम् । वनन्ऽवती । मतिः ॥ ३४ ॥

वेङ्कट० अभि अस्तुवन् कण्वाः इन्द्रम् आप इव प्रवणेन गच्छन्त्यः । इन्द्रम् प्रविभजन्ती(?)[1] स्तुतिः भवति ॥ ३४ ॥

इन्द्रमुक्थानि वावृधुः समुद्रमिव सिन्धवः । अनुत्तमन्युमजरम् ॥ ३५ ॥

इन्द्रम् । उक्थानि । वावृधुः । समुद्रम्ऽइव । सिन्धवः । अनुत्तऽमन्युम् । अजरम् ॥ ३५ ॥

वेङ्कट० निगदसिद्धा । अनुत्तमन्युम् अतिरस्कृतक्रोधम्[2] ॥ ३५ ॥

[3]इति पञ्चमाष्टके अष्टमाध्याये पञ्चदशो वर्गः[3] ॥

आ नो याहि परावतो हरिभ्यां हर्यताभ्याम् । इममिन्द्र सुतं पिब ॥ ३६ ॥

आ । नः । याहि । पराऽवतः । हरिऽभ्याम् । हर्यताभ्याम् । इमम् । इन्द्र । सुतम् । पिब ॥ ३६ ॥

वेङ्कट० आ याहि अस्मान् दूराद् अश्वाभ्याम् कमनीयाभ्याम् । इमम् इन्द्र सुतम् पिब । हर्यतिः प्रेप्साकर्मेति ॥ ३६ ॥

त्वामिद् वृत्रहन्तम जनासो वृक्तबर्हिषः । हवन्ते वाजसातये ॥ ३७ ॥

त्वाम् । इत् । वृत्रहन्ऽतम । जनासः । वृक्तऽबर्हिषः । हवन्ते । वाजऽसातये ॥ ३७ ॥

वेङ्कट० निगदसिद्धा ॥ ३७ ॥

अनु त्वा रोदसी उभे चक्रं न वर्त्येतशम् । अनु सुवानास इन्दवः ॥ ३८ ॥

अनु । त्वा । रोदसी इति । उभे इति । चक्रम् । न । वर्ति । एतशम् । अनु । सुवानासः । इन्दवः ॥ ३८ ॥

वेङ्कट० अनुगच्छत त्वा द्यावापृथिव्यौ उभे, यथा रथचक्रम् अग्रतो गच्छन्तम् अश्वम् अनु वर्तते । अनु वर्तन्ते [4]अभिषूयमाणाश्च इन्दवः[4] ॥ ३८ ॥

मन्दस्वा सु स्वर्णर उतेन्द्र शर्यणावति । मत्स्वा विवस्वतो मती ॥ ३९ ॥

मन्दस्व । सु । स्वःऽनरे । उत । इन्द्र । शर्यणाऽवति । मत्स्व । विवस्वतः । मती ॥ ३९ ॥

वेङ्कट० मन्दस्व सुष्ठु स्वर्णराख्ये देशे राजनि वा, अपि च इन्द्र शर्यणावति । शर्यणावन्नाम[5] कुरुक्षेत्रस्य जघनमध्यस्थं सरः[6] । मत्स्व च विवस्वतः राज्ञः स्तुत्या ॥ ३९ ॥

वावृधान उप द्यवि वृषा वज्र्यरोरवीत् । वृत्रहा सोमपातमः ॥ ४० ॥

---

१ प्रति भव तो मूको, सम्भजनवती सा. २ उत्तर प्रहित वि[1]; उत्तर प्रहितक्रोध व्याख्याने अ[1]. ३-३ नास्ति मूको ४-४ °णश्चैव मूको ५ शवपवत्वनाम वि[1], शर्यणवन्नाम अ[1]. ६ सो मूको

वृऽधान. । उर्प । घर्षि । वृषा । वज्री । अरोरवीत् । वृत्रऽहा । सोमऽपार्तम ॥ ४० ॥

वेङ्कट० वर्धमान उप रोरवीति अन्तरिक्षे वृषा वज्री वृत्रहा अतिशयेन सोमस्य पाता ॥ ४० ॥

[1]इति पञ्चमाष्टके अष्टमाध्याये षोडशो वर्गः[1] ॥

ऋषि॒र्हि पू॑र्व॒जा अस्येक॒ ईशा॑न॒ ओज॑सा । इन्द्र॑ चोष्कू॒यसे॒ वसु॑ ॥ ४१ ॥

ऋषि॑ । हि । पू॒र्व॒ऽजाः । असि॑ । एकः॑ । ईशा॑नः । ओज॑सा । इन्द्र॑ । चो॒ष्कू॒यसे॑ । वसु॑ ॥ ४१ ॥

वेङ्कट० द्रष्टा हि सर्वस्य जगत. पूर्वं त्व भवसि एक ईशान बलेन। स त्वम् इन्द्र! स्तोतृभ्य वसु प्रवीपि ॥४१॥

अ॒स्माकं॑ त्वा सु॒ताँ उप॑ वी॒तपृ॑ष्ठा अ॒भि प्रयः॑ । श॒तं व॑हन्तु॒ हर॑यः ॥ ४२ ॥

अ॒स्माक॑म् । त्वा॒ । सु॒तान् । उप॑ । वी॒तऽपृ॑ष्ठाः । अ॒भि । प्रयः॑ । श॒तम् । व॒ह॒न्तु॒ । हर॑यः ॥ ४२ ॥

वेङ्कट० अस्माकम् त्वा सुतान् [2]सोमान् उप वहन्तु[2] कान्तपृष्ठा हविर्लक्षणमन्नं च अभि शतम्[3] अश्वाः ॥ ४२ ॥

इ॒मां सु पू॒र्व्यां धियं॒ मधो॑र्घृ॒तस्य॑ पि॒प्युषी॑म् । कण्वा॑ उ॒क्थेन॑ वावृधुः ॥ ४३ ॥

इ॒माम् । सु । पू॒र्व्याम् । धिय॑म् । मधोः॑ । घृ॒तस्य॑ । पि॒प्युषी॑म् । कण्वाः॑ । उ॒क्थेन॑ । व॒वृ॒धुः॒ ॥ ४३ ॥

वेङ्कट० इदं कर्म सुष्ठु वर्धयन्ति प्रत्न मधुना घृतेन च पूर्णम् कण्वा शस्त्रेण ॥ ४३ ॥

इन्द्र॒मिद् विम॑हीनां॒ मेधे॑ वृणीत॒ मर्त्यः॑ । इन्द्रं॑ सनि॒ष्युरू॒तये॑ ॥ ४४ ॥

इन्द्र॑म् । इत् । विऽम॑हीनाम् । मेधे॑ । वृ॒णी॒त॒ । मर्त्यः॑ । इन्द्र॑म् । स॒नि॒ष्युः । ऊ॒तये॑ ॥ ४४ ॥

वेङ्कट० इन्द्रम् एव विशिष्टमहत्त्वानां देवानां[4] मध्ये मेधे मर्त्य वृणीत, इन्द्रमेव सनिमिच्छन्[5] रक्षणार्थम् ॥ ४४ ॥

अ॒र्वाञ्चं॑ त्वा पुरुष्टुत प्रि॒यमे॑धस्तुता॒ हरी॑ । सो॒म॒पेया॑य वक्षतः ॥ ४५ ॥

अ॒र्वाञ्च॑म् । त्वा॒ । पु॒रु॒ऽस्तु॒त॒ । प्रि॒यमे॑धऽस्तुता । हरी॒ इति॑ । सो॒म॒ऽपेया॑य । व॒क्ष॒तः॒ ॥ ४५ ॥

वेङ्कट० निगदसिद्धा ॥ ४५ ॥

श॒तम॒हं ति॒रिन्दि॑रे स॒हस्रं॒ पर्शा॒वा द॑दे । राधां॑सि॒ याद्वा॑नाम् ॥ ४६ ॥

श॒तम् । अ॒हम् । ति॒रिन्दि॑रे । स॒हस्र॑म् । पर्शौ॑ । आ । द॒दे॒ । राधां॑सि । याद्वा॑नाम् ॥ ४६ ॥

वेङ्कट० कात्यायन —'तृचोऽन्त्य तिरिन्दिरस्य पार्शव्यस्य दानस्तुति' (ऋअ २,८,६) इति । शतम्

1-1. नास्ति मूको २-२. सोमान्वनुपहन्तु वि°, सोमान्वनुपहन्तु अ° ३ ३. शतम् मूको. ४ देवानां वि°, ५ मनिच्छन् मूको

अहम् तिरिन्दिरे[1] सहस्रम् च पर्शोः पुत्रे आ ददे प्रत्यगृह्णाम् अन्नानि यदुकुलजातानां मदीयानां पुत्रपौत्राणां भरणार्थम् ॥ ४६ ॥

त्रीणि शतान्यर्वतां सहस्रा दश गोनाम् । ददुष्पज्राय साम्ने ॥ ४७ ॥

त्रीणि । शतानि । अर्वताम् । सहस्रा । दश । गोनाम् । ददुः । पज्राय । साम्ने ॥ ४७ ॥

वेङ्कट० त्रीणि शतानि अश्वानाम् दश च सहस्राणि गवाम् प्रायच्छन्[2] पज्रकुलजाताय मह्यं स्तुवते ॥४७॥

उदानट् ककुहो दिवमुष्ट्राञ्चतुर्युजो ददत् । श्रवसा याद्वं जनम् ॥ ४८ ॥

उत् । आनट् । ककुहः । दिवम् । उष्ट्रान् । चतुःऽयुजः । ददत् । श्रवसा । याद्वम् । जनम् ॥ ४८ ॥

वेङ्कट० व्याप्नोति[3] उच्छ्रितः दिवम्[4] तिरिन्दिरः उष्ट्रान् चतुर्युजः[5] प्रयच्छन् अन्नेन च उत् आनट् यदुवंशजम् जनम् इत्यात्मानमाह ॥ ४८ ॥

[6]इति पञ्चमाष्टके अष्टमाध्याये सप्तदशो वर्गः[6] ॥

[७]

'पुनर्वत्सः काण्व ऋषिः । मरुतो देवता । गायत्री छन्दः' ।

प्र यद्वस्त्रिष्टुभमिषं मरुतो विप्रो अक्षरत् । वि पर्वतेषु राजथ ॥ १ ॥

प्र । यत् । वः । त्रिऽस्तुभम् । इषम् । मरुतः । विप्रः । अक्षरत् । वि । पर्वतेषु । राजथ ॥ १ ॥

वेङ्कट० पुनर्वत्सः । यदा प्र अक्षरत् मेधावी युष्माकम् त्रिष्टुभम् इषम्, अन्नं त्रिष्टुप्[7] त्रिवृत्युच्छ्राये[8] हि तत् । 'अभि द्विजन्मा त्रिवृदन्नम्' (ऋ १,१४०,२) इत्युक्तम् । हे मरुतः! [9]तस्य मेघेषु[9] वि राजथ तस्य वर्षार्थं प्रादुर्भूताः ॥ १ ॥

यदङ्ग तविषीयवो यामं शुभ्रा अचिध्वम् । नि पर्वता अहासत ॥ २ ॥

यत् । अङ्ग । तविषीऽयवः । यामम् । शुभ्राः । अचिध्वम् । नि । पर्वताः । अहासत ॥ २ ॥

वेङ्कट० यदा क्षिप्रं हे बलमिच्छन्तः! गमनं हे शोभमानाः! कुरुथ, तदानीम् [10]पर्वताः नि अहासत[10] स्वस्मात् स्थानात् निचलन्ति[11] ॥ २ ॥

उदीरयन्त वायुभिर्वाश्रासः पृश्निमातरः । धुक्षन्त पिप्युषीमिषम् ॥ ३ ॥

उत् । ईरयन्त । वायुऽभिः । वाश्रासः । पृश्निऽमातरः । धुक्षन्त । पिप्युषीम् । इषम् ॥ ३ ॥

---

१. तिमिन्द्रे मूको. २ प्रयच्छ मूको. ३. उदश्नो° अ¹. ४. दीप मूको. ५. चतुरज मूको. ६-६. नास्ति मूको. ७. तप. < √ स्तुभ् [°उच्छ्राये] इति, त्रिपद मूको. ८. °य मूको. ९-९. मेधावी ... मेधे° मूको. १०-१० पर्वतानिहासत अ¹; °निहासत वि². ११. न चलन्ति वि².

वेङ्कट० उत् गमयन्ति सर्वत.[1] वायुभि[2] प्रत्यक्षमाहर्तै याशनशीला गोमातर, मरुत. ऋभुक्षन् शोकस्य प्यायम्[3] उदकम् अश्वं वेति[4] ॥ ३ ॥

वर्षन्ति मुरुतो मिहं प्र वेपयन्ति पर्वतान् । यद् यामं यान्ति वायुभिः ॥ ४ ॥

वर्षन्ति । मरुतः । मिहम् । [5]प्र । वेपयन्ति । पर्वतान्[5] । यत् । यामम् । यान्ति । वायुऽभिः ॥ ४ ॥

वेङ्कट० भूम्या निवपन्ति मरुत वृष्टिम्, प्र वेपयन्ति च [6]मेघान्, यदा यामम्[6] प्राप्नुवन्ति [7]वायुभि सह[7] ॥ ४ ॥

नि यद् यामाय वो गिरिर्नि सिन्धवो विधर्मणे । मुहे शुष्माय येमिरे ॥ ५ ॥

नि । यत् । यामाय । वः । गिरिः । नि । सिन्धवः । विऽधर्मणे । महे । शुष्माय । येमिरे ॥ ५ ॥

वेङ्कट० यदा नियता भवन्ति युष्माकं गमनाय गिरि सिन्धवः च विधारकाय गमनाय महते च बलाय विधेयीभूता । निश्चलास्तिष्ठन्तीत्यर्थः[8] । पूर्वत्र वाक्यसमाप्ति ॥ ५ ॥

[9]इति पञ्चमाष्टके अष्टमाध्याये अष्टादशो वर्गः[9] ॥

युष्माँ उ नक्तमूतये युष्मान् दिवा हवामहे । युष्मान् प्रयत्यध्वरे ॥ ६ ॥

युष्मान् । ऊँ इति । नक्तम् । ऊतये । युष्मान् । दिवा । हवामहे । युष्मान् । प्रऽयति । अध्वरे ॥ ६ ॥

वेङ्कट० निगदसिद्धा ॥ ६ ॥

उदु त्ये अरुणप्सवश्चित्रा यामेभिरीरते । वाश्रा अधि ष्णुना दिवः ॥ ७ ॥

उत् । ऊँ इति । त्ये । अरुणऽप्सवः । चित्राः । यामेभिः । ईरते । वाश्राः । अधि । स्नुना । दिवः ॥ ७ ॥

वेङ्कट० उत् ईरते अमी मरुत अरुणरूपा चित्रा नानाविधस्वरूपा[10] [11]यामेभि वाशनशीला अधि सानुना दिव[11] ॥ ७ ॥

सृजन्ति रश्मिमोजसा पन्थां सूर्याय यातवे । ते भानुभिर्वि तस्थिरे ॥ ८ ॥

सृजन्ति । रश्मिम् । ओजसा । पन्थाम् । सूर्याय । यातवे । ते । भानुऽभिः । वि । तस्थिरे ॥ ८ ॥

वेङ्कट० पन्थानं सूर्यस्य यातु ते दीप्तिभि वितन्वन्ति । रश्मिभि सूर्यस्य गमनाय मार्ग कुर्वन्तीति ॥ ८ ॥

इमां मे मरुतो गिरमिमं स्तोममृभुक्षणः । इमं मे वनता हवम् ॥ ९ ॥

---

१ समुद्रा वि॰ २ वायुभिवि॰, वायुभि॰ अ॰ ३ प्याय॰ मूको ४. तु ऋ ८,१३,२५, ५४,७, ९,६१,१५. ५-५ तु. ऋ १,३९,५. ६-६. मेघान्याम॰ मूको. ७-७ नास्ति अ॰. ८. निश्चलास्तिष्ठन्ती॰ मूको ९-९ नास्ति मूको १०. ॰धस्वरूपा मूको. ११-११. तु ऋ ५,२८,२, मा शीलादि मूको.

इमाम् । मे । मरुतः । गिरम् । इमम् । स्तोमम् । ऋभुक्षणः । इमम् । मे । वनत । हवम् ॥ ९ ॥

वेङ्कट० इमाम् मे हे मरुतः ! गिरम्, इमम् च साम्नाम् स्तोमम् हे महान्तः ! (तु. निघ ३,३), इमम् ह्वानम् च भजत ॥ ९ ॥

त्रीणि सरांसि पृश्नयो दुदुह्रे वज्रिणे मधु । उत्सं कवन्धमुद्रिणम् ॥ १० ॥

त्रीणि । सरांसि । पृश्नयः । दुदुह्रे । वज्रिणे । मधु । उत्सम् । कवन्धम् । उद्रिणम् ॥ १० ॥

वेङ्कट० यथा त्रीणि सरांसि पूर्णानि भवन्ति तथा पृश्निपुत्राः इन्द्राय सोममयम् मधु अदुहन्[१] 'कवन्धम्† उत्सम्§ उदकदानम् उद्रिणम्‡'[१] इत्यन्तरिक्षमाह । वृत्रवधाय । तथा कुर्वन् यथामन्तरिक्षीगच्छतामभीपाणामिति(?) ॥ १० ॥

'इति पञ्चमाष्टके अष्टमाध्याये एकोनविंशो वर्गः'[४] ॥

मरुतो यद्ध वो दिवः सुम्नायन्तो हवामहे । आ तू न उप गन्तन ॥ ११ ॥

मरुतः । यत् । ह । वः । दिवः । सुम्नऽयन्तः । हवामहे । आ । तु । नः । उप । गन्तन ॥ ११ ॥

वेङ्कट० मरुतः ! यदा खलु [५]वः दिवः द्युलोकात्[५] सुखमिच्छन्तः वयम् ह्वयामहे, तदैव क्षिप्रम् आ गच्छत अस्मान् ॥ ११ ॥

यूयं हि ष्ठा सुदानवो रुद्रा ऋभुक्षणो दमे । उत प्रचेतसो मदे ॥ १२ ॥

यूयम् । हि । स्थ । सुऽदानवः । रुद्राः । ऋभुक्षणः । दमे । उत । प्रऽचेतसः । मदे ॥ १२ ॥

वेङ्कट० भवथ हे शोभनदानाः ! रुद्रपुत्राः ! महान्तः ! यज्ञे, अपि च सुमतयः सोममदे ॥ १२ ॥

आ नो रयिं मदच्युतं पुरुक्षुं विश्वधायसम् । इयर्ता मरुतो दिवः ॥ १३ ॥

आ । नः । रयिम् । मदऽच्युतम् । पुरुऽक्षुम् । विश्वऽधायसम् । इयर्त । मरुतः । दिवः ॥ १३ ॥

वेङ्कट० आभिमुख्येन 'प्रेरयत धनम्' मदस्योपस्थापकम् बहुशब्दम् विश्वस्य धारकम् अस्माकं हे मरुतः ! दिवः आहृत्य ॥ १३ ॥

अधीव यद् गिरीणां यामं शुभ्रा अचिध्वम् । सुवानैर्मन्दध्व इन्दुभिः ॥ १४ ॥

अधिऽइव । यत् । गिरीणाम् । यामम् । शुभ्राः । अचिध्वम् । सुवानैः । मन्दध्वे । इन्दुऽभिः ॥ १४ ॥

वेङ्कट० उपरि पर्वतानाम् हे शुभ्राः ! यदा गमनम् कुरुथ, तदानीं "सूयमानैः सोमैः"[७] मन्दध्वे[८] ॥ १४ ॥

एतावतश्चिदेषां सुम्नं भिक्षेत मर्त्यः । अदाभ्यस्य मन्मभिः ॥ १५ ॥

---

१ तु. ऋ २,२४,४. २. तु. ऋ ५,२९,७,६,१७,११. ३ ३. कवनोत्समुदकदानमुद्रिणम् मूको. † तु. या १०,४; वैप १,१०८८ n. § तु. या १०,९; वैप १,८९१ f. ‡ तु. या १०,१२; वैप १,८९६ ४ ४. नास्ति मूको. ५ ५. गोपुलो' वि', गोद्युलो' अ'. ६-६ मेरय तबतं मूको. ७ सूयमान सोमे मूको ८. मदध्वे मूको.

एतावतः । चित् । एषाम् । सुम्नम् । भिक्षेत । मर्त्यः । अदाभ्यस्य । मन्मऽभिः ॥ १५ ॥

वेङ्कट० एतावतः पोष्यवर्गस्य शत्रुभिरहिंस्यस्य 'स्तुतिभिः मर्त्यः सुखम् भिक्षयेत' मरुतां सम्बन्धि ॥ १५ ॥

'इति पञ्चमाष्टके अष्टमाध्याये विंशो वर्गः' ॥

ये द्रप्सा इव रोदसी धमन्त्यनु वृष्टिभिः । उत्सं दुहन्तो अक्षितम् ॥ १६ ॥

ये । द्रप्साःऽइव । रोदसी इति । धमन्ति । अनु । वृष्टिऽभिः । उत्सम् । दुहन्तः । अक्षितम् ॥ १६ ॥

वेङ्कट० ये मरुतः उदकद्रप्सा इव पतन्तः द्यावापृथिव्यौ अनु धमन्ति वृष्टिभिः शब्दापयन्ति, मेघम् दुहन्तः अक्षीणम् ॥ १६ ॥

उदु स्वानेभिरीरत उद् रथैरुदु वायुभिः । उत् स्तोमैः पृश्निमातरः ॥ १७ ॥

उत् । ॐ इति । स्वानेभिः । ईरते । उत् । रथैः । उत् । ॐ इति । वायुऽभिः । उत् । स्तोमैः । पृश्निऽमातरः ॥

वेङ्कट० उत् गच्छन्ति शब्दैः उत् रथैः उत् अश्वैः उत् च स्तुतिभि सह गोमातरः ॥ १७ ॥

येनाव तुर्वशं यदुं येन कण्वं धनस्पृतम् । राये सु तस्य धीमहि ॥ १८ ॥

येन । आव । तुर्वशम् । यदुम् । येन । कण्वम् । धनऽस्पृतम् । राये । सु । तस्य । धीमहि ॥ १८ ॥

वेङ्कट० येन 'ररक्षु· तुर्वशम्' यदुम् मरुद्गणाः, येन च कण्वम् धनस्य स्प्रष्टारम्, धनार्थम् वयं 'मरुतां तच्छर्म' सुष्ठु धीमहि ध्यायामह इति ॥ १८ ॥

इमा उ वः सुदानवो घृतं न पिप्युषीरिषः । वर्धान् काण्वस्य मन्मभिः ॥ १९ ॥

इमाः । ॐ इति । वः । सुऽदानवः । घृतम् । न । पिप्युषीः । इषः । वर्धान् । काण्वस्य । मन्मऽभि ॥

वेङ्कट० इमाः एव युष्मान् हे शोभनदाना ! आज्यम् इव 'वृद्धाः इषः' हवींषि वर्धयन्तु काण्वस्य मन्मभिः स्तुतिभिः सह ॥ १९ ॥

क्व नूनं सुदानवो मदथा वृक्तबर्हिषः । ब्रह्मा को वः सपर्यति ॥ २० ॥

क्व । नूनम् । सुऽदानवः । मदथ । वृक्तऽबर्हिषः । ब्रह्मा । कः । वः । सपर्यति ॥ २० ॥

वेङ्कट० क्व सम्प्रति यज्ञे मदथ हे सुदानाः ! स्तीर्णबर्हिषः ! आसनार्थं यजमाने । क [5]ब्राह्मण. वः अधुना[5] परिचरति ॥ २० ॥

'इति पञ्चमाष्टके अष्टमाध्याये एकविंशो वर्गः' ॥

१-१. तु. ऋ ८,१८,१; स्तुतिभिर्मर्त्यसुखं भिक्षयन मूको. २-२. नास्ति मूको. ३-३. ररक्षतुर्वशम् मूको. ४-४. वृद्धायुष. मूको. ५-५. °ह्मण···धुना मूको.

नहि ष्म यद्ध वः पुरा स्तोमेभिर्वृक्तबर्हिषः । शर्धाँ ऋतस्य जिन्वथ ॥ २१ ॥

नहि । स्म । यत् । ह । वः । पुरा । स्तोमेभिः । वृक्तऽबर्हिषः । शर्धान् । ऋतस्य । जिन्वथ ॥ २१ ॥

वेङ्कट० न खलु स तद् इदानीं भवति, यत् खलु यूयं पूर्वस्मिन् काले स्तोमैः हे वृक्तबर्हिषः[1] उत्साहान् सत्यभूतस्य यजमानस्य प्रीणयथ ॥ २१ ॥

समु त्ये महतीरपः सं क्षोणी समु सूर्यम् । सं वज्रं पर्वशो दधुः ॥ २२ ॥

सम् । ऊँ इति । त्ये । महतीः । अपः । सम् । क्षोणी इति । सम् । ऊँ इति । सूर्यम् । सम् । वज्रम् । पर्वऽशः । दधुः ॥ २२ ॥

वेङ्कट० सम् दधुः ते महद् अन्तरिक्षम् (द्र. निघ २,३), सम्[1] [2]द्यावापृथिवी, सम् सूर्यम्[2] । सम् दधुः वज्रम् चेन्द्रायुधम् पर्वशः[3] ॥ २२ ॥

वि वृत्रं पर्वशो ययुर्वि पर्वताँ अराजिनः । चक्राणा वृष्णि पौंस्यम् ॥ २३ ॥

वि । वृत्रम् । पर्वऽशः । ययुः । वि । पर्वतान् । अराजिनः । चक्राणाः । वृष्णि । पौंस्यम् ॥ २३ ॥

वेङ्कट० वि ययुः वृत्रम् असुरम् पर्वशः (द्र. ऋ ८,६,१३) । यातिर्वधकर्मसु (द्र निघ २,१९) पठितः । अपि च मेघान् ईश्वरवर्जितान् कुर्वाणाः वर्षणशीलम् बलम्[4] ॥ २३ ॥

अनु त्रितस्य युध्यतः शुष्ममावन्नुत क्रतुम् । अन्विन्द्रं वृत्रतूर्ये ॥ २४ ॥

अनु । त्रितस्य । युध्यतः । शुष्मम् । आवन् । उत । क्रतुम् । अनु । इन्द्रम् । वृत्रऽतूर्ये ॥ २४ ॥

वेङ्कट० [5]अनु अरक्षन् मरुतः त्रितस्य[5] बलम् युध्यतः, अपि च प्रज्ञानम् । एतदेवाह—अनु अरक्षन्[6] इन्द्रम् [7]वृत्रवधार्थे सङ्ग्रामे[7] इति ॥ २४ ॥

विद्युद्धस्ता अभिद्यवः शिप्राः शीर्षन् हिरण्ययीः । शुभ्रा व्यञ्जत श्रिये ॥ २५ ॥

विद्युत्ऽहस्ताः । अभिऽद्यवः । शिप्राः । शीर्षन् । हिरण्ययीः । शुभ्राः । वि । अञ्जत । श्रिये ॥ २५ ॥

वेङ्कट० विद्योतमानहस्ताः अभिगतदीप्तयः तेषाम् शीर्षन् हिरण्मय्यः शिप्राः भवन्ति शिरस्त्राणानि (द्र ऋ ५,५४,११) । शोभमानाः मरुतः श्र्यर्थम् आभरणैः[8] अङ्गानि वि अञ्जत । 'चित्रैरञ्जिभिर्वपुषे' (ऋ १,६४,४) इत्युक्तम् ॥ २५ ॥

[9]इति पञ्चमाष्टके अष्टमाध्याये द्वाविंशो वर्गः[9] ॥

उशना यत् परावत उक्ष्णो रन्ध्रमयातन । द्यौर्न चक्रदद् भिया ॥ २६ ॥

उशना । यत् । पराऽवतः । उक्ष्णः । रन्ध्रम् । अयातन । द्यौः । न । चक्रदत् । भिया ॥ २६ ॥

---

1. नास्ति अ[1]. 2-2. °द्यावा° सू° वि[2]. 3. वर्षेश मूको 4. चल मूको 5-5. अन रि- क्षस्थानत्वेद्रस्य वि[1], अन्तरिक्षस्थानस्येन्द्रस्य अ[1]. 6. अक्षरन् मूको 7-7. वृत्रवध° मूको 8. श्रियथम् मूको 9-9. नास्ति मूको

वेङ्कट० उशना यूयं च हे मरुतः! शुष्णासुरवधार्थं यदा मेघस्य द्वारम् दूरात् अयातन[1] अन्तर्वर्तमानं "तं हन्तुम्[2]", तदा द्यौः इव स शुष्णः अक्रन्दीत् भयेन ॥ २६ ॥

आ नो मखस्य दावनेऽश्वैर्हिरण्यपाणिभिः । देवास उप गन्तन ॥ २७ ॥

आ । नः । मखस्य । दावने । अश्वैः । हिरण्यपाणिऽभिः । देवासः । उप । गन्तन ॥ २७ ॥

वेङ्कट० उप आ गच्छत अस्मान् धनस्य दानाय[3] अश्वैः हिरण्यपाणिभिः हे देवाः! ॥ २७ ॥

यदेषां पृषती रथे प्रष्टिर्वहति रोहितः । यान्ति शुभ्रा रिणन्नपः ॥ २८ ॥

यत् । एषाम् । पृषतीः । रथे । प्रष्टिः । वहति । रोहितः । यान्ति । शुभ्राः । रिणन् । अपः ॥ २८ ॥

वेङ्कट० यत् एषाम् पृषतीः[4] रोहितः च यदवाः रथे प्रष्टिः च सुयुक्तः वहति प्रापयति[5] युनक्ति, तदा यान्ति शोभमानाः प्रेरयन्ति उदकानि च ॥ २८ ॥

सुषोमे शर्यणावत्यार्जीके पस्त्यावति । ययुर्निचक्रया नरः ॥ २९ ॥

सुऽसोमे । शर्यणाऽवति । आर्जीके । पस्त्यऽवति । ययुः । निऽचक्रया । नरः ॥ २९ ॥

वेङ्कट० सुषोमो नाम देशो यत्र सुषोमा नदी, तत्र शर्यणावति[6] च "तथा आर्जीके[7]" च पस्त्यावति च मरुतो यान्ति। निचक्रा नाम पुरी, तया सुषोमादिषु गच्छन्ति मार्गस्थितया। यद्वा नियमितचक्रया सेनया सह यान्तीति ॥ २९ ॥

कदा गच्छाथ मरुत इत्था विप्रं हवमानम् । मार्डीकेभिर्नाधमानम् ॥ ३० ॥

कदा । गच्छाथ । मरुतः । इत्था । विप्रम् । हवमानम् । मार्डीकेभिः । नाधमानम् ॥ ३० ॥

वेङ्कट० कदा गच्छाथ हे मरुतः! इत्थम् विप्रम् हवमानम् सुखकरैर्धनैः सह याचमानम् ॥ ३० ॥

'इति पञ्चमाष्टके अष्टमाध्याये त्रयोविंशो वर्गः[8]' ॥

कद्ध नूनं कधप्रियो यदिन्द्रमजहातन । को वः सखित्व ओहते ॥ ३१ ॥

कत् । ह । नूनम् । कधऽप्रियः । यत् । इन्द्रम् । अजहातन । कः । वः । सखिऽत्वे । ओहते ॥ ३१ ॥

वेङ्कट० कदा खलु यूयं हे स्तोत्रप्रियाः![9] स कालो भवति, यस्मिन् यूयम् इन्द्रम् परित्यजत। सर्वदेन्द्रेण सह वर्तध्वे[10] इति। कः वा युष्माद् अयजमानः सख्ये प्रापयति ॥ ३१ ॥

सहो षु णो वज्रहस्तैः कण्वासो अग्निं मरुद्भिः । स्तुषे हिरण्यवाशीभिः ॥ ३२ ॥

---

१. मध्यत° मूको. २-२. तदन्तुम् मूको. ३. दाता वेः मूको. ४. वृदती मूको. ५. याति तापय° मूको. ६. °ती वि°. ७-७. तदार्जिते मूको. ८-८. नास्ति मूको. ९. स्तोतृनि° वि°. १०. वर्तं ··· मूको.

सुद्रो इति । सु । नः । वज्रऽहस्तैः । कण्वासः । अग्निम् । मरुत्ऽभिः । स्तुषे । हिरण्यऽवाशीभिः ॥३२॥

वेङ्कट० सहैव अस्माकं स्वभूता इमे कण्वाः मरुद्भिः आयुधहस्तैः स्तुवन्ति, तथा चाहमपि हिरण्यवाशीभिः मरुद्भिः सहैव अग्निम्[1] स्तौमि। हिरण्यैरलङ्कृतानि आयुधानि भवन्ति मरुताम् ॥३२॥

ओ षु वृष्णः प्रयज्यूना नव्यसे सुवितायं । ववृत्यां चित्रवाजान् ॥ ३३ ॥

ओ इति । सु । वृष्णः । प्रऽयज्यून् । आ । नव्यसे । सुवितायं । ववृत्याम् । चित्रऽवाजान् ॥ ३३ ॥

वेङ्कट० आ वर्तयाम् वर्षितॄन् प्रकर्षेण यष्टव्यान् भवताय अभ्युदयाय चित्राान्नान् ॥ ३३ ॥

गिरयश्चिन्नि जिहते पर्शानासो मन्यमानाः । पर्वताश्चिन्नि येमिरे ॥ ३४ ॥

गिरयः । चित् । नि । जिहते । पर्शानासः । मन्यमानाः । पर्वताः । चित् । नि । येमिरे ॥ ३४ ॥

वेङ्कट० गिरयः पर्शानाः (तु. निघ १,१०) इति मेघनामनी। तत्रैकं नैघण्टुकम्। ते च नि जिहते[2] निर्गच्छन्ति मरुद्भिः अभिगम्यमानाः। तथा शिलोच्चयाश्च नियताः भवन्ति मरुद्भिः मन्यमानाः, न प्रतिगच्छन्ति ॥ ३४ ॥

आक्ष्णयावानो वहन्त्यन्तरिक्षेण पततः । धातारः स्तुवते वयः ॥ ३५ ॥

आ । अक्ष्णऽयावानः । वहन्ति । अन्तरिक्षेण । पततः । धातारः । स्तुवते । वयः ॥ ३५ ॥

वेङ्कट० आ गच्छन्ति अक्ष्णयावानः[3]। दिवि दिग्भ्यो निर्गत्य विदिशो[4] ये गच्छन्ति ते तथोक्ताः। अन्तरिक्षेण पतन्तः। नुमभावश्छान्दसः। स्तुवते मनुष्याय अन्नं ताच्छील्येन दातारः[5] ॥ ३५ ॥

अग्निर्हि जानि पूर्व्यश्छन्दो न सूरो अर्चिषा । ते भानुभिर्वि तस्थिरे ॥ ३६ ॥

अग्निः । हि । जानि । पूर्व्यः । छन्दः । न । सूरः । अर्चिषा । ते । भानुऽभिः । वि । तस्थिरे ॥ ३६ ॥

वेङ्कट० अग्निः हि अजनि निर्मथितः 'पूर्व्यः छन्दः' इव सूर्यो भवन् तेजसा। अथ तमग्निं जातम् भानुभिः मरुतः वि स्तारयन्ति ॥ ३६ ॥

[6]इति पञ्चमाष्टके अष्टमाध्याये चतुर्विंशो वर्गः[6] ॥

[८]

[7]सध्वंसः काण्व ऋषिः। अश्विनौ देवता। अनुष्टुप् छन्दः[7]।

आ नो विश्वाभिरूतिभिरश्विना गच्छतं युवम् ।
दस्रा हिरण्यवर्तनी पिबतं सोम्यं मधु ॥ १ ॥

---

१. अग्नीन् वि[२]. २. जिहिते मूको. ३. आक्ष्ण° मूको. ४. निवि° अ[१]. ५. दार अग्निरिति मूको. ६-६. पूर्ववच्छविन अ[१]; पूर्वच्छन्द वि[२]. ७-७. नास्ति मूको.

आ । नः । विश्वाभिः । ऊतिऽभिः । अश्विना । गच्छतम् । युवम् ।
दस्रा । हिरण्यवर्तनी इति हिरण्यऽवर्तनी । पिबतम् । सोम्यम् । मधु ॥ १ ॥

वेङ्कट० सप्तमः । आ गच्छतम् अस्मान् विश्वैः रक्षणैः हे अश्विनौ¹ 'युवाम् । आगत्य' च हे दर्शनीयौ! हिरण्यरथौ पिबतम् सोममयम् अन्नम् ॥ १ ॥

आ नूनं यातमश्विना रथेन सूर्यत्वचा ।
भुजी हिरण्यपेशसा कवी गम्भीरचेतसा ॥ २ ॥

आ । नूनम् । यातम् । अश्विना । रथेन । सूर्यऽत्वचा ।
भुजी इति । हिरण्यऽपेशसा । कवी इति । गम्भीरऽचेतसा ॥ २ ॥

वेङ्कट० आ यातम् इदानीम् अश्विनौ¹ 'रथेन सूर्यतेजसा² हे भोजयितारौ¹ हिरण्य ··· ॥ २ ॥

आ यातं नहुषस्पर्यान्तरिक्षात् सुवृक्तिभिः ।
पिबाथो अश्विना मधु कण्वानां सवने सुतम् ॥ ३ ॥

आ । यातम् । नहुषः । परि । आ । अन्तरिक्षात् । सुवृक्तिऽभिः ।
पिबाथः । अश्विना । मधु । कण्वानाम् । सवने । सुतम् ॥ ३ ॥

वेङ्कट० ³श्विनौ! सोमम् कण्वानाम् यज्ञे सुतम् ॥ ३ ॥

आ नो यातं दिवस्पर्यान्तरिक्षादधप्रिया ।
पुत्रः कण्वस्य वामिह सुषाव सोम्यं मधु ॥ ४ ॥

आ । नः । यातम् । दिवः । परि । आ । अन्तरिक्षात् । अधऽप्रिया ।
पुत्रः । कण्वस्य । वाम् । इह । सुसाव । सोम्यम् । मधु ॥ ४ ॥

वेङ्कट० निगदसिद्धा ॥ ४ ॥

आ नो यातमुपश्रुत्यश्विना सोमपीतये ।
स्वाहा स्तोमस्य वर्धना प्र कवी धीतिभिर्नरा ॥ ५ ॥

आ । नः । यातम् । उपऽश्रुति । अश्विना । सोमऽपीतये ।
स्वाहा । स्तोमस्य । वर्धना । प्र । कवी इति । धीतिऽभिः । नरा ॥ ५ ॥

वेङ्कट० पानाय स्वाहाकारं यज्ञम् स्तोमस्य स्तोतुः कर्मभिः हे वर्धयितारौ⁴ धनानि ॥ ५ ॥

⁴इति पञ्चमाष्टके अष्टमाऽध्याये पञ्चविंशो वर्गः⁴ ॥

१-१. 'वामदत्य मूको. २-२. रथेन तेजसा मूको. ३. पर्वेष स'. ४-४. नास्ति मूको

यच्चिद्धि वां पुर ऋषयो जुहूरेऽवसे नरा ।
आ यातमश्विना गतमुपेमां सुष्टुतिं मम ॥ ६ ॥

यत् । चित् । हि । वाम् । पुरा । ऋषयः । जुहूरे । अवसे । नुरा ।
आ । यातम् । अश्विना । आ । गतम् । उप । इमाम् । सुऽस्तुतिम् । मम ॥ ६ ॥

वेङ्कट० यत् चित् हि वाम् पुरा पूर्वस्मिन्नेव काले ऋषयः आहूतवन्तौ रक्षणाय नरा.!। तथापि अस्मान् आ यातम् अश्विनौ!, उप गच्छतम् [१]च मम इमाम्[१] सुष्टुतिम् ॥ ६ ॥

दिवश्चिद् रोचनादध्या नो गन्तं स्वर्विदा ।
धीभिर्वत्सप्रचेतसा स्तोमेभिर्हवनश्रुता ॥ ७ ॥

दिवः । चित् । रोचनात् । अधि । आ । नः । गन्तम् । स्वःऽविदा ।
धीभि. । वत्सऽप्रचेतसा । स्तोमेभिः । हवनऽश्रुता ॥ ७ ॥

वेङ्कट० द्युलोकाद् रोचनात् आ गच्छतम् अस्मान् हे स्वर्विदौ!। कर्माणि उद्दिश्य हे वत्सप्रचेतसौ! वत्सेषु प्रमनसौ तथोक्तौ स्त मामुद्दिश्य हे ह्वानश्रुतौ! ॥ ७ ॥

किमन्ये पर्यासतेऽस्मत् स्तोमेभिरश्विना ।
पुत्रः कण्वस्य वामृषिर्गीर्भिर्वत्सो अवीवृधत् ॥ ८ ॥

किम् । अन्ये । परि । आसते । अस्मत् । स्तोमेभिः । अश्विना ।
पुत्र । कण्वस्य । वाम् । ऋषिः । गीःऽभिः । वत्सः । अवीवृधत् ॥ ८ ॥

वेङ्कट० किम् अस्मत्तः अन्ये अश्विनौ! स्तोमैः परि उपविशन्ति । अथ प्रत्यक्ष —कण्वस्य पुत्रः वाम्[२] वत्सः ऋषिः मम भ्राता स्तुतिभिः वर्धयति । वयमेवाश्विनौ स्तुम इति ॥ ८ ॥

आ वां विप्र इहावसेऽह्वत् स्तोमेभिरश्विना ।
अरिप्रा वृत्रहन्तमा ता नो भूतं मयोभुवा ॥ ९ ॥

आ । वाम् । विप्रः । इह । अवसे । अह्वत् । स्तोमेभिः । अश्विना ।
अरिप्रा । वृत्रहन्ऽतमा । ता । नः । भूतम् । मयःऽभुवा ॥ ९ ॥

वेङ्कट० आ अह्वत् वाम् विप्र इह रक्षणार्थम् स्तोमैः अश्विनौ!। हे अपापौ! अतिशयेन शत्रूणां हन्तारौ! तौ अस्माकं भवतम् सुखस्य भावयितारौ ॥ ९ ॥

१-१. च मिमा मूको. २. भया मूको.

आ यद् वां योषणा रथमतिष्ठद् वाजिनीवसू ।
विश्वान्यश्विना युवं प्र धीतान्यगच्छतम् ॥ १० ॥

आ । यत् । वाम् । योषणा । रथम् । अतिष्ठत् । वाजिनीवसू इति वाजिनीऽवसू ।
विश्वानि । अश्विना । युवम् । प्र । धीतानि । अगच्छतम् ॥ १० ॥

वेङ्कट० हे अन्नवद्धनौ![1] आ अतिष्ठत् यदा[2] युवयोः रथम् सूर्यस्य दुहिता, तदानीम् विश्वानि चिन्तितानि अश्विनौ! युवाम् प्र अगच्छतम् ॥ १० ॥

[3]इति पञ्चमाष्टके अष्टमाध्याये षड्विंशो वर्गः[3] ॥

अतः सहस्रनिर्णिजा रथेना यातमश्विना ।
वत्सो वां मधुमद् वचोऽशंसीत् काव्यः कविः ॥ ११ ॥

अतः । सहस्रऽनिर्निजा । रथेन । आ । यातम् । अश्विना ।
वत्सः । वाम् । मधुऽमत् । वचः । अशंसीत् । काव्यः । कविः ॥ ११ ॥

वेङ्कट० अस्मात्कारणात् रथेन आ गच्छतम् सहस्ररूपेण अश्विनौ!, यतः 'वत्सः वाम्' [4]मधुमत् वचः[4] अशंसीत् कवेः पुत्रः स्वयं च[5] कविः ॥ ११ ॥

पुरुमन्द्रा पुरूवसू मनोतरा रयीणाम् ।
स्तोमं मे अश्विनाविममभि वह्नी अनूषाताम् ॥ १२ ॥

पुरुऽमन्द्रा । पुरुवसू इति पुरुऽवसू । मनोतरा । रयीणाम् ।
स्तोमम् । मे । अश्विनौ । इमम् । अभि । वह्नी इति । अनूषाताम् ॥ १२ ॥

वेङ्कट० बहुस्तोमौ बहुधनौ निर्मातारौ धनानाम् स्तोमम् मे अश्विनौ इमम् अभि अनूषाताम् वोढारौ । अभिष्टवोऽभिनवः । [6]सुष्टु स त्वया[6] स्तुतं[7] इति ॥ १२ ॥

आ नो विश्वान्यश्विना धत्तं राधांस्यह्रया ।
कृतं न ऋत्वियावतो मा नो रीरधतं निदे ॥ १३ ॥

आ । नः । विश्वानि । अश्विना । धत्तम् । राधांसि । अह्रया ।
कृतम् । नः । ऋत्वियऽवतः । मा । नः । रीरधतम् । निदे ॥ १३ ॥

वेङ्कट० 'आ धत्तम्' नः विश्वानि धनानि अश्विनौ! अनवनतौ उच्छ्रितवदनौ । कुरुतम् अस्मान् प्राप्तुकामान् आयुष्मतः । मा अस्मान् [8]वशी कुरुतम् निन्दित्रे शत्रवे ॥ १३ ॥

---

1. अन्नध° मूको. 2. यथा मूको[?]. 3-3 नास्ति मूको. 4-4. वचो वा मूको. 5-5. मधुवचः अ[1]. 6. समुच्चये निपातस्तु द्र. (तु. या १,६); तत् अ[1]. 7-7. सुष्टुमनया अ[1]. 8. स्तुतम् मूको. 9-9. अवत मूको.

यन्नासत्या परावति यद् वा स्थो अध्यम्बरे ।
अतः सहस्रनिर्णिजा रथेना यातमश्विना ॥ १४ ॥

यत् । नासत्या । पराऽवति । यत् । वा । स्थः । अधि । अम्बरे ।
अतः । सहस्रऽनिर्निजा । रथेन । आ । यातम् । अश्विना ॥ १४ ॥

वेङ्कट० निगदसिद्धा ॥ १४ ॥

यो वां नासत्यावृषिर्गीर्भिर्वत्सो अवीवृधत् ।
तस्मै सहस्रनिर्णिजमिषं धत्तं घृतश्चुतम् ॥ १५ ॥

यः । वाम् । नासत्यौ । ऋषिः । गीःऽभिः । वत्सः । अवीवृधत् ।
तस्मै । सहस्रऽनिर्निजम् । इषम् । धत्तम् । घृतऽश्चुतम् ॥ १५ ॥

वेङ्कट० निगदसिद्धा ॥ १५ ॥

'इति पञ्चमाष्टके अष्टमाध्याये सप्तविंशो वर्गः' ॥

प्रास्मा ऊर्जं घृतश्चुतमश्विना यच्छतं युवम् ।
यो वां सुम्नाय तुष्टवद् वसूयाद् दानुनस्पती ॥ १६ ॥

प्र । अस्मै । ऊर्जम् । घृतऽश्चुतम् । अश्विना । यच्छतम् । युवम् ।
यः । वाम् । सुम्नाय । तुस्तवत् । वसुऽयात् । दानुनः । पती इति ॥ १६ ॥

वेङ्कट० 'प्र यच्छतम्' अस्मै अन्नम् आज्यसिक्तम् सत्, आज्यसिक्तं क्षरति', अश्विनौ! युवाम्। यः वाम् सुखाय अस्तौत् धनमिच्छन् हे दानस्य स्वामिनौ! ॥ १६ ॥

आ नो गन्तं रिशादसेमं स्तोमं पुरुभुजा ।
कृतं नः सुश्रियो नरेमा दातमभिष्टये ॥ १७ ॥

आ । नः । गन्तम् । रिशादसा । इमम् । स्तोमम् । पुरुऽभुजा ।
कृतम् । नः । सुऽश्रियः । नरा । इमा । दातम् । अभिष्टये ॥ १७ ॥

वेङ्कट० आ गच्छतम् अस्माकं हे रिशतामसितारौ![4] इमम् स्तोमम् बहुभोजनौ!। कुरुतं चास्मान् सुश्रीकान्[5] नरौ!। इमानि च धनानि दत्तम् अभीच्छतेऽस्मै ॥ १७ ॥

आ वां विश्वाभिरूतिभिः प्रियमेधा अहूषत ।
राजन्तावध्वराणामश्विना यामहूतिषु ॥ १८ ॥

१-१. नास्ति मूको. २-२. प्रागच्छ° वि[१]; प्रगच्छ° अ[१]. ३-३. रक्षति मूको. ४. °सितौ मूको. ५. इश्रीतान् मूको.

आ । वाम् । विश्वाभिः । ऊतिऽभिः । प्रियऽमेधाः । अहूषत ।
राजन्तौ । अध्वराणाम् । अश्विना । यामऽहूतिषु ॥ १८ ॥

वेङ्कट० आहूतवन्तः वाम् विश्वाभिः ऊतिभिः स्तुतिभिः[1] प्रियमेधकुले जाताः, प्रियमेधो नाम काण्वपुत्रः, ईशानौ यज्ञानाम् हे अश्विनौ ! यामाऽऽह्वानेषु भवतोरागमनार्थेषु ह्वानेषु ॥ १८ ॥

आ नो गन्तं मयोभुवाश्विना शंभुवा युवम् ।
यो वां विपन्यू धीतिभिर्गीर्भिर्वत्सो अवीवृधत् ॥ १९ ॥

आ । नः । गन्तम् । मयःऽभुवा । अश्विना । शम्ऽभुवा । युवम् ।
यः । वाम् । विपन्यू इति । धीतिऽभिः । गीःऽभिः । वत्सः । अवीवृधत् ॥ १९ ॥

वेङ्कट० निगदसिद्धा । अस्मान् आ गच्छतम् इमं च वत्सम्, यः हे स्तुतिकामौ ! युवां कर्मभिः स्तुतिभिश्च वर्धयति ॥ १९ ॥

याभिः कण्वं मेधातिथिं याभिर्वशं दशव्रजम् ।
याभिर्गोशर्यमावतं ताभिर्नोऽवतं नरा ॥ २० ॥

याभिः । कण्वम् । मेधऽअतिथिम् । याभिः । वशम् । दशऽव्रजम् ।
याभिः । गोऽशर्यम् । आवतम् । ताभिः । नः । अवतम् । नरा ॥ २० ॥

वेङ्कट० याभिः एतान् अरक्षतम्, ताभिः अस्मान् अभिरक्षतम् । 'गोशर्य्यम् स्थूमरश्मिमित्याहुः'[2] ॥२०॥

'इति पञ्चमाष्टके अष्टमाध्याये अष्टाविंशो वर्गः'[1] ॥

याभिर्नरा त्रसदस्युमावतं कृत्व्ये धने ।
ताभिः ष्व१स्माँ अश्विना प्रावतं वाजसातये ॥ २१ ॥

याभिः । नरा । त्रसदस्युम् । आवतम् । कृत्व्ये । धने ।
ताभिः । सु । अस्मान् । अश्विना । प्र । अवतम् । वाजऽसातये ॥ २१ ॥

वेङ्कट० याभिः ऊतिभिः हे नरौ ! त्रसदस्युम्[4] आवतम् कर्तव्ये धने, ताभिः सुष्ठु अस्मान् अश्विनौ ! प्र रक्षतम् अन्नलाभाय ॥ २१ ॥

प्र वां स्तोमाः सुवृक्तयो गिरो वर्धन्त्वश्विना ।
पुरुत्रा वृत्रहन्तमा ता नो भूतं पुरुस्पृहा ॥ २२ ॥

प्र । वाम् । स्तोमाः । सुऽवृक्तयः । गिरः । वर्धन्तु । अश्विना ।
पुरुऽत्रा । वृत्रहन्ऽतमा । ता । नः । भूतम् । पुरुऽस्पृहा ॥ २२ ॥

---

१. देतिभिः मूको. २-२. "शृय्यस्थूम" मूको. ३-३. नास्ति मूको. ४ सद° मूको.

वेङ्कट० 'प्रबुद्धौ कुर्वन्तु वाम्' स्तोमाः सुप्रवृत्ताः येषला गिरः च अश्विनौ! । हे बहूनां त्रातारौ! अतिशयेन वृत्रस्य हन्तारौ! तौ अस्माकं भवतम् बहूनां स्पृहणीयौ ॥ २२ ॥

त्रीणि पदान्यश्विनोराविः सान्ति गुहा परः ।
कवी ऋतस्य पत्मभिरर्वाग्जीवेभ्यस्परि ॥ २३ ॥

त्रीणि । पदानि । अश्विनोः । आविः । सन्ति । गुहा । परः ।
कवी इति । ऋतस्य । पत्मऽभिः । अर्वाक् । जीवेभ्यः । परि ॥ २३ ॥

वेङ्कट० त्रय अंशाः अश्विनो आविः भवन्ति । 'द्यावापृथिवीरूपेण इमे अश्विना' (तु. माश ४,१,५,१६) इति ब्राह्मणम् । परस्तात्स्थितोऽसौ गुहायां भवति । तौ कवी सर्वानन्यान् जीवानपहाय अर्वाक् आगच्छतम् ऋतस्य पतनैः सह उदकानि पातयन्ताविति ॥ २३ ॥

[१]इति पञ्चमाष्टके अष्टमाध्याये एकोनत्रिंशो वर्गः[१] ॥

[९]

[१]शशकर्णः काण्व ऋषिः । अश्विनौ देवता । अनुष्टुप् छन्दः, प्रथमाचतुर्थीषष्ठीचतुर्दशीपञ्चदश्यो बृहत्य, द्वितीयातृतीयाविंश्येकविंश्यो गायत्र्य, पञ्चमी ककुप्, दशमी त्रिष्टुप्, एकादशी विराट्, द्वादशी जगती[१] ।

आ नूनमश्विना युवं वत्सस्य गन्तमवसे ।
प्रास्मै यच्छतमवृकं पृथु च्छर्दिर्युयुतं या अरातयः ॥ १ ॥

आ । नूनम् । अश्विना । युवम् । वत्सस्य । गन्तम् । अवसे ।
प्र । अस्मै । यच्छतम् । अवृकम् । पृथु । छर्दिः । युयुतम् । याः । अरातयः ॥ १ ॥

वेङ्कट० शशकर्णः । आ गच्छतम् इदानीम् अश्विनौ[२] युवाम् अस्य वत्सस्य रक्षणाय । प्र [३]यच्छतम् अस्मै स्तेनरहितम्[३] विस्तीर्णम् गृहम् । पृथक् कुरुतम् च याः अरातयः प्रजाः ॥ १ ॥

यदन्तरिक्षे यद् दिवि यत् पञ्च मानुषाँ अनु । नृम्णं तद् धत्तमश्विना ॥ २ ॥

यत् । अन्तरिक्षे । यत् । दिवि । यत् । पञ्च । मानुषान् । अनु । नृम्णम् । तत् । धत्तम् । अश्विना ॥ २ ॥

वेङ्कट० यत् अन्तरिक्षादिषु भवति धनम्, तत्[४] अस्मभ्यम् धत्तम् हे अश्विनौ! ॥ २ ॥

ये वां दंसांस्यश्विना विप्रासः परिमामृशुः । एवेत् काण्वस्य बोधतम् ॥ ३ ॥

ये । वाम् । दंसांसि । अश्विना । विप्रासः । परिऽममृशुः । एव । इत् । काण्वस्य । बोधतम् ॥ ३ ॥

वेङ्कट० ये युवयोः कर्माणि अश्विनौ! मेधाविनः परिममृशुः निरूपितवन्तः, तेषामिव काण्वस्य अपि स्तुतिं बुध्यतम् ॥ ३ ॥

१-१. प्रबुद्ध · मूको. २-२. नास्ति मूको. ३-३. ता···स्तेनरहि° मूको. ४. तम् मूको.

अयं वां घर्मो अश्विना स्तोमेन परि षिच्यते ।
अयं सोमो मधुमान् वाजिनीवसू येन वृत्रं चिकेतथः ॥ ४ ॥

अयम् । वाम् । घर्मः । अश्विना । स्तोमेन । परि । सिच्यते ।
अयम् । सोमः । मधुऽमान् । वाजिनीवसू इति वाजिनीऽवसू । येन । वृत्रम् । चिकेतथः ॥ ४ ॥

वेङ्कट० अयम् वाम् घर्मः अश्विनौ! महावीरस्थितः आज्येन स्तोमेन परि सिच्यते । अयम्[1] च भवतो[2] सोमः रसवान् हे[3] अन्नवन्तौ[4]!, येन हि तेन पुरा वृत्रम् युवाम् चिकेतथ । मधुसोऽभावश्छान्दसः ॥ ४ ॥

यदप्सु यद् वनस्पतौ यदोषधीषु पुरुदंससा कृतम् ।
तेन माविष्टमश्विना ॥ ५ ॥

यत् । अप्ऽसु । यत् । वनस्पतौ । यत् । ओषधीषु । पुरुऽदंससा । कृतम् ।
तेन । मा । अविष्टम् । अश्विना ॥ ५ ॥

वेङ्कट० यत् अप्सु हे पुरुकर्माणौ[5] एतेषु भवद्भ्याम् कृतम्, तेन मां रक्षतम् अश्विनौ! ॥ ५ ॥

[5]इति पञ्चमाष्टके अष्टमाध्याये त्रिंशो वर्गः[5] ॥

यन्नासत्या भुरण्यथो यद् वा देव भिषज्यथः ।
अयं वां वत्सो मतिभिर्न विन्धते हविष्मन्तं हि गच्छथः ॥ ६ ॥

यत् । नासत्या । भुरण्यथः । यत् । वा । देवा । भिषज्यथः ।
अयम् । वाम् । वत्सः । मतिऽभिः । न । विन्धते । हविष्मन्तम् । हि । गच्छथः ॥ ६ ॥

वेङ्कट० यद्यपि नासत्यौ[1] गच्छथ[6] यत् वा हे देवौ[1] भैषज्यं कुरुथ स्तोतॄणाम्, तथापि अयम् वाम् वत्स स्तुतिभिः न लभते । विन्दतेर्णान्यत्वं छान्दसम् । 'न विन्धे अस्य सुष्टुतिम्' (ऋ १,७,७) इति मन्त्रः । हविष्मन्तम् हि युवाम् गच्छथः ॥ ६ ॥

आ नूनमश्विनोर्ऋषिः स्तोमं चिकेत वामया ।
आ सोमं मधुमत्तमं घर्मं सिञ्चादथर्वणि ॥ ७ ॥

आ । नूनम् । अश्विनोः । ऋषिः । स्तोमम् । चिकेत । वामया ।
आ । सोमम् । मधुमत्ऽतमम् । घर्मम् । सिञ्चात् । अथर्वणि ॥ ७ ॥

वेङ्कट० आ चिकेत ज्ञापयते तदानीम् अश्विनोः[7] स्तोमम् ऋषिः कल्याण्या वाचा । आ सिञ्चति सोमम् मधुमत्तमम् घर्मम् च अथर्वणि अग्नौ ॥ ७ ॥

---

१. यं मूको. २. भवतः मूको. ३. ये मूको. ४. अन्नव° मूको. ५-५. नास्ति मूको. ६. गच्छत मूको. ७. °नौ मूको.

आ नूनं रघुवर्तनिं रथं तिष्ठाथो अश्विना ।
आ वां स्तोमा इमे मम नभो न चुच्यवीरत ॥ ८ ॥

आ । नूनम् । रघुऽवर्तनिम् । रथम् । तिष्ठाथः । अश्विना ।
आ । वाम् । स्तोमाः । इमे । मम । नभः । न । चुच्यवीरत ॥ ८ ॥

वेङ्कट० आ तिष्ठथः इदानीम् रथम् रघुगमनम् अश्विनौ! । आभिमुख्येन च्यवन्ते युवयोः इमे स्तोमाः यथा आदित्य (तु. निघ २,१३) दिवः इतिहृति ॥ ८ ॥

यदद्य वां नासत्योक्थैराचुच्युवीमहि ।
यद् वा वाणीभिरश्विनेवेत् काण्वस्य बोधतम् ॥ ९ ॥

यत् । अद्य । वाम् । नासत्या । उक्थैः । आऽचुच्युवीमहि ।
यत् । वा । वाणीभिः । अश्विना । एव । इत् । काण्वस्य । बोधतम् ॥ ९ ॥

वेङ्कट० तत् अद्य वाम् नासत्यौ! शस्त्रैः आच्यावयाम, यत् च केवलाभिः ऋग्भिः[1] अश्विनौ!, एवमेव काण्वस्य वाक्यानि गिरश्च बुध्यतम् ॥ ९ ॥

यद् वां कक्षीवाँ उत यद् व्यश्व ऋषिर्यद् वां दीर्घतमा जुहाव ।
पृथी यद् वां वैन्यः सादनेष्वेवेदतो अश्विना चेतयेथाम् ॥ १० ॥

यत् । वाम् । कक्षीवान् । उत । यत् । विऽअश्वः । ऋषिः । यत् । वाम् । दीर्घऽतमाः । जुहाव ।
पृथी । यत् । वाम् । वैन्यः । सदनेषु । एव । इत् । अतः । अश्विना । चेतयेथाम् ॥ १० ॥

वेङ्कट० यथा कक्षीवान्[2] वाम् जुहाव, अपि च व्यश्वादिः, यथा वा वेनपुत्रः पृथी वाम्[3] यज्ञेषु । एवमेव अस्मात् कण्वात् अश्विनौ! स्तोत्राणि बुध्यतम् ॥ १० ॥

'इति पञ्चमाष्टके अष्टमाध्याये एकत्रिंशो वर्गः' ॥

यातं छर्दिष्पा उत नः परस्पा भूतं जगत्पा उत नस्तनूपा ।
वर्तिस्तोकाय तनयाय यातम् ॥ ११ ॥

यातम् । छर्दिःऽपौ । उत । नः । परःऽपा । भूतम् । जगत्ऽपौ । उत । नः । तनूऽपा ।
वर्तिः । तोकाय । तनयाय । यातम् ॥ ११ ॥

वेङ्कट० यातम् गृहस्य रक्षकौ, अपि चास्माक[4] ' ' पौत्रार्थं[5] च मार्गम् यातम् । गृहं वा यातमित्यर्थः[6] ॥ ११ ॥

---

1. ऋग्भिः मूको. 2. वाश्वी वां मूको. 2-3 °श्वादिभिर्यथा वानेन पुत्रपृथिवी मूको. 4-4 नास्ति मूको. 5 स्तोत्रार्थं मूको 6 °तामति वि°.

यदिन्द्रेण सरथं याथो अश्विना यद् वा वायुना भवथः समोकसा ।
यदादित्येभिर्ऋभुभिः सजोषसा यद् वा विष्णोर्विक्रमणेषु तिष्ठथः ॥ १२ ॥

यत् । इन्द्रेण । सऽरथम् । याथः । अश्विना । यत् । वा । वायुना । भवथः । समऽओकसा ।
यत् । आदित्येभिः । ऋभुऽभिः । सऽजोषसा । यत् । वा । विष्णोः । विऽक्रमणेषु । तिष्ठथः ॥ १२ ॥

वेङ्कट० यत् इन्द्रेण एकरथस्थम्[1] याथः अश्विनौ ! । यत् वा वायुना भवथः समाननिवासौ । यत् वा आदित्यैः ऋभुभिः वा सङ्गतौ । यत् वा विष्णोः विक्रमेषु[2] तिष्ठथः । पूर्वत्र सम्बन्धः ॥ १२ ॥

यदद्याश्विनावहं हुवेय वाजसातये ।
यत् पृत्सु तुर्वणे सहस्तच्छ्रेष्ठमश्विनोरवः ॥ १३ ॥

यत् । अद्य । अश्विनौ । अहम् । हुवेय । वाजऽसातये ।
यत् । पृत्ऽसु । तुर्वणे । सहः । तत् । श्रेष्ठम् । अश्विनोः । अवः ॥ १३ ॥

वेङ्कट० यत् अद्य अहम् अश्विनौ ![3] अन्नलाभाय हुवेय । ततोऽहम् यत्[4] सङ्ग्रामेषु तरते प्रतियोद्ध्रे अभिभावुकम् रक्षणम् तत् लभेय श्रेष्ठम् अश्विनोः रक्षणम् ॥ १३ ॥

आ नूनं यातमश्विनेमा हव्यानि वां हिता ।
इमे सोमासो अधि तुर्वशे यदाविमे कण्वेषु वामथ ॥ १४ ॥

आ । नूनम् । यातम् । अश्विना । इमा । हव्यानि । वाम् । हिता ।
इमे । सोमासः । अधि । तुर्वशे । यदौ । इमे । कण्वेषु । वाम् । अथ ॥ १४ ॥

वेङ्कट० आ यातम् इदानीम् अश्विनौ ! इमानि हवींषि वाम् विनिहितानि[5] । यथा इमे सोमाः तुर्वशे यदौ[6] निहिताः, तथा इमे सोमाः कण्वेषु च वाम् निहिता इति ॥ १४ ॥

यन्नासत्या पराके अर्वाके अस्ति भेषजम् ।
तेन नूनं विमदाय प्रचेतसा छर्दिर्वत्साय यच्छतम् ॥ १५ ॥

यत् । नासत्या । पराके । अर्वाके । अस्ति । भेषजम् ।
तेन । नूनम् । विऽमदाय । प्रऽचेतसा । छर्दिः । वत्साय । यच्छतम् ॥ १५ ॥

वेङ्कट० यत् नासत्यौ ! दूरे अन्तिके वा अस्ति भेषजम्, तेन नूनम् विमदाय ऋषये वत्साय च मम भार्ये सुखम् यच्छतम्[7] हे सुमती ! ॥ १५ ॥

[8]इति पञ्चमाष्टके अष्टमाध्याये द्वात्रिंशो वर्गः[8] ॥

---

१. एकरथारथं मूको.; त्रिवि. द. २. विचक्र° मूको. ३. °नौ अप मूको. ४. यः मूको.
५. निविदि° मूको. ६. यः वि°. ७. यच्छत मूको. ८-८. नास्ति मूको.

अबुत्स्यु प्र देव्या साकं वाचाहमश्विनोः ।
व्यावर्देव्या मतिं वि रातिं मर्त्येभ्यः ॥ १६ ॥

अबुत्सि । ऊँ इति । प्र । देव्या । साकम् । वाचा । अहम् । अश्विनोः ।
वि । आवः । देवि । आ । मतिम् । वि । रातिम् । मर्त्येभ्यः ॥ १६ ॥

वेङ्कट० प्रबुद्धोऽस्मि अहम् देव्या वाचा सह अश्विनोः । स्तुवन्नेव अश्विनौ अहं प्रबुद्धोऽस्मि । तां वाचमाह—हे देवि ! त्वमश्विनोः स्तुवती तयोः सुमतिम् । व्यावः आदृतौ वर्धय । वि गमयसि[1] । तथा वि गमयसि च तयोर्दानम् मर्त्येभ्यः । यद्वा उषसः सम्बोधनम् देवि ! इति ॥ १६ ॥

प्र बोधयोषो अश्विना प्र देवि सूनृते महि ।
प्र यज्ञहोतरानुषक् प्र मदाय श्रवो बृहत् ॥ १७ ॥

प्र । बोधय । उषः । अश्विना । प्र । देवि । सूनृते । महि ।
प्र । यज्ञऽहोतः । आनुषक् । प्र । मदाय । श्रवः । बृहत् ॥ १७ ॥

वेङ्कट० हे उषः ! अश्विनौ प्र बोधय[2] देवि ! सुशब्दे महति । हे यज्ञहोतः ! औपसाग्ने प्र यच्छ स्तोत्रे मदाय महद् अन्नम् अनुषक्तम् ॥ १७ ॥

यदुषो यासि भानुना सं सूर्येण रोचसे ।
आ हायमश्विनो रथो वर्तिर्याति नृपाय्यम् ॥ १८ ॥

यत् । उषः । यासि । भानुना । सम् । सूर्येण । रोचसे ।
आ । ह । अयम् । अश्विनोः । रथः । वर्तिः । याति । नृऽपाय्यम् ॥ १८ ॥

वेङ्कट० यदा त्वम् हे उषः ! भानुना सह यासि, तदा सूर्येण च सम् रोचसे, तदानीम् आ याति [3]अश्विनोः अयम् रथः वर्तिः[3] यज्ञम्, यत्र नृभिः [4]सोमः पीयते[4] ॥ १८ ॥

यदापीतासो अंशवो गावो न दुह्र ऊधभिः ।
यद् वा वाणीरनूषत प्र देवयन्तो अश्विना ॥ १९ ॥

यत् । आऽपीतासः । अंशवः । गावः । न । दुह्रे । ऊधऽभिः ।
यत् । वा । वाणीः । अनूषत । प्र । देवऽयन्तः । अश्विना ॥ १९ ॥

वेङ्कट० यदा रसन्[5] आपीताः अंशवः स्वरसं दुहन्ति गावः इव पयः ऊधभिः यदा[6] वाणीः प्र स्तुवन्ति देवौ अश्विनौ इच्छन्तः । पूर्वेण सम्बन्धः ॥ १९ ॥

---

1. = त्वरयसि । 2. अयन् मूको. 3-3. °नैङस्त्या रथे रथो याति मूको. 4-4. सोमपीतये भ'. 5. रक्षसे भ', रासे वि². 6. यथा स'.

प्र द्युम्नाय प्र शवसे प्र नृषाह्याय शर्मणे । प्र दक्षाय प्रचेतसा ॥ २० ॥

प्र । द्युम्नाय । प्र । शवसे । प्र । नृऽसह्याय । शर्मणे । प्र । दक्षाय । प्रऽचेतसा ॥ २० ॥

वेङ्कट० प्र स्तुवति अन्नाय प्र च शवसे प्र च शत्रूणामभिभवित्रे गृहाय 'प्र च बलाय' हे सुमती![1] ॥२०॥

यन्नूनं धीभिरश्विना पितुर्योना निषीदथः । यद् वा सुम्नेभिरुक्थ्या ॥ २१ ॥

यत् । नूनम् । धीभिः । अश्विना । पितुः । योना । निऽसीदथः । यत् । वा । सुम्नेभिः । उक्थ्या ॥ २१ ॥

वेङ्कट० यत् इदानीम् हे अश्विनौ! पितुः आदित्यस्य योनौ दिवि निषीदथः कर्मभिर्हेतुभिः तत्र कानिचित्कर्माणि कर्तुम्, यत् वा सुखान्यनुभवितुम् । अथापि भवन्तौ[2] रथे आयातम्[3] प्रशस्यौ! ॥२१॥

"इति पञ्चमाष्टके अष्टमाध्याये त्रयस्त्रिंशो वर्गः" ॥

[१०]

"प्रगाथो घौरः काण्व ऋषिः । अश्विनौ देवता । आद्या बृहती, द्वितीया मध्येज्योतिः, तृतीया अनुष्टुप्, चतुर्थी आस्तारपङ्क्तिः, पञ्चमीषष्ठ्यौ प्रगाथः (=पञ्चमी बृहती, षष्ठी सतोबृहती)[4] ।

यत् स्थो दीर्घप्रसद्मनि यद् वादो रोचने दिवः ।
यद् वा समुद्रे अध्याकृते गृहेऽत आ यातमश्विना ॥ १ ॥

यत् । स्थः । दीर्घऽप्रसद्मनि । यत् । वा । अदः । रोचने । दिवः ।
यत् । वा । समुद्रे । अधि । आऽकृते । गृहे । अतः । आ । यातम् । अश्विना ॥ १ ॥

वेङ्कट प्रगाथः[5] । यदि भवथः[6] युवां दीर्घतरयज्ञगृहे[7] यजमाने, यत् वा अमुष्मिन् आदित्यस्य रोचने लोके, यत् वा अन्तरिक्षे (तु. निघ १,३), युवयोर्निवासार्थम् आकृते गृहे आ यातम् हे अश्विनौ! ॥१॥

यद् वा यज्ञं मनवे संमिमिक्षथुरेवेत् काण्वस्य बोधतम् ।
बृहस्पतिं विश्वान् देवाँ अहं हुव इन्द्राविष्णू अश्विनावाशुहेषसा ॥ २ ॥

यत् । वा । यज्ञम् । मनवे । सम्ऽमिमिक्षथुः । एव । इत् । काण्वस्य । बोधतम् ।
बृहस्पतिम् । विश्वान् । देवान् । अहम् । हुवे । इन्द्राविष्णू इति । अश्विनौ । आशुऽहेषसा ॥२॥

वेङ्कट० यत् वा यज्ञम् मनुष्याय संमिमिक्षथुः । एवमेव काण्वस्य स्तुतिं बुध्यतम् । अथ परोक्षः । बृहस्पत्यादीन् ह्वयामि अश्विनौ च आशुगमनौ ॥ २ ॥

त्या न्व१श्विना हुवे सुदंससा गृभे कृता ।
ययोरस्ति प्र णः सख्यं देवेष्वध्याप्यम् ॥ ३ ॥

१-१. च प्रबलाय अ'. २. 'मतो मूको. ३. भवन्तौ वि'; 'वन्ते अ'. ४. भावाद्र मूको.
५-५. नास्ति मूको. ६. 'गार्ते मूको. ७. भवतो मूको. ८. दीर्घंतम' वि'; दीर्घतरय' अ'.

त्या । नु । अश्विना । हुवे । सुऽदंससा । गृभे । कृता ।
ययोः । अस्ति । प्र । नः । सख्यम् । देवेषु । अधि । आप्यम् ॥ ३ ॥

वेङ्कट० तौ क्षिप्रम् अश्विनौ ह्वयामि सुकर्माणौ[1] यज्ञगृहे कर्तारौ, ययोः प्र भवति सख्यम् अस्मदि-
षयम्, तथा देवेषु अधि[2] प्राप्तिः ज्ञातेयं वा[3]। देवेषु[3] वर्तते मनुष्येष्वपीति। अधि सप्तम्यर्थं
स्फुटीकरोति ॥ ३ ॥

ययोरधि प्र यज्ञा असूरे सन्ति सूरयः ।
ता यज्ञस्याध्वरस्य प्रचेतसा स्वधाभिर्या पिबतः सोम्यं मधु ॥ ४ ॥

ययोः । अधि । प्र । यज्ञाः । असूरे । सन्ति । सूरयः ।
ता । यज्ञस्य । अध्वरस्य । प्रऽचेतसा । स्वधाभिः । या । पिबतः । सोम्यम् । मधु ॥ ४ ॥

वेङ्कट० ययोः अधि यज्ञाः प्र भवन्ति, ययोश्च प्रसादेन प्रज्ञारहिते मनुष्ये प्रज्ञाः[4] प्रादुर्भवन्ति[5]।
ता यज्ञस्य अहिंसस्य[6] प्रचेतसौ नेतारौ भवन्तौ हविर्भिः यौ पिबतः सोममयम् मधु ॥ ४ ॥

यदद्याश्विनावपाग् यत् प्राक् स्थो वाजिनीवसू ।
यद् द्रुह्यव्यनवि तुर्वशे यदौ हुवे वामथ मा गतम् ॥ ५ ॥

यत् । अद्य । अश्विनौ । अपाक् । यत् । प्राक् । स्थः । वाजिनीवसू इति वाजिनीऽवसू ।
यत् । द्रुह्यवि । अनवि । तुर्वशे । यदौ । हुवे । वाम् । अथ । मा । आ । गतम् ॥ ५ ॥

वेङ्कट० यत् अद्य हे अश्विनौ! अपाक् भवथ, यदि वा प्राक् हे अन्नवन्तौ![7], यदि द्रुह्यौ राजनि
अनवि तुर्वशे यदौ वा स्थ, वाम् अहम् हुवे। सम्प्रति माम् आ गच्छतम् ॥ ५ ॥

यदन्तरिक्षे पतथः पुरुभुजा यद् वेमे रोदसी अनु ।
यद् वा स्वधाभिरधितिष्ठथो रथमत आ यातमश्विना ॥ ६ ॥

यत् । अन्तरिक्षे । पतथः । पुरुऽभुजा । यत् । वा । इमे इति । रोदसी इति । अनु ।
यत् । वा । स्वधाभिः । अधिऽतिष्ठथः । रथम् । अतः । आ । यातम् । अश्विना ॥ ६ ॥

वेङ्कट० यत् अन्तरिक्षे गच्छथ हे बहुभोजनौ!, [9]यत् वा[9] इमे द्यावापृथिव्यौ प्रति। यत् वा स्वस्वाभिः
स्वभाभिः सह आत्मीयम् रथम् अधितिष्ठथः। अतः आ गच्छतम् अश्विनौ! ॥ ६ ॥

[9]इति पञ्चमाष्टके अष्टमाध्याये चतुस्त्रिंशो वर्गः[9] ॥

---

१ सु° मूको. २ अति मूको. ३-३. नास्ति मूको. ४. नास्ति अ[1]. ५. प्रज्ञा ल[1]. ६. [9]धनि
अ[1]. ७ अहिंस मूको. ८. °न्दनौ मूको. ९-९. नास्ति मूको

[११]

[1]वत्स काण्व ऋषि । अग्निर्देवता । गायत्री छन्द , आद्या प्रतिष्ठा,
द्वितीया वर्धमाना, दशमी त्रिष्टुप्[1]।

त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा । त्वं यज्ञेष्वीड्यः ॥ १ ॥

त्वम् । अग्ने । व्रतऽपा । असि । देव । आ । मर्त्येषु । आ । त्वम् । यज्ञेषु । ईड्यः ॥ १ ॥

वेङ्कट० त्वम् अग्ने कर्मणः पालयिता भवसि, देवश्च सन् मर्त्येषु आगत्य वसन् । त्वम् [2]यज्ञेषु स्तुत्य असि[2] ॥ १ ॥

त्वमसि प्रशस्यो विदथेषु सहन्त्य । अग्ने रथीरध्वराणाम् ॥ २ ॥

त्वम् । असि । प्रऽशस्यः । विदथेषु । सहन्त्य । अग्ने । रथीः । अध्वराणाम् ॥ २ ॥

वेङ्कट० त्वम् भवसि स्तुत्य यज्ञेषु हे सहनकुशल! अग्ने! नेता अध्वराणाम् ॥ २ ॥

स त्वमस्मदप द्विषो युयोधि जातवेदः । अदेवीरग्ने अरातीः ॥ ३ ॥

सः । त्वम् । अस्मत् । अप । द्विषः । युयोधि । जातऽवेदः । अदेवीः । अग्ने । अरातीः ॥ ३ ॥

वेङ्कट० स त्वम् अस्मत्त[3] अप युयोधि[3] पृथक् कुरु द्वेष्टॄन् हे जातप्रज्ञ[1], तथा अदेवीः आसुरीः अग्ने! अरातीः अप्रयच्छन्तीश्च विशः[4] ॥ ३ ॥

अन्ति चित् सन्तमह यज्ञं मर्तस्य रिपोः । नोप वेषि जातवेदः ॥ ४ ॥

अन्ति । चित् । सन्तम् । अह । यज्ञम् । मर्तस्य । रिपोः । न । उप । वेषि । जातऽवेदः ॥ ४ ॥

वेङ्कट० अन्तिके चित् वर्तमानम् एव यज्ञम् मनुष्यस्य प्रमाता शत्रुभूतस्य न उप गच्छसि जातवेद! ॥ ४ ॥

मर्ता अमर्त्यस्य ते भूरि नाम मनामहे । विप्रासो जातवेदसः ॥ ५ ॥

मर्ताः । अमर्त्यस्य । ते । भूरि । नाम । मनामहे । विप्रासः । जातऽवेदसः ॥ ५ ॥

वेङ्कट० अमर्त्यस्य[5] ते बहूनि नामानि उच्चारयाम मेधाविनः मर्ताः जातप्रज्ञस्य ॥ ५ ॥

[1]इति पञ्चमाष्टके अष्टमाध्याये पञ्चत्रिंशो वर्गः[1] ॥

विप्रं विप्रासोऽवसे देवं मर्तास ऊतये । अग्निं गीर्भिर्हवामहे ॥ ६ ॥

विप्रम् । विप्रासः । अवसे । देवम् । मर्तासः । ऊतये । अग्निम् । गीःऽभिः । हवामहे ॥ ६ ॥

वेङ्कट० मेधाविनः मेधाविनम् रक्षणाय [6]देवम् मनुष्याः[6] रक्षणाय अग्निम् स्तुतिभिः ह्वयामहे ॥ ६ ॥

१-१ नास्ति मूको. २, यज्ञे मूको ३, नास्ति अ[1]. ४ वायु[1] वि[1]; वसु व सु[1] अ[1].
५ विशम् मूको. ६, मर्तस्य अ[1] ७-७. देवमनु[1] मूको

आ ते॑ व॒त्सो मनो॑ यमत् पर॒माच्चि॑त् स॒धस्था॑त् । अग्ने॒ त्वांका॑मया गि॒रा ॥७॥

आ । ते॒ । व॒त्सः । मनः॑ । य॒म॒त् । प॒र॒मात् । चि॒त् । स॒धऽस्था॑त् । अग्ने॑ । त्वाम्ऽका॑मया । गि॒रा ॥७॥

वेङ्कट० आभिमुख्येन आ यच्छतु[1] "वत्सः तव" मनः परमात् अपि तव आवासात्[1] अग्ने! त्वां कामयमानया स्तुत्या ॥ ७ ॥

पु॒रु॒त्रा हि स॒दृङ्ङसि॒ विशो॒ विश्वा॒ अनु॑ प्र॒भुः । स॒मत्सु॑ त्वा हवामहे ॥ ८ ॥

पु॒रु॒ऽत्रा । हि । स॒ऽदृङ् । असि॑ । विशः॑ । विश्वाः॑ । अनु॑ । प्र॒ऽभुः । स॒मत्ऽसु॑ । त्वा॒ । ह॒वा॒म॒हे॒ ॥८॥

वेङ्कट० बहुषु त्वं देशेषु प्रज्वलन् सदृङ्[2] भवसि, विशः[2] इव विश्वाः अनु प्रभवसि[3] । तम् त्वा सङ्ग्रामेषु हवामहे ॥ ८ ॥

स॒मत्स्व॒ग्निमव॑से वाज॒यन्तो॑ हवामहे । वाजे॑षु चि॒त्ररा॑धसम् ॥ ९ ॥

स॒मत्ऽसु॑ । अ॒ग्निम् । अव॑से । वा॒ज॒ऽयन्तः॑ । ह॒वा॒म॒हे॒ । वाजे॑षु । चि॒त्रऽरा॑धसम् ॥ ९ ॥

वेङ्कट० सङ्ग्रामेषु अग्निम् रक्षणाय अन्नमिच्छन्त. हवामहे, सङ्ग्रामेषु चित्रधनम् यः साधयति ॥ ९ ॥

प्र॒त्नो हि क॒मीड्यो॑ अध्व॒रेषु॑ स॒नाच्च॒ होता॒ नव्य॑श्च॒ सत्सि॑ ।
स्वां चा॑ग्ने त॒न्वं॑ पि॒प्रय॑स्वा॒स्मभ्यं॑ च॒ सौभ॑ग॒मा य॑जस्व ॥ १० ॥

प्र॒त्नः । हि । क॒म् । ईड्यः॑ । अ॒ध्व॒रेषु॑ । स॒नात् । च॒ । होता॑ । नव्यः॑ । च॒ । सत्सि॑ ।
स्वाम् । च॒ । अ॒ग्ने॒ । त॒न्व॑म् । पि॒प्रय॑स्व । अ॒स्मभ्य॑म् । च॒ । सौभ॑गम् । आ । य॒ज॒स्व॒ ॥१०॥

वेङ्कट० स्तुत्य. अध्वरेषु सनातन. होता नूतनः च सीदसि । स त्वम् स्वाम् च तन्वम्[7] प्रीणय, अस्मभ्यम् च सौभाग्यम् आभिमुख्येन देहि ॥ १० ॥

'इति पञ्चमाष्टके अष्टमाध्याये षट्त्रिंशो वर्ग.' ॥

ऋगर्थदीपिका सेयं पञ्चमध्यायमष्टक ।
कर्ता श्रीवेङ्कटार्यस्य तनयो माधवाह्वय ॥

इति वेङ्कटमाधवाचार्यविरचिते ऋक्संहिताव्याख्याने पञ्चमाष्टके अष्टमोऽध्यायः ॥

— ॰ —

इति ऋग्वेदे सभाष्ये पञ्चमाष्टके अष्टमोऽध्यायः ॥

पञ्चमोऽष्टकः समाप्तः ॥

१. गच्छतु मूको. २-२. वत्स मूको. ३. तवावासात् मूको. ४. बहु महन् अ[०]. ५. विङ्
[०]. ६. भव[०] मूको. ७. न[०] अ[०]; यं वि ८-८. नास्ति मूको

अथ षष्ठोऽष्टकः ।

वेङ्कट०

अथ षष्ठोऽष्टकस्तस्मिन्नध्यायादिषु वक्ष्यते ।
यच्छन्दसोऽत्र वक्तव्यं विद्यते छान्दसैर्द्विजैः ॥ १ ॥

गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च ।
त्रिष्टुब्जगत्यौ[1] सप्तेति च्छन्दांसि कवयो विदुः ॥ २ ॥

ननु चातिजगत्यस्ति शक्वर्यप्यतिशक्वरी ।
तथैव चाष्टिरत्यष्टिर्धृतिश्चातिधृतिस्तथा ॥ ३ ॥

सर्वाणि दृष्टानि च संहितायां
तथैव चासंश्चतुरुत्तराणि ।
ततश्च वेदे[2] वचनीयमित्थम्
इमानि छन्दांसि चतुर्दशेति ॥ ४ ॥

ननु च त्रीणि छन्दांसि चत्वारीति च दृश्यते ।
आहुः प्रवादौ भाक्तौ तौ सहस्वश्चैव शाश्वतम् ॥ ५ ॥

भवन्ति च्छान्दसानीह पदानि त्रीणि तद्यथा ।
एकमष्टाक्षरं दृष्टम् एकमेकादशाक्षरम् ॥ ६ ॥

द्वादशाक्षरमप्येकं तेन त्रीणीति भाषते ।
पदं दशाक्षरं चाल्पं वैराजं[3] तदुपेक्षितम् ॥ ७ ॥

गायत्र्येवोष्णिगभवत् पङ्क्तिमल्पाम्[4] उपेक्षते ।
अनुष्टुबेव[5] बृहती तेन चत्वारि भाषते ॥ ८ ॥

तद्वद्[6] भूयांसि सप्तैव प्रधानान्यपि वा पुनः ।
[7]कथ्यन्ते नामभिश्चैव गायत्री[7] जगतीति च ॥ ९ ॥

निवृतो[8] भूरिजश्चाहुस्ताश्चेन्नूनाधिकाक्षराः ।
द्वाभ्यां विराट्स्वराजौ [9]च निचृदुष्णिग्भुरिक्ककुप्[9] ॥ १० ॥

---

१. °जगत्यौ. वि¹ अ¹. २. वेदैः वि¹, वेदेः अ¹. ३. °राज्य वि¹ अ¹. ४. ··· पङ्क्तिम्" वि¹ अ¹. ५. °ष्टुभेति अ¹ वि¹ ६. तेन अ¹. ७-७. कथ्य ··· गायत्री" वि¹ अ¹. ८. निवृतो वि¹ अ¹. ९-९ च ··· भूरिक्कि ··· वि¹; च ··· भूरिकिच ··· अ¹.

'अग्नि पूर्वेभि ऋषिभिः'[1] गायत्री निचृदुच्यते ।
'उद्घासुविद् दुरः पृच्छेत्'[2] गायत्री सा[3] भुरिक्[4] स्मृता ॥ ११ ॥

विराजमाहुः 'राजन्तमध्वराणाम्'[5] इमामृचम् ।
'इन्द्रे जुषस्व प्रै वहा'[6] सैषानुष्टुप्स्वराडिति ॥ १२ ॥

चत्वारः पञ्चका पादा षट्कश्चैको यदा भवेत् ।
गायत्री पदपङ्क्ति सा 'अग्ना होतेि भर्ता'[7] इति ॥ १३ ॥

'चतुष्को वा[8] चतुर्थं स्यात् तत्रोदाहरण मिदम् ।
'अग्ने तमद्याश्वम्'[9] इति चतुष्को हि 'इद्रिरद्धा'[10] ॥ १४ ॥

पदपङ्क्तिन्तु पठति[11] पङ्क्तिच्छन्देव पतञ्जलि ।
कात्यायनस्य गायत्री पदपङ्क्तिरिति स्थिति ॥ १५ ॥

षट्सप्तैकादशा पादा उष्णिग्गर्भेति तां विदुः ।
सा 'ता मे अश्व्यानाम्'[12] इति यथश्च यदि[13] सप्तका ॥ १६ ॥

सा तु पादनिचृत्प्रोक्ता 'युवाकु हि शचीं(ची'[14] इ)ति सा ।
यदि सप्तकयोर्मध्ये षट्क साऽतिनिचृत्स्मृता ॥ १७ ॥

सा 'पुरुतमं पुरूणां स्तोतॄणाम्'[15] इति दृश्यते[16] ।
यदि सप्तकयोर्मध्ये दशाक स्यात् प्रतिष्ठित ॥ १८ ॥

यवमध्या सा भवति 'स सुन्वे यो वसूनाम्'[17] ।
षट्कसप्तकाष्टकाश्चेद् वर्धमानेति कीर्तिता ॥ १९ ॥

विपरीता प्रतिष्ठेति तत्रोदाहरण श्रृणु ।
'त्वमसि प्रशस्य'[18] इति 'त्वमग्ने मनुपा असि'[19] ॥ २० ॥

षट्कैश्चतुर्भिर्गायत्री पदैस्तु भवति कचित् ।
'इन्द्रश्शचीपति' इति तत्राहुस्तन्निदर्शनम्[20] ॥ २१ ॥

---

१. ऋ १,१,२. २ ऋ १,१२०,१. ३ नास्ति वि[1] अ[1] ४. भुरिति त्रि[1] अ[1].
५ ऋ १,१,८ ६ कौ २ ३ २ ७ ऋ ४,१०,२ ८. °ष्कोर वि[1] अ[1] ९. ऋ ४,१०,१.
१० ऋ १०,२५,२. ११. पठति वि[2], अ[1]. १२. ऋ ८,२५,२३ १३. इति वि[2] अ[1].
१४ १,१७,४. १५ ऋ ६,४५,२९ १६ दृश्यताम् वि[2]. १७ ऋ १,१०८,१३ १८. ऋ ८,११,२.
१९. ऋ ८ ११,१. २०. °शनम् । इन्द्र शचीपते बलेन वीळितः । दुश्च्यवनो वृषा समत्सु सासहिः ॥
(तु. ऋग्वा १६,१७) वि[1] अ[1].

[१२]

[1]पर्वतः काण्व ऋषिः । इन्द्रो देवता । उष्णिक् छन्दः[1] ।

य इन्द्र सोमपातमो मदः शविष्ठ चेतति । येना हंसि न्य१त्रिणं तमीमहे ॥१॥

यः । इन्द्र । सोमऽपातमः । मदः । शविष्ठ । चेतति । येन । हंसि । नि । अत्रिणम् । तम् । ईमहे ॥ १ ॥

वेङ्कट० पर्वतः[2] । यः इन्द्र! अतिशयेन सोमस्य पाता तव मदः हे बलवत्तम! प्रज्ञायते शत्रुभिः[3], येन मदेन त्वम् नि हंसि रक्षः, तम् मदं[4] वयम् अभिगच्छामः ॥ १ ॥

येना दशग्वमध्रिगुं वेपयन्तं स्वर्णरम् । येना समुद्रमाविथा तमीमहे ॥ २ ॥

येन । दशऽग्वम् । अध्रिऽगुम् । वेपयन्तम् । स्वःऽनरम् । येन । समुद्रम् । आविथ । तम् । ईमहे ॥ २ ॥

वेङ्कट० येन दिवोदासम् अप्रतगमनम् कम्पमानम् स्वर्णरम्, येन च समुद्रम् अरक्षः[5], तम् ईमहे ॥ २ ॥

येन सिन्धुं महीरपो रथाँइव प्रचोदयः । पन्थामृतस्य यातवे तमीमहे ॥ ३ ॥

येन । सिन्धुम् । महीः । अपः । रथान्ऽइव । प्रऽचोदयः । पन्थाम् । ऋतस्य । यातवे । तम् । ईमहे ॥ ३ ॥

वेङ्कट० येन सिन्धुम् प्रति महान्ति उदकानि रथान्[6] इव प्रचोदयसि यज्ञस्य पन्थानम् प्राप्तुम्, तम् मदम् ईमहे ॥ ३ ॥

इमं स्तोममभिष्टये घृतं न पूतमद्रिवः । येना नु सद्य ओजसा ववक्षिथ ॥ ४ ॥

इमम् । स्तोमम् । अभिष्टये । घृतम् । न । पूतम् । अद्रिऽवः । येन । नु । सद्यः । ओजसा । ववक्षिथ ॥ ४ ॥

वेङ्कट० इमम् स्तोमम् अस्माकमभिलषितसिद्ध्यर्थम् घृतम् इव पूतम् वज्रिन्! जुषस्व, [illegible] तदानीमेव बलेन महान् सन् स्तोतॄन् वहसि[7] । 'ववक्षिथ' (निघ ३,३) [illegible] मसु अस्ति ॥ ४ ॥

इमं जुषस्व गिर्वणः समुद्रइव पिन्वते । इन्द्र विश्वाभिरूतिभिर्ववक्षिथ ॥ ५ ॥

इमम् । जुषस्व । गिर्वणः । समुद्रःऽइव । पिन्वते । इन्द्र । विश्वाभिः । [illegible] ॥ ५ ॥

वेङ्कट० इमम् सेवस्व हे गोभिर्वननीय![8] स्तोमम्, समुद्रः इव ऊर्मिभिः [illegible] । इन्द्र! विश्वैः पालनैः सह त्वं स्तोतॄन् वहसि ॥ ५ ॥

[1]इति षष्ठाष्टके प्रथमाध्याये प्रथमो वर्गः[1] ॥

यो नो देवः परावतः सखित्वनाय मामहे । दिवो न [illegible] ॥ ६ ॥

1-1. नास्ति मूको. 2. नास्ति वि[2]. 3. शत्रून् मूको. [illegible] मूको. [illegible] मूको. 6. रथान् मूको. 7. भवसि मूको. 8. °नीय मूको.

यः। नः। देवः। पराऽवतः। सखिऽत्वनाय। ममहे। दिवः। न। वृष्टिम्। प्रथयन्। ववक्षिथ ॥६॥

वेङ्कट० यः अस्मान् देवः परावतः आगत्य सख्यार्थं पूजयति, स त्वम् दिवः वृष्टिम् प्रथयन् मेघ इव अस्मान् वहसि ॥ ६ ॥

ववक्षुरस्य केतवं उत वज्रो गर्भस्त्योः। यत् सूर्यो न रोदसी अवर्धयत् ॥७॥

ववक्षुः। अस्य। केतवः। उत। वज्रः। गभस्त्योः। यत्। सूर्यः। न। रोदसी इति। अवर्धयत् ॥७॥

वेङ्कट० वहन्तु अस्य रश्मयः, अपि च वज्रः गभस्त्योः निहितः, यदा सूर्यः इव द्यावापृथिव्यौ इन्द्रः वर्धयति ॥ ७ ॥

यदि प्रवृद्ध सत्पते सहस्रं महिषाँ अघः। आदित् त इन्द्रियं महि प्र वावृधे ॥८॥

यदि। प्रऽवृद्ध। सत्ऽपते। सहस्रम्। महिषान्। अघः। आत्। इत्। ते। इन्द्रियम्। महि। प्र। ववृधे ॥

वेङ्कट० यदि प्रवृद्ध! सतां पते! सहस्रम् महिषान् अभक्षयः, अनन्तरमेव तव बलं महत्त्वं च प्र वर्धते। सहस्रमेव सदाऽदनाय पर्याप्तं महिषाणामिति ॥ ८ ॥

इन्द्रः सूर्यस्य रश्मिभिर्न्यर्शसानमोषति। अग्निर्वनेव सासहिः प्र वावृधे ॥ ९ ॥

इन्द्रः। सूर्यस्य। रश्मिऽभिः। नि। अर्शसानम्। ओषति।
अग्निः। वनाऽइव। ससहिः। प्र। ववृधे ॥ ९ ॥

वेङ्कट० इन्द्रः आदित्यस्य रश्मिभिः 'नि ओषति अर्शसानम्'[2]। अर्शसानः[3] बाधमानः। दहति। अग्निः 'वनानि इव अभिभवन्'[4] सङ्ग्रामेषु प्र वर्धते ॥ ९ ॥

इयं त ऋत्वियावती धीतिरेति नवीयसी। सपर्यन्ती पुरुप्रिया मिमीत इत् ॥१०॥

इयम्। ते। ऋत्वियऽवती। धीतिः। एति। नवीयसी। सपर्यन्ती। पुरुऽप्रिया। मिमीते। इत् ॥ १० ॥

वेङ्कट० इयम् ते काले प्रयुज्यमाना स्तुतिः एति नवतरा। परिचरन्ती सर्वेषां प्रिया पूजयत्येव त्वाम्। इष्णोष्णिक्षु[5] 'तृतीये पादेऽन्तिमानां[6] चतुर्णामक्षराणां पादधर्मो[7] दृश्यते ॥ १० ॥

'इति षष्ठाष्टके प्रथमाध्याये द्वितीयो वर्गः'[8] ॥

गर्भो यज्ञस्य देवयुः क्रतुं पुनीत आनुषक्। स्तोमैरिन्द्रस्य वावृधे मिमीत इत् ॥११॥

गर्भः। यज्ञस्य। देवऽयुः। क्रतुम्। पुनीते। आनुषक्। स्तोमैः। इन्द्रस्य। ववृधे। मिमीते। इत् ॥ ११ ॥

---

१. यथा अ'. २-२. नोपत्यर्शसेनम् मूको. ३. अर्शसानो मूको. ४-४. °नीववाभि° वि'; °नीवाभिभवन् अ'. ५. इष्णोष्णि° अ'. ६-६. तृतीयमेवान्ति° अ'; °तीयेवान्ति° वि'. ७. पादम° मूको. ८-८. नास्ति मूको.

वेङ्कट० यज्ञस्य गर्भं यजमानः क्रतुम् आत्मानं कर्मणां कर्तारं शोधयति अनुपक्रम[1]। तत्र स्तोमैः इन्द्रस्य प्रवृद्धो भवति, पश्यति[2] चेन्द्रम् ॥ ११ ॥

सनिर्मित्रस्य पप्रथ इन्द्रः सोमस्य पीतये। प्राची वाशीव सुन्वते मिमीत इत् ॥१२॥

सनि.। मित्रस्य। पप्रथे। इन्द्रः। सोमस्य। पीतये। प्राची। वाशीऽइव। सुन्वते। मिमीते। इत् ॥ १२॥

वेङ्कट० मित्रभूतस्य यजमानस्य दाता इन्द्रः प्रथितो भवति सोमपानाय। [3]प्राची उपर्युपरि[3] वर्धमाना स्तुति (तु. निघ १,११) इदानीं यजमानाय प्रथित[4] करोति एव इन्द्रम् ॥ १२ ॥

यं विप्रा उक्थवाहसोऽभिप्रमन्दुरायवः ।
घृतं न पिप्य आसन्यृतस्य यत् ॥ १३ ॥

यम् । विप्राः । उक्थऽवाहसः । अभिऽप्रमन्दुः । आयवः ।
घृतम् । न । पिप्ये । आसनि । ऋतस्य । यत् ॥ १३ ॥

वेङ्कट० यम् विप्राः[5] शस्त्रस्य वोढार[6] प्रकर्षेणाभिप्रमदन्ति मनुष्याः, तस्य आस्ये घृतम् इव [7]सोमः अवर्धत[7] ऋतस्य, सत्यकर्मेण इन्द्रस्य यत् प्रीणनमिति ॥ १३ ॥

उत स्वराजे अदितिः स्तोममिन्द्राय जीजनत् । पुरुप्रशस्तमूतय ऋतस्य यत् ॥१४॥

उत। स्वऽराजे। अदिति। स्तोमम्। इन्द्राय। जीजनत्। पुरुऽप्रशस्तम्। ऊतये। ऋतस्य। यत् ॥

वेङ्कट० अपि च स्वराजे इन्द्राय इयं[8] पृथिवी स्तोमम् जनयति बहुप्रशस्तम् रक्षणाय सत्यस्येन्द्रस्य युक्तमिति ॥ १४ ॥

अभि वह्नय ऊतयेऽनूषत प्रशस्तये । न देव विव्रता हरी ऋतस्य यत् ॥ १५ ॥

अभि। वह्नय। ऊतये। अनूषत। प्रऽशस्तये। न। देव। विऽव्रता। हरी इति। ऋतस्य। यत् ॥१५॥

वेङ्कट० अभि अनूषत वोढार इन्द्रम् रक्षणाय प्रशस्तये च। न देव! इन्द्र[9] तवाश्वौ विक्रमाणौ भवत, अपि तर्हि समानमनसौ एक कर्म कुरुतः। यत् तव योग्यं [9]कर्म तत्[9] [10]समनसौ कुरुत.[10] ॥ १५ ॥

[11]इति षष्ठाष्टके प्रथमाध्याये तृतीयो वर्गः.[11] ॥

यत् सोममिन्द्र विष्णवि यद् वा घ त्रित आप्त्ये ।
यद् वा मरुत्सु मन्दसे समिन्दुभिः ॥ १६ ॥

---

१. °त्तो मूको. २. ···श्यति मूको. ३-३. प्रत्युपरि वि[1], प्रत्यर्युपरि अ[1]. ४. नास्ति मूको. ५. °प्रा मनुष्या मूको. ६. °र मूको ७-७. सोममव° वि[1], सोमवर्ध° अ[1]. ८. इदं यं मूको. ९-९. धर्मा: मूको. १०-१०. °त्मोऽकुरुत मूको. ११-११ नास्ति मूको.

यत् । सोमम् । इन्द्र । विष्णवि । यत् । वा । घ । त्रिते । आप्त्ये ।
यत् । वा । मरुत्ऽसु । मन्दसे । सम् । इन्दुऽभिः ॥ १६ ॥

वेङ्कट० यदि सोमम् इन्द्र! त्वावरि विष्णौ, [1]अस्यत् वा आप्त्ययोः[1] जाते तदानुचरे त्रिते, यत् वा मरुत्सु[2] मन्दसे, तैः सह सोमं पीत्वा मन्दसे। तथापि अस्माकम् इन्दुभिः सम् रमस्वेति। अस्योत्तरा भूयसे निर्वचनाय ॥ १६ ॥

यद् वा शक्र परावति समुद्रे अधि मन्दसे । अस्माकमित् सुते रणा समिन्दुभिः ॥१७॥
यत् । वा । शक्र । पराऽवति । समुद्रे । अधि । मन्दसे ।
अस्माकम् । इत् । सुते । रण । सम् । इन्दुऽभिः ॥ १७ ॥

वेङ्कट० यत् वा शक्र! दूरे यदि [3]वा समुद्रे[3] मन्दसे अस्माकम् एव सुते सम् रमस्व इन्दुभिः ॥ १७ ॥

यद् वासि सुन्वतो वृधो यजमानस्य सत्पते ।
उक्थे वा यस्य रण्यसि समिन्दुभिः ॥ १८ ॥

यत् । वा । असि । सुन्वतः । वृधः । यजमानस्य । सत्ऽपते ।
उक्थे । वा । यस्य । रण्यसि । सम् । इन्दुऽभिः ॥ १८ ॥

वेङ्कट० यदि च भवसि सुन्वतः [4]कण्वस्य वृधः[4] यजमानस्य हे सत्पते![5], ततो मदीयैः इन्दुभिः संरमस्व, ऋष्वे वा यस्य सम् रमसे तमप्यपहायेति ॥ १८ ॥

देवंदेवं वोऽवस इन्द्रमिन्द्रं गृणीषणि । अधा यज्ञाय तुर्वणे व्यानशुः ॥१९॥
देवम्ऽदेवम् । वः । अवसे । इन्द्रम्ऽइन्द्रम् । गृणीषणि । अध । यज्ञाय । तुर्वणे । वि । आनशुः ॥१९॥

वेङ्कट० सर्वदेवेन्द्रम् एव देवं युष्माकं रक्षणाय स्तुतेः सम्भर्तारः व्याप्नुवन्तु सङ्ग्रामे, अथ [6]यज्ञाय च[6] तारकाय[7] ॥ १९ ॥

यज्ञेभिर्यज्ञवाहसं सोमेभिः सोमपातमम् । होत्राभिरिन्द्रं वावृधुर्व्यानशुः ॥२०॥
यज्ञेभिः । यज्ञऽवाहसम् । सोमेभिः । सोमऽपातमम् । होत्राभिः । इन्द्रम् । ववृधुः । वि । आनशुः ॥

वेङ्कट० यज्ञैः यज्ञस्य वोढारम् सोमैः [8]सोमपातमम् होत्राभिः[8] च इन्द्रम् अवर्धयन्, विविधम् आनशुः ॥ २० ॥

[9]इति षष्ठाष्टके प्रथमाध्याये चतुर्थो वर्गः[9] ॥

१-१. 'द्वास्थौ मूको. २. मन्त्रान् इ मूको. ३-३. समुद्रे वा अ¹. ४-४. °स्यमेकः अ¹. ५. सत्प वि¹; सत्पते अ¹. ६-६. च यज्ञाय अ¹. ७. तारकाः यमू वि². ८. सोममपा यामिश्च मूको. ९-९. नास्ति मूको.

महीरस्य प्रणीतयः पूर्वीरुत प्रशस्तयः । विश्वा वसूनि दाशुषे व्यानशुः ॥२१॥

महीः । अस्य । प्रऽनीतयः । पूर्वीः । उत । प्रऽशस्तयः ।
विश्वा । वसूनि । दाशुषे । वि । आनशुः ॥ २१ ॥

वेङ्कट० महान्ति अस्य प्रणयनानि बहूनि प्रशंसनानि[1] विश्वानि च वसूनि दाशुषे प्रयच्छते[2] ।
तस्मिमम् वि आनशुः ॥ २१ ॥

इन्द्रं वृत्राय हन्तवे देवासो दधिरे पुरः । इन्द्रं वाणीरनूषता समोजसे ॥ २२ ॥

इन्द्रम् । वृत्राय । हन्तवे । देवासः । दधिरे । पुरः । इन्द्रम् । वाणीः । अनूषत । सम् । ओजसे ॥ २२ ॥

वेङ्कट० वृत्रं हन्तुम् पुरः दधिरे देवाः इन्द्रम् ॥ २२ ॥

महान्तं महिना वयं स्तोमेभिर्हवनश्रुतम् । अर्कैरभि प्र णोनुमः समोजसे ॥२३॥

महान्तम् । महिना । वयम् । स्तोमेभिः । हवनऽश्रुतम् । अर्कैः । अभि । प्र । नोनुमः । सम् । ओजसे ॥

वेङ्कट० महान्तम् महता[3] हविषा वयम् स्तोमेभिः च ह्वानश्रुतम् ऋग्भिरश्च सम्यक् अभि प्र
नोनुमः बलाय ॥ २३ ॥

न यं विविक्तो रोदसी नान्तरिक्षाणि वज्रिणम् ।
अमादिदस्य तित्विषे समोजसः ॥ २४ ॥

न । यम् । विविक्तः । रोदसी इति । न । अन्तरिक्षाणि । वज्रिणम् ।
अमात् । इत् । अस्य । तित्विषे । सम् । ओजसः ॥ २४ ॥

वेङ्कट० न यम् पृथक् कुरुतः द्यावापृथिव्यौ, न च अन्तरिक्षाणि वज्रिणम् । तस्य अस्य यद् ओजः[4]
तद्बलादेव सन्दीप्तं[5] भवति सर्वं तेजः । सूर्यादयो 'हि तम्' उपजीवन्तीति ॥ २४ ॥

यदिन्द्र पृतनाज्ये देवास्त्वा दधिरे पुरः । आदित् ते हर्यता हरी ववक्षतुः ॥ २५ ॥

यत् । इन्द्र । पृतनाज्ये । देवाः । त्वा । दधिरे । पुरः । आत् । इत् । ते । हर्यता । हरी इति । ववक्षतुः ॥२५॥

वेङ्कट० यदा इन्द्र! सङ्ग्रामे देवाः त्वाम् पुरः दधिरे । अनन्तरमेव तव कान्तौ अश्वौ
त्वाम्[7] ववक्षतुः ॥ २५ ॥

'इति षष्ठाष्टके प्रथमाध्याये पञ्चमो वर्गः.'[8] ॥

---

१. प्रशंसानि वि'. २. प्रयच्छति वि', प्रयच्छति अ'. ३. महता मूको. ४. °जो महा.ने अ'.
५. मही° मूको. ६-६. हिता मूको. ७. त्वं अ'. ८-८ नास्ति मूको.

यदा वृत्रं नदीवृतं शवसा वज्रिन्नवधीः । आदित् ते हर्यता हरी ववक्षतुः ॥ २६ ॥

यदा । वृत्रम् । नदीऽवृतम् । शवसा । वज्रिन् । अवधीः ।
आत् । इत् । ते । हर्यता । हरी इति । ववक्षतुः ॥ २६ ॥

वेङ्कट० निगदसिद्धा ॥ २६ ॥

यदा ते विष्णुरोजसा त्रीणि पदा विचक्रमे ।
आदित् ते हर्यता हरी ववक्षतुः ॥ २७ ॥

यदा । ते । विष्णुः । ओजसा । त्रीणि । पदा । विऽचक्रमे ।
आत् । इत् । ते । हर्यता । हरी इति । ववक्षतुः ॥ २७ ॥

वेङ्कट० यदा तव बलेन आप्यायितः विष्णु त्रीणि पदानि विचक्रमे, तदानीम् ते हर्यता हरी ववक्षतु.[1] इति ॥ २७ ॥

यदा ते हर्यता हरी वावृधाते दिवेदिवे ।
आदित् ते विश्वा भुवनानि येमिरे ॥ २८ ॥

यदा । ते । हर्यता । हरी इति । ववृधाते इति । दिवेऽदिवे ।
आत् । इत् । ते । विश्वा । भुवनानि । येमिरे ॥ २८ ॥

वेङ्कट० यदा तव स्पृहणीयौ अश्वौ विवर्धयेते[2] अन्वहम्, अनन्तरमेव विश्वानि भुवनानि तुभ्यम्[3] प्रयच्छन्ति ॥ २८ ॥

यदा ते मारुतीर्विशस्तुभ्यमिन्द्र नियेमिरे ।
आदित् ते विश्वा भुवनानि येमिरे ॥ २९ ॥

यदा । ते । मारुती. । विशः । तुभ्यम् । इन्द्र । निऽयेमिरे ।
आत् । इत् । ते । विश्वा । भुवनानि । येमिरे ॥ २९ ॥

वेङ्कट० यदा तव मरुतो नाम देवविश.[4] तुभ्यम् इन्द्र! ममानम् (?) नि येमिरे नियच्छन्ति ॥ २९ ॥

यदा सूर्यममुं दिवि शुक्रं ज्योतिरधारयः ।
आदित् ते विश्वा भुवनानि येमिरे ॥ ३० ॥

---

१. नास्ति मूको. २. °र्धयते मूको. ३. तव वि°. ४. °विशे मूको.

यदा । सूर्यम् । अमुम् । दिवि । शुक्रम् । ज्योतिः । अधारयः ।
आत् । इत् । ते । विश्वा । भुवनानि । येमिरे ॥ ३० ॥

वेङ्कट० निगदसिद्धा ॥ ३० ॥

इमां त इन्द्र सुष्टुतिं विप्र इयर्ति धीतिभिः । जामिं पदेव पिप्रतीं प्राध्वरे ॥ ३१ ॥

इमाम् । ते । इन्द्र । सुऽस्तुतिम् । विप्रः । इयर्ति । धीतिऽभिः । जामिम् । पदाऽइव । पिप्रतीम् । प्र । अध्वरे ॥

वेङ्कट० इमाम् ते इन्द्र । सुष्टुतिम् विप्रः प्रेरयति कर्मभिः, यज्ञे स्वसारम् इव इन्द्रियाणि पूरयन्तीम्[1] ॥ ३१ ॥

यदस्य धामनि प्रिये समीचीनासो अस्वरन् । नाभा यज्ञस्य दोहना प्राध्वरे ॥३२॥

यत् । अस्य । धामनि । प्रिये । सम्ऽईचीनासः । अस्वरन् ।
नाभा । यज्ञस्य । दोहना । प्र । अध्वरे ॥ ३२ ॥

वेङ्कट० यत् अस्य स्थाने प्रिये सङ्गताः अस्वरन् स्तुवन्ति यज्ञस्य नाभ्याह्वयसदसि[2], यत्र स्तोतारः कामान् दुहन्ति यज्ञे, तत्रेमां सुष्टुतिम् विप्रः प्रेरयतीति ॥ ३२ ॥

सुवीर्यं स्वश्व्यं सुगव्यमिन्द्र दद्धि नः । होतेव पूर्वचित्तये प्राध्वरे ॥ ३३ ॥

सुऽवीर्यम् । सुऽअश्व्यम् । सुऽगव्यम् । इन्द्र । दद्धि । नः । होताऽइव । पूर्वऽचित्तये । प्र । अध्वरे ॥ ३३ ॥

वेङ्कट० सुवीर्यम् शोभनाश्वसङ्घम् सुगव्यम् इन्द्र । प्रयच्छ अस्मभ्यम्, यथा 'होता स्तुतकर्मणे[3] यजमानाय यज्ञे देवेभ्य आदाय अभिलषितम्[4] प्र यच्छतीति ॥ ३३ ॥

[5]इति षष्ठाष्टके प्रथमाध्याये षष्ठो वर्गः[5] ॥

[१३]

[6]नारदः काण्व ऋषिः । इन्द्रो देवता । उष्णिक् छन्दः[6] ।

इन्द्रः सुतेषु सोमेषु क्रतुं पुनीत उक्थ्यम् । विदे वृधस्य दक्षसो महान् हि षः ॥ १ ॥

इन्द्रः । सुतेषु । सोमेषु । क्रतुम् । पुनीते । उक्थ्यम् ।
विदे । वृधस्य । दक्षसः । महान् । हि । सः ॥ १ ॥

वेङ्कट० नारदः[1] । इन्द्रः सुतेषु सोमेषु प्रज्ञातम् आत्मीयं ··· प्रशस्यं वृद्धम् बलम् च विन्दते । महान् हि सः इन्द्र इति ॥ १ ॥

१. पूरयति मूको. २. नाह्वयसदसि मूको. ३-३. होता ··· स्तुत मूको. ४. अभिलषितं मूको. ५-५. नास्ति मूको. ६. नार ऋ[1], नास्ति वि[2].

स प्रथमे व्योमनि देवानां सदने वृधः । सुपारः सुश्रवस्तमः समप्सुजित् ॥ २ ॥

सः । प्रथमे । विऽओमनि । देवानाम् । सदने । वृधः ।
सुऽपारः । सुश्रवःऽतमः । सम् । अप्सुऽजित् ॥ २ ॥

वेङ्कट० सः प्रथमे स्थाने देवानामभूत्[1] अन्तरिक्षे वृद्धः सुष्ठु पारयिता[2] स्वन्नतमः अन्तरिक्षे सम्यग् जेता[3] ॥ २ ॥

तमह्वे वाजसातय इन्द्रं भराय शुष्मिणम् । भवा नः सुम्ने अन्तमः सखा वृधे ॥३॥

तम् । अह्वे । वाजऽसातये । इन्द्रम् । भराय । शुष्मिणम् ।
भव । नः । सुम्ने । अन्तमः । सखा । वृधे ॥ ३ ॥

वेङ्कट० तम्[4] ह्वयामि सङ्ग्रामे अन्नं यत्र लभ्यते, इन्द्रम् बलवन्तम्[5] । भव त्वम् अस्माकं सुखे अन्तिकतमः सखा वर्धनाय चेति ॥ ३ ॥

इयं त इन्द्र गिर्वणो रातिः क्षरति सुन्वतः । मन्दानो अस्य बर्हिषो वि राजसि ॥४॥

इयम् । ते । इन्द्र । गिर्वणः । रातिः । क्षरति । सुन्वतः । मन्दानः । अस्य । बर्हिषः । वि । राजसि ॥ ४ ॥

वेङ्कट० इयम् ते हे इन्द्र! गीर्भिर्वननीय! सोमस्य [6]रातिः क्षरति[6] सुन्वतः । मोदमानः अनेन स्तीर्णेन[7] बर्हिषा वि राजसि ॥ ४ ॥

नूनं तदिन्द्र दद्धि नो यत् त्वा सुन्वन्त ईमहे । रयिं नश्चित्रमा भरा स्वर्विदम् ॥५॥

नूनम् । तत् । इन्द्र । दद्धि । नः । यत् । त्वा । सुन्वन्तः । ईमहे ।
रयिम् । नः । चित्रम् । आ । भर । स्वःऽविदम् ॥ ५ ॥

वेङ्कट० इदानीम्[8] तत् इन्द्र! प्रयच्छ अस्मभ्यम्, यत् त्वा सुन्वतः याचामहे । रयिम् नः चित्रम् आ भर सर्वस्य लम्भकम् ॥ ५ ॥

[9]इति पञ्चाष्टके प्रथमाध्याये सप्तमो वर्गः[9] ॥

स्तोता यत् ते विचर्षणिरतिप्रशर्धयद् गिरः । वया इवानु रोहते जुषन्त यत् ॥ ६ ॥

स्तोता । यत् । ते । विऽचर्षणिः । अतिऽप्रशर्धयत् । गिरः ।
वयाःऽइव । अनु । रोहते । जुषन्त । यत् ॥ ६ ॥

वेङ्कट० स्तोता [10]यत् तव विचर्षणिः अत्यर्थं[10] प्रशर्धयति[11] स्तुतीः[12] । शाखाः इव वृक्षम् त्वाम् आरोहन्ति वेष्टयन्ति ता वाचः, यदा त्वां सेवन्त[13] इति ॥ ६ ॥

---

१. देवानाम्भूते मूको. २. पार° मूको. ३. °म्यगोभेत्री मूको. ४. तं ··· क्ष°. ५. °न्तं या क्ष°. ६-६. रातिरक्षति मूको. ७. तीर्णेन मूको. ८. नास्ति वि°. ९-९. नास्ति मूको. १०-१०. तव ··· त्य° मूको. ११. प्रवर्ध° मूको. १२. स्तुतैः मूको. १३. सेव मूको.

प्रत्नवज्जनया गिरः शृणुधी जरितुर्हवम् । मदेमदे ववक्षिथा सुकृत्वने ॥ ७ ॥

प्रत्नऽवत् । जनय । गिरः । शृणुधि । जरितुः । हवम् । मदेऽमदे । ववक्षिथ । सुऽकृत्वने ॥ ७ ॥

वेङ्कट० प्रत्नवत्[1] जनय स्तुतीः[2] इत्यात्मानम् अनुशिष्य इन्द्रम् आह— शृणु जरितुः[3] ह्वानमिति । सोमस्य मदेन त्वं धनानि वहसि सुकर्मणे ॥ ७ ॥

क्रीळन्त्यस्य सूनृता आपो न प्रवता यतीः । अया धिया य उच्यते पतिर्दिवः ॥८॥

क्रीळन्ति । अस्य । सूनृताः । आपः । न । प्रऽवता । यतीः । अया । धिया । यः । उच्यते । पतिः । दिवः ॥

वेङ्कट० अभिमुखं गच्छन्ति अस्य स्तुतयः आपः इव प्रवणेन गच्छन्त्यः । अनया प्रज्ञया स्तोतॄणाम् यः उच्यते पतिः दिवः, यम् पतिरयमिति प्रज्ञावन्तमिन्द्रं वदन्ति ॥ ८ ॥

उतो पतिर्य उच्यते कृष्टीनामेक इद्वशी । नमोवृधैरवस्युभिः सुते रण ॥ ९ ॥

उतो इति । पतिः । यः । उच्यते । कृष्टीनाम् । एकः । इत् । वशी । नमःऽवृधैः । अवस्युऽभिः । सुते । रण ॥

वेङ्कट० अपि च स्वामी यः उच्यते मनुष्याणाम् एकः एव स्वतन्त्रः हविर्वर्धयद्भिः[4] भिक्षमाणैः अवस्युभिः[5] सुते अस्मिन्सोमे रमस्व ॥ ९ ॥

स्तुहि श्रुतं विपश्चितं हरी यस्य प्रसक्षिणा । गन्तारा दाशुषो गृहं नमस्विनः ॥१०॥

स्तुहि । श्रुतम् । विपःऽचितम् । हरी इति । यस्य । प्रऽसक्षिणा । गन्तारा । दाशुषः । गृहम् । नमस्विनः ॥

वेङ्कट० स्तुहि[6] विश्रुतम् मेधाविनम्, अश्वौ यस्य प्रसहनशीलौ गन्तारौ यजमानस्य गृहम् हविष्मतः ॥ १० ॥

इति पञ्चाष्टके प्रथमाध्याये अष्टमो वर्गः ॥

तूतुजानो महेमतेऽश्वेभिः प्रुषितप्सुभिः । आ याहि यज्ञमाशुभिः शमिद्धि ते ॥११॥

तूतुजानः । महेऽमते । अश्वेभिः । प्रुषितप्सुऽभिः । आ । याहि । यज्ञम् । आशुऽभिः । शम् । इत् । हि । ते ॥

वेङ्कट० उत्सवे स्थिता मतिर्यस्य स महेमतिः । त्वरन् हे इन्द्र[7] महेमते! अश्वैः दीप्तरूपैः आ याहि यज्ञम् आशुभिः, सुखमेवात्र तुभ्यमिति ॥ ११ ॥

इन्द्र शविष्ठ सत्पते रयिं गृणत्सु धारय । श्रवः सूरिभ्यो अमृतं वसुत्वनम् ॥१२॥

इन्द्र । शविष्ठ । सत्ऽपते । रयिम् । गृणत्ऽसु । धारय । श्रवः । सूरिऽभ्यः । अमृतम् । वसुऽत्वनम् ॥१२॥

वेङ्कट० इन्द्र! बलवत्तम[7] सतां पते[8] रयिम् स्तुवत्सु स्थापय । अन्नं च स्तोतृभ्यः अमरणसाधनम् वसुमत्त्वम् देहि ॥ १२ ॥

---

१ °वः मूको. २ स्तुति मूको. ३. ज्ञोतु मूको. ४ °वद् मूको. ५. °भ दुभि मूको. ६ नास्ति वि°. ७-७ नास्ति मूको. ८ नास्ति मूको.

हवे॑ त्वा॒ सूर॒ उदि॑ते॒ हवे॑ म॒ध्यंदि॑ने दि॒वः । जु॒षा॒ण इ॑न्द्र॒ सप्ति॑भिर्न॒ आ ग॑हि ॥१३॥

हवे॑ । त्वा॒ । सूरे॑ । उत्ऽइ॑ते । हवे॑ । म॒ध्यंदि॑ने । दि॒वः । जु॒षा॒णः । इ॒न्द्र॒ । सप्ति॑ऽभिः । नः॒ । आ । ग॒हि॒ ॥१३॥

वेङ्कट० ह्वयामि त्वाम् हे इन्द्र[1] प्रातः, ह्वयामि अह्नः च मध्ये दिवः । प्रीयमाणः इन्द्र[2] अस्मान् अश्वैः आ गच्छ ॥ १३ ॥

आ तू ग॑हि॒ प्र तु द्र॑व॒ मत्स्वा॑ सु॒तस्य॒ गोम॑तः । तन्तुं॑ तनुष्व पू॒र्व्यं यथा॑ वि॒दे ॥१४॥

आ । तु । ग॒हि॒ । प्र । तु । द्र॒व॒ । मत्स्व॑ । सु॒तस्य॑ । गोऽम॑तः । तन्तु॑म् । त॒नु॒ष्व॒ । पू॒र्व्यम् । यथा॑ । वि॒दे ॥ १४ ॥

वेङ्कट० आ गच्छ क्षिप्रम् । प्र द्रव च सोमं प्रति । मत्स्व च सुतेन पयोमिश्रणेन सोमेन । सन्तानम् चास्मदीयमन्विच्छन् तनुष्व[3] पूर्व्यम् अतः पूर्वं प्रसादागतम् यथा तव प्रकारस्त्वया ज्ञायते तथेति ॥ १४ ॥

यच्छ॒क्रासि॑ परा॒वति॒ यद॑र्वा॒वति॑ वृत्रहन् । यद् वा॑ समु॒द्रे अन्ध॒सोऽवि॒तेद॑सि ॥१५॥

यत् । श॒क्र॒ । असि॑ । प॒रा॒ऽवति॑ । यत् । अ॒र्वा॒ऽवति॑ । वृ॒त्र॒ऽह॒न् ।
यत् । वा॒ । स॒मु॒द्रे । अन्ध॑सः । अ॒वि॒ता । इत् । अ॒सि॒ ॥ १५ ॥

वेङ्कट० यदि शक्र ! भवसि दूरे, यदि वा अन्तिके वृत्रहन् !, यत् वा अन्तरिक्षे अन्नेन रक्षितैव[4] ॥ १५ ॥

[5]इति षष्ठाष्टके प्रथमाध्याये नवमो वर्गः[5] ॥

इन्द्रं॑ वर्धन्तु नो॒ गिर॒ इन्द्रं॑ सु॒तास॒ इन्द॑वः । इन्द्रे॑ ह॒विष्म॑ती॒र्विशो॑ अराणि॒षुः ॥१६॥

इन्द्र॑म् । व॒र्धन्तु॑ । नः॒ । गिरः॑ । इन्द्र॑म् । सु॒तासः॑ । इन्द॑वः ।
इन्द्रे॑ । ह॒विष्म॑तीः । विशः॑ । अ॒रा॒णि॒षुः॒ ॥ १६ ॥

वेङ्कट० वर्धयन्तु नः गिरः इन्द्रम्, इन्द्रम् सुताः सोमाः । इन्द्रे हविष्मत्यः[6] प्रजाः हव्यधनाः अराणिषुः रेमिरे ॥ १६ ॥

तमिद् विप्रा॑ अव॒स्यवः॑ प्र॒वत्व॑तीभिरू॒तिभिः॑ । इन्द्रं॑ क्षो॒णीर॑वर्धयन् व॒या इ॑व ॥ १७ ॥

तम् । इत् । विप्राः॑ । अ॒व॒स्यवः॑ । प्र॒वत्व॑तीभिः । ऊ॒तिऽभिः॑ ।
इन्द्र॑म् । क्षो॒णीः । अ॒व॒र्ध॒य॒न् । व॒याःऽइ॑व ॥ १७ ॥

वेङ्कट० तम् एव विप्राः रक्षणकामाः प्रकर्षवद्भिः रक्षणैः हेतुभिः वर्धयन्ति । तमेव सर्वाः पृथिव्यः वर्धयन्ति, यथा वृक्षं शाखाः वर्धयन्ति ॥ १७ ॥

---

१. इन्द्र इन्द्र अ॰. २. तदसुत॰ मूको. ३. °क्षितेन मूको. ४ ४. नास्ति मूको. ५. °ष्मत्य मूको.

त्रिकद्रुकेषु चेतनं देवासो यज्ञमत्नत । तमिद् वर्धन्तु नो गिरः सदावृधम् ॥ १८ ॥
त्रिऽकद्रुकेषु । चेतनम् । देवासः । यज्ञम् । अत्नत । तम् । इत् । वर्धन्तु । नः । गिरः । सदाऽवृधम् ॥ १८ ॥

वेङ्कट० आभिप्लविकस्य पूर्वं त्र्यहं त्रिकद्रुक इत्याचक्षते । तेषु चेतयितारम्[1] देवाः यजनीयम् इन्द्रं विस्तारयन्ति । तम् एव अस्माकं वर्धयन्तु गिरः सदावर्धनम्[2] ॥ १८ ॥

स्तोता यत् ते अनुव्रत उक्थान्यृतुथा दधे । शुचिः पावक उच्यते सो अद्भुतः ॥१९॥
स्तोता । यत् । ते । अनुऽव्रतः । उक्थानि । ऋतुऽथा । दधे ।
शुचिः । पावकः । उच्यते । सः । अद्भुतः ॥ १९ ॥

वेङ्कट० स्तोता यदि [3]ते अनुगुणकर्मा[3] शस्त्राणि काले धारयति । स स्वयम् शुचिः शोधकश्च लौकिकैः कीर्त्यते, तथा महान् भवति ॥ १९ ॥

तदिद् रुद्रस्य चेतति यह्वं प्रत्नेषु धामसु । मनो यत्रा वि तद् दधुर्विचेतसः ॥ २० ॥
तत् । इत् । रुद्रस्य । चेतति । यह्वम् । प्रत्नेषु । धामऽसु । मनः । यत्र । वि । तत् । दधुः । विऽचेतसः ॥ २० ॥

वेङ्कट० तत् एव स्तोतुः स्तोत्रं ज्ञायते[4] महत् पुराणेषु यज्ञगृहेषु, मनः यत्र स्तोत्रे वि दधुः विचेतसः देवाः । पुराणेषु यज्ञेष्विन्द्रमेव स्तुवन्ति स्तोतारः, तद् देवाश्च शृण्वन्तीति ॥ २० ॥

[5]इति षष्ठाष्टके प्रथमाध्याये दशमो वर्गः[5] ॥

यदि मे सख्यमावर इमस्य पाह्यन्धसः । येन विश्वा अति द्विषो अतारिम ॥ २१ ॥
यदि । मे । सख्यम् । आऽवरः । इमस्य । पाहि । अन्धसः ।
येन । विश्वाः । अति । द्विषः । अतारिम ॥ २१ ॥

वेङ्कट० यदि मे सख्यम् आवृणोषि, ततः[6] इमम् सोमम् पिब । येन त्वया पीतेन विश्वाः अति तरेम वयम् द्विषः प्रजाः ॥ २१ ॥

कदा त इन्द्र गिर्वणः स्तोता भवाति शंतमः । कदा नो गव्ये अश्व्ये वसौ दधः ॥२२॥
कदा । ते । इन्द्र । गिर्वणः । स्तोता । भवाति । शम्ऽतमः ।
कदा । नः । गव्ये । अश्व्ये । वसौ । दधः ॥ २२ ॥

वेङ्कट० कदा ते हे इन्द्र! गीर्भिर्वननीय! स्तोता भवति सुखतमः[7] । कदा अस्मान् [8]गोसहिते अश्वसहिते[8] धने च करोषीति ॥ २२ ॥

---

१. तयि° मूको. २. 'वर्धनम् मूको. ३-३. ते गुण° मूको. ४. जायते मूको. ५-५. नास्ति मूको. ६. तता··· मूको. ७. °तम मूको. ८-८. °रहेश्व स° मूको.

उत ते सुष्टुता हरी वृषणा वहतो रथम् । अजुर्यस्य मदिन्तमं यमीमहे ॥ २३ ॥

उत । ते । सुऽस्तुता । हरी इति । वृषणा । वहत । रथम् । अजुर्यस्य । मदिन्ऽतमम् । यम् । ईमहे ॥ २३ ॥

वेङ्कट० अपि च ते सुष्टुतौ[1] अश्वौ वर्षितारौ वहत रथम्, जरयितुम्[2] अशक्यस्य स्तोतृणामतिशयेन मदयितारम् यम् वयम्[3] अर्थमभिलषिं याचामहे ॥ २३ ॥

तमीमहे पुरुष्टुतं यह्वं प्रत्नाभिरूतिभिः । नि बर्हिषि प्रिये संददधं द्विता ॥ २४ ॥

तम् । ईमहे । पुरुऽस्तुतम् । यह्वम् । प्रत्नाभिः । ऊतिऽभिः ।

नि । बर्हिषि । प्रिये । सदत् । अर्ध । द्विता ॥ २४ ॥

वेङ्कट० तम् इन्द्रं याचामहे बहुभिः स्तुतम् महान्तम् । प्रत्नैः मरुद्भिः सह नि षीदतु बर्हिषि प्रिये सम्प्रति । द्विता 'द्वैधम्' इति यास्क (५,३) । इहासनाथ अपर शरीर गृहीत्वेति सदथं[4] ॥ २४ ॥

वर्धस्वा सु पुरुष्टुत ऋषिष्टुताभिरूतिभिः । धुक्षस्वं पिप्युषीमिषमवा च नः ॥ २५ ॥

वर्धस्व । सु । पुरुऽस्तुत । ऋषिऽस्तुताभिः । ऊतिऽभिः ।

धुक्षस्व । पिप्युषीम् । इषम् । अव । च । नः ॥ २५ ॥

वेङ्कट० वर्धस्व सुष्टु[5] हे बहुभिः स्तुत[6] ऋषिष्टुतैः मरुद्भिः सह । धुक्षस्व च वर्धयित्रीम् इषम् अन्नम् । रक्ष च अस्मान् ॥ २५ ॥

'इति पञ्चाष्टके प्रथमाध्याये एकादशो वर्गः' ॥

इन्द्र त्वमवितेदसीत्था स्तुवतो अद्रिवः । ऋतादियर्मि ते धियं मनोयुजम् ॥ २६ ॥

इन्द्र । त्वम् । अविता । इत् । असि । इत्था । स्तुवत । अद्रिऽवः ।

ऋतात् । इयर्मि । ते । धियम् । मनःऽयुजम् ॥ २६ ॥

वेङ्कट० इन्द्र! त्वम् रक्षितैव भवसि अमुत्र[7] स्तुवतः वज्रिन्[1] । सत्यादेव प्रेरयामि[8] तव मनोयुजम् स्तोत्रमिति ॥ २६ ॥

इह त्या सधमाद्या युजानः सोमपीतये । हरी इन्द्र प्रतद्वसू अभि स्वर ॥ २७ ॥

इह । त्या । सधऽमाद्या । युजानः । सोमऽपीतये ।

हरी इति । इन्द्र । प्रतद्वसू इति प्रतत्ऽवसू । अभि । स्वर ॥ २७ ॥

---

१. सुष्टुतौ मूको. २. यार° अ°. ३. पव वि°, पय अ° ४ नूतयं वि°; नूत्नं अ° ५ सत्स्तुतिषु मूको ६ १ नास्ति मूको ७. अमुत्र मूको ८. °यम वि°

वेङ्कट० इह यौ सहमदन्तौ युञ्जानः सोमपीतये हरी इन्द्र। प्राप्तधनौ अस्मासु प्रेरय ॥ २७ ॥

अभि स्वरन्तु ये तव रुद्रासः सक्षत श्रियम् । उतो मरुत्वतीर्विशो अभि प्रयः ॥२८॥

अभि । स्वरन्तु । ये । तव । रुद्रासः । सक्षत । श्रियम् ।
उतो इति । मरुत्वतीः । विशः । अभि । प्रयः ॥ २८ ॥

वेङ्कट० अभि स्वरन्तु ये तव स्वभूताः अश्वाः[1]। स्तोतारः तेन[2] प्राप्नुवन्तु श्रियम्, अपि च 'मरुत्वतीः विशः'। अस्मान् अभि प्रापय अन्नम् ॥ २८ ॥

इमा अस्य प्रतूर्तयः पदं जुषन्त यद् दिवि । नाभा यज्ञस्य सं दधुर्यथा विदे ॥२९॥

इमाः । अस्य । प्रऽतूर्तयः । पदम् । जुषन्त । यत् । दिवि ।
नाभा । यज्ञस्य । सम् । दधुः । यथा । विदे ॥ २९ ॥

वेङ्कट० इमाः अस्य प्रसरणशीलाः पदम् जुषन्त, यत् अस्य दिवि भवति पदम्। नाभेः पाश्व(?) यज्ञस्य हीमाः[3] सम् दधुः, यथा[4] अयं मनुष्येषु ज्ञायते ॥ २९ ॥

अयं दीर्घाय चक्षसे प्राचि प्रयत्यध्वरे । मिमीते यज्ञमानुषग् विचक्ष्य ॥ ३० ॥

अयम् । दीर्घाय । चक्षसे । प्राचि । प्रऽयति । अध्वरे ।
मिमीते । यज्ञम् । आनुषक् । विऽचक्ष्य ॥ ३० ॥

वेङ्कट० अयम् दीर्घाय दूरस्य दर्शनाय[5] इन्द्रः, तं प्राचीने वर्तमाने यज्ञे मिमीते करोति यागसाधनं सोमम् अनुषक्तं बुद्ध्या दृष्ट्वेति[6] ॥ ३० ॥

[7]इति षष्ठाष्टके प्रथमाध्याये द्वादशो वर्गः[7] ॥

वृषायमिन्द्र ते रथ उतो ते वृषणा हरी । वृषा त्वं शतक्रतो वृषा हवः ॥ ३१ ॥

वृषा । अयम् । इन्द्र । ते । रथः । उतो इति । ते । वृषणा । हरी इति ।
वृषा । त्वम् । शतक्रतो इति शतऽक्रतो । वृषा । हवः ॥ ३१ ॥

वेङ्कट० वर्षिता अयम् इन्द्र! तव रथः, अपि च वृषणौ अश्वौ, वृषा त्वम् च [8]'शतप्रज्ञ!, तथा[8] भवति[9] स्तुतिश्च वृषा इति ॥ ३१ ॥

वृषा ग्रावा वृषा मदो वृषा सोमो अयं सुतः । वृषा यज्ञो यमिन्वसि वृषा हवः ॥३२॥

---

1. ते मूको. 2-2. °स्तोतारः मूको. 3. हेमा. भ[1]. 4. यदा भ[1]. 5. दानाय मूको. 6. दृष्टेवेति मूको. 7-7. नास्ति मूको. 8-8. शतप्रज्ञ! तथा वि[1] शतप्रज्ञ! त[1] भ[1].
9. °वतु भ[1].

वृषा । ग्रावा । वृषा । मदः । वृषा । सोमः । अयम् । सुतः ।
वृषा । यज्ञः । यम् । इन्वसि । वृषा । हवः ॥ ३२ ॥

वेङ्कट० वृषा ग्रावा, वृषा च तव मदः, तथा वर्षिता अयम् रसप्रदम् सुतः सोमः[1], वृषा यज्ञः च यम् गच्छसि, वृषा हवः ॥ ३२ ॥

वृषा त्वा वृषणं हुवे वज्रिञ्चित्राभिरूतिभिः । वावन्थ हि प्रतिष्टुतिं वृषा हवः ॥३३॥
वृषा । त्वा । वृषणम् । हुवे । वज्रिन् । चित्राभिः । ऊतिऽभिः ।
वावन्थ । हि । प्रतिऽस्तुतिम् । वृषा । हवः ॥ ३३ ॥

वेङ्कट० वृषा त्वा वृषणम् हुवे[2] वज्रिन्! चित्रैः रक्षणैर्हेतुभिः । भजसे हि स्वम् प्रतिष्टुतिम् । वृषा हवः[3] इति ॥ ३३ ॥

[4]इति षष्ठाष्टके प्रथमाध्याये त्रयोदशो वर्गः[4] ॥

[१४]

[5]गोषूक्त्यश्वसूक्तिनौ काण्वायनावृषी । इन्द्रो देवता । गायत्री छन्दः[5] ।

यदिन्द्राहं यथा त्वमीशीय वस्व एक इत् । स्तोता मे गोषखा स्यात् ॥१॥
यत् । इन्द्र । अहम् । यथा । त्वम् । ईशीय । वस्वः । एकः । इत् । स्तोता । मे । गोऽसखा । स्यात् ॥१॥

वेङ्कट० गोषूक्त्यश्वसूक्तिनौ काण्वायनौ । यत् इन्द्र! अहम् अपि यथा[6] त्वम् ईशिषे तथा ईशीय[7] धनस्य एकः एव । ततो यो मां स्तौति सः "गोसखा स्यात्" इतीन्द्रं प्रयच्छन्तमाह ॥ १ ॥

शिक्षेयमस्मै दित्सेयं शचीपते मनीषिणे । यदहं गोपतिः स्याम् ॥ २ ॥
शिक्षेयम् । अस्मै । दित्सेयम् । शचीऽपते । मनीषिणे । यत् । अहम् । गोऽपतिः । स्याम् ॥ २ ॥

वेङ्कट० दद्याम् अस्मै, ततो दिदित्सेयम् शचीपते![8] स्तुवते, यत् अहम् अपि गोपतिः स्याम् ॥ २ ॥

धेनुष्ट इन्द्र सूनृता यजमानाय सुन्वते । गामश्वं पिप्युषी दुहे ॥ ३ ॥
धेनुः । ते । इन्द्र । सूनृता । यजमानाय । सुन्वते । गाम् । अश्वम् । पिप्युषी । दुहे ॥ ३ ॥

वेङ्कट० वाक् ते इन्द्र! सत्या यजमानाय सुन्वते गाम् अश्वम् चाऽऽप्याययन्ती पूरयति ॥३॥

---

१. स वि[२]; सो अ[१] २ भुवेव मूको. ३. भरः मूको. ४-४. नास्ति मूको. ५. या मूको.
६. 'य मूको. ७-७. योपः स्यात्यामि मूको. ८. °पते मूको.

न ते वर्तास्ति राधस इन्द्र देवो न मर्त्यः । यद् दित्ससि स्तुतो मघम् ॥ ४ ॥
न । ते । वर्ता । अस्ति । राधस । इन्द्र । देव । न । मर्त्य । यत् । दित्ससि । स्तुत । मघम् ॥ ४ ॥
वेङ्कट० न ते धनस्य धारक[1] विद्यते इन्द्र' देव न च मनुष्य, यदि दातुमिच्छसि स्तुत धनम् ॥ ४ ॥

यज्ञ इन्द्रमवर्धयद् यद् भूमिं व्यवर्तयत् । चक्राण ओपशं दिवि ॥ ५ ॥
यज्ञ । इन्द्रम् । अवर्धयत् । यत् । भूमिम् । वि । अवर्तयत् । चक्राण । ओपशम् । दिवि ॥ ५ ॥
वेङ्कट० यज्ञ इन्द्रम् वर्धयति, यत् अयम् भूमिम् विविध वर्तयति चकाण कुर्वन् [2]'दिवि ओपशम्'[2]। योऽध. स्थूणाव 'स्थिरत्वा बिभर्ति दिव स ओपश'[3] ॥ ५ ॥

[4]इति पञ्चाष्टके प्रथमाध्याये चतुर्दशो वर्गः[4] ॥

वावृधानस्य ते वयं विश्वा धनानि जिग्युषः । ऊतिमिन्द्रा वृणीमहे ॥ ६ ॥
वावृधानस्य । ते । वयम् । विश्वा । धनानि । जिग्युष । ऊतिम् । इन्द्र । आ । वृणीमहे ॥ ६ ॥
वेङ्कट० वर्धमानस्य ते वयम् विश्वा धनानि विजितवत रक्षणम् हे इन्द्र! आ वृणीमहे ॥ ६ ॥

व्य१न्तरिक्षमतिरन्मदे सोमस्य रोचना । इन्द्रो यदभिनद् वलम् ॥ ७ ॥
वि । अन्तरिक्षम् । अतिरत् । मदे । सोमस्य । रोचना । इन्द्र । यत् । अभिनत् । वलम् ॥ ७ ॥
वेङ्कट० व अवर्धयत् अन्तरिक्षम् सोममदे रोचनत तेजसा, इन्द्र यदा अभिनत्[5] असुर[6] वलम् ॥ ७ ॥

उद् गा आजदङ्गिरोभ्य आविष्कृण्वन् गुहा सतीः । अर्वाञ्चं नुनुदे वलम् ॥ ८ ॥
उत् । गा । आजत् । अङ्गिरःऽभ्य । आवि । कृण्वन् । गुहा । सती । अर्वाञ्चम् । नुनुदे । वलम् ॥ ८ ॥
वेङ्कट० उत आजत् पशून् पणिभि[7] अपहृतान् अङ्गिरोभ्य आवि कृण्वन् गुहायां वर्तमानान्[8]। अभिमुखम् आगच्छन्तम्[9] वलम् [10]च नुनुदे[10] ॥ ८ ॥

इन्द्रेण रोचना दिवो दृळ्हानि दृंहितानि च । स्थिराणि न पराणुदे ॥ ९ ॥
इन्द्रेण । रोचना । दिव । दृळ्हानि । दृंहितानि । च । स्थिराणि । न । पराऽनुदे ॥ ९ ॥
वेङ्कट० इन्द्रेण ज्योतींषि दिव दृढानि दृंहितानि स्थिराणि, न च परानोद्यानि[11] ऊर्ध्वम् ॥ ९ ॥

---

१. धार° मूको. २-२ तु ऋ १,१७३ ६, दिव्योपशम् मूको ३. °राणि भवति दिवम् औपशः वि° ४-४ नास्ति मूको. ५. नी मूको ६. शरीरम् मूको ७ पणिभि वि°. ८. °मानयाम् वि° ९. °च्छत प भ°, १० च मूको. ११. परणोद्यानि वि°, परा° भ°.

अपामूर्मिर्मदन्निव स्तोम इन्द्राजिरायते । वि ते मदा अराजिषुः ॥ १० ॥

अपाम् । ऊर्मिः । मदन्ऽइव । स्तोमः । इन्द्र । अजिरऽयते । वि । ते । मदाः । अराजिषुः ॥१०॥

वेङ्कट० अपाम् ऊर्मिः 'हृष्यन् इव'[1] मदीयस्तोमः इन्द्र! अजिरायते 'अजिरम्' (निघ २,१५) इति क्षिप्रनाम । शीघ्रं निर्गच्छति, वि राजन्ते[2] च तव सोममदाः ॥ १० ॥

[3]इति षष्ठाष्टके प्रथमाध्याये पञ्चदशो वर्गः[3] ॥

त्वं हि स्तोमवर्धन इन्द्रास्युक्थवर्धनः । स्तोतॄणामुत भद्रकृत् ॥ ११ ॥

त्वम् । हि । स्तोमऽवर्धनः । इन्द्र । असि । उक्थऽवर्धनः । स्तोतॄणाम् । उत । भद्रऽकृत् ॥ ११ ॥

वेङ्कट० निगदसिद्धा ॥ ११ ॥

इन्द्रमित् केशिना हरी सोमपेयाय वक्षतः । उप यज्ञं सुराधसम् ॥ १२ ॥

इन्द्रम् । इत् । केशिना । हरी इति । सोमऽपेयाय । वक्षतः । उप । यज्ञम् । सुऽराधसम् ॥ १२ ॥

वेङ्कट० इन्द्रम् एव प्रशस्तकेशौ अश्वौ[4] सोमपानाय वहतः यज्ञम् प्रति सुधनम्[5] ॥ १२ ॥

अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयः । विश्वा यदजय स्पृधः ॥ १३ ॥

अपाम् । फेनेन । नमुचेः । शिरः । इन्द्र । उत् । अवर्तयः । विश्वाः । यत् । अजयः । स्पृधः ॥१३॥

वेङ्कट० अपाम् फेनेन आयुधभूतेन[6] नमुचेः शिरः इन्द्र! उद् अवर्तयः, यदा विश्वाः स्पृधः शत्रून् अजयः ॥ १३ ॥

मायाभिरुत्सिसृप्सत इन्द्र द्यामारुरुक्षतः । अव दस्यूँरधूनुथाः ॥ १४ ॥

मायाभिः । उत्ऽसिसृप्सतः । इन्द्र । द्याम् । आऽरुरुक्षतः । अव । दस्यून् । अधूनुथाः ॥ १४ ॥

वेङ्कट० मायाभिः पृथिव्याः उत्सर्पितुमिच्छतः इन्द्र! द्याम् आरुरुक्षतः अव अधूनुथाः शत्रून् ॥ १४ ॥

असुन्वामिन्द्र संसदं विषूचीं व्यनाशयः । सोमपा उत्तरो भवन् ॥ १५ ॥

असुन्वाम्[7] । इन्द्र । सम्ऽसदम् । विषूचीम् । वि । अनाशयः । सोमऽपाः । उत्ऽतरः । भवन् ॥१५॥

वेङ्कट० अभिषववर्जितानाम् इन्द्र! संसदम् विषूचीम् वि अनाशय. सोमपाः उच्छ्रितः भवन् सर्वेभ्यः ॥ १५ ॥

[1]इति षष्ठाष्टके प्रथमाध्याये षोडशो वर्गः[1] ॥

१-१. हृष्यन्निव अ[1], हृष्यन्तीव वि[2]. २. °जसे वि[2]; °जते अ[1]. ३-३. नास्ति मूको. ४, अश्विनौ मूको, ५. °धनः मूको. ६. °भूते वि[2]. ७. वैप १,५१३ j-द्र.

[१५]

[१]गोषूक्त्यश्वसूक्तिनौ काण्वायनावृषी । इन्द्रो देवता । उष्णिक् छन्दः[१] ।

तम्वभि प्र गायत पुरुहूतं पुरुष्टुतम् । इन्द्रं गीर्भिस्तविषमा विवासत ॥ १ ॥

तम् । ऊँ इति । अभि । प्र । गायत । पुरुऽहूतम् । पुरुऽस्तुतम् ।
इन्द्रम् । गीःऽभिः । तविषम् । आ । विवासत ॥ १ ॥

वेङ्कट० तम् एव अभि प्र गायत पुरुहूतम् पुरुष्टुतम् । इन्द्रम् गीर्भिः महान्तम् आभिमुख्येन परिचरत ॥ १ ॥

यस्य द्विबर्हसो बृहत् सहो दाधार रोदसी । गिरीँरज्राँ अपः स्वर्वृषत्वना ॥२॥

यस्य । द्विऽबर्हसः । बृहत् । सहः । दाधार । रोदसी इति । गिरीन् । अज्रान् । अपः । स्वः । वृषऽत्वना ॥२॥

वेङ्कट० यस्य द्वयोः स्थानयोः परिवृढस्य[२] महद् बलम् धारयति द्यावापृथिव्यौ । मेघान्[३] गमनशीलान् अन्तरिक्षमिदं च सर्वम् धारयति बलेन ॥ २ ॥

स राजसि पुरुष्टुतँ एको वृत्राणि जिघ्नसे । इन्द्र जैत्रा श्रवस्या च यन्तवे ॥३॥

सः । राजसि । पुरुऽस्तुत । एकः । वृत्राणि । जिघ्नसे । इन्द्र । जैत्रा । श्रवस्या । च । यन्तवे ॥ ३ ॥

वेङ्कट० स. राजसि पुरुष्टुत ! । असहाय एव शत्रून् हंसि । तेन सुखायास्माकम्[४] इन्द्र ! [५]जयहेतूनि अन्नहेतूनि[५] च नियन्तव्यानि ॥ ३ ॥

तं ते मदं गृणीमसि वृषणं पृत्सु सासहिम् । उ लोककृत्नुमद्रिवो हरिश्रियम् ॥४॥

तम् । ते । मदम् । गृणीमसि । वृषणम् । पृत्ऽसु । ससहिम् ।
ऊँ इति । लोकऽकृत्नुम् । अद्रिऽवः । हरिऽश्रियम् ॥ ४ ॥

वेङ्कट० तम् ते मदम् स्तुमः वर्षितारम् सङ्ग्रामेषु अभिभवितारम् लोकस्य कर्तारम् स्तोतृणाम् वज्रिन् !, य. मदोऽश्वौ श्रयति । मदे हि जनितेऽश्वावुपतिष्ठत. ॥ ४ ॥

येन ज्योतींष्यायवे मनवे च विवेदिथ । मन्दानो अस्य बर्हिषो वि राजसि ॥५॥

येन । ज्योतींषि । आयवे । मनवे । च । विवेदिथ । मन्दानः । अस्य । बर्हिषः । वि । राजसि ॥ ५ ॥

वेङ्कट० येन ज्योतींषि आयवे राज्ञे मनवे च [६]अलम्भयः, तेन[६] सोमेन तृप्यन् अस्य यज्ञस्य सर्वस्मिन्ना वि राजसि ॥ ५ ॥

[१]इति षष्ठाष्टके प्रथमाध्याये सप्तदशो वर्गः[१] ॥

१-१. नास्ति मूको. २. परिवृढस्य वि°, परि द्रष्टुस्य अ°. ३. मेघान् मूको. ४. °उपरमा° वि°; °सपारमा° अ°. ५-५ °हेतुभयः न्दे° वि°; °हेतुभं न्दे° अ°. ६-६. °त्वमदं ते° मूको.

तद॒द्या चि॑त् त उ॒क्थिनोऽनु॑ ष्टुवन्ति पू॒र्वथा॑ । वृष॑पत्नीर॒पो ज॑या दि॒वेदि॑वे ॥६॥

तत् । अ॒द्य । चि॒त् । ते॒ । उ॒क्थिनः॑ । अनु॑ । स्तु॒व॒न्ति॒ । पू॒र्वऽथा॑ । वृष॑ऽपत्नीः । अ॒पः । ज॒य॒ । दि॒वेऽदि॑वे ॥६॥

वेङ्कट० तत् अद्य अपि तव शंसिनः अनु स्तुवन्ति इन्द्र![1] प्रतनवत् यथा प्रत्ना ऋषयोऽस्तुवन् । मेघपत्नीः[2] अपः जयसि स्वम् अन्वहमिति ॥ ६ ॥

तव॒ त्यदि॑न्द्रि॒यं बृ॒हत् तव॒ शुष्म॑मु॒त क्रतु॑म् । वज्रं॑ शिशाति धि॒षणा॒ वरे॑ण्यम् ॥७॥

तव॑ । त्यत् । इ॒न्द्रि॒यम् । बृ॒हत् । तव॑ । शुष्म॑म् । उ॒त । क्रतु॑म् ।

वज्र॑म् । शि॒शा॒ति॒ । धि॒षणा॑ । वरे॑ण्यम् ॥ ७ ॥

वेङ्कट० तव तद् बलम् महत्, तव शोषकं तेजः, अपि च प्रज्ञानम्, आयुधम् च वरणीयम्[3], तीक्ष्णीकरोति [4]स्तोतॄणां स्तुतिः[4] ॥ ७ ॥

तव॒ द्यौरि॑न्द्र॒ पौंस्यं॑ पृथि॒वी व॑र्धति॒ श्रवः॑ । त्वामापः॒ पर्व॑तासश्च हिन्विरे ॥८॥

तव॑ । द्यौः । इ॒न्द्र॒ । पौंस्य॑म् । पृ॒थि॒वी । व॒र्ध॒ति॒ । श्रवः॑ । त्वाम् । आपः॑ । पर्व॑तासः । च॒ । हि॒न्वि॒रे॒ ॥ ८ ॥

वेङ्कट० तव द्यौः इन्द्र! बलम् [5]वर्धयति । वर्धयति अन्नम्[5] पृथिवी । येन त्वाम् आपः ग्रावाणः च प्रीणयन्ति ॥ ८ ॥

त्वां विष्णु॑र्बृ॒हन् क्षयो॑ मि॒त्रो गृ॑णाति॒ वरु॑णः । त्वां शर्धो॑ मद॒त्यनु॒ मारु॑तम् ॥९॥

त्वाम् । विष्णुः॑ । बृ॒हन् । क्षयः॑ । मि॒त्रः । गृ॒णा॒ति॒ । वरु॑णः । त्वाम् । शर्धः॑ । म॒द॒ति॒ । अनु॑ । मारु॑तम् ॥ ९ ॥

वेङ्कट० त्वाम् विष्णुः [6]महान् निवासभूतः[6] स्तौति, मित्रावरुणौ च स्तुतः । त्वाम् एव [7]अनु मदति[7] स्तौति[8] मारुतम्[9] शर्धः[10] ॥ ९ ॥

त्वं वृषा॒ जना॑नां॒ मंहि॑ष्ठ इन्द्र जज्ञिषे । स॒त्रा विश्वा॑ स्वप॒त्यानि॑ दधिषे ॥१०॥

त्वम् । वृषा॑ । जना॑नाम् । मंहि॑ष्ठः । इ॒न्द्र॒ । ज॒ज्ञि॒षे॒ । स॒त्रा । विश्वा॑ । सु॒ऽअ॒प॒त्यानि॑ । द॒धि॒षे॒ ॥ १० ॥

वेङ्कट० त्वम् वर्षिता जनानाम् दातृतमः इन्द्र! अजायथाः । सत्यमेव विश्वानि भूतानि शोभनापत्यानि करोषि । येन कर्मणा न पतन्ति[11] तदपत्यमेव[12] ॥ १० ॥

[13]इति षष्ठाष्टके प्रथमाध्याये अष्टादशो वर्गः[13] ॥

---

१. इन्द्रं मूको. २. °ध्वतीः वि[१]; °ध्वतीः अ[१]. ३. परं श्रियं वि[१]; परा श्रियं अ[१]. ४-४. °णा … त्वमिति अ[१], °णामिति वि[१]. ५-५. वर्धयत्यति मूको. ६-६. महानिवस° मूको. ७. नुदन्ति मूको. ८. स्तौमि मूको. ९. °रुतं च अ[१]. १०. शर्धं अ[१]. ११. तपन्ति मूको. १२. तदपत्यन्तमेव वि[१]; तदपात्यन्तमेव अ[१]. १३-१३. नास्ति मूको.

स॒त्रा त्वं पु॑रुष्टुत॒ँ एको॑ वृ॒त्राणि॑ तोशसे । नान्य इन्द्रा॒त् कर॑णं॒ भूय॑ इन्वति ॥११॥

स॒त्रा । त्वम् । पु॒रु॒ऽस्तु॒त॒ । एकः॑ । वृ॒त्राणि॑ । तो॒श॒से॒ । न । अ॒न्यः । इन्द्रा॑त् । कर॑णम् । भूय॑ः । इ॒न्व॒ति॒ ॥११॥

वेङ्कट० सत्रा त्वम् हे बहुभिः स्तुत! असहाय एव शत्रून् हंसि । न अन्यः कश्चित् इन्द्रात् कृतं कर्म प्रीणयति ॥ ११ ॥

यदि॑न्द्र मन्म॒शस्त्वा॒ नाना॒ हव॑न्त ऊ॒तये॑ । अ॒स्माके॑भि॒र्नृभि॑र॒त्रा स्व॑र्जय ॥ १२ ॥

यत् । इ॒न्द्र॒ । म॒न्म॒ऽशः । त्वा॒ । नाना॑ । हव॑न्ते । ऊ॒तये॑ । अ॒स्माके॑भिः । नृऽभिः॑ । अत्र॑ । स्व१॒रिति॑ स्वः॑ । ज॒य॒ ॥१२॥

वेङ्कट० यत् इन्द्र! स्तुतिभिः[1] त्वाम् नाना हवन्ते[2] रक्षणार्थम्[3] । तथाऽस्मदीयैः जनैः[4] सह जेतव्यं सर्वम् जय इति ॥ १२ ॥

अरं॒ क्षया॑य नो म॒हे विश्वा॑ रू॒पाण्या॑वि॒शन् । इन्द्रं॒ जैत्रा॑य हर्षया॒ शची॒पति॑म् ॥१३॥

अर॑म् । क्षया॑य । नः॒ । म॒हे । विश्वा॑ । रू॒पाणि॑ । आ॒ऽवि॒शन् । इन्द्र॑म् । जैत्रा॑य । ह॒र्ष॒य॒ । शची॒ऽपति॑म् ॥

वेङ्कट० 'पर्याप्तानि वासाय अस्माकं[5] महते[6] विश्वानि इन्द्रस्य रूपाणि आवेशयन् इन्द्रम्[7] जितं 'जयशीलं बलं[8] कर्तुम् स्तुतिभिः हर्षय शचीपतिम् ॥ १३ ॥

'इति षष्ठाष्टके प्रथमाध्याये एकोनविंशो वर्गः[9] ॥

[१६]

'इरिम्बिठिः काण्व ऋषिः । इन्द्रो देवता । गायत्री छन्दः[9] ।

प्र स॒म्राजं॑ चर्षणी॒नामिन्द्रं॑ स्तोता॒ नव्यं॑ गी॒र्भिः । नरं॑ नृ॒षाहं॒ मंहि॑ष्ठम् ॥ १ ॥

प्र । स॒म्ऽराज॑म् । च॒र्ष॒णी॒नाम् । इन्द्र॑म् । स्तो॒त॒ । नव्य॑म् । गीः॒ऽभिः । नर॑म् । नृ॒ऽसह॑म् । मंहि॑ष्ठम् ॥ १ ॥

वेङ्कट० इरिम्बिठिः[10] । प्र स्तुत इन्द्रम् सम्राजम् चर्षणीनाम् स्तुत्यम् स्तुतिभिः नेतारम् नृणाम् अभिभवितारम् दातृतमम् ॥ १ ॥

यस्मि॑न्नु॒क्थानि॒ रण्य॑न्ति॒ विश्वा॑नि च श्रव॒स्या॑ । अ॒पामवो॒ न स॑मु॒द्रे ॥ २ ॥

यस्मि॑न् । उ॒क्थानि॑ । रण्य॑न्ति । विश्वा॑नि । च॒ । श्र॒व॒स्या॑ । अ॒पाम् । अवः॑ । न । स॒मु॒द्रे ॥ २ ॥

वेङ्कट० यस्मिन् शस्त्राणि[11] रमन्ते विश्वानि च स्तोतॄणाम् अन्नमिमित्तानि वचनानि । यथा नानाविधानाम् अपाम् गमनम् उदधौ सङ्गच्छते[12] ॥ २ ॥

---

१. °तिभिः मूको. २. भवन्ते मूको. ३. °र्थः मूको. ४. °र्मीयैर्मे वि°; तथामनैर्भागैः अ°. ५-५. °पर्याप्ता° मूको. ६. महेति मूको. ७. इन्द्र मूको. ८-८. °शीलम° वि°. ९-९. नास्ति मूको. १०. इरिमिटि मूको ११. शस्त्राणि अ°; °णि वि°. १२. °च्छत मूको

तं सुष्टुत्या विवासे ज्येष्ठराजं भरे कृत्नुम् । महो वाजिनं सनिभ्यः ॥ ३ ॥

तम् । सुऽस्तुत्या । आ । विवासे । ज्येष्ठऽराजम् । भरे । कृत्नुम् । महः । वाजिनम् । सनिऽभ्यः ॥ ३ ॥

वेङ्कट० तम् सुष्टुत्या परिचरामि श्रेष्ठानां[1] राजानम् सङ्ग्रामे कर्तारम् महान्तम् बलिनम् धनार्थम् ॥ ३ ॥

यस्यानूना गभीरा मदा उरवस्तरुत्राः । हर्षुमन्तः शूरसातौ ॥ ४ ॥

यस्य । अनूनाः । गभीराः । मदाः । उरवः । तरुत्राः । हर्षुऽमन्तः । शूरऽसातौ ॥ ४ ॥

वेङ्कट० यस्य अन्यूनाः[2] गम्भीराः मदाः विस्तीर्णाः तारकाः हर्षमन्तः[3] स्तोतॄन् हर्षयन्तः सङ्ग्रामे ॥ ४ ॥

तमिद् धनेषु हितेष्वधिवाकाय हवन्ते । येषामिन्द्रस्ते जयन्ति ॥ ५ ॥

तम् । इत् । धनेषु । हितेषु । अधिऽवाकाय । हवन्ते । येषाम् । इन्द्रः । ते । जयन्ति ॥ ५ ॥

वेङ्कट० तम् एव धनेषु परस्य निहितेषु लिप्सितेषु अधिवचनाय हवन्ते । येषाम् इन्द्रः भवति सहायः, ते परान् जयन्ति ॥ ५ ॥

तमिच्च्यौत्नैरार्यन्ति तं कृतेभिश्चर्षणयः । एष इन्द्रो वरिवस्कृत् ॥ ६ ॥

तम् । इत् । च्यौत्नैः । आर्यन्ति । तम् । कृतेभिः । चर्षणयः । एषः । इन्द्रः । वरिवःऽकृत् ॥ ६ ॥

वेङ्कट० तम् इन्द्रं कीर्तिभिर्बलैः (तु निघ २,९) प्रेरयन्ति, तम् कृतैश्च कर्मभिः चर्षणयः । एषः[4] एव इन्द्रः तेषां धनस्य कर्ता भवति ॥ ६ ॥

"इति षष्ठाष्टके प्रथमाध्याये विंशो वर्गः"[4] ॥

इन्द्रो ब्रह्मेन्द्र ऋषिरिन्द्रः पुरू पुरुहूतः । महान् महीभिः शचीभिः ॥ ७ ॥

इन्द्रः । ब्रह्मा । इन्द्रः । ऋषिः । इन्द्रः । पुरु । पुरुऽहूतः । महान् । महीभिः । शचीभिः ॥ ७ ॥

वेङ्कट० इन्द्रः महान्, इन्द्रः द्रष्टा, इन्द्रः बहुषु देवेषु बहुभिराहूतः, महान् महतीभिः प्रज्ञाभिः ॥ ७ ॥

स स्तोम्यः स हव्यः सत्यः सत्वा तुविकूर्मिः । एकश्चित् सन्नभिभूतिः ॥ ८ ॥

सः । स्तोम्यः । सः । हव्यः । सत्यः । सत्वा । तुविऽकूर्मिः । एकः । चित् । सन् । अभिऽभूतिः ॥

वेङ्कट० सः स्तोतव्यः, सः ह्वातव्यः सत्यकर्मा सदनशीलः बहोः कर्ता असहायः[5] एव सन् अभिभविता ॥ ८ ॥

---

१ °ष्ठानां मूको. २ न्यूना मूको. ३ हर्षवन्ता मूको ४-४ नास्ति मूको ५ स्हा मूको.

तमर्केभिस्तं सामभिस्तं गायत्रैश्चर्षणयः । इन्द्रं वर्धन्ति क्षितयः ॥ ९ ॥

तम् । अर्केभिः । तम् । सामऽभिः । तम् । गायत्रैः । चर्षणयः । इन्द्रम् । वर्धन्ति । क्षितयः ॥ ९ ॥

वेङ्कट० तम् ऋग्भिः, तम् सामभिः, तम् गायत्रैः च इन्द्रम् विशेषेण वर्धयन्ति चर्षणयः क्षितयः द्रष्टारो मनुष्या इति ऋषीनाहुः ॥ ९ ॥

प्रणेतारं वस्यो अच्छा कर्तारं ज्योतिः समत्सु । सासह्वांसं युधामित्रान् ॥१०॥

प्रऽनेतारम् । वस्यः । अच्छ । कर्तारम् । ज्योतिः । समत्ऽसु । ससह्वांसम् । युधा । अमित्रान् ॥ १० ॥

वेङ्कट० प्रणेतारम् अभ्युदयम् प्रति कर्तारम् अन्धकारापनयनेन ज्योतिः, सङ्ग्रामेषु अभिभवन्तम्[1] युद्धेन अमित्रान् ॥ १० ॥

स नः पप्रिः पारयाति स्वस्ति नावा पुरुहूतः । इन्द्रो विश्वा अति द्विषः ॥११॥

सः । नः । पप्रिः । पारयाति । स्वस्ति । नावा । पुरुऽहूतः । इन्द्रः । विश्वाः । अति । द्विषः ॥११॥

वेङ्कट० सः अस्मान् तर्पयिता[2] पारं[3] नयतु अविनाशेन नावा बहुभिराहूतः । इन्द्रः विश्वाः च द्विषः अति पारयत्वस्मानिति । [4]यस्मात्तथैवं सिद्धम्[4] अतिपारय तस्मात् शत्रूनिति ॥ ११ ॥

स त्वं न इन्द्र वाजेभिर्दशस्या च गातुया च । अच्छा च नः सुम्नं नेषि ॥१२॥

सः । त्वम् । नः । इन्द्र । वाजेभिः । दशस्य । च । गातुऽय । च । अच्छ । च । नः । सुम्नम् । नेषि ॥

वेङ्कट० सः त्वम् अस्मभ्यम् इन्द्र । बलैः शत्रुधनं प्रयच्छ च गमय च धनं प्रति । अभि नेषि च अस्मान् सुखम् ॥ १२ ॥

[5]इति पञ्चाष्टके प्रथमाध्याये एकविंशो वर्गः[5] ॥

[१७]

[6]इरिम्बिठिः काण्व ऋषिः । इन्द्रो देवता । गायत्री छन्दः, अन्त्ययोः प्रगाथः (=चतुर्दशी बृहती, पञ्चदशी सतोबृहती)[6] ।

आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमम् । एदं बर्हिः सदो मम ॥ १ ॥

आ । याहि । सुसुम । हि । ते । इन्द्र । सोमम् । पिब । इमम् । आ । इदम् । बर्हिः । सदः । मम ॥१॥

वेङ्कट० आ याहि । 'सुषुम ते हि' सोमम् इन्द्र[7] । पिब सोमम् इमम्[8] । आ सीद[9] 'च इदम्[9] मदीयम् बर्हिः ॥ १ ॥

---

१. °यन्तु वि[3]; °यन्त अ[1]. २. पिपर्ता मूको. ३. परायन् मूको. ४-४. यथा तवेम सिद्धाम वि[3]; यथा तवेम सिद्धाम् अ[1]. ५-५. नास्ति मूको. ६-६. मुग्ध ते महिमा मूको. ७. इन मूको. ८. नास्ति मूको. ९-९. वेदं वि[3]; वेदं मा अ[1].

आ त्वा ब्रह्मयुजा हरी वहतामिन्द्र केशिना । उप ब्रह्माणि नः शृणु ॥ २ ॥

आ । त्वा । ब्रह्मऽयुजा । हरी इति । वहताम् । इन्द्र । केशिना । उप । ब्रह्माणि । नः । शृणु ॥ २ ॥

वेङ्कट० आ वहताम् त्वां मन्त्रेण युक्तौ अश्वौ इन्द्र । प्रशस्तकेशौ । अस्माकम् उप शृणु स्तुतिम् ॥ २ ॥

ब्रह्माणस्त्वा वयं युजा सोमपामिन्द्र सोमिनः । सुतावन्तो हवामहे ॥ ३ ॥

ब्रह्माणः । त्वा । वयम् । युजा । सोमऽपाम् । इन्द्र । सोमिनः । सुतऽवन्तः । हवामहे ॥ ३ ॥

वेङ्कट० ब्राह्मणाः वयम् त्वां युक्तेन[1] स्तोत्रेण सोमपाम् इन्द्र ।[2] विद्यमानसोमाः तत्राप्यभिषुतसोमाः हवामहे ॥ ३ ॥

आ नो याहि सुतावतोऽस्माकं सुष्टुतीरुप । पिबा सु शिप्रिन्नन्धसः ॥ ४ ॥

आ । नः । याहि । सुतऽवतः । अस्माकम् । सुऽस्तुतीः । उप । पिब । सु । शिप्रिन् । अन्धसः ॥४॥

वेङ्कट० आ याहि अस्मान् सुतवतः । उप गच्छ अस्माकम् सुष्टुतीः च । पिब सुशिप्रिन्(?) सोमम् ॥ ४ ॥

आ ते सिञ्चामि कुक्ष्योरनु गात्रा वि धावतु । गृभाय जिह्वया मधु ॥ ५ ॥

आ । ते । सिञ्चामि । कुक्ष्योः । अनु । गात्रा । वि । धावतु । गृभाय । जिह्वया । मधु ॥ ५ ॥

वेङ्कट० आ सिञ्चामि तव कुक्ष्योः सोमम् । स सर्वाङ्गानि अनु वि धावतु । गृहाण जिह्वया सोममयम् मधु ॥ ५ ॥

[3]इति षष्ठाष्टके प्रथमाध्याये द्वाविंशो वर्गः[3] ॥

स्वादुष्टे अस्तु संसुदे मधुमान् तन्वे३ तव । सोमः शमस्तु ते हृदे ॥ ६ ॥

स्वादुः । ते । अस्तु । सम्ऽसुदे । मधुऽमान् । तन्वे । तव । सोमः । शम् । अस्तु । ते । हृदे ॥ ६ ॥

वेङ्कट० यस्मादापः संक्षरन्ति तस्मै तवाऽऽस्याय स्वादुः सोमो भवतु, तथा मधुमान् शरीराय च तव । सोमः शङ्करो भवतु हृदयाय ॥ ६ ॥

अयमु त्वा विचर्षणे जनीरिवाभि संवृतः । प्र सोम इन्द्र सर्पतु ॥ ७ ॥

अयम् । ऊँ इति । त्वा । विऽचर्षणे । जनीःऽइव । अभि । सम्ऽवृतः । प्र । सोमः । इन्द्र । सर्पतु ॥७॥

वेङ्कट० अयम् [4]"च त्वा हे विद्रष्टः !" जायाः इव ताभिः संवृतः पतिः अभि प्र सर्पतु सोमः इन्द्र । इति ॥७॥

---

१. युक्तेन मूको. २ इन्द्र वयं मूको. ३-३. नास्ति मूको. ४. नास्ति मूको.

तुविग्रीवो वपोदरः सुबाहुरन्धसो मदे । इन्द्रो वृत्राणि जिघ्नते ॥ ८ ॥

तुविऽग्रीवः । वपाऽउदरः । सुऽबाहुः । अन्धसः । मदे । इन्द्रः । वृत्राणि । जिघ्नते ॥ ८ ॥

वेङ्कट० कण्ठस्था नाड्यः ग्रीवाः । बहुग्रीवः वपोदरः सोमप्रवृद्धा[1] वपा यस्योदरे महति[2] स वपोदरः । सुबाहुः सोमस्य मदे इन्द्रः शत्रून्[3] हन्ति ॥ ८ ॥

इन्द्र प्रेहि पुरस्त्वं विश्वस्येशान ओजसा । वृत्राणि वृत्रहञ्जहि ॥ ९ ॥

इन्द्र । प्र । इहि । पुरः । त्वम् । विश्वस्य । ईशानः । ओजसा । वृत्राणि । वृत्रऽहन् । जहि ॥९॥

वेङ्कट० इन्द्र! प्र गच्छ पुरतः त्वम् विश्वस्य ईशानः । बलेन शत्रून् हे शत्रुहन्! जहि ॥ ९ ॥

दीर्घस्ते अस्त्वङ्कुशो येना वसु प्रयच्छसि । यजमानाय सुन्वते ॥ १० ॥

दीर्घः । ते । अस्तु । अङ्कुशः । येन । वसु । प्रऽयच्छसि । यजमानाय । सुन्वते ॥ १० ॥

वेङ्कट० दीर्घः ते अस्तु बाहुः । अङ्कुशवच्छत्रूनियच्छतीति बाहुः अङ्कुशः । येन धनानि प्रयच्छसि यजमानाय सुन्वते ॥ १० ॥

[4]इति पञ्चाष्टके प्रथमाध्याये त्रयोविंशो वर्गः[4] ॥

अयं त इन्द्र सोमो निपूतो अधि बर्हिषि । एहीमस्य द्रवा पिब ॥ ११ ॥

अयम् । ते । इन्द्र । सोमः । निऽपूतः । अधि । बर्हिषि । आ । इहि । ईम् । अस्य । द्रव । पिब ॥११॥

वेङ्कट० अयम् ते इन्द्र! सोमः अभिषुतः । यज्ञे आ गच्छ एनम् । अमुम् द्रव, पिब च ॥ ११ ॥

शाचिगो शाचिपूजनायं रणाय ते सुतः । आखण्डल प्र हूयसे ॥ १२ ॥

शाचिगो इति शाचिऽगो । शाचिऽपूजन । अयम् । रणाय । ते । सुतः । आखण्डल । प्र । हूयसे ॥ १२ ॥

वेङ्कट० हे समवेतपशो! समवेतपूजन! अयम् युद्धाय तव सुतः सोमः । आखण्डल! प्र हूयसे च ॥१२॥

यस्ते शृङ्गवृषो नपात् प्रणपात् कुण्डपाय्यः । न्यस्मिन् दध्र आ मनः ॥ १३ ॥

यः । ते । शृङ्गऽवृषः । नपात् । प्रनपादिति प्रऽनपात् । कुण्डऽपाय्यः । नि । अस्मिन् । दध्रे । आ । मनः ॥

वेङ्कट० यः ते हे शृङ्गवृषः नपात्!, शृङ्गवद्[5] वृषणः शृङ्गयुक्तो वर्षिता च भवति इति तस्य पुत्र! । 'कस्ते मातरं विधवामचक्रत्' (ऋ ४, १८, १२) इत्युक्तम् । तस्य तव प्रणप्ता[6]

---

१. सोमः प्र° वि°. २. महती मूको. ३. शत्रून् मूको. ४-४. नास्ति मूको. ५. शृङ्गवद् मूको. ६. °णप्ता मूको.

सोम 'इन्द्रासापोऽस्य सोम' इति, स प्रणपात्। इन्द्रस्य 'कुण्डपाय्य कुण्डे पान यस्य'। अस्मिन् तव मन नि दध्रे निहितमिति ॥ १३ ॥

वास्तो॑ष्पते ध्रु॒वा स्थूणांस॑त्रं सो॒म्याना॑म् ।
द्र॒प्सो भे॒त्ता पु॒रां शश्व॑तीना॒मिन्द्रो॒ मुनी॑नां॒ सखा॑ ॥ १४ ॥

वास्तो॑ । प॒ते॒ । ध्रु॒वा । स्थूणा॑ । अंस॑त्रम् । सो॒म्याना॑म् ।
द्र॒प्सः । भे॒त्ता । पु॒राम् । शश्व॑तीनाम् । इन्द्रः॑ । मुनी॑नाम् । सखा॑ ॥ १४ ॥

वेङ्कट० हे वास्तो पते। त्व सोम्यानाम्[1] ध्रुवा स्थूणा[1] भवसि 'तद्वत् तान्' धारयसि। तथा असत्रम् च तेषा भवसि। द्रप्स द्रवते अभिगन्ता, भेत्ता बह्वीनाम् पुराम् इन्द्र मुनीनाम् सखा। स्तोतारो मुनय[२] ॥ १४ ॥

पृ॒दा॒कु॒सा॒नुर्य॑ज॒तो ग॒वेष॑ण॒ एकः॒ सन्न॒भि भूय॑सः ।
भूर्णि॒मश्वं॑ नयत् तु॒जा पु॒रो गृ॒भेन्द्रं॒ सोम॑स्य पी॒तये॑ ॥ १५ ॥

पृ॒दा॒कु॒ऽसा॒नुः । य॒ज॒तः । गो॒ऽएष॑णः । एकः॑ । सन् । अ॒भि । भूय॑सः ।
भूर्णि॑म् । अश्व॑म् । न॒य॒त् । तु॒जा । पु॒रः । गृ॒भा । इन्द्र॑म् । सोम॑स्य । पी॒तये॑ ॥ १५ ॥

वेङ्कट० पृदाकुर्नाम प्राच्या दिशो रक्षिता य[४] सम्भजते गोपनार्थे[५] स पृदाकुसानु इन्द्र यष्टव्य गवामन्वेष्टा असहाय सन् अभि भवति बहून्। स इन्द्र क्षिप्रम् अश्वम् गृह्यमाणया कशया पुरस्तात् नयतु ईश्वर गमनसमर्थं सोमपानायेति ॥ १५ ॥

'इति षष्ठाष्टके प्रथमाध्याये चतुर्विंशो वर्ग' ॥

[१८]

'इरिम्बिठि काण्व ऋषि। आदित्या देवता, चतुर्थीषष्ठीसप्तमानाम् अदिति, अष्टम्या अश्विनी, नवम्या अग्निसूर्यानिला। उष्णिक् छन्द'।

इ॒दं ह॑ नू॒नमे॑षां सु॒म्नं भि॑क्षेत॒ मर्त्यः॑ । आ॒दि॒त्याना॒मपू॑र्व्यं॒ सवी॑मनि ॥ १ ॥

इ॒दम् । ह॒ । नू॒नम् । ए॒षा॒म् । सु॒म्नम् । भि॒क्षे॒त॒ । मर्त्यः॑ । आ॒दि॒त्याना॑म् । अपू॑र्व्यम् । सवी॑मनि ॥१॥

वेङ्कट० इदम् 'ह सम्प्रति' एषाम् आदित्यानाम् प्रसव अपूर्व्यम्[६] धनम् भिक्षेत मनुष्य कल्याणम्। आदित्यै प्रसूतो भिक्षितु प्रवृत्ताऽलब्धपूर्वं धन लभत इति ॥ १ ॥

---

१ १ =कण्ड देव (प्रणपात [तु वैप १ ११२४ 1]', भगपतिकाण्ड पततस्थ मूको. २. सेमाना मूको. ३ स्थूण मूको. ४ ४ तक्ता अ'. ५ 'प सवन्तीयर्थं अ'. ६ य मूको ७. 'नास्त मूको ८ ८ नास्ति मूको ९ ९. इन्न प्रति वि", इसव प्रति स १० नास्ति मूको

अनर्वाणो ह्येषां पन्था आदित्यानाम् । अदब्धाः सन्ति पायवः सुगेवृधः ॥२॥

अनर्वाणः । हि । एषाम् । पन्थाः । आदित्यानाम् । अदब्धाः । सन्ति । पायवः । सुगेऽवृधः ॥२॥

वेङ्कट० अप्रच्युताः[1] हि एषाम् रश्मयः आदित्यानाम् अहिंसिता भवन्ति रक्षकाः, सुगम् अन्तरिक्षे तत्र प्रवृद्धाः ॥ २ ॥

तत् सु नः सविता भगो वरुणो मित्रो अर्यमा । शर्म यच्छन्तु सप्रथो यदीमहे ॥३॥

तत् । सु । नः । सविता । भगः । वरुणः । मित्रः । अर्यमा । शर्म । यच्छन्तु । सऽप्रथः । यत् । ईमहे ॥३॥

वेङ्कट० यत् गृहम् वयं याचामहे, तत् अस्मभ्यम् इमे सुष्ठु प्र यच्छन्तु इति[2], सप्रथः सर्वतः पृथुतममिति ॥ ३ ॥

देवेभिर्देव्यदितेऽरिष्टभर्मन्ना गहि । स्मत् सूरिभिः पुरुप्रिये सुशर्मभिः ॥ ४ ॥

देवेभिः । देवि । अदिते । अरिष्टऽभर्मन् । आ । गहि ।

स्मत् । सूरिऽभिः । पुरुऽप्रिये । सुशर्मऽभिः ॥ ४ ॥

वेङ्कट० पुत्रैः सह हे देवि ! 'अदिते ! अहिंसितहविर्भरणे ![3]' मयि आ गच्छ कल्याणं प्राज्ञैः सुसुखैः आदित्यैः बहुप्रिये![4]' ॥ ४ ॥

ते हि पुत्रासो अदितेर्विदुर्द्वेषांसि योतवे । अंहोश्चिदुरुचक्रयोऽनेहसः ॥ ५ ॥

ते । हि । पुत्रासः । अदितेः । विदुः । द्वेषांसि । योतवे । अंहोः । चित् । उरुऽचक्रयः । अनेहसः ॥ ५ ॥

वेङ्कट० ते हि पुत्राः अदितेः जानन्ति[5] पापानि पृथक् कर्तुम् अंहोः चित् पापस्य कृशस्यापि, बहुकृतः अपापाः[6] ॥ ५ ॥

[7]इति षष्ठाष्टके प्रथमाध्याये पञ्चविंशो वर्गः[7] ॥

अदितिर्नो दिवा पशुमदितिर्नक्तमद्वयाः । अदितिः पात्वंहसः सदावृधा ॥६॥

अदितिः । नः । दिवा । पशुम् । अदितिः । नक्तम् । अद्वयाः ।

अदितिः । पातु । अंहसः । सदाऽवृधा ॥ ६ ॥

वेङ्कट० अदितिः नः दिवा नक्तम् च पशुम् रक्षतु अमायया अदितिः पातु पापात् सदावृद्धा ॥६॥

उत स्या नो दिवा मतिरदितिरूत्या गमत् । सा शंताति मयस्करदप स्रिधः ॥७॥

---

१. अप्रस्तुता अ[1]. २. इति रा मूको. ३-३. °तोहिंसि° वि[2]; °तेहिंसि° अ[1]. † °विर्हर° मूको. ४. °प्रियैः मूको. ५. °न्तः वि[1]; °न्त अ[1]. ६. °पा मूको. ७-७. नास्ति मूको.

उत । स्या । न । दिवा । मति । अदिति । ऊत्या । आ । गमत् ।
सा । शम्ऽताति । मय । करत् । अप । स्रिध ॥ ७ ॥

वेङ्कट० अपि चैषा दिवा अस्मान् पूजनीया अदिति रक्षणेन आ गच्छतु । सा शङ्करम्[१] अत्र करोतु, तथा अप नयतु शत्रून् ॥ ७ ॥

उत त्या दैव्या भिषजा शं नः करतो अश्विना । युयुयातामितो रपो अप स्रिधः ॥८॥
उत । त्या । दैव्या । भिषजा । शम् । न । करत । अश्विना । युयुयाताम् । इत । रप । अप । स्रिध ॥८॥

वेङ्कट० अपि च तौ दैव्यौ भिषजौ 'शम् न'[२] कुरुताम्[२] अश्विनौ । पृथक् कुरुताम् अस्मत्तः पापम् शत्रूंश्च ॥ ८ ॥

शमग्निरग्निभिः करच्छं नस्तपतु सूर्यः । शं वातो वात्वरपा अप स्रिधः ॥ ९ ॥
शम् । अग्नि । अग्निऽभि । करत् । शम् । न । तपतु । सूर्य ।
शम् । वात । वातु । अरपा । अप । स्रिध ॥ ९ ॥

वेङ्कट० शम् अग्नि अग्निभि अन्यै शाखाभूतै करोतु । शम् न करोतु सूर्य । सुखम् वात आ वातु, पापवर्जित शत्रूंश्च अप नयतु ॥ ९ ॥

अपामीवामप स्रिधमप सेधत दुर्मतिम् । आदित्यासो युयोतना नो अंहसः ॥१०॥
अप । अमीवाम् । अप । स्रिधम् । अप । सेधत । दुःऽमतिम् ।
आदित्यास । युयोतन । न । अंहस ॥ १० ॥

वेङ्कट० रोगम् क्षपकत्वम्[३] '[४]दुर्मतिम् च अप सेधत[४]', आदित्या ! पृथक् कुरुत अस्मान् पापात् ॥ १० ॥

[५]इति षष्ठाष्टके प्रथमाध्याये षड्विंशो वर्गः[५] ॥

युयोता शरुमस्मदाँ आदित्यास उतामतिम् । ऋधग्द्वेषः कृणुत विश्ववेदसः ॥११॥
युयोत । शरुम् । अस्मत् । आ । आदित्यास । उत । अमतिम् ।
ऋधक् । द्वेष । कृणुत । विश्वऽवेदस ॥ ११ ॥

वेङ्कट० पृथक् कुरुत हिंसकम् अस्मत्त आदित्या !, अपि च अमतिम् । पृथक् शत्रून्[६] कुरुत हे विश्वधना ! ॥ ११ ॥

तत् सु नः शर्म यच्छतादित्या यन्मुमोचति । एनस्वन्तं चिदेनसः सुदानवः ॥१२॥

---

१ शकम् मूको. २-२ गणी मूको. ३. °त्तम्° मूको. ४-४. सेधत दुर्मतिम् मूको. ५-५ नास्ति मूको. ६ हन्तॄन् वि°.

तत्। सु। नः। शर्म। यच्छत। आदित्याः। यत्। मुमोचति।
एनस्वन्तम्। चित्। एनसः। सुऽदानवः॥ १२॥

वेङ्कट० तत् सुष्ठु अस्मभ्यम् शर्म यच्छत हे आदित्याः!, यत् शर्म मोचयति एनस्विनम्[1] अपि 'एनसः मां हे'[2] सुदानाः! ॥ १२ ॥

यो नः कश्चिद् रिरिक्षति रक्षस्त्वेन मर्त्यः। स्वैः ष एवै रिरिषीष्ट युर्जनः॥१३॥

यः। नः। कः। चित्। रिरिक्षति। रक्षःऽत्वेन। मर्त्यः।
स्वैः। सः। एवैः। रिरिषीष्ट। युः। जनः॥ १३॥

वेङ्कट० यः अस्मान् कः चित् हिंसितुमिच्छति दुष्टभावेन मर्त्यः, सः अस्माकं पृथक्कर्ता जनः स्वैः एव ज्ञातिभिः हन्यतामिति। ज्ञातय एव सङ्गच्छन्त[3] इति॥ १३॥

समित् तमघमश्नवद् दुःशंसं मर्त्यं रिपुम्। यो अस्मत्रा दुर्हणावाँ उप द्वयुः॥१४॥

सम्। इत्। तम्। अघम्। अश्नवत्। दुःऽशंसम्। मर्त्यम्। रिपुम्।
यः। अस्मऽत्रा। दुःऽहनावान्। उप। द्वयुः॥ १४॥

वेङ्कट० 'तम् एव अश्नोतु तम्' पापम् दुरशंसम् [4]मर्त्यम् अस्मच्छत्रुम्[4], यः अस्मासु सखा 'दुर्हणावान् उप[5] गच्छति द्वयुः। द्वयावि[6] सत्यानृतपरश्च॥ १४॥

पाकत्रा स्थन देवा हृत्सु जानीथ मर्त्यम्। उप द्वयुं चाद्वयुं च वसवः॥१५॥

पाकऽत्रा। स्थन। देवाः। हृत्ऽसु। जानीथ। मर्त्यम्।
उप। द्वयुम्। च। अद्वयुम्। च। वसवः॥ १५॥

वेङ्कट० पक्तव्यप्रज्ञेषु भवथ देवाः!। हृदयेषु च मनुष्यम् 'द्वयाविनम् अद्वयाविनम् च' प्रविश्य उप जानीथ हे वासयितारः!॥ १५॥

'इति षष्ठाष्टके प्रथमाध्याये सप्तविंशो वर्गः' ॥

आ शर्म पर्वतानामोतापां वृणीमहे। द्यावाक्षामारे अस्मद् रपस्कृतम्॥ १६॥

आ। शर्म। पर्वतानाम्। आ। उत। अपाम्। वृणीमहे।
द्यावाक्षामा। आरे। अस्मत्। रपः। कृतम्॥ १६॥

---

१. एनस्थितम् मूको. २-२. °नसोमिह मूको. ३. °च्छन मूको.; एवाः ज्ञातय इति द्र. ४-४. समेवाभौ कुर्न मूको. ५-५. मत्यहिमच्छनूर् मूको. ६-६. नास्ति मूको. ७. द्वयावसी वि[२]; द्वय सी अ[१]. ८-८. द्वयाविनश्च वि[१]; °विनं द्वयाविनश्च अ[१].

वेङ्कट० आ वृणीमहे सुखम् मेधानाम्, अपि [1]च अपाम्। हे द्यावापृथिव्यौ![1] अस्मत्तः पापम् दूरे कुरुतम् ॥ १६ ॥

ते नो॑ भ॒द्रेण॒ शर्म॑णा यु॒ष्माकं॑ ना॒वा व॑सवः । अति॒ विश्वा॑नि दुरि॒ता पि॑पर्तन ॥१७॥

ते । नः॒ । भ॒द्रेण॑ । शर्म॑णा । यु॒ष्माक॑म् । ना॒वा । व॒स॒वः॒ ।
अति॑ । विश्वा॑नि । दुः॒ऽइ॒ता । पि॒प॒र्त॒न॒ ॥ १७ ॥

वेङ्कट० तस्माद् भजनीयेन सुखकरेण युष्माकम् [2]नावा हे वासयितारः![2] नः[3] अति पारयत विश्वानि दुरितानि ॥ १७ ॥

तु॒चे तना॑य॒ तत् सु नो॒ द्राघी॑य॒ आयु॑र्जी॒वसे॑ ।
आदि॑त्यासः सुमहसः कृ॒णोत॑न ॥ १८ ॥

तु॒चे । तना॑य । तत् । सु । नः॒ । द्राघी॑यः । आयुः॑ । जी॒वसे॑ ।
आदि॑त्यासः । सु॒ऽम॒ह॒सः॒ । कृ॒णोत॑न ॥ १८ ॥

वेङ्कट० अस्माकं पुत्राय तत्पुत्राय च युष्मदीयं दीर्घतमम् आयुः जीवनार्थम् सुष्ठु कुरुत हे आदित्याः! सुदीप्तयः! ॥ १८ ॥

य॒ज्ञो हीळो॑ वो॒ अन्त॑र॒ आदि॑त्या॒ अस्ति॑ मृ॒ळत॑ ।
यु॒ष्मे इद् वो॒ अपि॑ ष्मसि सजा॒त्ये॑ ॥ १९ ॥

य॒ज्ञः । हीळः॑ । वः॒ । अन्त॑रः । आदि॑त्याः । अस्ति॑ । मृ॒ळत॑ ।
यु॒ष्मे इति॑ । इत् । वः॒ । अपि॑ । स्म॒सि॒ । स॒ऽजा॒त्ये॑ ॥ १९ ॥

वेङ्कट० यज्ञः युष्माकं क्रोधस्य विनाशको भवति आदित्याः!। तथा सति [4]यूयम् मृडयत[4]। वयम् युष्माकं समजात्ये अपि भवामः[5]। युष्माभिरेकीभवामो भवतां सदृशं प्रविशन्तीति ॥१९॥

बृ॒हद् वरू॑थं म॒रुतां॑ दे॒वं त्रा॒तार॑म॒श्विना॑ । मि॒त्रमी॑महे॒ वरु॑णं स्व॒स्तये॑ ॥ २० ॥

बृ॒हत् । वरू॑थम् । म॒रुता॑म् । दे॒वम् । त्रा॒तार॑म् । अ॒श्विना॑ ।
मि॒त्रम् । ई॒म॒हे॒ । वरु॑णम् । स्व॒स्तये॑ ॥ २० ॥

वेङ्कट० बृहत् वरूथम् सद्म मरुताम्[6] देवम् च त्रातारम् सवितारम् अश्विनौ च मित्रावरुणौ [7]च अविनाशाय ईमहे[7] ॥ २० ॥

अ॒नेहो॑ मित्रार्यमन् नृ॒वद् व॑रुण॒ शंस्य॑म् । त्रि॒वरू॑थं मरुतो यन्त नश्छ॒र्दिः ॥२१॥

१-१. अपाद्ध्यौ भूम्याव वि'; अभैषोः भूम्याम् ख'. २-२. नाविदत्त' मूको. ३. नास्ति मूको. ४-४. 'यम् यत मूको. ५. भवामः मूको. ६. मरुतो मूको. ७-७. चापि नाशमामहे मूको.

अनेहः । मित्र । अर्यमन् । नृऽवत् । वरुण । शंस्यम् ।
त्रिऽवरूथम । मरुतः । यन्त । नः । छर्दिः ॥ २१ ॥

वेङ्कट० हे मित्र! अर्यमन्! वरुण! मरुतः! अपापम् मनुष्ययुक्तम् शंस्यम् त्रिच्छदिष्कम्[1](?) गृहम् अस्मभ्यं प्रयच्छत ॥ २१ ॥

ये चिद्धि मृत्युबन्धव आदित्या मनवः स्मसि । प्र सू न आयुर्जीवसे तिरेतन ॥२२॥
ये । चित् । हि । मृत्युऽबन्धवः । आदित्याः । मनवः । स्मसि ।
प्र । सु । नः । आयुः । जीवसे । तिरेतन ॥ २२ ॥

वेङ्कट० ये चित् हि[2] मृत्युबन्धनाः हे आदित्याः! मनुष्याः भवामः । तेषां सुष्ठु आयुः वर्धयत जीवनायेति ॥ २२ ॥

[3]इति षष्ठाष्टके प्रथमाध्याये अष्टाविंशो वर्गः[3] ॥

[१९]

[4]सोभरिः काण्व ऋषिः । अग्निर्देवता, चतुस्त्रिंशीपञ्चत्रिंश्योः आदित्याः, अन्त्ययोः त्रसदस्युः पौरुकुत्स्यः । षड्विंशयन्त्याः प्रगाथः (=विषमाः ककुभः, समाः सतोबृहत्यः), सप्तविंशी द्विपदा विराट्, अष्टाविंश्यादित्रयस्त्रिंशयन्ताः प्रगाथः (=समाः ककुभः, विषमाः सतोबृहत्यः), चतुस्त्रिंशी उष्णिक्, पञ्चत्रिंशी सतोबृहती, षट्त्रिंशी ककुप्, अन्त्या पङ्क्तिः[4] ।

तं गूर्धया स्वर्णरं देवासो देवमरतिं दधन्विरे । देवत्रा हव्यमोहिरे ॥ १ ॥
तम् । गूर्धय । स्वःऽनरम् । देवासः । देवम् । अरतिम् । दधन्विरे । देवऽत्रा । हव्यम् । आ । ऊहिरे ॥ १ ॥

वेङ्कट० सोभरिः । तम् स्तुहि "सर्वमनुष्यम् । देवाश्च" देवम् गन्तारं धारयन्ति । मनुष्याश्च अनेन देवेषु हव्यम् वहन्ति ॥ १ ॥

विभूतरातिं विप्र चित्रशोचिषमग्निमीळिष्व यन्तुरम् ।
अस्य मेधस्य सोम्यस्य सोभरे प्रेमध्वराय पूर्व्यम् ॥ २ ॥
विभूतऽरातिम् । विप्र । चित्रऽशोचिषम् । अग्निम् । ईळिष्व । यन्तुरम् ।
अस्य । मेधस्य । सोम्यस्य । सोभरे । प्र । ईम् । अध्वराय । पूर्व्यम् ॥ २ ॥

---

१. त्रिदिविष्कं मूको. २. वित मूको. ३-३. नास्ति मूको. ४-४. "ष्यदे" मूको

वेङ्कट० विभूतदानम् मेधाविन्[1] चित्रदीप्तिम् अग्निम् स्तुहि यन्तारम्। अस्य यज्ञस्य सोमार्हस्य 'हे सोभरे।'[2] प्रकर्षेण स्तुहि अग्निम्, योऽयं यज्ञाय सुक्थो भवति ॥ २ ॥

यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारममर्त्यम् । अस्य यज्ञस्य सुक्रतुम् ॥३॥

यजिष्ठम्। त्वा। ववृमहे। देवम्। देवऽत्रा। होतारम्। अमर्त्यम्। अस्य। यज्ञस्य। सुऽक्रतुम् ॥ ३ ॥

वेङ्कट० यष्टृतमम् त्वा वृणीमहे देवम् देवेषु 'होतारम् अमर्त्यम्' अस्य यज्ञस्य यज्ञम्, यस्य अग्नि होता भवति ॥ ३ ॥

ऊर्जो नपातं सुभगं सुदीदितिमग्निं श्रेष्ठशोचिषम् ।
स नो मित्रस्य वरुणस्य सो अपामा सुम्नं यक्षते दिवि ॥ ४ ॥

ऊर्जः । नपातम् । सुऽभगम् । सुऽदीदितिम् । अग्निम् । श्रेष्ठऽशोचिषम् ।
सः । नः । मित्रस्य । वरुणस्य । सः । अपाम् । आ । सुम्नम् । यक्षते । दिवि ॥ ४ ॥

वेङ्कट० 'ऊर्जः पुत्रम्' सुभगम् सुदीप्तम् अग्निम् श्रेष्ठशोचिषम्। रश्मयः शोचींषि। वृणीमः । स अस्माकम् द्युलोके मित्रादीनाम् स्वभूतम् अन्नम् आ याचते ॥ ४ ॥

यः समिधा य आहुती यो वेदेन ददाश मर्तो अग्नये । यो नमसा स्वध्वरः ॥५॥

यः । सम्ऽइधा । यः । आऽहुती । यः । वेदेन । ददाश । मर्तः । अग्नये । यः । नमसा । सुऽअध्वरः ॥५॥

वेङ्कट० यः समिधा, यः आज्याद्याहुत्या[3], यः च स्वाध्यायेन दानं करोति मनुष्यः 'अग्नये'। 'स्वाध्याये च'[4] वाचिकम् दानमस्ति। यः च नमस्कारेण दानं सम्पादयति। दानसमो नमस्कारश्चेत्यर्थः। यद्वा मनुष्येभ्यः प्रदीयमानमन्नम्[5]। स सर्वं सुयज्ञः ॥ ५ ॥

'इति षष्ठाष्टके प्रथमाध्याये एकोनविंशो वर्गः'[6] ॥

तस्येदर्वन्तो रंहयन्त आशवस्तस्य द्युम्नितमं यशः ।
न तमंहो देवकृतं कुतश्चन न मर्त्यकृतं नशत् ॥ ६ ॥

तस्य । इत् । अर्वन्तः । रंहयन्ते । आशवः । तस्य । द्युम्निऽतमम् । यशः ।
न । तम् । अंहः । देवऽकृतम् । कुतः । चन । न । मर्त्यऽकृतम् । नशत् ॥ ६ ॥

वेङ्कट० तस्य एव अश्वाः गच्छन्ति व्याप्ताः, तस्य दीप्ततमम् यशः। तम् देवकृतम् मर्त्यकृतम् वा पापम् न व्याप्नोति कुतः चन इति ॥ ६ ॥

१-१. हे सोभ दे मूको. २-२. °तारं मम त्वम् वि° °तारमम त्वम् अ°. ३-३. कर्बेषु° मूको. ४. आज्याहुतिभि अ°. ५. °य यश्च अ°. ६-६. नास्ति अ°. ७. प्रतीय° मूको. ८-८. नास्ति मूको.

स्वग्नयो वो अग्निभिः स्याम सूनो सहस ऊर्जां पते । सुवीरस्त्वमस्मयुः ॥ ७ ॥

सुऽअग्नयः । वः । अग्निऽभिः । स्याम । सूनो इति । सहसः । ऊर्जाम् । पते । सुऽवीरः । त्वम् । अस्मऽयुः ॥

वेङ्कट० सत्र गार्हपत्यादिभि अग्निभि स्वग्नय वयम् स्याम सहस सूनो। अन्नाना [1]पते[1]। एकवचनेऽपि[2] व इति द्रष्टम्। सुवीर त्वम् अस्मत्कामः स्या ॥ ७ ॥

प्रशंसमानो अतिथिर्न मित्रियोऽग्नी रथो न वेद्यः ।
त्वे क्षेमासो अपि सन्ति साधवस्त्वं राजा रयीणाम् ॥ ८ ॥

प्रऽशंसमानः । अतिथिः । न । मित्रियः । अग्निः । रथः । न । वेद्यः ।
त्वे इति । क्षेमासः । अपि । सन्ति । साधवः । त्वम् । राजा । रयीणाम् ॥ ८ ॥

वेङ्कट० प्रशस्यमान अग्नि अतिथि इव मित्राणां रक्षको भवति, तथा च रथ इव भवति धनहित (तु० ऋ ८,८४,१)। त्वयि क्षेमाः अपि भवन्ति कल्याणा, अग्ने[3] त्वम् राजा भवसि धनानाम् ॥ ८ ॥

सो अद्धा दाश्वध्वरोऽग्ने मर्तः सुभग स प्रशंस्यः । स धीभिरस्तु सनिता ॥९॥

सः । अद्धा । दाशुऽअध्वरः । अग्ने । मर्तः । सुऽभग । सः । प्रऽशंस्यः । सः । धीभिः । अस्तु । सनिता ॥

वेङ्कट० स. सत्यम् दत्तयज्ञ अग्ने![1] मर्त्य सुधन![1] । स एव प्रशंसनीय । सः कर्मभि अस्तु सम्भक्त । उत्तरत्र सम्बन्ध ॥ ९ ॥

यस्य त्वमूर्ध्वो अध्वराय तिष्ठसि क्षयद्वीरः स साधते ।
सो अर्वद्भिः सनिता स विपन्युभिः स शूरैः सनिता कृतम् ॥ १० ॥

यस्य । त्वम् । ऊर्ध्वः । अध्वराय । तिष्ठसि । क्षयत्ऽवीरः । सः । साधते ।
सः । अर्वत्ऽभिः । सनिता । सः । विपन्युऽभिः । सः । शूरैः । सनिता । कृतम् ॥ १० ॥

वेङ्कट० यस्य त्वम् ऊर्ध्व यज्ञाय तिष्ठसि निवसद्वीर साधयति स अश्वै युद्धात्मम्, एव स्तोतृभि एवम् शूरै ॥ १० ॥

[4]इति पञ्चाष्टके प्रथमाध्याये त्रिंशो वर्ग [5] ॥

यस्याग्निर्वपुर्गृहे स्तोमं चनो दधीत विश्ववार्यः । हव्या वा वेविषद् विषः ॥ ११ ॥

यस्य । अग्निः । वपुः । गृहे । स्तोमम् । चनः । दधीत । विश्वऽवार्यः । हव्या । वा । वेविषत् । विषः ॥ ११ ॥

1-1. पतये ए° मूको 2 नास्ति अ' 3 अग्न मूको 4. °न अ' 5-5 नास्ति मूको

वेङ्कट० यस्य अग्नि अस्य गृहे स्तोमम् हविश्च धारयति विप्रैर्वरणीय[1]। हव्यानि [2]च भक्षयन्[2] व्याप्नोति। स. अवंद्रि. भजते कृतम् (तु ऋ ८,१९,१०) इति ॥ ११ ॥

विप्रस्य वा स्तुवतः सहसो यहो मक्षूतमस्य रातिषु ।
अवोदेवमुपरिमर्त्यं कृधि वसो विविदुषो वचः ॥ १२ ॥

विप्रस्य । वा । स्तुवत । सहस । यहो इति । मक्षुऽतमस्य । रातिषु ।
अव ऽदेवम् । उपरिऽमर्त्यम् । कृधि । वसो इति । विविदुषे । वच ॥ १२ ॥

वेङ्कट० 'मेधाविन हे बलस्य पुत्र[3] अत्यन्त[3] क्षिप्रस्य 'वा दानेषु[4] स्तुवत प्रयच्छतश्चैश्वर्यं । '[5]तस्योभयस्यान्नम् अवोदेवम्[5] उपरिमर्त्यम् कुरु वासयित[6] जानत स्तोत्रम् ॥ १२ ॥

यो अग्निं हव्यदातिभिर्नमोभिर्वा सुदक्षमाविवासति । गिरा वाजिरशोचिषम् ॥१३॥

य । अग्निम् । हव्यदातिऽभि । नमःऽभि । वा । सुऽदक्षम । आऽविवासति ।
गिरा । वा । अजिरऽशोचिषम् ॥ १३ ॥

वेङ्कट० य अग्निम् हविर्दानै नमस्कारै वा सुबलम् परिचरति, स्तुत्या वा गमनशीलरश्मिम् । उत्तरत्र सम्बन्ध ॥ १३ ॥

समिधा यो निशिती दाशददितिं धामभिरस्य मर्त्यः ।
विश्वेत् स धीभिः सुभगो जनाँ अति द्युम्नैरुद्न इव तारिषत् ॥ १४ ॥

सम्ऽइधा । य । निऽशिती । दाशत् । अदितिम् । धामऽभि । अस्य । मर्त्य ।
विश्वा । इत् । स । धीभि । सुऽभग । जनान् । अति । द्युम्नै । उद्नःऽइव । तारिषत् ॥१४॥

वेङ्कट० समिधा य मन्त्रेण सस्कृतया प्रीणयति अग्निम्[7], स तेजोभि अस्य[7] मनुष्य विद्वान् एव कर्मभि सुधन[8] जनान् अन्नैश्च उदकानीव आत तरति ॥ १४ ॥

तदग्ने द्युम्नमा भर यत् सासहत् सदने कं चिदत्रिणम् । मन्युं जनस्य दूढ्यः ॥१५॥

तत् । अग्ने । द्युम्नम् । आ । भर । यत् । ससहत् । सदने । कम् । चित् । अत्रिणम् ।
मन्युम् । जनस्य । दुःऽध्य ॥ १५ ॥

वेङ्कट० तत् अग्ने! धनम् आ हर, यत् अभिभवति गृहे वर्तमानम् कम् चित् अपि राक्षसम्, क्रोधम् च जनस्य दुर्बुद्धे ॥ १५ ॥

[10]इति षष्ठाष्टके प्रथमाध्याये एकत्रिंशो वर्ग[10] ॥

---

१ °रग्नि मूको २ २ चाम° वि[1]. ३-३ नास्त्य त मूको. ४ ४ पादानेषु वि[1], पादासु अ[1]. ५ ५ 'स्यान्न देव' मूको ६ °यित मूको. ७ तु ऋ २ १,११. ८ कर्म मूको, ९ विजन अ[1], १० १०, नास्ति मूको

येन चष्टे वरुणो मित्रो अर्यमा येन नासत्या भगः ।
वयं तत् ते शवसा गातुवित्तमा इन्द्रत्वोता विधेमहि ॥ १६ ॥

येन । चष्टे । वरुणः । मित्रः । अर्यमा । येन । नासत्या । भगः ।
वयम् । तत् । ते । शवसा । गातुवित्ऽतमाः । इन्द्रत्वाऽऊताः । विधेमहि ॥ १६ ॥

वेङ्कट० येन वचसा अस्मान् पश्यन्ति[1] वरुणादयः[2], वयम् तत् वचनं तुभ्यं बलेन विधेमहि अस्मन्तं गमनविदः इन्द्रेण त्वया च रक्षिताः[3] ॥ १६ ॥

ते घेदग्ने स्वाध्योऽ ये त्वा विप्र निदधिरे नृचक्षसम् । विप्रासो देव सुक्रतुम् ॥१७॥

ते । घ । इत् । अग्ने । सुऽआध्यः । ये । त्वा । विप्र । निऽदधिरे । नृऽचक्षसम् ।
विप्रासः । देव । सुऽक्रतुम् ॥ १७ ॥

वेङ्कट० ते एव खलु अग्ने! सुकर्माण, ये त्वा मेधाविन्! गृहे धारयन्ति नृणां द्रष्टारम् मेधाविन देव![4] सुप्रज्ञम् ॥ १७ ॥

त इद् वेदिं सुभग त आहुतिं ते सोतुं चक्रिरे दिवि ।
त इद् वाजेभिर्जिग्युर्महद् धनं ये त्वे कामं न्येरिरे ॥ १८ ॥

ते । इत् । वेदिम् । सुऽभग । ते । आऽहुतिम् । ते । सोतुम् । चक्रिरे । दिवि ।
ते । इत् । वाजेभिः । जिग्युः । महत् । धनम् । ये । त्वे इति । कामम् । निऽएरिरे ॥ १८ ॥

वेङ्कट० ते एव यज्ञाय वेदिम्, ते एव आहुतिम् हे सुधन![5], ते एवाभिषवम् चक्रिरे, ते एव बलैः जयन्ति महत् धनम्, ये त्वयि कामम् न्येरिरे समर्पयन्ति दीप्ते[6] ॥ १८ ॥

भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः । भद्रा उत प्रशस्तयः ॥१९॥

भद्रः । नः । अग्निः । आऽहुतः । भद्रा । रातिः । सुऽभग । भद्रः । अध्वरः ।
भद्राः । उत । प्रऽशस्तयः ॥ १९ ॥

वेङ्कट० कल्याणः अस्माकम् अग्निः आहुत, भद्रा रातिः हे सुभग!, भद्रः यज्ञः, भद्राः अपि च स्तुतयः ॥ १९ ॥

भद्रं मनः कृणुष्व वृत्रतूर्ये येना समत्सु सासहः ।
अव स्थिरा तनुहि भूरि शर्धतां वनेमा ते अभिष्टिभिः ॥ २० ॥

भद्रम् । मनः । कृणुष्व । वृत्रऽतूर्ये । येन । समत्ऽसु । ससहः ।
अव । स्थिरा । तनुहि । भूरि । शर्धताम् । वनेम । ते । अभिष्टिऽभिः ॥ २० ॥

---

1. श्यति मूको. 2. °रुणोदय. मूको. 3. °क्षितः वि[1]; °क्षिता अ[1]. 4. नास्ति अ[1].
5. सुतन मूको. 6. दीप्तो अ[1]

वेङ्कट० भद्रम् मनः कुरु सङ्ग्रामे, येन मनसा त्वम् अभिभवसि सङ्ग्रामेषु शत्रून्। अव तनुहि स्थिराणि धनूंषि वहूनि हिंसताम्। वयं शत्रून् हनाम[1] 'तव आभ्येषणैः'[2] ॥ २० ॥

[3]इति षष्ठाष्टके प्रथमाध्याये द्वात्रिंशो वर्गः[3] ॥

ई॒ळे गि॒रा मनु॑र्हितं॒ यं दे॒वा दू॒तम॑र॒तिं न्ये॑रि॒रे । यजि॑ष्ठं हव्य॒वाह॑नम् ॥ २१ ॥

ई॒ळे । गि॒रा । मनुः॑ऽहितम् । यम् । दे॒वाः । दू॒तम् । अ॒र॒तिम् । नि॒ऽए॒रि॒रे । यजि॑ष्ठम् । ह॒व्य॒ऽवाह॑नम् ॥ २१ ॥

वेङ्कट० स्तौमि स्तुत्या मनुना हितम्, यम् देवाः दूतम् गन्तारम् भूम्यां प्रापयन् यष्टृतमम् हविषो वोढारम् ॥ २१ ॥

ति॒ग्मज॑म्भाय॒ तरु॑णाय॒ राज॑ते॒ प्रयो॑ गायस्य॒ग्नये॑ ।
यः पिं॒शते॑ सू॒नृता॑भिः सु॒वीर्य॑म॒ग्निर्घृ॒तेभि॒राहु॑तः ॥ २२ ॥

ति॒ग्मऽज॑म्भाय । तरु॑णाय । राज॑ते । प्रयः॑ । गा॒य॒सि॒ । अ॒ग्नये॑ ।
यः । पिं॒शते॑ । सू॒नृता॑भिः । सु॒ऽवीर्य॑म् । अ॒ग्निः । घृ॒तेभिः॑ । आऽहु॑तः ॥ २२ ॥

वेङ्कट० तिग्मदंष्ट्राय यूने राजते अन्नम् वदसि अग्नये, यः आश्लेषयति[4] वाग्भिः सुवीर्यम् स्तोतारम् अग्निः घृतैश्च आहुतः[5] ॥ २२ ॥

यदी॑ घृ॒तेभि॒राहु॑तो॒ वाशी॑म॒ग्निर्भर॑त॒ उच्चाव॑ च । असु॑र इव नि॒र्णिज॑म् ॥ २३ ॥

यदि॑ । घृ॒तेभिः॑ । आऽहु॑तः । वाशी॑म् । अ॒ग्निः । भर॑ते । उत् । च॒ । अव॑ । च॒ ।
असु॑रःऽइव । निः॒ऽनिज॑म् ॥ २३ ॥

वेङ्कट० यदि अग्निः घृतैः आहुतः, ज्वालाम् अग्निः वहति उच्चैः नीचैः च। 'वाशी' (निघ १,११) इति वाङ्नाम[6]। वाशतिरुच्चरतिकर्मा,[7] इह[8] तु ज्वालामाह। यथा बलवान् कवचम् बिभर्ति, '[9]तथा निविशत[9]' इति ॥ २३ ॥

यो ह॒व्यान्यैर॑यता॒ मनु॑र्हितो दे॒व आ॒सा सु॑ग॒न्धिना॑ ।
विवा॑सते॒ वार्या॑णि स्वध्व॒रो होता॑ दे॒वो अम॑र्त्यः ॥ २४ ॥

यः । ह॒व्यानि॑ । ऐर॑यत । मनुः॑ऽहितः । दे॒वः । आ॒सा । सु॒ऽग॒न्धिना॑ ।
विवा॑सते । वार्या॑णि । सु॒ऽअ॒ध्व॒रः । होता॑ । दे॒वः । अम॑र्त्यः ॥ २४ ॥

वेङ्कट० यः हवींषि प्रेरितवान्, मनुना निहितः[10] देवः आस्येन शोभनगन्धेन, स निर्गमयति धनानि सुयज्ञः होता देवः अमर्त्यः ॥ २४ ॥

---

१. भद्र॰ मूको. २-२. तव शंसणै. वि[१]; तवा ष्वेशणे अ[१]. ३-३. नास्ति मूको. ४. आश्लेषयसि मूको. ५. आहुतयः मूको. ६. चोन्दना मूको. ७ वाशतेरुच्चरतिकर्मा वि[१], वाशतेरुच्चरतिकर्मा ··· अ[१]. ८. ह मूको. ९-९. तदानीं विशत वि[१]; तदानीं विशत मूको. १०. °हितः स मूको.

यद॑ग्ने॒ मर्त्य॒स्त्वं स्याम॒हं मि॑त्रमहो॒ अम॑र्त्यः । सह॑सः सूनवाहुत ॥ २५ ॥

यत् । अ॒ग्ने॒ । मर्त्यः॑ । त्वम् । स्याम् । अ॒हम् । मि॒त्र॒ऽम॒हः॒ । अम॑र्त्यः ।
सह॑सः । सू॒नो॒ इति॑ । आ॒ऽहु॒त॒ ॥ २५ ॥

वेङ्कट० यत् अग्ने! त्वम् मर्त्यः स्याः, अहम् च स्याम् हे मित्राणां पूजयितः! अमर्त्यः हे सहसः पुत्र! आहुत!। उत्तरत्र सम्बन्धः ॥ २५ ॥

[1]इति षष्ठाष्टके प्रथमाध्याये त्रयस्त्रिंशो वर्गः[1] ॥

न त्वा॑ रासीया॒भिश॑स्तये वसो॒ न पा॑प॒त्वाय॑ सन्त्य ।
न मे॑ स्तो॒ताम॑ती॒वा न दुर्हि॑तः॒ स्याद॑ग्ने॒ न पा॒पया॑ ॥ २६ ॥

न । त्वा॒ । रा॒सी॒य॒ । अ॒भिऽश॑स्तये । व॒सो॒ इति॑ । न । पा॒प॒ऽत्वाय॑ । स॒न्त्य॒ ।
न । मे॒ । स्तो॒ता । अ॒म॒ति॒ऽवा । न । दुःऽहि॑तः । स्यात् । अ॒ग्ने॒ । न । पा॒पया॑ ॥ २६ ॥

वेङ्कट० तदाहं त्वाम् अभिशंसनाय न रासीय तुभ्यं धनानि प्रयच्छन् वासयितः!, न च पापत्वाय भजनशील! दद्याम्। न मे स्तोता [2]अमतीवा सन्ततम्[2] मतिर्यस्य भवति तादृशः, न च दुर्हितः दुःखे निहितः स्यात् अग्ने!, न च पापया वृत्त्या युक्त इति ॥ २६ ॥

पि॒तुर्न पु॒त्रः सुभृ॑तो दुरो॒ण आ दे॒वाँ ए॑तु॒ प्र णो॑ ह॒विः ॥ २७ ॥

पि॒तुः । न । पु॒त्रः । सुऽभृ॑तः । दु॒रो॒णे । आ । दे॒वान् । ए॒तु॒ । प्र । नः॒ । ह॒विः ॥ २७ ॥

वेङ्कट० पितुः इव पुत्रः सुभृतः गृहे अस्माकम् अग्निः। तथा सति प्र गच्छतु[3] हविः अस्माकम् देवान्। इयं द्विपदेति ॥ २७ ॥

तवा॒हम॑ग्न ऊ॒तिभि॒र्नेदि॑ष्ठाभिः सचेय॒ जोष॒मा व॑सो । सदा॑ दे॒वस्य॒ मर्त्यः॑ ॥ २८ ॥

तव॑ । अ॒हम् । अ॒ग्ने॒ । ऊ॒तिऽभिः॑ । नेदि॑ष्ठाभिः । स॒चे॒य॒ । जोष॑म् । आ । व॒सो॒ इति॑ । सदा॑ । दे॒वस्य॑ । मर्त्यः॑ ॥

वेङ्कट० तव अहम् अग्ने! पालनैः[4] अन्तिकतमैः प्रीतिम् आ सचेय वासयितः! सदा देवस्य मनुष्यः ॥ २८ ॥

तव॒ क्रत्वा॑ सनेयं॒ तव॑ रा॒तिभि॒रग्ने॒ तव॒ प्रश॑स्तिभिः ।
त्वामिदा॑हुः॒ प्रम॑तिं वसो॒ ममाग्ने॒ हर्ष॑स्व॒ दात॑वे ॥ २९ ॥

तव॑ । क्रत्वा॑ । स॒नेय॒म् । तव॑ । रा॒तिऽभिः॑ । अग्ने॑ । तव॑ । प्रश॑स्तिऽभिः ।
त्वाम् । इत् । आ॒हुः॒ । प्रऽम॑तिम् । व॒सो॒ इति॑ । मम॑ । अग्ने॑ । हर्ष॑स्व । दात॑वे ॥ २९ ॥

१-१. नास्ति मूको. २-२. °व अस° वि[२]. ३. गच्छतु मूको. ४. पाल° मूको.

वेङ्कट० तव कर्मणा धनम् सनेयम्, तव[1] दानैः अग्ने!, तव स्तुतिभिः । त्वाम् एव आहुः [2]प्रकृष्टमतिम् हे वाजपते![2] मम लौकिकाः । तथा सति अग्ने! दर्शय इष्टो दानाय भवेति ॥ २९ ॥

प्र सो अ॑ग्ने॒ तवो॒तिभिः॑ सु॒वीरा॑भिस्तिरते॒ वाज॑भर्मभिः । यस्य॒ त्वं स॒ख्यमा॒वरः॑ ॥३०॥

प्र । सः । अ॒ग्ने॒ । तव॑ । ऊ॒तिऽभिः॑ । सु॒ऽवीरा॑भिः । ति॒र॒ते॒ । वाज॑भर्मऽभिः ।
यस्य॑ । त्वम् । स॒ख्यम् । आ॒ऽवरः॑ ॥ ३० ॥

वेङ्कट० प्र वर्धते[3] सः अग्ने! तव पालनैः सुपुत्रैः आहृतान्नैः[4], यस्य त्वम् सख्यम् आवृणोषि ॥ ३० ॥

[5]इति षष्ठाष्टके प्रथमाध्याये चतुस्त्रिंशो वर्गः[5] ॥

तवे॑ द्र॒प्सो नील॑वान् वा॒श ऋ॒त्विय॒ इन्धा॑नः सिष्णवा द॑दे ।
त्वं म॑ही॒नामु॒षसा॑मसि प्रि॒यः क्ष॒पो वस्तु॑षु राजसि ॥ ३१ ॥

तवे॑ । द्र॒प्सः । नील॑ऽवान् । वा॒शः । ऋ॒त्वियः॑ । इन्धा॑नः । सि॒ष्णो इति॑ । आ । द॒दे ।
त्वम् । म॒ही॒नाम् । उ॒षसा॑म् । अ॒सि॒ । प्रि॒यः । क्ष॒पः । वस्तु॑षु । रा॒ज॒सि॒ ॥ ३१ ॥

वेङ्कट० तव [6]रश्मिः नीलवर्णः शब्दनशीलः ऋतौ भवः[6] शुष्केष्वरण्येषु ग्रीष्मे जातः दीप्यमानः हे [7]शुद्ध! काष्ठानि आ दत्ते[7] । यद्वा एवंविधस्तव द्रप्सः यजमानैरादीयते यज्ञार्थम् । सः त्वम् महतीनाम् उषसाम् असि प्रियः, रात्रिषु अहस्सु च राजसि ॥ ३१ ॥

तमाग॑न्म॒ सोभ॑रयः स॒हस्र॑मुष्कं स्वभि॒ष्टिमव॑से । स॒म्राजं॒ त्रास॑दस्यवम् ॥ ३२ ॥

तम् । आ । अ॒ग॒न्म॒ । सोभ॑रयः । स॒हस्र॑ऽमुष्कम् । सु॒ऽअ॒भि॒ष्टिम् । अव॑से ।
स॒म्ऽराज॑म् । त्रास॑दस्यवम् ॥ ३२ ॥

वेङ्कट० तम् अग्निम् आभिमुख्येन गतवन्तो वयम् सोभरयः [8]बहुबीजम् स्वभ्येषणम्[8] रक्षणाय सम्यग् दीप्यमानम्[9] [10]त्रसदस्योः राज्ञो यज्ञे स्थितम्[10] ॥ ३२ ॥

यस्य॑ ते अग्ने अ॒न्ये अ॒ग्नय॑ उप॒क्षितो॑ व॒या इ॑व ।
विप्रो॒ न द्यु॒म्ना नि यु॑वे॒ जना॑नां॒ तव॑ क्ष॒त्राणि॑ व॒र्धय॑न् ॥ ३३ ॥

यस्य॑ । ते॒ । अग्ने॒ । अ॒न्ये । अ॒ग्नयः॑ । उ॒प॒ऽक्षितः॑ । व॒याःऽइ॑व ।
विप्रः॑ । न । द्यु॒म्ना । नि । यु॒वे॒ । जना॑नाम् । तव॑ । क्ष॒त्राणि॑ । व॒र्धय॑न् ॥ ३३ ॥

वेङ्कट० यस्य ते अग्ने! अन्ये[11] अग्नयः उपक्षयन्तो भवन्ति शाखाः इव वृक्षस्य । विप्रस्य इव अतिथेः सर्वैः

---

१. तव वि॰; तप अ॰. २-२. °मति वाजपते मूको. ३. वर्धसे मूको. ४. °न्नैः मूको. ५-५. नास्ति मूको. ६. रश्मिरेव पशुशब्दनशील मतौ भव मूको. ७-७ शुद्धकाष्ठ···दत्ते मूको. ८-८. °हुबीजस्य क्षेप॰ वि॰; °हुबीजस्य क्षेप॰ अ॰. ९. °दीप्यनं मूको. १०-१०. त्रसदस्योराजयज्ञेस्थितम: मूको. ११. अन्यः वि॰; अन्ये. अ॰.

एव महानि हविर्भिर्वर्धयन्ति । मिश्रयन्ति[1] अन्नान्यात्मनि पुत्रपौत्राणाम् जनानाम् पोषणाय । यद्वा सपूर्णा जनानाम् अन्नानीति ॥ ३३ ॥

यमादित्यासो अद्रुहः पारं नयथ मर्त्यम् । मघोनां विश्वेषां सुदानवः ॥ ३४ ॥

यम् । आदित्यासः । अद्रुहः । पारम् । नयथ । मर्त्यम् । मघोनाम् । विश्वेषाम् । सुऽदानवः ॥ ३४ ॥

वेङ्कट० हे आदित्यदेवते । यम् हे आदित्याः! अद्रोग्धारः! पारम् नयथ मनुष्यम्, धनवतामाढ्यानाम् सर्वेषामेव, सर्वेभ्योऽप्याढ्यं[2] कुरुथ हे सुदानाः! । उत्तरत्र सम्बन्धः ॥ ३४ ॥

यूयं राजानः कं चिच्चर्षणीसहः क्षयन्तं मानुषाँ अनु ।
वयं ते वो वरुण मित्रार्यमन्त्स्यामेदृतस्य रथ्यः ॥ ३५ ॥

यूयम् । राजानः । कम् । चित् । चर्षणिऽसहः । क्षयन्तम् । मानुषान् । अनु ।
वयम् । ते । वः । वरुण । मित्र । अर्यमन् । स्याम । इत् । ऋतस्य । रथ्यः ॥ ३५ ॥

वेङ्कट० यूयम् हे राजानः! तम् कम् चित् एव 'पारं नयथ'[3] भाग्यवन्तम् हे[3] चर्षणीनाम् अभिभवितारः! निवसन्तम् मनुष्यान् प्रति । तत्र युष्माकम् ते वयम् स्याम यद् यूयम् रक्षथ । किञ्च हे वरुण! मित्र! [4]अर्यमन्! स्याम[5] एव यज्ञस्य नेतारः ॥ ३५ ॥

अदान्मे पौरुकुत्स्यः पञ्चाशतं त्रसदस्युर्वधूनाम् । मंहिष्ठो अर्यः सत्पतिः ॥ ३६ ॥

अदात् । मे । पौरुऽकुत्स्यः । पञ्चाशतम् । त्रसदस्युः । वधूनाम् । मंहिष्ठः । अर्यः । सत्ऽपतिः ॥ ३६ ॥

वेङ्कट० शौनकः—'आग्नेये[6] स्तुतौ राज्ञोस्त्रसदस्योर् अदादिति ।
पञ्चाशतं वधूनां च गवां तिस्रश्च सप्ततीः[7] ॥
अश्वोष्ट्राणां तथैवारौ[8] वासांसि विविधानि च ।
रत्नानि चर्षभं[9] श्यावं तासामग्रेसरं पतिम्[10] ॥
[11]प्रतिगृह्य ऋषिर्दारान्[12] इन्द्रायैतच्छशंस च ।
वयं सूक्तेन शक्रं च प्रीतस्तेन शचीपतिः ॥
ऋषे! वरं वृणीष्वेति प्रहृष्टमृषिरब्रवीत् ।
काकुत्स्थकन्याः पञ्चाशद् युगपद् रमये[11] प्रभो! ॥

1. निश्र° मूको. 2. °भ्यो ऽप्याढं मूको. 3-3. भाग्यवया मूको. 4. यो मूको. 5-5. °मन्…स्या° मूको. 6. ऋ ८,१९,३६. 7. °निम् मूको. 8. °वासै मूको. 9. ऋ° बृदे. 10. पति मूको. 11-11. °गृह्य° – मूको.; कृत्वा दारानृषिर्गोत्वात् बृदे. 12. अथ मूको.

कामतो बहुरूपत्वं यौवनं चाक्षयां रतिम् ।
शङ्खनिधिम् पद्मनिधिम् मद्गृहेष्वनपायिनम् ॥
प्रासादान् विश्वकर्मासौ[1] सौवर्णांस्त्वत्प्रसादतः ।
कुर्वीत पुष्पवाटीश्च[2] पृथक्तासां सुरद्रुमैः[3] ॥
मा भूत् सपत्नीस्पर्धाऽऽसां सर्वमस्त्विति चाब्रवीत् ॥' (बृदे ६,५१-५७)

अदात् मह्यम् पौरुकुत्स्यः वधूनाम् पञ्चाशतम् त्रसदस्युः दातृतमः अर्यः सतां पतिः ॥ ३६ ॥

उत मे प्रयियोर्वयियोः सुवास्त्वा अधि तुग्वनि ।
तिसृणां सप्ततीनां श्यावः प्रणेता भुवद् वसुर्दियानां पतिः ॥ ३७ ॥

उत । मे । प्रयियोः । वयियोः । सुऽवास्त्वाः । अधि । तुग्वनि ।
तिसृणाम् । सप्ततीनाम् । श्यावः । प्रऽनेता । भुवत् । वसुः । दियानाम् । पतिः ॥ ३७ ॥

वेङ्कट० कूलं[4] या प्रयौति सा 'प्रयियुः कूलंकषा[5]' । 'कम्पन्ती कूलं या अवयौति सा वयियुः[5]' । उपसर्गस्य अकारलोपश्छन्दसः । 'पार्श्वेन वसाहोमं प्रयौति' (तै ६,३,११,१) इति ब्राह्मणम् । अत्र यास्कः (४,१५) —'सुवास्तुर्नदी तुग्व तीर्थं भवति तूर्णमेतदायन्ति' । तिसृणाम् सप्ततीनाम् गवां श्यामवर्णः[7] ऋषभः प्रणेता अभवत् यासमिता देयानां गवाम् पतिः इति ॥ ३७ ॥

'इति षष्ठाष्टके प्रथमाध्याये पञ्चत्रिंशो वर्गः[8]' ॥

[२०]

'सोभरिर्ऋषिः । मरुतो देवता । प्रथमाद्ययुजां ककुप् छन्दः, द्वितीयादियुजां सतोबृहती[8]' ।

आ गन्ता मा रिषण्यत प्रस्थावानो माप स्थाता समन्यवः । स्थिरा चिन्नमयिष्णवः ॥ १ ॥

आ । गन्त । मा । रिषण्यत । प्रऽस्थावानः । मा । अप । स्थात । सुऽमन्यवः । स्थिरा । चित् । नमयिष्णवः ॥

वेङ्कट० आ गच्छत, मा न्यूनीकुरुत[9] हे प्रस्थानशीलाः ! । मा गच्छत हे [10]समानमनसः ! समानस्तुतिका ! वा[10] कर्मणा स्थावराणां नमयितारः ! ॥ १ ॥

वीळुपविभिर्मरुत ऋभुक्षण आ रुद्रासः सुदीतिभिः ।
इषा नो अद्या गता पुरुस्पृहो यज्ञमा सोभरीयवः ॥ २ ॥

---

१. °र्मो च मूको. २. °टीश्च वि°; °वाटिश्च ख°. ३. °द्रुमान् पि°, द्रुमात् ख°. ४. कूलं मूको. ५-५. प्रिषवुलकषा मूको. ६-६. °षन्ति युयुः मूको ७. श्वर्णं मूको. ८-८. नास्ति मूको. ९. °यमूनिकु° मूको. १०-१०. °मनस स्तुति का वा मूको.

वीळुपविऽभिः । मरुतः । ऋभुक्षणः । आ । रुद्रासः । सुदीतिऽभिः ।
इषा । नः । अद्य । आ । गत । पुरुऽस्पृहः । यज्ञम् । आ । सोभरीऽयवः ॥ २ ॥

वेङ्कट० दृढपविभिः हे मरुतः ! महान्तः ! अद्य आ गच्छत रुद्रपुत्राः ! सुदीप्तिभिः रथैः अन्नेन सह
अस्माकं हे बहुभिः स्पृहणीयाः ! यज्ञम् सोभरिं कामयमानाः ॥ २ ॥

विद्मा हि रुद्रियाणां शुष्ममुग्रं मरुतां शिमीवताम् । विष्णोरेषस्य मीळ्हुषाम् ॥ ३ ॥
विद्म । हि । रुद्रियाणाम् । शुष्मम् । उग्रम् । मरुताम् । शिमीऽवताम् । विष्णोः । एषस्य । मीळ्हुषाम् ॥ ३ ॥

वेङ्कट० जानीमः हि रुद्रपुत्राणाम् बलम् उद्गूर्णम् मरुताम् कर्मवताम् विष्णोः एषणीयस्य सेक्तॄणाम्
स्पावयतां यज्ञम् ॥ ३ ॥

वि द्वीपानि पापतन् तिष्ठद् दुच्छुनोभे युजन्त रोदसी ।
प्र धन्वान्यैरत शुभ्रखादयो यदेजथ स्वभानवः ॥ ४ ॥
वि । द्वीपानि । पापतन् । तिष्ठत् । दुच्छुना । उभे इति । युजन्त । रोदसी इति ।
प्र । धन्वानि । ऐरत । शुभ्रऽखादयः । यत् । एजथ । स्वऽभानवः ॥ ४ ॥

वेङ्कट० वि[1] पतन्ति द्वीपान्तराणि[2], 'तिष्ठन्ति च दुःखेन युक्तानि पतत्सु[3] च मरुत्सु ।
दिवि च पृथिव्यां च भवन्ति' द्वीपान्तरेभ्यः पतन्तश्च द्यावापृथिव्यौ उभे युञ्जन्ति । तदानीम् प्र ईरयथ धन्वानि
मरुतः । प्र धन्वानि । हे शुभ्रखादयः ! यदा[4] कम्पध्वे स्वदीप्तयः ',
प्रति निरुदकान् देशान् प्रति गच्छथेति ॥ ४ ॥

अच्युता चिद् वो अज्मन्ना नानदति पर्वतासो वनस्पतिः । भूमिर्यामेषु रेजते ॥ ५ ॥
अच्युता । चित् । वः । अज्मन् । आ । नानदति । पर्वतासः । वनस्पतिः । भूमिः । यामेषु । रेजते ॥ ५ ॥

वेङ्कट० अच्युतान्यपि दृढान्यपि युष्माकं गमने कम्पमानानि शब्दं कुर्वन्ति । शिलोच्चया वनस्पतिः
चेत्यच्युतानि निर्दिशति । भूमिः च गमनेषु कम्पते ॥ ५ ॥

[5]इति षष्ठाष्टके प्रथमाध्याये षट्त्रिंशो वर्गः[6] ॥

अमाय वो मरुतो यातवे द्यौर्जिहीत उत्तरा बृहत् ।
यत्रा नरो देदिशते तनूष्वा त्वक्षांसि बाह्वोजसः ॥ ६ ॥
अमाय । वः । मरुतः । यातवे । द्यौः । जिहीते । उत्ऽतरा । बृहत् ।
यत्र । नरः । देदिशते । तनूषु । आ । त्वक्षांसि । बाहुऽओजसः ॥ ६ ॥

---

1. नि मूको. 2. द्वीपान्यस्त° अ[1]. 3-3. 'नि प° मूको. 4. भवति मूको. 5. यदा मूको. 6-6. नास्ति मूको.

वेङ्कट० बलाय युष्माकम् मरुत ! 'हिंसित्रे द्यौः गच्छति'[1] उद्गततरा बृहती । भवतां बलं 'इन्द्रवा स्वस्मात्'[2] स्थानात् चलतीति शेषः । परोक्ष[3]—यदा नेतारो मरुत आदिशन्ति, आ दिशन्ति आत्मनोऽङ्गेषु[4] बलानि बाहुबलाः तदानीमिति ॥ ६ ॥

स्वधामनु श्रियं नरो महि त्वेषा अमवन्तो वृषप्सवः । वहन्ते अह्रुतप्सवः ॥७॥

स्वधाम् । अनु । श्रियम् । नरः । महि । त्वेषाः । अमऽवन्तः । वृषऽप्सवः । वहन्ते । अह्रुतऽप्सवः ॥ ७ ॥

वेङ्कट० बलम् श्रियम् चानुभूय दातः नेतारः महान्तः दीप्ताः बलवन्तः 'वर्षितृरूपाः गच्छन्ति'[5] अनन्तरूपाः ॥ ७ ॥

गोभिर्वाणो अज्यते सोभरीणां रथे कोशे हिरण्यये ।
गोबन्धवः सुजातास इषे भुजे महान्तो नः स्परसे नु ॥ ८ ॥

गोभिः । वाणः । अज्यते । सोभरीणाम् । रथे । कोशे । हिरण्यये ।
गोऽबन्धवः । सुऽजातासः । इषे । भुजे । महान्तः । नः । स्परसे । नु ॥ ८ ॥

वेङ्कट० सोभरीणाम्[6] स्तुतिभिः मरुताम् वाणः 'वाद्यविशेषः अज्यते'[7] रथे हिरण्मये कोशे स्थितानाम् । गोमातरः शोभनजननाः अस्माकं इष्ये अन्नाय च महान्तः अस्माकं पारणाय तारणाय च क्षिप्रं सन्त्विति ॥ ८ ॥

प्रति वो वृषदञ्जयो वृष्णे शर्धाय मारुताय भरध्वम् । हव्या वृषप्रयाव्णे ॥ ९ ॥

प्रति । वः । वृषत्ऽअञ्जयः । वृष्णे । शर्धाय । मारुताय । भरध्वम् । हव्या । वृषऽप्रयाव्णे ॥ ९ ॥

वेङ्कट० प्रति भरध्वम् यूयं हे वृष्यमाणहविष्काः ! अग्निम् ये अञ्जयन्ति हविर्भिस्ते । "अञ्जन्ति य दक्षिणतो[8] हविर्भिः" (ऋ १, ९५,९) इत्युक्तम् । वर्षित्रे मारुताय शर्धाय हव्यानि वृषप्रयाव्णे[9] ॥ ९ ॥

वृषणश्वेन मरुतो वृषप्सुना रथेन वृषनाभिना ।
आ श्येनासो न पक्षिणो वृथा नरो हव्या नो वीतये गत ॥ १० ॥

वृषणऽश्वेन । मरुतः । वृषऽप्सुना । रथेन । वृषऽनाभिना ।
आ । श्येनासः । न । पक्षिणः । वृथा । नरः । हव्या । नः । वीतये । गत ॥ १० ॥

१-१. °सित्रे द्रुग्धाति वि°, °मिनो गच्छ° अ°. २-२. इन्द्रवास्मात् मूको. ३. पारोक्षो वि°, पारोक्ष्ये अ°. ४. आत्मानमङ्गेषु मूको. ५-५ °भिंतन् उपाग° अ°. ६. सौभरणीया मूको. ७-७. वाद्यविशेषोऽज्येये मूको. ८-८. अञ्जतो यद° वि°, अञ्जता ये द° अ°. ९. °अणाय मूको.

वेङ्कट० यस्य वर्षितारः[1] अश्वाः स वृषणश्वो रथस्तेन हे मरुतः! वर्षितृरूपेण वृषनाभिना आ गच्छत, श्येनाः इव पक्षिणः अनायासेन अस्माकं[2] हव्यानि [3]नरः! पानाय[3] ॥ १० ॥

[4]इति पञ्चाष्टके प्रथमाध्याये सप्तत्रिंशो वर्गः[4] ॥

समानमञ्ज्येषां वि भ्राजन्ते रुक्मासो अधि बाहुषु । दविद्युतत्यृष्टयः ॥ ११ ॥

समानम् । अञ्जि । एषाम् । वि । भ्राजन्ते । रुक्मासः । अधि । बाहुषु । दविद्युतति । ऋष्टयः ॥ ११ ॥

वेङ्कट० समानः अलङ्कारः एषाम् । बाह्वोरुपरि केयूरादयः वि भ्राजन्ते । दीप्यन्ते चैषाम् आयुधानि ऋष्ट्याख्यानि[5] ॥ ११ ॥

ते उग्रासो वृषण उग्रबाहवो नकिष्टनूषु येतिरे ।
स्थिरा धन्वान्यायुधा रथेषु वोऽनीकेष्वधि श्रियः ॥ १२ ॥

ते । उग्रासः । वृषणः । उग्रऽबाहवः । नकिः । तनूषु । येतिरे ।
स्थिरा । धन्वानि । आयुधा । रथेषु । वः । अनीकेषु । अधि । श्रियः ॥ १२ ॥

वेङ्कट० ते उद्गूर्णाः वर्षितारः उद्गूर्णबाहवः न तनूषु सेनासु[6] अल्पबलासु प्रयतन्ते । स्थिराणि[7] धनूंषि आयुधानि च युष्माकम् रथेषु सङ्ग्रामेषु[8] च भवताम्, श्रियः च निहिता इति ॥ १२ ॥

येषामर्णो न सप्रथो नाम त्वेषं शश्वतामेकमिद् भुजे । वयो न पित्र्यं सहः ॥ १३ ॥

येषाम् । अर्णः । न । सऽप्रथः । नाम । त्वेषम् । शश्वताम् । एकम् । इत् । भुजे । वयः । न । पित्र्यम् । सहः ॥

वेङ्कट० येषाम् उदकमिव सर्वतः पृथुतमम् नाम शरीरं दीप्तम् बहूनां यजमानानाम् एकम् एव भोगाय[9] भवति अन्नमिव पित्र्यम् पुत्रस्य, बलं च ॥ १३ ॥

तान् वन्दस्व मरुतस्ताँ उप स्तुहि तेषां हि धुनीनाम् ।
अराणां न चरमस्तदेषां दाना मह्ना तदेषाम् ॥ १४ ॥

तान् । वन्दस्व । मरुतः । तान् । उप । स्तुहि । तेषाम् । हि । धुनीनाम् ।
अराणाम् । न । चरमः । तत् । एषाम् । दाना । मह्ना । तत् । एषाम् ॥ १४ ॥

वेङ्कट० तान् प्रणम मरुतः, तान् च स्तुहि, [10]तेषाम् कम्पयितॄणाम्[10] पुनःपुनरागच्छताम् न कश्चन[11] चरमः[12] भवति । तत् च उपस्तुहि एषाम्[13] महता दानेन[14] सह ॥ १४ ॥

१-१. वर्षितारो यस्य अ[1]. २. वास्मा° मूको. ३-३. °नरपा° मूको. ४-४. नास्ति मूको. ५. ऋष्याख्या° मूको. ६. स्वेना° मूको. ७. स्थिराश्नि मूको. ८. सङ्ग्रेषु वि[1]. ९. भोगो अ[1]; भोगा वि[1]. १०-१०. °मेक पितॄणः मूको. ११. कथं चन मूको. १२. परमः मूको. १३. एषा मूको. १४. दाने मूको.

सुभगः स व ऊतिष्वास पूर्वासु मरुतो व्युष्टिषु । यो वा नूनमुतासति ॥ १५ ॥

सुऽभगः । सः । वः । ऊतिषु । आस । पूर्वासु । मरुतः । विऽउष्टिषु । यः । वा । नूनम् । उत । असति ॥

वेङ्कट० सुधनः स युष्माकं रक्षणेषु 'अभूत् मरुतः !'[1] पूर्वेषु व्युच्छनेषु यः पुरा[2] आदरः[3], यः वा इदानीम् आद्यो भवति ॥ १५ ॥

'इति पञ्चाष्टके प्रथमाध्याये अष्टात्रिंशो वर्गः'[3] ॥

यस्य वा यूयं प्रति वाजिनो नर आ हव्या वीतये गथ ।

अभि ष द्युम्नैरुत वाजसातिभिः सुम्ना वो धूतयो नशत् ॥ १६ ॥

यस्य । वा । यूयम् । प्रति । वाजिनः । नरः । आ । हव्या । वीतये । गथ ।

अभि । सः । द्युम्नैः । उत । वाजसातिऽभिः । सुम्ना । वः । धूतयः । नशत् ॥ १६ ॥

वेङ्कट० यस्य वा यूयम् हविष्मतो[4] हे नेतारः ! प्रति आ गच्छथ[5] हव्यानि वीतये, अभि[6] व्याप्नोति सः यशोभिः अपि च अन्नभजनैः सह युष्माकं धनानि हे कम्पयितारः ! ॥ १६ ॥

यथा रुद्रस्य सूनवो दिवो वशन्त्यसुरस्य वेधसः । युवानस्तथेदसत् ॥ १७ ॥

यथा । रुद्रस्य । सूनवः । दिवः । वशन्ति । असुरस्य । वेधसः । युवानः । तथा । इत् । असत् ॥ १७ ॥

वेङ्कट० दीप्तस्य बलवतः रुद्रस्य विधातुः पुत्राः यथा कामयन्ते, युवानः ! तथा एव तद्भवति ॥ १७ ॥

ये चार्हन्ति मरुतः सुदानवः स्मन्मीळ्हुषश्चरन्ति ये ।

अतश्चिदा न उप वस्यसा हृदा युवान आ ववृध्वम् ॥ १८ ॥

ये । च । अर्हन्ति । मरुतः । सुऽदानवः । स्मत् । मीळ्हुषः । चरन्ति । ये ।

अतः । चित् । आ । नः । उप । वस्यसा । हृदा । युवानः । आ । ववृध्वम् ॥ १८ ॥

वेङ्कट० ये च स्तोत्रिमम्[7] अर्हन्ति मरुतः शोभनदानाः ये च कल्याणं सेक्तारः चरन्ति । अथ प्रत्यक्षः — ते यूयम् अस्मादन्तरिक्षाद् अस्मान्[7] उप आ वृणीध्वम् वसीयसा हृदयेन सुमत्या सह[8] हे युवानः ! ॥ १८ ॥

यूनं ऊ षु नविष्ठया वृष्णः पावकाँ अभि सोभरे गिरा । गाय गा इव चर्कृषत् ॥ १९ ॥

यूनः । ऊँ इति । सु । नविष्ठया । वृष्णः । पावकान् । अभि । सोभरे । गिरा । गाय । गाःऽइव । चर्कृषत् ॥ १९ ॥

---

१ १. °भूत म° वि[२], °भूतम° अ[१]. २. परा मूको. ३-३ नास्ति मूको ४. °ष्मः मूको. ५. चोदयाथ मूको ६. अिकम् मूको. ७ °स्माद् मूको ८ सहते यूय मूको

वेङ्कट० यून नवतरया स्तुत्या वर्षितॄणाम् पावकान् हे सोभरे[1] सुष्ठु अभि गाय, यथा बलीवर्दान् गमयितु कीनाश 'कृषिर्धी कृषन्[1]' गायति ॥ १९ ॥

साहा ये सन्ति मुष्टिहेव हव्यो विश्वासु पृत्सु होतृषु ।
वृष्णश्चन्द्रान्न सुश्रवस्तमान् गिरा वन्दस्व मरुतो अह ॥ २० ॥

सहा । ये । सन्ति । मुष्टिहाऽइव । हव्य । विश्वासु । पृत्ऽसु । होतृषु ।
वृष्ण । चन्द्रान् । न । सुश्रवऽतमान् । गिरा । वन्दस्व । मरुत । अह ॥ २० ॥

वेङ्कट० अभिभवितार ये भवन्ति, वीर[2] ह्वातव्य मुष्टिहा इव योद्धा[3], विश्वेषु सङ्ग्रामेषु यजमानेषु च यज्ञेषु सङ्ग्रामेषु च प्रादुर्भवन्ति, तान् पुस इव ह्लादकान् अतिशयेन कीर्तिमत[4] स्तुत्या स्तुहि[5] मरुत एवम्[1] ॥ २० ॥

[6]इति षष्ठाष्टके प्रथमाध्याये एकोनचत्वारिंशो वर्ग[6] ॥

गावश्चिद् घा समन्यवः सजात्येन मरुतः सबन्धवः । रिहते ककुभो मिथः ॥२१॥

गाव । चित् । घ । सऽमन्यव । सऽजात्येन । मरुत । सऽबन्धव । रिहते । ककुभ । मिथ ॥२१॥

वेङ्कट० हे समानमनस्का ! मरुत ! यूय साजात्येन समानेन जननेन रुद्राद् येऽमी[7] सर्वे जातास्तत समानबन्धना इतरेतरसङ्गता गाव इव । अवशिष्ट परोक्ष । सङ्घीभूता दिशो लिहन्ति परस्परम् यथा वत्सम्[7] गाव इति ॥ २१ ॥

मर्तश्चिद् वो नृतवो रुक्मवक्षस उप भ्रातृत्वमायति ।
अधि नो गात मरुतः सदा हि व आपित्वमस्ति निध्रुवि ॥ २२ ॥

मर्त । चित् । व । नृतव । रुक्मऽवक्षस । उप । भ्रातृऽत्वम् । आ । अयति ।
अधि । न । गात । मरुत । सदा । हि । व । आपिऽत्वम् । अस्ति । निऽध्रुवि ॥ २२ ॥

वेङ्कट० मर्त चित् युष्माक हे नर्तनशीला[8] रुक्मवक्षस ! उप आ अयात भ्रातृत्वम् [9]"सोभरि उपा गच्छति[10]" । तथा सति अस्मान् अधि[11] गच्छत मरुत ! । सदा हि युष्मास्वम् ज्ञातयम् अस्ति [12]नितरा ध्रुवम्[12] ॥ २२ ॥

मरुतो मारुतस्य न आ भेषजस्य वहता सुदानवः । यूयं सखायः सप्तयः ॥२३॥

मरुत । मारुतस्य । न । आ । भेषजस्य । वहत । सुऽदानव । यूयम् । सखाय । सप्तय ॥२३॥

वेङ्कट० हे मरुत ! मरुद्भेषजम् [13]आ वहत[13] अस्मान् सुदाना[1] यूयम् हे सखाय ! सर्पणशीला[1] ॥ २३ ॥

१-१. नास्ति अ[1]. २ °रे मूको. ३. योद्धा मूको. ४ कीर्तिमत मूको ५ स्तुति मूको. ६. नास्ति वि[2]. ७ ७. नास्ति मूको. ८. यमी मूको ९ वमम मूको. १० १० सोभरिरूपा गच्छन्ति मूको ११. उपाधि अ[1] १२ १२ नितराङ्गम् मूको १३. अहपन मूको.

याभिः सिन्धुमवथ याभिस्तूर्वथ याभिर्दशस्यथा क्रिविम् ।
मयो नो भूतोतिभिर्मयोभुवः शिवाभिरसचद्विषः ॥ २४ ॥

याभिः । सिन्धुम् । अवथ । याभिः । तूर्वथ । याभिः । दशस्यथ । क्रिविम् ।
मर्य । नः । भूत । ऊतिऽभिः । मयःऽभुवः । शिवाभिः । असचऽद्विषः ॥ २४ ॥

वेङ्कट० याभि सिन्धुम् [1]अवथ, धर्षथ याभि च शत्रून्[1], याभि च प्रयच्छथ कूप तृष्णाय गोतमाय, ताभि ऊतिभि[2] अस्माक सुख भावयत[3] हे सुखस्य भावयितार[4] शिवाभि हे असमवेतशत्रव[4] ॥ २४ ॥

यत् सिन्धौ यदसिक्न्यां यत् समुद्रेषु मरुतः सुबर्हिषः । यत् पर्वतेषु भेषजम् ॥२५॥

यत् । सिन्धौ । यत् । असिक्न्याम् । यत् । समुद्रेषु । मरुतः । सुऽबर्हिषः । यत् । पर्वतेषु । भेषजम् ॥

वेङ्कट० यत् सिन्धुनाम्नि, [5]यत् च असिक्न्याम् नद्याम्[5], यत् च समुद्रेषु हे मरुत ! [6]सुयज्ञा[6], यत् च[7] मधषु भेषजम् । उत्तरत्र सम्बन्ध ॥ २५ ॥

विश्वं पश्यन्तो बिभृथा तनूष्वा तेना नो अधि वोचत ।
क्षमा रपो मरुत आतुरस्य न इष्कर्ता विह्रुतं पुनः ॥ २६ ॥

विश्वम् । पश्यन्तः । बिभृथ । तनूषु । आ । तेन । नः । अधि । वोचत ।
क्षमा । रपः । मरुतः । आतुरस्य । नः । इष्कर्त । विऽह्रुतम् । पुनरिति ॥ २६ ॥

वेङ्कट० तत् विश्वम् भेषजम् अस्मान् पश्यन्त अस्माकमङ्गेषु धारयथ । तेन अस्मान् अधि वोचत । पृथिव्याम् हे मरुत ! गच्छतु[7] अस्माकम् आतुरस्य [8]पुनादि रप व्याधि[8] । निष्कुरुत[8] विह्रुतम् पुन[9] च स समेत्विति[10] ॥ २६ ॥

[11]इति षष्ठाष्टक प्रथमाध्याये चत्वारिंशो वर्ग[11] ॥

षष्ठाष्टकाद्यमध्याय व्याचकारेति माधवः ।
कणयस्य सुख जात सद्गूढार्थान् प्रदर्शयन् ॥

इति वेङ्कटमाधवाचार्यविरचिते ऋक्संहिताव्याख्याने षष्ठाष्टके प्रथमोऽध्याय ॥

—*—

इति ऋग्वेदे सभाष्ये षष्ठाष्टके प्रथमोऽध्याय ॥

१-१ अवथयन्तो याभिश्च शत्रु वि[1] अवधर्षयन्तो याभिश्च शत्रु अ[1] २ कृति॰ मूको ३ यत मूको ४-४ वधासि न॰ मूको. ५-५ नास्ति मूको ६ गच्छतु मूको ७-७ ॰दैवयो नार्धि मूको ८ निष्कुरुत वि[1], निष्कुरुत अ[1] ९ पुर मूको १० समत्वेति मूको. ११-११ नास्ति मूको

अथ द्वितीयोऽध्यायः ।

पेङ्गु० 'वयमु त्वामपूर्व्ये(र्व्य इ')ति व्याचिख्यासति माधवः ।
उष्णिगादिषु वक्तव्यम् आदावेव प्रदर्शयन् ॥ १ ॥

पादे द्वितीये [1]ककुभोऽपि वृद्धिं
पुरोऽपि[1] वृद्धिं प्रवदन्ति युक्ताः ।
छन्दस्सु तेनोष्णिगभूद् द्वितीया
तस्याष्टकौ[2] द्वादशकाश्च पादाः[3] ॥ २ ॥

[4]पादो यदा द्वादशकः[4] [5]पुरस्तात्
तदा भवेत् सा पुरउष्णिगाख्या[5] ।
'अप्स्व१न्तर्'[6] एतां प्रवदन्ति तां च
ककुप् 'प्र सो अग्ने'[7] इतीरितामैः[8] ॥ ३ ॥

पादो यदैकादशक पुरस्तात्
मध्ये भवेज्जागतपाद एकः ।
[9]सा स्यात् ककुन्न्यङ्कुशिरास्तृतीयः[9]
पादो भवेत् 'नूनमथे(र्थ'[10] इ)ति तस्याः ॥ ४ ॥

पादौ यदैकादशिनौ पुरस्तात्
'प्र या घोषे भृगवाणे न शोभे'[11] ।
[12]षट्को भवेत्तस्य शिरस्तृतीयो[12]
वदन्ति विप्रास्तनुशीर्षनाम्नीम् ॥ ५ ॥

'हरी यस्य सुयुजा विव्रता वे.'[13]
यस्या मध्ये [14]षट्कपादो निविष्ट.[14] ।
पिपीलिकापूर्वकमध्यशब्दं
साष्टकामस्या. प्रवदन्ति संज्ञाम् ॥ ६ ॥

---

1. ककुभोऽपि वृद्धिः पुरापि वि[1]; कुकुभोऽपि वृद्धिःपुरापि अ[1]. 2. °ष्टकौ वि[1] अ[1]. 3. पादौ वि[1] अ[1]. 4-4. पादे यदा द्वादशकं वि[1] अ[1]. 5-5. °स्तात् स उष्णिग्° वि[1] अ[1]. 6. ऋ १,२३,१९. 7. ऋ ८,११,१०. 8. °रितामैः वि[1]; °रितार्थौ अ[1]. 9-9. तस्याः ककुन्न्यङ्कुशिरास्तु° वि[1] अ[1]. 10. ऋ ८,४६,१४. 11. ऋ १,१२०,५. 12-12 षट्कोऽभवत्तस्य शिरसि न चा वि[1] अ[1]. 13. ऋ १०,१०५,२. 14-14. °ष्टोऽपि

त्रयोऽष्टकाः पञ्चक आद्य एकः
सा 'पितुं नु स्तोषम्'[1] अनुष्टुब्गर्भा ।
'नदं व ओदतीनाम्'[2] इत्युष्णिगियं चतुर्भिः
पदैरपेताक्षरसप्तसङ्ख्यैः[3] ॥ ७ ॥

अत्र शाट्यायनकम्—'सा ककुभब्रवीद् बलिष्ठा वाऽहमस्मीति । पराक्रममाणा सदु मेऽक्षराणि समौहीत् पूर्वा मा प्रयुञ्जाम् इति । अथोष्णिगब्रवीत् अथ वै मां पूर्वामाचक्षन्ता इति । तथेति । तस्मिन् समपादयेताम् । पूर्वप्रयोगमन्यावृणीत पूर्वाख्यानमन्या । तस्मादिमे एवं प्रयुञ्जते । तस्मादुष्णिक्ककुभावित्याख्यायते' (तु. जैब्रा ३,२९५) ।

चतुष्पदाऽनुष्टुबथो[4] यदा स्युः
पदानि पञ्चापि च पञ्चकानि ।
महापदापङ्क्तिं प्रवदन्ति
[5]'पदं च पड्कं 'रोचत उपाके'[ ][5] ॥ ८ ॥

कृतिराद्यौ जागतावष्टकोऽन्ते
'मा कस्मै धातमभ्यमित्रिणे नः'[6] ।
स्यादष्टको मध्यमश्चेत्[7] तदा स्याद्
'पर्यू षु प्र(प्र[7] इ)ति पिपीलिकमध्या ॥ ९ ॥

मध्ये भवेज्जागतपाद एकः
पूर्वोत्तरौ नवकौ चापि पादौ ।
सा काविराण्नाम भवेदनुष्टुप्
सैषा 'ता विद्वांसा हवामहे वाम्'[8] ॥ १० ॥

नवकैराजत्रयोदशकैः युता[10]
तां नष्टरूपां कवयो वदन्ति ।
'कि पृच्छामि पाक्या३ न देवान्'[11]
पादैर्विराट् स्याद् दशकैस्त्रिभिश्च ॥ ११ ॥

इयं 'पिबा सोमम्'[12] इतीरितार्थैः
यदा स्युरेकादशकाश्चयोऽपि ।

---

१. ऋ १,१८७,१. २. ऋ ८,६९,२. ३. पादै° वि°. ४. °ष्पदानुष्णिगथो वि°; °ष्पादानुष्णिगिति अ°. ५-५. पड्कं पदयो रोचत उपाके अ°; पदं च रोचत उपाके पदम् वेंकट. † ऋ ४,१०,५. ६. ऋ १,१२०,८. ७-७. °ध्यमश्चेत् वि° अ°. ८. ऋ ९,११०,१. ९. ऋ १,१२०,३. १०. नास्ति वि° अ°. ११. ऋ १,१२०,४. १२. ऋ ८,५५,३.

'अग्निं नरो दीधितिभिररण्योः'[१]
'हुस्तच्युती जनयन्त प्रशस्तम्'[१] ॥ १२ ॥

'दुहीयन् मित्रधितये युवाकु'[१] ॥ १२ ॥

[२१]

'सोभरि काण्व ऋषि । इन्द्रो देवता, अन्त्ययोश्चित्र' । प्रगाथश्छन्दः
(=विषमा ककुभ, समा सतोबृहत्य.)'।

वयमु त्वामपूर्व्य स्थूरं न कच्चिद् भरन्तोऽवस्यवः । वाजे चित्रं हवामहे ॥१॥

वयम् । ऊँ इति । त्वाम् । अपूर्व्य । स्थूरम् । न । कत् । चित् । भरन्त । अवस्यवं ।
वाजे । चित्रम् । हवामहे ॥ १ ॥

वेङ्कट० सोभरि[४]। वयम् उ त्वाम् हे अभिनव[१] स्थूलम् इव [५]कश्चित् मानव[५] व्रीह्यादिभिर्हि
पूरयन्त अवसय सङ्ग्रामे चित्रम् हवामहे ॥ १ ॥

उप त्वा कर्मन्नूतये स नो युवोग्रश्चक्राम यो धृषत् ।
त्वामिद्ध्यवितारं ववृमहे सखाय इन्द्र सानसिम् ॥ २ ॥

उप । त्वा । कर्मन् । ऊतये । स । नु । युवा । उग्र । चक्राम । य । धृषत् ।
त्वाम् । इत् । हि । अवितारम् । ववृमहे । सखाय । इन्द्र । सानसिम् ॥ २ ॥

वेङ्कट० उप गच्छाम त्वा कर्मणि रक्षणाय । स अस्मान् इन्द्र. युवा उद्गूर्ण चकाम अस्मान् प्रति
गच्छति, य अभिभवतु[६] शत्रुम्। त्वाम् एव हि वय रक्षितारम् वृणीमहे सखाय:
इन्द्र![७] भजनीयम् ॥ २ ॥

आ याहीम इन्दवोऽश्वपते गोपत उर्वरापते । सोमं सोमपते पिब ॥ ३ ॥

आ । याहि । इमे । इन्दव. । अश्वऽपते । गोऽपते । उर्वराऽपते ।
सोमम् । सोमऽपते । पिब ॥ ३ ॥

वेङ्कट० आ याहि इमे सोमा त्वदर्था हे अश्वादीना स्वामिन्[१]। सोमम् सोमपते[१] पिब च ॥ ३ ॥

वयं हि त्वा बन्धुमन्तमबन्धवो विप्रास इन्द्र येमिम ।
या ते धामानि वृषभ तेभिरा गहि विश्वेभिः सोमपीतये ॥ ४ ॥

वयम् । हि । त्वा । बन्धुऽमन्तम् । अबन्धवं । विप्रास । इन्द्र । येमिम ।
या । ते । धामानि । वृषभ । तेभिं । आ । गहि । विश्वेभि । सोमऽपीतये ॥ ४ ॥

---

१. ऋ ७,१,१ २ ऋ १,१२०,९. ३-३ नास्ति मूको. ४. सोभरि वि[१]; सोहरि मूको.
५-५ काश्चित् मानमं मूको. ६ °भवति कों. ७. इद्रम् मूको.

त्रयोऽष्टकाः पञ्चक आद्य एकः
सा 'पितुं नु स्तोषम्'[१] अनुष्टुब्गर्भा ।
'नदं वः'[२] इत्युष्णिगियं चतुर्भिः
पदैरथैताक्षरसप्तसङ्ख्यैः[३] ॥ ७ ॥

अत्र शाट्यायनकम्—'सा ककुबब्रवीद् बलिष्ठा वाऽहमस्मीति । पराक्रममाणा खलु मेऽक्षराणि समीहीत् पूर्वां मा प्रयुञ्जाम् इति । अथोष्णिगब्रवीत् अथ वै मां पूर्वामाचक्षन्ता इति । तथेति । तस्मिन् समपादयेताम् । पूर्वप्रयोगमन्याऽवृणीत पूर्वाख्यानमन्या । तस्मादेते एवं प्रयुज्यते । तस्मादुष्णिक्ककुभावित्याख्यायते' (तु. जैब्रा ३,२९५) ।

चतुष्पदाऽनुष्टुबथो[४] महा स्युः
पदानि पञ्चापि च पञ्चकानि ।
महापदार्थां प्रवदन्ति पङ्क्तिं
[५]षष्ठं च षट्कं 'रोचत उपाके'[५]† ॥ ८ ॥

कृतिराद्यौ जागतावष्टकोऽन्ते
'मा कस्मै धातमभ्यमित्रिणे नः'[६] ।
स्यादष्टको मध्यमश्चेत्[७] तदा स्यात्
'पर्यू षु प्र(ध[८] इ)ति पिपीलिकमध्या ॥ ९ ॥

मध्ये भवेज्जागतपाद एकः
पूर्वोत्तरौ नवकौ चापि पादौ ।
सा काविराण्णाम भवेदनुष्टुप्
सैषा 'ता विद्वांसा हवामहे वाम्'[९] ॥ १० ॥

नववैराजत्रयोदशकैः युतो[१०]
तां नष्टरूपां कवयो वदन्ति ।
'वि पृच्छामि पाक्या३ न देवान्'[११]
पादैर्विराट् स्याद् दशकैस्त्रिभिश्च ॥ ११ ॥

इयं 'पिबा सोमम्'[१२] इतीरितार्थैः
यद्वा स्युरेकादशकास्त्रयोऽपि ।

---

१. ऋ १,१८७,१. २. ऋ ८,६९,२. ३. पादै° वि°. ४. °ष्पदानुष्णिगथो वि°, °ष्पादानुष्णिगिति अ°. ५-५. षड्र्भं षट्को रोदत उदाके अ°; षष्ठं च रोचत उपाके पदम् चैत्रम. † ऋ ४,१०,५. ६. ऋ १,१२०,८. ७-७. °ष्टकश्चेत् वि° अ°. ८. ऋ ९,११०,१. ९. ऋ १,१२०,३. १०. नास्ति वि° अ°. ११. ऋ १,१२०,४. १२. ऋ ८,३४,३.

'अग्निं　　नरो　　दीधितिभिरुरण्योः'[१]
'दुहीयन्　　मित्रधितये　　युवाकु'[१] ॥ १२ ॥

[२१]

'सोभरिः काण्व ऋषिः । इन्द्रो देवता, अन्त्ययोश्चित्र । प्रगाथश्छन्दः
(=विषमा ककुभः, समाः सतोबृहत्यः)'।

वयमु त्वामपूर्व्य स्थूरं न कच्चिद् भरन्तोऽवस्यवः । वाजे चित्रं हवामहे ॥१॥

वयम् । ऊँ इति । त्वाम् । अपूर्व्य । स्थूरम् । न । कत् । चित् । भरन्त । अवस्यव ।
वाजे । चित्रम् । हवामहे ॥ १ ॥

वेङ्कट० सोभरि[४] । वयम् उ त्वाम् हे अभिनव[५] स्थूलम् इव [५]कश्चित् मानव[५] व्रीह्यादिभिर्हि
पूरयन्त अवस्यव सङ्ग्रामे चित्रम् हवामहे ॥ १ ॥

उप त्वा कर्मन्नूतये स नो युवोग्रश्चक्राम यो धृषत् ।
त्वामिद्ध्यवितारं ववृमहे सखाय इन्द्र सानसिम् ॥ २ ॥

उप । त्वा । कर्मन् । ऊतये । स । न । युवा । उग्र । चक्राम । य । धृषत् ।
त्वाम् । इत् । हि । अवितारम् । ववृमहे । सखाय । इन्द्र । सानसिम् ॥ २ ॥

वेङ्कट० उप गच्छाम त्वा कर्मणि रक्षणाय । स अस्मान् इन्द्र युवा उद्गूर्ण चक्राम अस्मान् प्रति
गच्छति, स अभिभवतु[६] शत्रुम् । त्वाम् एव हि वय रक्षितारम् वृणीमहे सखाय
इन्द्र ।[७] भजनीयम् ॥ २ ॥

आ याहीम इन्दवोऽश्वपते गोपत उर्वरापते । सोमं सोमपते पिब ॥ ३ ॥

आ । याहि । इमे । इन्दव । अश्वऽपते । गोऽपते । उर्वराऽपते ।
सोमम् । सोमऽपते । पिब ॥ ३ ॥

वेङ्कट० आ याहि इमे सोमा त्वदर्था हे अश्वादीना स्वामिन्[१] । सोमम् सोमपते[१] पिब च ॥ ३ ॥

वयं हि त्वा बन्धुमन्तमबन्धवो विप्रास इन्द्र येमिम ।
या ते धामानि वृषभ तेभिरा गहि विश्वेभिः सोमपीतये ॥ ४ ॥

वयम् । हि । त्वा । बन्धुऽमन्तम् । अबन्धव । विप्रास । इन्द्र । येमिम ।
या । ते । धामानि । वृषभ । तेभि । आ । गहि । विश्वेभि । सोमऽपीतये ॥ ४ ॥

---

१ ऋ ७,१,१　२ ऋ १,१२०,६　३-३ नास्ति मूको.　४. सोभरि वि'; सोदरि मूको.
५-५ कश्चिन् मानवै मूको.　६ °भवि स'.　७. इन्द्रम् मूको

वेङ्कट० वयम् हि त्वां बन्धुभिः देवैः 'सह त्वाम् अयन्धय.[1] मेधाविन. इन्द्र! निषण्णाम.[1] । तथा सति यानि तव शरीराणि हे वसिष्ठ![2] तैः आ गच्छ सर्वैः सोमपानाय ॥ ४ ॥

सीदन्तस्ते वयो यथा गोश्रीते मधौ मदिरे विवक्षणे । अभि त्वामिन्द्र नोनुमः ॥५॥

सीदन्त । ते । वयः । यथा । गोऽश्रीते । मधौ । मदिरे । विवक्षणे । अभि । त्वाम् । इन्द्र । नोनुमः ॥ ५ ॥

वेङ्कट० पक्षिण इव त्वदीये[3] दधा पयसा च श्रिते सोमे मदकरे वहनशीले सीदन्तः वयम् अभि स्तुमः त्वाम्[4] इन्द्र! ॥ ५ ॥

[5]इति षष्ठाष्टके द्वितीयाध्याये प्रथमो वर्गः.[5] ॥

अच्छा च त्वैना नमसा वदामसि किं मुहुश्चिद् वि दीधयः ।
सन्ति कामासो हरिवो ददिष्ट्वं स्मो वयं सन्ति नो धियः ॥ ६ ॥

अच्छ । च । त्वा । एना । नमसा । वदामसि । किम् । मुहुः । चित् । वि । दीधयः ।
सन्ति । कामासः । हरिऽवः । ददिः । त्वम् । स्मः । वयम् । सन्ति । नः । धियः ॥ ६ ॥

वेङ्कट० अपि च त्वाम् अनेन हविषा वदाम । किम् त्वं[6] मुहुर्मुहुः चिन्तयसि । भवन्ति अस्माकं [7]कामा हरिवः! । त्वम् च ददिः[7] । भवाम वयम् त्वत्सन्निधौ । भवन्ति चास्माकं कर्माणि ॥ ६ ॥

नूत्ना इदिन्द्र ते वयमूती अभूम नहि नू ते अद्रिवः । विद्मा पुरा परीणसः ॥७॥

नूत्नाः । इत् । इन्द्र । ते । वयम् । ऊती । अभूम । नहि । नु । ते । अद्रिऽवः । विद्म । पुरा । परीणसः ॥ ७ ॥

वेङ्कट० नूतनाः एव वयम् इन्द्र! तव रक्षणे भवाम[8] । नहि पुरा त्वां[9] महान्तम् जानीम. हे वज्रिन्![1] सम्प्रति त्वां जानन्तो रक्षिता इति ॥ ७ ॥

विद्मा सखित्वमुत शूर भोज्यमा ते ता वज्रिन्नीमहे ।
उतो समस्मिन्ना शिशीहि नो वसो वाजे सुशिप्र गोमति ॥ ८ ॥

विद्म । सखिऽत्वम् । उत । शूर । भोज्यम् । आ । ते । ता । वज्रिन् । ईमहे ।
[1]उतो इति । समस्मिन् । आ । शिशीहि । न । वसो इति[1] । वाजे । सुऽशिप्र । गोऽमति ॥८॥

वेङ्कट० जानीम सखित्वम्, अपि च शूर! तव भोज्यम् धनम् । तदुभयम् वज्रिन्! आभिमुख्येन याचामहे । तथा सति अस्मान् सर्वस्मिन् गोमति अन्ने[10] "[11]सम् आ शिशीहि हे वासयितः![11] [12]सुहनो[1] प्रदाय[12] तत्तीक्ष्णीकुर्विति[13] ॥ ८ ॥

१-१ °त···वथ° मूको. २ यच्छा' वि'. ३ °दीयन अ'. ४. अत्र मूको. ५-५. नास्ति मूको. ६. तु मूको. ७. °मा हरिवः° वि', °मा ·· द° अ'. ८. त्वा मूको. ९-९. तु. या ५,२२. १० अत्र मूको. ११-११. °शीविहा वामभिनः मूको. १२. °नोऽप्रदाया मूको. १३. °कुर्वेति मूको.

योनं इदमिदं पुरा प्र वस्य आनिनाय तमु वः स्तुषे । सखाय इन्द्रमूतये ॥९॥

यः। नः। इदम्ऽइदम्। पुरा। प्र। वस्यः। आऽनिनाय। तम्। ऊँ इति। वः। स्तुषे। सखायः। इन्द्रम्। ऊतये ॥ ९ ॥

वेङ्कट० यः अस्माकम् इदम् च इदम् च वसीयः पुरा प्र आनिनाय, तम् एव युष्मदर्थं स्तौमि सखायः। इन्द्रम् रक्षणाय ॥ ९ ॥

हर्यश्वं सत्पतिं चर्षणीसहं स हि ष्मा यो अमन्दत ।
आ तु नः स वयति गव्यमश्व्यं स्तोतृभ्यो मघवा शतम् ॥ १० ॥

हरिऽअश्वम् । सत्ऽपतिम् । चर्षणिऽसहम् । सः । हि । स्म । यः । अमन्दत ।
आ । तु । नः । सः । वयति । गव्यम् । अश्व्यम् । स्तोतृऽभ्यः । मघऽवा । शतम् ॥ १० ॥

वेङ्कट० हरिताश्वम् सत्पतिम्[1] मनुष्याणाम् अभिभवितारम् सः हि स्म[2] स्तौति, यः तृप्तो भवति। स्तोता लब्धधनो हृष्यतीत्यर्थः। एवं सति अस्मभ्यम् सः इन्द्रः आ प्रापयति गवाश्वसङ्घम्[3] अनेकम् मघवा। तत एनं वयं च स्तुम इति ॥ १० ॥

"इति षष्ठाष्टके द्वितीयाध्याये द्वितीयो वर्गः" ॥

त्वया ह स्विद् युजा वयं प्रति श्वसन्तं वृषभ ब्रुवीमहि । संस्थे जनस्य गोमतः ॥११॥

त्वया । ह । स्वित् । युजा । वयम् । प्रति । श्वसन्तम् । वृषभ । ब्रुवीमहि । सम्ऽस्थे । जनस्य । गोऽमतः ॥ ११

वेङ्कट० त्वया ह अस्मिन् सहायेन[4] वयम् प्रति ब्रुवीमहि हे वर्षितः! अस्मात् प्रति निश्वसन्तं शत्रुम् संस्थाने गोमतः जनस्य युद्धे ॥ ११ ॥

जयेम कारे पुरुहूत कारिणोऽभि तिष्ठेम दूढ्यः ।
नृभिर्वृत्रं हन्याम शूशुयाम चावेरिन्द्र प्र णो धियः ॥ १२ ॥

जयेम । कारे । पुरुऽहूत । कारिणः । अभि । तिष्ठेम । दुःऽध्यः ।
नृऽभिः । वृत्रम् । हन्याम । शूशुयाम । च । अवेः । इन्द्र । प्र । नः । धियः ॥ १२ ॥

वेङ्कट० जयेम युद्धे पुरुहूत! 'कर्तॄन्। अभि' तिष्ठेम [illegible] ॥ वर्धेमहि[6] च। अस्माकम् प्र रक्ष कर्माणि इन्द्र! ॥ १२ ॥

अभ्रातृव्यो अना त्वमनापिरिन्द्र जनुषा [illegible]

1. °तिः मूको. 2. च मूको. 3. [illegible] 5. [illegible] मूको. 6. [illegible] 4-4. कर्तॄनहि मूको. 7. [illegible] हे कर्तॄनहि अ°.

अभ्रातृव्य । अना । त्वम् । अनापि । इन्द्र । जनुषा । सनात् । असि ।
युधा । इत् । आपिऽत्वम् । इच्छसे ॥ १३ ॥

वेङ्कट० शत्रुरहित नेतृरहितः च त्वम् अबन्धुः च इन्द्र। जन्मनैव चिरादेव भवसि। युद्धेनैव एव बान्धवम् इच्छसि। युद्ध कुर्वन्नेव स्तोतृ सखा भवसीति ॥ १३ ॥

नकी रेवन्तं सख्याय विन्दसे पीयन्ति ते सुराश्वः ।
यदा कृणोषि नदनुं समूहस्यादित् पितेव हूयसे ॥ १४ ॥

नकिं । रेवन्तम् । सख्याय । विन्दसे । पीयन्ति । ते । सुराश्वः ।
यदा । कृणोषि । नदनुम् । सम् । ऊहसि । आत् । इत् । पिताऽइव । हूयसे ॥ १४ ॥

वेङ्कट० न त्वम् धनवन्तम्[1] सख्याय आश्रयसि[1]। पीयन्ति त्वां सुरया वृद्धा नास्तिकाः। यदा कृणोषि आत्मयसि स्तोतारम्, तदानीं तस्मै धनम् सम् ऊहसि। अनन्तरमेव तेन स्तुतिभिः पिता इव हूयसे ॥ १४ ॥

मा ते अमाजुरो यथा मूरास इन्द्र सख्ये त्वावतः । नि षदाम सचा सुते ॥१५॥

मा । ते । अमाऽजुरः । यथा । मूरासः । इन्द्र । सख्ये । त्वाऽवतः । नि । सदाम । सचा । सुते ॥ १५ ॥

वेङ्कट० मा भूम तव स्वभूता वयम् यथा अमाजुरः भवन्ति मूढाः इन्द्र। त्वावतः[1] सख्ये, तथा वयं मा भूम। अयुध्यन्तो ये गृहे पुत्रैः पौत्रैश्च सह जीर्णा भवन्ति ते अमाजुरः। वयं तु ऋत्विग्भिः सह सुते सोमे नि सदाम ॥ १५ ॥

"इति पञ्चाष्टके द्वितीयाध्याये तृतीयो वर्गः" ॥

मा ते गोदत्र निरराम राधस इन्द्र मा ते गृहामहि ।
दृळ्हा चिदर्यः प्र मृशाभ्या भर न ते दामान आदभे ॥ १६ ॥

मा । ते । गोऽदत्र । निः । अराम । राधसः । इन्द्र । मा । ते । गृहामहि ।
दृळ्हा । चित् । अर्यः । प्र । मृश । अभि । आ । भर । न । ते । दामानः । आऽदभे ॥१६॥

वेङ्कट० "मा ते स्वभूता वयं हे गवां दातः"† धनात् नि गमाम, सर्वदा धनिनो भवेम। इन्द्र!" मा ते स्वभूता वयं[1] कस्माच्चित् प्रयच्छतो धनं गृह्णीम, अपितु त्वत्त एव गृह्णीम। दृढान्यपि अर्यः" धनानि हस्तेन प्र मृश, अभि आ हर च तानि। न ते दामानि दानानि[8] 'परैः आदम्भितुं' शक्यन्ते महान्ति ॥ १६ ॥

---

१ अयमाच्छ्य मूको. २-२ सख्याचाश्र मूको ३ तावत मूको. ४ ४ नास्ति मूको ५ ५ नास्ति वि[२] † मान्त मान्त स्वभूता वय ह भगवान् धात अ[१] ६ व वि[१], नास्ति अ[१] ७ नास्ति मूको. ८ दत्तानि मूको. ९ ९. परैरादर्दितं वि[२], परैरादवितु अ[१].

इन्द्रो वा घेदियन्मघं सरस्वती वा सुभगा ददिर्वसु । त्वं वा चित्र दाशुषे ॥ १७ ॥

इन्द्रः । वा । घ । इत् । इयत् । मघम् । सरस्वती । वा । सुऽभगा । ददिः । वसु । त्वम् । वा । चित्र । दाशुषे ॥

वेङ्कट० कात्यायनः—'अन्त्ये द्वयृचे चित्रस्य दानस्तुतिः' (ऋअ २,८२१) इति । इन्द्रः वा खलु एतावद् धनम् प्रयच्छेत्, सरस्वती वा सुधना ददिः वसु भवति त्वम् वा हे चित्र! दाशुषे[1]। इन्द्रस्य दाश्वान्, सम्प्रदानं सरस्वत्यास्तीरवासिनश्चित्रस्य भिक्षमाण ॥ १७ ॥

चित्र इद् राजा राजका इदन्यके यके सरस्वतीमनु ।
पर्जन्य इव ततनद्धि वृष्ट्या सहस्रमयुता ददत् ॥ १८ ॥

चित्रः । इत् । राजा । राजकाः । इत् । अन्यके । यके । सरस्वतीम् । अनु ।
पर्जन्यःऽइव । ततनत् । हि । वृष्ट्या । सहस्रम् । अयुता । ददत् ॥ १८ ॥

वेङ्कट० चित्रः एव राजा राजकाः एव अन्यके[2] अल्पका इत्यर्थः, यके सरस्वत्यास्तीरे वर्तन्ते। अयम् हि चित्रः सर्वानेव भिक्षमाणान्, पर्जन्यः पृथिवीम् इव वृष्टिभिः, धनैः तनोति सहस्रम् अयुतानि च प्रयच्छन्निति ॥ १८ ॥

[3]इति षष्ठाष्टके द्वितीयाध्याये चतुर्थो वर्गः[3] ॥

[२२]

[4]सोभरिः काण्व ऋषिः । अश्विनौ देवता । आद्याः षट् प्रगाथाः (= विषमा बृहत्यः, समाः सतोबृहत्यः), सप्तमी बृहती, अष्टमी अनुष्टुप्, एकादशी ककुप्, द्वादशी मध्येज्योतिः, शिष्टाः प्रगाथाः (= विषमाः ककुभः, समाः सतोबृहत्यः)[4] ।

ओ त्यमह्व आ रथमद्या दंसिष्ठमूतये ।
यमश्विना सुहवा रुद्रवर्तनी आ सूर्यायै तस्थथुः ॥ १ ॥

ओ इति । त्यम् । अह्वे । आ । रथम् । अद्य । दंसिष्ठम् । ऊतये ।
यम् । अश्विना । सुऽहवा । रुद्रवर्तनी इति रुद्रऽवर्तनी । आ । सूर्यायै । तस्थथुः ॥ १ ॥

वेङ्कट० आ ह्वये तम् रथम् अद्य[5] अत्यन्तदर्शनीयम् रक्षणाय, यम्[6] हे अश्विनौ! स्वाह्वानौ![6] सङ्ग्रामे रोदनशीलमार्गौ![7] यद्वा स्तूयमानमार्गौ! आ तस्थथुः सूर्यां स्वयंवरे तां वरयितुम् ॥ १ ॥

पूर्वापुषं सुहवं पुरुस्पृहं भुज्युं वाजेषु पूर्व्यम् ।
सचनावन्तं सुमतिभिः सोभरे विद्वेषसमनेहसम् ॥ २ ॥

---

1. = भिक्षमाणायेत्यभिमतं द्र. 2. स्वके मूको. 3-3. नास्ति मूको. 4. ४-४ मूको. 5. इद मूको. 6. °नेन मूको. 7. °शीले [illegible] मूको

पूर्वऽआपुषम् । सुऽहवम् । पुरुऽस्पृहम् । भुज्युम् । वाजेषु । पूर्व्यम् ।
सचनाऽवन्तम् । सुमतिऽभिः । सोभरे । विऽद्वेषसम् । अनेहसम् ॥ २ ॥

वेङ्कट० पूर्वेषां स्तोतॄणाम् आपोषकम् स्वाह्वानम् बहुभिः स्पृहणीयम् रक्षकम् सङ्ग्रामेषु प्रमुखतो गन्तारम् भजनवन्तम् स्तुतिभिः सोभरे! कल्याणीभिः स्तुहि शत्रूणां विद्वेष्टारम् अनुपद्रवम् अश्विनोः रथम् ॥ २ ॥

इह त्या पुरुभूतमा देवा नमोभिरश्विना ।
अर्वाचीना स्ववसे करामहे गन्तारा दाशुषो गृहम् ॥ ३ ॥

इह । त्या । पुरुऽभूतमा । देवा । नमःऽभिः । अश्विना ।
अर्वाचीना । सु । अवसे । करामहे । गन्तारा । दाशुषः । गृहम् ॥ ३ ॥

वेङ्कट० इह तौ अत्यन्त बहूनां भावयितारौ देवौ हविर्भिः अश्विनौ अभिमुखौ कुर्मः[1] शोभनाय रक्षणाय गन्तारौ यजमानस्य गृहम् ॥ ३ ॥

युवो रथस्य परि चक्रमीयत ईर्मान्यद् वामिषण्यति ।
अस्माँ अच्छा सुमतिर्वां शुभस्पती आ धेनुरिव धावतु ॥ ४ ॥

युवोः । रथस्य । परि । चक्रम् । ईयते । ईर्मा । अन्यत् । वाम् । इषण्यति ।
अस्मान् । अच्छ । सुऽमतिः । वाम् । शुभः । पती इति । आ । धेनुःऽइव । धावतु ॥ ४ ॥

वेङ्कट० युवयोः रथस्य एकम् चक्रम् 'परितो द्याम्' गच्छति । अन्यत् तु चक्रम् अवस्थितं प्रेरकौ वाम् इच्छति । '॰मघ्न्यस्य मूर्धनि' (ऋ १,३०,१९) इत्युक्तम् । अस्मान् अभि युवयोः सुमतिः हे शुभः पती! धेनुः इव आ धावतु ॥ ४ ॥

रथो यो वां त्रिवन्धुरो हिरण्याभीशुरश्विना ।
परि द्यावापृथिवी भूषति श्रुतस्तेन नासत्या गतम् ॥ ५ ॥

रथः । यः । वाम् । त्रिऽवन्धुरः । हिरण्यऽअभीशुः । अश्विना ।
परि । द्यावापृथिवी इति । भूषति । श्रुतः । तेन । नासत्या । आ । गतम् ॥ ५ ॥

वेङ्कट० [2]यः वाम् रथः[2] त्रिबन्धुरः [3]हिरण्मयाश्वादिरज्जुः[4] हे अश्विनौ! परिभवति द्यावापृथिव्यौ विश्रुतः । तेन हे नासत्यौ[3] आ गच्छतम् ॥ ५ ॥

[3]इति षष्ठाष्टके द्वितीयाध्याये पञ्चमो वर्गः[3] ॥

दशस्यन्ता मनवे पूर्व्यं दिवि यवं वृकेण कर्षथः ।
ता वामद्य सुमतिभिः शुभस्पती अश्विना प्र स्तुवीमहि ॥ ६ ॥

---

१. कुर्मः मूको. २-२. °तो वां मूको. ३-३. नास्ति मूको. ४. हिर ण्मयाश्वादिरज्जुः मूको.

दशस्यन्ता । मनवे । पूर्व्यम् । दिवि । यवम् । वृकेण । कर्षथ ।
ता । वाम् । अद्य । सुमतिऽभिः । शुभः । पती इति । अश्विना । प्र । स्तुवीमहि ॥ ६ ॥

वेङ्कट० प्रयच्छन्तौ मनवे राज्ञे प्रत्नम् दिवि स्थितम् उदकम् पुनश्च यवम् वृकेण लाङ्गलेन कर्षथ । तौ वाम् अद्य स्तुतिभिः शुभः पती! वयम् अश्विनौ! प्र स्तुवीमहि ॥ ६ ॥

उप नो वाजिनीवसू यातमृतस्य पथिभिः ।
येभिस्तृक्षिं वृषणा त्रासदस्यवं महे क्षत्राय जिन्वथः ॥ ७ ॥

उप । नः । वाजिनीवसू इति वाजिनीऽवसू । यातम् । ऋतस्य । पथिऽभिः ।
येभिः । तृक्षिम् । वृषणा । त्रासदस्यवम् । महे । क्षत्राय । जिन्वथः ॥ ७ ॥

वेङ्कट० उप[2] गच्छतम् अस्मान् हे अन्नधनौ! यज्ञस्य मार्गैः, यैः तृक्षिम् त्रसदस्योः पुत्रम् हे वृषणौ! महते धनाय प्रीणयथ ॥ ७ ॥

अयं वामद्रिभिः सुतः सोमो नरा वृषण्वसू ।
आ यातं सोमपीतये पिबतं दाशुषो गृहे ॥ ८ ॥

अयम् । वाम् । अद्रिऽभिः । सुतः । सोमः । नरा । वृषण्वसू इति वृषण्ऽवसू ।
आ । यातम् । सोमऽपीतये । पिबतम् । दाशुषः । गृहे ॥ ८ ॥

वेङ्कट० अयम् वाम् ग्रावभिः सुतः सोमः हे नेतारौ! वृष्यमाणधनौ! । आ यातम् इति स्पष्टम् ॥ ८ ॥

आ हि रुहतमश्विना रथे कोशे हिरण्यये वृषण्वसू । युञ्जाथां पीवरीरिषः ॥ ९ ॥

आ । हि । रुहतम् । अश्विना । रथे । कोशे । हिरण्यये । वृषण्वसू इति वृषण्ऽवसू ।
युञ्जाथाम् । पीवरीः । इषः ॥ ९ ॥

वेङ्कट० आ रुहतम् हे अश्विनौ! हिरण्मये कोशे रथे हे वृष्यमाणधनौ! । स्थूलानि अन्नानि अस्मासु योजयतम् तत ॥ ९ ॥

याभिः पक्थमवथो याभिरध्रिगुं याभिर्बभ्रुं विजोषसम् ।
ताभिर्नो मक्षू तूयमश्विना गतं भिषज्यतं यदातुरम् ॥ १० ॥

याभिः । पक्थम् । अवथः । याभिः । अध्रिऽगुम् । याभिः । बभ्रुम् । विऽजोषसम् ।
ताभिः । नः । मक्षु । तूयम् । अश्विना । आ । गतम् । भिषज्यतम् । यत् । आतुरम् ॥ १० ॥

वेङ्कट० याभिः पक्थनामानम् अवथ, याभिः च अध्रिगुम् नाम, याभिः च बभ्रुम् विजोषसम्[3],

---

१. मन्यं मूको. २. मन मूको. ३. द्र. वैप१,२८४३a। °सम् च मूको.

ताभिः अस्मान् ऊतिभिः क्षिप्रम् तूर्णम् अश्विनौ[1] आ गच्छतम्। भिषज्यतम् आतुरम् पुत्रादिम् अस्माकम् ॥ १० ॥

[1]इति षष्ठाष्टके द्वितीयाध्याये षष्ठो वर्गः.[1] ॥

यद॑ध्रिगावो॒ अध्रि॑गू इ॒दा चि॒दह्नो॑ अ॒श्विना॒ हवा॑महे। व॒यं गी॒र्भिर्वि॑प॒न्यवः॑ ॥११॥

यत्। अध्रि॑ऽगावः। अध्रि॑गू॒ इत्यध्रि॑ऽगू। इ॒दा। चि॒त्। अह्नः॑। अ॒श्विना॑। हवा॑महे। व॒यम्। गीः॒ऽभिः। वि॒प॒न्यवः॑ ॥ ११ ॥

वेङ्कट० यत् वयम् अधृतगमनाः कर्मसु त्वरमाणाः अधृतगमनौ इदानीम् अह्नि[2] अश्विनौ हवामहे वयम् गीर्भिः मेधाविनः। उत्तरत्र सम्बन्धः ॥ ११ ॥

ताभि॒रा या॑तं वृषणोप॑ मे॒ हवं॑ वि॒श्वप्सुं॑ वि॒श्ववा॑र्यम्।
इ॒षा मंहि॑ष्ठा पुरु॒भूत॑मा नरा॒ याभिः॒ क्रिविं॑ वावृ॒धुस्ताभि॒रा ग॑तम् ॥ १२ ॥

ताभिः॑। आ। या॒त॒म्। वृ॒ष॒णा॒। उप॑। मे॒। हव॑म्। वि॒श्वऽप्सु॑म्। वि॒श्वऽवा॑र्यम्।
इ॒षा। मंहि॑ष्ठा। पु॒रु॒ऽभूत॑मा। न॒रा॒। याभिः॑। क्रिवि॑म्। व॒वृ॒धुः। ताभिः॑। आ। ग॒त॒म् ॥१२॥

वेङ्कट० ताभिः ऊतिभिः उप आ यातम् हे वृषणौ[1] मम स्तोत्रम् विश्वरूपम् विश्वैर्वरणीयम्। इच्छन्तौ हवींषि दातृतमौ पुरुधाभवन्तौ नरौ[1]। याभिः [3]कूपम् ऊतिभिः[3] उदकानि वावृधुः, ताभिः आ गच्छतम्। कूपपतितो वन्दनः[4] अश्विनोः कूप एवाशिवोऽभवत्[5] क्रिवो वेति ॥ १२ ॥

तावि॒दा चि॒दहा॑नां॒ ताव॒श्विना॒ वन्द॑मान॒ उप॑ ब्रुवे। ता ऊ॒ नमो॑भिरीमहे ॥१३॥

तौ। इ॒दा। चि॒त्। अहा॑नाम्। तौ। अ॒श्विना॑। वन्द॑मानः। उप॑। ब्रु॒वे॒।
तौ। ऊँ इति॑। नमः॑ऽभिः। ई॒म॒हे॒ ॥ १३ ॥

वेङ्कट० तौ इदानीम् अह्नां प्रातः अश्विनौ[6] प्रणमन् स्तौमि। तौ एव हविर्भिः याचामहे ॥ १३ ॥

ताविद् दो॒षा ता उ॒षसि॑ शु॒भस्पती॒ ता याम॑न् रु॒द्रव॑र्तनी।
मा नो॒ मर्ता॑य रि॒पवे॑ वाजिनीवसू प॒रो रु॑द्रा॒वति॑ ख्यतम् ॥ १४ ॥

तौ। इत्। दो॒षा। तौ। उ॒षसि॑। शु॒भः। पती॒ इति॑। ता। याम॑न्। रु॒द्रव॑र्तनी॒ इति॑ रु॒द्रऽव॑र्तनी।
मा। नः॒। मर्ता॑य। रि॒पवे॑। वा॒जि॒नी॒व॒सू॒ इति॑ वाजिनीऽवसू। प॒रः। रु॒द्रौ॒। अति॑। ख्य॒त॒म् ॥

वेङ्कट० तौ एव रात्रौ तौ उषसि उदकपती तौ अहनि स्तूयमानमार्गौ ह्वयामः[7]। तथा सति मा अस्मान् मर्ताय रिपवे हे अन्नधनौ[1] परस्तात् रुद्रौ! अति ख्यतम्, मा परामृतम् शत्रवे इति ॥ १४ ॥

१-१. नास्ति मूको. २. अह्नो मूको. ३-३. 'भूतिं' मूको. ४. द्र. ऋ १, ११६, ५ वद' मूको. ५. 'खोवाशित मूको. ६. अश्वी मूको. ७. ध्वयाम मूको.

आ सुम्न्याय सुम्न्यं प्राता रथेनाश्विना वा सक्षणी । हुवे पितेव सोभरी ॥१५॥

आ । सुम्न्याय । सुम्न्यम् । प्रातरिति । रथेन । अश्विना । वा । सक्षणी इति । हुवे । पिताऽइव । सोभरी ॥

वेङ्कट० आ वहतम् सुखार्हाय सुखम् प्रातः [1]रथेन अश्विनौ[1] वा सहनशीलौ[2] । वामहं[3] ह्वयामि सोभरी, यथा मम पिता वौ आजुहावेति ॥ १५ ॥

[4]इति षष्ठाष्टके द्वितीयाध्याये सप्तमो वर्गः[4] ॥

मनोजवसा वृषणा मदच्युता मक्षुंगमाभिरूतिभिः ।
आरात्ताच्चिद् भूतमस्मे अवसे पूर्वीभिः पुरुभोजसा ॥ १६ ॥

मनःऽजवसा । वृषणा । मदऽच्युता । मक्षुम्ऽगमाभिः । ऊतिऽभिः ।
आरात्तात् । चित् । भूतम् । अस्मे इति । अवसे । पूर्वीभिः । पुरुऽभोजसा ॥ १६ ॥

वेङ्कट० हे मनोवेगौ! वर्षितारौ! मदं प्रति गन्तारौ! शीघ्रं गच्छद्भिः पालनैः अन्तिके भवतम् अस्माकं रक्षणाय बह्वीभिः ऊतिभिः[5] हे बहूनां भोक्तारौ! ॥ १६ ॥

आ नो अश्वावदश्विना वर्तिर्यासिष्टं मधुपातमा नरा । गोमद् दस्रा हिरण्यवत् ॥१७॥

आ । नः । अश्वऽवत् । अश्विना । वर्तिः । यासिष्टम् । मधुऽपातमा । नरा ।
गोऽमत् । दस्रा । हिरण्यऽवत् ॥ १७ ॥

वेङ्कट० आ गच्छतम् अस्मान् प्रति मार्गम् अश्वयुक्तम् हे सोमस्य पातारौ! नेतारौ! अश्विनौ! गोयुक्तम् हिरण्ययुक्तम् च दर्शनीयौ! ॥ १७ ॥

सुप्रावर्गं सुवीर्यं सुष्ठु वार्यमनाधृष्टं रक्षस्विना ।
अस्मिन्ना वामायाने वाजिनीवसू विश्वा वामानि धीमहि ॥ १८ ॥

सुऽप्रावर्गम् । सुऽवीर्यम् । सुष्ठु । वार्यम् । अनाधृष्टम् । रक्षस्विना ।
अस्मिन् । आ । वाम् । आऽयाने । वाजिनीवसू इति वाजिनीऽवसू । विश्वा । वामानि । धीमहि ॥

वेङ्कट० शोभनप्रवर्गम् शोभनवीर्यम् सुष्ठु वरणीयं बलवता अनभिभूतं धनम् वयम् आ धीमहि । तदेवाह[6]—अस्मिन् युवयोः आगमने वाजिनीवसू! विश्वानि धनानि आ धीमहि ॥ १८ ॥

[4]इति षष्ठाष्टके द्वितीयाध्याये अष्टमो वर्गः[4] ॥

[२३]

[4]विश्वमना वैयश्व ऋषिः । अग्निर्देवता । उष्णिक् छन्दः[4] ।

ईळिष्वा हि प्रतीव्यं यजस्व जातवेदसम् । चरिष्णुधूममगृभीतशोचिषम् ॥१॥

१-१. रथेनाश्वि° मूको. २. सनसी° वि[1]; सचसी° अ[1]. ३. ता वयं मूको. ४-४. नास्ति मूको. ५. ऊतिभिः मूको. ६. मते देवा° मूको.

ईळिष्व । हि । प्रतीव्यम् । यजस्व । जातऽवेदसम् । चरिष्णुऽधूमम् । अगृभीतऽशोचिषम् ॥ १ ॥

वेङ्कट० विश्वमनाः वैयश्व ! स्तुहि हि प्रतिगमनशीलम् । यजस्व जातवेदसम् चरणशीलधूमम्[१] अगृहीतदीप्तिं रक्षोभिः ॥ १ ॥

दामानं विश्वचर्षणेऽग्निं विश्वमनो गिरा । उत स्तुषे विष्पर्धसो रथानाम् ॥२॥

दामानम् । विश्वऽचर्षणे । अग्निम् । विश्वऽमनः । गिरा । उत । स्तुषे । विऽस्पर्धसः । रथानाम् ॥

वेङ्कट० दातारम् हे विश्वस्यार्थस्य[२] द्रष्टः ! विश्वमनः ! अग्निम् गिरा स्तुहि विगतस्पर्धस्य यजमानस्य रथानाम् दानमिति ॥ २ ॥

येषामाबाध ऋग्मिय इषः पृक्षश्च निग्रभे । उपविदा वह्निर्विन्दते वसु ॥ ३ ॥

येषाम् । आऽबाधः । ऋग्मियः । इषः । पृक्षः । च । निऽग्रभे । उपऽविदा । वह्निः । विन्दते । वसु ॥ ३ ॥

वेङ्कट० येषाम् अयजमानानाम् आभिमुख्येन हिंसकः अर्चनीयः अन्नानि रसान् च निगृह्णाति, उपवेदनेन तेषां धनं च विन्दते वोढा ॥ ३ ॥

उदस्य शोचिरस्थाद् दीदियुषो व्यजरम् । तपुर्जम्भस्य सुद्युतो गणश्रियः ॥४॥

उत् । अस्य । शोचिः । अस्थात् । दीदियुषः । वि । अजरम् । तपुःऽजम्भस्य । सुऽद्युतः । गणऽश्रियः ॥४॥

वेङ्कट० उत् अस्य शोचिः देवस्य[३] अस्थात् तेजः अजरम्[४] तापयितृदंष्ट्रस्य शोभनदीप्तेः, यो यजमानगणं श्रयति ॥ ४ ॥

उदु तिष्ठ स्वध्वर स्तवानो देव्या कृपा । अभिख्या भासा बृहता शुशुक्वनिः ॥५॥

उत् । ॐ इति । तिष्ठ । सुऽअध्वर । स्तवानः । देव्या । कृपा । अभिऽख्या । भासा । बृहता । शुशुक्वनिः ॥

वेङ्कट० उत् तिष्ठ शोभनयज्ञ ![५] स्तूयमानः देव्या ज्वालया अभिख्या[६] शोभनया महत्या च भासा शोचनशीलः ॥ ५ ॥

[७]इति षष्ठाष्टके द्वितीयाध्याये नवमो वर्गः[७] ॥

अग्ने याहि सुशस्तिभिर्हव्या जुह्वान आनुषक् । यथा दूतो बभूथ हव्यवाहनः ॥६॥

अग्ने । याहि । सुशस्तिऽभिः । हव्या । जुह्वानः । आनुषक् । यथा । दूतः । बभूथ । हव्यऽवाहनः ॥ ६ ॥

वेङ्कट० अग्ने ![८] याहि स्तोत्रैः हवींषि जुह्वानः अनुषक्तम्, यथा [९]च त्वम्[९] दूतः बभूथ[१०] हविषां वोढा तथैव जुह्वान इति ॥ ६ ॥

---

१. 'शीधुम' वि[२], 'णशीधुम' अ[१]. २. 'स्यार्थस्य वि[२]. ३ दशाल्य मूको. ४. नास्ति मूको. ५. यज्ञ वि[२]; 'ज्ञे अ[१]. ६. 'भिमुख्या मूको. ७-७. नास्ति मूको. ८. सपा. मा (११,४१) आग्ने ! (आ अ°) इति पाभे. ९-९. मदरम् मूको. १०. बहु वि[१]; बहुधा अ[१].

अग्निं वः पूर्व्यं हुवे होतारं चर्षणीनाम् ।
तमया वाचा गृणे तमु वः स्तुषे ॥ ७ ॥

अग्निम् । वः । पूर्व्यम् । हुवे । होतारम् । चर्षणीनाम् ।
तम् । अया । वाचा । गृणे । तम् । ऊँ इति । वः । स्तुषे ॥ ७ ॥

वेङ्कट० अग्निम् युष्माकम् पूर्व्यम् ह्वयामि होतारम् मनुष्याणाम् । अयं हि यजति मनुष्याणाम् । तम् अनया वाचा शंसामि । तम् एव वः स्तौमि स्तोमैः ॥ ७ ॥

यज्ञेभिरद्भुतक्रतुं यं कृपा सूदयन्त इत् ।
मित्रं न जने सुधितमृतावनि ॥ ८ ॥

यज्ञेभिः । अद्भुतऽक्रतुम् । यम् । कृपा । सूदयन्ते । इत् ।
मित्रम् । न । जने । सुऽधितम् । ऋतऽवनि ॥ ८ ॥

वेङ्कट० यज्ञैः अद्भुतप्रज्ञम् यम् सामर्थ्येन [1]'कामान् सूदयन्ते' एव । सूदिः क्षरणकर्मा । मित्रम् इव सन्तर्पितम् यज्ञवति[2] यजमाने क्षारयन्तीति[1] ॥ ८ ॥

ऋतावानमृतायवो यज्ञस्य साधनं गिरा । उपो एनं जुजुषुर्नमसस्पदे ॥ ९ ॥

ऋतऽवानम् । ऋतऽयवः । यज्ञस्य । साधनम् । गिरा ।
उपो इति । एनम् । जुजुषुः । नमसः । पदे ॥ ९ ॥

वेङ्कट० यज्ञवन्तं हे यज्ञकामाः! यज्ञस्य साधनभूतम् वाचा स्तुतम् च तम् एनम् उप आसेविषत यजमानाः हविषः स्थाने यज्ञवति ॥ ९ ॥

अच्छा नो अङ्गिरस्तमं यज्ञासो यन्तु संयतः ।
होता यो अस्ति विक्ष्वा यशस्तमः ॥ १० ॥

अच्छ । नः । अङ्गिरःऽतमम् । यज्ञासः । यन्तु । सम्ऽयतः ।
होता । यः । अस्ति । विक्षु । आ । यशःऽतमः ॥ १० ॥

वेङ्कट० अच्छ यन्तु अस्माकम् अङ्गिरसां[3] वरिष्ठम् यज्ञा[4] हवींषि संहतानि[5] स्रुग्भिः । होता यः भवति मनुष्येषु यशस्तमः, यजस्व तम् ॥ १० ॥

[6]इति षष्ठाष्टके द्वितीयाध्याये दशमो वर्गः[6] ॥

अग्ने तव त्ये अजरेन्धानासो बृहद् भाः । अश्वा इव वृषणस्तविषीयवः ॥ ११ ॥

१-१. °मान् आदयन्त वि[१]; °मानदारयन्त अ[१]. २. यज्ञपति मूको. ३. °यजेति मूको. ४. °रसा मूको. ५. नास्ति वि[१]. ६-६. नास्ति मूको.

अग्ने। तव॑। त्ये। अ॒ज॒र॒। इन्धा॑नासः। बृ॒हत्। भाः। अश्वाः॑ऽइव। वृष॑णः। त॒वि॒षी॒ऽयवः॑॥ ११ ॥

वेङ्कट० अग्ने! तव अमी अजर! दीप्यमाना महान्तः रश्मयः अश्वा इव पुमांसः बलमाचरन्तः भवन्ति ११ ॥

स त्वं न ऊर्जां पते र॒यिं रा॑स्व सु॒वीर्य॑म्। प्राव॑ नस्तो॒के तन॑ये स॒मत्स्वा ॥१२॥

सः। त्वम्। नः। ऊ॒र्जा॒म्। प॒ते॒। र॒यिम्। रा॒स्व॒। सु॒ऽवीर्य॑म्।
प्र। अ॒व॒। नः॒। तो॒के। तन॑ये। स॒मत्ऽसु। आ ॥ १२ ॥

वेङ्कट० स त्वम् अस्मभ्यं हे अन्नानां पते[1] धनम् देहि सुवीर्यम्। प्र रक्ष च अस्माकं पुत्रे पौत्रे सङ्ग्रामेषु च यद्रक्षितव्यम् ॥ १२ ॥

यद् वा उ वि॒श्पतिः॑ शि॒तः सुप्री॑तो॒ मनु॑षो वि॒शि।
विश्वेद॒ग्निः प्रति॒ रक्षां॑सि सेधति ॥ १३ ॥

यत्। वै। ऊँ इति॑। वि॒श्पतिः॑। शि॒तः। सुऽप्री॑तः। मनु॑षः। वि॒शि।
विश्वा॑। इत्। अ॒ग्निः। प्रति॑। रक्षां॑सि। से॒ध॒ति॒ ॥ १३ ॥

वेङ्कट० यदा खलु विशां पतिः तीक्ष्णीकृतः सुप्रीतः मनुष्यस्य निवेशने, तदानीं विश्वानि एव रक्षांसि अग्निः प्रति सेधति ॥ १३ ॥

श्रु॒ष्ट्य॑ग्ने॒ नव॑स्य मे॒ स्तोम॑स्य वीर विश्पते।
नि मा॒यिन॒स्तपु॑षा र॒क्षसो॑ दह ॥ १४ ॥

श्रु॒ष्टी। अग्ने॑। नव॑स्य। मे॒। स्तोम॑स्य। वी॒र॒। वि॒श्प॒ते॒।
नि। मा॒यिनः॑। तपु॑षा। र॒क्षसः॑। द॒ह॒ ॥ १४ ॥

वेङ्कट० 'श्रुत्वा अग्ने'[2] नवम् मम स्तोमम्[2] हे वीर! विश्पते! नि दह मायाविनः राक्षसान् तेजसा ॥ १४ ॥

न तस्य॑ मा॒यया॑ च॒न रि॒पुरी॑शीत॒ मर्त्यः॑।
यो अ॒ग्नये॑ द॒दाश॑ ह॒व्यदा॑तिभिः ॥ १५ ॥

न। तस्य॑। मा॒यया॑। च॒न। रि॒पुः। ई॒शी॒त॒। मर्त्यः॑। यः। अ॒ग्नये॑। द॒दाश॑। ह॒व्यदा॑तिऽभिः ॥ १५ ॥

वेङ्कट० न तस्य मायया अपि रिपुः मर्त्यः[3] ईशीत, यः अग्नये प्रयच्छति[4] हवींषि दातृभिः ॥ १५ ॥

[5]इति षष्ठाष्टके द्वितीयाध्याये एकादशो वर्गः[5] ॥

१-१. शुक्राणि वि[1], शुक्राने अ[1]. २. स्तोत्र अ[1]. ३. निमित्त वि[1]; नमरः अ[1]. ४. प्रयच्छति वि[1], प्रायच्छति अ[1]. ५-५. नास्ति मूको.

व्यश्वस्त्वा वसुविदमुक्षण्युरप्रीणादृषिः । महो राये तमु त्वा समिधीमहि ॥१६॥

विऽअश्वः । त्वा । वसुऽविदम् । उक्षण्युः । अप्रीणात् । ऋषिः ।
महः । राये । तम् । ऊँ इति । त्वा । सम् । इधीमहि ॥ १६ ॥

वेङ्कट० व्यश्वः मम पिता त्वां वसूनां लम्भकम् सेक्तारमिच्छन् अप्रीणात् ऋषिः महते धनाय । तम् एव त्वा वयम् सम् इधीमहि ॥ १६ ॥

उशना काव्यस्त्वा नि होतारमसादयत् । आयजिं त्वा मनवे जातवेदसम् ॥१७॥

उशना । काव्यः । त्वा । नि । होतारम् । असादयत् । आऽयजिम् । त्वा । मनवे । जातऽवेदसम् ॥१७॥

वेङ्कट० कविपुत्रः उशना त्वा [1]नि असादयत[1] होतारम् आभिमुख्येन यष्टारम् त्वाम्[2] मनवे राज्ञे जातप्रज्ञम् ॥ १७ ॥

विश्वे हि त्वा सजोषसो देवासो दूतमक्रत ।
श्रुष्टी देव प्रथमो यज्ञियो भुवः ॥ १८ ॥

विश्वे । हि । त्वा । सऽजोषसः । देवासः । दूतम् । अक्रत ।
श्रुष्टी । देव । प्रथमः । यज्ञियः । भुवः ॥ १८ ॥

वेङ्कट० विश्वे हि त्वा [3]सङ्गताः सन्तः देवासः[3] दूतम् अकुर्वन्[4] । क्षिप्रम् देव! मुख्यः यज्ञियः च भव[5] ॥ १८ ॥

इमं घा वीरो अमृतं दूतं कृण्वीत मर्त्यः । पावकं कृष्णवर्तनिं विहायसम् ॥१९॥

इमम् । घ । वीरः । अमृतम् । दूतम् । कृण्वीत । मर्त्यः । पावकम् । कृष्णऽवर्तनिम् । विऽहायसम् ॥१९॥

वेङ्कट० इमम् खलु वीरः अमृतम् देवानाम् दूतम् कृण्वीत मनुष्यः[6] पावकम् कृष्णमार्गम् महान्तम् ॥ १९ ॥

तं हुवेम यतस्रुचः सुभासं शुक्रशोचिषम् । विशामग्निमजरं प्रत्नमीड्यम् ॥२०॥

तम् । हुवेम । यतऽस्रुचः । सुऽभासम् । शुक्रऽशोचिषम् ।
विशाम् । अग्निम् । अजरम् । प्रत्नम् । ईड्यम् ॥ २० ॥

वेङ्कट० तम् हुवेम गृहीतस्रुचः[7] शोभनभासम् [8]ज्वलद्दीप्तिकम् विशाम्[8] ईड्यम् अग्निम् अजरम् पुराणम् ॥ २० ॥

इति षष्ठाष्टके द्वितीयाध्याये द्वादशो वर्गः ॥

१-१. असादयत मूको. २. त्वा अ'. ३-३. °ता…दे° मूको. ४. अकुर्वन् वि'. ५. भवतः अ'. ६. मनुष्यः मूको. ७. °हीतः स्रुच वि'; °हीतः स्रुच अ'. ८-८. °ति…शि° वि'; °तिविशा° अ'.

यो अस्मै हव्यदातिभिराहुतिं मर्तोऽविधत् ।
भूरि पोषं स धत्ते वीरवद् यशः ॥ २१ ॥

यः । अस्मै । हव्यदातिऽभिः । आऽहुतिम् । मर्तः । अविधत् ।
भूरि । पोषम् । सः । धत्ते । वीरऽवत् । यशः ॥ २१ ॥

वेङ्कट० यः अस्मै ऋत्विग्भिः आहुतिम्[1] मनुष्यः करोति, भूरि[2] पोषम् सः धारयति पुत्रयुक्तां च कीर्तिम् ॥ २१ ॥

प्रथमं जातवेदसमग्निं यज्ञेषु पूर्व्यम् । प्रति स्रुगेति नमसा हविष्मती ॥ २२ ॥

प्रथमम् । जातऽवेदसम् । अग्निम् । यज्ञेषु । पूर्व्यम् । प्रति । स्रुक् । एति । नमसा । हविष्मती ॥

वेङ्कट० प्रारम्भे जातप्रज्ञम् अग्निम् यज्ञेषु मुख्यम् प्रति एति स्रुक्[3] नमस्कारेण "सह हविष्मती[4] ॥ २२ ॥

आभिर्विधेमाग्नये ज्येष्ठाभिर्व्यश्ववत् । मंहिष्ठाभिर्मतिभिः शुक्रशोचिषे ॥ २३ ॥

आभिः । विधेम । अग्नये । ज्येष्ठाभिः । व्यश्वऽवत् । मंहिष्ठाभिः । मतिऽभिः । शुक्रऽशोचिषे ॥ २३ ॥

वेङ्कट० आभिः स्तुतिभिः परिचरेम अग्नये श्रेष्ठाभिः व्यश्ववत् अस्माकम् पितृवत् पूजनीयाभिः ज्वलत्तेजसे[5] ॥ २३ ॥

नूनमर्च विहायसे स्तोमेभिः स्थूरयूपवत् । ऋषे वैयश्व दम्यायाग्नये ॥ २४ ॥

नूनम् । अर्च । विऽहायसे । स्तोमेभिः । स्थूरयूपऽवत् । ऋषे । वैयश्व । दम्याय । अग्नये ॥ २४ ॥

वेङ्कट० सम्प्रति स्तुहि महते स्तोमैः यथैव "स्थूरयूपो नामर्षिः[6] आनर्च" हे ऋषे । वैयश्व । गृहहिताय अग्नये ॥ २४ ॥

अतिथिं मानुषाणां सूनुं वनस्पतीनाम् । विप्रा अग्निमवसे प्रत्नमीळते ॥ २५ ॥

अतिथिम् । मानुषाणाम् । सूनुम् । वनस्पतीनाम् । विप्राः । अग्निम् । अवसे । प्रत्नम् । ईळते ॥ २५ ॥

वेङ्कट० निगदसिद्धा ॥ २५ ॥

इति षष्ठाष्टके द्वितीयाध्याये त्रयोदशो वर्गः ॥

महो विश्वाँ अभि षतोऽभि हव्यानि मानुषा ।
अग्ने नि षत्सि नमसाधि बर्हिषि ॥ २६ ॥

---

१. °हुतीः मूको. २. भूनि मूको. ३. स्तूल्द वि[२]; स्तु अ[१]. ४-४. °द ··· मूको. ५. °अमः मूको. ६. एरं यूपो नमर्षिः मूको. ७. °नयच मूको.

मुह । विश्वान् । अभि । सुत । अभि । हुव्यानि । मानुषा ।
अग्ने । नि । सुत्सि । नमसा । अधि । बुर्हिषि ॥ २६ ॥

वेङ्कट० महत सर्वानेव सत स्तोतॄन् अभि नि सीद । तथा मानुषाणि च हवींषि अभि निषीद 'अग्ने! संस्तुत्या' सह यज्ञे ॥ २६ ॥

वंस्वा नो वार्या पुरु वंस्व रायः पुंरुस्पृहः । सुवीर्यस्य प्रजावतो यशस्वतः ॥२७॥
वस्व । नु । वार्या । पुरु । वस्व । राय । पुरुऽस्पृहः । सुऽवीर्यस्य । प्रजाऽवंत । यशस्वत ॥२७॥

वेङ्कट० यच्छ अस्मभ्यं वरणीयानि बहूनि । वस्व धनम् बहुभि स्पृहणीयम् सुवीर्यम् प्रजावत् कीर्तिमच्चेति ॥ २७ ॥

त्वं वरो सुषाम्णेऽग्ने जनाय चोदय । सदा वसो रातिं यविष्ठ शश्वते ॥ २८ ॥
त्वम् । वरो इति । सुऽसाम्ने । अग्ने । जनाय । चोदय ।
सदा । वसो इति । रातिम् । यविष्ठ । शश्वते ॥ २८ ॥

वेङ्कट० त्वम् वरणीय! शोभनसाम्ने अग्ने! जनाय चोदय सर्वदा वासयित! धनम् युवतम! बहवे ॥ २८ ॥

त्वं हि सुप्रतूरसि त्वं नो गोमतीरिषः । महो रायः सातिमग्ने अपा वृधि ॥२९॥
त्वम् । हि । सुऽप्रतूः । असि । त्वम् । नु । गोऽमतीः । इषः ।
महः । रायः । सातिम् । अग्ने । अपं । वृधि ॥ २९ ॥

वेङ्कट० त्वम् हि 'शोभनप्रदाता भवसि'। त्वम् अस्माक पशुमन्ति अन्नानि महतश्च धनस्य देयम् अग्ने! विवृणु ॥ २९ ॥

अग्ने त्वं यशा अस्या मित्रावरुणा वह । ऋतावाना सम्राजा पूतदक्षसा ॥३०॥
अग्ने । त्वम् । यशाः । असि । आ । मित्रावरुणा । वह । ऋतऽवाना । सम्ऽराजा । पूतऽदक्षसा ॥ ३० ॥

वेङ्कट० अग्ने! त्वम् यशस्वी असि । त्वम् आ वह मित्रावरुणौ सत्यवन्तौ सम्राजौ शुद्धबलौ' ॥ ३० ॥

'इति पञ्चाष्टके द्वितीयाध्याये चतुर्दशो वर्गः' ॥

1. °ग्ने संस्तुत्या मूको. 2-2 शोभनप्रदाता भवसि मूको. 3. तद° मूको. 4-4. नास्ति मूको.

[२४]

[1]विश्वमना वैयश्व ऋषिः। इन्द्रो देवता, अन्त्यानां तिसृणां वरः सौषामिणः।
उष्णिक् छन्दः, अन्त्याऽनुष्टुप्[1]।

सखाय आ शिषामहि ब्रह्मेन्द्राय वज्रिणे।
स्तुष ऊ षु वो नृतमाय धृष्णवे ॥ १ ॥

सखायः। आ। शिषामहि। ब्रह्म। इन्द्राय। वज्रिणे।
स्तुषे। ऊँ इति। सु। वः। नृऽतमाय। धृष्णवे ॥ १ ॥

वेङ्कट० हे सखायः! वयम् आ शास्महे ब्रह्म कर्तुम् इन्द्राय वज्रिणे। तत्र सर्वेषामेव युष्माकं परार्थ[2]
नेतृतमाय धृष्णवे तस्मै अहमेव स्तौमीति ॥ १ ॥

शवसा ह्यसि श्रुतो वृत्रहत्येन वृत्रहा। मघैर्मघोनो अति शूर दाशसि ॥ २ ॥

शवसा। हि। असि। श्रुतः। वृत्रऽहत्येन। वृत्रऽहा।
मघैः। मघोनः। अति। शूर। दाशसि ॥ २ ॥

वेङ्कट० बलेन हि असि विश्रुतः वृत्रस्य हननेन [3]वृत्रहन्निति। मघैः मघवतः[3] अति [4]प्रयच्छसि
हे शूर!। एभ्यः[4] सर्वेभ्योऽस्यन्तं प्रयच्छसीति ॥ २ ॥

स नः स्तवान आ भर रयिं चित्रश्रवस्तमम्।
निरेके चिद् यो हरिवो वसुर्ददिः ॥ ३ ॥

सः। नः। स्तवानः। आ। भर। रयिम्। चित्रश्रवःऽतमम्।
निरेके। चित्। यः। हरिऽवः। वसुः। ददिः ॥ ३ ॥

वेङ्कट० स अस्मभ्यं स्तूयमान आ हर रयिम् अतिशयेनाश्चर्यवन्तम्[5]। निर्धनेऽपि यः त्वं हे हरिवः![6]
वासयिता अन्नानां दाता च भवसि ॥ ३ ॥

आ निरेकमुत प्रियमिन्द्र दर्षि जनानाम्।
धृषता धृष्णो स्तवमान आ भर ॥ ४ ॥

आ। निरेकम्। उत। प्रियम्। इन्द्र। दर्षि। जनानाम्।
धृषता। धृष्णो इति। स्तवमानः। आ। भर ॥ ४ ॥

१-१. नास्ति मूको. २. मलाय मूको. ३-३. वृत्रहेति ⋯ मघवत वि[?], वृत्र तेति ⋯ मघवन-
मं. ४-४. प्रयच्छास्याम्य मूको. ५. °वन्त मूको. ६. °रित मूको.

वेङ्कट० आ दर्षि इन्द्र! विवृतं करोषि जनानाम् निरेकम् अपि च प्रियम्। धनं निरेकं भवति विरेचनान्निर्गमनाद्वा। स त्वं धृष्टेन मनसा हे धृष्णो! स्तूयमानः धनम् अस्मभ्यम् आ हर ॥४॥

न ते॑ स॒व्यं न दक्षि॑णं॒ हस्तं॑ वरन्त आ॒मुरः॑ ।
न प॑रि॒बाधो॑ हरिवो॒ गवि॑ष्टिषु ॥ ५ ॥

न । ते॒ । स॒व्यम् । न । दक्षि॑णम् । हस्त॑म् । व॒र॒न्ते॒ । आ॒ऽमुरः॑ ।
न । प॒रि॒ऽबाधः॑ । ह॒रि॒ऽवः॒ । गोऽइ॑ष्टिषु ॥ ५ ॥

वेङ्कट० न ते सव्यम् हस्तम् न अपि दक्षिणम् हस्तम् वारयन्ति आभिमुख्येन मर्तारः प्रतियोद्धारः, न च परिबाधः परितो बाधमानाः हरिवः! गवामन्वेषणेषु ॥ ५ ॥

[1]इति षष्ठाष्टके द्वितीयाध्याये पञ्चदशो वर्गः[1] ॥

आ त्वा॒ गोभि॑रिव व्र॒जं गी॒र्भिर्ऋ॑णोम्यद्रिवः ।
आ स्मा॒ कामं॑ जरि॒तुरा मनः॑ पृण ॥ ६ ॥

आ । त्वा॒ । गोभिः॑ऽइव । व्र॒जम् । गीः॒ऽभिः । ऋ॒णो॒मि॒ । अ॒द्रि॒ऽवः॒ ।
आ । स्म॒ । काम॑म् । ज॒रि॒तुः । आ । मनः॑ । पृ॒ण ॥ ६ ॥

वेङ्कट० यथा गोपालः[2] गाः व्रजे प्रक्षिपति एवं त्वां स्तुतिभिः विध्यामि वज्रिन्!। आ[3] पूरय कामम् स्तोतुः मनः च ॥ ६ ॥

विश्वा॑नि वि॒श्वम॑नसो धि॒या नो॑ वृत्रहन्तम । उग्र॑ प्रणेत॒रधि॒ षू व॑सो गहि ॥७॥

विश्वा॑नि । वि॒श्वऽम॑नसः । धि॒या । नः॒ । वृ॒त्र॒ह॒न्ऽत॒म ।
उग्र॑ । प्र॒ने॒त॒रिति॑ प्रऽनेतः । अधि॑ । सु । व॒सो॒ इति॑ । ग॒हि॒ ॥ ७ ॥

वेङ्कट० विश्वमनसः[4] मम हे उपद्रवाणाम् अतिशयेन हन्तः! उद्गूर्ण! प्रणेतः! वासयितः! विश्वानि स्तोत्राणि कर्माणि वा धिया सुष्ठु अधि गमय ॥ ७ ॥

व॒यं ते॑ अ॒स्य वृ॑त्रहन् वि॒द्याम॑ शूर॒ नव्य॑सः । वसोः॑ स्पा॒र्हस्य॑ पुरुहूत॒ राध॑सः ।८।

व॒यम् । ते॒ । अ॒स्य । वृ॒त्र॒ऽह॒न् । वि॒द्याम॑ । शू॒र॒ । नव्य॑सः ।
वसोः॑ । स्पा॒र्हस्य॑ । पु॒रु॒ऽहू॒त॒ । राध॑सः ॥ ८ ॥

वेङ्कट० वयम् तव इदम् वृत्रहन्! लभेमहि शूर! नवतरम् वसु[5] स्पृहणीयम् पुरुहूत! साधकम् इति ॥ ८ ॥

१-१. नास्ति मूको. २. गोपालः मूको. ३. अव वि॰. ४. विश्वमदतः मूको. ५. वसुं मूको.

इन्द्र यथा ह्यस्ति तेऽपरीतं नृतो शवः । अमृक्ता रातिः पुरुहूत दाशुषे ॥९॥

इन्द्र॑ । यथा॑ । हि । अस्ति॑ । ते॒ । अप॑रिऽइतम् । नृतो॒ इति॑ । शव॑ ।
अमृ॑क्ता । रा॒ति॒ । पु॒रु॒ऽहू॒त॒ । दा॒शुषे॑ ॥ ९ ॥

वेङ्कट० इन्द्र! यथा हि ते भवति शत्रुभिः अपरिगतम्[1] बलम्, नेतः! नर्तयितः! वा, तथा पुरुहूत! रातिः च शत्रुभिः "अहिंसिता दाशुषे" भवति; त्वत्तः प्रभूतं धनं "न हिंसन्ति" शत्रवः ॥ ९ ॥

आ वृषस्व महामह महे नृतम राधसे । दृळ्हश्चिद् दृह्य मघवन् मघत्तये ॥१०॥

आ । वृ॒ष॒स्व॒ । म॒हा॒ऽम॒ह॒ । म॒हे । नृ॒ऽत॒म॒ । राध॑से ।
दृ॒ळ्हः । चि॒त् । दृ॒ह्य॒ । म॒घ॒ऽव॒न् । म॒घत्त॑ये ॥ १० ॥

वेङ्कट० आ सिञ्च स्वोदरम्, हे "अत्यन्तपूज्य! महते" नेतृतम! धनाय"। दृंहितान्यपि शत्रुपुराणि विदारय मघवन्! धनलाभाय ॥ १० ॥

'इति पञ्चाष्टके द्वितीयाध्याये षोडशो वर्गः' ॥

नू अन्यत्रा चिदद्रिवस्त्वन्नो जग्मुराशसः । मघवञ्छग्धि तव तन्न ऊतिभिः ॥११॥

नु । अ॒न्यत्र॑ । चि॒त् । अ॒द्रि॒ऽवः॒ । त्वत् । नः॒ । ज॒ग्मुः॒ । आ॒ऽशसः॑ ।
मघ॑ऽवन् । श॒ग्धि । तव॑ । तत् । नः॒ । ऊ॒तिऽभिः॑ ॥ ११ ॥

वेङ्कट० त्वत्तः "अन्यत्र पुरा अस्माकम् आशंसनानि जग्मुः अपरिज्ञानात्। इदानीम् मघवन्! देहि "तावकम् तत्" धनम् अस्मभ्यम् ऊतिभिः सह ॥ ११ ॥

नह्यङ्ग नृतो त्वदन्यं विन्दामि राधसे । राये द्युम्नाय शवसे च गिर्वणः ॥१२॥

न॒हि । अ॒ङ्ग । नृ॒तो॒ इति॑ । त्वत् । अ॒न्यम् । वि॒न्दामि॑ । राध॑से । रा॒ये । द्यु॒म्नाय॑ । शव॑से । च॒ । गि॒र्व॒णः॒ ॥१२॥

वेङ्कट० नहि अङ्ग हे नर्तयितः! त्वत्तः अन्यम् लभे अन्नाय धनाय कीर्त्यै बलाय च गिर्वणः! ॥ १२ ॥

एन्दुमिन्द्राय सिञ्चत पिबाति सोम्यं मधु । प्र राधसा चोदयाते महित्वना ॥१३॥

आ । इन्दु॑म् । इन्द्रा॑य । सि॒ञ्च॒त॒ । पिबा॑ति । सो॒म्यम् । मधु॑ ।
प्र । राध॑सा । चो॒दया॑ते॒ । म॒हि॒ऽत्व॒ना ॥ १३ ॥

---

1 अप्रतिग° अ[1]. २-२ °ता · पे मूको. ३ ३ निर्हि° मूको ४-४ 'त्यन्तमह° वि", °तन तन् म° अ[1]. ५ सना° मूको. ६-६. नास्ति मूको ७ नास्ति अ[1]. ८-८ तावन्न मूको

वेङ्कट० इन्दुम् इन्द्राय आ सिञ्चत[1]। पिबतु स सोमं [2]मधुरसं वा। अनेन[3] महत्त्वेन[2] स्तोतॄन् प्र चोदयति ॥ १३ ॥

उपो हरीणां पतिं दक्षं पृञ्चन्तमब्रवम्। नूनं श्रुधि स्तुवतो अश्व्यस्य ॥ १४ ॥
उपो इति। हरीणाम्। पतिम्। दक्षम्। पृञ्चन्तम्। अब्रवम्। नूनम्। श्रुधि। स्तुवतः। अश्व्यस्य ॥ १४ ॥

वेङ्कट० उपो अब्रवम् अश्वानाम् पतिम् बलम् पर्चयन्तम्। सम्प्रति शृणु स्तुवन्तम् वैयश्वम् विश्वमनसम् ॥ १४ ॥

नह्यङ्ग पुरा चन जज्ञे वीरतरस्त्वत्। नकी राया नैवथा न भन्दना ॥ १५ ॥
नहि। अङ्ग। पुरा। चन। जज्ञे। वीरऽतरः। त्वत्। नकिः। राया। न। एवऽथा। न। भन्दना ॥ १५ ॥

वेङ्कट० नहि अङ्ग [4]पुरा चन इन्द्र! जातः[4] त्वत्तः वीरतरः कश्चित्। न कश्चित् राया त्वत्तोऽतिरिक्तः, न अपि अवनेन, न च स्तुत्या। धनवान् रक्षकः स्तुत्यः[5] च त्वत्तोऽन्यः न जात इति ॥ १५ ॥

[6]इति पञ्चमाष्टके द्वितीयाध्याये सप्तदशो वर्गः[6] ॥

एदु मध्वो मदिन्तरं सिञ्च वाध्वर्यो अन्धसः।
एवा हि वीरः स्तवते सदावृधः ॥ १६ ॥

आ। इत्। ऊँ इति। मध्वः। मदिन्ऽतरम्। सिञ्च। वा। अध्वर्यो इति। अन्धसः।
एव। हि। वीरः। स्तवते। सदाऽवृधः ॥ १६ ॥

वेङ्कट० आ सिञ्च एव तं गृहीतम् मध्वः मदिन्तरम् सोमस्य रसम् [7]अध्वर्यो!। एवम् हि वीरः स्तूयते सदावृद्धः[7] ॥ १६ ॥

इन्द्र स्थातर्हरीणां नकिष्टे पूर्व्यस्तुतिम्। उदानंश शवसा न भन्दना ॥ १७ ॥
इन्द्र। स्थातः। हरीणाम्। नकिः। ते। पूर्व्यऽस्तुतिम्। उत्। आनंश। शवसा। न। भन्दना ॥ १७ ॥

वेङ्कट० इन्द्र! अधिष्ठातः अश्वानाम्! न कश्चित् ते प्रत्नां स्तुतिम् उद्व्याप्नोति बलेन, न अपि मन्दनया पूजनीयेन धनेन। न त्वत्तो बलवान् धनी वाऽस्तीत्यर्थः ॥ १७ ॥

तं वो वाजानां पतिमहूमहि श्रवस्यवः। अप्रायुभिर्यज्ञेभिर्वावृधेन्यम् ॥ १८ ॥
तम्। वः। वाजानाम्। पतिम्। अहूमहि। श्रवस्यवः। अप्रायुऽभिः। यज्ञेभिः। ववृधेन्यम् ॥ १८ ॥

---

१. सिञ्चतु अ[1]. २-२. °रसाभे° मूको. ३. °रेण प्रसेन मूको. ४-४. °रा ··· जा° मूको.
५. °र्यं मूको. ६-६. नास्ति मूको ७-७. °स्थवे ··· स मूको.

वेङ्कट० तम् युष्माकम् धनानाम् पतिम् द्वयामः सहायाः 'अप्रमाद्यद्भिः अप्रगच्छद्भिः'[1] वा मनुष्यैः यज्ञैः वर्धनीयम् ॥ १८ ॥

एतो न्विन्द्रं स्तवाम सखायः स्तोम्यं नरम् ।
कृष्टीर्यो विश्वा अभ्यस्त्येक इत् ॥ १९ ॥

एतो इति । नु । इन्द्रम् । स्तवाम । सखायः । स्तोम्यम् । नरम् ।
कृष्टीः । यः । विश्वाः । अभि । अस्ति । एकः । इत् ॥ १९ ॥

वेङ्कट० आगच्छत क्षिप्रम् । स्तवाम[2] इन्द्रम् हे सखायः ! स्तोमार्हम् नेतारम्, सर्वाः प्रजाः यः एकः[3] एव अभि भवति ॥ १९ ॥

अगोरुधाय गविषे द्युक्षाय दस्म्यं वचः । घृतात् स्वादीयो मधुनश्च वोचत ॥२०॥

अगोऽरुधाय । गोऽइषे । द्युक्षाय । दस्म्यम् । वचः । घृतात् । स्वादीयः । मधुनः । च । वोचत ॥२०॥

वेङ्कट० स्तुतिं यो न रुणद्धि तस्मै स्तुतिमिच्छते दीप्ताय दर्शनीयम् वचः घृतात् च मधुनः च स्वादुतरम् ब्रूत । 'वच एव म इदं घृताच्च मधुनश्च स्वादीयोऽस्तु प्रीतिः स्वादीयोऽस्त्वित्येव तदाह' इत्याश्वलायनम् (आगृ १,१,५) ॥ २० ॥

'इति षष्ठाष्टके द्वितीयाध्याये अष्टादशो वर्गः' ॥

यस्यामितानि वीर्या३ न राधः पर्येतवे । ज्योतिर्न विश्वमभ्यस्ति दक्षिणा ॥२१॥

यस्य । अमितानि । वीर्या । न । राधः । परिऽएतवे ।
ज्योतिः । न । विश्वम् । अभि । अस्ति । दक्षिणा ॥ २१ ॥

वेङ्कट० यस्य वीर्याणि न परिमितानि, न[4] धनम् शत्रुभिः परिगन्तुं शक्यम् । ज्योतिः अन्तरिक्षम् इव यस्य दानं सर्वं स्तोतृजनम् अभि भवति । यद्वा येन दत्तं धनम् अभिभवति सर्वं शत्रुम् ॥ २१ ॥

स्तुहीन्द्रं व्यश्ववदनूर्मिं वाजिनं यमम् । अर्यो गयं मंहमानं वि दाशुषे ॥ २२ ॥

स्तुहि । इन्द्रम् । व्यश्वऽवत् । अनूर्मिम् । वाजिनम् । यमम् ।
अर्यः । गयम् । मंहमानम् । वि । दाशुषे ॥ २२ ॥

वेङ्कट० स्तुहि इन्द्रम् हे विश्वमनः ![5] व्यश्ववत् अहिंसकम् । ऊर्मिर्हिंसाकर्मा[6] । बलिनम् नियन्तव्यम् अर्थिभिः । "स्वामी धनम्"[7] पूज्यमानम् वि तरति दाशुषे ॥ २२ ॥

---

१. अप्रगच्छद्भिः पग° वि[1], प्रमाद्यद्भिः प्रग° अ[2]. २. स्तुवाम मूको. ३. नास्ति मूको. ४-४. नास्ति मूको. ५. °श्वात्मनो वि[2]; श्वामनो अ[1]. ६. अर्चिर्हि° मूको. ७-७. स्वामिधनवत् मूको.

एवा नूनमुप स्तुहि वैयश्व दशमं नवम्। सुविद्वांसं चर्कृत्यं चरणीनाम् ॥ २३ ॥

एव। नूनम्। उप। स्तुहि। वैयश्व। दशमम्। नवम्। सुऽविद्वांसम्। चर्कृत्यम्। चरणीनाम्॥ २३ ॥

वेङ्कट० एवम् इदानीम् उप स्तुहि हे वैयश्व! नवानां प्राणानाम् दशमम्। "नव[1] वै[1] पुरुषे[2] 'प्राणाः' (जैना १,१३२; तैआ ५,६,९)। मनुष्येषु[3] वर्तमान[3] इन्द्रस्तेषां दशमो भवति। 'इन्द्रस्याऽऽमानं[4] दशधा[5] चरन्तम्' (तैआ ३,११,१) इति मन्त्रः। नवम् स्तुत्यम् सुविद्वांसम् भूयोभूयः कार्येषु प्रवर्तयितव्यम्[6] चरन्तीनां प्रजानाम् ॥ २३ ॥

वेत्था हि निर्ऋतीनां वज्रहस्त परिवृजम्। अहरहः शुन्ध्युः परिपदामिव ॥२४॥

वेत्थ। हि। निःऽऋतीनाम्। वज्रऽहस्त। परिऽवृजम्। अहःऽअहः। शुन्ध्युः। परिपदाम्ऽइव ॥ २४ ॥

वेङ्कट० जानीषे हि निर्ऋतीनाम् उपद्रवाणाम् वज्रहस्त! परिवर्जनम्, अहरहः यथा [7]आदित्यः (तु. पा ४,१६) परीत्य[7] पततां रक्षसां वर्जनं वेत्ति। पतिपदी समानकर्माणाविति ॥ २४ ॥

तदिन्द्राव आ भर येना दंसिष्ठ कृत्वने। द्विता कुत्साय शिश्नथो नि चोदय ॥२५॥

तत्। इन्द्र। अवः। आ। भर। येन। दंसिष्ठ। कृत्वने। द्विता। कुत्साय। शिश्नथः। नि। चोदय ॥ २५ ॥

वेङ्कट० तत् इन्द्र! रक्षणम् आ भर[8], येन रक्षणेन हे अत्यन्तदर्शनीय! कुर्वाणाय अकृत्या[9] [10]पालनम्। एतदेवाऽऽह[10]—द्वैधम् कुत्साय शत्रून् शिश्नथः त्वम्। तदस्मभ्यमपि नि चोदय इति ॥ २५ ॥

[11]इति पञ्चाष्टके द्वितीयाध्याये एकोनविंशो वर्गः[11] ॥

तमु त्वा नूनमीमहे नव्यं दंसिष्ठ सन्यसे।
स त्वं नो विश्वा अभिमातीः सक्षणिः ॥ २६ ॥

तम्। ऊँ इति। त्वा। नूनम्। ईमहे। नव्यम्। दंसिष्ठ। सन्यसे।
सः। त्वम्। नः। विश्वाः। अभिऽमातीः। सक्षणिः ॥ २६ ॥

वेङ्कट० तम् एव त्वाम् इदानीं याचामहे स्तुत्यम् हे अतिशयेन दर्शनीय! धनानां संन्यासार्थं प्रदानार्थम्। सः त्वम् अस्माकम् विश्वाः अभिमातीः सहसे[12] ॥ २६ ॥

य ऋक्षादंहसो मुचद् यो वार्यात् सप्त सिन्धुषु। वधर्दासस्य तुविनृम्ण नीनमः ॥२७॥

यः। ऋक्षात्। अंहसः। मुचत्। यः। वा। आर्यात्। सप्त। सिन्धुषु।
वधः। दासस्य। तुविऽनृम्ण। नीनमः ॥ २७ ॥

१-१. न्वैः मूको. २. °ष्वैः मूको. ३-३. प्राणम° मूको. ४. °मान मूको. ५. दशधा मूको. ६. प्रवर्तव्यम् मूको. ७-७. °त्य ··· प° मूको. ८. हर अ°. ९. कृपा. मूको. १०-१०. °लन में वाद मूको. ११-११. नास्ति मूको. १२. °सम मूको.

वेङ्कट० ऋक्ष रेचनाद् हिंसनाद्वा। य इन्द्रो रक्षसो जाताद् उपद्रवाद् मुञ्चति, स० वा [1]विपरीतात् आर्मात् सप्तसु[1] सिन्धुषु तत्कूले वर्तमानानां स्तोतॄणाम्। अथ प्रत्यक्ष — स त्वं हे बहुधन[2] उपक्षपयितु असुरस्य आयुधम् नमयेति ॥ २७ ॥

यथा॑ व॒रो सु॑षाम्णे॑ स॒निभ्य॒ आव॑हो र॒यिम्। व्य॑श्वेभ्यः सुभगे वाजिनीवति ॥ २८ ॥

यथा॑। व॒रो इति॑। सु॒ऽसाम्ने॑। स॒निऽभ्यः॑। आ। अव॑हः। र॒यिम्।
विऽअ॑श्वेभ्यः। सु॒ऽभ॒गे॒। वा॒जि॒नी॒ऽव॒ति॒ ॥ २८ ॥

वेङ्कट० 'तृचोऽन्त्य सौषाम्णस्य वरोर्दानस्तुति' (ऋअ ८,२४) इत्युक्तम्। यथा सुषाम्णे राजनि(?) पुरा भिक्षमाणेभ्य आहृत्य आ अवह[3] रयिम्, एवमिदानीमावह[3] व्यश्वेभ्य सुभगे। वाजिनीवति!। वरो।[4] इत्यत्र वक्तव्यमुक्तमिति।

शौनक — "'यथा वरो सुषाम्णे' इत्युत्तमस्त्वौपसस्तृच" (बृदे ६,६३) इति ॥ २८ ॥

आ ना॒र्यस्य॒ दक्षि॑णा॒ व्य॑श्वाँ एतु॒ सो॒मिनः॑। स्थू॒रं च॒ राधः॑ श॒तव॑त् स॒हस्र॑वत् ॥ २९ ॥

आ। ना॒र्यस्य॑। दक्षि॑णा। विऽअ॑श्वान्। ए॒तु। सो॒मिनः॑।
स्थू॒रम्। च॒। राधः॑। श॒तऽव॑त्। स॒हस्र॑ऽवत् ॥ २९ ॥

वेङ्कट० आ गच्छतु वृद्धितस्य सौषाम्णस्य वरो दक्षिणा व्यश्वान् यजमानस्य, स्थूलम् च धन शतसहस्रसङ्ख्याकम् ॥ २९ ॥

यत् त्वा॑ पृ॒च्छादी॒जा॒नः कु॑ह॒या कु॑ह॒याकृते।
ए॒षो अप॑श्रितो व॒लो गो॑म॒तीमव॑ तिष्ठति ॥ ३० ॥

यत्। त्वा॒। पृ॒च्छात्। ई॒जा॒नः। कु॒ह॒या। कु॒ह॒या॒ऽकृ॒ते॒।
ए॒षः। अप॑ऽश्रितः। व॒लः। गोऽम॑तीम्। अव॑। ति॒ष्ठ॒ति॒ ॥ ३० ॥

वेङ्कट० यदि त्वा [5]कश्चित् पृच्छति[5] क्व अस्ति हे कुहयाकृते! क्व सा इति जिज्ञासवो या पुरस्कुर्वन्ति भिक्षणप्रवृत्ता सा तथा सम्बोधिता उषा। तदानीम् अयम्[6] विवृतद्वारो वारक शत्रूणां वरिता वा भिक्षूणाम् गोमतीम् नदीं प्रति तिष्ठति, कथयसीति ॥ ३० ॥

[7]इति षष्ठाष्टके द्वितीयाध्याये विंशो वर्गः[7] ॥

[२५]

[7]विश्वमना वैयश्व ऋषि। मित्रावरुणौ देवता, दशम्यादितिसृणां विश्वे देवाः। उष्णिक् छन्दः, त्रयोविंशी उष्णिग्गर्भा[7]।

ता वां॒ विश्व॑स्य गो॒पा दे॒वा दे॒वेषु॑ य॒ज्ञिया॑। ऋ॒तावा॑ना यजसे पू॒तद॑क्षसा ॥ १ ॥

१-१ °रीत सप्त° वि[२], °रीता सप्त° अ[१]. २ °बहो मूको. ३. °नीवामह मूको. ४ द्र ऋ (८,२३,२८,२६,२) भाष्यम्. वरो वि[२], पुरो अ[१]. ५ पृच्छन्न कश्चित् अ[१] ६ °द्वयम् वि[२]. ७-७ नास्ति मूको.

ता । वाम् । विश्वस्य । गोपा । देवा । देवेषु । यज्ञिया । ऋतऽवाना । यजसे । पूतऽदक्षसा ॥ १ ॥

वेङ्कट० तौ वाम्[1] विश्वस्य गोपायितारौ देवौ देवेषु यज्ञियौ भजथः [2]यजमानम्। महान्तौ[2] वीरौ यज्ञवन्तौ यजसे विश्वमनः! पूतबलौ ॥ १ ॥

मित्रा तना न रथ्या वरुणो यश्च सुक्रतुः । सनात् सुजाता तनया धृतव्रता ॥२॥

मित्रा । तना । न । रथ्या । वरुणः । यः । च । सुऽक्रतुः । सनात् । सुऽजाता । तनया । धृतऽव्रता ॥२॥

वेङ्कट० मित्रावरुणौ धनानीव नेतारौ, वरुणः यः च सुक्रतुः मित्रश्च, सनातनौ सुजन्मानौ अदितेः तनयौ धृतकर्माणौ ॥ २ ॥

ता माता विश्ववेदसासुर्याय प्रमहसा । मही जजानादितिर्ऋतावरी ॥ ३ ॥

ता । माता । विश्वऽवेदसा । असुर्याय । प्रऽमहसा । मही । जजान । अदितिः । ऋतऽवरी ॥३॥

वेङ्कट० तौ माता[3] सर्वधनौ प्रकृष्टस्थानौ असुराणां हन्त्रे बलाय महती जजान अदितिः सत्यवती ॥ ३ ॥

महान्ता मित्रावरुणा सम्राजा देवावसुरा । ऋतावानावृतमा घोषतो बृहत् ॥४॥

महान्ता । मित्रावरुणा । सम्ऽराजा । देवौ । असुरा । ऋतऽवानौ । ऋतम् । आ । घोषतः । बृहत् ॥ ४ ॥

वेङ्कट० महान्तौ मित्रावरुणौ सम्राजौ देवौ सत्यप्रज्ञौ[4] सत्यवन्तौ सत्यम् आघोषयन्तौ महत् प्रकाशयत इति ॥ ४ ॥

नपाता शवसो महः सूनू दक्षस्य सुक्रतू । सृप्रदानू इषो वास्त्वधि क्षितः ॥५॥

नपाता । शवसः । महः । सूनू इति । दक्षस्य । सुक्रतू इति सुऽक्रतू ।
सृप्रदानू इति सृप्रऽदानू । इषः । वास्तु । अधि । क्षितः ॥ ५ ॥

वेङ्कट० पुत्रौ महतः वेगस्य बलस्य च पुत्रौ सुकर्माणौ प्रसृतदानौ अन्नस्य वास्तुनि यज्ञे अधि वसतः ॥ ५ ॥

[5]इति पञ्चाष्टके द्वितीयाध्याये एकविंशो वर्गः[5] ॥

सं या दानूनि येमथुर्दिव्याः पार्थिवीरिषः । नभस्वतीरा वां चरन्तु वृष्टयः ॥६॥

सम् । या । दानूनि । येमथुः । दिव्याः । पार्थिवीः । इषः ।
नभस्वतीः । आ । वाम् । चरन्तु । वृष्टयः ॥ ६ ॥

---

१. =युवाम् इति द्र. २-२. अधारम...ं महता मूको. ३. मित्रा मूको. ४. प्रज्ञौ वि'.
५-५. नास्ति मूको.

वेङ्कट० सम् येमथु यौ युवां देवानि[1] धनानि दिव्यानि पार्थिवानि च। तौ धाम् उदकवस्य वृष्टय आ चरन्तु उपतिष्ठन्तु ॥ ६ ॥

अधि या बृहतो दिवोऽभि यूथेव पश्यतः। ऋतावाना सम्राजा नमसे हिता ॥७॥

अधि। या। बृहत.। दिव। अभि। यूथाऽइव। पश्यत।
ऋतऽवाना। सम्ऽराजा। नमसे। हिता ॥ ७ ॥

वेङ्कट० यौ महत. देवान् अधि पश्यत, यथा गोयूथानि ऋषभ अभि[2] पश्यति, सत्यवन्तौ सम्राजौ हविषे हितौ ॥ ७ ॥

ऋतावाना नि षेदतुः साम्राज्याय सुक्रतू। धृतव्रता क्षत्रिया क्षत्रमाशतुः ॥ ८ ॥

ऋतऽवाना। नि। सेदतु। साम्ऽराज्याय। सुक्रतू इति सुऽक्रतू।
धृतऽव्रता। क्षत्रिया। क्षत्रम्। आशतुः ॥ ८ ॥

वेङ्कट० ऋतावानौ नि सेदतु साम्राज्यार्थम् सुप्रज्ञौ धृतकर्माणौ क्षत्रियौ 'बलम् च आगच्छताम्'[3] ॥ ८ ॥

अक्ष्णश्चिद् गातुवित्तरानुल्बणेन चक्षसा। नि चिन्मिषन्ता निचिरा नि चिक्यतुः ॥९॥

अक्ष्ण। चित्। गातुवित्ऽतरा। अनुल्बणेन। चक्षसा।
नि। चित्। मिषन्ता। निऽचिरा। नि। चिक्यतु ॥ ९ ॥

वेङ्कट० चक्षुप[4] अपि अतिशयेन [5]गातुकान् एव वेत्तारौ। गातु[5] गमनाद् जङ्गम सर्वं प्राणिजातम्। अनुल्बणेन तेजसा अहोरात्रयोर्व्याप्तेन। आमेहतेज उल्बण भवति, नैवमनयो। नि चिक्यतु सर्वं नि मिषन्तौ[6] नितरा पुराणौ ॥ ९ ॥

उत नो देव्यदितिरुरुष्यतां नासत्या। उरुष्यन्तु मरुतो वृद्धशवसः ॥ १० ॥

उत। न। देवी। अदिति। उरुष्यताम्। नासत्या। उरुष्यन्तु। मरुत। वृद्धऽशवस ॥ १० ॥

वेङ्कट० अपि च अस्मान्[7] देवी अदिति रक्षतु। रक्षतां च नासत्यौ। रक्षन्तु मरुत च प्रवृद्धवेगा.। 'मैत्रावरुण सूक्तम्। दशम्याद्या वैश्वदेव्य' (तु. ऋअ ८.२५) ॥ १० ॥

[8]इति षष्ठाष्टके द्वितीयाध्याये द्वाविंशो वर्ग.[8] ॥

ते नो नावमुरुष्यत दिवा नक्तं सुदानवः। अरिष्यन्तो नि पायुभिः सचेमहि ॥११॥

---

१. देवानि मूको. २. नास्ति मूको ३-३. बलवाश्चागच्छतु मूको. ४ अक्ष्ण अ[1] ५-५. गातुका एव गातु विगन्तार एव गातु अ[1]. ६ द्विषन्तौ मूको ७. अस्मभ्यम् वि[1], आयताम् अस्मभ्यम् अ[1] ८-८. नास्ति मूको.

ते। नः। नावम्। उरुष्यत। दिवा। नक्तम्। सुऽदानवः।
अरिष्यन्तः । नि । पायुऽभिः । सचेमहि ॥ ११ ॥

वेङ्कट० ते अस्माकम् नावम् रक्षत दिवा नक्तम् च हे सुदाना![1]। अरिष्टा भवन्तः[2] ततः नि सचेमहि[3] पालनैः ॥ ११ ॥

अघ्नते विष्णवे वयमरिष्यन्तः सुदानवे । श्रुधि स्वयावन्त्सिन्धो पूर्वचित्तये ॥१२॥

अघ्नते । विष्णवे । वयम् । अरिष्यन्तः । सुऽदानवे ।
श्रुधि । स्वऽयावन् । सिन्धो इति । पूर्वऽचित्तये ॥ १२ ॥

वेङ्कट० अहिंसते[4] विष्णवे वयम् अरिष्यन्तः शोभनदानाय स्तुतिं कुर्मः। अथ प्रत्यक्षमाह—शृणु हे स्वयावन्!। स्वयमेव यो दिवि याति[5]। स्यन्दमान![6] यजमानाय। [7]चितिः कर्म, आदौ यः कर्म[7] अनुतिष्ठति। मन्त्रस्तु—'स चितिभिर्नि हि चकार मर्त्यम्' (ऋ १, १६४,२९) इति ॥ १२ ॥

तद् वार्यं वृणीमहे वरिष्ठं गोपयत्यम् । मित्रो यत् पान्ति वरुणो यदर्यमा ॥ १३ ॥

तत् । वार्यम् । वृणीमहे । वरिष्ठम् । गोपयत्यम् ।
मित्रः । यत् । पान्ति । वरुणः । यत् । अर्यमा ॥ १३ ॥

वेङ्कट० तत् धनम् वृणीमहे वरिष्ठम् रक्षकं रक्षणीयं [8]वा। यत् रक्षन्ति[8] मित्रादयः। अस्मदीयस्य धनस्य रक्षकाश्च भवन्त्विति ॥ १३ ॥

उत नः सिन्धुरपां तन्मरुतस्तदश्विना । इन्द्रो विष्णुर्मीढ्वांसः सजोषसः ॥ १४ ॥

उत। नः। सिन्धुः। अपाम्। तत्। मरुतः। तत्। अश्विना। इन्द्रः। विष्णुः। मीढ्वांसः। सऽजोषसः ॥१४

वेङ्कट० अपि च अस्माकम् अपाम् सिन्धुः पर्जन्यः तत् रक्षतु, तत्[9] धनम् मरुतः, तत् अश्विनौ इन्द्रः विष्णुः च कामानां सेक्तारः सङ्गताः रक्षन्त्विति ॥ १४ ॥

ते हि ष्मा वनुषो नरोऽभिमातिं कयस्य चित् ।
तिग्मं न क्षोदः प्रतिघ्नन्ति भूर्णयः ॥ १५ ॥

ते । हि । स्म । वनुषः । नरः । अभिऽमातिम् । कयस्य । चित् ।
तिग्मम् । न । क्षोदः । प्रतिऽघ्नन्ति । भूर्णयः ॥ १५ ॥

---

१. सुदा वि[१]; सुदाना अ[१]. २. भवते वि[२]; भावतं अ[१]. ३. निषेचे[°] मूको. ४. हिंसते मूको. ५. यानि वियति वि[२]; यानि वियाति अ[१]. ६. °मानाय मूको. ७-७. चितिकर्मादियस्मै मूको. ८-८. वामद्रक्षमिति मूको. ९. नास्ति अ[१].

वेङ्कट० ते हि भजमानस्य [1]नेतार अभिमानिन मदम्[1] कस्य चिदपि प्रतिघ्नन्ति क्षिप्रा । यथा तीक्ष्णम् उदकं गच्छद् अग्रत स्थितम् उन्मूलयति ॥ १५ ॥

[2]इति षष्ठाष्टके द्वितीयाध्याये त्रयोविंशो वर्गः[2] ॥

अयमेकं इत्था पुरूरु चष्टे वि विश्पतिः । तस्य व्रतान्यनु वश्चरामसि ॥ १६ ॥

अयम् । एकः । इत्था । पुरु । उरु । चष्टे । वि । विश्पतिः । तस्य । व्रतानि । अनु । वः । चरामसि ॥

वेङ्कट० अयम् एक सूर्यः इत्थ पुरूणि उरूणि[3] च पश्यति विशां पालयिता । तस्य व्रतानि अनु चराम युष्मदर्थम् । अनुचरति आस्वादनकर्मा(?) ॥ १६ ॥

अनु पूर्वाण्योक्या साम्राज्यस्य सश्चिम । मित्रस्य व्रता वरुणस्य दीर्घश्रुत् ॥१७॥

अनु । पूर्वाणि । ओक्या । साम्ऽराज्यस्य । सश्चिम । मित्रस्य । व्रता । वरुणस्य । दीर्घऽश्रुत् ॥१७॥

वेङ्कट० क्रमेण सश्चिम प्रत्नानि गृहहितानि[4] सम्राजो वरुणस्य । तदेवाऽऽह—मित्रस्य कर्माणि वरुणस्य च[5] दीर्घश्रुत अनुसश्चिमेति ॥ १७ ॥

परि यो रश्मिना दिवोऽन्तान् ममे पृथिव्याः ।
उभे आ पप्रौ रोदसी महित्वा ॥ १८ ॥

परि । यः । रश्मिना । दिवः । अन्तान् । ममे । पृथिव्याः ।
उभे इति । आ । पप्रौ । रोदसी इति । महिऽत्वा ॥ १८ ॥

वेङ्कट० य द्यावापृथिव्यो अन्तान् रश्मिना परि मिनोति । उभौ स द्यावापृथिव्यौ महत्त्वेन आ पूरयति वरुण ॥ १८ ॥

उदु ष्य शरणे दिवो ज्योतिरयंस्त सूर्यः । अग्निर्न शुक्रः समिधान आहुतः ॥१९॥

उत् । ऊँ इति । स्यः । शरणे । दिवः । ज्योतिः । अयंस्त । सूर्यः ।
अग्निः । न । शुक्रः । सम्ऽइधानः । आऽहुतः ॥ १९ ॥

वेङ्कट० उत् यच्छति अयम् आदित्यस्य आवास ज्योति आत्मीयम् अवस्थितो वरुण सुदीर्घं अग्नि इव[1] ज्वलन् समिध्यमान आहुत ॥ १९ ॥

वचो दीर्घप्रसद्मनीशे वाजस्य गोमतः । ईशे हि पित्वोऽविषस्य दावने ॥ २० ॥

---

१ °रो हि मदन मूको. २ २. नास्ति मूको. ३ नास्ति मूको. ४ ग्रहगृहीतानि मूको. ५ नास्ति वि[2].

वर्च । दीर्घऽप्रसद्मनि । ईशे । वाजस्य । गोऽमतः । ईशे । हि । पित्वः । अविषस्य । दावने ॥

वेङ्कट० [1]वचः स्तुहि[2] दीर्घप्रततसदने[3] वरुणम्। स वरुण ईष्टे अन्नस्य पशुमत, ईष्टे हि अन्नम् अविषम् दानुम् ॥ २० ॥

'इति षष्ठाष्टके द्वितीयाध्याये चतुर्विंशो वर्गः' ॥

तत् सूर्यं रोदसी उभे दोषा वस्तोरुप ब्रुवे । भोजेष्वस्माँ अभ्युच्चरा सदा ॥२१॥

तत् । सूर्यम् । रोदसी इति । उभे इति । दोषा । वस्तोः । उप । ब्रुवे ।
भोजेषु । अस्मान् । अभि । उत् । चर । सदा ॥ २१ ॥

वेङ्कट० तत् सुवीर्यं वारुणं तेन द्यावापृथिव्यौ च दोषा वस्तो अहम् उप स्तौमि। स त्वं वरुण! स्तूयमानो दातृषु अस्मान् अभि उत् चर सदा प्रेरय ॥ २१ ॥

ऋज्रमुक्षण्यायने रजतं हरयाणे । रथं युक्तमसनाम सुषामणि ॥ २२ ॥

ऋज्रम् । उक्षण्यायने । रजतम् । हरयाणे । रथम् । युक्तम् । असनाम । सुऽसामनि ॥ २२ ॥

वेङ्कट० ऋजुगामिनम् अश्वम् उक्षण्यायने वरौ राजनि असनाम[4]। रजतम् असनाम हरयाणे। अथ सुषामणि वरौ[5] युक्तम् कञ्चन रथम् लब्धवन्तः प्रसादादेव वै तेषां देवानामिति ॥ २२ ॥

ता मे अश्व्यानां हरीणां नितोशना । उतो नु कृत्व्यानां नृवाहसा ॥ २३ ॥

ता । मे । अश्व्यानाम् । हरीणाम् । निऽतोशना । उतो इति । नु । कृत्व्यानाम् । नृऽवाहसा ॥२३॥

वेङ्कट० प्रतिगृहीतानश्वानाह — तौ[6] मे अश्वसङ्घानां हरितौ[7] मध्ये अत्यन्तं शत्रूणां बाधकौ। अपि च कर्तव्यानाम् युद्धानां नृणां वोढारौ ॥ २३ ॥

स्मदभीशू कशावन्ता विप्रा नविष्ठया मती । महो वाजिनावर्वन्ता सचासनम् ॥२४॥

स्मदभीशू इति स्मत्ऽअभीशू । कशाऽवन्ता । विप्रा । नविष्ठया । मती ।
महः । वाजिनौ । अर्वन्ता । सचा । असनम् ॥ २४ ॥

वेङ्कट० '[8]कल्याणाभीशू कशावन्तौ' मेधाविनौ[9] महतो राज्ञः सुषाम्णः अश्वौ गमनवन्तौ द्वौ सह असनम् नवतरया स्तुत्या देवान् स्तुवन्[10] प्रत्यगृह्णामिति[11] ॥ २४ ॥

'इति षष्ठाष्टके द्वितीयाध्याये पञ्चविंशो वर्गः' ॥

---

१ १. वहिस्स्तुति मूको. २. °प्रततसदेद मूको ३-३. नास्ति मूको ४. असमान मूको ५. वरो मूको. ६. ते मूको. ७ हरता मूको. ८-८. °णामिशुनशा° मूको. ९ °विनो मूको १० स्तुन्वन् मूको. ११. °ह्णादिति मूको

[२६]

[1]विश्वमना वैयश्व ऋषिः, व्यश्वो वा आङ्गिरसः । अश्विनौ देवता, अन्त्यानां पञ्चानां
वायुः । उष्णिक् छन्दः, षोडश्याद्येकोनविंश्यन्ता एकविंशी-
पञ्चविंश्यौ च गायत्र्यौ, विंशी अनुष्टुप्[1] ।

युवोरु षू रथं हुवे सधस्तुत्याय सूरिषु । अतूर्तदक्षा वृषणा वृषण्वसू ॥ १ ॥

युवोः । ऊँ इति । सु । रथम् । हुवे । सधऽस्तुत्याय । सूरिषु ।
अतूर्तऽदक्षा । वृषणा । वृषण्वसू इति वृषण्ऽवसू ॥ १ ॥

वेङ्कट० युवयोरेव रथम् सुष्ठु ह्वयामि सह भवन्तौ स्तोतृ माजानां मध्ये हे अहिंसितबलौ ! वर्षितारौ !
वृष्यमाणधनौ[2] ॥ १ ॥

युवं वरो सुषाम्णे महे तने नासत्या । अवोभिर्याथो वृषणा वृषण्वसू ॥ २ ॥

युवम् । वरो इति । सुऽसाम्ने । महे । तने । नासत्या ।
अवःऽभिः । याथः । वृषणा । वृषण्वसू इति वृषण्ऽवसू ॥ २ ॥

वेङ्कट० युवम् सुषाम्णे राजनि(?) महते धनाय अस्माकं हे नासत्यौ ! पालनैः याथ वृषणौ ! कृण्वसू !
ताम् इमां स्तुतिम् । वद सम्बोधयति वरो[1] इति ॥ २ ॥

ता वामद्य हवामहे हव्येभिर्वाजिनीवसू । पूर्वीरिष इषयन्तावति क्षपः ॥ ३ ॥

ता । वाम् । अद्य । हवामहे । हव्येभिः । वाजिनीवसू इति वाजिनीऽवसू ।
पूर्वीः । इषः । इषयन्तौ । अति । क्षपः ॥ ३ ॥

वेङ्कट० तौ वाम् अद्य हवामहे हविर्भिः हे अन्नधनौ[1] बहूनि अन्नानि अधिगच्छन्तौ क्षपायाः
अतिक्रमणे ॥ ३ ॥

आ वां वाहिष्ठो अश्विना रथो यातु श्रुतो नरा । उप स्तोमान् तुरस्य दर्शथः श्रिये ॥४॥

आ । वाम् । वाहिष्ठः । अश्विना । रथः । यातु । श्रुतः । नरा । उप । स्तोमान् । तुरस्य । दर्शथः । श्रिये ॥४॥

वेङ्कट० आ यातु युवयोः वोढृतम[2] रथः अश्विनौ[1] नेतारौ[1] विश्रुतः । उप दर्शथ स्तोमान् क्षिप्रस्य
स्तोतुः श्रयणम्[3] ॥ ४ ॥

जुहुराणा चिदश्विना मन्येथां वृषण्वसू । युवं हि रुद्रा पर्षथो अति द्विषः ॥ ५ ॥

---

१ १. नास्ति मूको. २. वोतम मूको. ३. श्रियर्थम् मूको.

जुहुराणा । चित् । अश्विना । आ । मन्येथाम् । वृषण्वसू इति वृषण्ऽवसू ।
युवम् । हि । रुद्रा । पर्षथः । अति । द्विषः ॥ ५ ॥

वेङ्कट० कुटिलानि पापानि अश्विनौ! युवाम्[1] आभिमुख्येन जानीथः वृषण्वसू[2]। युवाम् हि स्तुत्यौ! क्रूरौ! वा शत्रून् अति पर्षथः ॥ ५ ॥

[3]इति षष्ठाष्टके द्वितीयाध्याये षड्विंशो वर्गः[3] ॥

दस्रा हि विश्वमानुषङ् मक्षूभिः परिदीयथः । धियंजिन्वा मधुवर्णा शुभस्पती ॥ ६ ॥
दस्रा । हि । विश्वम् । आनुषक् । मक्षुऽभिः । परिऽदीयथः ।
धियम्ऽजिन्वा । मधुऽवर्णा । शुभः । पती इति ॥ ६ ॥

वेङ्कट० दस्रौ हि विश्वम् अनुषक्तं क्षिप्रैः अश्वैः परिगच्छथः कर्माणि प्रीणयन्तौ[4] मधुवर्णौ उदकपती[4] ॥ ६ ॥

उप नो यातमश्विना राया विश्वपुषा सह । मघवाना सुवीरावनपच्युता ॥ ७ ॥
उप । नः । यातम् । अश्विना । राया । विश्वऽपुषा । सह । मघऽवाना । सुऽवीरौ । अनपऽच्युता ॥ ७ ॥

वेङ्कट० उप आ यातम् अस्मान् अश्विनौ! धनेन विश्वस्य पोषकेण सह धनवन्तौ सुवीरौ अनपच्युतौ[5] ॥ ७ ॥

आ मे अस्य प्रतीव्य१मिन्द्रनासत्या गतम् । देवा देवेभिरद्य सचनस्तमा ॥ ८ ॥
आ । मे । अस्य । प्रतीव्यम् । इन्द्रनासत्या । गतम् । देवा । देवेभिः । अद्य । सचनःऽतमा ॥ ८ ॥

वेङ्कट० आ गच्छतम् मम अस्य स्तोत्रस्य प्रतीव्यम्[7] अग्रे इन्द्रनासत्यौ! देवौ देवैः अद्य अत्यन्तं सेव्यमानौ[8] ॥ ८ ॥

वयं हि वां हवामह उक्षण्यन्तो व्यश्ववत् । सुमतिभिरुप विप्राविहा गतम् ॥ ९ ॥
वयम् । हि । वाम् । हवामहे । उक्षण्यन्तः । व्यश्वऽवत् । सुमतिऽभिः । उप । विप्रौ । इह । आ । गतम् ॥ ९ ॥

वेङ्कट० वयम् हि वाम् हवामहे सेक्तारौ कामयमानाः पितृवत् । सुमतिभिः उप आ गतम् इह हे मेधाविनौ! ॥ ९ ॥

अश्विना स्वृषे स्तुहि कुवित् ते श्रवतो हवम् । नेदीयसः कूळयातः पणीँरुत ॥ १० ॥

---

१. त्वाम् वि. २. वृषण्वती मूको. ३-३. नास्ति मूको. ४. प्रियन्तौ वि[1]; °ओ वा अ[1].
५. °वनौ मूको. ६. अच्युतौ वि[2]. ७. प्रतीप्यम् वि[1]; प्रदीप्यम् अ[1]. ८. सेवमानौ मूको.

अश्विनो । सु । ऋषे । स्तुहि । कुवित् । ते । श्रवतः । हवम् ।
नेदीयसः । कूळयातः । पणीन् । उत ॥ १० ॥

वेङ्कट० सुष्ठु [1]स्तुहि अश्विनौ[1] ऋषे! । यद्वु ते ह्वानम् अश्विनौ शृणुतः । अन्तिकतमान् अपि च हिंस्रः[2] पणीन्[3] अश्विनौ इति ॥ १० ॥

[3]इति षष्ठाष्टके द्वितीयाध्याये सप्तविंशो वर्गः[3] ॥

वैयश्वस्य श्रुतं नरोतो मे अस्य वेदथः । सजोषसा वरुणो मित्रो अर्यमा ॥ ११ ॥
वैयश्वस्य । श्रुतम् । नरा । उतो इति । मे । अस्य । वेदथः ।
सऽजोषसा । वरुणः । मित्रः । अर्यमा ॥ ११ ॥

वेङ्कट० वैयश्वस्य विश्वमनसः[4] मम अपि च नरौ![5] शृणुतं[6] ह्वानम् । अपि च तत् मदीयं आनीतम् । अथ तत्[7] सङ्गतौ मित्रावरुणौ अर्यमा च शृण्वन्तु इति ॥ ११ ॥

युवादत्तस्य धिष्ण्या युवानीतस्य सूरिभिः । अहरहर्वृषणा मह्यं शिक्षतम् ॥ १२ ॥
युवाऽदत्तस्य । धिष्ण्या । युवाऽनीतस्य । सूरिऽभिः । अहःऽअहः । वृषणा । मह्यम् । शिक्षतम् ॥ १२ ॥

वेङ्कट० युवाभ्यां यत् स्तोतृभ्यः दीयते हे धिषणार्हौ!, युवाभ्यां यत् नीयते स्तोतृभ्यः, अहरहः वृषणौ![8] मह्यम् च तत्त्वाम् शिक्षतम्[9] ॥ १२ ॥

यो वां यज्ञेभिरावृतोऽधिवस्त्रा वधूरिव । सपर्यन्ता शुभे चक्राते अश्विना ॥ १३ ॥
यः । वाम् । यज्ञेभिः । आऽवृतः । अधिऽवस्त्रा । वधूःऽइव ।
सपर्यन्ता । शुभे । चक्राते इति । अश्विना ॥ १३ ॥

वेङ्कट० यः मनुष्यः युवयोः यज्ञैः परिवृतः[10], उपरिनिहितवस्त्रा वधूः इव वस्त्रेण तम् अश्विनौ सपर्यन्तौ शुभे चक्राते परिचरन्तौ इति । परोक्ष उत्तरः ॥ १३ ॥

यो वामुरुव्यचस्तमं चिकेतति नृपाय्यम् । वर्तिरश्विना परि यातमस्मयू ॥ १४ ॥
यः । वाम् । उरुव्यचःऽतमम् । चिकेतति । नृऽपाय्यम् ।
वर्तिः । अश्विना । परि । यातम् । अस्मयू इत्यस्मऽयू ॥ १४ ॥

१-१. तुभ्यमश्वि° वि[2]; तुभ्यश्वि° अ[1]. २. हिंसत मूको. ३-३. °णीनपि च मूको. ४-४. नास्ति मूको. ५. °क्षम° मूको. ६. नराः मूको. ७. शृणुत मूको. ८. तम् मूको. ९. वृषणो मूको. १०. नास्ति अ[1]. ११. परिदित मूको.

वेङ्कट० यः वाम् अत्यन्तं व्याप्तम् नेतृभ्यां पातव्यं सोमम् सुष्यते, तस्य[1] मार्गम् अश्विनौ! परि
गच्छतम् मां कामयमानौ ॥ १४ ॥

अस्मत्र्यं सु वृषण्वसू यातं वर्तिर्नृपाय्यम् । विषुद्रुहेव यज्ञमूहथुर्गिरा ॥ १५ ॥

अस्मत्र्यम् । सु । वृषण्वसू इति वृषण्ऽवसू । यातम् । वर्तिः । नृऽपाय्यम् ।
विषुद्रुहाऽइव । यज्ञम् । ऊहथुः । गिरा ॥ १५ ॥

वेङ्कट० अस्मदर्थम् वृषण्वसू! सुष्ठु यातम्[2] मार्गम् नृपाय्यम्[3] सोमं प्रति । युवाम् स्तुत्या यज्ञम्
ऊहथुः मनुष्येषु । "विषुद्रुक् शरो"[4] भवति विष्वग् हिनस्तीति तेन यथा मृगम् अभिलषितं
देशं प्रापयति तद्वत् इति ॥ १५ ॥

[5]इति पञ्चाष्टके द्वितीयाध्याये अष्टाविंशो वर्गः[5] ॥

वाहिष्ठो वां हवानां स्तोमो दूतो हुवन्नरा । युवाभ्यां भूत्वश्विना ॥ १६ ॥

वाहिष्ठः । वाम् । हवानाम् । स्तोमः । दूतः । हुवत् । नरा । युवाभ्याम् । भूतु । अश्विना ॥१६॥

वेङ्कट० वोढृतमः वाम् स्तोत्राणां मध्ये मदीयः स्तोमः दूतभूतः[6] आह्वयति हे नरौ! । स चायं स्तोमः
युवाभ्याम् भवतु प्रियकरः अश्विनौ! यज्ञे ॥ १६ ॥

यददो दिवो अर्णव इषो वा मदथो गृहे । श्रुतमिन्मे अमर्त्या ॥ १७ ॥

यत् । अदः । दिवः । अर्णवे । इषः । वा । मदथः । गृहे । श्रुतम् । इत् । मे । अमर्त्या ॥ १७ ॥

वेङ्कट० "यदि अस्य"[7] द्युलोकस्य 'अर्णवे अपां स्थाने'[8] मदथः अपि च इच्छतः यजमानस्य गृहे,
शृणुतम् एव मम स्तोत्रम् अमर्त्यौ! । यद्वा अदः[9] अमुष्मिन् इत्यर्थः ॥ १७ ॥

उत स्या श्वैतयावरी वाहिष्ठा वां नदीनाम् । सिन्धुर्हिरण्यवर्तनिः ॥ १८ ॥

उत । स्या । श्वैतऽयावरी । वाहिष्ठा । वाम् । नदीनाम् । सिन्धुः । हिरण्यऽवर्तनिः ॥ १८ ॥

वेङ्कट० अपि च एषा श्वेतयावरी[10] नाम, श्वेतजला यातीति । वोढृतमा युवयोः भवतु नदीनाम्
मध्ये स्यन्दमाना हितरमणीयमार्गेति । याम् आश्रित्य नदीम् ऋषिः वसति ताम्
आह ॥ १८ ॥

स्मदेतया सुकीर्त्याश्विना श्वेतया धिया । वहेथे शुभ्रयावाना ॥ १९ ॥

---

१. नास्ति मूको. २. पार मूको. ३. नृपार्य मूको. ४-४. दुर्धरो मूको. ५-५. नास्ति मूको. ६. दूरभूत मूको. ७-७. यदीदस्य मूको. ८-८. °र्णवो वा स्थाने मदस्थाने मूको. ९. यः मूको.
१०. श्वेतावरि मूको.

स्मत् । एतया । सुऽकीर्त्या । अश्विना । श्वेतया । धिया । वहेथे इति । शुभ्रऽयावाना ॥ १९ ॥

वेङ्कट० शोभनम् एतया [1]सुष्टुत्या श्वेतया[1] धारयित्र्या नया अश्विनौ! युवाम् वहेथे[2] हे शुभ्रगमनौ! ॥ १९ ॥

युक्ष्वा हि त्वं रथासहा युवस्व पोष्या वसो ।
आन्नो वायो मधु पिबास्माकं सवना गहि ॥ २० ॥

युक्ष्व । हि । त्वम् । रथऽसहा । युवस्व । पोष्या । वसो इति ।
आत् । नः । वायो इति । मधु । पिब । अस्माकम् । सवना । आ । गहि ॥ २० ॥

वेङ्कट० अथ वायव्य.। युङ्क्ष्व[3] हि त्वम् रथस्य वहनशक्तौ वायो! रथेऽश्वौ। अथ[4] तौ अस्मासु मिश्रय आवासे[5] पोषकौ वासयितः!। अथ पिब च वायो! अस्माकम् मधु। अस्माकम् सवनानि आ गच्छ ॥ २० ॥

[6]इति षष्ठाष्टके द्वितीयाध्याये एकोनत्रिंशो वर्गः[6] ॥

तव वायवृतस्पते त्वष्टुर्जामातरद्भुत । अवांस्या वृणीमहे ॥ २१ ॥

तव । वायो इति । ऋतऽपते । त्वष्टुः । जामातः । अद्भुत । अवांसि । आ । वृणीमहे ॥ २१ ॥

वेङ्कट० तव वायो! यज्ञस्य पते! त्वष्टुः जामातः!, इविहासापेक्षम्[7], महन्! पालनानि आ वृणीमहे ॥ २१ ॥

त्वष्टुर्जामातरं वयमीशानं राय ईमहे । सुतावन्तो वायुं द्युम्ना जनासः ॥ २२ ॥

त्वष्टुः । जामातरम् । वयम् । ईशानम् । रायः । ईमहे । सुतऽवन्तः । वायुम् । द्युम्ना । जनासः ॥

वेङ्कट० त्वष्टुः जामातरम् वयम् ईश्वरम् धनानि याचामहे अभिषुतसोमा [8]वायुम् धनानि[8] च जनाः ॥ २२ ॥

वायो याहि शिवा दिवो वहस्वा सु स्वश्व्यम् । वहस्व महः पृथुपक्षसा रथे ॥ २३ ॥

वायो इति । याहि । शिव । आ । दिवः । वहस्व । सु । सुऽअश्व्यम् ।
वहस्व । महः । पृथुऽपक्षसा । रथे ॥ २३ ॥

वेङ्कट० आ याहि वायो! दिवः कल्याणम्(?)[9]। प्रापय सुष्ठु आत्मीयं शोभनाश्वसङ्घम्। प्रापय पृथुपक्षसौ अश्वौ महात्त्वम् रथे महान्तौ वाम् ॥ २३ ॥

१-१. °त्या शोभनयाश्वे° अ[?]. २. वहेथे वि[?]. ३. युङ्क्ते मूको. ४ अद मूको ५. वसौ मूको. ६-६. नास्ति मूको. ७. इविमासा° मूको. ८-८. धावुवनानि मूको. ९. स्वरस्य सम्बोधनं साधीयः. द.

त्वां हि सुप्सरस्तमं नृषदनेषु हूमहे । ग्रावाणं नाश्वपृष्ठं मंहना ॥ २४ ॥

त्वाम् । हि । सुप्सरःऽतमम् । नृऽसदनेषु । हूमहे । ग्रावाणम् । न । अश्वऽपृष्ठम् । मंहना ॥ २४ ॥

वेङ्कट० त्वाम् हि सुरूपतमम्[1] नृणां सदनेषु गृहेषु हूमहे द्दषदम् इव व्याप्तपृष्ठम् महत्त्वेन ॥ २४ ॥

स त्वं नो देव मनसा वायो मन्दानो अग्रियः । कृधि वाजाँ अपो धियः ॥२५॥

सः । त्वम् । नः । देव । मनसा । वायो इति । मन्दानः । अग्रियः ।
कृधि । वाजान् । अपः । धियः ॥ २५ ॥

वेङ्कट० सः त्वम् अस्माकम् देव! मनसा वायो! मोदमानः मुख्यः कुरु [2]अन्नानि उदकानि[2] कर्माणि च इति ॥ २५ ॥

[1]इति षष्ठाष्टके द्वितीयाध्याये त्रिंशो वर्गः[1] ॥

[२७]

[3]मनुर्वैवस्वत ऋषिः । विश्वे देवा देवता । प्रगाथश्छन्दः
(= विषमा बृहत्यः, समाः सतोबृहत्यः)[3] ।

अग्निरुक्थे पुरोहितो ग्रावाणो बर्हिरध्वरे ।
ऋचा यामि मरुतो ब्रह्मणस्पतिं देवाँ अवो वरेण्यम् ॥ १ ॥

अग्निः । उक्थे । पुरःऽहितः । ग्रावाणः । बर्हिः । अध्वरे ।
ऋचा । यामि । मरुतः । ब्रह्मणः । पतिम् । देवान् । अवः । वरेण्यम् ॥ १ ॥

वेङ्कट० मनुः वैवस्वतः । अग्निः शस्त्रे पुरोहितः । ग्रावाणः बर्हिः च यज्ञे पुरो निहिताः । ऋचा याचे मरुतः ब्रह्मणः पतिम् च देवान् च अन्यान् रक्षणम् वरणीयम् । वैश्वदेवानि सूक्तानीति ॥ १ ॥

आ पशुं गासि पृथिवीं वनस्पतीनुषासा नक्तमोषधीः ।
विश्वे च नो वसवो विश्ववेदसो धीनां भूत प्रावितारः ॥ २ ॥

आ । पशुम् । गासि । पृथिवीम् । वनस्पतीन् । उषसा । नक्तम् । ओषधीः ।
विश्वे । च । नः । वसवः । विश्वऽवेदसः । धीनाम् । भूत । प्रऽअवितारः ॥ २ ॥

वेङ्कट० हे अग्ने! त्वम् आ गच्छसि पशुम् पृथिवीम् वनस्पतीन् च तथाऽहोरात्रे च ओषधीः

1. सरू° मूको. २-२. अन्नाद्यदरानि वि°; अन्नद्यादराणि अ°. ३-३. नास्ति मूको.

च । अनेन अग्निना सह हे विश्वे अपि भवत । अस्माकं कर्मणाम् भवत [1]प्रापितारः सर्वधना ![1] ॥ २ ॥

प्र सू न एत्वध्वरो३ऽग्ना देवेषु पूर्व्यः ।
आदित्येषु प्र वरुणे धृतव्रते मरुत्सु विश्वभानुषु ॥ ३ ॥

प्र । सु । नः । एतु । अध्वरः । अग्ना । देवेषु । पूर्व्यः ।
आदित्येषु । प्र । वरुणे । धृतऽव्रते । मरुत्ऽसु । विश्वऽभानुषु ॥ ३ ॥

वेङ्कट० [2]'प्र एतु'[2] अस्माकम् अध्वरः अग्नौ देवेषु मुख्यः[3], प्र एतु आदित्येषु वरुणे च धृतकर्मणि मरुत्सु विश्वदीप्तिषु ॥ ३ ॥

विश्वे हि ष्मा मनवे विश्ववेदसो भुवन् वृधे रिशादसः ।
अरिष्टेभिः पायुभिर्विश्ववेदसो यन्ता नोऽवृकं छर्दिः ॥ ४ ॥

विश्वे । हि । स्म । मनवे । विश्वऽवेदसः । भुवन् । वृधे । रिशादसः ।
अरिष्टेभिः । पायुऽभिः । विश्वऽवेदसः । यन्त । नः । अवृकम् । छर्दिः ॥ ४ ॥

वेङ्कट० विश्वे हि स्म सर्वधना देवाः भवन्तु मनवे वर्धनाय रिशतामसितारः । अहिंसितैः पालनैः हे विश्वधनाः! प्रयच्छत अस्मभ्यम् अस्तेनम् गृहम् ॥ ४ ॥

आ नो अद्य समनसो गन्ता विश्वे सजोषसः ।
ऋचा गिरा मरुतो देव्यदिते सदने पस्त्ये महि ॥ ५ ॥

आ । नः । अद्य । सऽमनसः । गन्त । विश्वे । सऽजोषसः ।
ऋचा । गिरा । मरुतः । देवि । अदिते । सदने । पस्त्ये । महि ॥ ५ ॥

वेङ्कट० आ गच्छत[4] अस्मान् [5]अद्य सममनसः[5] सर्वे अपि सङ्गताः । ऋचा केवलया च गिरा शुश्रूषितया आगच्छत[6] निविशत[7] । मरुतः! इति वाक्यभेदाद् आमन्त्रिताद्युदात्तानि । निषदनस्थाने गृहे । महि! इति अदितेः विशेषणम् ॥ ५ ॥

[8]इति षष्ठाष्टके द्वितीयाध्याये एकत्रिंशो वर्गः[8] ॥

अभि प्रिया मरुतो या वो अश्व्या हव्या मित्र प्रयाथन ।
आ बर्हिरिन्द्रो वरुणस्तुरा नर आदित्यासः सदन्तु नः ॥ ६ ॥

1-1. प्रापितारः सर्वधनाम् मूको. 2-2. प्रैतु मूको. 3. °ख्यम् मूको. 4. गच्छ मूको. 5-5. अनन्यसममनसः वि[1]; अनन्यसनमनसः अ[1]. 6. गच्छता वि[2]; च गच्छता अ[1]. 7. °शति मूको. 8-8. नास्ति मूको.

अभि । प्रिया । मरुतः । या । वः । अश्व्या । हव्या । मित्र । प्रऽयाथन ।
आ । बर्हिः । इन्द्रः । वरुणः । तुराः । नरः । आदित्यासः । सदन्तु । नः ॥ ६ ॥

वेङ्कट० अभि प्रापयत[1] हे मरुतः ! यानि[2] वः प्रियाणि अश्व्यानि[2] अश्वसङ्घान्[3] । अथ मित्र! मरुतः! हवींषि [4]प्रयाथन । आ सीदन्तु[4] अस्माकम् बर्हिः इन्द्रादयः त्वरमाणाः नेतारः ॥ ६ ॥

वयं वो वृक्तबर्हिषो हितप्रयस आनुषक् ।
सुतसोमासो वरुण हवामहे मनुष्वदिद्धाग्नयः ॥ ७ ॥

वयम् । वः । वृक्तऽबर्हिषः । हितऽप्रयसः । आनुषक् ।
सुतऽसोमासः । वरुण । हवामहे । मनुष्वत् । इद्धऽअग्नयः ॥ ७ ॥

वेङ्कट० वयम् विस्तीर्णबर्हिषः निहितहविष्काः अनुषक्तम् सुतसोमाः वरुण! हवामहे मनुष्वत्[5] समिद्धाग्नयः[6] ॥ ७ ॥

आ प्र यात मरुतो विष्णो अश्विना पूषन् माकीनया धिया ।
इन्द्र आ यातु प्रथमः सनिष्युभिर्वृषा यो वृत्रहा गृणे ॥ ८ ॥

आ । प्र । यात । मरुतः । विष्णो इति । अश्विना । पूषन् । माकीनया । धिया ।
इन्द्रः । आ । यातु । प्रथमः । सनिष्युऽभिः । वृषा । यः । वृत्रऽहा । गृणे ॥ ८ ॥

वेङ्कट० आ प्र यात हे मरुदादयः! मदीयेन कर्मणा । इन्द्रः च[7] आ यातु मुख्यः, सम्भजनमिच्छद्भिः वृषा यः वृत्रहा स्तूयते ॥ ८ ॥

वि नो देवासो अद्रुहोऽच्छिद्रं शर्म यच्छत ।
न यद् दूराद् वसवो नू चिदन्तितो वरूथमादधर्षति ॥ ९ ॥

वि । नः । देवासः । अद्रुहः । अच्छिद्रम् । शर्म । यच्छत ।
न । यत् । दूरात् । वसवः । नु । चित् । अन्तितः । वरूथम् । आऽदधर्षति ॥ ९ ॥

वेङ्कट० वि यच्छत अस्मभ्यं देवाः! अद्रोग्धारः! अच्छिद्रम् गृहम्, दूरात् अन्तिकात् वा आगत्य कश्चित् यत् गृहम् न आधर्षति[8] हे वासयितारः! ॥ ९ ॥

अस्ति हि वः सजात्यं रिशादसो देवासो अस्त्याप्यम् ।
प्र णः पूर्वस्मै सुविताय वोचत मक्षू सुम्नाय नव्यसे ॥ १० ॥

---

१. प्रापय मूको. २-२. वोध्यान् मूको. ३. °श्वयानान् भ°. ४-४. प्रयष्टानामी दम् मूको. ५. मनुष्यान् मूको. ६. समिद्धाय वि°, समृद्धान्नाय भ°. ७. मारित मूको. ८. आधषति भ°.

अस्ति । हि । वः । सऽजात्यम् । रिशादसः । देवासः । अस्ति । आप्यम् ।
प्र । नः । पूर्वस्मै । सुवितार्य । वोचत । मक्षु । सुम्नार्य । नव्यसे ॥ १० ॥

वेङ्कट० अस्ति हि युष्माकम् सजात्यम् हे रिशतामसितारः! देवाः!, अस्ति च ज्ञातेयं वैवस्वतेन मया 'मनुना। आप्यसजात्ययो' अल्पो भेदः। प्र वोचत अस्मान् सुखाय अभ्युदयाय शीघ्रं धनाय च नवतराय उभयम् अस्माकं मृत इति ॥ १० ॥

'इति षष्ठाष्टके द्वितीयाध्याये द्वात्रिंशो वर्गः'॥

इदा हि व उपस्तुतिमिदा वामस्य भक्तये ।
उप वो विश्ववेदसो नमस्युराँ असृक्ष्यन्यामिव ॥ ११ ॥

इदा । हि । वः । उपऽस्तुतिम् । इदा । वामस्य । भक्तये ।
उप । वः । विश्वऽवेदसः । नमस्युः । आ । असृक्षि । अन्यामऽइव ॥ ११ ॥

वेङ्कट० इदानीम् हि युष्माकम् उपस्तुतिम् इदानीमेव धनस्य भजनाय उप आ असृक्षि युष्माकं हे विश्वधना' अश्वमिच्छन् अन्यामिव'। अदृष्टपूर्वां अन्वेति ॥ ११ ॥

उदु ष्य वः सविता सुप्रणीतयोऽस्थादूर्ध्वो वरेण्यः ।
नि द्विपादश्चतुष्पादो अर्थिनोऽविश्रन् पतयिष्णवः ॥ १२ ॥

उत् । ऊँ इति । स्यः । वः । सविता । सुऽप्रनीतयः । अस्थात् । ऊर्ध्वः । वरेण्यः ।
नि । द्विऽपादः । चतुःऽपादः । अर्थिनः । अविश्रन् । पतयिष्णवः ॥ १२ ॥

वेङ्कट० उत् अस्थात्' अयं युष्माकं मध्ये सविता हे सुप्रणीतयः! ऊर्ध्वः वरणीयः'। नि विशन्ते स्वेषु कार्येषु द्विपदः चतुष्पदः कार्यार्थिनः पक्षिणश्च ॥ १२ ॥

देवंदेवं वोऽवसे देवंदेवमभिष्टये ।
देवंदेवं हुवेम वाजसातये गृणन्तो देव्या धिया ॥ १३ ॥

देवम्ऽदेवम् । वः । अवसे । देवम्ऽदेवम् । अभिष्टये ।
देवम्ऽदेवम् । हुवेम । वाजऽसातये । गृणन्तः । देव्या । धिया ॥ १३ ॥

वेङ्कट० युष्माकं मध्ये' च 'देवदेवम् ह्वयामहे' रक्षणाय, अनुक्रमेण देवदेवम् अभिलषितसिद्धयर्थम्। देवदेवम् हुवेम अन्नलाभाय स्तुवन्तः देव्या प्रज्ञया ॥ १३ ॥

१-१ मनुनापि असजा° मूको. २-२. नास्ति मूको. ३. अन्यानिव मूको. ४. अस्मात् मूको. ५. वरणियः मूको. ६ मदे मूको. ७-७. देव ह्वा° मूको.

देवासो हि ष्मा मनवे समन्यवो विश्वे साकं सरातयः ।
ते नो अद्य ते अपरं तुचे तु नो भवन्तु वरिवोविदः ॥ १४ ॥

देवासः । हि । स्म । मनवे । सऽमन्यवः । विश्वे । साकम् । सऽरातयः ।
ते । नः । अद्य । ते । अपरम् । तुचे । तु । नः । भवन्तु । वरिवःऽविदः ॥ १४ ॥

वेङ्कट० देवाः हि स्म मनवे मह्यं समानमनसः सर्वे एव सह सदानाः भवन्ति । ते अस्माकम् अद्य ते च [1]अस्माकम् अन्येद्युः[1] पुत्राय च भवन्तु धनस्य लम्भयितारः ॥ १४ ॥

प्र वः शंसाम्यद्रुहः संस्थ उपस्तुतीनाम् ।
न तं धूर्तिर्वरुण मित्र मर्त्यं यो वो धामभ्योऽविधत् ॥ १५ ॥

प्र । वः । शंसामि । अद्रुहः । सम्ऽस्थे । उपऽस्तुतीनाम् ।
न । तम् । धूर्तिः । वरुण । मित्र । मर्त्यम् । यः । वः । धामऽभ्यः । अविधत् ॥ १५ ॥

वेङ्कट० प्र शंसामि युष्मान् हे अद्रोग्धारः ! संस्थाने उपस्तुतीनाम् यज्ञे । न तम् हिंसा बाधते मित्रावरुणौ ! मर्त्यम्, यः युष्माकं शरीरेभ्यः प्रयच्छति हविः ॥ १५ ॥

प्र स क्षयं तिरते वि महीरिषो यो वो वराय दाशति ।
प्र प्रजाभिर्जायते धर्मणस्पर्यरिष्टः सर्व एधते ॥ १६ ॥

प्र । सः । क्षयम् । तिरते । वि । महीः । इषः । यः । वः । वराय । दाशति ।
प्र । प्रऽजाभिः । जायते । धर्मणः । परि । अरिष्टः । सर्वः । एधते ॥ १६ ॥

वेङ्कट० प्र वर्धयति सः गृहम्, वि वर्धयति महान्ति [2]अन्नानि, यः वः धनाय[2] प्रयच्छति । प्र जायते च प्रजाभिः कर्मणोऽनन्तरम् । तथा अरिष्टः सतश्च[3] सर्वः भवति ॥ १६ ॥

[4]इति षष्ठाष्टके द्वितीयाध्याये त्रयस्त्रिंशो वर्गः[4] ॥

ऋते स विन्दते युधः सुगेभिर्यात्यध्वनः ।
अर्यमा मित्रो वरुणः सरातयो यं त्रायन्ते सजोषसः ॥ १७ ॥

ऋते । सः । विन्दते । युधः । सुऽगेभिः । याति । अध्वनः ।
अर्यमा । मित्रः । वरुणः । सऽरातयः । यम् । त्रायन्ते । सऽजोषसः ॥ १७ ॥

वेङ्कट० विनाऽपि सः युद्धात् लभते अभिलषितम्, सुगैः अध्वैश्च याति [5]मार्गान्, यम् इमे[5] सदानाः रक्षन्ति [6]सहताः सन्तः[6] ॥ १७ ॥

१-१. °के त्रि°; °कमय अ°. २-२. अन्नानि ·· ध° मूको. ३. सतत° मूको. ४-४. नास्ति मूको. ५-५. °गोन्यमीमे मूको. ६-६. °ता ··· मूको.

अग्ने चिदस्मै कृणुथा न्यञ्चनं दुर्गे चिदा सुसरणम् ।
एषा चिदस्मादशनिः परो नु सास्रेधन्ती वि नश्यतु ॥ १८ ॥

अग्ने । चित् । अस्मै । कृणुथ । निऽअञ्चनम् । दुःऽगे । चित् । आ । सुऽसरणम् ।
एषा । चित् । अस्मात् । अशनिः । परः । नु । सा । अस्रेधन्ती । वि । नश्यतु ॥ १८ ॥

वेङ्कट० गमने अपि[1] परपुरे[2] अस्मै कुरुत निगमनम् । तथा दुर्गे अपि सुसरणम्[3] । सा एषा अशनिः शत्रुविसृष्टम्[4] आयुधम् अस्मात् [5]मनोः परः[5] अहिंसती वि नश्यतु ॥ १८ ॥

यदद्य सूर्य उद्यति प्रियक्षत्रा ऋतं दध ।
यन्निम्रुचि प्रबुधि विश्ववेदसो यद् वा मध्यंदिने दिवः ॥ १९ ॥

यत् । अद्य । सूर्ये । उत्ऽयति । प्रियऽक्षत्राः । ऋतम् । दध ।
यत् । निऽम्रुचि । प्रऽबुधि । विश्वऽवेदसः । यत् । वा । मध्यंदिने । दिवः ॥ १९ ॥

वेङ्कट० यत् अद्य सूर्ये उद्गच्छति हे प्रियबला.! कल्याणम् धारयत[6], यत् वा निम्रुचि[7] सायम्, यद्वा प्रबुधि प्रातः हे विश्वधना !, 'यत् वा अह्नो मध्ये' । उत्तरत्र सम्बन्ध. ॥ १९ ॥

यद् वाभिपित्वे असुरा ऋतं यते छर्दिर्येम वि दाशुषे ।
वयं तद् वो वसवो विश्ववेदस उप स्थेयाम मध्य आ ॥ २० ॥

यत् । वा । अभिऽपित्वे । असुराः । ऋतम् । यते । छर्दिः । येम । वि । दाशुषे ।
वयम् । तत् । वः । वसवः । विश्वऽवेदसः । उप । स्थेयाम । मध्ये । आ ॥ २० ॥

वेङ्कट० यत् वा अभिप्राप्तौ हे प्राज्ञा ![8] यज्ञम् गच्छते वियेम'[9] वियच्छथ गृहम् तेजो वा यजमानाय । वयम् तत् ऋतवत् छर्दिः हे वसवः ! विश्ववेदस.![10] उप स्थेयाम, भवद्भिः प्रत्तस्य कल्याणस्य गृहस्य मध्ये तिष्ठामेति ॥ २० ॥

यदद्य सूर उदिते यन्मध्यंदिन आतुचि ।
वामं धत्थ मनवे विश्ववेदसो जुह्वानाय प्रचेतसे ॥ २१ ॥

यत् । अद्य । सूरे । उत्ऽइते । यत् । मध्यंदिने । आऽतुचि ।
वामम् । धत्थ । मनवे । विश्वऽवेदसः । जुह्वानाय । प्रऽचेतसे ॥ २१ ॥

---

१. नास्ति अ[1]. २. पुरः पुरो वि[1]; पुरे अ[1]. ३. सुसरणाम् मूको. ४. °विसृष्टम् मूको. ५-५. °नोऽपरात् मूको ६. °यद मूको. ७. नीरुचि वि[1]; नीरुत्रि अ[1]. ८-८. °द्रा होमम° मूको. ९. प्रज्ञा. वि[1]. १०. वियच्छ मूको. ११. विश्ववेदसोमस्य मूको.

वेङ्कट० यत् अद्य उदिते सूर्ये, मध्यन्दिने यत् वा आतुचि आनिम्रोचने[1] इति। अत्र तुचि[2] गमनकर्मा। धन दत्थ[3] मनवे हे विश्वधना ! जुह्वते प्रकृष्टज्ञानाय। उत्तरत्र सम्बन्ध ॥ २१ ॥

वयं तद् वः सम्राज आ वृणीमहे पुत्रो न बहुपाय्यम्।
अश्याम तदादित्या जुह्वतो हविर्येन वस्योऽनशामहै ॥ २२ ॥

वयम्। तत्। वः। सम्ऽराज। आ। वृणीमहे। पुत्रः। न। बहुऽपाय्यम्।
अश्याम। तत्। आदित्या। जुह्वत। हवि। येन। वस्य। अनशामहै ॥ २२ ॥

वेङ्कट० वयम्[4] युष्माकम् तत् हे सम्राज ! आ वृणीमहे 'पुत्र न'[5] बहुभि भोज्यम्। अश्याम तत् वयम् हे आदित्या ! हवि जुह्वत, येन श्रेयस्त्वम् अश्नुवीमहीति ॥ २२ ॥

[6]इति षष्ठाष्टके द्वितीयाध्याये चतुस्त्रिंशो वर्ग[6] ॥

[२८]

[6]मनुर्वैवस्वत ऋषि। विश्वे देवा देवता। गायत्री छन्द, चतुर्थी पुरउष्णिक्[6]।

ये त्रिंशति त्रयस्परो देवासो बर्हिरासदन्। विदन्नह द्वितासनन् ॥ १ ॥

ये। त्रिंशति। त्रय। पर। देवास। बर्हि। आ। असदन्। विदन्। अह। द्विता। असनन् ॥ १ ॥

वेङ्कट० य त्रिंशति त्रय परस्तात् तु। त्रयस्त्रिंशद्देवा इत्यर्थ। देवा बर्हि आ सीदन्ति, ते अजानन्। तस्मात् "द्विता द्वैध"[7] च प्रयच्छन्तु उभाभ्या हस्ताभ्याम्। यद्वा पुन पुन ॥ १ ॥

वरुणो मित्रो अर्यमा स्मद्रातिषाचो अग्नयः। पत्नीवन्तो वषट्कृताः ॥ २ ॥

वरुण। मित्र। अर्यमा। स्मद्रातिऽसाच। अग्नय। पत्नीऽवन्त। वषट्ऽकृता ॥ २ ॥

वेङ्कट० वरुण मित्र अर्यमा कल्याणदानभाजना अग्नय च नानाविधा सपत्नीका ते मया वषट्कृता ॥ २ ॥

ते नो गोपा अपाच्यास्त उदक्त इत्था न्यक्। पुरस्तात् सर्वया विशा ॥ ३ ॥

ते। न। गोपा। अपाच्या। ते। उदक्। ते। इत्था। न्यक्। पुरस्तात्। सर्वया। विशा ॥ ३ ॥

वेङ्कट० अपाची[8] प्रतीची तत्र ते अस्माकम् गोपायितार, तत उदक उदीच्या। तत इत्यर्थे 'इत्था इति, ऊर्ध्वा[9] दक्षिणा वा निर्दिशति। ते न्यक् अधस्तात् पुरस्तात् च सर्वेण अनुचर-वर्गेण सह ॥ ३ ॥

---

१. निम्रोचन मूको. २. तुचि मूको ३ दत्त मूको ४ तद् वयम् भ° ५ ५. पुत्रिव मूको ६ ६ नास्ति मूको ७ ७. द्वौ द्वैत मूको ८ °पाची मूको. ९ ऊर्ध्वा मूको

यथा वशन्ति देवास्तथेदसत् तदेषां नकिरा मिनत् । अरावा चन मर्त्यः ॥४॥

यथा । वशन्ति । देवाः । तथा । इत् । असत् । तत् । एषाम् । नकिः । आ । मिनत् । अरावा । चन । मर्त्यः ॥

वेङ्कट० यथा कामयन्ते देवाः तथा एव तत् भवति । तत् एषाम् न कश्चित् हिनस्ति । अप्रदाताऽपि मनुष्यः देवेभ्यः प्रयच्छतीति ॥ ४ ॥

सप्तानां सप्त ऋष्टयः सप्त द्युम्नान्येषाम् । सप्तो अधि श्रियो धिरे ॥ ५ ॥

सप्तानाम् । सप्त । ऋष्टयः । सप्त । द्युम्नानि । एषाम् । सप्तो इति । अधि । श्रियः । धिरे ॥ ५ ॥

वेङ्कट० 'सप्त गणा वै[1] मरुतः गणशः'[2] (तै २,२,५,७) । तेषाम् सप्तानाम् ऋष्टयः च 'सप्त भवन्ति'[3], सप्त द्योतमानानि आयुधानि एषाम्, अपि वा सप्त अन्नानि । सप्त एव ते श्रियः अधि[4] धारयन्ति ॥ ५ ॥

[5]इति षष्ठाष्टके द्वितीयाध्याये पञ्चविंशो वर्गः[5] ॥

[२९]

[5]मनुर्वैवस्वत ऋषिः, कश्यपो वा मारीचः । विश्वे देवा देवता । द्विपदा विराट् छन्दः[5] ।

बभ्रुरेको विषुणः सूनरो युवाञ्ज्यङ्क्ते हिरण्ययम् ॥ १ ॥

बभ्रुः । एकः । विषुणः । सूनरः । युवा । अञ्जि । अङ्क्ते । हिरण्ययम् ॥ १ ॥

वेङ्कट० बभ्रुवर्णः एकः विश्वगमनः सोमः शोभननरः युवा हिरण्मयम् आभरणम् अङ्क्ते शरीरे ॥ १ ॥

योनिमेक आ ससाद द्योतनोऽन्तर्देवेषु मेधिरः ॥ २ ॥

योनिम् । एकः । आ । ससाद । द्योतनः । अन्तः । देवेषु । मेधिरः ॥ २ ॥

वेङ्कट० योनिम् गृहम् एकः अग्निः आ असीदत् अभिद्योतमानः देवानां मध्ये प्राज्ञः ॥ २ ॥

वाशीमेको बिभर्ति हस्त आयसीमन्तर्देवेषु निध्रुविः ॥ ३ ॥

वाशीम् । एकः । बिभर्ति । हस्ते । आयसीम् । अन्तः । देवेषु । निऽध्रुविः ॥ ३ ॥

वेङ्कट० वाशीम्[6] आयसीम् एकः बिभर्ति हस्ते त्वष्टा [7]देवेषु मध्ये[7] निश्चले स्थाने अवस्थितः[8] ॥ ३ ॥

वज्रमेको बिभर्ति हस्त आहितं तेन वृत्राणि जिघ्नते ॥ ४ ॥

---

१. नास्ति मूको. २ मरुतः मूको. ३-३. भवन्ति सप्त भा°. ४. वि मूको. ५-५. नास्ति मूको. ६. वाश्यां मूको. ७-७. देवम° मूको. ८. °स्थितम् मूको.

वज्रम् । एकः । बिभर्ति । हस्ते । आऽहितम् । तेन । वृत्राणि । जिघ्नते ॥ ४ ॥

वेङ्कट० वज्रम् एकः बिभर्ति इन्द्रः हस्ते निहितम्। तेन वृत्राणि हन्ति ॥ ४ ॥

तिग्ममेको बिभर्ति हस्त आयुधं शुचिरुग्रो जलाषभेषजः ॥ ५ ॥

तिग्मम् । एकः । बिभर्ति । हस्ते । आयुधम् । शुचिः । उग्रः । जलाषऽभेषजः ॥ ५ ॥

वेङ्कट० तीक्ष्णम् एकः बिभर्ति हस्ते आयुधम् पिनाकम् ज्वलन् उद्गूर्णः सुखकरभेषजः[1] ॥ ५ ॥

पथ एकः पीपाय तस्करो यथाँ एष वेद निधीनाम् ॥ ६ ॥

पथः । एकः । पीपाय । तस्करः । यथा । एषः । वेद । निऽधीनाम् ॥ ६ ॥

वेङ्कट० मार्गान् एकः पूषा रक्षति चोर इव। सोऽयं पृथिव्यां निहितान् निधीन् वेत्ति ॥ ६ ॥

त्रीण्येक उरुगायो वि चक्रमे यत्र देवासो मदन्ति ॥ ७ ॥

त्रीणि । एकः । उरुऽगायः । वि । चक्रमे । यत्र । देवासः । मदन्ति ॥ ७ ॥

वेङ्कट० त्रीणि पदानि एकः उरुकीर्तिः वि चक्रमे विष्णुः। येषु लोकेषु देवाः मदन्ति ॥ ७ ॥

विभिर्द्वा चरत एकया सह प्र प्रवासेव वसतः ॥ ८ ॥

विऽभिः । द्वा । चरतः । एकया । सह । प्र । प्रवासाऽइव । वसतः ॥ ८ ॥

वेङ्कट० अश्वैः द्वौ चरतः। एकया सूर्यया सह '[2]प्र वसतः[2]' सदा इमौ। प्रवासिनौ इव सदा अश्विनौ ॥ ८ ॥

सदो द्वा चक्राते उपमा दिवि सम्राजा सर्पिरासुती ॥ ९ ॥

सदः । द्वा । चक्राते इति । उपऽमा । दिवि । सम्ऽराजा । सर्पिरासुती इति सर्पिःऽआसुती ॥

वेङ्कट० स्थानं[3] द्वौ चक्राते उपमानभूतौ मित्रावरुणौ दिवि सम्राजौ घृतं ययोः आसूयते[4] हूयते ॥ ९ ॥

अर्चन्त एके महि साम मन्वत तेन सूर्यमरोचयन् ॥ १० ॥

अर्चन्तः । एके । महि । साम । मन्वत । तेन । सूर्यम् । अरोचयन् ॥ १० ॥

---

१. °करो भेषजः मूको. २-२. प्रवसतुः मूको. ३. स्थानात वि°; स्थान अ°. ४. आगते मूको.

वेङ्कट० अग्नयः महत् साम उच्चारयन्ति। तेन साम्ना सूर्यम् अरोचयत्[1] ॥ १० ॥

[2]इति षष्ठाष्टके द्वितीयाध्याये षट्त्रिंशो वर्गः[2] ॥

[३०]

[3]मनुर्वैवस्वत ऋषिः। विश्वे देवा देवता। प्रथमा गायत्री, द्वितीया पुरउष्णिक्, तृतीया बृहती, चतुर्थी अनुष्टुप्[3]।

नहि वो अस्त्यर्भको देवासो न कुमारकः। विश्वे सतोमहान्त इत् ॥ १ ॥

नहि। वः। अस्ति। अर्भकः। देवासः। न। कुमारकः। विश्वे। सतःऽमहान्तः। इत् ॥ १ ॥

वेङ्कट० नहि वः भवति कश्चित् अर्भकः, [4]न अपि कुमारकः[4] देवाः!। सर्वे एव सतोमहान्तः एव। सर्वस्मात् विद्यमानात् पृथिव्यादेः ये महान्तस्ते[5] सतोमहान्तः ॥ १ ॥

इति स्तुतासो असथा रिशादसो ये स्थ त्रयश्च त्रिंशच्च। मनोर्देवा यज्ञियासः ॥२॥

इति। स्तुतासः। असथ। रिशादसः। ये। स्थ। त्रयः। च। त्रिंशत्। च। मनोः। देवाः। यज्ञियासः ॥

वेङ्कट० इत्थं स्तुताः भवथ[6] हे रिशतामसितारः![7] देवाः!, ये भवथ त्रयः च त्रिंशत् च हे मनोः देवाः! यज्ञियाः! ॥ २ ॥

ते नस्त्राध्वं तेऽवत त उ नो अधि वोचत।
मा नः पथः पित्र्यान्मानवादधि दूरं नैष्ट परावतः ॥ ३ ॥

ते। नः। त्राध्वम्। ते। अवत। ते। ऊँ इति। नः। अधि। वोचत।
मा। नः। पथः। पित्र्यात्। मानवात्। अधि। दूरम्। नैष्ट। पराऽवतः ॥ ३ ॥

वेङ्कट० ते अस्मान् रक्षोभ्यः त्राध्वम्। ते रक्षत[6] धनप्रदानैः। ते अस्मान् अधि ब्रूत। मा अस्मान् पित्र्यात् मानवात् मार्गात् अपनयत। यम्[7] दूरम् मार्गं मनुष्याणां पिता मनुः चक्रे तमेव नयत[8] ॥ ३ ॥

ये देवास इह स्थन विश्वे वैश्वानरा उत।
अस्मभ्यं शर्म सप्रथो गवेऽश्वाय यच्छत ॥ ४ ॥

ये। देवासः। इह। स्थन। विश्वे। वैश्वानराः। उत।
अस्मभ्यम्। शर्म। सऽप्रथः। गवे। अश्वाय। यच्छत ॥ ४ ॥

---

१. °यत् मूको. २-२. नास्ति मूको. ३-३. नाम वि कुमा° मूको. ४. °वत मूको. ५. °ता मूको. ६ रक्षथ मूको. ७ यत् मूको. ८. नयताम् मूको.

वेङ्कट० हे [1]देवाः! ये[1] इह भवथ यज्ञे सर्वे विश्वनरहिताः। अपि च अस्मभ्यम् सर्वतः पृथु [2]सुखम् यच्छत[2], तथा अस्मदीयाय गवे अश्वाय च ॥ ४ ॥

[3]इति षष्ठाष्टके द्वितीयाध्याये सप्तत्रिंशो वर्गः[3] ॥

[३१]

[4]मनुर्वैवस्वत ऋषिः। आद्यानां चतसृणां यज्ञो यजमानश्च देवता, पञ्चम्यादिनवम्यन्तानां दम्पती, शिष्टानां दम्पत्याशिषः। गायत्री छन्दः, नवमीचतुर्दश्यौ अनुष्टुभौ, दशमी पादनिचृत्, अन्त्याश्चतस्रः पङ्क्तयः[4]।

यो यजा॑ति यजा॑त॒ इत् सु॒नव॑च्च॒ पचा॑ति च। ब्र॒ह्मेदिन्द्र॑स्य चाकनत् ॥ १ ॥

यः। यजा॑ति। यजा॑ते। इत्। सु॒नव॑त्। च॒। पचा॑ति। च॒। ब्र॒ह्मा। इत्। इन्द्र॑स्य। चा॒क॒न॒त् ॥

वेङ्कट० कात्यायनः—'यो यजाति इज्याऽस्याऽऽस्तवौ[5] यजमानप्रशंसा च येयादिषड् दम्पत्योः [5]शिष्टास्तदाशिषः'[5] (ऋअ २,८,३१) इति। यः सकृत् यजते, स इष्टफलः पुनःपुनः यजत एव, सुनोति च पचति च [6]पुरोडाशम्। स्तोत्राणि एव इन्द्रस्य कामयते[6] ॥ १ ॥

पु॒रो॒ळाशं॒ यो अ॑स्मै॒ सोमं॒ रर॑त आ॒शिर॑म्। पादित् तं श॒क्रो अंह॑सः ॥ २ ॥

पु॒रो॒ळाश॑म्। यः। अ॒स्मै॒। सोम॑म्। रर॑ते। आ॒ऽशिर॑म्। पात्। इत्। तम्। श॒क्रः। अंह॑सः ॥

वेङ्कट० पुरोडाशम् यः[7] इन्द्राय सोमम् च प्रयच्छति आशिरसहितम्[8], रक्षति एव तम् शक्रः[9] पापात् ॥ २ ॥

तस्य॑ द्यु॒माँ अ॑स॒द् रथो॑ दे॒वजू॑तः॒ स शू॑शुवत्। विश्वा॑ व॒न्वन्न॑मि॒त्रिया॑ ॥ ३ ॥

तस्य॑। द्यु॒ऽमान्। अ॒स॒त्। रथः॑। दे॒वऽजू॑तः। सः। शू॒शु॒व॒त्। विश्वा॑। व॒न्वन्। अ॒मि॒त्रिया॑ ॥ ३ ॥

वेङ्कट० तस्य दीप्तिमान् भवति रथः देवप्रेरितः। सः वर्धते विश्वानि हिंसन् अमित्रकृतानि ॥ ३ ॥

अस्य॑ प्र॒जाव॑ती गृ॒हेऽस॑श्चन्ती दि॒वेदि॑वे। इळा॑ धे॒नुम॑ती दुहे ॥ ४ ॥

अस्य॑। प्र॒जाऽव॑ती। गृ॒हे। अस॑श्चन्ती। दि॒वेऽदि॑वे। इळा॑। धे॒नुऽम॑ती। दु॒हे ॥ ४ ॥

१-१. ये देवाः मूको. २-२. °च्छय° मूको. ३-३. नास्ति मूको. ४. दूना सेय्यान्तरः मूको. ५-५. °श्या अन्दाः तथाशि° मूको. ६-६. नास्ति वि'. ७. य मूको. ८. °आशिरस° मूको. ९. रक्ष मूको.

वेङ्कट० अस्य गृह स्वच्छ भवति। अहरह धेनुमती इळा दुह्यते। धेनु पय धिनोति इति। यद्वा इळा गवां देवता, सा धेनुभि धेनुमती भवति ॥ ४ ॥

या दंपती समनसा सुनुत आ च धावतः । देवासो नित्ययाशिरा ॥ ५ ॥

या । दंपती इति दम्ऽपती । सऽमनसा । सुनुत । आ । च । धावत ।
देवास । नित्यया । आऽशिरा ॥ ५ ॥

वेङ्कट० शौनक — 'यज्ञनीरेव दम्पत्यो पद्य या दम्पती ऋच' ॥ (बृदे ६,७४) ॥

यौ दम्पती सुमनसौ सोमम् सुनुत, आ च धावत सोम शोधयत हे देवा! नित्येन आशिरेण। उत्तरत्र सम्बन्ध ॥ ५ ॥

'इति षष्ठाष्टके द्वितीयाध्याये अष्टात्रिंशो वर्ग'[1] ॥

प्रति प्राशव्याँ इतः सम्यञ्चा बर्हिराशाते । न ता वाजेषु वायतः ॥ ६ ॥

प्रति । प्राशव्यान् । इत । सम्यञ्चा । बर्हि । आशाते इति । न । ता । वाजेषु । वायत ॥ ६ ॥

वेङ्कट० प्रति गच्छत[2] प्राश्यान्[3] नवान्नादीन्[4]। सम्यञ्चौ च यज्ञम् व्याप्नुत। न तौ शुष्यत अन्नेषु ॥ ६ ॥

न देवानामपि ह्नुतः सुमतिं न जुगुक्षतः । श्रवो बृहद् विवासतः ॥ ७ ॥

न । देवानाम् । अपि । ह्नुत । सुऽमतिम् । न । जुगुक्षत । श्रव । बृहत् । विवासत ॥ ७ ॥

वेङ्कट० न देवानाम् अपि ह्नुत[5]। अपिह्नव[6] निह्नव। तदेवाऽऽह—सुमतिम् न जुगुक्षत न संवृणुत। बृहत् अन्नम् देवेभ्य प्रयच्छत[7]। देवै दत्त प्रकाशयन्तौ 'पुन पुन यजत'[8] ॥ ७ ॥

पुत्रिणा ता कुमारिणा विश्वमायुर्व्यश्नुतः । उभा हिरण्यपेशसा ॥ ८ ॥

पुत्रिणा । ता । कुमारिणा । विश्वम् । आयु । वि । अश्नुत । उभा । हिरण्यऽपेशसा ॥ ८ ॥

वेङ्कट० पुत्रवन्तौ तत्रापि कुमारवन्तौ विश्वम् आयु प्राप्नुत, उभौ हिरण्यरूपे[9] आभरणे अलङ्कृताविति ॥ ८ ॥

वीतिहोत्रा कृतद्वसू दशस्यन्तामृताय कम् ।
समूधो रोमशं हतो देवेषु कृणुतो दुवः ॥ ९ ॥

---

१. १ नास्ति मूको. २. °च्छतम् मूको. ३. तु वैप १,२२४० l; प्राशनम् मूको. ४. नवान्ना° मूको. ५. ह्नुत मूको. ६. °पिह्नति वि², अपि ह्नव अ¹. ७. °च्छत. अ¹. ८-८. यजत पुन पुन अ¹. ९. °रूपौ मूको.

वीतिऽहोत्रा । कृतद्वसू इति कृतत्ऽवसू । दशस्यन्ता । अमृताय । कम् ।
सम् । ऊधः । रोमशम् । हतः । देवेषु । कृणुतः । दुवः ॥ ९ ॥

वेङ्कट० प्रिययज्ञौ कृतधनौ प्रयच्छन्तौ यजमानेभ्यः अन्नम् अमरणाय सुखकरम् । सम् हतः[1] 'रोमशम् ऊधः'[2] इति मैथुनानुभाषणम् । देवेषु च कुरुतः[3] परिचर्याम् ॥ ९ ॥

आ शर्म पर्वतानां वृणीमहे नदीनाम् । आ विष्णोः सचाभुवः ॥ १० ॥
आ । शर्म । पर्वतानाम् । वृणीमहे । नदीनाम् । आ । विष्णोः । सचाऽभुवः ॥ १० ॥

वेङ्कट० आ वृणीमहे सुखम् पर्वतानाम् नदीनाम् च तथा विष्णोः च देवैः सह भवतः ॥ १० ॥

"इति पञ्चाष्टके द्वितीयाध्याये एकोनचत्वारिंशो वर्गः" ॥

ऐतु पूषा रयिर्भगः स्वस्ति सर्वधातमः । उरुरध्वा स्वस्तये ॥ ११ ॥
आ । एतु । पूषा । रयिः । भगः । स्वस्ति । सर्वऽधातमः । उरुः । अध्वा । स्वस्तये ॥ ११ ॥

वेङ्कट० आ गच्छतु पूषा दाता भगः च स्वस्ति सर्वेषां धारयितृतमः । विस्तीर्णः पन्थाः च अस्माकम् अविनाशाय भवतु ॥ ११ ॥

अरमतिरनर्वणो विश्वो देवस्य मनसा । आदित्यानामनेह इत् ॥ १२ ॥
अरमतिः । अनर्वणः । विश्वः । देवस्य । मनसा । आदित्यानाम् । अनेहः । इत् ॥ १२ ॥

वेङ्कट० पर्याप्तस्तुतिः अप्रापृतस्य[4] सर्वः एव जनः देवस्य मनसा भवति । आदित्यानाम् 'सर्वेषाम् अपापम्'[5] एव दानमिति ॥ १२ ॥

यथा नो मित्रो अर्यमा वरुणः सन्ति गोपाः । सुगा ऋतस्य पन्थाः ॥ १३ ॥
यथा । नः । मित्रः । अर्यमा । वरुणः । सन्ति । गोपाः । सुऽगाः । ऋतस्य । पन्थाः ॥ १३ ॥

वेङ्कट० यथा अस्माकम् इमे मित्रादयः भवन्ति गोपायितारः, तथा सुगमनाः भवन्तु एषां यज्ञस्य पन्थानः ॥ १३ ॥

अग्निं वः पूर्व्यं गिरा देवमीळे वसूनाम् ।
सपर्यन्तः पुरुप्रियं मित्रं न क्षेत्रसाधसम् ॥ १४ ॥

1. हतौ मूको. २-२. 'शपम्. मूको. ३. कुरुत मूको. ४-४. नास्ति मूको. ५. अप्रापु' मूको. ६-६. 'पामि वाणा' मूको.

अग्निम् । वः । पूर्व्यम् । गिरा । देवम् । ईळे । वसूनाम् ।
सपर्यन्तः । पुरुऽप्रियम् । मित्रम् । न । क्षेत्रऽसाधसम् ॥ १४ ॥

वेङ्कट० अग्निम् युष्माकं मुख्यम् गिरा देवम् स्तौमि धनार्थम्। परिचरन्तः बहुप्रियम् मित्रम् इव क्षेत्रस्य साधकम् मनुष्याः ॥ १४ ॥

मक्षू देववतो रथः शूरो वा पृत्सु कासु चित् ।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥ १५ ॥

मक्षु । देवऽवतः । रथः । शूरः । वा । पृत्ऽसु । कासु । चित् ।
देवानाम् । यः । इत् । मनः । यजमानः । इयक्षति । अभि । इत् । अयज्वनः । भुवत् ॥१५॥

वेङ्कट० शीघ्रं प्रविशसि देववतः[1] रथः[2], यथा शूरः कश्चन कासु चित् पृतनासु प्रविशति। देवानाम् यः मनः यजमानः यष्टुम् इच्छति, सः अभि भवति एव अयज्वनः[3] ॥ १५ ॥

न यजमान रिष्यसि न सुन्वान न देवयो ।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥ १६ ॥

न । यजमान । रिष्यसि । न । सुन्वान । न । देवयो इति देवऽयो ।
देवानाम् । यः । इत् । मनः । यजमानः । इयक्षति । अभि । इत् । अयज्वनः । भुवत् ॥१६॥

वेङ्कट० न त्वम् यजमान! रिष्यसि, न च सुन्वान!, न अपि हे देवकाम!। देवानाम् इति गतम् ॥ १६ ॥

नकिष्टं कर्मणा नशन्न प्र योषन्न योषति ।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥ १७ ॥

नकिः । तम् । कर्मणा । नशत् । न । प्र । योषत् । न । योषति ।
देवानाम् । यः । इत् । मनः । यजमानः । इयक्षति । अभि । इत् । अयज्वनः । भुवत् ॥१७॥

वेङ्कट० न कश्चित् तम् कर्मणा व्याप्नोति, न प्रकर्षेण स्वस्मात् स्थानात् [4]पृथक् करोति[5], न अपि किञ्चित् पृथक् करोति इति ॥ १७ ॥

असदत्र सुवीर्यमुत त्यदाश्वश्व्यम् ।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥ १८ ॥

असत् । अत्र । सुऽवीर्यम् । उत । त्यत् । आशुऽअश्व्यम् ।
देवानाम् । यः । इत् । मनः । यजमानः । इयक्षति । अभि । इत् । अयज्वनः । भुवत् ॥१८॥

---

१. देवाव्रत. मूको. २. रथे मूको. ३. यावज्वकनः मूको. ४-४. पृथक्' मूको.

वेङ्कट० अतत् भवति अत्र सुवीर्यम् । अपि च तम् शीघ्राश्वसंयुक्तम्[1] । देवानाम् इति समानमिति ॥ १८ ॥

[2]इति षष्ठाष्टके द्वितीयाध्याये चत्वारिंशो वर्गः[2] ॥

षष्ठे द्वितीयमध्यायं व्याचकारेति माधवः ।
पौत्रः श्रीमाधवार्यस्य वर्तयन्छन्दवित्तरम् ॥

इति वेङ्कटमाधवाचार्यविरचिते ऋक्संहिताव्याख्याने षष्ठाष्टके द्वितीयोऽध्यायः ॥

—*—

इति ऋग्वेदे सभाष्ये षष्ठाष्टके द्वितीयोऽध्यायः ॥



१. °शाश्वसंयुक्तान् मूको. २-२. नास्ति मूको.

अथ तृतीयोऽध्यायः ।

वेङ्क० '[1]प्र '[1]कृतान्यृजीषिणो(णः' क)ध स्याधिष्यासति' माधवः ।
प्रदर्शयन् बृहत्यादेर्लक्षणानि पृथक्पृथक् ॥ १ ॥

[2]पदैः समेता[2] बृहती चतुर्भि-
स्त्रयोऽष्टका द्वादशकस्तृतीयः[3] ।
सा स्याद् 'अभि त्वे(त्वा'[4] इ)ति रथन्तराद्या
सोक्ता निदानेऽपि च स्कन्धोग्रीवी[5] ॥ २ ॥

यस्या भवेद् द्वादशकः[6] पुरस्तात्
[7]सोक्ता पुरस्ताद्[7] बृहतीति विप्रैः ।
'मद्यो यस्पतिः शर्वसो असाम्य[8]
तस्मिन् द्वितीये बहुधा प्रवादः ॥ ३ ॥

पिङ्गलस्य मते सा स्यान्महर्षेर्न्यङ्कुसारिणी[9] ।
स्कन्धोग्रीवी क्रौष्टुकेस्तु[10] यास्कस्योरोबृहत्यपि ॥ ४ ॥

सा 'मत्स्यपायि ते महः'[11] अन्त्यो द्वादशको यदि ।
उपरिष्टाद्बृहत्येषा 'न तमंहः'[12] च तादृशी ॥ ५ ॥

यद्यष्टाक्षरयोर्मध्ये पादौ स्यातां दशाक्षरौ ।
सा स्याद्विष्टारबृहती 'युवं हास्त्वं महो'[13] इति ॥ ६ ॥

त्रयो द्वादशका यस्याः तामूर्ध्वबृहतीं विदुः ।
'अजीजनो अमृत'[14] सा 'प्रैतु'[2] पीयूषम्'[15] इत्यपि ॥ ७ ॥

यदि त्वष्टाक्षरो मध्ये त्रयोदशकयोर्भवेत् ।
सा पिपीलिकमध्या स्यात् 'अभि वो वीरमन्धसः'[16] ॥ ८ ॥

'सनितः सुसनितरुग्र'[17] नवाष्टैकादशाष्टकाः ।
बृहत्येषा तु विषमपदेति कवयो विदुः ॥ ९ ॥

१-१. °णो व्या° वेंमूवा. २. पादैः सतः वि[2] अ[1]. ३. °तीये वि[3] अ[1]. ४. ऋ ८,३,७. ५. °ग्रीवा वि[2]. ६ °कम् वि[3] अ[1]. ७-७. त्रुटितम् वि[1] अ[1]. ८. ऋ १०,२२,३. ९. °ङ्कुसंकरी अ[1]; °ङ्कुसङ्करि° वि[1]. १०. क्रौष्टुकेस्तु मूको. ११. ऋ १,१७५,१ १२. १०,१२६,१. १३. ऋ १,१२०,७. १४ ऋ ९,११०,४. १५ कौ २,८४४. १६. ऋ ८,४६,१४. १७. ऋ ८,४६,२०.

'तं त्वा वयं पितो'[1] सैषा चतुर्भिर्नवकैर्युता ।
बृहत्येवेति कथिता बृहत्यो नव बह्वृचैः ॥ १० ॥

भवन्ति पाङ्क्तानि पदानि पञ्च
तामाहुर् 'इन्द्रो मदाय वावृधे'[2] ।
पादैश्चतुर्भिर्दशकैर्विराट् स्याद्
'ऋतस्य पथि वेधा अपायि'[3] ॥ ११ ॥

आद्यं पदं द्वादशकं तृतीयम्
अथाष्टकौ द्वौ भवतश्च पादौ ।
सतोबृहत्याख्यमिदं वदन्ति
'न त्वावाँ अन्यो दिव्यो न पार्थिवः'[4] ॥ १२ ॥

विपर्यये सा विपरीतनाम्नी
तत्राष्टकावाद्यतृतीयपादौ ।
तामाहुर् 'य ऋष्वः श्रावयत्सखा'[5]
प्रस्तारपङ्क्तेरथ पादक्लृप्तिः ॥ १३ ॥

आद्यौ पादौ जागतावष्टकौ च
'उच्छ्वञ्चस्व पृथिवि मा नि बाधथाः'[6] ।
आस्तारपङ्क्तिर्विपरीतपादा[7]
'अग्निं न'[8] सूक्तं कथयन्ति सर्वम् ॥ १४ ॥

आद्यान्त्यौ[9] चेज्जागतौ सम्प्रदिष्टा[10]
संस्तारपङ्क्तिः कविभिः पुराणैः ।
निदर्शनम् 'पितुभृतो न तन्तु-
मित्'[11] तु प्रदिष्टमिह शौनकेन ॥ १५ ॥

आम्नायते च द्विपदासु सेयम्
अधीयते च [12]द्विपदैव विप्रैः[13] ।
संस्तारपङ्क्तिश्च भवेत् समस्ता
विष्टारपङ्क्तेरथ पादक्लृप्तिः ॥ १६ ॥

---

१. ऋ १,१८७,११. २. ऋ १,८१,१. ३. ऋ ६,४४,८. ४. ऋ ७,३२,२३. ५. ऋ ८,४६,१२. ६. ऋ १०,१८,११. ७. आस्थारप° मूको. ८ ऋ १०,२१,१ ९. आद्यान्तौ वैनश. १०. °दिष्टो वि¹. ११. ऋ १०,१७२,१. १२-१३. द्विपदास्समस्ताः त्रि² अ¹.

अनुष्टुभोद्वांदशाक्षौ[1] च मध्ये
सा चेयम् 'आने तव श्रवो वयं'[2]।
विद्वारपङ्क्तिकश्च[3] निद्रामकारो
विष्टब्धयोरेवी पङ्क्तिपादाविति ॥ १७ ॥

[३२]

[4]मेधातिथि: काण्व ऋषि:। इन्द्रो देवता। गायत्री छन्द:[4]।

प्र कृतान्यृंजीषिणः कण्वा इन्द्रस्य गार्थया । मदे सोमस्य वोचत ॥ १ ॥
प्र । कृतानि । ऋजीषिणे. । कण्वा । इन्द्रस्य । गार्थया । मदे । सोमस्य । वोचत ॥ १ ॥
वेङ्कट० मेधातिथि:। [5]प्र ब्रूत कृतानि[5] कर्माणि ऋजीषवत हे कण्वा। इन्द्रस्य गाथया सोमस्य मदे सञ्जाते ॥ १ ॥

यः सृबिन्दमनर्शनिं पिप्रुं दासमहीशुवम् । वधीदुग्रो रिणन्नपः ॥ २ ॥
य. । सृबिन्दम् । अनर्शनिम् । पिप्रुम् । दासम् । अहीशुवम् । वधीत् । उग्र । रिणन् । अप ॥
वेङ्कट० य एतान् अवधीत् उदकानि प्रेरयन् उद्‌गूर्ण ॥ २ ॥

न्यर्बुदस्य विष्टपं वर्ष्माणं बृहतस्तिर । कृषे तदिन्द्र पौंस्यम् ॥ ३ ॥
नि । अर्बुदस्य । विष्टपम् । वर्ष्माणम् । बृहत । तिर । कृषे । तत् । इन्द्र । पौंस्यम् ॥ ३ ॥
वेङ्कट० 'नि तिर' विध्य मेघस्य स्थानम् उदकस्य धारकम् महत । कुरु इन्द्र। तत् बलम् ॥ ३ ॥

प्रति श्रुतार्य वो धृषत् तूर्णाशं न गिरेरधि । हुवे सुशिप्रमूतये ॥ ४ ॥
प्रति । श्रुताय । व । धृषत् । तूर्णाशम् । न । गिरे । अधि । हुवे । सुऽशिप्रम् । ऊतये ॥ ४ ॥
वेङ्कट० प्रति हुवे धर्षन्तं शत्रून् युष्माकं स्तुतीनां श्रवणाय, यथा धर्मोभितस[6] उदकम् (तु. या ५,१६) मेघात् प्रतिक्षयति, सुहनुम् रक्षणाय ॥ ४ ॥

स गोरश्वस्य वि व्रजं मन्दानः सोम्येभ्यः । पुरं न शूर दर्षसि ॥ ५ ॥
स । गो । अश्वस्य । वि । व्रजम् । मन्दान । सोम्येभ्य । पुरम् । न । शूर । दर्षसि ॥ ५ ॥
वेङ्कट० स त्वम् गो अश्वस्य च व्रजम् मोदमान[7] सोमार्हेभ्य पुरम् इव शत्रूणाम् शूर। विवृतद्वारं करोषि ॥ ५ ॥

[8]इति षष्ठाष्टके तृतीयाध्याये प्रथमो वर्ग[8] ॥

---

१ आनुष्टुभौ वि[2] अ[1]. २. ऋ १०,१४०,१, वयम् वेंमअ, ३ ३ °पङ्क्ती च अ[1] वि.
४ ४. नास्ति मूको. ५-५ प्रकृतानि वि[2], प्रभृतानि अ[1]. ६ ६ नमतिरपि वि[2], नतिःपि अ[1].
७. कर्माभि[?] मूको. ८ मदमान. मूको

यदि मे रारणः सुत उक्थे वा दधसे चनः । आरादुप स्वधा गहि ॥ ६ ॥

यदि । मे । ररणः । सुते । उक्थे । वा । दधसे । चनः । आरात् । उप । स्वधा । आ । गहि ॥

वेङ्कट० यदि मे रमसे सोमे उक्थे वा, प्रयच्छसि अन्नम् । दूराद् उप आ गच्छ बलेन ॥ ६ ॥

वयं घा ते अपि ष्मसि स्तोतार इन्द्र गिर्वणः । त्वं नो जिन्व सोमपाः ॥ ७ ॥

वयम् । घ । ते । अपि । स्मसि । स्तोतारः । इन्द्र । गिर्वणः । त्वम् । नः । जिन्व । सोमऽपाः ॥

वेङ्कट० वयम् खलु '[1]ते अपि भवामः'[1] स्तोतारः इन्द्र ! गीर्भिर्वननीय ! । त्वम् अस्मान् प्रीणयसि हे सोमस्य पातः ! ॥ ७ ॥

उत नः पितुमा भर संरराणो अविक्षितम् । मघवन् भूरि ते वसु ॥ ८ ॥

उत । नः । पितुम् । आ । भर । सम्ऽरराणः । अविऽक्षितम् । मघऽवन् । भूरि । ते । वसु ॥ ८ ॥

वेङ्कट० अपि च अस्मभ्यम् अन्नम् आ हर संरममाणः अविक्षीणम् मघवन् !, भूरि हि ते धनम् ॥ ८ ॥

उत नो गोमतस्कृधि हिरण्यवतो अश्विनः । इळाभिः सं रभेमहि ॥ ९ ॥

उत । नः । गोऽमतः । कृधि । हिरण्यऽवतः । अश्विनः । इळाभिः । सम् । रभेमहि ॥ ९ ॥

वेङ्कट० अपि च अस्मान् पशुमतः कुरु हिरण्यवतः अश्ववतश्च । अन्नैः च[2] सम् रभामहे[3] ॥ ९ ॥

बृबदुक्थं हवामहे सृप्रकरस्नमूतये । साधु कृण्वन्तमवसे ॥ १० ॥

बृबत्ऽउक्थम् । हवामहे । सृप्रऽकरस्नम् । ऊतये । साधु । कृण्वन्तम् । अवसे ॥ १० ॥

वेङ्कट० महत् बृबत् इति यास्कः । 'बृबदुक्थो महदुक्थः । वक्तव्यमस्मा उक्थम् इति बृबदुक्थो वा' (या ६,४) । हवामहे प्रसृतबाहुम् रक्षणाय साधु कृण्वन्तम्[4] रक्षणाय ॥ १० ॥

[5]इति षष्ठाष्टके तृतीयाध्याये द्वितीयो वर्गः[5] ॥

यः संस्थे चिच्छतक्रतुरादीं कृणोति वृत्रहा । जरितृभ्यः पुरूवसुः ॥ ११ ॥

यः । सम्ऽस्थे । चित् । शतऽक्रतुः । आत् । ईम् । कृणोति । वृत्रऽहा । जरितृऽभ्यः । पुरुऽवसुः ॥ ११ ॥

वेङ्कट० यः सङ्ग्रामे बहुकर्मा भवति, अपि च तत् सुखं करोति वृत्रहा बहुधनः स्तोतृभ्यः ॥ ११ ॥

स नः शक्रश्चिदा शकद् दानवाँ अन्तराभरः । इन्द्रो विश्वाभिरूतिभिः ॥ १२ ॥

१-१. तेविभवा मूको. २. चाश्वैः वि[1]. ३. °रभ्यामहे वि[1] अ[1]. ४. कृणुतं वि[1]; कृण्वतं अ[1]. ५-५. नास्ति मूको.

सः । नः । शक्रः । चित् । आ । शकत् । दानंऽवान् । अन्तरऽआभरः । इन्द्रः । विश्वाभिः । ऊतिऽभिः ॥ १२ ॥

वेङ्कट० सः शक्रः अस्मान् अपि दातॄन् करोति दानवान् अन्तराहरः धनानि[1] आपूरयन्[2], छिद्रापिधायी[3] इन्द्र. विश्वैः पालनैः ॥ १२ ॥

यो रायोऽवनिर्महान्त्सुपारः सुन्वतः सखा । तमिन्द्रमभि गायत ॥ १३ ॥

यः । रायः । अवनिः । महान् । सुऽपारः । सुन्वतः । सखा । तम् । इन्द्रम् । अभि । गायत ॥ १३ ॥

वेङ्कट० यः धनस्य रक्षकः महान् शोभनपरण.[4] सुन्वतः सखा, तम् इन्द्रम् अभि गायत ॥ १३ ॥

आयन्तारं महि स्थिरं पृतनासु श्रवोजितम् । भूरेरीशानमोजसा ॥ १४ ॥

आऽयन्तारम् । महि । स्थिरम् । पृतनासु । श्रवःऽजितम् । भूरेः । ईशानम् । ओजसा ॥ १४ ॥

वेङ्कट० आभिमुख्येन यन्तारम् महान्तम् स्थिरम् सङ्ग्रामेषु[5] श्रवसो जेतारम् भूरेः ईशानम् बलेन अभिगायतेति ॥ १४ ॥

नकिरस्य शचीनां नियन्ता सूनृतानाम् । नकिर्वक्ता न दादिति ॥ १५ ॥

नकिः । अस्य । शचीनाम् । निऽयन्ता । सूनृतानाम् । नकिः । वक्ता । न । दात् । इति ॥ १५ ॥

वेङ्कट० न कश्चित् अस्य कर्मणाम्[6] नियन्ता शोभनानाम् । न कश्चित् वक्ता न अयं प्रयच्छति इति ॥ १५ ॥

"इति षष्ठाष्टके तृतीयाध्याये तृतीयो वर्ग." ॥

न नूनं ब्रह्मणामृणं प्राशूनामस्ति सुन्वताम् । न सोमो अप्रता पपे ॥ १६ ॥

न । नूनम् । ब्रह्मणाम् । ऋणम् । प्राशूनाम् । अस्ति । सुन्वताम् । न । सोमः । अप्रता । पपे ॥ १६ ॥

वेङ्कट० न खलु ब्राह्मणानाम् सुन्वताम् ऋणम्[8] भवति, 'ये सोमं प्राश्नन्ति'[9]। न सोम अव्रतेन पीयते । अविस्तीर्णधन अव्रत. अप्रयतो[10] वा इति ॥ १६ ॥

पन्य इदुप गायत पन्यं उक्थानि शंसत । ब्रह्मा कृणोत पन्य इत् ॥ १७ ॥

पन्यम् । इत् । उप । गायत । पन्यम् । उक्थानि । शंसत । ब्रह्म । कृणोत । पन्यम् । इत् ॥ १७ ॥

वेङ्कट० स्तुत्ये एव इन्द्रे[11] उप गायत । पन्ये उक्थानि च शंसत । अन्यानि च ब्रह्माणि कुरुत[12] "पन्ये एव" ॥ १७ ॥

---

१. विभाणा मूको. २. °रन्तं वि[2], °रयन्तं अ[1]. ३. छिद्रापिधाजी मूको. ४. °नवरण मूको. ५. °मेषु अपने मूको. ६. कर्म वि[1]; कर्मा अ[1]. ७-७. नास्ति मूको. ८. ऋतं मूको. ९-९. ये सोमसमाप्नवनानि वि[2]. १०. वैप १,३०८ p द्र., °प्रयानो वि[2]. ११. इन्द्रम् मूको. १२. कंधुत मूको.

पन्य आ दर्दिरच्छता सहस्रा वाज्यवृतः । इन्द्रो यो यज्वनो वृधः ॥ १८ ॥

पन्यः । आ । दर्दिरत् । शता । सहस्रा । वाजी । अवृतः । इन्द्रः । यः । यज्वनः । वृधः ॥ १८ ॥

वेङ्कट० स्तुत्यः[1] इन्द्रः आभिमुख्येन दारयति वीराणां शतानि सहस्राणि च बलवान् अवृतः शत्रुभिः, इन्द्रः यः यज्वनः वर्धयिता ॥ १८ ॥

वि षू चर स्वधा अनु कृष्टीनामन्वाहुवः । इन्द्र पिब सुतानाम् ॥ १९ ॥

वि । सु । चर । स्वधाः । अनु । कृष्टीनाम् । अनु । आऽहुवः । इन्द्र । पिब । सुतानाम् ॥ १९ ॥

वेङ्कट० सुष्ठु वि चर हवींषि अनु[2] मनुष्याणाम् आह्वातव्यः । अनु द्वितीयः पूरणः । [3]इन्द्र । पिब[3] सुतान् ॥ १९ ॥

पिब स्वधैनवानामुत यस्तुग्र्ये सचा । उतायमिन्द्र यस्तव ॥ २० ॥

पिब । स्वऽधैनवानाम् । उत । यः । तुग्र्ये । सचा । उत । अयम् । इन्द्र । यः । तव ॥ २० ॥

वेङ्कट० पिब सोमान्[4] स्वभूतपयसः । धेनोः इदं धैनवम् । अपि च यः सोमः उदके संसृष्टः, अपि च अयम् सोमः त्वया पातव्यः इन्द्र !, यः त्वदीयः ॥ २० ॥

[5]इति पञ्चाष्टके तृतीयाध्याये चतुर्थो वर्गः[7] ॥

अर्वीहि मन्युषाविणं सुषुवांसमुपारणे । इमं रातं सुतं पिब ॥ २१ ॥

अति । इहि । मन्युऽसाविनम् । सुसुऽवांसम् । उपऽअरणे । इमम् । रातम् । सुतम् । पिब ॥ २१ ॥

वेङ्कट० अति गच्छ मन्युना सुन्वन्तम्[6], तथा उपारणे सुषुवांसम्[7] । यत्र न रमन्ते ब्राह्मणा उपेत्य स उपारणो देश इति । इमम् दत्तम् अस्मदीयं सोमम् पिब ॥ २१ ॥

इहि तिस्रः परावत इहि पञ्च जनाँ अति । धेना इन्द्रावचाकशत् ॥ २२ ॥

इहि । तिस्रः । पराऽवतः । इहि । पञ्च । जनान् । अति । धेनाः । इन्द्र । अवऽचाकशत् ॥ २२ ॥

वेङ्कट० इहि तिस्रः परावतः अतीत्य[8] । अग्रतः पृष्ठतः पार्श्वतः च आगमनम् आशास्ते । इहि पञ्च जनान् अति स्तुतीः[9] इन्द्र ! अवपश्यन् ॥ २२ ॥

सूर्यो रश्मिं यथा सृजा त्वा यच्छन्तु मे गिरः । निम्नमापो न सध्र्यक् ॥ २३ ॥

सूर्यः । रश्मिम् । यथा । सृज । आ । त्वा । यच्छन्तु । मे । गिरः । निम्नम् । आपः । न । सध्र्यक् ॥ २३ ॥

---

१. स्तुत मूको. २. नास्ति मूको. ३-३. इन्द्रस्य मूको. ४. सोमान् मूको. ५-७. नास्ति मूको ६. धावन् मूको. ७. छुषुवास मूको. ८. अतिगृत्य वि°. ९. स्तुनिः मूको.

वेङ्कट० सूर्यः रश्मीन् यथा विसृजति, तथा धनं वि सृज । यद्वाऽभ्रप्रमहान् । आ 'यच्छन्तु रवाः' मदीयाः स्तुतयः । निम्नम् आपः यथा सह परिगृह्णन्ति, तद्वत् रवा' प्रति गच्छन्ति स्तुतय इति ॥२३॥

अध्वर्यवा तु हि षिञ्च सोमं वीराय शिप्रिणे । भरा सुतस्य पीतये ॥ २४ ॥

अध्वर्यो इति । आ । तु । हि । सिञ्च । सोमम् । वीराय । शिप्रिणे । भर । सुतस्य । पीतये ॥ २४ ॥

वेङ्कट० अध्वर्यो ! क्षिप्रम् आ सिञ्च सोमम् वीराय हनुमते' । हर सुतं पानाय ॥ २४ ॥

य उद्नः फलिगं भिनन्न्यक् सिन्धूँरवासृजत् । यो गोषु पक्वं धारयत् ॥ २५ ॥

यः । उद्नः । फलिऽगम् । भिनत् । न्यक् । सिन्धून् । अवऽअसृजत् । यः । गोषु । पक्वम् । धारयत् ॥ २५ ॥

वेङ्कट० यः उदकार्थं' मेघम् अभिनत्' । सिन्धून् च अन्तरिक्षात् न्यक् अवासृजत् । यः गोषु आमासु' पक्वम् पयः अधारयत् ॥ २५ ॥

"इति षष्ठाष्टके तृतीयाध्याये पञ्चमो वर्गः" ॥

अहन् वृत्रमृचीषम और्णवाभमहीशुवम् । हिमेनाविध्यदर्बुदम् ॥ २६ ॥

अहन् । वृत्रम् । ऋचीषमः । और्णऽवाभम् । अहीशुवम् । हिमेन । अविध्यत् । अर्बुदम् ॥ २६ ॥

वेङ्कट० अहन् 'वृत्रम् ऋचा समः और्णवाभम् अहीशुवम्' । तथा हिमेन अविध्यत् अर्बुदम् च ॥ २६ ॥

प्र वं उग्राय निष्टुरेऽषाळ्हाय प्रसक्षिणे । देवत्तं ब्रह्म गायत ॥ २७ ॥

प्र । वः । उग्राय । निःऽतुरे । अषाळ्हाय । प्रऽसक्षिणे । देवत्तम् । ब्रह्म । गायत ॥ २७ ॥

वेङ्कट० प्र गायत यूयम् उद्गूर्णाय निस्तरते' शत्रून् अषाळ्हाय प्रसहनशीलाय देवदत्तं देवप्रसाद-लब्धम् ब्रह्म स्तोत्रम् ॥ २७ ॥

यो विश्वान्यभि व्रता सोमस्य मदे अन्धसः । इन्द्रो देवेषु चेतति ॥ २८ ॥

यः । विश्वानि । अभि । व्रता । सोमस्य । मदे । अन्धसः । इन्द्रः । देवेषु । चेतति ॥ २८ ॥

वेङ्कट० यः विश्वानि कर्माणि सोमस्य अद्यमानस्य मदे इन्द्रः देवेषु अभि ज्ञापयति, तस्मै इन्द्राय इति ॥ २८ ॥

इह त्या सधमाद्या हरी हिरण्यकेश्या । वोळ्हामभि प्रयो हितम् ॥ २९ ॥

इह । त्या । सधऽमाद्या । हरी इति । हिरण्यऽकेश्या । वोळ्हाम् । अभि । प्रयः । हितम् ॥ २९ ॥

१-१. आयच्छन्तर्वां वि'. २. ताम् मूको. ३. वानुमते मूको. ४. उदरार्थं मूको. ५. भिनत् मूको. ६. आमसु मूको. ७-७. नास्ति मूको. ८. °मनचीष और्णवाभमहीशुरं वि', 'ऋचासमौर्णवाभ-महीशुरं अ'. ९. निरस्नते मूको.

वेङ्कट० इह तौ स्तूयमानौ अश्वौ हिरण्मयकेशौ[1] वहताम्[2] इन्द्रं निहितं सोममद्यं प्रति ॥२९॥

अर्वाञ्चं त्वा पुरुष्टुत प्रियमेधस्तुता हरी । सोमपेयाय वक्षतः ॥ ३० ॥

अर्वाञ्चम् । त्वा । पुरुऽस्तुत । प्रियमेधऽस्तुता । हरी इति । सोमऽपेयाय । वक्षतः ॥ ३० ॥

वेङ्कट० निगदसिद्धेति ॥ ३० ॥

[3]इति पञ्चमाष्टके तृतीयाध्याये पञ्चमो वर्गः[3] ॥

[३३]

[1]मेध्यातिथिः काण्व ऋषिः । इन्द्रो देवता । बृहती छन्दः, षोडश्यादितिस्रो गायत्र्यः, अन्त्याऽनुष्टुप्[1] ।

वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः ।
पवित्रस्य प्रस्रवणेषु वृत्रहन् परि स्तोतार आसते ॥ १ ॥

वयम् । घ । त्वा । सुतऽवन्तः । आपः । न । वृक्तऽबर्हिषः ।
पवित्रस्य । प्रऽस्रवणेषु । वृत्रऽहन् । परि । स्तोतारः । आसते ॥ १ ॥

वेङ्कट० मेध्यातिथिः । वयम् खलु त्वाम् सुतवन्तः उदकानि इव प्रवणम् अभिगच्छामः स्तीर्णबर्हिषः । स्तोतारः[4] च वृत्रहन्! त्वाम् परि उप आसते पवित्रस्य सोमानाम् प्रस्रवणेषु ॥ १ ॥

स्वरन्ति त्वा सुते नरो वसो निरेक उक्थिनः ।
कदा सुतं तृषाण ओक आ गम इन्द्र स्वब्दीव वंसगः ॥ २ ॥

स्वरन्ति । त्वा । सुते । नरः । वसो इति । निरेके । उक्थिनः ।
कदा । सुतम् । तृषाणः । ओकः । आ । गमः । इन्द्र । स्वब्दीऽइव । वंसगः ॥ २ ॥

वेङ्कट० शब्दायन्ते त्वाम् अभिषुते सोमे नरः हे वासयितः! निर्गमने उक्थिनः । कदा सुतम् सोमं प्रति तृष्यन्[5] ओकः आ गमः इन्द्र! स्वभूतशब्द इव ऋषभः शब्दं कुर्वन्निति ॥ २ ॥

कण्वेभिर्धृष्णवा धृषद् वाजं दर्षि सहस्रिणम् ।
पिशङ्गरूपं मघवन् विचर्षणे मक्षू गोमन्तमीमहे ॥ ३ ॥

कण्वेभिः । धृष्णो इति । आ । धृषत् । वाजम् । दर्षि । सहस्रिणम् ।
पिशङ्गऽरूपम् । मघऽवन् । विऽचर्षणे । मक्षु । गोऽमन्तम् । ईमहे ॥ ३ ॥

---

१. °यकेशौ मूको. २. वहतौ मूको. ३-३. नास्ति मूको. ४. स्तारः मूको. ५. तृष्यन् मूको.

वेङ्कट० कण्वानुद्दिश्य हे धृष्णो![1] वाजम्[2] सहस्रसङ्ख्यम् आ दर्षि। एतम् विशालरूपम् हे मघवन्! विद्म[3] दीप्रम् गोमन्तम् च वाजं याचामहे ॥ ३ ॥

पाहि गायान्धसो मद इन्द्राय मेध्यातिथे ।
यः संमिश्लो हर्योर्यः सुते सचा वज्री रथो हिरण्ययः ॥ ४ ॥

पाहि । गाय । अन्धसः । मदे । इन्द्राय । मेध्यऽअतिथे ।
यः । सम्ऽमिश्लः । हर्योः । यः । सुते । सचा । वज्री । रथः । हिरण्ययः ॥ ४ ॥

वेङ्कट० पिब सोमम्, गाय च पीतस्य सोमस्य मदे इन्द्राय हे मेध्यातिथे!। य इन्द्र हर्यो स्वरथे सम्मिश्रयिता, य च सुते सहाय, स इन्द्र वज्री, तस्य रथ च हिरण्मय ॥ ४ ॥

यः सुषव्यः सुदक्षिण इनो यः सुक्रतुर्गृणे ।
य आकरः सहस्रा यः शतामघ इन्द्रो यः पूर्भिदारितः ॥ ५ ॥

यः । सुऽसव्यः । सुऽदक्षिणः । इनः । यः । सुऽक्रतुः । गृणे ।
यः । आऽकरः । सहस्रा । यः । शतऽमघः । इन्द्रः । यः । पूःऽभित् । आरितः ॥ ५ ॥

वेङ्कट० य शोभनसव्यहस्त, य च सुदक्षिण ईश्वर, य सुप्रज्ञ स्तूयते, य आभिमुख्येन कर्ता बहूनाम्, य. च बहुधन इन्द्र, स पुरां भेत्ता आरित। 'प्रत्यृत स्तोमान्' इति यास्क (५,१५) ॥ ५ ॥

'इति पञ्चाष्टके तृतीयाध्याये सप्तमो वर्गः' ॥

यो धृषितो योऽवृतो यो अस्ति श्मश्रुषु श्रितः ।
विभूतद्युम्नश्च्यवनः पुरुष्टुतः क्रत्वा गौरिव शाकिनः ॥ ६ ॥

यः । धृषितः । यः । अवृतः । यः । अस्ति । श्मश्रुषु । श्रितः ।
विभूतऽद्युम्नः । च्यवनः । पुरुऽस्तुतः । क्रत्वा । गौःऽइव । शाकिनः ॥ ६ ॥

वेङ्कट० य धर्षयिता य च अपरिवृत शत्रुभिः य च भवति श्मश्रुषु श्रित। श्मश्रूणि युद्धानि [4]आहु, यत्र[5] एनं आश्रयन्ति इति। प्रभूतधन च्यावयिता बहुस्तुत कर्मणा धेनु इव यजमानस्य स भवति ॥ ६ ॥

१. विष्णो मूको. २. वाज मूको. ३. विद्म मूको ४ ४. नास्ति मूको. ५-५ °दुश्श्रवा ए° मूको

क ईं वेद सुते सचा पिबन्तं कद् वयो दधे ।
अयं यः पुरो विभिनत्त्योजसा मन्दानः शिप्र्यन्धसः ॥ ७ ॥

कः । ईम् । वेद । सुते । सचा । पिबन्तम् । कत् । वयः । दधे ।
अयम् । यः । पुरः । विऽभिनत्ति । ओजसा । मन्दानः । शिप्री । अन्धसः ॥ ७ ॥

वेङ्कट० कः ईम् एनं वेत्ति सुते सोमे भवद्भिः पिबन्तम्[1] सोमम् । किं वा अन्नं धारयति । यः अयम् पुराणि[2] हिनस्ति बलेन, सोमेन मोदमानः हनुमान् ॥ ७ ॥

दाना मृगो न वारणः पुरुत्रा चरथं दधे ।
नकिष्ट्वा नि यमदा सुते गमो महाँश्चरस्योजसा ॥ ८ ॥

दाना । मृगः । न । वारणः । पुरुऽत्रा । चरथम् । दधे ।
नकिः । त्वा । नि । यमत् । आ । सुते । गमः । महान् । चरसि । ओजसा ॥ ८ ॥

वेङ्कट० मृगः[3] शत्रूणामन्वेषकः मदजलानि इव वारणः बहुषु यज्ञेषु चरणशीलं मदम् इन्द्रः धारयति । तं त्वां न कश्चित् नि यच्छति[4] । अथ आ गच्छ सुते सोमे । महान् हि त्वम् चरसि बलेन ॥ ८ ॥

य उग्रः सन्ननिष्टृतः स्थिरो रणाय संस्कृतः ।
यदि स्तोतुर्मघवा शृणवद्धवं नेन्द्रो योषत्या गमत् ॥ ९ ॥

यः । उग्रः । सन् । अनिःऽस्तृतः । स्थिरः । रणाय । संस्कृतः ।
यदि । स्तोतुः । मघऽवा । शृणवत् । हवम् । न । इन्द्रः । योषति । आ । गमत् ॥ ९ ॥

वेङ्कट० यः उद्गूर्णः सन् शत्रुभिः न निष्टृतः[5] अनिस्तीर्णः स्थिरः[6] युद्धाय सम्यक् अश्वैः अलङ्कृतः सोमैः वा संस्कृतः, सः यदि स्तोतुः[7] मघवा शृणोति ह्वानम्, 'इन्द्रः न[†] अन्यत्र' गच्छति, अपि तु तत्रैव आ गच्छति ॥ ९ ॥

सत्यमित्था वृषेदसि वृषजूतिर्नोऽवृतः ।
वृषा ह्युग्र शृण्विषे परावति वृषो अर्वावति श्रुतः ॥ १० ॥

सत्यम् । इत्था । वृषा । इत् । असि । वृषऽजूतिः । नः । अवृतः ।
वृषा । हि । उग्र । शृण्विषे । पराऽवति । वृषो इति । अर्वाऽवति । श्रुतः ॥ १० ॥

---

१. पिबतम् मूको. २. पुराणि मूको. ३. मृग मूको. ४. युच्छति मूको. ५. निष्टिनः वि', निष्टृतः अ'. ६. नास्ति मूको. ७. स्तोतुम् मूको. ८-८. नास्ति अ'. † नास्ति वि'.

वेङ्कट० सत्यम् इत्थम् त्वम् 'वृषा एव' भवसि, वृषभि[१] चाहूत अस्माकं वायुभिः शश्वतः। '[२]वृषा हि[३] उग्र।[४] श्रूयसे। दूरेऽपि वृषा एव समीपे च वृषा श्रुत ॥ १० ॥

'[५]इति षष्ठाष्टके तृतीयाध्याये अष्टमो वर्गः'[५] ॥

वृष॑णस्ते अ॒भीश॑वो॒ वृषा॒ कशा॑ हिर॒ण्ययी॑ ।
वृषा॒ रथो॑ मघव॒न् वृष॑णा॒ हरी॒ वृषा॒ त्वं श॑तक्रतो ॥ ११ ॥

वृष॑ण । ते॒ । अ॒भीश॑व । वृषा॑ । कशा॑ । हि॒र॒ण्ययी॑ ।
वृषा॑ । रथ॑ । म॒घ॒ऽव॒न् । वृष॑णा । हरी॒ इति॑ । वृषा॑ । त्वम् । श॒त॒क्र॒तो॒ इति॑ शतऽक्रतो ॥ ११ ॥

वेङ्कट० वर्षितार ते अश्वा। '[६]वृषा कशा'[६] हिरण्मयी। वृषा रथ मघवन्।। वर्षितारौ अश्वौ। वृषा त्वम् च बहुप्रज्ञ।[७] ॥ ११ ॥

वृषा॒ सोता॑ सुनोतु ते॒ वृष॑न्नृजीपि॒न्ना भ॑र ।
वृषा॑ दधन्वे॒ वृष॑णं न॒दीष्वा तुभ्यं॑ स्थातर्हरीणाम् ॥ १२ ॥

वृषा॑ । सोता॑ । सु॒नो॒तु॒ । ते॒ । वृष॑न् । ऋ॒जी॒पि॒न् । आ । भ॒र॒ ।
वृषा॑ । द॒ध॒न्वे॒ । वृष॑णम् । न॒दीषु॑ । आ । तुभ्य॑म् । स्था॒त॒ । ह॒री॒णा॒म् ॥ १२ ॥

वेङ्कट० वृषा सोता अभि सुनोतु सोमम् ते वृषन्। ऋजीपिन्। ऋजुगमन[१] आ भर धनम्। वृषा धारितवान् वृषणम् सोमम् उदकेषु आभिमुख्येन तुभ्यम् हे हरीणाम् स्थात ॥ १२ ॥

एन्द्र॑ याहि पी॒तये॒ मधु॑ शविष्ठ सो॒म्यम् ।
नायमच्छा॑ म॒घवा॑ शृ॒णव॒द् गिरो॒ ब्रह्मो॒क्था च॑ सु॒क्रतुः॑ ॥ १३ ॥

आ । इ॒न्द्र॒ । या॒हि॒ । पी॒तये॑ । मधु॑ । श॒वि॒ष्ठ॒ । सो॒म्यम् ।
न । अ॒यम् । अच्छ॑ । म॒घऽवा॑ । शृ॒णव॑त् । गिरः॑ । ब्रह्म॑ । उ॒क्था । च॒ । सु॒ऽक्रतु॑ ॥ १३ ॥

वेङ्कट० आ याहि इन्द्र पीतये मधु बलवत्तम[२] सोममयम्। न अयम् अभिश्रृणोति मघवा स्तुती स्तोत्राणि उक्थानि च सुप्रज्ञ इति अनागमनादाहेति ॥ १३ ॥

वह॑न्तु त्वा रथे॒ष्ठामा हर॑यो रथ॒युजः॑ ।
ति॒रश्चि॑द॒र्यं सव॑नानि वृत्रहन्न॒न्येषा॒ या श॑तक्रतो ॥ १४ ॥

वह॑न्तु । त्वा॒ । र॒थे॒ऽस्थाम् । आ । हर॑य । र॒थ॒ऽयुजः॑ ।
ति॒र । चि॒त् । अ॒र्यम् । सव॑नानि । वृ॒त्र॒ऽह॒न् । अ॒न्येषा॑म् । या । श॒त॒क्र॒तो॒ इति॑ शतऽक्रतो ॥ १४ ॥

---

१ १. वृषेव वि[२]. २. वृषभै मं[१]. ३ ३. वृषाभि मं[१], वृषभि वि[१]. ४ उग्र मूको.
५ ५. नास्ति मूको ६ ६. वृषकशा मूको ७. बहुप्रज्ञ मूको.

वेङ्कट० आ वहन्तु त्वां रथस्थम् अश्वाः रथे युक्ताः ईश्वरम् तिरस्कुर्वन्तः सवनानि, अन्येषाम् यानि सवनानि भवन्ति हे शतमख![1] ॥ १४ ॥

अस्माकमद्यान्तमं स्तोमं धिष्व महामह ।
अस्माकं ते सवना सन्तु शंतमा मदाय द्युक्ष सोमपाः ॥ १५ ॥

अस्माकम् । अद्य । अन्तमम् । स्तोमम् । धिष्व । महाऽमह ।
अस्माकम् । ते । सवना । सन्तु । शम्ऽतमा । मदाय । द्युक्ष । सोमऽपाः ॥ १५ ॥

वेङ्कट० अस्माकम् अद्य अन्तिकतमम्[2] स्तोमम् धारय हे महताम्[3] अपि महन्! महापूज्य! वा । अस्माकम् ते सवनानि भवन्तु शान्ततमानि मदाय दीप्त! सोमस्य पात! ॥ १५ ॥

"इति षष्ठाष्टके तृतीयाध्याये नवमो वर्गः" ॥

नहि षस्तव नो मम शास्त्रे अन्यस्य रण्यति । यो अस्मान् वीर आनयत् ॥ १६ ॥

नहि । सः । तव । नो इति । मम । शास्त्रे । अन्यस्य । रण्यति । यः । अस्मान् । वीर । आ । अनयत् ॥ १६ ॥

वेङ्कट० नहि सः इन्द्र[4] तव शासने रमते, न च मम, न अपि अन्यस्य, यः अस्मान् वीर[4] इन्द्र आ नयति ॥ १६ ॥

इन्द्रश्चिद् घा तदब्रवीत् स्त्रिया अशास्यं मनः । उतो अह क्रतुं रघुम् ॥ १७ ॥

इन्द्रः । चित् । घ । तत् । अब्रवीत् । स्त्रियाः । अशास्यम् । मनः । उतो इति । अह । क्रतुम् । रघुम् ॥ १७ ॥

वेङ्कट० मेध्यातिथेः धनप्रदाता प्लायोगिरासङ्गः । स पुमान् भूत्वा स्त्र्यभवत् (तु. ऋअ २,८,१) । तदा यत् '[5]इन्द्र उवाच[5]' तत् वदति[6]—इन्द्रः चित् खलु तत् अब्रवीत्—स्त्रियाः मनः पुरुषेण अशिष्यम् शासितुमशक्यम् चपलत्वात्[7] । अपि च आह—[8]रघु स्त्रियाः प्रज्ञत्वम्[8] ॥ १७ ॥

सप्ती चिद् घा मदच्युता मिथुना वहतो रथम् । एवेद् धूर्वृष्ण उत्तरा ॥ १८ ॥

सप्ती इति । चित् । घ । मदऽच्युता । मिथुना । वहतः । रथम् । एव । इत् । धूः । वृष्णः । उत्ऽतरा ॥ १८ ॥

वेङ्कट० 'इन्द्रस्य अश्वावपि' खलु मदं सोमं प्रति गन्तारौ मिथुनौ वहतः रथम् [9]इन्द्रस्य । एवमेव वृष्णः[9] इन्द्रस्य [10]रथधूः अश्वयोः उत्तरा[10] भवति ॥ १८ ॥

अधः पश्यस्व मोपरि संतरां पादकौ हर ।
मा ते कशप्लकौ दृशन्त्स्त्री हि ब्रह्मा बभूविथ ॥ १९ ॥

---

1. गतप्रज्ञ मूको. 2. °तम वि°, °तम म°. 3. महत्ताम् मूको. 4-4. नास्ति मूको. 5-5. इन्द्रा वाच० मूको. 6. वदन्ति मूको. 7. चपलत्वात् मूको. 8-8. °रघुस्त्रदक्षानि मूको. 9-9. "स्येन···न्" मूको. 10-10. रथधूरश्वयोरुत्तम मूको.

अध । पश्यस्व । मा । उपरि । सम्ऽतराम् । पादकौ । हर ।
मा । ते । कशऽप्लकौ । दृशन् । स्त्री । हि । ब्रह्मा । बभूविथ ॥ १९ ॥

वेङ्कट० एवमन्तरिक्षाद् आगच्छन् रथस्य इन्द्र स्त्रिय सन्त प्रायोगि पुंस्त्वम् इन्द्राद् इच्छन्त[1] मनुवाच तद्दर्शयति—अध[2] पश्यस्व स्त्री सती मा उपरि। तथा अत्यन्त संश्लिष्टौ पादकौ[3] हर। यथा पुरुषो विश्लिष्टपदनिधानो[4] भवति, नैव त्वया स्त्रिया कार्यम्। मा च ते कशप्लकौ[5] पुरुषा पश्यन्तु। 'कशति आहननकर्मा[6]'। "कश प्लकश्च"[7] उभे[8] अङ्गे भवत। तयोः अदर्शन वासस सुष्ठु परिधाने गयति। स्त्रियो हि आ गुल्फाद् अभिसंवीता भवन्ति। 'स्त्री हि[9] ब्रह्मा [10]सन् बभूविथ[10]'। प्राक् अपि मेध्यातिथे सूक्तान्ते प्रायोगे आसङ्गस्य पुंस्त्वप्राप्तिरुक्तेति (ऋ ८,१,३४) ॥ १९ ॥

"इति पञ्चाष्टके तृतीयाध्याये दशमो वर्ग" ॥

[३४]

"नीपातिथि काण्व ऋषि, अन्त्यानां तिसृणां सहस्र वसुरोचिषोऽङ्गिरस । इन्द्रो देवता । अनुष्टुप् छन्द, अन्त्यास्तिस्र गायत्र्य " ।

एन्द्र याहि हरिभिरुप कण्वस्य सुष्टुतिम् ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ १ ॥

आ । इन्द्र । याहि । हरिऽभि । उप । कण्वस्य । सुऽस्तुतिम् ।
दिव । अमुष्य । शासत । दिवम् । यय । दिवावसो इति दिवाऽवसो ॥ १ ॥

वेङ्कट० नीपातिथि । उप आ याहि इन्द्र कण्वस्य सुष्टुतिम् अर्थं । द्युलोकम् अस्मिन् इन्द्रे शासति[11] तत्र सुखम् आसत[12]। दिवम्[13] गच्छ दीप्तहविष्क[14] इति। तात्पर्यात् अनिघात ॥ १ ॥

आ त्वा ग्रावा वदन्निह सोमी घोषेण यच्छतु ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ २ ॥

आ । त्वा । ग्रावा । वदन् । इह । सोमी । घोषेण । यच्छतु ।
दिव । अमुष्य । शासत । दिवम् । यय । दिवावसो इति दिवाऽवसो ॥ २ ॥

वेङ्कट० आ यच्छतु त्वाम् अभिषवग्रावा शब्द कुर्वन् इह[15] सोमवान् घोषेण ॥ २ ॥

---

१ °च्छन्तमिद्र मूको. २. अथ मूको. ३ पादकौ मूको. ४ विश्लिष्ट पदनिधनं मूको. ५ कशप्लकौ मूको. ६ ६. कशतराहननकर्मा मूको ७ ७. प्लश्च प्लकश्च मूको ८. उभे मूको ९ ९ स्त्रीभि मूको १० १० सन्बभूमिद मूको. ११ ११. नास्ति मूको. १२ चासति मूको. १३ °सन् मूको. १४ दिव मूको १५. इव मूको.

अत्रा वि नेमिरेषामुरां न धूनुते वृकः ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ३ ॥

अत्र । वि । नेमिः । एषाम । उराम् । न । धूनुते । वृकः ।
दिवः । अमुष्य । शासतः । दिवम् । यय । दिवावसो इति दिवाऽवसो ॥ ३ ॥

वेङ्कट० अस्मिन्[1] यज्ञे एषाम् ग्राव्णाम्[2] नेमिः सोमलताम्[3] वि धूनुते[4] यथा[5] मेषीम् वृक[6] ॥ ३ ॥

आ त्वा कण्वा इहावसे हवन्ते वाजसातये ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ४ ॥

आ । त्वा । कण्वाः । इह । अवसे । हवन्ते । वाजऽसातये ।
दिवः । अमुष्य । शासतः । दिवम् । यय । दिवावसो इति दिवाऽवसो ॥ ४ ॥

वेङ्कट० निगदसिद्धा ॥ ४ ॥

दधामि ते सुतानां वृष्णे न पूर्वपाय्यम् ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ५ ॥

दधामि । ते । सुतानाम् । वृष्णे । न । पूर्वऽपाय्यम् ।
दिवः । अमुष्य । शासतः । दिवम् । यय । दिवावसो इति दिवाऽवसो ॥ ५ ॥

वेङ्कट० प्रयच्छामि तुभ्यं सुतान् सोमान्, यथा वृष्णे वायवे पूर्वपाय्यम् प्रयच्छति[7] यज्ञमुखे पेयं सोमम् ॥ ५ ॥

[8]इति षष्ठाष्टके तृतीयाध्याये एकादशो वर्गः[8] ॥

स्मत्पुरंधिर्न आ गहि विश्वतोधीर्न ऊतये ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ६ ॥

स्मत्ऽपुरंधिः । नः । आ । गहि । विश्वतःऽधीः । नः । ऊतये ।
दिवः । अमुष्य । शासतः । दिवम् । यय । दिवावसो इति दिवाऽवसो ॥ ६ ॥

वेङ्कट० प्रशस्तबुद्धिः अस्मान् आ गच्छ सर्वतोदत्तबुद्धिः अस्माकं रक्षणाय ॥ ६ ॥

आ नो याहि महेमते सहस्रोते शतामघ ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ७ ॥

---

१. यस्मिन् मूको. २. ग्राव्णोन मूको ३. सोमधरां मूको. ४. धुनुते मूको. ५. [illegible] मूको. ६. मेषी मूको. ७. प्रयाति मूको. ८-८. नास्ति मूको.

आ । नः । याहि । महेऽमते । सहस्रऽऊते । शतऽमघ ।
दिवः । अमुष्य । शासतः । दिवम् । यय । दिवावसो इति दिवाऽवसो ॥ ७ ॥

वेङ्कट० आ याहि अस्मान् हे महाबुद्धे! सहस्ररक्षण! बहुधन! ॥ ७ ॥

आ त्वा होता मनुर्हितो देवत्रा वक्षदीड्यः ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ८ ॥

आ । त्वा । होता । मनुःऽहितः । देवऽत्रा । वक्षत् । ईड्यः ।
दिवः । अमुष्य । शासतः । दिवम् । यय । दिवावसो इति दिवाऽवसो ॥ ८ ॥

वेङ्कट० आ वहतु त्वाम् होता अग्निः मनुष्यैः[1] गृहेषु निहितः[2] देवानां मध्ये स्तुत्यः ॥ ८ ॥

आ त्वा मदच्युता हरी श्येनं पक्षेव वक्षतः ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ९ ॥

आ । त्वा । मदऽच्युता । हरी इति । श्येनम् । पक्षाऽइव । वक्षतः ।
दिवः । अमुष्य । शासतः । दिवम् । यय । दिवावसो इति दिवाऽवसो ॥ ९ ॥

वेङ्कट० त्वाम् शत्रूणां मदस्य च्यावयितारौ अश्वौ यथा श्येनम् आत्मीयौ पक्षौ आ वहतः ॥ ९ ॥

आ याह्यर्य आ परि स्वाहा सोमस्य पीतये ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ १० ॥

आ । याहि । अर्य । आ । परि । स्वाहा । सोमस्य । पीतये ।
दिवः । अमुष्य । शासतः । दिवम् । यय । दिवावसो इति दिवाऽवसो ॥ १० ॥

वेङ्कट० [3]आ गच्छ ईश्वर[3] सर्वतः । स्वाहा करोमि सोम तव पानाय ॥ १० ॥

[4]इति षष्ठाष्टके तृतीयाध्याये द्वादशो वर्गः[4] ॥

आ नो याह्युपश्रुत्युक्थेषु रणया इह ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ११ ॥

आ । नः । याहि । उपऽश्रुति । उक्थेषु । रणय । इह ।
दिवः । अमुष्य । शासतः । दिवम् । यय । दिवावसो इति दिवाऽवसो ॥ ११ ॥

---

१ मनुष्ये मूको. २ निहिते मूको. ३-३ आगच्छेरत्वा मूको. ४-४ नास्ति मूको.

वेङ्कट० आ याहि अस्माकं स्तुतेः समीपम् शस्त्रेषु । रणय[1] अस्मान् यज्ञे ॥ ११ ॥

सरूपैरा सु नो गहि संभृतैः संभृताश्वः ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ १२ ॥

सऽरूपैः । आ । सु । नः । गहि । संऽभृतैः । सम्ऽभृतऽअश्वः ।
दिवः । अमुष्य । शासतः । दिवम् । यय । दिवावसो इति दिवाऽवसो ॥ १२ ॥

वेङ्कट० समानरूपैः अश्वैः आ गहि अस्मान् घाससम्भृतैः[2] पुष्टाश्वः ॥ १२ ॥

आ याहि पर्वतेभ्यः समुद्रस्याधि विष्टपः ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ १३ ॥

आ । याहि । पर्वतेभ्यः । समुद्रस्य । अधि । विष्टपः ।
दिवः । अमुष्य । शासतः । दिवम् । यय । दिवावसो इति दिवाऽवसो ॥ १३ ॥

वेङ्कट० आ याहि पर्वतेभ्यः, तथा समुद्रस्य अन्तरिक्षस्य विष्टपाद् अधि च इति ॥ १३ ॥

आ नो गव्यान्यश्व्या सहस्रा शूर दर्दृहि ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ १४ ॥

आ । नः । गव्यानि । अश्व्या । सहस्रा । शूर । दर्दृहि ।
दिवः । अमुष्य । शासतः । दिवम् । यय । दिवावसो इति दिवाऽवसो ॥ १४ ॥

वेङ्कट० आ दर्दृहि विवृणु अस्मभ्यम् गव्यानि अश्व्यानि[3] च[4] शूर । सहस्रसंख्यानि ॥ १४ ॥

आ नः सहस्रशो भरायुतानि शतानि च ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ १५ ॥

आ । नः । सहस्रऽशः । भर । अयुतानि । शतानि । च ।
दिवः । अमुष्य । शासतः । दिवम् । यय । दिवावसो इति दिवाऽवसो ॥ १५ ॥

वेङ्कट० आ हर अस्मभ्यम् सहस्रशः अयुतानि शतानि च ॥ १५ ॥

आ यदिन्द्रश्च दद्वहे सहस्रं वसुरोचिषः । ओजिष्ठमश्व्यं पशुम् ॥ १६ ॥
आ । यत् । इन्द्रः । च । दद्वहे इति । सहस्रम् । वसुऽरोचिषः । ओजिष्ठम् । अश्व्यम् । पशुम् ॥ १६ ॥

---

१. रणाय मूको. २. °संहतैः मूको. ३. अश्वानि मूको. ४ नास्ति मं°.

वेङ्कट० शौनकः—"तिस्रः अन्त्यास्तु[1] 'आ यदिन्द्रः' इति सहस्रम् वसुरोचिषः" इति । वसुरोचिषः वयम् सहस्रम् अस्माकम् नेता अयम् इन्द्रः च यदा आ ददहे पारावतात्[2] बलवत्तरम् अश्वात्मक पशुं च । उत्तरत्र सम्बन्धः ॥ १६ ॥

य ऋज्रा वातरंहसोऽरुषासों रघुष्यदः । भ्राजन्ते सूर्या इव ॥ १७ ॥

ये । ऋज्रा । वातऽरंहसः । अरुषासः । रघुऽस्यदः । भ्राजन्ते । सूर्याःऽइव ॥ १७ ॥

वेङ्कट० ये ऋजुगामिनः वातसदृशवेगा आरोचमानाः लघु च स्यन्दमानाः भ्राजन्ते [3]सूर्याः इव अश्वाः आसाः[3] ॥ १७ ॥

पारावतस्य रातिषु द्रवच्चक्रेष्वाशुषु । तिष्ठं वनस्य मध्य आ ॥ १८ ॥

पारावतस्य । रातिषु । द्रवत्ऽचक्रेषु । आशुषु । तिष्ठम् । वनस्य । मध्ये । आ ॥ १८ ॥

वेङ्कट० तेषु एषु[4] पारावतस्य देयेषु[5] द्रवद्रथचक्रेषु अश्वेषु आ तिष्ठम् इति वसुरोचिषां सहस्रं वदति[6] तपोवनस्य मध्ये अश्वेषु प्रतिगृहीतेषु आतिष्ठम्[7] इति ॥ १८ ॥

[8]इति पञ्चाष्टके तृतीयाध्याये त्रयोदशो वर्गः[8] ॥

[३५]

[9]श्यावाश्व आत्रेय ऋषिः । अश्विनौ देवता । उपरिष्टाज्ज्योतिस्त्रिष्टुप् छन्दः, द्वाविंशीचतुर्विंश्यौ पङ्क्ती, त्रयोविंशी महाबृहती[9] ।

अग्निनेन्द्रेण वरुणेन विष्णुनादित्यै रुद्रैर्वसुभिः सचाभुवा ।
सजोषसा उषसा सूर्येण च सोमं पिबतमश्विना ॥ १ ॥

अग्निना । इन्द्रेण । वरुणेन । विष्णुना । आदित्यैः । रुद्रैः । वसुऽभिः । सचाऽभुवा ।
सऽजोषसा । उषसा । सूर्येण । च । सोमम् । पिबतम् । अश्विना ॥ १ ॥

वेङ्कट० श्यावाश्वः[1] । अग्न्यादिभिः सहभूतौ सङ्गतौ उषसा सूर्येण च सोमम् पिबतम् अश्विनौ ! ॥ १ ॥

विश्वाभिर्धीभिर्भुवनेन वाजिना दिवा पृथिव्याद्रिभिः सचाभुवा ।
सजोषसा उषसा सूर्येण च सोमं पिबतमश्विना ॥ २ ॥

विश्वाभिः । धीभिः । भुवनेन । वाजिना । दिवा । पृथिव्या । अद्रिऽभिः । सचाऽभुवा ।
सऽजोषसा । उषसा । सूर्येण । च । सोमम् । पिबतम् । अश्विना ॥ २ ॥

---

१. भ्राया तु मूको. २. पारावतान् मूको. ३-३. सर्योस्वाता वि°; °र्या ··· °ताः अ°. ४. एतेषु अ°. ५. °षु अश्वेषु मूको. ६. वसति मूको. ७. भति° मूको. ८-८. नास्ति मूको ९. नास्ति अ°.

वेङ्कट० सर्वैः प्रज्ञानैः सर्वेण च भूतजातेन हे बलिनौ! सुप्रभृतिभिः च सहभूतौ[1] ॥ २ ॥

विश्वैर्देवैस्त्रिभिरेकादशैरिहाद्भिर्मरुद्भिर्भृगुभिः सचाभुवा ।
सजोषसा उषसा सूर्येण च सोमं पिबतमश्विना ॥ ३ ॥

विश्वैः । देवैः । त्रिऽभिः । एकादशैः । इह । अत्ऽभिः । मरुत्ऽभिः । भृगुऽभिः । सचाऽभुवा ।
सऽजोषसौ । उषसा । सूर्येण । च । सोमम् । पिबतम् । अश्विना ॥ ३ ॥

वेङ्कट० अस्मिन् यज्ञे सर्वैः एव सहभूतौ पिबतम् सोमम् इति ॥ ३ ॥

जुषेथां यज्ञं बोधतं हवस्य मे विश्वेह देवौ सवनाव गच्छतम् ।
सजोषसा उषसा सूर्येण चेषं नो वोळ्हमश्विना ॥ ४ ॥

जुषेथाम् । यज्ञम् । बोधतम् । हवस्य । मे । विश्वा । इह । देवौ । सवना । अव । गच्छतम् ।
सऽजोषसौ । उषसा । सूर्येण । च । आ । इषम् । नः । वोळ्हम् । अश्विना ॥ ४ ॥

वेङ्कट० जुषेथाम् यज्ञम् बुध्यतं च मम ह्वानम् । सर्वाणि एव सवनानि इह देवौ! अव गच्छतम् ।
सङ्गतौ उषसा सूर्येण च अन्नम् अस्मभ्यम् आ वहतम् अश्विनौ! ॥ ४ ॥

स्तोमं जुषेथां युवशेव कन्यनां विश्वेह देवौ सवनाव गच्छतम् ।
सजोषसा उषसा सूर्येण चेषं नो वोळ्हमश्विना ॥ ५ ॥

स्तोमम् । जुषेथाम् । युवशाऽइव । कन्यनाम् । विश्वा । इह । देवौ । सवना । अव । गच्छतम् ।
सऽजोषसौ । उषसा । सूर्येण । च । आ । इषम् । नः । वोळ्हम् । अश्विना ॥ ५ ॥

वेङ्कट० स्तोमम् सचेथां यथा[2] युवानौ कन्यानाम् आह्वानं सेवेते ॥ ५ ॥

गिरो जुषेथामध्वरं जुषेथां विश्वेह देवौ सवनाव गच्छतम् ।
सजोषसा उषसा सूर्येण चेषं नो वोळ्हमश्विना ॥ ६ ॥

गिरः । जुषेथाम् । अध्वरम् । जुषेथाम् । विश्वा । इह । देवौ । सवना । अव । गच्छतम् ।
सऽजोषसौ । उषसा । सूर्येण । च । आ । इषम् । नः । वोळ्हम् । अश्विना ॥ ६ ॥

वेङ्कट० निगदसिद्धा ॥ ६ ॥

[3]इति षष्ठाष्टके तृतीयाध्याये चतुर्दशो वर्गः[3] ॥

---

१. सहभूतौ मूको. २. यथायथम् मूको. ३-३. नास्ति मूको.

हारिद्रवेव पतथो वनेदुप सोमं सुतं महिषेवाव गच्छथः ।
सजोषसा उषसा सूर्येण च त्रिर्वर्तिर्यातमश्विना ॥ ७ ॥

हारिद्रवाऽइव । पतथः । वना । इत् । उप । सोमम् । सुतम् । महिषाऽइव । अव । गच्छथः ।
सऽजोषसौ । उषसा । सूर्येण । च । त्रिः । वर्तिः । यातम् । अश्विना ॥ ७ ॥

वेङ्कट० हारिद्रवौ[1] इव पक्षिणौ वनानि उप पतथः[2], सोमम् सुतम् महिषौ इव पिपासितौ[3] अव गच्छथः । सजोषौ उषसा सूर्येण च अह्नः त्रिः मार्गम् यातम् अश्विनौ! ॥ ७ ॥

हंसाविव पतथो अध्वगाविव सोमं सुतं महिषेवाव गच्छथः ।
सजोषसा उषसा सूर्येण च त्रिर्वर्तिर्यातमश्विना ॥ ८ ॥

हंसौऽइव । पतथः । अध्वगौऽइव । सोमम् । सुतम् । महिषाऽइव । अव । गच्छथः ।
सऽजोषसौ । उषसा । सूर्येण । च । त्रिः । वर्तिः । यातम् । अश्विना ॥ ८ ॥

वेङ्कट० हंसौ इव तथा अध्वगौ इव च ॥ ८ ॥

श्येनाविव पतथो हव्यदातये सोमं सुतं महिषेवाव गच्छथः ।
सजोषसा उषसा सूर्येण च त्रिर्वर्तिर्यातमश्विना ॥ ९ ॥

श्येनौऽइव । पतथः । हव्यऽदातये । सोमम् । सुतम् । महिषाऽइव । अव । गच्छथः ।
सऽजोषसौ । उषसा । सूर्येण । च । त्रिः । वर्तिः । यातम् । अश्विना ॥ ९ ॥

वेङ्कट० श्येनौ इव तथा यजमानाय च ॥ ९ ॥

पिबतं च तृप्णुतं चा च गच्छतं प्रजां च धत्तं द्रविणं च धत्तम् ।
सजोषसा उषसा सूर्येण चोर्जं नो धत्तमश्विना ॥ १० ॥

पिबतम् । च । तृप्णुतम् । च । आ । च । गच्छतम् । प्रऽजाम् । च । धत्तम् । द्रविणम् । च । धत्तम् ।
सऽजोषसौ । उषसा । सूर्येण । च । ऊर्जम् । नः । धत्तम् । अश्विना ॥ १० ॥

वेङ्कट० पिबतम्, तृप्यतम्, तदर्थम् आ गच्छतम्[4], तथा प्रजाम् द्रविणम् च धत्तम् ॥ १० ॥

जयतं च प्र स्तुतं च प्र चावतं प्रजां च धत्तं द्रविणं च धत्तम् ।
सजोषसा उषसा सूर्येण चोर्जं नो धत्तमश्विना ॥ ११ ॥

१. हरिद्रौ वि[1]; हारिद्रौ अ[1]. २. पतथः वि[1]; पतम अ[1]. ३. पिपासितौ मूको. ४. °च्छत वि[1]; °च्छत अ[1].

जर्यतम् । च । प्र । स्तुतम् । च । प्र । च । अवतम् । प्रऽजाम् । च । धत्तम् । द्रविणम् । च । धत्तम् ।
सऽजोर्षसौ । उषसा । सूर्येण । च । ऊर्जम् । नः । धत्तम् । अश्विना ॥ ११ ॥

वेङ्कट० जयतम् च शत्रून्, प्रस्तुतम् च स्तोतॄन्, अस्मान् प्र च रक्षतम् ॥ ११ ॥

हतं च शत्रून् यततं च मित्रिणः प्रजां च धत्तं द्रविणं च धत्तम् ।
सजोषसा उषसा सूर्येण चोर्जं नो धत्तमश्विना ॥ १२ ॥

हतम् । च । शत्रून् । यततम् । च । मित्रिणः । प्रऽजाम् । च । धत्तम् । द्रविणम् । च । धत्तम् ।
सऽजोर्षसौ । उषसा । सूर्येण । च । ऊर्जम् । नः । धत्तम् । अश्विना ॥ १२ ॥

वेङ्कट० हतम् च शत्रून्, गच्छतम् च मैत्रीयुक्तान् ॥ १२ ॥

[1]इति षष्ठाष्टके तृतीयाध्याये पञ्चदशो वर्गः[1] ॥

मित्रावरुणवन्ता उत धर्मवन्ता मरुत्वन्ता जरितुर्गच्छथो हवम् ।
सजोषसा उषसा सूर्येण चादित्यैर्यातमश्विना ॥ १३ ॥

मित्रावरुणऽवन्तौ । उत । धर्मऽवन्ता । मरुत्वन्ता । जरितुः । गच्छथः । हवम् ।
सऽजोषसौ । उषसा । सूर्येण । च । आदित्यैः । यातम् । अश्विना ॥ १३ ॥

वेङ्कट० मित्रादिभिः सहितौ आगच्छतम् जरितुः ह्वानम् । तथा उषसा सूर्येण च[2] सङ्गतौ
आदित्यैः च यातम् अश्विनौ ! ॥ १३ ॥

आङ्गिरस्वन्ता उत विष्णुवन्ता मरुत्वन्ता जरितुर्गच्छथो हवम् ।
सजोषसा उषसा सूर्येण चादित्यैर्यातमश्विना ॥ १४ ॥

अङ्गिरस्वन्तौ । उत । विष्णुऽवन्ता । मरुत्वन्ता । जरितुः । गच्छथः । हवम् ।
सऽजोर्षसौ । उषसा । सूर्येण । च । आदित्यैः । यातम् । अश्विना ॥ १४ ॥

वेङ्कट० निगदसिद्धेति ॥ १४ ॥

ऋभुमन्ता वृषणा वाजवन्ता मरुत्वन्ता जरितुर्गच्छथो हवम् ।
सजोषसा उषसा सूर्येण चादित्यैर्यातमश्विना ॥ १५ ॥

ऋभुऽमन्ता । वृषणा । वाजऽवन्ता । मरुत्वन्ता । जरितुः । गच्छथः । हवम् ।
सऽजोर्षसौ । उषसा । सूर्येण । च । आदित्यैः । यातम् । अश्विना ॥ १५ ॥

१-१. नास्ति मूको. २. नास्ति वि'.

वेङ्कट० निगदसिद्धा। ऋभुमन्ता वाजवन्ता इति ज्येष्ठकनिष्ठाभ्यां व्यपदेशः ॥ १५ ॥

ब्रह्म जिन्वतमुत जिन्वतं धियो हतं रक्षांसि सेधतममीवाः ।
सजोषसा उषसा सूर्येण च सोमं सुन्वतो अश्विना ॥ १६ ॥

ब्रह्म । जिन्वतम् । उत । जिन्वतम् । धियः । हतम् । रक्षांसि । सेधतम् । अमीवाः ।
सऽजोषसौ । उषसा । सूर्येण । च । सोमम् । सुन्वतः । अश्विना ॥ १६ ॥

वेङ्कट० ब्राह्मणम् जिन्वतम् । अपि च जिन्वतम् कर्माणि । हतम् च रक्षांसि । नि सेधतम् राक्षसान् ।
सङ्गतौ उषसा सूर्येण च सोमम् सुन्वतः[1] पिबतम् अश्विनौ! ॥ १६ ॥

क्षत्रं जिन्वतमुत जिन्वतं नॄन् हतं रक्षांसि सेधतममीवाः ।
सजोषसा उषसा सूर्येण च सोमं सुन्वतो अश्विना ॥ १७ ॥

क्षत्रम् । जिन्वतम् । उत । जिन्वतम् । नॄन् । हतम् । रक्षांसि । सेधतम् । अमीवाः ।
सऽजोषसौ । उषसा । सूर्येण । च । सोमम् । सुन्वतः । अश्विना ॥ १७ ॥

वेङ्कट० क्षत्रम् जिन्वतम् ''' ॥ १७ ॥

धेनूर्जिन्वतमुत जिन्वतं विशो हतं रक्षांसि सेधतममीवाः ।
सजोषसा उषसा सूर्येण च सोमं सुन्वतो अश्विना ॥ १८ ॥

धेनूः । जिन्वतम् । उत । जिन्वतम् । विशः । हतम् । रक्षांसि । सेधतम् । अमीवाः ।
सऽजोषसौ । उषसा । सूर्येण । च । सोमम् । सुन्वतः । अश्विना ॥ १८ ॥

वेङ्कट० धेनूः जिन्वतम्, अपि च जिन्वतम् वैश्यान् ॥ १८ ॥

[2]इति षष्ठाष्टके तृतीयाध्याये षोडशो वर्गः[2] ॥

अत्रेरिव शृणुतं पूर्व्यस्तुतिं श्यावाश्वस्य सुन्वतो मदच्युता ।
सजोषसा उषसा सूर्येण चाश्विना तिरोअह्न्यम् ॥ १९ ॥

अत्रेःऽइव । शृणुतम् । पूर्व्यऽस्तुतिम् । श्यावऽअश्वस्य । सुन्वतः । मदऽच्युता ।
सऽजोषसौ । उषसा । सूर्येण । च । अश्विना । तिरःऽअह्न्यम् ॥ १९ ॥

वेङ्कट० मम पितामहस्य अत्रेः इव मम च मुख्याम् स्तुतिम्[3] शृणुतम् श्यावाश्वस्य सुन्वतः हे शत्रुमदस्य च्यावकौ! । सजोषसौ उषसा सूर्येण च अश्विना! तिरोअह्न्यम् पिबतं सोमम् ।

---

१. सुन्वतम् मूको. २-२. नास्ति मूको. ३. श्रुतिम् मूको.

तिरोभूते[1] पूर्वस्मिन् अहनि अपरेद्युः प्रातः अनयोः यागः इति ॥ १९ ॥

सर्गाँ इव सृजतं सुष्टुतीरुप श्यावाश्वस्य सुन्वतो मदच्युता ।
सजोषसा उषसा सूर्येण चाश्विना तिरोअह्न्यम् ॥ २० ॥

सर्गान्ऽइव । सृजतम् । सुऽस्तुतीः । उप । श्यावऽअश्वस्य । सुन्वतः । मदऽच्युता ।
सऽजोषसौ । उषसा । सूर्येण । च । अश्विना । तिरःऽअह्न्यम् ॥ २० ॥

वेङ्कट० सुष्टुतीः[1] आत्मनि उप[2] सृजतम् सर्गान् इव । आभरणानि इर्षीणि वस्त्राणि वा सर्गाः ॥ २० ॥

रश्मीँरिव यच्छतमध्वराँ उप श्यावाश्वस्य सुन्वतो मदच्युता ।
सजोषसा उषसा सूर्येण चाश्विना तिरोअह्न्यम् ॥ २१ ॥

रश्मीन्ऽइव । यच्छतम् । अध्वरान् । उप । श्यावऽअश्वस्य । सुन्वतः । मदऽच्युता ।
सऽजोषसौ । उषसा । सूर्येण । च । अश्विना । तिरःऽअह्न्यम् ॥ २१ ॥

वेङ्कट० अस्मदीयान् यज्ञान् उप गच्छतम् अश्वप्रग्रहान् इव ॥ २१ ॥

अर्वाग् रथं नि यच्छतं पिबतं सोम्यं मधु ।
आ यातमश्विना गतमवस्युर्वामहं हुवे धत्तं रत्नानि दाशुषे ॥ २२ ॥

अर्वाक् । रथम् । नि । यच्छतम् । पिबतम् । सोम्यम् । मधु ।
आ । यातम् । अश्विना । आ । गतम् । अवस्युः । वाम् । अहम् । हुवे । धत्तम् । रत्नानि । दाशुषे ॥

वेङ्कट० अभिमुखम् रथम् नि यच्छतम् । पिबतम् च सोममयम् मधु । आ यातम् अश्विनौ! आ गच्छतं च सोमं प्रति । रक्षणकामः वाम् अहम् हुवे । धत्तम् रत्नानि प्रयच्छते ॥ २२ ॥

नमोवाके प्रस्थिते अध्वरे नरा विवक्षणस्य पीतये ।
आ यातमश्विना गतमवस्युर्वामहं हुवे धत्तं रत्नानि दाशुषे ॥ २३ ॥

नमःऽवाके । प्रऽस्थिते । अध्वरे । नरा । विऽवक्षणस्य । पीतये ।
आ । यातम् । अश्विना । आ । गतम् । अवस्युः । वाम् । अहम् । हुवे । धत्तम् । रत्नानि । दाशुषे ॥

वेङ्कट० नमस्कारः यत्र उच्यते, प्रस्थिते यज्ञे नरौ! । 'उभयं सह[3] वा एतद्यज्ञ [4]एव यत्[4] सूक्तवाकश्च नमोवाकश्च' (माश १,९,१,४) इति ब्राह्मणम् । वहनशीलस्य[5] सोमस्य पानाय ॥ २३ ॥

१. प्रति° मूको. २. 'निम् अ'. ३. क्या मूको ४. नास्ति माश. ५-५. नास्ति मूको.
६. < वि √वक्ष् 'वृद्धौ' इति वैप १,२९००; वहन° मूको.

वेङ्कट० निगदसिद्धा। ऋभुमन्ता वाजवन्ता इति ज्येष्ठकनिष्ठाभ्यां व्यपदेशः ॥ १५ ॥

ब्रह्म जिन्वतमुत जिन्वतं धियो हतं रक्षांसि सेधतममीवाः ।
सजोषसा उषसा सूर्येण च सोमं सुन्वतो अश्विना ॥ १६ ॥

ब्रह्म । जिन्वतम् । उत । जिन्वतम् । धियः । हतम् । रक्षांसि । सेधतम् । अमीवाः ।
सऽजोषसौ । उषसा । सूर्येण । च । सोमम् । सुन्वतः । अश्विना ॥ १६ ॥

वेङ्कट० ब्राह्मणम् जिन्वतम् । अपि च जिन्वतम् कर्माणि । हतम् च रक्षांसि । नि सेधतम् राक्षसान् । सङ्गतौ उषसा सूर्येण च सोमम् सुन्वतः[2] पिबतम् अश्विनौ! ॥ १६ ॥

क्षत्रं जिन्वतमुत जिन्वतं नॄन् हतं रक्षांसि सेधतममीवाः ।
सजोषसा उषसा सूर्येण च सोमं सुन्वतो अश्विना ॥ १७ ॥

क्षत्रम् । जिन्वतम् । उत । जिन्वतम् । नॄन् । हतम् । रक्षांसि । सेधतम् । अमीवाः ।
सऽजोषसौ । उषसा । सूर्येण । च । सोमम् । सुन्वतः । अश्विना ॥ १७ ॥

वेङ्कट० क्षत्रम् जिन्वतम् ··· ॥ १७ ॥

धेनूर्जिन्वतमुत जिन्वतं विशो हतं रक्षांसि सेधतममीवाः ।
सजोषसा उषसा सूर्येण च सोमं सुन्वतो अश्विना ॥ १८ ॥

धेनूः । जिन्वतम् । उत । जिन्वतम् । विशः । हतम् । रक्षांसि । सेधतम् । अमीवाः ।
सऽजोषसौ । उषसा । सूर्येण । च । सोमम् । सुन्वतः । अश्विना ॥ १८ ॥

वेङ्कट० धेनूः जिन्वतम्, अपि च जिन्वतम् वैश्यान् ॥ १८ ॥

[2]इति षष्ठाष्टके तृतीयाध्याये षोडशो वर्गः[2] ॥

अत्रेरिव शृणुतं पूर्व्यस्तुतिं श्यावाश्वस्य सुन्वतो मदच्युता ।
सजोषसा उषसा सूर्येण चाश्विना तिरोअह्न्यम् ॥ १९ ॥

अत्रेःऽइव । शृणुतम् । पूर्व्यऽस्तुतिम् । श्यावऽअश्वस्य । सुन्वतः । मदऽच्युता ।
सऽजोषसौ । उषसा । सूर्येण । च । अश्विना । तिरःऽअह्न्यम् ॥ १९ ॥

वेङ्कट० मम पितामहस्य अत्रेः इव मम च मुख्याम् स्तुतिम्[1] शृणुतम् श्यावाश्वस्य सुन्वतः हे शत्रुमदस्य च्यावकौ! । सजोषसौ उषसा सूर्येण च अश्विना। तिरोअह्न्यम् पिबतं सोमम् ।

---

१. सुन्वताम् मूको. २-२. नास्ति मूको. ३. श्रुतिम् मूको.

ऊर्जा । देवान् । अवसि । ओजसा । त्वाम् । पिब । सोमम् । मदाय । कम् । शतक्रतो इति शतऽक्रतो ।
यम् । ते । भागम् । अधारयन् । विश्वाः । सेहानः । पृतनाः । उरु । ज्रयः । सम् । अप्सुऽजित् ।
मरुत्वान् । इन्द्र । सत्ऽपते ॥ ३ ॥

वेङ्कट० देव । अन्नेन देवान् रक्षसि । बलेन त्वाम् अपि इति ॥ ३ ॥

जनिता दिवो जनिता पृथिव्याः पिबा सोमं मदाय कं शतक्रतो ।
यं ते भागमधारयन् विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते ॥४॥

जनिता । दिवः । जनिता । पृथिव्याः । पिब । सोमम् । मदाय । कम् । शतक्रतो इति शतऽक्रतो ।
यम् । ते । भागम् । अधारयन् । विश्वाः । सेहानः । पृतनाः । उरु । ज्रयः । सम् । अप्सुऽजित् ।
मरुत्वान् । इन्द्र । सत्ऽपते ॥ ४ ॥

वेङ्कट० जनिता द्यावापृथिव्योरिति ॥ ४ ॥

जनिताश्वानां जनिता गवामसि पिबा सोमं मदाय कं शतक्रतो ।
यं ते भागमधारयन् विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते ॥५॥

जनिता । अश्वानाम् । जनिता । गवाम् । असि । पिब । सोमम् । मदाय । कम् । शतक्रतो इति शतऽक्रतो ।
यम् । ते । भागम् । अधारयन् । विश्वाः । सेहानः । पृतनाः । उरु । ज्रयः । सम् । अप्सुऽजित् ।
मरुत्वान् । इन्द्र । सत्ऽपते ॥ ५ ॥

वेङ्कट० जनिता अश्वानाम् गवाम् च भवसि ॥ ५ ॥

अत्रीणां स्तोममद्रिवो महस्कृधि पिबा सोमं मदाय कं शतक्रतो ।
यं ते भागमधारयन् विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते ॥६॥

अत्रीणाम् । स्तोमम् । अद्रिऽवः । महः । कृधि । पिब । सोमम् । मदाय । कम् । शतक्रतो इति शतऽक्रतो ।
यम् । ते । भागम् । अधारयन् । विश्वाः । सेहानः । पृतनाः । उरु । ज्रयः । सम् । अप्सुऽजित् ।
मरुत्वान् । इन्द्र । सत्ऽपते ॥ ६ ॥

वेङ्कट० अत्रीणाम् स्तोमम् वज्रिन्' महान्तम् कुरु ॥ ६ ॥

श्यावाश्वस्य सुन्वतस्तथा शृणु यथाशृणोरत्रेः कर्माणि कृण्वतः ।
प्र त्रसदस्युमाविथ त्वमेक इन्नृषाह्य इन्द्र ब्रह्माणि वर्धयन् ॥ ७ ॥

श्यावऽअश्वस्य । सुन्वतः । तथा । शृणु । यथा । अशृणोः । अत्रेः । कर्माणि । कृण्वतः ।
प्र । त्रसदस्युम् । आविथ । त्वम् । एकः । इत् । नृऽसह्ये । इन्द्र । ब्रह्माणि । वर्धयन् ॥ ७ ॥

वेङ्कट० श्यावाश्वस्य मम शृणु सुन्वत स्तुतिम् तथा, यथा अशृणो अत्रे कर्माणि कुर्वत[1]। स त्वम् प्र आविथ त्रसदस्युम्[2] एक एव युद्धे इन्द्र! स्तोत्राणि वर्धयन् कामैः ॥ ७ ॥

[3]इति पञ्चाष्टके तृतीयाध्याये अष्टादशो वर्गः[3] ॥

[३७]

[4]श्यावाश्व आत्रेय ऋषिः । इन्द्रो देवता । महापङ्क्तिश्छन्दः, आद्याऽतिजगती[4] ।

प्रेदं ब्रह्म वृत्रतूर्येष्वाविथ प्र सुन्वतः शचीपत इन्द्र विश्वाभिरूतिभिः ।
माध्यंदिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥ १ ॥

प्र । इदम् । ब्रह्म । वृत्रऽतूर्येषु । आविथ । प्र । सुन्वतः । शचीऽपते । इन्द्र । विश्वाभिः । ऊतिऽभिः ।
माध्यन्दिनस्य । सवनस्य । वृत्रऽहन् । अनेद्य । पिब । सोमस्य । वज्रिऽवः ॥ १ ॥

वेङ्कट० प्र आविथ इदम् ब्रह्म ब्राह्मणान् सङ्ग्रामेषु प्र सुन्वत [4]यजमानान् शचीपते! इन्द्र[4] विश्वैः पालनैः । स त्वम् माध्यन्दिनस्य सवनस्य वृत्रहन्! अनिन्द्य! पिब सोमम् वज्रिन्! ॥ १ ॥

सेहान उग्र पृतना अभि द्रुहः शचीपत इन्द्र विश्वाभिरूतिभिः ।
माध्यंदिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥ २ ॥

सेहानः । उग्र । पृतनाः । अभि । द्रुहः । शचीऽपते । इन्द्र । विश्वाभिः । ऊतिऽभिः ।
माध्यन्दिनस्य । सवनस्य । वृत्रऽहन् । अनेद्य । पिब । सोमस्य । वज्रिऽवः ॥ २ ॥

वेङ्कट० द्रोग्ध्रीः सेनाः अभिभवन्, कर्मपते[5] इति ॥ २ ॥

एकराळस्य भुवनस्य राजसि शचीपत इन्द्र विश्वाभिरूतिभिः ।
माध्यंदिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥ ३ ॥

एकऽराट् । अस्य । भुवनस्य । राजसि । शचीऽपते । इन्द्र । विश्वाभिः । ऊतिऽभिः ।
माध्यन्दिनस्य । सवनस्य । वृत्रऽहन् । अनेद्य । पिब । सोमस्य । वज्रिऽवः ॥ ३ ॥

वेङ्कट० एक एव राजा अस्य भुवनस्य राजसि ॥ ३ ॥

सस्थावाना यवयसि त्वमेक इच्छचीपत इन्द्र विश्वाभिरूतिभिः ।
माध्यंदिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥ ४ ॥

---

१ कुर्वत मूको. २. °स्युम् त्वम् मूको. ३-३. नास्ति मूको. ४-४ यजमाना इन्द्र मूको. ५ कर्मपतो मूको.

सुऽस्थावाना । यवयसि । त्वम् । एकः । इत् । शचीऽपते । इन्द्र । विश्वाभिः । ऊतिऽभिः ।
माध्यन्दिनस्य । सवनस्य । वृत्रऽहन् । अनेद्य । पिब । सोमस्य । वज्रिऽवः ॥ ४ ॥

वेङ्कट० समानं तिष्ठन्तौ इमौ लोकौ त्वम् एकः एव पृथक् करोषि ॥ ४ ॥

क्षेमस्य च प्रयुजश्च त्वमीशिषे शचीपत इन्द्र विश्वाभिरूतिभिः ।
माध्यंदिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥ ५ ॥

क्षेमस्य । च । प्रऽयुजः । च । त्वम् । ईशिषे । शचीऽपते । इन्द्र । विश्वाभिः । ऊतिऽभिः ।
माध्यन्दिनस्य । सवनस्य । वृत्रऽहन् । अनेद्य । पिब । सोमस्य । वज्रिऽवः ॥ ५ ॥

वेङ्कट० क्षेमस्य च प्रयुजः प्रयोगस्य च योगक्षेमयोः त्वम् ईशिषे ॥ ५ ॥

क्षत्राय त्वमवसि न त्वमाविथ शचीपत इन्द्र विश्वाभिरूतिभिः ।
माध्यंदिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥ ६ ॥

क्षत्राय । त्वम् । अवसि । न । त्वम् । आविथ । शचीऽपते । इन्द्र । विश्वाभिः । ऊतिऽभिः ।
माध्यन्दिनस्य । सवनस्य । वृत्रऽहन् । अनेद्य । पिब । सोमस्य । वज्रिऽवः ॥ ६ ॥

वेङ्कट० त्वम् बलाय भवसि । त्वं रक्षसि च भ्राष्टु आश्रितान् । न त्वम् केनचित् रक्ष्यसे ॥ ६ ॥

श्यावाश्वस्य रेभतस्तथा शृणु यथाशृणोरत्रेः कर्माणि कृण्वतः ।
प्र त्रसदस्युमाविथ त्वमेक इन्नृषाह्य इन्द्र क्षत्राणि वर्धयन् ॥ ७ ॥

श्यावऽअश्वस्य । रेभतः । तथा । शृणु । यथा । अशृणोः । अत्रेः । कर्माणि । कृण्वतः ।
प्र । त्रसदस्युम् । आविथ । त्वम् । एकः । इत् । नृऽसह्ये । इन्द्र । क्षत्राणि । वर्धयन् ॥ ७ ॥

वेङ्कट० रेभतिः स्तौतिकर्मेति (द्र. निघ ३,१४) ॥ ७ ॥[1]

[2]इति षष्ठाष्टके तृतीयाध्याये एकोनविंशो वर्गः[2] ॥

[३८]

[3]श्यावाश्व आत्रेय ऋषिः । इन्द्राग्नी देवता । गायत्री छन्दः[3] ।

यज्ञस्य हि स्थ ऋत्विजा सस्नी वाजेषु कर्मसु । इन्द्राग्नी तस्य बोधतम् ॥१॥

यज्ञस्य । हि । स्थः । ऋत्विजा । सस्नी इति । वाजेषु । कर्मऽसु । इन्द्राग्नी इति । तस्य । बोधतम् ॥१॥

वेङ्कट० हे इन्द्राग्नी! 'यज्ञस्य ऋत्विजौ स्थ' शुद्धौ । सङ्ग्रामेषु यज्ञेषु च उपतिष्ठन्तौ इन्द्राग्नी!
तं मां वित्तम्, स्तुतिं वा इमाम् इति ॥ १ ॥

---

१. शिष्टम् ऋ ८,३६,७ द्र. २-२. नास्ति मूको. ३-३. यज्ञस्यार्थं जैवे मूको.

तोशासा रथयावाना वृत्रहणापराजिता । इन्द्राग्नी तस्य बोधतम् ॥ २ ॥

तोशासा । रथऽयावाना । वृत्रऽहना । अपराऽजिता । इन्द्राग्नी इति । तस्य । बोधतम् ॥ २ ॥

वेङ्कट० हिंसावन्तौ रथेन गच्छन्तौ शत्रूणां हन्तारौ[1] अपराजितौ[2] युवाम् इन्द्राग्नी ! ॥ २ ॥

इदं वां मदिरं मध्वधुक्षन्नद्रिभिर्नरः । इन्द्राग्नी तस्य बोधतम् ॥ ३ ॥

इदम् । वाम् । मदिरम् । मधु । अधुक्षन् । अद्रिऽभिः । नरः । इन्द्राग्नी इति । तस्य । बोधतम् ॥ ३ ॥

वेङ्कट० निगदसिद्धा ॥ ३ ॥

जुषेथां यज्ञमिष्टये सुतं सोमं सधस्तुती । इन्द्राग्नी आ गतं नरा ॥ ४ ॥

जुषेथाम् । यज्ञम् । इष्टये । सुतम् । सोमम् । सधस्तुती इति सधऽस्तुती ।
इन्द्राग्नी इति । आ । गतम् । नरा ॥ ४ ॥

वेङ्कट० सेवेथाम् यज्ञम् यागाय सुतम् च सोमम् हे सहभूतस्तुती[3] । इन्द्राग्नी ! आ गच्छतम् नेतारौ[3] ॥ ४ ॥

इमा जुषेथां सवना येभिर्हव्यान्यूहथुः । इन्द्राग्नी आ गतं नरा ॥ ५ ॥

इमा । जुषेथाम् । सवना । येभिः । हव्यानि । ऊहथुः । इन्द्राग्नी इति । आ । गतम् । नरा ॥ ५ ॥

वेङ्कट० इमानि सेवेथाम् सवनानि, यैः 'युवाम् हव्यानि ऊहथुः' ॥ ५ ॥

इमां गायत्रवर्तनिं जुषेथां सुष्टुतिं मम । इन्द्राग्नी आ गतं नरा ॥ ६ ॥

इमाम् । गायत्रऽवर्तनिम् । जुषेथाम् । सुऽस्तुतिम् । मम । इन्द्राग्नी इति । आ । गतम् । नरा ॥ ६ ॥

वेङ्कट० इमाम् गायत्रमार्गाम्[4] सेवेथाम् सुष्टुतिम् मम ॥ ६ ॥

[5]इति षष्ठाष्टके तृतीयाध्याये विंशो वर्गः[5] ॥

प्रातर्यावभिरा गतं देवेभिर्जेन्यावसू । इन्द्राग्नी सोमपीतये ॥ ७ ॥

प्रातर्यावऽभिः । आ । गतम् । देवेभिः । जेन्यावसू इति । इन्द्राग्नी इति । सोमऽपीतये ॥ ७ ॥

वेङ्कट० प्रातर्यावभिः आ गच्छतम् देवैः हे जेतव्यधनयुक्तौ[6] इन्द्राग्नी ! सोमस्य पानाय ॥ ७ ॥

श्यावाश्वस्य सुन्वतोऽत्रीणां शृणुतं हवम् । इन्द्राग्नी सोमपीतये ॥ ८ ॥

---

१. हन्तारा वि°. २. स्वराजितौ मूको. ३-३. युवां °° मूको. ४. गायत्रमा° मूको. ५-५ नास्ति मूको. ६. °नयुक्तौ मूको.

श्यावऽअश्वस्य। सुन्वतः। अत्रीणाम्। शृणुतम्। हवम्। इन्द्राग्नी इति। सोमऽपीतये ॥ ८ ॥

वेङ्कट० [1]श्यावाश्वस्य यजमानस्य ऋत्विजाम् अत्रीणाम्[1] शृणुतम्[2] ह्वानम् ॥ ८ ॥

एवा वामह्व ऊतये यथाहुवन्त मेधिराः। इन्द्राग्नी सोमपीतये ॥ ९ ॥

एव। वाम्। अह्वे। ऊतये। यथा। अहुवन्त। मेधिराः। इन्द्राग्नी इति। सोमऽपीतये ॥ ९ ॥

वेङ्कट० एवम् वाम्[3] अहं ह्वयामि रक्षणाय, यथा अहुवन्त[4] प्राज्ञाः ॥ ९ ॥

आहं सरस्वतीवतोरिन्द्राग्न्योरवो वृणे। याभ्यां गायत्रमृच्यते ॥ १० ॥

आ। अहम्। सरस्वतीऽवतोः। इन्द्राग्न्योः। अवः। वृणे। याभ्याम्। गायत्रम्। ऋच्यते ॥ १० ॥

वेङ्कट० अहम् स्तुतिमतोः[5] इन्द्राग्न्योः पालनम् आ वृणे, ययोरर्थम् गायत्रम् साम स्तूयते ॥ १० ॥

[6]इति षष्ठाष्टके तृतीयाध्याये एकविंशो वर्गः[6] ॥

[३९]

[7]नाभाकः काण्व ऋषिः। अग्निर्देवता। महापङ्क्तिश्छन्दः[7]।

अग्निमस्तोष्यृग्मियमग्निमीळा यजध्यै।
अग्निर्देवाँ अनक्तु न उभे हि विदथे कविरन्तश्चरति दूत्यं१ नभन्तामन्यके समे ॥१॥

अग्निम्। अस्तोषि। ऋग्मियम्। अग्निम्। ईळा। यजध्यै। अग्निः। देवान्। अनक्तु। नः। उभे इति। हि। विदथे इति। कविः। अन्तः। चरति। दूत्यम्। नभन्ताम्। अन्यके। समे ॥१॥

वेङ्कट० अग्निम् [7]स्तौमि स्तवार्हम्[7]। अग्निम् स्तुत्या यष्टुं स्तौमि। अग्निः देवान् अस्माकम् अनक्तु हविर्भिः। सोऽयम् उभे हि द्यावापृथिव्यौ अन्तः दूत्यम् चरति अन्तरिक्षे गच्छन्। नभन्ताम्[8] च [9]सर्वे जिघांसवः[9] शत्रवः। यद्वा नभतिर्हिंसाकर्मा[10] (तु. निघ २,१९), हिंस्यमानाः[11] अग्निनेति[12] ॥१॥

न्यग्ने नव्यसा वचस्तनूषु शंसमेषाम्।
न्यराती रराव्णां विश्वा अर्यो अरातीरितो युच्छन्त्वामुरो नभन्तामन्यके समे ॥२॥

नि। अग्ने। नव्यसा। वचः। तनूषु। शंसम्। एषाम्। नि। अरातीः। रराव्णाम्। विश्वाः। अर्यः। अरातीः। इतः। युच्छन्तु। आऽमुरः। नभन्ताम्। अन्यके। समे ॥ २ ॥

१-१. °स्य आमित्राणाम् वि[2]; °स्य यजमानस्य आमित्राणाम् अ[1]. २. °त मूको. ३. नास्ति वि[2]. ४. °न्तः मूको. ५. स्तुतीव्रतो मूको. ६-६. नास्ति मूको. ७-७. स्तोमगर्भम् मूको. ८. नमर्व··· मूको. ९-९. सर्वेऽपि विवासः वि[2]; °विवासः अ[1] मूको. १०. नगतिर्हि[?] मूको. ११. °मान मूको. १२. अग्निनेति वि[2].

वेङ्कट० नि[1] दह अग्ने! शंसनम् एषाम् शत्रूणाम् अस्माकम् अङ्गेषु नवतरेण वचसा[2]। नि दह अरातिम् प्रयच्छताम्। विश्वाः अभिगच्छन्तः अरातयः इतः अपगच्छन्तु आमूलाः ॥ २ ॥

अग्ने मन्मानि तुभ्यं कं घृतं न जुह्व आसनि ।
स देवेषु प्र चिकिद्धि त्वं ह्यसि पूर्व्यः शिवो दूतो विवस्वतो नभन्तामन्यके समे ॥३॥

अग्ने। मन्मानि। तुभ्यम्। कम्। घृतम्। न। जुह्वे। आसनि। सः। देवेषु। प्र। चिकिद्धि।
त्वम्। हि। असि। पूर्व्यः। शिवः। दूतः। विवस्वतः। नभन्ताम्। अन्यके। समे ॥ ३ ॥

वेङ्कट० यथा आस्ये घृतम् जुह्वति, एवम्[3] अग्ने! स्तोत्राणि तुभ्यम् आस्ये जुहे। [4]सः त्वं[4] देवानां मध्ये प्रकर्षेण जानीहि स्तुतीः। त्वम् हि असि प्रत्नः[5] शिवः च दूतः विवस्वतः ॥ ३ ॥

तत्तदग्निर्वयो दधे यथायथा कृपण्यति ।
ऊर्जाहुतिर्वसूनां शं च योश्च मयो दधे विश्वस्यै देवहूत्यै नभन्तामन्यके समे ॥४॥

तत्ऽतत्। अग्निः। वयः। दधे। यथाऽयथा। कृपण्यति। ऊर्जाऽआहुतिः। वसूनाम्।
शम्। च। योः। च। मयः। दधे। विश्वस्यै। देवऽहूत्यै। नभन्ताम्। अन्यके। समे ॥ ४ ॥

वेङ्कट० ततत् अग्निः[6] अन्नं प्रयच्छति, यथायथा स्तोतृभिः याच्यते[7]। अन्नेन आहूयमानः वासयितॄणां[8] यजमानानाम् शम् च योः च सुखं च करोति। सर्वस्मै देवानां ह्वानाय, यः कश्चन अपि देवो यदि हूयते, अग्निरेव सर्वं करोति इति ॥ ४ ॥

स चिकेत सहीयसाग्निश्चित्रेण कर्मणा ।
स होता शश्वतीनां दक्षिणाभिरभीवृत इनोति च प्रतीव्यं नभन्तामन्यके समे ॥५॥

सः। चिकेत। सहीयसा। अग्निः। चित्रेण। कर्मणा। सः। होता। शश्वतीनाम्।
दक्षिणाभिः। अभिऽवृतः। इनोति। च। प्रतीव्यम्। नभन्ताम्। अन्यके। समे ॥ ५ ॥

वेङ्कट० सः [9]ज्ञायते अभिभावुकेन[9] अग्निः चित्रेण कर्मणा। सः होता बह्वीनां पशुभिः च परिवृतः गच्छति च प्रत्येतव्यं शत्रुम् ॥ ५ ॥

[10]इति षष्ठाष्टके तृतीयाध्याये द्वाविंशो वर्गः[10] ॥

अग्निर्जाता देवानामग्निर्वेद मर्तानामपीच्यम् ।
अग्निः स द्रविणोदा अग्निर्द्वारा व्यूर्णुते स्वाहुतो नवीयसा नभन्तामन्यके समे ॥६॥

---

१. निर् मूको. २ नास्ति मूको. ३. एव मूको. ४-४. सत्वम् मूको. ५. प्रज्ञः मूको. ६. अग्निम् मूको. ७. याचते मूको. ८. वासयन्तृणाम् मूको. ९-९. °ते दिशाउ° मूको. १०-१०. नास्ति मूको.

अग्निः । जाता । देवानाम् । अग्निः । वेद । मर्तानाम् । अपीच्यम् । अग्निः । सः ।
द्रविणःऽदाः । अग्निः । द्वारा । वि । ऊर्णुते । सुऽआहुतः । नवीयसा । नभन्ताम् । अन्यके । समे ॥

वेङ्कट० अग्निः [1]जातानि देवानाम् वेत्ति । अग्निः मर्तानाम्[1] च वेत्ति गुह्यम् । अग्निः [2]स धनस्य[2] दाता । अग्निः द्वाराणि धनस्य वि कर्णुते[3] स्वाहुत, नवतरेण हविषा ॥ ६ ॥

अग्निर्देवेषु संवसुः स विक्षु यज्ञियास्वा ।
स मुदा काव्या पुरु विश्वं भूमेव पुष्यति देवो देवेषु यज्ञियो नभन्तामन्यके समे ॥७॥

अग्निः । देवेषु । सम्ऽवसुः । सः । विक्षु । यज्ञियासु । आ । सः । मुदा । काव्या । पुरु ।
विश्वम् । भूमऽइव । पुष्यति । देवः । देवेषु । यज्ञियः । नभन्ताम् । अन्यके । समे ॥ ७ ॥

वेङ्कट० अग्निः देवेषु सवसति । स. मनुष्येषु, अपि च यज्ञेषु संवसति । स मोदेन बहूनि कर्माणि पुष्यति यथा[4] विश्वम् भूमिः । देव देवानां मध्ये यज्ञिय ॥ ७ ॥

यो अग्निः सप्तमानुषः श्रितो विश्वेषु सिन्धुषु ।
तमागन्म त्रिपस्त्यं मन्धातुर्दस्युहन्तममग्निं यज्ञेषु पूर्व्यं नभन्तामन्यके समे ॥ ८ ॥

यः । अग्निः । सप्तऽमानुषः । श्रितः । विश्वेषु । सिन्धुषु । तम् । आ । अगन्म । त्रिऽपस्त्यम् ।
मन्धातुः । दस्युहन्ऽतमम् । अग्निम् । यज्ञेषु । पूर्व्यम् । नभन्ताम् । अन्यके । समे ॥ ८ ॥

वेङ्कट० सप्त यस्य स्तोतारो मनुष्याः [5]स सप्तमानुषः[5] य. विश्वेषु सिन्धुषु श्रित, तम् वयम् आ अगन्म त्रिस्थानं यौवनाश्वस्य[6] मान्धातुः (तु निघ ३,१५)[7] दस्यूनां हन्तारम् अग्निम् यज्ञेषु मुख्यम्[8] ॥८॥

अग्निस्त्रीणि त्रिधातून्या क्षेति विदथा कविः ।
स त्रीँरेकादशाँ इह यक्षच्च पिप्रयच्च नो विप्रो दूतः परिष्कृतो नभन्तामन्यके समे ॥९॥

अग्निः । त्रीणि । त्रिऽधातूनि । आ । क्षेति । विदथा । कविः । सः । त्रीन् । एकादशान् ।
इह । यक्षत् । च । पिप्रयत् । च । नः । विप्रः । दूतः । परिऽकृतः । नभन्ताम् । अन्यके । समे ॥

वेङ्कट० अग्नि त्रीणि स्थानानि त्रिबन्धनानि पृथिव्यादीनि[9] आ निवसति कवि । स. त्रीन् एकादशान् देवान् इह यजतु । पूरयतु च अस्मान् मेधावी दूत अलङ्कृत ॥ ९ ॥

त्वं नो अग्न आयुषु त्वं देवेषु पूर्व्य वस्व एक इरज्यसि ।
त्वामापः परिस्रुतः परि यन्ति स्वसेतवो नभन्तामन्यके समे ॥ १० ॥

१-१. जानाति देवानां वेत्ति अङ्गिरसाना वि[1], जानाति देवानां वाग्नि अङ्गिरसानाम् अ[1]. २-२. सदनस्य मूको. ३. कणुते मूको. ४. नास्ति मूको. ५-५. सप्तकमा° मूको. ६ °स्व मूको. ७. तु. वैप १,२४५२ b. ८ °रूयमिति अ[1]. ९. °दीनि या अ[1].

त्वम् । नः । अग्ने । आयुषु । त्वम् । देवेषु । पूर्व्य । वस्वः । एकः । इरज्यसि । त्वाम् । आपः । परिऽस्रुतः । परि । यन्ति । स्वऽसेतवः । नभन्ताम् । अन्यके । समे ॥ १० ॥

वेङ्कट० त्वम् अस्माकम् अग्ने! मनुष्येषु, त्वम् देवेषु पूर्व्य![1] धनस्य एकः ईशिषे। त्वाम् आपः परितः स्रवन्त्यः[2] परि गच्छन्ति स्वभूतसेतवः ॥ १० ॥

[3]इति षष्ठाष्टके तृतीयाध्याये त्रयोविंशो वर्गः[3] ॥

[४०]

[1]नाभाकः काण्व ऋषिः । इन्द्राग्नी देवता । महापङ्क्तिश्छन्दः[1] ।

इन्द्राग्नी युवं सु नः सहन्ता दासथो रयिम् ।
येन दृळ्हा समत्स्वा वीळु चित् साहिषीमह्यग्निर्वनेव वात इन्नभन्तामन्यके समे ॥१॥

इन्द्राग्नी इति । युवम् । सु । नः । सहन्ता । दासथः । रयिम् । येन । दृळ्हा । समत्ऽसु । आ । वीळु । चित् । सहिषीमहि । अग्निः । वनाऽइव । वाते । इत् । नभन्ताम् । अन्यके । समे ॥

वेङ्कट० इन्द्राग्नी! युवम् सुष्ठु अस्मभ्यम् अभिभवन्तौ यच्छतम् धनम्। येन [4]धनानि दृढानि[4] सङ्ग्रामेषु अपि च स्थिराणि सहिषीमहि तम् रयिम्, [5]यथा अग्निः अरण्यानि अभिभवति वात एव इति[5] ॥ १ ॥

नहि वां वव्रयामहेऽथेन्द्रमिद् यजामहे शविष्ठं नृणां नरम् ।
स नः कदा चिदर्वता गमदा वाजसातये गमदा मेधसातये नभन्तामन्यके समे ॥२॥

नहि । वाम् । वव्रयामहे । अथ । इन्द्रम् । इत् । यजामहे । शविष्ठम् । नृणाम् । नरम् । सः । नः । कदा । चित् । अर्वता । गमत् । आ । वाजऽसातये । गमत् । आ । मेधऽसातये । नभन्ताम् । अन्यके । समे ॥ २ ॥

वेङ्कट० न हि वाम् वयं धनं याचामहे। अपि तर्हि इन्द्रम् एव यजामहे शविष्ठम् नृणाम् नेतारम्। सः अस्मान् कदा चित् अश्वेन आ गच्छति अन्नलाभाय कदाचित् यज्ञभजनाय ॥ २ ॥

ता हि मध्यं भराणामिन्द्राग्नी अधिक्षितः ।
ता उ कवित्वना कवी पृच्छ्यमाना सखीयते सं धीतमश्नुतं नरा नभन्तामन्यके समे ॥३॥

ता । हि । मध्यम् । भराणाम् । इन्द्राग्नी इति । अधिऽक्षितः । ता । ऊँ इति । कविऽत्वना । कवी इति । पृच्छ्यमाना । सखिऽयते । सम् । धीतम् । अश्नुतम् । नरा । नभन्ताम् । अन्यके । समे ॥३॥

---

१. आर्तवम् वि¹; आर्वतम् मूको. २. स्रवन्त्य: मूको. ३-३. नास्ति मूको. ४-४. दृढानि धनानि अ¹. ५-५. यथा हिरण्यानि अभिभवति वात् इति मूको.

वेङ्कट० तौ हि मध्यम् सङ्ग्रामाणाम् इन्द्राग्नी अधिनिवसतः। तौ एव कविरिव क्रान्तकर्माणौ
कविजनैः पृच्छ्यमानौ[1] सखित्वम् इच्छते तम् अच्युतम् कर्म नरौ! ॥ ३ ॥

अभ्यर्च नभाकवदिन्द्राग्नी यजसा गिरा।
ययोर्विश्वमिदं जगदियं द्यौः पृथिवी मह्युपस्थे बिभृतो वसु नभन्तामन्यके समे ॥४॥

अभि। अर्च। नभाकऽवत्। इन्द्राग्नी इति। यजसा। गिरा। ययोः। विश्वम्। इदम्। जगत्।
इयम्। द्यौः। पृथिवी। मही। उपऽस्थे। बिभृतः। वसु। नभन्ताम्। अन्यके। समे ॥ ४ ॥

वेङ्कट० हे नाभाक! नभाकवत्[2] इन्द्राग्नी यज्ञेन स्तुत्या च अभि अर्च, ययोः विश्वम् इदम् जगत्,
ययोः च उपस्थे द्यावापृथिव्यौ वसु बिभृतः ॥ ४ ॥

प्र ब्रह्माणि नभाकवदिन्द्राग्निभ्यामिरज्यत।
या सप्तबुध्नमर्णवं जिह्मबारमपोर्णुत इन्द्र ईशान ओजसा नभन्तामन्यके समे ॥५॥

प्र। ब्रह्माणि। नभाकऽवत्। इन्द्राग्निऽभ्याम्। इरज्यत। या। सप्तऽबुध्नम्। अर्णवम्।
जिह्मऽबारम्। अपऽऊर्णुतः। इन्द्रः। ईशानः। ओजसा। नभन्ताम्। अन्यके। समे ॥ ५ ॥

वेङ्कट० प्र ईरयत इन्द्राग्निभ्याम् स्तोत्राणि नभाकवत् यौ इन्द्राग्नी सप्तमूलम् अर्णवम् पिहितद्वारम्
तेजोभिः अपोर्णुतः। तयोः मध्ये इन्द्र[3] ईशानः भवति बलेन ॥ ५ ॥

अपि वृश्च पुराणवद् व्रततेरिव गुष्पितमोजो दासस्य दम्भय।
वयं तदस्य संभृतं वस्विन्द्रेण वि भजेमहि नभन्तामन्यके समे ॥ ६ ॥

अपि। वृश्च। पुराणऽवत्। व्रततेःऽइव। गुष्पितम्। ओजः। दासस्य। दम्भय। वयम्।
तत्। अस्य। सम्ऽभृतम्। वसु। इन्द्रेण। वि। भजेमहि। नभन्ताम्। अन्यके। समे ॥ ६ ॥

वेङ्कट० अपि वृश्च यथा प्रत्न[4] वृश्चसि[5] शत्रूणां लतायाः इव [5]गुष्पितम् इति गुल्फतिपर्यायः[5]।
व्रततेः निर्गतां शाखाम् इव इति। तदेवाह—बलम्[6] दासस्य विनाशयेति। परोक्ष उत्तरार्धः
स्पष्टः ॥ ६ ॥

[7]इति पञ्चाष्टके तृतीयाध्याये चतुर्विंशो वर्गः[7] ॥

यदिन्द्राग्नी जना इमे विह्वयन्ते तना गिरा।
अस्माकेभिर्नृभिर्वयं सासह्याम पृतन्यतो वनुयाम वनुष्यतो नभन्तामन्यके समे ॥७॥

१. पृच्छ्यमा° मूको. २. नभाकव वि°; नाकनभाकव अ°. ३. प्रक्तौ मूको. ४. पृच्छति मूको.
५. गु…गुल्क° वि°; …गुल्क° अ°. ६. बल मूको. ७-७ नास्ति मूको.

यत् । इन्द्राग्नी इति । जनाः । इमे । विऽह्वयन्ते । तना । गिरा ।
अस्माकेभिः । नृऽभिः । वयम् । सासह्याम । पृतन्यतः । वनुयाम । वनुष्यतः । नभन्ताम् । अन्यके । समे ॥

वेङ्कट० इमे जना इन्द्राग्नी विह्वयन्ते धनेन स्तुत्या च । तेषु वयम्[1] अस्माकीनैः मनुष्यैः अभि भवेम पृतनामिच्छतः[2] । वनुयाम च वनुष्यतः हन्तुमिच्छतः ॥ ७ ॥

या नु श्वेताववो दिव उच्चरात उप द्युभिः ।
इन्द्राग्न्योरनु व्रतमुहाना यन्ति सिन्धवो यान्त्सीं बन्धादमुञ्चतां नभन्तामन्यके समे ॥८॥

या । नु । श्वेतौ । अवः । दिवः । उत्ऽचरातः । उप । द्युऽभिः । इन्द्राग्न्योः । अनु । व्रतम् ।
उहानाः । यन्ति । सिन्धवः । यान् । सीम् । बन्धात् । अमुञ्चताम् । नभन्ताम् । अन्यके । समे ॥

वेङ्कट० [3]यौ श्वेतौ[3] अधस्तात् दिवः उप उच्चरतः दीप्तिभिः[4] । तयोः इन्द्राग्न्योः अनु यन्ति कर्म वहन्तः सिन्धवः, यान् सिन्धून् इमौ सर्वतो बन्धनात्[5] अमुञ्चताम् ॥ ८ ॥

पूर्वीष्ट इन्द्रोपमातयः पूर्वीरुत प्रशस्तयः सूनो हिन्वस्य हरिवः ।
वस्वो वीरस्यापृचो या नु साधन्त नो धियो नभन्तामन्यके समे ॥ ९ ॥

पूर्वीः । ते । इन्द्र । उपऽमातयः । पूर्वीः । उत । प्रऽशस्तयः । सूनो इति । हिन्वस्य । हरिऽवः । वस्वः ।
वीरस्य । आऽपृचः । याः । नु । साधन्त । नः । धियः । नभन्ताम् । अन्यके । समे ॥ ९ ॥

वेङ्कट० बहूनि ते उपमानानि इन्द्र[6], बह्व्यश्चापि[6] प्रशस्तयः [7]प्रेरयितः[7] प्रीणयितुः[7], वज्रिन्[7], वासयितुः वीरस्य धनानि आपर्चयतः तव याः स्तुतिः उपमाति च अस्माकं प्रज्ञाम् असाधयन्[8] ॥ ९ ॥

तं शिशीता सुवृक्तिभिस्त्वेषं सत्वानमृग्मियम् ।
उतो नु चिद् य ओजसा शुष्णस्याण्डानि भेदति जेषत् स्वर्वतीरपो नभन्तामन्यके समे ॥१०॥

तम् । शिशीत । सुवृक्तिऽभिः । त्वेषम् । सत्वानम् । ऋग्मियम् । उतो इति । नु । चित् ।
यः । ओजसा । शुष्णस्य । आण्डानि । भेदति । जेषत् । स्वःऽवतीः । अपः । नभन्ताम् ।
अन्यके । समे ॥ १० ॥

वेङ्कट० तम् संस्कुरुत[9] स्तुतिभिः दीप्तं सम्भक्तारम्[10] ऋगर्हम् । अपि च यः बलेन शुष्णासुरस्य अण्डजातानि अभिनत् अपत्यानि, सः दिव्यानि [11]जयतु उदकानि[11] ॥ १० ॥

तं शिशीता स्वध्वरं सत्यं सत्वानमृत्वियम् ।
उतो नु चिद् य ओहत आण्डा शुष्णस्य भेदत्यजैः स्वर्वतीरपो नभन्तामन्यके समे ॥११॥

---

१ च यम् मूको. २ पृतनाना° वि[1]. ३-३ याश्चनौ वि[1], यो श्वेतौ अ[1] ४ दीप्त वि[1], दीप्ति अ[1]. ५ बन्धनात् मूको ६ °पि च वि[2]. ७-७ प्रेरयित प्रीणयित मूको ८. साधनयद् मूको. ९. संस्कुरुत वि[1], स तुरत अ[1]. १० सम्भारम् वि[1] ११-११ यजतु करशानि मूको

तम् । शिशीत । सुऽअध्वरम् । सत्यम् । सत्वानम् । ऋत्वियम् । उतो इति । नु । चित् । यः । ओहते । आण्डा । शुष्णस्य । भेदति । अजैः । स्वःऽवती । अपः । नभन्ताम् । अन्यके । समे ॥

वेङ्कट० तम् संस्कुरुत सुयज्ञम् आर्यम् सत्वानम्[1] ऋतौ भवव्यम्, यः मद प्रति गच्छति हिनस्ति च शुष्णस्य आण्डानि। स त्वम् अनैषीद् दिव्यानि उदकानि ॥ ११ ॥

एवेन्द्राग्निभ्यां पितृवन्नवीयो मन्धातृवदङ्गिरस्वदवाचि ।
त्रिधातुना शर्मणा पातमस्मान् वयं स्याम पतयो रयीणाम् ॥ १२ ॥

एव । इन्द्राग्निऽभ्याम् । पितृऽवत् । नवीयः । मन्धातृऽवत् । अङ्गिरस्वत् । अवाचि । त्रिऽधातुना । शर्मणा । पातम् । अस्मान् । वयम् । स्याम । पतयः । रयीणाम् ॥ १२ ॥

वेङ्कट० एवम् इन्द्राग्निभ्याम् पितृवत् नवतरम् मन्धातृवत् अङ्गिरोवच्च स्तोत्रम् अवाचि। त्रिधातुना गृहेण रक्षतम् अस्मान्। वयम् स्याम पतयः रयीणाम् इति ॥ १२ ॥

[2]इति षष्ठाष्टके तृतीयाध्याये पञ्चविंशो वर्गः[2] ॥

[४१]

[2]नाभाक काण्व ऋषिः। वरुणो देवता। महापङ्क्तिश्छन्दः।[2] ।

अस्मा ऊ षु प्रभूतये वरुणाय मरुद्भ्योऽर्चा विदुष्टरेभ्यः ।
यो धीता मानुषाणां पश्वो गा इव रक्षति नभन्तामन्यके समे ॥ १ ॥

अस्मै । ऊँ इति । सु । प्रऽभूतये । वरुणाय । मरुत्ऽभ्यः । अर्च । विदुःऽतरेभ्यः । यः । धीता । मानुषाणाम् । पश्वः । गाःऽइव । रक्षति । नभन्ताम् । अन्यके । समे ॥ १ ॥

वेङ्कट० अस्मै ऊ सु प्रकृष्टधनाय वरुणाय मरुद्भ्यः [3]च स्तुहि[3] विद्वत्तरेभ्यः, यः वरुण कर्माणि मानुषाणाम् पशून् गच्छत इव रक्षति[4] ॥ १ ॥

तमू षु समना गिरा पितॄणां च मन्मभिः ।
नाभाकस्य प्रशस्तिभिर्यः सिन्धूनामुपोदये सप्तस्वसा स मध्यमो नभन्तामन्यके समे ॥२॥

तम् । ऊँ इति । सु । समना । गिरा । पितॄणाम् । च । मन्मऽभिः । नाभाकस्य । प्रशस्तिऽभिः । यः । सिन्धूनाम् । उप । उत्ऽअये । सप्तऽस्वसा । सः । मध्यमः । नभन्ताम् । अन्यके । समे ॥

वेङ्कट० यास्क —'तं [5]स्वभिष्टौमि समानया[5] गिरा गीत्या स्तुत्या पितॄणां च मननीयैः स्तोमैः । नाभाकस्य प्रशस्तिभिः । ऋषिर्नाभाको बभूव । यः स्यन्दमानानामासामुपोदये सप्तस्वसारमेनमाह

१ सत्विन मूको. २-२ नास्ति मूको. ३-३. नैव स्तुहि मूको ४. रक्षति मूको.
५-५. स्वहिरिद्यामि सामाय मूको

वाग्मि स मध्यम इति निरुच्यते। अथैष एव भवति। नभन्तामन्यके समे। मा भूवन्नन्यके सर्वे, य नो द्विषन्ति दुर्धिय पापधिय पापसङ्कल्पा।' (या १०,५) इति। यद्वा सिन्धुम्य उद्गच्छन्तीत्यर्थ ॥ २ ॥

स क्षपः परि षस्वजे न्यु१स्रो मायया दधे स विश्वं परि दर्शतः ।
तस्य वेनीरनु व्रतमुषस्तिस्रो अवर्धयन् नभन्तामन्यके समे ॥ ३ ॥

स । क्षपः । परि । सस्वजे । नि । उस्रः । मायया । दधे । स । विश्वम् । परि । दर्शतः ।
तस्य । वेनीः । अनु । व्रतम् । उषः । तिस्रः । अवर्धयन् । नभन्ताम् । अन्यके । समे ॥ ३ ॥

वेङ्कट० स वरुण रात्री परि स्वजते। उत्सरणशील सर्वं कर्मणा परित च नि दधाति दर्शनीय, तस्य व्रतम् कामयमाना प्रजा त्रिषु कालेषु अनु वर्धयन्ति प्रात मध्यन्दिने सायमिति ॥ ३ ॥

यः ककुभो निधारयः पृथिव्यामधि दर्शतः ।
स माता पूर्व्यं पदं तद् वरुणस्य सप्त्यं स हि गोपा इवेर्यो नभन्तामन्यके समे ॥ ४ ॥

यः । ककुभः । निऽधारयः । पृथिव्याम् । अधि । दर्शतः । सः । माता । पूर्व्यम् । पदम् ।
तत् । वरुणस्य । सप्त्यम् । सः । हि । गोपाःऽइव । इर्यः । नभन्ताम् । अन्यके । समे ॥ ४ ॥

वेङ्कट० य दिश निधारयति पृथिव्या उपरि दर्शनीय, स निर्माता स्तोतॄ प्रत्न[1] स्थान स्वर्गाख्यम्, तत् अस्माभि च सर्पणीयम्[2] तस्य स्वभूतम्। स हि गोपायिता [3]गोपाल इव[3] सर्वेषा पशूना सर्वासा प्रजाना स्वामी भवति प्रेरयिता इर्य ॥ ४ ॥

यो धर्ता भुवनानां य उस्राणामपीच्या३ वेद नामानि गुह्या ।
स कविः काव्या पुरु रूपं द्यौरिव पुष्यति नभन्तामन्यके समे ॥ ५ ॥

यः । धर्ता । भुवनानाम् । यः । उस्राणाम् । अपीच्या । वेद । नामानि । गुह्या ।
सः । कविः । काव्या । पुरु । रूपम् । द्यौःऽइव । पुष्यति । नभन्ताम् । अन्यके । समे ॥ ५ ॥

वेङ्कट० य धारयिता भुवनानाम्, य च रश्मीना देवाधिष्ठानभूतानाम् अन्तर्हितानि जानाति[4] नामानि गुहाया निहितानि, स कवि कविकर्माणि बहूनि पुष्यति, यथा द्यौ पुष्यति रूपम् ॥ ५ ॥

[5]इति षष्ठाष्टके तृतीयाध्याये षड्विंशो वर्ग[5] ॥

यस्मिन् विश्वानि काव्या चक्रे नाभिरिव श्रिता ।
त्रितं जूती सपर्यत व्रजे गावो न संयुजे युजे अश्वाँ अयुक्षत नभन्तामन्यके समे ॥ ६ ॥

---

१ प्रत्नं मूको. २ सपर्तार्थं मूको. ३-३. गोपा इवेव मूको. ४ जानाति मूको. ५-५ नास्ति मूको.

यस्मिन् । विश्वानि । काव्या । चक्रे । नाभिःऽइव । श्रिता । त्रितम् । जूती । सपर्यत ।
व्रजे । गावः । न । सम्ऽयुजे । युजे । अश्वान् । अयुक्षत । नभन्ताम् । अन्यके । समे ॥ ६ ॥

वेङ्कट० यस्मिन् विश्वानि कविकर्माणि चक्रे नाभि इव स्थितानि भवन्ति, 'त त्रिषु' 'स्थानेषु स्थितं' जवेन परिचरत । यथा पशून् व्रजे संयुज समागार्थं सह स्थापयितु युञ्जन्ति', एवम् अस्माकम् अभिगमाय सपत्ना च 'अश्वान् अयुक्षत, यत' क्षिप्रं परिचरत वरुणमिति ॥ ६ ॥

य आस्वत्क आशये विश्वा जातान्येषाम् ।
परि धामानि मर्मृशद् वरुणस्य पुरो गये विश्वे देवा अनु व्रतं नभन्तामन्यके समे ॥७॥

यः । आसु । अत्कः । आऽशये । विश्वा । जातानि । एषाम् । परि । धामानि । मर्मृशत् ।
वरुणस्य । पुरः । गये । विश्वे । देवाः । अनु । व्रतम् । नभन्ताम् । अन्यके । समे ॥ ७ ॥

वेङ्कट० य एषाम् आशाना स्वभूत 'यद् रूपम् आसु' दिक्षु स्थितानि विश्वानि जातानि आशात, सोऽयंक्' सर्वाणि वनासि परिमृशन् वरुणस्य अस्य पुर गय भवति रथस्य पुरस्तात् भवति । तस्य वरुणस्य विश्वे अन्य देवा व्रतम् अनु गच्छन्ति ॥ ७ ॥

स समुद्रो अपीच्यस्तुरो द्यामिव रोहति नि यदासु यजुर्दधे ।
स माया अर्चिना पदास्तृणान्नाकमारुहन्नभन्तामन्यके समे ॥ ८ ॥

सः । समुद्रः । अपीच्यः । तुरः । द्याम्ऽइव । रोहति । नि । यत् । आसु । यजुः । दधे ।
सः । मायाः । अर्चिना । पदा । अस्तृणात् । नाकम् । आ । अरुहत् । नभन्ताम् । अन्यके । समे ॥८॥

वेङ्कट० यस्मादाप समुद्द्रवन्ति स समुद्र अन्तर्हित वरुण तुर क्षिप्र, आदित्य यथा दिवम् रोहति, तद्वत् रोहति नाकम् । यदा आसु दिक्षु प्रजाभ्य दानम् नि दधाति । स असुराणाम् माया अर्चिष्मता तमसा हिनस्ति 'नाकम् च आ रोहति' ॥ ८ ॥

यस्य श्वेता विचक्षणा तिस्रो भूमीरधिक्षितः ।
त्रिरुत्तराणि पप्रतुर्वरुणस्य ध्रुवं सदः स सप्तानामिरज्यति नभन्तामन्यके समे ॥ ९ ॥

यस्य । श्वेता । विऽचक्षणा । तिस्रः । भूमीः । अधिऽक्षितः । त्रिः । उत्ऽतराणि । पप्रतुः ।
वरुणस्य । ध्रुवम् । सदः । सः । सप्तानाम् । इरज्यति । नभन्ताम् । अन्यके । समे ॥ ९ ॥

वेङ्कट० यस्य श्वेतानि वनासि तिस्र भूमी अधि स्थिता प्रथयन्ति' अन्तरिक्ष अधिवसत ।

---

१ १ त्रीषु वि' त त्रीषु भ' २ २ अस्थान मूको ३ युञ्जन्ति मूको ४ ४ आन युक्षत तत मूको
५ यद्रूपरासु मूको ६ [illegible] ७ ७ नास्ति भ' ८. प्रथयति मूको

तत्र त्रीणि च उत्तराणि। 'तिस्रो भूमीर्धारयन् त्रीँरुत द्यून्' (ऋ २,२७,८) इति मन्त्र। तस्य वरुणस्य ध्रुवम् सद। स सप्तानाम् सिन्धूनाम् ईश्वरो भवति ॥ ९ ॥

यः श्वेताँ अधिनिर्णिजश्चक्रे कृष्णाँ अनु व्रता।
स धाम पूर्व्यं ममे यः स्कम्भेन वि रोदसी अजो न द्यामधारयन्नभन्तामन्यके समे ॥१०॥

य । श्वेतान् । अधिऽनिर्निज । चक्रे । कृष्णान् । अनु । व्रता । स । धाम । पूर्व्यम् । ममे ।
य । स्कम्भेन । वि । रोदसी इति । अज । न । द्याम् । अधारयत् । नभन्ताम् । अन्यके । समे ॥

वेङ्कट० य दिवा श्वेतान् आत्मीयान् रश्मीन्[1] रात्रौ कृष्णान् करोति। कर्माणि लक्षीकृत्य[2] उभय विधकर्मानुगुणम्[3] स प्रत्नम् धाम अन्तरिक्षे दिव वा ममे। य[4] स्कम्भेन अन्तरिक्षेण रोदसी[5] आदित्य द्याम् इव वि धारयति इति[6] ॥ १० ॥

'इति पञ्चाष्टके तृतीयाध्याये सप्तविंशो वर्ग'[6] ॥

[४२]

'नाभाक काण्व, अर्चनाना आत्रेयो वा ऋषि। आदितस्तिसृणा वरुणो देवता, अन्त्यानां तिसृणाम् अश्विनौ। आदित तिस्रस्त्रिष्टुभ, अन्त्यास्तिस्र अनुष्टुभ'[6]।

अस्तभ्नाद् द्यामसुरो विश्ववेदा अमिमीत वरिमाणं पृथिव्याः।
आसीदद् विश्वा भुवनानि सम्राड् विश्वेत् तानि वरुणस्य व्रतानि ॥ १ ॥

अस्तभ्नात् । द्याम् । असुर । विश्वऽवेदा । अमिमीत । वरिमाणम् । पृथिव्या ।
आ । असीदत् । विश्वा । भुवनानि । सम्ऽराट् । विश्वा । इत् । तानि । वरुणस्य । व्रतानि ॥ १ ॥

वेङ्कट० अस्तभ्नात् द्याम् असुर विश्वधन। तथा पृथिव्या च परिमाण चक्रे। इत्थ निर्मितानि विश्वानि भुवनानि सम्राट् भूत्वा च आ असीदत्। विश्वानि एव तानि वरुणस्य कर्माणि ॥ १ ॥

एवा वन्दस्व वरुणं बृहन्तं नमस्या धीरममृतस्य गोपाम्।
स नः शर्म त्रिवरूथं वि यंसत् पातं नो द्यावापृथिवी उपस्थे ॥ २ ॥

एव । वन्दस्व । वरुणम् । बृहन्तम् । नमस्य । धीरम् । अमृतस्य । गोपाम् ।
स । नु । शर्म । त्रिऽवरूथम् । वि । यसत् । पातम् । न । द्यावापृथिवी इति । उपऽस्थे ॥२॥

वेङ्कट० एव स्तुहि वरुणम् महान्तम्, नमस्कुरु[7] च प्राज्ञम् अमृतस्य गोपायितारम्। स अस्मभ्य गृह त्रिच्छदिष्क[8] प्रयच्छतु[9]। पातम् अस्मान् द्यावापृथिव्यौ[1] उपस्थे वर्तमानान् ॥ २ ॥

---

१. अस्मिन् मूको. २. लक्ष्यीकृत्य वि[2]. ३. °विधि कर्म णिनुगुण वि[3], 'कर्माणिनुगुण अ[3]. ४. नास्ति मूको. ५ इत्यर्थ अ[3]. ६-६. नास्ति मूको. ७ नमस्कुरु मूको ८ त्रिवरूथ[7] मूको. ९. °च्छन्तु मूको.

इमां धियं शिक्षमाणस्य देव क्रतुं दक्षं वरुण सं शिशाधि ।
ययाति विश्वा दुरिता तरेम सुतर्माणमधि नावं रुहेम ॥ ३ ॥

इमाम् । धियम् । शिक्षमाणस्य । देव । क्रतुम् । दक्षम् । वरुण । सम् । शिशाधि ।
यया । अति । विश्वा । दुःऽइता । तरेम । सुऽतर्माणम् । अधि । नावम् । रुहेम ॥ ३ ॥

वेङ्कट० इमाम् धियम् कर्म अनुतिष्ठतः देव! प्रज्ञानं बलं च वरुण! तीक्ष्णीकुरु । यया नावा विश्वानि दुरितानि अति तरेम, तां सुष्ठु तारयित्रीम् नावम् वयम् अधि रुहेम इति यज्ञाभिप्रायम् ॥ ३ ॥

आ वां ग्रावाणो अश्विना धीभिर्विप्रा अचुच्यवुः ।
नासत्या सोमपीतये नभन्तामन्यके समे ॥ ४ ॥

आ । वाम् । ग्रावाणः । अश्विना । धीभिः । विप्राः । अचुच्यवुः ।
नासत्या । सोमऽपीतये । नभन्ताम् । अन्यके । समे ॥ ४ ॥

वेङ्कट० आश्विनः[1] तृचः निगदसिद्धः । विप्राः ग्रावाणः यज्ञे वाम् कर्मभिः आ अचुच्यवुः इति ॥ ४ ॥

यथा वामत्रिरश्विना गीर्भिर्विप्रो अजोहवीत् ।
नासत्या सोमपीतये नभन्तामन्यके समे ॥ ५ ॥

यथा । वाम् । अत्रिः । अश्विना । गीःऽभिः । विप्रः । अजोहवीत् ।
नासत्या । सोमऽपीतये । नभन्ताम् । अन्यके । समे ॥ ५ ॥

वेङ्कट० निगदसिद्धा ॥ ५ ॥

एवा वामह्व ऊतये यथाहुवन्त मेधिराः ।
नासत्या सोमपीतये नभन्तामन्यके समे ॥ ६ ॥

एव । वाम् । अह्वे । ऊतये । यथा । अहुवन्त । मेधिराः ।
नासत्या । सोमऽपीतये । नभन्ताम् । अन्यके । समे ॥ ६ ॥

वेङ्कट० निगदसिद्धा ॥ ६ ॥

[2]इति षष्ठाष्टके तृतीयाध्याये अष्टाविंशो वर्गः[3] ॥

---

1. अश्विनम् मूको. २-३. नास्ति मूको.

[४३]

[1]विरूप आङ्गिरस ऋषि । अग्निर्देवता । गायत्री छन्द [1] ।

इमे विप्रस्य वेधसोऽग्नेरस्तृतयज्वनः । गिरः स्तोमास ईरते ॥ १ ॥

इमे । विप्रस्य । वेधस । अग्ने । अस्तृतऽयज्वन । गिर । स्तोमास । ईरते ॥ १ ॥

वेङ्कट० आङ्गिरस [2] विरूप । इमे मेधाविन विधातु अग्ने अहिंसितयजमानस्य गिर प्रेरयन्ति स्तोतार ॥ १ ॥

अस्मै ते प्रतिहर्यते जातवेदो विचर्षणे । अग्ने जनामि सुष्टुतिम् ॥ २ ॥

अस्मै । ते । प्रतिऽहर्यते । जातऽवेद । विऽचर्षणे । अग्ने । जनामि । सुऽस्तुतिम् ॥ २ ॥

वेङ्कट० अस्मै तुभ्य प्रेप्सते[3] जातवेद ! [4]विद्रष्ट ! अग्ने ![4] जनयामि सुष्टुतिम् ॥ २ ॥

आरोका इव घेदह तिग्मा अग्ने तव त्विषः । दद्भिर्वनानि बप्सति ॥ ३ ॥

आरोकाःऽइव । घ । इत् । अह । तिग्मा । अग्ने । तव । त्विष । दत्ऽभि । वनानि । बप्सति ॥ ३ ॥

वेङ्कट० पशव आरोका [5] आरोचनात् । पशव इव तीक्ष्णा [6] अग्ने ! तव [7] दीप्तय दन्तै अरण्यानि भक्षयन्ति ॥ ३ ॥

हरयो धूमकेतवो वातजूता उप द्यवि । यतन्ते वृथगग्नयः ॥ ४ ॥

हरय । धूमऽकेतव । वातऽजूता । उप । द्यवि । यतन्ते । वृथक् । अग्नय ॥ ४ ॥

वेङ्कट० हरणशीला धूमकेतव वातप्रेरिता अन्तरिक्षे गच्छन्ति पृथक् अग्नय । पृथक् इत्यनेन सममन्वय वृथगिति । पृथगित्यत्र वाजसनेयिन पठन्ति (मा ३३,२) ॥ ४ ॥

एते त्ये वृथगग्नय इद्धासः समदृक्षत । उषसामिव केतवः ॥ ५ ॥

एते । त्ये । वृथक् । अग्नय । इद्धास । सम् । अदृक्षत । उषसाम्ऽइव । केतव ॥ ५ ॥

वेङ्कट० निगदसिद्धा ॥ ५ ॥

[1]इति षष्ठाष्टके तृतीयाध्याये एकोनत्रिंशो वर्ग [1] ॥

कृष्णा रजांसि पत्सुतः प्रयाणे जातवेदसः । अग्निर्यद् रोधति क्षमि ॥ ६ ॥

कृष्णा । रजांसि । पत्ऽसुत । प्रऽयाने । जातऽवेदस । अग्नि । यत् । रोधति । क्षमि ॥ ६ ॥

१-१. नास्ति मूको. २ अङ्गिरस मूको ३ प्रेप्सतो मूको ४-४. विद्रष्टरग्ने मूको ५. वैप १,९९५ b ६ तीक्ष्णान् मूको. ७. च मूको.

वेङ्कट० कृष्णाः पांसवः पन्थाः भवन्ति प्रयाणे जातवेदसः अग्नेः[1], यदा अग्निः दहति वनस्पतीन् शुष्कान्[2] क्षमायाम् ॥ ६ ॥

धासिं कृण्वान ओषधीर्बप्सदग्निर्न वायति । पुनर्यन् तरुणीरपि ॥ ७ ॥

धासिम् । कृण्वानः । ओषधीः । बप्सत् । अग्निः । न । वायति । पुनः । यन् । तरुणीः । अपि ॥ ७ ॥

वेङ्कट० अन्नम् (द्र. निघ २,७) कुर्वाणः ओषधीः भक्षयन् अग्निः न शाम्यति । पुनः च गच्छन् भवति प्रादुर्भूताः तरुणीः अपि ॥ ७ ॥

जिह्वाभिरह नन्नमदर्चिषा जञ्जणाभवन् । अग्निर्वनेषु रोचते ॥ ८ ॥

जिह्वाभिः । अह । नन्नमत् । अर्चिषा । जञ्जणाऽभवन् । अग्निः । वनेषु । रोचते ॥ ८ ॥

वेङ्कट० ज्वालाभिः एव वनस्पतीन् अत्यन्तं नमयन् अर्चिषा च ज्वलन् । 'जञ्जणाभवन्' (निघ १,१७) इति ज्वलतिकर्मसु पठितः । अग्निः अरण्येषु रोचते ॥ ८ ॥

अप्स्वग्ने सधिष्टव सौषधीरनु रुध्यसे । गर्भे सञ्जायसे पुनः ॥ ९ ॥

अप्ऽसु । अग्ने । सधिः[1] । तव । सः । ओषधीः । अनु । रुध्यसे । गर्भे । सन् । जायसे । पुनरिति ॥ ९ ॥

वेङ्कट० अप्सु अग्ने ! तव प्रवेशस्थानम् । सः त्वम् ओषधीः जीर्णाः अनु रुणत्सि । ततः पुनः च तासां भूमिष्ठानाम्[3] गर्भे भवन्[4] जायसे ॥ ९ ॥

उदग्ने तव तद् घृतादर्ची रोचत आहुतम् । निंसानं जुह्वो मुखे ॥ १० ॥

उत् । अग्ने । तव । तत् । घृतात् । अर्चिः । रोचते । आऽहुतम् । निंसानम् । जुह्वः । मुखे ॥ १० ॥

वेङ्कट० उत् रोचते अग्ने ! तव तत् अर्चिः घृतात् आहुतम् लिहत्[5] जुह्वः[6] होमसाधनस्रुचः मुखे ॥ १० ॥

'इति पञ्चाष्टके तृतीयाध्याये त्रिंशो वर्गः[8] ॥

उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे । स्तोमैर्विधेमाग्नये ॥ ११ ॥

उक्षऽअन्नाय । वशाऽअन्नाय । सोमऽपृष्ठाय । वेधसे । स्तोमैः । विधेम । अग्नये ॥ ११ ॥

वेङ्कट० उक्षान्नाय वशान्नाय सोमघृतपृष्ठाय विधात्रे स्तोमैः परिचरणं कुर्मः अग्नये ॥ ११ ॥

उत त्वा नमसा वयं होतर्वरेण्यक्रतो । अग्ने समिद्भिरीमहे ॥ १२ ॥

उत । त्वा । नमसा । वयम् । होतरिति । वरेण्यक्रतो इति वरेण्यऽक्रतो । अग्ने । समित्ऽभिः । ईमहे ॥ १२ ॥

१. अग्निः मूको. २. शुष्कान् मूको. ३. द्र. मा १३,५३; वैप १,३२४७ d. ४. भूमिष्ठ° मूको. ५. भव मूको. ६. लिहन् मूको. ७. जुह्वोः मूको. ८-८. नास्ति मूको.

वेङ्कट० अपि च त्वाम् अन्नेन वयम् हे होतः! वरणीयप्रज्ञ! अग्ने! समिद्भिः च याचामहे ॥ १२ ॥

उत त्वा भृगुवच्छुचे मनुष्वदग्न आहुत । अङ्गिरस्वद्धवामहे ॥ १३ ॥

उत । त्वा । भृगुऽवत् । शुचे । मनुष्वत् । अग्ने । आऽहुत । अङ्गिरस्वत् । हवामहे ॥ १३ ॥

वेङ्कट० निगदसिद्धा ॥ १३ ॥

त्वं ह्यग्ने अग्निना विप्रो विप्रेण सन्त्सता । सखा सख्या समिध्यसे ॥ १४ ॥

त्वम् । हि । अग्ने । अग्निना । विप्रः । विप्रेण । सन् । सता । सखा । सख्या । सम्ऽइध्यसे ॥ १४ ॥

वेङ्कट० ब्राह्मणव्याख्याता (ऐब्रा १,१६) ॥ १४ ॥

स त्वं विप्राय दाशुषे रयिं देहि सहस्रिणम् । अग्ने वीरवतीमिषम् ॥ १५ ॥

सः । त्वम् । विप्राय । दाशुषे । रयिम् । देहि । सहस्रिणम् । अग्ने । वीरऽवतीम् । इषम् ॥ १५ ॥

वेङ्कट० निगदसिद्धा ॥ १५ ॥

[1]इति षष्ठाष्टके तृतीयाध्याये एकत्रिंशो वर्गः[1] ॥

अग्ने भ्रातः सहस्कृत रोहिदश्व शुचिव्रत । इमं स्तोमं जुषस्व मे ॥ १६ ॥

अग्ने । भ्रातरिति । सहःऽकृत । रोहितऽअश्व । शुचिऽव्रत । इमम् । स्तोमम् । जुषस्व । मे ॥ १६ ॥

वेङ्कट० निगदसिद्धा ॥ १६ ॥

उत त्वाग्ने मम स्तुतो वाश्राय प्रतिहर्यते । गोष्ठं गाव इवाशत ॥ १७ ॥

उत । त्वा । अग्ने । मम । स्तुतः । वाश्राय । प्रतिऽहर्यते । गोःऽस्थम् । गावःऽइव । आशत ॥१७॥

वेङ्कट० अपि च त्वाम् अग्ने! मम स्तुतयः गोष्ठम् गावः इव प्राप्नुवन्ति । वाशनशीलाय वत्साय पयः कामयमानाय दोहार्थं यथा प्रविशन्ति इति ॥ १७ ॥

तुभ्यं ता अङ्गिरस्तम विश्वाः सुक्षितयः पृथक् । अग्ने कामाय येमिरे ॥ १८ ॥

तुभ्यम् । ताः । अङ्गिरःऽतम । विश्वाः । सुऽक्षितयः । पृथक् । अग्ने । कामाय । येमिरे ॥ १८ ॥

वेङ्कट० तुभ्यम् ताः अङ्गिरस्तम! विश्वाः प्रजाः पृथक्पृथक् अग्ने! कामसिद्ध्यर्थम् आत्मनः नियच्छन्ति ॥ १८ ॥

अग्निं धीभिर्मनीषिणो मेधिरासो विपश्चितः । अद्मसद्याय हिन्विरे ॥ १९ ॥

अग्निम् । धीभिः । मनीषिणः । मेधिरासः । विपःऽचितः । अद्मऽसद्याय । हिन्विरे ॥ १९ ॥

1-1. नास्ति मूको.

वेङ्कट० अग्निम् कर्मभिः मनस ईश्वराः मेधाविनः प्राज्ञाः अन्नस्य भजनाय प्रीणयन्ति ॥ १९ ॥

तं त्वामज्मेषु वाजिनं तन्वाना अग्ने अध्वरम् । वह्निं होतारमीळते ॥ २० ॥

तम् । त्वाम् । अज्मेषु । वाजिनम् । तन्वानाः । अग्ने । अध्वरम् । वह्निम् । होतारम् । ईळते ॥ २० ॥

वेङ्कट० तम् त्वाम् अज्मेषु[1] गृहेषु बलिनम् तन्वानाः अग्ने! यज्ञम् वोढारम् ह्वातारम्[2] स्तुवन्ति ॥२०॥

[3]इति पञ्चाष्टके तृतीयाध्याये द्वात्रिंशो वर्गः[3] ॥

पुरुत्रा हि सदृङ्ङसि विशो विश्वा अनु प्रभुः । समत्सु त्वा हवामहे ॥ २१ ॥

पुरुऽत्रा । हि । सऽदृङ् । असि । विशः । विश्वाः । अनु । प्रऽभुः । समत्ऽसु । त्वा । हवामहे ॥२१॥

वेङ्कट० निगदसिद्धेति ॥ २१ ॥

तमीळिष्व य आहुतोऽग्निर्विभ्राजते घृतैः । इमं नः शृणवद्धवम् ॥ २२ ॥

तम् । ईळिष्व । यः । आऽहुतः । अग्निः । विऽभ्राजते । घृतैः । इमम् । नः । शृणवत् । हवम् ॥ २२ ॥

वेङ्कट० तम् स्तुहि, यः आहुतः अग्निः विभ्राजते घृतैः सह । इमम्[4] अस्माकम् शृणोतु हवम्[5] ॥ २२ ॥

तं त्वा वयं हवामहे शृण्वन्तं जातवेदसम् । अग्ने घ्नन्तमप द्विषः ॥ २३ ॥

तम् । त्वा । वयम् । हवामहे । शृण्वन्तम् । जातऽवेदसम् । अग्ने । घ्नन्तम् । अप । द्विषः ॥२३॥

वेङ्कट० निगदसिद्धा ॥ २३ ॥

विशां राजानमद्भुतमध्यक्षं धर्मणामिमम् । अग्निमीळे स उ श्रवत् ॥ २४ ॥

विशाम् । राजानम् । अद्भुतम् । अधिऽअक्षम् । धर्मणाम् । इमम् । अग्निम् । ईळे । सः । ऊँ इति । श्रवत् ॥

वेङ्कट० विशाम् राजानम् महान्तम् अनुसन्धातारम्[6] कर्मणाम् इमम् अग्निम् स्तौमि । सः[7] शृणोतु ॥ २४ ॥

अग्निं विश्वायुवेपसं मर्यं न वाजिनं हितम् । सप्तिं न वाजयामसि ॥ २५ ॥

अग्निम् । विश्वायुऽवेपसम् । मर्यम् । न । वाजिनम् । हितम् । सप्तिम् । न । वाजयामसि ॥ २५ ॥

वेङ्कट० अग्निम् सर्वगतबलम् मनुष्यम् इव बलिनम् योद्धारम् हितम् अश्वम् इव च बलिनं कुर्मः ॥ २५ ॥

---

१. अग्ने मूको. २. ह्वातारः वि[1]; ह्वातार अ[1]. ३-३. नास्ति मूको. ४. मम मूको. ५. भवम् अ[1]. ६. °धा वि[1]; °न्धाय अ[1]. ७-७. स मूको.

घ्नन् मृध्राण्यप् द्विषो दहन् रक्षांसि विश्वहा । अग्ने तिग्मेन दीदिहि ॥ २६ ॥

घ्नन् । मृध्राणि । अप॑ । द्विषः । दह॑न् । रक्षांसि । विश्वहा । अग्ने । तिग्मेन॑ । दीदिहि ॥२६॥

वेङ्कट० हिंसकान् द्वेष्टॄन् अप घ्नन् दहन् च रक्षांसि सर्वदा अग्ने! तिग्मेन तेजसा दीदिहि[1] ॥ २६ ॥

यं त्वा जनास इन्धते मनुष्वदङ्गिरस्तम । अग्ने स बोधि मे वचः ॥ २७ ॥

यम् । त्वा । जनासः । इन्धते । मनुष्वत् । अङ्गिरःऽतम । अग्ने । सः । बोधि । मे । वचः ॥२७॥

वेङ्कट० निगदसिद्धेति ॥ २७ ॥

यदग्ने दिविजा अस्यप्सुजा वा सहस्कृत । तं त्वा गीर्भिर्हवामहे ॥ २८ ॥

यत् । अग्ने । दिविऽजाः । असि । अप्सुऽजाः । वा । सहःऽकृत । तम् । त्वा । गीःऽभिः । हवामहे ॥२८॥

वेङ्कट० यः त्वम् अग्ने! दिविजाः भवसि अन्तरिक्षजाश्च सहसा कृतः(?) च, तम् त्वा गीर्भिः हवामहे ॥ २८ ॥

तुभ्यं घेत् ते जना इमे विश्वाः सुक्षितयः पृथक् । धासिं हिन्वन्त्यत्तवे ॥२९॥

तुभ्यम् । घ । इत् । ते । जनाः । इमे । विश्वाः । सुऽक्षितयः । पृथक् । धासिम् । हिन्वन्ति । अत्तवे ॥२९॥

वेङ्कट० तुभ्यम् एव खलु ते इमे जनाः विश्वाः च अन्याः सुक्षितयः मया दृश्यमानाः प्रजाः अन्नम् प्रेरयन्ति अदनाय पृथक् इति ॥ २९ ॥

ते घेदग्ने स्वाध्योऽहा विश्वा नृचक्षसः । तरन्तः स्याम दुर्गहा ॥ ३० ॥

ते । घ । इत् । अग्ने । सुऽआध्यः । अहा । विश्वा । नृऽचक्षसः । तरन्तः । स्याम । दुःऽगहा ॥३०॥

वेङ्कट० ते खलु वयम् अग्ने! सुकर्माणः विश्वानि अहानि नृणां द्रष्टारः तरन्तः भवेम दुःखेन गाहितव्यानि ॥ ३० ॥

[2]इति षष्ठाष्टके तृतीयाध्याये चतुस्त्रिंशो वर्गः[2] ॥

अग्निं मन्द्रं पुरुप्रियं शीरं पावकशोचिषम् । हृद्भिर्मन्द्रेभिरीमहे ॥ ३१ ॥

अग्निम् । मन्द्रम् । पुरुऽप्रियम् । [3]शीरम् । पावकऽशोचिषम् ।[3] हृत्ऽभिः । मन्द्रेभिः । ईमहे ॥ ३१ ॥

वेङ्कट० [4]अग्निम् मादनम्[4] बहुप्रियं शयनशीलम् यज्ञेषु पावकदीप्तिम् मनोहारिभिः[5] मादनैः[6] स्तोत्रैः ईमहे ॥ ३१ ॥

---

१. दिव्यं ज्ञानम् मूको. २-२. नास्ति मूको. ३-३. या (४,१४) द्र. ४-४. अग्निमोदनम् वि[1]; अग्नि… अ[1]. ५. मनोहराभिः वि[1]. ६. मो° मूको.

स त्वमग्ने विभावसुः सृजन्त्सूर्यो न रश्मिभिः । शर्धन् तमांसि जिघ्नसे ॥ ३२ ॥

सः । त्वम् । अग्ने । विभाऽवसुः । सृजन् । सूर्यः । न । रश्मिऽभिः । शर्धन् । तमांसि । जिघ्नसे ॥ ३२ ॥

वेङ्कट० सः त्वम् अग्ने । दीप्तिधनः उद्यन् इव सूर्यः रश्मिभिः वेगं कुर्वन् तमांसि जिघ्नसे ॥ ३२ ॥

तत् ते सहस्व ईमहे दात्रं यन्नोपदस्यति । त्वदग्ने वार्यं वसु ॥ ३३ ॥

तत् । ते । सहस्वः । ईमहे । दात्रम् । यत् । न । उपऽदस्यति । त्वत् । अग्ने । वार्यम् । वसु ॥ ३३ ॥

वेङ्कट० तत् ते बलवन्! याचामहे धनम्, यत् न उपदस्यति । त्वत्तः अग्ने । वरणीयम् धनम् याचामहे ॥ ३३ ॥

[1]इति षष्ठाष्टके तृतीयाध्याये पञ्चत्रिंशो वर्गः[1] ॥

[४४]

[1]विरूप आङ्गिरस ऋषिः । अग्निर्देवता । गायत्री छन्दः[1] ।

समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम् । आस्मिन् हव्या जुहोतन ॥ १ ॥

सम्ऽइधा । अग्निम् । दुवस्यत । घृतैः । बोधयत । अतिथिम् । आ । अस्मिन् । हव्या । जुहोतन ॥ १ ॥

वेङ्कट० समिधा अग्निम् परिचरत, घृतैः च बोधयत अतिथिम् । आ जुहुत च अस्मिन् समिद्धे हवींषि ॥ १ ॥

अग्ने स्तोमं जुषस्व मे वर्धस्वानेन मन्मना । प्रति सूक्तानि हर्य नः ॥ २ ॥

अग्ने । स्तोमम् । जुषस्व । मे । वर्धस्व । अनेन । मन्मना । प्रति । सुऽउक्तानि । हर्य । नः ॥ २ ॥

वेङ्कट० अग्ने! स्तोमम् जुषस्व मे, वर्धस्व अनेन[2] स्तोत्रेण, प्रति कामय अस्माकम् सूक्तानि ॥ २ ॥

अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे । देवाँ आ सादयादिह ॥ ३ ॥

अग्निम् । दूतम् । पुरः । दधे । हव्यऽवाहम् । उप । ब्रुवे । देवान् । आ । सादयात् । इह ॥ ३ ॥

वेङ्कट० अग्निम् दूतम् अहं पुरः करोमि, हव्यवाहम्[3] च स्तौमि । सः देवान् इह आ सादयतु ॥ ३ ॥

उत् ते बृहन्तो अर्चयः समिधानस्य दीदिवः । अग्ने शुक्रास ईरते ॥ ४ ॥

उत् । ते । बृहन्तः । अर्चयः । सम्ऽइधानस्य । दीदिऽवः । अग्ने । शुक्रासः । ईरते ॥ ४ ॥

१-१. नास्ति मूको. २. प्रानेन वि[२]; पानेन अ[१]. ३. °वाहेतु मूको.

वेङ्कट० उत ईरते ते[1] महान्त अर्चयः समिध्यमानस्य हे दीप्त! अग्ने! ज्वलन्तः ॥ ४ ॥

उप॑ त्वा जुह्वो॒३ मम॑ घृताचीर्यन्तु हर्यत । अग्ने॑ ह॒व्या जु॑षस्व नः ॥ ५ ॥

उप॑ । त्वा । जुह्वः॑ । मम॑ । घृताची॑ । यन्तु । हर्यत । अग्ने॑ । ह॒व्या । जु॒षस्व । नः ॥ ५ ॥

वेङ्कट० उप यन्तु[2] त्वाम्[3] मम होमसाधनस्रुच[4] घृतमञ्चन्त्य. हे कामयमान!। अग्ने! हव्यानि जुषस्व न ॥ ५ ॥

[5]इति षष्ठाष्टके तृतीयाध्याये षट्त्रिंशो वर्गः[5] ॥

म॒न्द्रं होता॑रमृ॒त्विजं॑ चि॒त्रभा॑नुं वि॒भाव॑सुम् । अ॒ग्निमी॑ळे॒ स उ॑ श्रवत् ॥ ६ ॥

म॒न्द्रम् । होता॑रम् । ऋ॒त्विज॑म् । चि॒त्रऽभा॑नुम् । वि॒भाऽव॑सुम् । अ॒ग्निम् । ई॒ळे॒ । सः । ऊँ इति॑ । श्र॒व॒त् ॥

वेङ्कट० मादनम्[6] ह्वातारम् ऋतौ यष्टारम् चित्रदीप्तिम् तेजोधनम् अग्निम् स्तौमि । स शृणोतु ॥ ६ ॥

प्र॒त्नं होता॑रमीड्यं॒ जुष्ट॑म॒ग्निं क॒विक्र॑तुम् । अ॒ध्व॒राणा॑मभि॒श्रिय॑म् ॥ ७ ॥

प्र॒त्नम् । होता॑रम् । ईड्य॑म् । जुष्ट॑म् । अ॒ग्निम् । क॒विऽक्र॑तुम् । अ॒ध्व॒राणा॑म् । अ॒भि॒ऽश्रिय॑म् ॥ ७ ॥

वेङ्कट० प्रत्नम् होतारम् ईड्यम् पर्याप्तम् अग्निम् क्रान्तकर्माणम्[7] यज्ञानाम् अभिश्रयितारम् ईळे ॥ ७ ॥

जु॒षा॒णो अ॑ङ्गिरस्तमे॒मा ह॒व्यान्या॑नु॒षक् । अग्ने॑ य॒ज्ञं न॑य ऋतु॒था ॥ ८ ॥

जु॒षा॒णः । अ॒ङ्गि॒रः॒ऽत॒म॒ । इ॒मा । ह॒व्यानि॑ । आ॒नु॒षक् । अग्ने॑ । य॒ज्ञम् । न॒य॒ । ऋ॒तु॒ऽथा ॥ ८ ॥

वेङ्कट० जुषाण हे अङ्गिरसां वरिष्ठ[8] इमानि हवींषि[9] अनुषक्तम् अग्ने! यज्ञम्[10] च नय काले ॥ ८ ॥

स॒मि॒धा॒न उ॑ सन्त्य शुक्रशोच इ॒हा व॑ह । चि॒कि॒त्वान् दैव्यं॒ जन॑म् ॥ ९ ॥

स॒म्ऽइ॒धा॒नः । ऊँ इति॑ । स॒न्त्य॒ । शु॒क्र॒ऽशो॒चे॒ । इ॒ह । आ । व॒ह॒ । चि॒कि॒त्वान् । दैव्य॑म् । जन॑म् ॥ ९ ॥

वेङ्कट० हे भजनशील[1] समिध्यमान. एव ज्वलद्दीप्ते! इह आ वह जानन् दैव्यम् जनम् ॥ ९ ॥

विप्रं॒ होता॑रमद्रु॒हं धू॒मके॑तुं वि॒भाव॑सुम् । य॒ज्ञानां॑ के॒तुमी॑महे ॥ १० ॥

विप्र॑म् । होता॑रम् । अ॒द्रु॒हम् । धू॒मऽके॑तुम् । वि॒भाऽव॑सुम् । य॒ज्ञाना॑म् । के॒तुम् । ई॒म॒हे॒ ॥ १० ॥

वेङ्कट० प्राज्ञम् ह्वातारम् अद्रोग्धारम् धूमकेतुम् विभावसुम् यज्ञानाम् पताकास्थानीयम् याचामहे ॥ १० ॥

[2]इति षष्ठाष्टके तृतीयाध्याये सप्तत्रिंशो वर्गः[2] ॥

---

१. त वि[1]; त अ[1]. २. अयन्तु मूको. ३. त्वम् मूको. ४. स्रुचो[1] मूको ५-५. नास्ति मूको. ६. मोदनं मूको. ७. °माण मूको. ८. वसिष्ठ मूको. ९. हवीषि मूको. १०. यं मूको.

अग्ने नि पाहि नस्त्वं प्रति ष्म देव रीषतः । भिन्धि द्वेषः सहस्कृत ॥ ११ ॥

अग्ने । नि । पाहि । नः । त्वम् । प्रति । स्म । देव । रिषतः । भिन्धि । द्वेषः । सहःऽकृत ॥ ११ ॥

वेङ्कट० हिंसतः अस्मान् अग्ने! त्वम् प्रति नि पाहि, भिन्धि शत्रून् हे बलेन कृत![1] ॥ ११ ॥

अग्निः प्रत्नेन मन्मना शुम्भानस्तन्वं१ स्वाम् । कविर्विप्रेण वावृधे ॥ १२ ॥

अग्निः । प्रत्नेन । मन्मना । शुम्भानः । तन्वम् । स्वाम् । कविः । विप्रेण । ववृधे ॥ १२ ॥

वेङ्कट० अग्निः[2] प्रत्नेन स्तोत्रेण स्वम् अङ्गम् शोभयन् कविः मेधाविना वृद्धो भवति ॥ १२ ॥

ऊर्जो नपातमा हुवेऽग्निं पावकशोचिषम् । अस्मिन् यज्ञे स्वध्वरे ॥ १३ ॥

ऊर्जः । नपातम् । आ । हुवे । अग्निम् । पावकऽशोचिषम् । अस्मिन् । यज्ञे । सुऽअध्वरे ॥ १३ ॥

वेङ्कट० अन्नस्य पुत्रम् आ हुवे अग्निम् पावकदीप्तिम् अस्मिन् यज्ञे अत्यन्तम् अहिंस्ये[3] असुरैः[4] ॥ १३ ॥

स नो मित्रमहस्त्वमग्ने शुक्रेण शोचिषा । देवैरा सत्सि बर्हिषि ॥ १४ ॥

सः । नः । मित्रऽमहः । त्वम् । अग्ने । शुक्रेण । शोचिषा । देवैः । आ । सत्सि । बर्हिषि ॥ १४ ॥

वेङ्कट० हे मित्राणां पूजनीय! सः त्वम् अग्ने! ज्वलता तेजसा देवैः सह आ सीद यज्ञे ॥ १४ ॥

यो अग्निं तन्वो३ दमे देवं मर्तः सपर्यति । तस्मा इद् दीदयद् वसु ॥ १५ ॥

यः । अग्निम् । तन्वः । दमे । देवम् । मर्तः । सपर्यति । तस्मै । इत् । दीदयत् । वसु ॥ १५ ॥

वेङ्कट० यः अग्निम् धनस्य प्राप्त्यर्थं गृहे देवम् मर्त्यः परिचरति, तस्मै एव अग्निः धनम् प्रयच्छति ॥ १५ ॥

[5]इति षष्ठाष्टके तृतीयाध्याये अष्टात्रिंशो वर्गः[5] ॥

अग्निर्मूर्धा दिवः ककुत् पतिः पृथिव्या अयम् । अपां रेतांसि जिन्वति ॥ १६ ॥

अग्निः । मूर्धा । दिवः । ककुत् । पतिः । पृथिव्याः । अयम् । अपाम् । रेतांसि । जिन्वति ॥ १६ ॥

वेङ्कट० अग्निः मूर्धा दिवः उच्छ्रितः, पृथिव्याः च अयम् पतिः; अपाम् रेतांसि स्थावरजङ्गमा-रसकानि प्रीणयति ॥ १६ ॥

---

१. कृतः मूको. २. अग्निम् मूको. ३. °स्यैः मूको. ४. सुरैः मूको. ५-५. नास्ति मूको.

उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते । तव ज्योतींष्यर्चयः ॥ १७ ॥

उत् । अग्ने । शुचयः । तव । शुक्राः । भ्राजन्तः । ईरते । तव । ज्योतींषि । अर्चयः ॥ १७ ॥

वेङ्कट० उत् ईरते प्रेरयन्ति तव अग्ने! निर्मलाः शुक्लवर्णाः दीप्यमानाः अर्चयः तव ज्योतींषि ॥ १७ ॥

ईशिषे वार्यस्य हि दात्रस्याग्ने स्वर्पतिः । स्तोता स्यां तव शर्मणि ॥ १८ ॥

ईशिषे । वार्यस्य । हि । दात्रस्य । अग्ने । स्वःऽपतिः । स्तोता । स्याम् । तव । शर्मणि ॥ १८ ॥

वेङ्कट० ईशिषे हि वरणीयस्य धनस्य अग्ने! स्वर्गस्य स्वामी। तथा सति स्तोता अहम् स्याम तव सुखे ॥ १८ ॥

त्वामग्ने मनीषिणस्त्वां हिन्वन्ति चित्तिभिः । त्वां वर्धन्तु नो गिरः ॥ १९ ॥

त्वाम् । अग्ने । मनीषिणः । त्वाम् । हिन्वन्ति । चित्तिऽभिः । त्वाम् । वर्धन्तु । नः । गिरः ॥

वेङ्कट० त्वाम् अग्ने! मनीषिणः स्तुतिभिः स्तुवन्ति, त्वाम् एव प्रीणयन्ति कर्मभिः। त्वाम् वर्धयन्तु अस्माकम् स्तुतयः ॥ १९ ॥

अदब्धस्य स्वधावतो दूतस्य रेभतः सदा । अग्नेः सख्यं वृणीमहे ॥ २० ॥

अदब्धस्य । स्वधाऽवतः । दूतस्य । रेभतः । सदा । अग्नेः । सख्यम् । वृणीमहे ॥ २० ॥

वेङ्कट० अहिंसितस्य बलवतः दूतस्य देवान् स्तुवतः सदा अग्नेः[1] सख्यम् वृणीमहे ॥ २० ॥

[2]इति षष्ठाष्टके तृतीयाध्याये एकोनचत्वारिंशो वर्गः[3] ॥

अग्निः शुचिव्रततमः शुचिर्विप्रः शुचिः कविः । शुची रोचत आहुतः ॥ २१ ॥

अग्निः । शुचिव्रतऽतमः । शुचिः । विप्रः । शुचिः । कविः । शुचिः । रोचते । आऽहुतः ॥ २१ ॥

वेङ्कट० अग्निः अतिशयेन शुचिकर्मा शुचिः मेधावी शुचिः कान्तप्रज्ञः शुचिः एव रोचते आहुतः ॥ २१ ॥

उत त्वा धीतयो मम गिरो वर्धन्तु विश्वहा । अग्ने सख्यस्य बोधि नः ॥ २२ ॥

उत । त्वा । धीतयः । मम । गिरः । वर्धन्तु । विश्वहा । अग्ने । सख्यस्य । बोधि । नः ॥ २२ ॥

वेङ्कट० अपि च त्वाम् कर्माणि मम गिरः च वर्धयन्तु सर्वदा। अग्ने! सख्यम् बुध्यस्व अस्माकम् ॥ २२ ॥

---

१. अग्ने मूको. २. नास्ति मूको. २-२. नास्ति मूको.

यदग्ने स्यामहं त्वं त्वं वा घा स्या अहम् । स्युष्टे सत्या इहाशिषः ॥ २३ ॥

यत् । अग्ने । स्याम् । अहम् । त्वम् । त्वम् । वा । घ । स्याः । अहम् ।
स्युः । ते । सत्याः । इह । आऽशिषः ॥ २३ ॥

वेङ्कट० यत् अग्ने ! अहम् त्वम् स्याम् बहुधनः, त्वम् वा खलु अहम् स्याः[1] दरिद्रः स्तोता, ततः तव आशासनानि सत्यानि स्युः इति ॥ २३ ॥

वसुर्वसुपतिर्हि कमस्यग्ने विभावसुः । स्याम ते सुमतावपि ॥ २४ ॥

वसुः । वसुऽपतिः । हि । कम् । असि । अग्ने । विभाऽवसुः । स्याम । ते । सुऽमतौ । अपि ॥ २४ ॥

वेङ्कट० वासयिता[2] धनपतिः[3] हि भवसि अग्ने ! दीप्तिधनः । तथा सति तव सुमतौ वयम् अपि स्याम ॥ २४ ॥

अग्ने धृतव्रताय ते समुद्रायेव सिन्धवः । गिरो वाश्रास ईरते ॥ २५ ॥

अग्ने । धृतऽव्रताय । ते । समुद्रायऽइव । सिन्धवः । गिरः । वाश्रासः । ईरते ॥ २५ ॥

वेङ्कट० अग्ने ! धृतकर्मणे तुभ्यम् गिरः वाशनशीलाः प्रवर्तन्ते, यथा समुद्राय सिन्धवः[4] ॥ २५ ॥

[5]इति पञ्चमाष्टके तृतीयाध्याये चत्वारिंशो वर्गः[5] ॥

युवानं विश्पतिं कविं विश्वादं पुरुवेपसम् । अग्निं शुम्भामि मन्मभिः ॥ २६ ॥

युवानम् । विश्पतिम् । कविम् । विश्वऽअदम् । पुरुऽवेपसम् । अग्निम् । शुम्भामि । मन्मऽभिः ॥२६॥

वेङ्कट० युवानम् विश्पतिम् कविम् विश्वस्य हविषोऽत्तारम्[6] बहुकर्माणम्[7] अग्निम् शोभयामि स्तुतिभिः ॥ २६ ॥

यज्ञानां रथ्ये वयं तिग्मजम्भाय वीळवे । स्तोमैरिषेमाग्नये ॥ २७ ॥

यज्ञानाम् । रथ्ये । वयम् । तिग्मऽजम्भाय । वीळवे । स्तोमैः । इषेम । अग्नये ॥ २७ ॥

वेङ्कट० यज्ञानाम् नेत्रे वयम् तीक्ष्णज्वालाय दृढाय स्तोमैः अन्नं कर्तुमिच्छेम अग्नये[8] ॥ २७ ॥

अयमग्ने त्वे अपि जरिता भूतु सन्त्य । तस्मै पावक मृळय ॥ २८ ॥

अयम् । अग्ने । त्वे इति । अपि । जरिता । भूतु । सन्त्य । तस्मै । पावक । मृळय ॥ २८ ॥

---

१. स्यात् मूको. २. °यिता मूको. ३. वनस्पतिः मूको. ४. तु. ऋ ८,६,४. ५-५. नास्ति मूको.
६. °षोऽदम् मूको. ७. °माणि मूको. ८. तु. ऋ ८,४३,११.

वेङ्कट० अयम् अग्ने! त्वयि अपि जरिता भजनीय! भवतु। तस्मै हे शोधक! सुखम् उत्पादय[1] तं सुखय ॥ २८ ॥

धीरो ह्यस्यद्मसद् विप्रो न जागृविः सदा। अग्ने दीदयसि द्यवि ॥ २९ ॥

धीरः। हि। असि। अद्मऽसत्। विप्रः। न। जागृविः। सदा। अग्ने। दीदयसि। द्यवि ॥२९॥

वेङ्कट० धीर. हि भवसि हविषि[2] सीदन् मेधावी इव जागरणशीलः भवसि सदा इति। प्रत्यक्षाभिमाह—अग्ने! दीप्यसे अन्तरिक्षे ॥ २९ ॥

पुराग्ने दुरितेभ्यः पुरा मृध्रेभ्यः कवे। प्र ण आयुर्वसो तिर ॥ ३० ॥

पुरा। अग्ने। दुःऽइतेभ्यः। पुरा। मृध्रेभ्यः। कवे। प्र। नः। आयुः। वसो इति। तिर ॥३०॥

वेङ्कट० पापानि[3] शत्रवश्च यदाऽस्मान् हिंसन्ति, प्रागेव ततः अग्ने! कवे! वसो! वर्धय अस्माकम् आयुः इति ॥ ३० ॥

[4]इति पञ्चमाष्टके तृतीयाध्याये एकचत्वारिंशो वर्गः[4] ॥

[४५]

[5]त्रिशोकः काण्व ऋषिः। इन्द्रो देवता, प्रथमायाः अग्नीन्द्रौ। गायत्री छन्दः[5]।

आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक्। येषामिन्द्रो युवा सखा ॥१॥

आ। घ। ये। अग्निम्। इन्धते। स्तृणन्ति। बर्हिः। आनुषक्। येषाम्। इन्द्रः। युवा। सखा ॥१॥

वेङ्कट० त्रिशोक। आभिमुख्येन खलु ये अग्निम् इन्धते, ते अनुषक्तम् बर्हिः[6] च स्तृणन्ति, येषाम् इन्द्रः युवा सखा भवति ॥ १ ॥

बृहन्निदिध्म एषां भूरि शस्तं पृथुः स्वरुः। येषामिन्द्रो युवा सखा ॥ २ ॥

बृहन्। इत्। इध्मः। एषाम्। भूरि। शस्तम्। पृथुः। स्वरुः। येषाम्। इन्द्रः। युवा। सखा ॥

वेङ्कट० महान् खलु एषाम् इध्मः, भूरि च स्तोत्रम्, स्वरुः च पृथुः ॥ २ ॥

अयुद्ध इद् युधा वृतं शूर आजति सत्वभिः। येषामिन्द्रो युवा सखा ॥ ३ ॥

अयुद्धः। इत्। युधा। वृतम्। शूरः। आ। अजति। सत्वऽभिः। येषाम्। इन्द्रः। युवा। सखा ॥

1. °यम् मूको. 2. हवीषि मूको. 3. पदमानि मूको. 4-4. नास्ति मूको. 5-5. या द्र,१४ द्र. 6. बर्हिष मूको.

वेङ्कट० प्रागपोदिव सन् योद्धभिर्भटैः[1] परिपूर्णम् आत्मीयैः पक्षैः इषुः भूत्वा [2]आ अजति गमयति[2]। येषाम् इन्द्रः युधा सखा जनेषु अन्तर्भूतः ॥ ३ ॥

आ बुन्दं वृत्रहा ददे जातः पृच्छद् वि मातरम् । क उग्राः के ह शृण्विरे ॥४॥

आ । बुन्दम् । वृत्रऽहा । ददे । जातः । पृच्छत् । वि । मातरम् । के । उग्राः । के । ह । शृण्विरे ॥४॥

वेङ्कट० यास्कः (६,३२)—'बुन्द इषुर्भवति । भिन्दो वा भयदो वा भासमानो द्रवतीति वा' इति । जातः इन्द्रः आ ददे इषुम् वृत्रहा । अयं[3] च मातरम् वि अपृच्छत्—के इह लोके उद्गूर्णबलाः, के च वीर्येण विश्रुताः, तान् ब्रूहीति ॥ ४ ॥

प्रति त्वा शवसी वदद् गिरावप्सो न योधिषत् । यस्ते शत्रुत्वमाचके ॥ ५ ॥

प्रति । त्वा । शवसी । वदत् । गिरौ । अप्सः । न । योधिषत् । यः । ते । शत्रुऽत्वम् । आऽचके ॥५॥

वेङ्कट० प्रति अवदत् [4]'त्वाम् शवसी माता'[4] बलवती—यः ते शत्रुत्वम् पुत्र! कामयते, [5]'स पर्वते अप्सः गजः'[5] इव योधयति[6] ॥ ५ ॥

[7]इति पञ्चाष्टके तृतीयाध्याये द्विचत्वारिंशो वर्गः[7] ॥

उत त्वं मघवञ्छृणु यस्ते वष्टि ववक्षि तत् । यद् वीळयासि वीळु तत् ॥ ६ ॥

उत । त्वम् । मघऽवन् । शृणु । यः । ते । वष्टि । ववक्षि । तत् । यत् । वीळयासि । वीळु । तत् ॥६॥

वेङ्कट० अपि च उत त्वम् मघवन्! शृणु, यद् त्वत्तः किञ्चित् कामयते तस्मै तत् वहसि। यत् च त्वं दृढीकरोषि दृढमेव तत् भवति ॥ ६ ॥

यदाजिं यात्याजिकृदिन्द्रः स्वश्वयुरुप । रथीतमो रथीनाम् ॥ ७ ॥

यत् । आजिम् । याति । आजिऽकृत् । इन्द्रः । स्वश्वऽयुः । उप । रथिऽतमः । रथिनाम् ॥ ७ ॥

वेङ्कट० यदा युद्धम् उप याति युद्धकृत् इन्द्र स्वश्वमिच्छन्, तदा अतिशयेन रथी भवति जयति सर्वान् ॥ ७ ॥

वि षु विश्वा अभियुजो वज्रिन् विष्वग्यथा वृह । भवा नः सुश्रवस्तमः ॥८॥

वि । सु । विश्वाः । अभिऽयुजः । वज्रिन् । विष्वक् । यथा । वृह । भव । नः । सुश्रवःऽतमः ॥८॥

---

१. योद्धृभिरवृष्टे मूको. २-२. जनितभवति मूको. ३. दय वि°. ४-४. त्वाम्शवसी माता मूको. ५-५. सर्वपतेस्फोपट मूको. ६. योधयति मूको. ७-७. नास्ति मूको.

वेङ्कट० वि वृह सुष्टु विश्वाः अभियोक्त्रीः प्रजाः वज्रिन्!, यथा विष्वक् भवन्ति। भव अस्माकं स्वन्ततमः[1] ॥ ८ ॥

अस्माकं सु रथं पुर इन्द्रः कृणोतु सातये । न यं धूर्वन्ति धूर्तयः ॥ ९ ॥

अस्माकम् । सु । रथम् । पुरः । इन्द्रः । कृणोतु । सातये । न । यम् । धूर्वन्ति । धूर्तयः ॥९॥

वेङ्कट० अस्माकम् सुष्टु रथम् पुरः करोतु इन्द्रः [2]लाभाय, यम् इन्द्रम्[2] न हिंसन्ति हिंसकाः ॥ ९ ॥

वृज्याम ते परि द्विषोऽरं ते शक्र दावने । गमेमेदिन्द्र गोमतः ॥ १० ॥

वृज्याम । ते । परि । द्विषः । अरम् । ते । शक्र । दावने । गमेम । इत् । इन्द्र । गोऽमतः ॥१०॥

वेङ्कट० परि वृज्याम ते द्वेष्टॄन् नोपगच्छेम भिक्षमाणाः । पर्याप्तम् तव स्वभूतम् शक्र! दानाय [3]गमेम एव इन्द्र![3] पशुमतः ॥ १० ॥

[4]इति षष्ठाष्टके तृतीयाध्याये त्रयश्चत्वारिंशो वर्गः[4] ॥

शनैश्चिद् यन्तो अद्रिवोऽश्वावन्तः शतग्विनः । विवक्षणा अनेहसः ॥ ११ ॥

शनैः । चित् । यन्तः । अद्रिऽवः । अश्वऽवन्तः । शतऽग्विनः । [5]विवक्षणाः । अनेहसः[5] ॥ ११ ॥

वेङ्कट० शनैःशनैः यन्तः वज्रिन्! अश्ववन्तः बहुधनाः विवक्षणाः[6] वोढव्यं वहन्तः अनुपद्रवाः गमेमेदिति ॥ ११ ॥

ऊर्ध्वा हि ते दिवेदिवे सहस्रा सूनृता शता । जरितृभ्यो विमंहते ॥ १२ ॥

ऊर्ध्वा । हि । ते । दिवेऽदिवे । सहस्रा । सूनृता । शता । जरितृऽभ्यः । विऽमंहते ॥ १२ ॥

वेङ्कट० ऊर्ध्वानि हि ते अन्वहं सहस्राणि शतानि च धनानि स्तोतृभ्यः प्रयच्छति ॥ १२ ॥

विद्मा हि त्वा धनंजयमिन्द्र दृळ्हा चिदारुजम् । आदारिणं यथा गयम् ॥१३॥

विद्म । हि । त्वा । धनम्ऽजयम् । इन्द्र । दृळ्हा । चित् । आऽरुजम् । आऽदारिणम् । यथा । गयम् ॥

वेङ्कट० विद्म हि त्वा धनानां जेतारम् इन्द्र! दृढानामपि आभिमुख्येन भङ्क्तारम्[7] शत्रूणाम् आदर्तारम् गृहम्[8] इव भूतानां रक्षकम् ॥ १३ ॥

ककुहं चित् त्वा कवे मन्दन्तु धृष्णविन्दवः । आ त्वा पणिं यदीमहे ॥ १४ ॥

ककुहम् । चित् । त्वा । कवे । मन्दन्तु । धृष्णो इति । इन्दवः । आ । त्वा । पणिम् । यत् । ईमहे ॥

१. स्वन्ततं भव वि[1]; स्वन्ततम भव अ[1]. २-२. लाभायमिन्द्रम् वि[1]; लाभाय अ[1]. ३-३. गमेवेन्द्र वि[1], गमेवेन्द्र अ[1]. ४-४. नास्ति मूको. ५-५ द्र. ऋ ८,४९,४. ६. विवक्षणा मूको. ७ हन्तारम् अ[1]. ८. गृहेः मूको.

वेङ्कट० दरिकृतम् चित् त्वा कते![1] मन्दन्तु[2] धर्षक! सोमाः[3] । आ याचामहे यदा त्वां पणमानम् ॥ १४ ॥

यस्ते रेवाँ अदाशुरिः प्रममर्ष मघत्तये । तस्य नो वेद आ भर ॥ १५ ॥

यः । ते । रेवान् । अदाशुरिः । प्रऽममर्ष । मघत्तये । तस्य । नः । वेदः । आ । भर ॥ १५ ॥

वेङ्कट० यः ते धनवान् सन् अदानशीलः प्रममर्ष असूयति मघदानाय, न यजते, अर्थात्?; तस्य नः धनम् आ हर ॥ १५ ॥

[4]इति षष्ठाष्टके तृतीयाध्याये चतुश्चत्वारिंशो वर्गः[4] ॥

इम उ त्वा वि चक्षते सखाय इन्द्र सोमिनः । पुष्टावन्तो यथा पशुम् ॥ १६ ॥

इमे । ॐ इति । त्वा । वि । चक्षते । सखायः । इन्द्र । सोमिनः । पुष्टऽवन्तः । यथा । पशुम् ॥ १६ ॥

वेङ्कट० इमे उ त्वां प्रपश्यन्ति सखायः इन्द्र। अभिषुतसोमाः, यथा पश्यन्ति पशुम्[5] सम्भृतघासाः ॥ १६ ॥

उत त्वाबधिरं वयं श्रुत्कर्णं सन्तमूतये । दूरादिह हवामहे ॥ १७ ॥

उत । त्वा । अबधिरम् । वयम् । श्रुत्ऽकर्णम् । सन्तम् । ऊतये । दूरात् । इह । हवामहे ॥ १७ ॥

वेङ्कट० अपि च त्वाम् अबधिरम् [6]ततः श्रुत्कर्णम् सन्तम्[6] रक्षणाय दूरात् इह वयम्[7] हवामहे ॥ १७ ॥

यच्छुश्रूया इमं हवं दुर्मर्षं चक्रिया उत । भवेरापिर्नो अन्तमः ॥ १८ ॥

यत् । शुश्रूयाः । इमम् । हवम् । दुःऽमर्षम् । चक्रियाः । उत । भवेः । आपिः । नः । अन्तमः ॥

वेङ्कट० यदि शृणुयाः इमम् ह्वानम्, दुस्सहं बलं [8]कुर्याः, भवेः[8] च बन्धुः अस्माकम् अन्तिकतमः ॥ १८ ॥

यच्चिद्धि ते अपि व्यथिर्जगन्वांसो अमन्महि । गोदा इदिन्द्र बोधि नः ॥ १९ ॥

यत् । चित् । हि । ते । अपि । व्यथिः । जगन्वांसः । अमन्महि । गोऽदाः । इत् । इन्द्र । बोधि । नः ॥

वेङ्कट० यदा चित् हि तुभ्यं व्यथिताः गन्तारः विष्टुमः, तदा [9]गोदाः एव[9] इन्द्र। अस्माकम् भवामीति[10] बुध्यस्व ॥ १९ ॥

आ त्वा रम्भं न जिव्रयो ररम्भा शवसस्पते । उश्मसि त्वा सधस्थ आ ॥ २० ॥

---

१. काले वि[1]; कले अ[1]. २. मन्दतु मूको ३. सोम मूको. ४-४. नास्ति मूको. ५. पशु मूको. ६-६. ततः ... स० मूको. ७. नास्ति अ[1]. ८-८. दुर्वारवे वि[1]; °इवेः अ[1]. ९-९. गो ... ए[1] मूको. १०. तु. ऋ ३,३०,२१; भावम् इ० मूको.

[1]आ । त्वा । रम्भम् । न । जिव्रयः । ररभ्म । [1] शवसः । पते । उश्मसि । त्वा । सधऽस्थे । आ ॥२०॥

वेङ्कट० त्वाम् [2]वयम् आ रभामहे यथा दण्डम्[2] वृद्धाः हे बलस्य पते!। कामयामहे च त्वां यज्ञे ॥ २० ॥

[3]इति षष्ठाष्टके तृतीयाध्याये पञ्चचत्वारिंशो वर्गः[3] ॥

स्तोत्रमिन्द्राय गायत पुरुनृम्णाय सत्वने । नकिर्यं वृण्वते युधि ॥ २१ ॥

स्तोत्रम् । इन्द्राय । गायत । पुरुऽनृम्णाय । सत्वने । नकिः । यम् । वृण्वते । युधि ॥ २१ ॥

वेङ्कट० स्तोत्रम् इन्द्राय गायत[4] बहुधनाय दानशीलाय, न केचन यम् वारयन्ति सङ्ग्रामे ॥२१॥

अभि त्वा वृषभा सुते सुतं सृजामि पीतये । तृम्पा व्यश्नुही मदम् ॥ २२ ॥

अभि । त्वा । वृषभ । सुते । सुतम् । सृजामि । पीतये । तृम्प । वि । अश्नुहि । मदम् ॥२२॥

वेङ्कट० अभि सृजामि त्वां वृष! अभिषुते सोमे सुतम् पानाय। [5]तृप्य वि अश्नुहि[5] च सोमम् ॥ २२ ॥

मा त्वा मूरा अविष्यवो मोपहस्वान आ दभन् । माकीं ब्रह्मद्विषो वनः ॥२३॥

मा । त्वा । मूराः । अविष्यवः । मा । उपऽहस्वानः । आ । दभन् । माकीम् । ब्रह्मऽद्विषः । वनः ॥

वेङ्कट० मा त्वां मारकाः मनुष्याणां पालनकामाः[6] आ दम्भुवन्तु[7], मा च उपहसनपराः[8]। मा त्वं ब्रह्मणो द्वेष्टॄन् भजेथाः ॥ २३ ॥

इह त्वा गोपरीणसा महे मन्दन्तु राधसे । सरो गौरो यथा पिब ॥ २४ ॥

इह । त्वा । गोऽपरीणसा । महे । मन्दन्तु । राधसे । सरः । गौरः । यथा । पिब ॥ २४ ॥

वेङ्कट० इह त्वां गव्येन पयसा मिश्रितेन सोमेन मनुष्याः महते धनाय मदन्तु। त्वं हि सोमम् पिब यथा गौरः मृगः सरः पिबति ॥ २४ ॥

या वृत्रहा परावति सना नवा च चुच्युवे । ता संसत्सु प्र वोचत ॥ २५ ॥

या । वृत्रऽहा । पराऽवति । सना । नवा । च । चुच्युवे । ता । संसत्ऽसु । प्र । वोचत ॥२५॥

१-१. या ३,११ द. २-२. वयं ··· दण्डं मूको. ३-३. नास्ति मूको. ४. गायन्तः मूको. ५-५. तृप्यश्नुहि मूको. ६. पालकामा मूको. ७. दस्नुवन्तु वि'; दस्नवन्तु भा'. ८. उपहसवर मूको.

वेङ्कट० यानि वृत्रहा दूरे सनातनानि नूतनानि च धनानि प्रेरितवान्, तानि संसत्सु प्र वोचत ॥ २५ ॥

[1]इति षष्ठाष्टके तृतीयाध्याये षट्चत्वारिंशो वर्गः[1] ॥

अपिबत् कद्रुवः सुतमिन्द्रः सहस्रबाह्वे । अत्रादेदिष्ट पौंस्यम् ॥ २६ ॥

अपिबत् । कद्रुवः । सुतम् । इन्द्रः । सहस्रऽबाह्वे । अत्र । अदेदिष्ट । पौंस्यम् ॥ २६ ॥

वेङ्कट० अपिबत् कद्रोः ऋषेः सुतम् इन्द्रः सहस्रबाहोः शत्रून् हन्तुम् । अत्र अस्य वीर्यम् अदीप्यत ॥ २६ ॥

सत्यं तत् तुर्वशे यदौ विदानो अह्नवाय्यम् । व्यानट् तुर्वणे शमि ॥ २७ ॥

सत्यम् । तत् । तुर्वशे । यदौ । विदानः । अह्नवाय्यम् । वि । आनट् । तुर्वणे । शमि ॥ २७ ॥

वेङ्कट० सत्यम् तत् तुर्वशे यदौ[2] च तयोः प्रीत्यर्थम् जानन् तयोः शत्रुम् अह्नवाय्यम् नाम व्याप्तवान् सङ्ग्रामे कर्म ॥ २७ ॥

तरणिं वो जनानां त्रदं वाजस्य गोमतः । समानमु प्र शंसिषम् ॥ २८ ॥

तरणिम् । वः । जनानाम् । त्रदम् । वाजस्य । गोऽमतः । समानम् । ऊँ इति । प्र । शंसिषम् ॥ २८ ॥

वेङ्कट० तारकम्[3] युष्माकम् जनानाम्, तर्दयितारम्[4], पशुमतोऽन्नस्य प्रेरयितारम् साधारणमेव प्र शंसामि ॥ २८ ॥

ऋभुक्षणं न वर्तव उक्थेषु तुग्र्यावृधम् । इन्द्रं सोमे सचा सुते ॥ २९ ॥

ऋभुक्षणम् । न । वर्तवे । उक्थेषु । तुग्र्यऽवृधम् । इन्द्रम् । सोमे । सचा । सुते ॥ २९ ॥

वेङ्कट० महान्तम् इदानीम् [5]धनं वरीतुम्[5] शस्त्रेषु उदकस्य[6] वर्धयितारम् इन्द्रम् सोमे सह सुते प्रशंसामि ॥ २९ ॥

यः कृन्तदिद् वि योन्यं त्रिशोकाय गिरिं पृथुम् । गोभ्यो गातुं निरेतवे ॥ ३० ॥

यः । कृन्तत् । इत् । वि । योन्यम् । त्रिऽशोकाय । गिरिम् । पृथुम् । गोभ्यः । गातुम् । निःऽएतवे ॥

वेङ्कट० यः वि अकृन्तत् निर्गमनद्वारम् त्रिशोकार्थम् मेघम् विस्तीर्णम्, स उदकेभ्यो निर्गमनाय मार्गम् च करोति ॥ ३० ॥

[1]इति षष्ठाष्टके तृतीयाध्याये सप्तचत्वारिंशो वर्गः[1] ॥

१-१. नास्ति मूको. २. यदोः वि[1]; यदो अ[1]. ३. कारकम् मूको. ४. तर्जयि° मूको. ५-५. येन चरितं मूको. ६. तु. निघ १,१२.

यद् दंधिषे मंनस्यसिं मन्दानः प्रेदियंक्षसि । मा तत् कंरिन्द्र मृळयं ॥ ३१ ॥
यत् । दुधिषे । मनस्यसिं । मन्दानः । प्र । इत् । इयंक्षसि ।
मा । तत् । कः । इन्द्र । मृळयं ॥ ३१ ॥

वेङ्कट० यत्[1] भारयसि, यत् च नमस्करोषि मोदमानः, यत् च प्र यच्छसि[2], तत् सर्वम् इदानीम् कार्षीः[3]। अस्मान् एव सुखय ॥ ३१ ॥

दभ्रं चिद्धि त्वावंतः कृतं शृण्वे अधि क्षमिं । जिगांत्विन्द्र ते मनंः ॥ ३२ ॥
दभ्रम् । चित् । हि । त्वाऽवंतः । कृतम् । शृण्वे । अधिं । क्षमिं । जिगांतु । इन्द्र । ते । मनंः ॥

वेङ्कट० अल्पम् अपि त्वत्सदृशस्य कृतम् विश्रुतं भवति पृथिव्याम्। तथा सति गच्छतु इन्द्र! तव मनः मयि ॥ ३२ ॥

तवेदु ताः सुंकीर्तयोऽसंन्नुत प्रशंस्तयः । यदिंन्द्र मृळयांसि नः ॥ ३३ ॥
तवं । इत् । ऊँ इतिं । ताः । सुऽकीर्तयः । असंन् । उत । प्रऽशंस्तयः । यत् । इन्द्र । मृळयांसि । नः ॥

वेङ्कट० तव एव ताः सुकीर्तयः सम्भवेयुः, अपि च प्रशस्तयः, यत्[1] इन्द्र! अस्मान् सुखयसि ॥ ३३ ॥

मा न एकंस्मिन्नागंसि मा द्वयोंरुत त्रिषु । वधीर्मा शूंर भूरिंषु ॥ ३४ ॥
मा । नः । एकंस्मिन् । आगंसि । मा । द्वयोः । उत । त्रिषु । वधीः । मा । शूर । भूरिंषु ॥ ३४ ॥

वेङ्कट० मा वधीः अस्मान् एकस्मिन् आगसि, मा च द्वयोः, अपि च त्रिषु, मा च शूर! बहुषु अपि ॥ ३४ ॥

बिभया हि त्वावंत उग्रादंभिप्रभङ्गिणंः । दस्मादहमृंतीषहंः ॥ ३५ ॥
बिभयं । हि । त्वाऽवंतः । उग्रात् । अभिऽप्रभङ्गिनंः । दस्मात् । अहम् । ऋतिऽसहंः ॥ ३५ ॥

वेङ्कट० बिभेमि[4] हि त्वत्सदृशात् उद्‌गूर्णात् शत्रुपुराणामभिप्रहर्तुः उपक्षपयितुः [5]हिंसां सहतः[5] ॥ ३५ ॥

[6]इति षष्ठाष्टके तृतीयाध्याये अष्टचत्वारिंशो वर्गः[6] ॥

मा सख्युः शूनमा विंदे मा पुत्रस्यं प्रभूवसो । आवृत्वंद् भूतु ते मनंः ॥ ३६ ॥
मा । सख्युः । शूनम् । आ । विदे । मा । पुत्रस्यं । प्रभूवसो इतिं प्रभुऽवसो । आऽवृत्वंत् । भूतु । ते । मनंः ॥

---

१. यं मूको. २. यच्छ मूको. ३. कार्षीत् मूको. ४. बिभेहि मूको. ५-५. हिंसा सहत मूको. ६-६. नास्ति मूको.

वेङ्कट० मा सख्यु वृद्धिम्[1] आ वेदयामि, मा च पुनस्त्व प्रभूतधन[1]। आवर्तनपरम् भवतु तव मन अस्मासु ॥ ३६ ॥

को नु मर्या अमिथितः सखा सखायमब्रवीत् । जहा को अस्मदीषते ॥ ३७ ॥

क । नु । मर्याः । अमिथित । सखा । सखायम् । अब्रवीत् । जहा । क । अस्मत् । ईषते ॥३७॥

वेङ्कट० [2]क नु हे[2] मनुष्या[1] अनाक्रुष्ट सखा सखायम् वदति इन्द्रात् अन्य—कम् अहं जघान, क वा अस्मद् भीत पलायते इति (तु या ४,२)। 'मा न एकस्मिन्नागसि' (ऋ ८,४५,३४) इत्यादिकया श्रुत्या नूनम् ऋषिमिन्द्र आजहारेति तत्र विस्मयते ऋषिरिति ॥ ३७ ॥

एवारे वृषभा सुतेऽसिन्वन् भूर्यावयः । श्वघ्नीव निवता चरन् ॥ ३८ ॥

एवारे । वृषभ । सुते । असिन्वन् । भूरि । आवय । श्वघ्नीऽइव । निऽवता । चरन् ॥ ३८ ॥

वेङ्कट० एवारो नाम कश्चित्, तस्मिन् वृषभ[3] तेनाभिषुते सोम असिन्वन् अबध्नन् आत्मनि बहूनि धनानि प्रापय । 'श्वघ्नी कितवो भवति स्वं हन्ति' इति यास्क (५,२२), अथवा श्वान हन्तीति श्वागर । स यथा निभृता[4] मार्गेण परम्परया[4] दीयमान प्रतिकितवाय [5]धन मार्पयति[5] ॥ ३८ ॥

आ त एता वचोयुजा हरी गृभ्णे सुमद्रथा । यदीं ब्रह्मभ्य इद्ददः ॥ ३९ ॥

आ । ते । एता । वचःऽयुजा । हरी इति । गृभ्णे । सुमत्ऽरथा । यत् । ईम् । ब्रह्मऽभ्यः । इत् । ददः ॥

वेङ्कट० आ गृह्णामि मदभिमुख यातु हस्ताभ्याम् आकर्षामि[6] तव पुत्रौ ब्रह्मणा युज्यमानौ अश्वौ [7]कल्याणरथौ । यत् इद धन ब्राह्मणेभ्य[7] एव ददासि ॥ ३९ ॥

भिन्धि विश्वा अप द्विषः परि बाधो जही मृधः । वसु स्पार्हं तदा भर ॥४०॥

भिन्धि । विश्वाः । अप । द्विषः । परि । बाधः । जहि । मृधः । वसु । स्पार्हम् । तत् । आ । भर ॥

वेङ्कट० अप भिन्धि विश्वा द्वेष्ट्री सेना । परि जहि च बाध हिंसित्री[8] मृध । तत तासाम् वसु च अस्मभ्यम् आ हर स्पृहणीयम् ॥ ४० ॥

यद्वीळाविन्द्र यत् स्थिरे यत् पर्शाने पराभृतम् । वसु स्पार्हं तदा भर ॥४१॥

यत् । वीळौ । इन्द्र । यत् । स्थिरे । यत् । पर्शाने[9] । पराऽभृतम् । वसु । स्पार्हम् । तत् । आ । भर ॥

वेङ्कट० यत् दृढे इन्द्र!, यत् च स्थिरे, यत् च मेघ त्वया पराभृतम्[10] विन्यस्तम् धनम् ॥ ४१ ॥

---

१. वृद्धस्य मूको. २-२. को नु हे मूको. ३. वैप १ १८२८ j द्र, नक्ता मूको ४. परम्परा मूको ५-५. धनमपयति मूको ६. °पादि मूको ७-७. कल्या° °ण मूको. ८. हिंसीति मूको ९. निघ १,१० (मूको) द्र १०. पराहृतम् अ

यस्य॑ ते वि॒श्वमा॑नुषो॒ भूरे॑र्द॒त्तस्य॒ वेद॑ति । वसु॑ स्पा॒र्हं तदा भ॑र ॥ ५२ ॥

यस्य॑ । ते॒ । वि॒श्वऽमा॑नुषः । भूरेः॑ । द॒त्तस्य॑ । वेद॑ति । वसु॑ । स्पा॒र्हम् । तत् । आ । भ॒र ॥४२॥

वेङ्कट० यत् त्वया दत्तम् बहु सर्वो [1]मनुष्यः जानाति वसु स्पार्हम्[1] तत् आ हरेति ॥ ५२ ॥

[2]इति षष्ठाष्टके तृतीयाध्याये एकोनपञ्चाशत्तमो वर्गः[2] ॥

षष्ठे तृतीयमध्यायं व्याचकारेति माधवः ।
श्रीवेङ्कटार्यतनयः सम्यगर्थान् प्रदर्शयन् ॥ १ ॥

इति वेङ्कटमाधवाचार्यविरचिते ऋक्संहिताव्याख्याने षष्ठाष्टके तृतीयोऽध्यायः ॥

—*—

इति ऋग्वेदे सभाष्ये षष्ठाष्टके तृतीयोऽध्यायः ॥

१-१. यद्यो ''' वर्द मूको. २-२. नास्ति मूको

अथ चतुर्थोऽध्यायः ।

वेङ्कट०

'त्वावतः पुरूवसो'[1] व्याचिख्यासति माधवः ।
प्रदर्शयंस्त्रिष्टुबादेर्लक्षणानि पृथक्पृथक् ॥ १ ॥

स्यात् त्रिष्टुबेकादशकैश्चतुर्भिः
'कस्य नूनं कतमस्यामृतानाम्'[2] ।
पदे यदि द्वे भवतस्तु जागते
वदन्ति सूक्तेन तदा व्यवस्थाम् ॥ २ ॥

'यस्मै त्वमायजसे स साधति'[3]
'ये वाजिनं परिपश्यन्ति पक्वम्'[4] ।
पूर्वानयोर्जागतसूक्तमिष्टा
ततश्च सा जगती त्रिष्टुबन्या ॥ ३ ॥

वैराजौ जागतौ चोभौ तां विद्यादभिसारिणीम् ।
'यो वाचा विवाचः'[5] इति तत्रोदाहरणं विदुः ॥ ४ ॥

नवकौ दशकश्चैकश्चतुर्थस्त्रैष्टुभस्तथा ।
सा स्यात् त्रिष्टुब्विराट्स्थाना 'स्वस्ति न इन्द्रो वृद्धश्रवाः'[4] ॥ ५ ॥

अपि वा दशकौ स्यातां नवकः[6] त्रैष्टुभस्तथा ।
"विराट्स्थानैव सा"[7] 'श्रुधी हवमिन्द्र मा रिषण्यः'[8] ॥ ६ ॥

पादा अदेकादशिनस्त्रयः स्युः
'तुभ्यं श्चोतन्त्यध्रिगो शचीवः'[9] ।
पादश्चतुर्थश्च तथाष्टकः स्याद्
विराड्रूपां तां कथयन्ति सन्तः ॥ ७ ॥

त्रयो यदि द्वादशिनोऽष्टकोऽन्त्यो
ज्योतिष्मतीं तां कवयो वदन्ति ।

---

१. ऋ १,२४,१. २. ऋ १,९४,२. ३. ऋ १,१६२,१२. ४. ऋ १०,२३,५. ५. ऋ १,८३,६. ६. नवकं वि° अ°. ७-७. विराट् स्थाने वा वि° अ°. ८. ऋ २,११,१. ९. ऋ ३,२१,४.

तज्ज्योतिषश्चापि यतोऽष्टकं स्यात्
पुरस्ताज्ज्योतिर्मध्येज्योतिरिति ॥ ८ ॥

'इमे त्वं इन्द्र ते वयं × ये त्वारभ्य चरामसि'[1] ।
इत्यध्ययनमेकेषां मुख्यः पादस्तदाष्टकः[2] ॥ ९ ॥

अस्माकं तु जगत्येषा पुरुष्टुतपदान्विता ।
यद्वा 'यज्ञं मनवे'[3] इति मध्येज्योतिरदाहृता ॥ १० ॥

तृतीयेनापि पादेन मध्येज्योतिरियं भवेत् ।
'तदश्विना भिषजे(जा'[4] इ)ति सा श्रेमाध्वर्युवेदतः ॥ ११ ॥

उपरिष्टाज्ज्योतिरियम् 'अग्निनेन्द्रेण'[5] कीर्तिता ।
पादोऽष्टकश्चतुर्थोऽस्याः 'सोमं पिबतमश्विना'[5] ॥ १२ ॥

पदानि[6] चत्वारि यदाष्टकानि
महाबृहत्युक्तिमियं[7] लभेत ।
आद्यं पदं द्वादशकं च तस्याः
'नमोवाके प्रस्थिते अध्वरे नरा'[8] ॥ १३ ॥

मुख्यावष्टाक्षरौ यस्यास्तृतीयो द्वादशाक्षरः ।
पुनर्द्वावष्टकौ स्यातां यवमध्येति तां विदुः ॥ १४ ॥

सा 'सं मा तपन्त्यभितः सपत्नीरिव पर्शवः'[9] ।
अथाद्यौ दशकौ पादावष्टकाश्च ततस्त्रयः ॥ १५ ॥

पङ्क्त्युत्तरेति तामाहुर्विराट्पूर्वामथापरे ।
'एवेन्द्राग्निभ्यामहावि'[10] त्रिष्टुभो दश कीर्तिताः ॥ १६ ॥

चत्वारो [11]द्वादशाः पादा[11] यदि स्युर्जगती भवेत् ।
'जनस्य गोपा अजनिष्ट(ष्ट'[12] 'इ)मं स्तोमम्'[13] इमे यथा ॥ १७ ॥

अष्टाक्षरास्त्रयः पादा द्वौ च द्वादशकौ यदा ।
महासतो बृहतीरयुक्त[14](क्त 'आ)य' पुरो भानुने(ना'[15] इ)ति सा ॥ १८ ॥

---

१. ऋ १,५७,४. २. °स्तथाष्टका वि²; °स्तथाष्टक अ¹. ३. ऋ ८,१०,२. ४. मा १९,८२. ५ ऋ ८,३५,१. ६. पादानि अ¹. ७. महद्बृह° वि² अ¹. ८. ऋ ८,३५,२३ ९. ऋ १,१०५,८. १०. ऋ ५,८६,१. ११-११. द्वादशपदाः मूको. १२. ऋ ५,११,१. १३. ऋ १,९४,१. १४. °इत्युक्ता वि² अ¹. १५. ऋ ६,४८,१.

अष्टकौ सप्तक. षट्कौ[1] दशकौ[2] नवकस्तथा।
'सूर्यं विषमा संजागि'[3] महापङ्क्तिं वदन्ति ताम् ॥ १९ ॥

षट्स्वष्टकेष्वपि तथा 'अर्ध दुके अर्ध त्रिका'[4]।
'उभे यदिन्द्र रोदसी'[5] जगत्यस्विस्त ईरिता ॥ २० ॥ इति।

[४६]

[6]'वश अश्व्य ऋषि. । इन्द्रो देवता, एकविंश्यादिचतुर्विंश्यन्तानां पृथुश्रवा कानीत, पञ्चविंश्याद्यष्टाविंश्यन्तानां द्वात्रिंशपाश्च वायु । गायत्री छन्द, प्रथमाया पादनिचृत्, पञ्चम्या ककुप्, सप्तम्या बृहती, अष्टम्या अनुष्टुप्, नवम्या सतोबृहती, एकादशी-द्वादश्योर्विपरीतोत्तर प्रगाथ =(बृहती, विपरीता), त्रयोदश्या द्विपदा जगती, चतुर्दश्या बृहती पिपीलिकमध्या, पञ्चदश्या ककुप् न्यङ्कुशिरा षोडश्या विराट्, सप्तदश्या जगती, अष्टादश्या उपरिष्टाद्बृहती, एकोनविंश्या बृहती, विंश्या विषमपदा बृहती, एकविंशीचतुर्विंश्यो पङ्क्ति, द्वाविंश्या संस्तारपङ्क्ति', पञ्चविंश्याद्यष्टाविंश्यन्तानां प्रगाथः=(बृहती, सतोबृहती) त्रिंश्या द्विपदा विराट्, एकत्रिंश्या उष्णिक्, द्वात्रिंश्या पङ्क्ति'।

त्वावंतः पुरूवसो वयमिन्द्र प्रणेतः । स्मसिं स्थातर्हरीणाम् ॥ १ ॥
त्वाऽवंत । पुरुवसो इतिं पुरुऽवसो । वयम् । इन्द्र । प्रनेतारिति प्रऽनेत. । स्मसिं । स्थात । हरीणाम् ॥१॥

वेङ्कट० त्वत्सदृशस्य बहुधन! वयम् इन्द्र! प्रणेत ! स्वभूता स्म हे हरीणाम् अधिष्ठात! ॥ १ ॥

त्वां हि सत्यमंद्रिवो विद्म दातारमिषाम् । विद्म दातारं रयीणाम् ॥ २ ॥
त्वाम् । हि । सत्यम् । अद्रिऽव । विद्म । दातारम् । इषाम् । विद्म । दातारम् । रयीणाम् ॥२॥

वेङ्कट० निगदसिद्धा ॥ २ ॥

आ यस्यं ते महिमानं शतंमूते शतंक्रतो । गीर्भिर्गृणन्तिं कारवः ॥ ३ ॥
आ । यस्यं । ते । महिमानम् । शतंमऽऊते । शतंक्रतो इति शतंऽक्रतो । गीःऽभि । गृणन्तिं । कारवं ॥

वेङ्कट० निगदसिद्धा ॥ ३ ॥

---

१ षट्कौ वि[२] मा[१] २ दशकौ वि[२] मा[१] ३ ऋ १,११०,१०. ४. ऋ १०,५९,१ ५ ऋ १०,१३४,१ ६ ६ नास्ति मूको

सुनीथो घा स मर्त्यो यं मरुतो यमर्यमा । मित्रः पान्त्यद्रुहः ॥ ४ ॥

सुऽनीथः । घ । सः । मर्त्यः । यम् । मरुतः । यम् । अर्यमा । मित्रः । पान्ति । अद्रुहः ॥ ४ ॥

वेङ्कट० प्रशस्तः खलु भवति मनुष्यः, यम् मरुत्प्रभृतयः रक्षन्ति[1] द्रोहवर्जिताः ॥ ४ ॥

दधानो गोमदश्ववत् सुवीर्यमादित्यजूत एधते । सदा राया पुरुस्पृहा ॥ ५ ॥

दधानः । गोऽमत् । अश्वऽवत् । सुऽवीर्यम् । आदित्यऽजूतः । एधते । सदा । राया । पुरुऽस्पृहा ॥

वेङ्कट० धारयन्[2] गवादियुक्तं धनम् आदित्यप्रेरितः पुरुषः[3] वर्धते सर्वदा बहुभिः स्पृहणीयेन धनेन ॥ ५ ॥

[4]इति पञ्चमाष्टके चतुर्थाध्याये प्रथमो वर्गः[4] ॥

तमिन्द्रं दानमीमहे शवसानमभीर्वम् । ईशानं राय ईमहे ॥ ६ ॥

तम् । इन्द्रम् । दानम् । ईमहे । शवसानम् । अभीर्वम् । ईशानम् । रायः । ईमहे ॥ ६ ॥

वेङ्कट० [5]तम् इन्द्रम्[5] देवं[6] धनम् याचामहे बलमाचरन्तम् अभीरुम् । ईशानम् धनानि याचामहे ॥६॥

तस्मिन् हि सन्त्यूतयो विश्वा अभीरवः सचा ।
तमा वहन्तु सप्तयः पुरूवसुं मदाय हरयः सुतम् ॥ ७ ॥

तस्मिन् । हि । सन्ति । ऊतयः । विश्वाः । अभीरवः । सचा ।
तम् । आ । वहन्तु । सप्तयः । पुरुऽवसुम् । मदाय । हरयः । सुतम् ॥ ७ ॥

वेङ्कट० तस्मिन् हि भवन्ति मरुतः सर्वे एव अभीरवः सहायाः । तम् आ वहन्तु अश्वाः बहुधनम् सोममदार्थम् हरणशीलाः सुतम् सोमं प्रति ॥ ७ ॥

यस्ते मदो वरेण्यो य इन्द्र वृत्रहन्तमः ।
य आददिः स्वर्नृभिर्यः पृतनासु दुष्टरः ॥ ८ ॥

यः । ते । मदः । वरेण्यः । यः । इन्द्र । वृत्रहन्ऽतमः ।
यः । आऽददिः । स्वः । नृऽभिः । यः । पृतनासु । दुस्तरः ॥ ८ ॥

वेङ्कट० यः ते मदः वरणीयः, यः च इन्द्र! अतिशयेन शत्रूणां हन्ता, यः च शत्रुभ्यो नृभ्यः सर्वं धनम् आदत्ते, यः च पृतनासु दुष्टरः[7], तस्मै मदाय इति पूर्वत्र सम्बन्धः ॥ ८ ॥

---

१. रक्षति मूको. २. नास्ति अ[1]. ३. प्रणीनः मूको. ४-४. नास्ति मूको. ५-५. नास्ति अ[1]. ६. देवं मूको. ७. दुष्टरः मूको.

यो दुष्टरो विश्ववार श्रवाय्यो वाजेष्वस्ति तरुता ।
स नः शविष्ठ सवना वसो गहि गमेम गोमति व्रजे ॥ ९ ॥

यः । दुस्तरः । विश्वऽवार । श्रवाय्यः । वाजेषु । अस्ति । तरुता ।
सः । नः । शविष्ठ । सवना । आ । वसो इति । गहि । गमेम । गोऽमति । व्रजे ॥ ९ ॥

वेङ्कट० यः दुष्टरः[1] विश्वैर्वरणीय! श्रवणीयः सङ्ग्रामेषु भवति तारकः, सः त्वं बलवत्तम! अस्माकं सवनानि आ गच्छ। वासयितः! गच्छेम वयं गोमन्तं व्रजम्[2] ॥ ९ ॥

गव्यो षु णो यथा पुराश्वयोत रथया । वरिवस्य महामह ॥ १० ॥

गव्यो इति । सु । नः । यथा । पुरा । अश्वऽया । उत । रथऽया । वरिवस्य । महाऽमह ॥ १० ॥

वेङ्कट० अस्माकं गवादीनामिच्छया गवादीन् अस्मभ्यं दातुं हे महाधन! परिचर अस्मान् उपागच्छ यथापुरम् इति ॥ १० ॥

[3]इति षष्ठाष्टके चतुर्थाध्याये द्वितीयो वर्गः[3] ॥

नहि ते शूर राधसोऽन्तं विन्दामि सत्रा ।
दशस्या नो मघवन्नू चिदद्रिवो धियो वाजेभिराविथ ॥ ११ ॥

नहि । ते । शूर । राधसः । अन्तम् । विन्दामि । सत्रा ।
दशस्य । नः । मघऽवन् । नु । चित् । अद्रिऽवः । धियः । वाजेभिः । आविथ ॥ ११ ॥

वेङ्कट० नहि ते शूर! धनस्य पर्यन्तम् बुद्ध्या[4] विन्दामि महतः। प्रयच्छ अस्मभ्यम् मघवन्! क्षिप्रमेव। वज्रिन्! कर्माणि अन्नैः रक्ष[5] ॥ ११ ॥

य ऋष्वः श्रावयत्सखा विश्वेत् स वेद जनिमा पुरुष्टुतः ।
तं विश्वे मानुषा युगेन्द्रं हवन्ते तविषं यतस्रुचः ॥ १२ ॥

यः । ऋष्वः । श्रवयत्ऽसखा । विश्वा । इत् । सः । वेद । जनिम । पुरुऽस्तुतः ।
तम् । विश्वे । मानुषा । युगा । इन्द्रम् । हवन्ते । तविषम् । यतऽस्रुचः ॥ १२ ॥

वेङ्कट० यः दर्शनीयः श्रावयत्सखा धनप्रदानेन आत्मानं श्रावयति[6], सः विश्वानि एव जातानि भूतानि वेद बहुभिः स्तुतः। तम् सर्वे मानुषान् कालान् सर्वेषु कालेषु इन्द्रम् हवन्ते वृद्धम् हस्तेषु यतस्रुचः ॥ १२ ॥

---

१. दुष्टरः भ°. २. प्रजाम् मूको. ३-३. नास्ति मूको. ४. बुद्धाः वि°. ५. रक्षम् मूको.
६. भव° मूको.

स नो वाजेष्वविता पुरूवसुः पुरःस्थाता मघवा वृत्रहा भुवत् ॥ १३ ॥

सः । नः । वाजेषु । अविता । पुरुऽवसुः । पुरःऽस्थाता । मघऽवा । वृत्रऽहा । भुवत् ॥ १३ ॥

वेङ्कट० सः अस्माकं सङ्ग्रामेषु रक्षिता बहुधनः अग्रतः स्थाता मघवान् वृत्रहा भवतु इति। 'जगती द्विपदेयम् इति' ॥ १३ ॥

अभि वो वीरमन्धसो मदेषु गाय गिरा महा विचेतसम् ।
इन्द्रं नाम श्रुत्यं शाकिनं वचो यथा ॥ १४ ॥

अभि । वः । वीरम् । अन्धसः । मदेषु । गाय । गिरा । महा । विऽचेतसम् ।
इन्द्रम् । नाम । श्रुत्यम् । शाकिनम् । वचः । यथा ॥ १४ ॥

वेङ्कट० अभि गायत यूयम् वीरम् सोमस्य मदेषु स्तुत्या महत्या प्रमतिम् इन्द्रम् नमयितारम् शत्रूणां श्रवणीयम् शक्तम्। यथा युष्माकम् वचः प्रतिभाति गायत्र्या त्रिष्टुभा चेति ॥१४॥

ददी रेक्णस्तन्वे ददिर्वसु ददिर्वाजेषु पुरुहूत वाजिनम् । नूनमथ ॥ १५ ॥

ददिः । रेक्णः । तन्वे । ददिः । वसु । ददिः । वाजेषु । पुरुऽहूत । वाजिनम् । नूनम् । अथ ॥

वेङ्कट० दाता धनम् आत्मने, ददिः पुत्राय च धनम्, ददिः सङ्ग्रामेषु। हे पुरुहूत! अन्नवन्तं रयिं त्वं मह्यं[2] क्षिप्रम् इदानीमेव ॥ १५ ॥

'इति षष्ठाष्टके चतुर्थाध्याये तृतीयो वर्गः' ॥

विश्वेषामिरज्यन्तं वसूनां सासह्वांसं चिदस्य वर्पसः । कृपयतो नूनमत्यथ ॥ १६ ॥

विश्वेषाम् । इरज्यन्तम् । वसूनाम् । ससह्वांसम् । चित् । अस्य । वर्पसः ।
कृपऽयतः । नूनम् । अति । अथ ॥ १६ ॥

वेङ्कट० सर्वेषां धनानाम् ईशानम् अभिभवितारम् च अस्य वारकस्य[4] शत्रोः कल्पयतः युद्धं कुर्वाणस्य रयिम् इदानीम् अति प्रयच्छ। क्षिप्रं महान्तं रयिं प्रयच्छेत्यर्थः ॥ १६ ॥

महः सु वो अरमिषे स्तवामहे मीळ्हुषे अरंगमाय जग्मये ।
यज्ञेभिर्गीर्भिर्विश्वमनुषां मरुतामियक्षसि गाये त्वा नमसा गिरा ॥ १७ ॥

महः । सु । वः । अरम् । इषे । स्तवामहे । मीळ्हुषे । अरम्ऽगमाय । जग्मये ।
यज्ञेभिः । गीःऽभिः । विश्वऽमनुषाम् । मरुताम् । इयक्षसि । गाये । त्वा । नमसा । गिरा ॥१७॥

१-१. जगते द्विपदे इति मूको. २. मम अ[2]. ३-३. नास्ति मूको. ४. पारकस्य मूको.

वेङ्कट० महतः 'सु वः गमनम्[1] सुष्ठु इच्छामि[2]। स्तवामहे सेवन्ते पर्याप्तगमनाय गमनशीलाय तुभ्यं यज्ञैः स्तुतिभिश्च। सर्वेषां मनुष्याणाम् इज्यसे मरुताम् सम्बन्धी। तं त्वामहं गाये[3] नमस्कारेण सह गिरा ॥ १७ ॥

ये पातर्यन्ते अज्मभिर्गिरीणां स्नुभिरेषाम् ।
यज्ञं महिष्वणीनां सुम्नं तुविष्वणीनां प्राध्वरे ॥ १८ ॥

ये । पातर्यन्ते । अज्मऽभिः । गिरीणाम् । स्नुऽभिः । एषाम् ।
यज्ञम् । महिऽस्वनीनाम् । सुम्नम् । तुविऽस्वनीनाम् । प्र । अध्वरे ॥ १८ ॥

वेङ्कट० ये पतन्ति बलैः उदकैः मेघानां प्रस्रवद्भिः। एषाम् मरुतां तव सहायानाम् यज्ञम् कुर्मः महास्वनानाम्। मम सुम्नम् सुखं प्राप्नुयाम[4]। तेषां प्रवृद्धं स्वभूतं प्रापयामो वा सुखकरं हविः यज्ञे ॥ १८ ॥

प्रभङ्गं दुर्मतीनामिन्द्र शविष्ठा भर ।
रयिमस्मभ्यं युज्यं चोदयन्मते ज्येष्ठं चोदयन्मते ॥ १९ ॥

प्रऽभङ्गम् । दुःऽमतीनाम् । इन्द्र । शविष्ठ । आ । भर ।
रयिम् । अस्मभ्यम् । युज्यम् । चोदयत्ऽमते । ज्येष्ठम् । चोदयत्ऽमते ॥ १९ ॥

वेङ्कट० प्रकर्षेण भञ्जकम् दुर्मतीनाम् इन्द्र! बलवत्तर! आ भर रयिम् अस्मभ्यम् योग्यम्। यस्य बुद्धिः सर्वदा धनं प्रेरयति स चोदयन्मतिः[5]। प्रशस्तम् ॥ १९ ॥

सनितः सुसनितरुग्र चित्र चेतिष्ठ सूनृत ।
प्रासहा सम्राट् सहुरिं सहन्तं भुज्युं वाजेषु पूर्व्यम् ॥ २० ॥

सनितरिति । सुऽसनितः । उग्र । चित्र । चेतिष्ठ । सूनृत ।
प्रऽसहा । सम्ऽराट् । सहुरिम् । सहन्तम् । भुज्युम् । वाजेषु । पूर्व्यम् ॥ २० ॥

वेङ्कट० सुष्ठु दातः! उद्गूर्ण! चित्र! अत्यन्तं चेतयितः![6] सुसत्य! प्रसह[7] हे सम्राट्! सहनशीलम् सहन्तम् भोजयितारं रयिम् सङ्ग्रामेषु मुख्यम् अस्मभ्यम् आभरेति[8] ॥ २० ॥

[9]इति पञ्चाष्टके चतुर्थाध्याये चतुर्थो वर्गः[9] ॥

1-1. सपगमनम् वि[1]; सुपग° अ[1]. 2. विच्छामि मूको. 3. कायेन मूको. 4. प्राप्नुयां मूको. 5. चोदयन्मतिम् मूको. 6. चेतितः मूको. 7. ऽस मूको. 8. अभरेति अ[1]. 9-9. नास्ति मूको.

आ स एतु य ईवदाँ अदेवः पूर्तमाददे ।
यथा चिद्वशो अश्व्यः पृथुश्रवसि कानीतेऽस्या व्युष्याददे ॥ २१ ॥

आ । सः । एतु । यः । ईवत् । आ । अदेवः । पूर्तम् । आऽददे ।
यथा । चित् । वशः । अश्व्यः । पृथुऽश्रवसि । कानीते । अस्याः । विऽउषि । आऽददे ॥२१॥

वेङ्कट० शौनकः— "वशायाश्व्याय[1] मत् प्रादात् कानीतस्तु पृथुश्रवाः[2] ॥
तदत्र संस्तुतं दानम् आ स इत्येवमादिभिः ।" (बृदे ६,७९;८०) इति ॥

आ गच्छतु सः समर्थः, यः अदेवः सन् कस्माच्चित् आढ्यात् गमनयुक्तम्[3] पूर्तम्[4] गोधनम् आदत्ते । देवश्चेत् माययाऽप्यादातुम्[5] अर्हति । मनुष्यः कश्चित् आगच्छतु इति । यथा चित् वशः[6] अश्वस्य पुत्रः पृथुश्रवसि[7] कनीतस्य[8] पुत्रे कन्यायाः वा पुत्रे अस्याः उषसो व्युच्छमे[9] आददे ॥ २१ ॥

षष्टिं सहस्राश्व्यस्यायुतासनमुष्ट्राणां विंशतिं शता ।
दश श्यावीनां शता दश त्र्यरुषीणां दश गवां सहस्रा ॥ २२ ॥

षष्टिम् । सहस्रा । अश्व्यस्य । अयुता । असनम् । उष्ट्राणाम् । विंशतिम् । शता ।
दश । श्यावीनाम् । शता । दश । त्रिऽअरुषीणाम् । दश । गवाम् । सहस्रा ॥ २२ ॥

वेङ्कट० षष्टिम्[10] सहस्राणि अयुतानि च अभजम्, उष्ट्राणाम् च विंशतिम्[11] शतानि, दश च शतानि श्याववर्णानां वडवानाम्, दश च त्र्यरुषीणाम्[12] "त्रीणि आरोचमानानि[13] श्वेतानि[13]" यासाम्, ऊरुपृष्ठे[14] ककुदि च श्वेतानाम् इत्यर्थः । दश च गवाम् सहस्राणि इति ॥ २२ ॥

दश श्यावा ऋधद्रयो वीतवारास आशवः । मथ्रा नेमिं नि वावृतुः ॥ २३ ॥

दश । श्यावाः । ऋधत्ऽरयः । वीतऽवारासः । आशवः । मथ्राः । नेमिम् । नि । ववृतुः ॥ २३ ॥

वेङ्कट० दश [16]"श्याववर्णाः प्रवृद्धगतय.[16] क्रान्तवक्त्राः[17] [18]"क्षिप्रा मथनशीला.[18] रथस्य नेमिम् नि वर्तयन्ति ॥ २३ ॥

दानासः पृथुश्रवसः कानीतस्य सुराधसः ।
रथं हिरण्ययं ददन्मंहिष्ठः सूरिरभूद्वर्षिष्ठमकृत श्रवः ॥ २४ ॥

---

१. 'श्वाय मूको. २. पृथवश्रा. मूको. ३. तु. ऋ ५,४९,५ भाष्यम्; °युक्तः मूको. ४. पूर्वं मूको. ५. °प्यादातुम् मूको. ६. विश: मूको. ७. पृथुश्रव मूको. ८. कनीतसस्य मूको. ९. °च्छते मूको. १०. नास्ति अ'. ११. विं मूको. १२ त्र्यरुषीणाम् मूको १३-१३. रोच° मूको. १४. इत्येतानि मूको. १५. कुरुनिष्ठे मूको. १६-१६ °र्णाः ... गत° मूको. १७. क्रान्ता भाषा मूको. १८-१८. क्षिप्रम° मूको.

दानासः । पृथुऽश्रवसः । कानीतस्य । सुऽराधसः ।
रथम् । हिरण्ययम् । ददत् । मंहिष्ठः । सूरिः । अभूत् । वर्षिष्ठम् । अकृत । श्रवः ॥ २४ ॥

वेङ्कट० तानि इमानि दत्तानि पृथुश्रवसः कानीतस्य सुधनस्य । मह्यम् हिरण्मयम् रथम् प्रयच्छन् अत्यन्तदाता प्राज्ञः अभूत् । पृथुतमाम् च कीर्तिम् अकृत आत्मन इति ॥ २४ ॥

आ नो वायो महे तने याहि मखाय पाजसे ।
वयं हि ते चकृमा भूरि दावने सद्यश्चिन्महि दावने ॥ २५ ॥

आ । नः । वायो इति । महे । तने । याहि । मखाय । पाजसे ।
वयम् । हि । ते । चकृम । भूरि । दावने । सद्यः । चित् । महि । दावने ॥ २५ ॥

वेङ्कट० आ याहि अस्मान् वायो ! महते धनाय महनीयाय च बलाय, उभयं प्रदातुम् । वयम् हि ते कृतवन्तः कर्म भूरेः दात्रे सद्यः एव महतः दात्रे ॥ २५ ॥

[1]इति षष्ठाष्टके चतुर्थाध्याये पञ्चमो वर्गः[1] ॥

यो अश्वेभिर्वहते वस्त उस्रास्त्रिः सप्त सप्ततीनाम् ।
एभिः सोमेभिः सोमसुद्भिः सोमपा दानाय शुक्रपूतपाः ॥ २६ ॥

यः । अश्वेभिः । वहते । वस्ते । उस्राः । त्रिः । सप्त । सप्ततीनाम् ।
एभिः । सोमेभिः । सोमसुत्ऽभिः । सोमऽपाः । दानाय । शुक्रपूतऽपाः ॥ २६ ॥

वेङ्कट० यः पृथुश्रवाः अश्वेभिः गच्छति, वस्ते च गाः, [2]दासीभिः च[2] गच्छति । गवां [3]सङ्ख्या त्रिः सप्त[3] इति । सप्ततीनाम् त्रिः सप्त गा वस्त इति । एभिः सोमैः सोमसुद्भिः च ग्रावभिः सह हे सोमस्य पातः![4] अस्मभ्यम् दानाय हे पूतस्य सोमस्य पातः! । उत्तरत्र सम्बन्धः ॥ २६ ॥

यो म इमं चिदु त्मनामन्दच्चित्रं दावने ।
अरट्वे अक्षे नहुषे सुकृत्वनि सुकृत्तराय सुक्रतुः ॥ २७ ॥

यः । मे । इमम् । चित् । ऊँ इति । त्मना । अमन्दत् । चित्रम् । दावने ।
अरट्वे । अक्षे । नहुषे । सुऽकृत्वनि । सुकृत्ऽतराय । सुऽक्रतुः ॥ २७ ॥

वेङ्कट० यः मह्यं स्वयमेव अमन्दत्[6] चित्रम् रयिं दातुम्, श्रद्धाम् अकरोत् । अरट्वादयः पृथुश्रवसः अध्यक्षाः, तान् अन्वशात्— अस्मै नयतेति सुकृतराय[7], जन्मान्तरे[8] सुकर्मेति ॥ २७ ॥

---

१. अर्थस्य कृते ऋ २,९,२ भाष्यमपि द्र.　　२-२. नास्ति मूको.　　३-३. ता मूको.
४-४. सङ्ख्येति स° मूको.　　५. पूतस्य पातारम् मूको.　　६. °न्दम् मूको.　　७. सुकृत° मूको.
८. जन्मातरे मूको.

उचथ्ये॑ वपु॑षि॒ यः स्व॒राळु॒त वा॑यो घृत॒स्नाः ।
अश्वे॑षितं॒ रजे॑षितं॒ शुने॑षितं॒ प्राज्म॒ तदि॒दं नु तत् ॥ २८ ॥

उ॒च॒थ्ये॑ । वपु॑षि । यः । स्व॒ऽराट् । उ॒त । वा॒यो॒ इति॑ । घृ॒त॒ऽस्नाः ।
अश्व॑ऽइषितम् । रजः॑ऽइषितम् । शुना॑ऽइषितम् । प्र । अज्म॑ । तत् । इ॒दम् । नु । तत् ॥ २८ ॥

वेङ्कट० उचथ्ये वपुषि च अध्यक्षयोः यः स्वराट् पृथुश्रवाः । यद्वा भरद्वाजादिषु[१] षट्सु राजसु[२] यः स्वाराज्यं करोति घृतवत् शुद्धः, तस्मात् अश्वादिभिः आनीतम्[३] । रजःशब्देन गर्दभः उच्यते, उष्ट्रो वा । तत् अन्नं प्राप्नुमः । तथेदमिति वायवे निर्दिशति—'इदम् नु तत् वायो!' इति ॥ २८ ॥

अध॑ प्रि॒यमि॑षि॒राय॑ ष॒ष्टिं स॒हस्रा॑सनम् । अश्वा॑ना॒मिन्न वृष्णा॑म् ॥ २९ ॥

अध॑ । प्रि॒यम् । इ॒षि॒राय॑ । ष॒ष्टिम् । स॒हस्रा॑ । अ॒स॒न॒म् । अश्वा॑नाम् । इत् । न । वृष्णा॑म् ॥ २९ ॥

वेङ्कट० इदानीं प्रेरयित्रे राज्ञे अन्नेयम् सहस्राणाम् षष्टिम् ततोऽहं लब्धवान् अस्मि अश्वानाम् इव बलीवर्दानां च ॥ २९ ॥

गावो॒ न यू॒थमुप॑ यन्ति॒ वध्र॑य॒ उप॒ मा य॑न्ति॒ वध्र॑यः ॥ ३० ॥

गावः॑ । न । यू॒थम् । उप॑ । य॒न्ति॒ । वध्र॑यः । उप॑ । मा॒ । आ । य॒न्ति॒ । वध्र॑यः ॥ ३० ॥

वेङ्कट० यथा सङ्गवे गावः यूथपम् उप गच्छन्ति, एवं मां पृथुश्रवसा दत्ताः छिन्नवृषणा बलीवर्दाः उपतिष्ठन्ति ॥ ३० ॥

अध॒ यच्चार॑थे ग॒णे श॒तमुष्ट्राँ॒ अचि॑क्रदत् । अध॒ श्वित्ने॑षु विंश॒तिं श॒ता ॥ ३१ ॥

अध॑ । यत् । चार॑थे । ग॒णे । श॒तम् । उष्ट्रा॑न् । अचि॑क्रदत् । अध॑ । श्वित्ने॑षु । विं॒श॒तिम् । श॒ता ॥

वेङ्कट० अथ यथा चारथे मह्यं सञ्चार्यमाणे प्रेर्यमाणे धनगणे शतम् उष्ट्रान् अशब्दयत् प्रदानाय जुहाव । अथ श्वितेषु[४] श्वेतवर्णेषु गोषु विंशतिम् च शतानि अचिक्रदत् इति ॥ ३१ ॥

श॒तं दा॒से ब॑ल्बू॒थे विप्र॒स्तरु॑क्ष॒ आ द॑दे ।
ते ते॑ वायवि॒मे जना॒ मद॒न्तीन्द्र॑गोपा॒ मद॑न्ति दे॒वगो॑पाः ॥ ३२ ॥

श॒तम् । दा॒से । ब॒ल्बू॒थे । विप्रः॑ । तरु॑क्षे । आ । द॒दे॒ ।
ते । ते॒ । वा॒यो॒ इति॑ । इ॒मे । जनाः॑ । मद॑न्ति । इन्द्र॑ऽगोपाः । मद॑न्ति । दे॒वऽगो॑पाः ॥ ३२ ॥

१. भरद्वादि° मूको. २. रजसु मूको. ३. आरानीतम् मूको. ४-४. दनुष्काद्यो मूको. ५. श्विषेषु मूको.

वेङ्कट० शतम् दासे बल्बूथे[1] धनस्य तारके राज्ञा प्रदिष्टस्य दातरि मेधावी वशः गोऽश्वान्[2] आ ददे। अथ परोक्षवद्वाद—ते ते इति। हे वायो! तव स्वभूता. ते इमे जनाः इन्द्रेण देवैः च गुप्ताः लब्धधनाः अस्मात्[3] राज्ञः मदन्ति इति ॥ ३२ ॥

अध स्या योषणा मही प्रतीची वशमश्व्यम् । अधिरुक्मा वि नीयते ॥ ३३ ॥

अध । स्या । योषणा । मही । प्रतीची । वशम् । अश्व्यम् । अधिऽरुक्मा । वि । नीयते ॥३३॥

वेङ्कट० अथ सेयं कन्या मंहनीया अभिमुखी वशम् अश्व्यम्[4] अधिरूढरुक्माभरणा राज्ञा प्रदिष्टा वि नीयते, मां प्रत्यानयन्ति[5] वा चेति ॥ ३३ ॥

[6]इति पञ्चाष्टके चतुर्थाध्याये षष्ठो वर्गः[6] ॥

[४७]

[1]त्रित आप्त्य ऋषिः। आदित्या देवता, चतुर्दशाद्यष्टादशयन्तानाम् आदित्योषसः। महापङ्क्तिः छन्दः[1]।

महि वो महतामवो वरुण मित्र दाशुषे ।
यमादित्या अभि द्रुहो रक्षथा नेमघं नशदनेहसो व ऊतयः सुऊतयो व ऊतयः ॥१॥

महि । वः । महताम् । अवः । वरुण । मित्र । दाशुषे । यम् । आदित्याः । अभि । द्रुहः ।
रक्षथ । न । ईम् । अघम् । नशत् । अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ १ ॥

वेङ्कट० त्रित आप्त्य.। महद् वः महताम् पालनम् यजमानाय हे वरुणादयः!। यम् दाश्वांसं हे आदित्याः! द्रोहाद् अभि रक्षथ, न एनम् पापम् प्राप्नोति। अनुपद्रवाणि युष्माकं रक्षणानि, सुरक्षणानि युष्माकं रक्षणानीति ॥ १ ॥

विदा देवा अघानामादित्यासो अपाकृतिम् ।
पक्षा वयो यथोपरि व्य१स्मे शर्म यच्छतानेहसो व ऊतयः सुऊतयो व ऊतयः ॥२॥

विद । देवाः । अघानाम् । आदित्यासः । अपऽआकृतिम् । पक्षा । वयः । यथा । उपरि ।
वि । अस्मे इति । शर्म । यच्छत । अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ २ ॥

वेङ्कट० हे देवा.! आदित्याः! पापानाम् अपाकरणप्रकारम् जानीथ। पक्षौ यथा पक्षिणः पोतानाम् उपरि कुर्वन्ति, तथा अस्मासु सुखम् वि यच्छत ॥ २ ॥

१. बल्ये मूको. २. गोश्व वि[२]; गोऽश्व अ[१]. ३. अस्मान् मूको. ४. अर्थं मूको. ५. प्रत्यापयन्ती मूको. ६-६. नास्ति मूको.

व्य१स्मे अधि शर्म तत् पक्षा वयो न यन्तन ।
विश्वानि विश्ववेदसो वरूथ्या मनामहेऽनेहसो व ऊतयः सुऊतयो व ऊतयः ॥ ३ ॥

वि । अस्मे इति । अधि । शर्म । तत् । पक्षा । वयः । न । यन्तन । विश्वानि । विश्वऽवेदसः ।
वरूथ्या । मनामहे । अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ ३ ॥

वेङ्कट० वि यच्छत अस्मासु अधि तत् सुखं पक्षाविव[1] पक्षिणः अण्डानाम् उपरि । विश्वानि हे विश्वधनाः! गृहहितानि[2] धनानि याचामहे ॥ ३ ॥

यस्मा अरासत क्षयं जीवातुं च प्रचेतसः ।
मनोर्विश्वस्य घेदिम आदित्या राय ईशतेऽनेहसो व ऊतयः सुऊतयो व ऊतयः ॥४॥

यस्मै । अरासत । क्षयम् । जीवातुम् । च । प्रऽचेतसः । मनोः । विश्वस्य । घ । इत् ।
इमे । आदित्याः । रायः । ईशते । अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ ४ ॥

वेङ्कट० यस्मै प्रयच्छन्ति निवासम्[3] अन्नम् च प्रचेतसः, तस्मै प्रयच्छन्ति । सर्वस्य मनुष्यस्य इमे आदित्याः धनस्य च ईश्वरा भवन्ति ॥ ४ ॥

परि णो वृणजन्नघा दुर्गाणि रथ्यो यथा ।
स्यामेदिन्द्रस्य शर्मण्यादित्यानामुतावस्यनेहसो व ऊतयः सुऊतयो व ऊतयः ॥५॥

परि । नः । वृणजन् । अघा । दुःऽगानि । रथ्यः । यथा । स्याम । इत् । इन्द्रस्य । शर्मणि ।
आदित्यानाम् । उत । अवसि । अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ ५ ॥

वेङ्कट० परि वर्जयन्तु अस्मान् पापानि, यथा दुर्गाणि सारथयः परि वर्जयन्ति । स्याम एव इन्द्रस्य सुखे, अपि च अस्माकम् आदित्यानाम् रक्षणे ॥ ५ ॥

[4]इति पञ्चाष्टके चतुर्थाध्याये सप्तमो वर्गः[4] ॥

परिह्वृतेदना जनो युष्मादत्तस्य वायति ।
देवा अदभ्रमाश वो यमादित्या अहेतनानेहसो व ऊतयः सुऊतयो व ऊतयः ॥६॥

परिऽह्वृता । इत् । अना । जनः । युष्माऽदत्तस्य । वायति । देवाः । अदभ्रम् । आश ।
वः । यम् । आदित्याः । अहेतन । अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ ६ ॥

---

१. पक्षावि मूको. २. गृहं हितानि मूको. ३. इति वासम् मूको. ४-४. नास्ति मूको.

वेङ्कट० परिपीडितेनैव अना प्राणेन मुक्त जन[1] युष्माभि दत्त गच्छति। देवा ! [2]आश व[3] अनर्घ्यं धन युष्मदीय स लभते यम् प्राप्नुय[4] ॥ ६ ॥

न तं तिग्मं चन त्यजो न द्रासदभि तं गुरु ।
यस्मा उ शर्म सप्रथ आदित्यासो अराध्वमनेहसो व ऊतयः सुऊतयो व ऊतयः ॥७॥

न । तम् । तिग्मम् । चन । त्यजः । न । द्रासत् । अभि । तम् । गुरु । यस्मै । ऊँ इति । शर्म । सुऽप्रथः । आदित्यासः । अराध्वम् । अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥

वेङ्कट० न ताम् तीक्ष्णम् त्यज अभिगच्छति। 'त्यज' (निघ २,१३) इति क्रोधनाम, अत्र तु आयुधवचन[5]। त्यजतिस्तजते निर्दिशतिकर्मण। न अपि अभि गच्छति गुरु गदादि तम्। द्रा[6] इति कुत्सितगमनकर्मा। यस्मै[6] सुख सर्वत पृथु हे आदित्या ! अराध्वम्[7] अदत्त ॥ ७ ॥

युष्मे देवा अपि ष्मसि युध्यन्त इव वर्मसु ।
यूयं महो न एनसो यूयमर्भादुरुष्यतानेहसो व ऊतयः सुऊतयो व ऊतयः ॥ ८ ॥

युष्मे इति । देवाः । अपि । स्मसि । युध्यन्तःऽइव । वर्मऽसु । यूयम् । महः । नः । एनसः । यूयम् । अर्भात् । उरुष्यत । अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ ८ ॥

वेङ्कट० युष्मासु देवा ! वयम् अपि भवेम, यथा युध्यन्त भटा कवचेषु अपि भवन्ति। यूयम् महत अस्माद् पापात् यूयम् अल्पात् च अस्मात् रक्षतति ॥ ८ ॥

अदितिर्न उरुष्यत्वदितिः शर्म यच्छतु ।
माता मित्रस्य रेवतोऽर्यम्णो वरुणस्य चानेहसो व ऊतयः सुऊतयो व ऊतयः ॥९॥

अदितिः । नः । उरुष्यतु । अदितिः । शर्म । यच्छतु । माता । मित्रस्य । रेवतः । अर्यम्णः । वरुणस्य । च । अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ ९ ॥

वेङ्कट० निगदसिद्धेति ॥ ९ ॥

यद् देवाः शर्म शरणं यद् भद्रं यदनातुरम् ।
त्रिधातु यद् वरूथ्यं१ तदस्मासु वि यन्तनानेहसो व ऊतयः सुऊतयो व ऊतयः ॥१०॥

यत् । देवाः । शर्म । शरणम् । यत् । भद्रम् । यत् । अनातुरम् । त्रिऽधातु । यत् । वरूथ्यम् । तत् । अस्मासु । वि । यन्तन । अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ १० ॥

---

१ नाने मूको. २ २. वैप १,४८१d द ३ प्राप्नुत मूको. ४. आयुधव° अ[1]. ५ द्राव् वि[1] ६ यस्मै ७. भायथम् मूको.

वेङ्कट० यत् देवाः! 'सुखं शरणीयम्', यत् भजनीयम्, यत् रोगरहितम् त्रिगुणम्, यत् च वरूपहितं धनम्, तत् अस्मासु वि यच्छत ॥ १० ॥

'इति षष्ठाष्टके चतुर्थाध्याये अष्टमो वर्गः' ॥

आदि॑त्या॒ अव॒ हि ख्यता॒धि॒ कूला॑दिव॒ स्पशः॑ ।
सु॒ती॒र्थमर्व॑तो य॒थानु॑ नो नेषथा सु॒गम॑ने॒हसो॑ व ऊ॒तयः॑ सु॒ऊ॒तयो॑ व ऊ॒तयः॑ ॥ ११ ॥

आदि॑त्याः । अव॑ । हि । ख्यत॑ । अधि॑ । कूला॑त्ऽइव । स्पशः॑ । सु॒ऽती॒र्थम् । अर्व॑तः । य॒था । अनु॑ । नः॒ । ने॒ष॒थ॒ । सु॒ऽगम् । अ॒ने॒हसः॑ । वः॒ । ऊ॒तयः॑ । सु॒ऽऊ॒तयः॑ । वः॒ । ऊ॒तयः॑ ॥ ११ ॥

वेङ्कट० आदित्या.! अव हि पश्यत अधःस्थितान् अस्मान्, यथा कूले तिष्ठथ.' पश्यति ज्ञातोदकं जिज्ञासुः। शोभनतीर्थमिव देशम् अश्वान् सादिनः, अस्मान्' सुखं पन्थानम् अनु नयथ ॥ ११ ॥

नेह भ॒द्रं र॑क्ष॒स्विने॒ नाव॒यै नोप॒या उ॒त ।
गवे॑ च भ॒द्रं धे॒नवे॑ वी॒राय॑ च श्रवस्य॒तेऽने॒हसो॑ व ऊ॒तयः॑ सु॒ऊ॒तयो॑ व ऊ॒तयः॑ ॥ १२ ॥

न । इ॒ह । भ॒द्रम् । र॒क्ष॒स्विने॑ । न । अ॒व॒ऽयै । न । उ॒प॒ऽयै । उ॒त । गवे॑ । च॒ । भ॒द्रम् । धे॒नवे॑ । वी॒राय॑ । च॒ । श्र॒व॒स्य॒ते । अ॒ने॒हसः॑ । वः॒ । ऊ॒तयः॑ । सु॒ऽऊ॒तयः॑ । वः॒ । ऊ॒तयः॑ ॥ १२ ॥

वेङ्कट० न इह भद्रम् बलवते, न अपि अवगच्छते बाधकाय, न च उपागच्छते युष्माभिः दीयते। गवे च धेनवे च भद्रम्, वीराय च श्रवस्यते' अस्मदीयाय भवति युष्मद्दत्तमिति ॥ १२ ॥

यदा॒विर्यद॑पी॒च्यं१॒॑ देवा॑सो॒ अस्ति॑ दुष्कृ॒तम् ।
त्रि॒ते तद्विश्व॑मा॒प्त्य आ॒रे अ॒स्मद् द॑धात॒नाने॒हसो॑ व ऊ॒तयः॑ सु॒ऊ॒तयो॑ व ऊ॒तयः॑ ॥ १३ ॥

यत् । आ॒विः । यत् । अ॒पी॒च्य॑म् । देवा॑सः । अस्ति॑ । दुः॒ऽकृ॒तम् । त्रि॒ते । तत् । विश्व॑म् । आ॒प्त्ये । आ॒रे । अ॒स्मत् । द॒धा॒त॒न॒ । अ॒ने॒हसः॑ । वः॒ । ऊ॒तयः॑ । सु॒ऽऊ॒तयः॑ । वः॒ । ऊ॒तयः॑ ॥ १३ ॥

वेङ्कट० यत् आविर्भूतम् यत् च अन्तर्हितम् हे देवा.! अस्ति दुष्कृतम्, त्रिते तत् विश्वम् आप्त्ये' अस्मत्तो दूरे स्थापयत ॥ १३ ॥

यच्च॒ गोषु॑ दु॒ष्ष्वप्न्यं॒ यच्चा॒स्मे दु॑हितर्दिवः ।
त्रि॒ताय॒ तद्वि॑भावर्या॒प्त्याय॒ परा॑ वहाने॒हसो॑ व ऊ॒तयः॑ सु॒ऊ॒तयो॑ व ऊ॒तयः॑ ॥ १४ ॥

१-१. सुखश्रवणीयाः मूको. १-२. नास्ति मूको. ३. °थद वि'. ४. अस्थान् वि'; अश्वान् अ'. ५. श्रयस्यते मूको. ६. आप्त्यै वि'; आप्ते अ'.

यत् । च । गोषु॑ । दुःऽस्वप्न्य॑म् । यत् । च् । अस्मे इति॑ । दुहितः । दिवः । त्रितार्य । तत् ।
विभाऽवरि । आप्त्याय॑ । परा॑ । वह । अनेहस॑ः । वः । ऊतय॑ः । सुऽऊतय॑ः । वः । ऊतय॑ः ॥१४॥

वेङ्कट० पञ्च (१४-१८) उपस्या भवन्ति । यत् च गवामनर्थसूचकम् दुस्स्वप्न्यम्[१], यत् च अस्मासु दिवः दुहितः!, तत् अपां पुत्राय त्रिताय उषः! परा वह इति ॥ १४ ॥

निष्कं॑ वा घा कृणवते॒ स्रजं॑ वा दुहितर्दिवः ।
त्रिते दुष्ष्वप्न्यं॒ सर्व॒माप्त्ये परि॑ दद्मस्यनेहसो॑ व ऊतय॑ः सुऊतयो॑ व ऊतय॑ः ॥ १५ ॥

निष्क॑म् । वा । घ । कृणवते । स्रज॑म् । वा । दुहितः । दिवः । त्रिते । दुःऽस्वप्न्य॑म् । सर्व॑म् ।
आप्त्ये । परि॑ । दद्मसि । अनेहस॑ः । वः । ऊतय॑ः । सुऽऊतय॑ः । वः । ऊतय॑ः ॥ १५ ॥

वेङ्कट० निष्कम् वा खलु कुर्वाणाय सुवर्णकाराय स्रजम्[२] वा स्वप्ने मह्यं यत् अघम् तत् दिवः दुहितः! त्रिते सर्वम् आप्त्ये निष्कृष्य दद्म.[३] ॥ १५ ॥

[४]इति षष्ठाष्टके चतुर्थोऽध्याये नवमो वर्गः[४] ॥

तद॑न्नाय तद॑पसे॒ तं भागमु॑पसेदुषे॑ ।
त्रिताय॑ च द्वि॒ताय॒ चोषो॑ दुष्ष्वप्न्यं॑ वहानेहसो॑ व ऊतय॑ः सुऊतयो॑ व ऊतय॑ः ॥१६॥

तत्ऽअ॑न्नाय । तत्ऽअ॑पसे । तम् । भागम् । उपऽसेदुषे॑ । त्रिताय॑ । च । द्विताय॑ । च ।
उषः । दुःऽस्वप्न्य॑म् । वह । अनेहस॑ः । वः । ऊतय॑ः । सुऽऊतय॑ः । वः । ऊतय॑ः ॥ १६ ॥

वेङ्कट० स्वप्ने भोज्यं भुङ्क्ते, करणीयं च करोति । तदुभयं तथा प्रत्यक्षतो भवति । एवं सति यः तदन्नो भवति यश्च तत्कर्मा भवति त्रितादिः, तस्मै तम्[५] भजनीयम् उभयम् उपगच्छते त्रिताय च द्विताय च अस्मत्तोऽपनीय[६] गमय दुष्ष्वप्न्यम् इति ॥ १६ ॥

यथा॑ क॒लां यथा॑ श॒फं यथ॑ ऋ॒णं सं॒नया॑मसि ।
ए॒वा दु॒ष्ष्वप्न्यं॒ सर्व॒माप्त्ये सं न॑यामस्यनेहसो॑ व ऊतय॑ः सुऊतयो॑ व ऊतय॑ः ॥१७॥

यथा॑ । क॒लाम् । यथा॑ । श॒फम् । यथा॑ । ऋ॒णम् । सम्ऽनया॑मसि । ए॒व । दुःऽस्वप्न्य॑म् ।
सर्व॑म् । आप्त्ये । सम् । नयामसि । अनेहस॑ः । वः । ऊतय॑ः । सुऽऊतय॑ः । वः । ऊतय॑ः ॥१७॥

वेङ्कट० यथा अशनार्थं संस्कुर्वन्तो हतस्य पशोः कलाम् शफम् इति सह आदाय अन्यत्र सन्नयन्ति । एव दुष्ष्वप्न्यम् सर्वम् आप्त्ये[७] सम् नयामः । मनुर्दं वा यथा ऋणम् इति ॥ १७ ॥

---

१. दुस्स्वप्नम् मूको. २. नास्ति मूको. ३. °दस्मं वि°; °दस्मन् अ°. ४-४. नास्ति मूको. ५. ततम् मूको. ६. °नीय गननीय मूको. ७. °प्त्ये स्मितम् मूको.

अजैष्माद्यासनाम चाभूमानागसो वयम् ।
उषो यस्माद् दुष्ष्वप्न्यादभैष्माप तदुच्छत्वनेहसो व ऊतयः सुऊतयो व ऊतयः ॥१८॥

अजैष्म । अद्य । असनाम । च । अभूम । अनागसः । वयम् । उषः । यस्मात् । दुःऽस्वप्न्यात् ।
अभैष्म । अप । तत् । उच्छतु । अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ १८ ॥

वेङ्कट० जयेम[1] अद्य[2], भवेम[3] च अनागसः वयम् । हे उषः! यस्मात् दुष्ष्वप्न्यात्[4] वयम् अभैष्म, अप गच्छतु तत् इति ॥ १८ ॥

[5]इति षष्ठाष्टके चतुर्थाध्याये दशमो वर्गः[5] ॥

[४८]

[6]प्रगाथो घौरः काण्व ऋषिः । सोमो देवता । त्रिष्टुप् छन्दः, पञ्चमी जगती[6] ।

स्वादोरभक्षि वयसः सुमेधाः स्वाध्यो वरिवोवित्तरस्य ।
विश्वे यं देवा उत मर्त्यासो मधु ब्रुवन्तो अभि संचरन्ति ॥ १ ॥

स्वादोः । अभक्षि । वयसः । सुऽमेधाः । सुऽआध्यः । वरिवोवित्ऽतरस्य ।
विश्वे । यम् । देवाः । उत । मर्त्यासः । मधु । ब्रुवन्तः । अभि । सम्ऽचरन्ति ॥ १ ॥

वेङ्कट० प्रगाथः । स्वादु अहं भजेय अन्नं शोभनप्रज्ञः सुकर्मा अत्यन्तं पूजायाः[6] धनभक्तम् । यम् विश्वे देवाः मनुष्याश्च सोमम् मधु इति वदन्तः अभि सङ्गच्छन्ते ॥ १ ॥

अन्तश्च प्रागा अदितिर्भवास्यवयाता हरसो दैव्यस्य ।
इन्दविन्द्रस्य सख्यं जुषाणः श्रौष्टीव धुरमनु राय ऋध्याः ॥ २ ॥

अन्तरिति । च । प्र । अगाः । अदितिः । भवासि । अवऽयाता । हरसः । दैव्यस्य ।
इन्दो इति । इन्द्रस्य । सख्यम् । जुषाणः । श्रौष्टीऽइव । धुरम् । अनु । राये । ऋध्याः ॥ २ ॥

वेङ्कट० अन्तः त्वं गच्छसि अखण्डनीयः[7] । भवसि अपनेता दैव्यस्य क्रोधस्य हे इन्दो! त्वम् इन्द्रस्य सख्यम् सेवमानः । स त्वं यथा क्षिप्रगामी अश्वः '[8]धुरम् प्रणयति एवम्[8]' अस्मान् प्रणय धनार्थम् । ऋधि. अनुपूर्वो गमनार्थो भवति ॥ २ ॥

---

1. रुवेद मूको. 2. नार्व वि°; अर्थ अ°. 3. जैमदवेम मूको. 4. दुष्ष्वप्नात् अ°. 5-5. नास्ति मूको. 6. पूजायां मूको. 7. °यत्व मूको. 8-8. °रम् ···पू ··· व° वि°; °रम् ··· व° अ°.

अपाम सोममृता अभूमागन्म ज्योतिरविदाम देवान् ।
किं नूनमस्मान् कृणवदरातिः किमु धूर्तिरमृत मर्त्यस्य ॥ ३ ॥

अपाम । सोमम् । अमृताः । अभूम । अगन्म । ज्योतिः । अविदाम । देवान् ।
किम् । नूनम् । अस्मान् । कृणवत् । अरातिः । किम् । ऊँ इति । धूर्तिः । अमृत । मर्त्यस्य ॥३॥

वेङ्कट० अपाम सोमम्, अमृताः च अभूम, अगन्म च ज्योतिः, अविदाम ज्ञातवन्तः च देवान् । किम् इदानीम् अस्मान् कुर्यात् शत्रुः । किम् वा हिंसकः हे अमृत! मनुष्यस्य मम कृणवत् इति ॥ ३ ॥

शं नो भव हृद आ पीत इन्दो पितेव सोम सूनवे सुशेवः ।
सखेव सख्य उरुशंस धीरः प्र ण आयुर्जीवसे सोम तारीः ॥ ४ ॥

शम् । नः । भव । हृदे । आ । पीतः । इन्दो इति । पिताऽइव । सोम । सूनवे । सुऽशेवः ।
सखाऽइव । सख्ये । उरुऽशंस । धीरः । प्र । नः । आयुः । जीवसे । सोम । तारीः ॥ ४ ॥

वेङ्कट० पीतः त्वम् इन्दो! हृदयाय सुखं भावय । आङ्पूर्वोऽन्तण्यर्थे । [1]पिता इव[1] सोम! पुत्राय सुसुखः, सखा इव च सख्ये, हे बहुकीर्ते![2] प्राज्ञः प्र वर्धय अस्माकं [3]जीवनाय च आयुः[3] ॥४॥

इमे मा पीता यशस उरुष्यवो रथं न गावः समनाह पर्वसु ।
ते मा रक्षन्तु विस्रसश्चरित्रादुत मा स्रामाद् यवयन्त्विन्दवः ॥ ५ ॥

इमे । मा । पीताः । यशसः । उरुष्यवः । रथम् । न । गावः । सम् । अनाह । पर्वऽसु ।
ते । मा । रक्षन्तु । विऽस्रसः । चरित्रात् । उत । मा । स्रामात् । यवयन्तु । इन्दवः ॥ ५ ॥

वेङ्कट० इमे माम् पीताः यशस्विनः रक्षाकामाः रथम् इव गोविकारभूता बध्राः सम् नह्यन्ति सन्धिषु । ते माम् रक्षन्तु विस्रस्तात् कर्मणः । पीतसोमो ह्यविस्रस्तं कर्म करोति । अपि च मां व्याधेः पृथक् कुर्वन्तु[4] इन्दवः ॥ ५ ॥

[5]इति षष्ठाष्टके चतुर्थाध्याये एकादशो वर्गः[5] ॥

अग्निं न मा मथितं सं दिदीपः प्र चक्षय कृणुहि वस्यसो नः ।
अथा हि ते मद आ सोम मन्ये रेवाँ इव प्र चरा पुष्टिमच्छ ॥ ६ ॥

1-1. पितेव वि[1]; पितेव अ[1]. 2. [॰]कीर्ये मूको. 3-3. जीवयायुः वि[2]; जीवय चायुः अ[1]. 4. कर्मसु मूको. 5-5. नास्ति मूको.

अग्निम् । न । मा । मथितम् । सम् । दिदीपः । प्र । चक्षय । कृणुहि । वस्यसः । नः ।
अथ । हि । ते । मदे । आ । सोम । मन्ये । रेवान्ऽइव । प्र । चर । पुष्टिम् । अच्छ ॥ ६ ॥

वेङ्कट० मथितम् अग्निम् इव माम् सम् दीपय च प्र चक्षय चक्षुषः सम्युक्षणेन । कुरु च अस्मान् वसीयसः । सम्प्रति हे सोम! पानजनिते मदे स्तौमि त्वाम् । तथा सति धनवानिव आढ्यः अस्मासु प्र चारय पोषम् ॥ ६ ॥

इषिरेण ते मनसा सुतस्य भक्षीमहि पित्र्यस्येव रायः ।
सोम राजन् प्र ण आयूंषि तारीरहानीव सूर्यो वासराणि ॥ ७ ॥

इषिरेण । ते । मनसा । सुतस्य । भक्षीमहि । पित्र्यस्यऽइव । रायः ।
सोम । राजन् । प्र । नः । आयूंषि । तारीः । अहानिऽइव । सूर्यः । वासराणि ॥ ७ ॥

वेङ्कट० इच्छावता मनसा त्वां[1] सुतं वयम् भक्षीमहि पित्र्यमिव धनम् । सोम! राजन्! प्र वर्धय[2] अस्माकम् आयूंषि[3] अहानीव सूर्यः वासराणि । वासयन्ति मनुष्यान् इति वासराणि इति ॥७॥[4]

सोम राजन् मृळया नः स्वस्ति तव स्मसि व्रत्यास्तस्य विद्धि ।
अलर्ति दक्ष उत मन्युरिन्दो मा नो अर्यो अनुकामं परा दाः ॥ ८ ॥

सोम । राजन् । मृळय । नः । स्वस्ति । तव । स्मसि । व्रत्याः । तस्य । विद्धि ।
अलर्ति । दक्षः । उत । मन्युः । इन्दो इति । मा । नः । अर्यः । अनुऽकामम् । परा । दाः ॥८॥

वेङ्कट० सोम! राजन्! सुखय अस्मान्! अविनाशेन । तव स्मः वयं व्रतपराः । तद् त्वं जानीहि । गच्छति वृद्धः शत्रुः इन्दो![5] अभिमन्ता च अस्मान् पापार्थम् । मा अस्मान् उभयविषयस्य शत्रोः यथाकामम् [6]परा दाः[6] ॥ ८ ॥

त्वं हि नस्तन्वः सोम गोपा गात्रेगात्रे निषसत्था नृचक्षाः ।
यत् ते वयं प्रमिनाम व्रतानि स नो मृळ सुषखा देव वस्यः ॥ ९ ॥

त्वम् । हि । नः । तन्वः । सोम । गोपाः । गात्रेऽगात्रे । निऽससत्थ । नृऽचक्षाः ।
यत् । ते । वयम् । प्रऽमिनाम । व्रतानि । सः । नः । मृळ । सुऽसखा । देव । वस्यः ॥ ९ ॥

वेङ्कट० त्वम् हि नः अङ्गस्य सोम! गोपायिता सर्वेषु अङ्गेषु निषीदसि मनुष्याणां द्रष्टा । यत् ते वयम् प्रहिंस्मः[7] व्रतानि । तथापि सः त्वम् अस्मान् सुखय सुसखा भवन् देव! श्रेष्ठान्[8] इति ॥ ९ ॥

---

१. तव मूको. २. वर्धने मूको. ३. आयुषि मूको. ४ व्याख्यातेयमृग् या (४,७). ५. इन्द्रो मूको. ६-६. वरदा मूको ७. प्रहिंस्म मूको. ८. 'ष्ठान् अस्मान् मूको.

ऋदूदरेण सख्या सचेय यो मा न रिष्येद्धर्यश्व पीतः ।
अयं यः सोमो न्यधाय्यस्मे तस्मा इन्द्रं प्रतिरमेम्यायुः ॥ १० ॥

ऋदूदरेण । सख्या । सचेय । यः । मा । न । रिष्येत् । हरिऽअश्व । पीतः ।
अयम् । यः । सोमः । नि । अधायि । अस्मे इति । तस्मै । इन्द्रम् । प्रऽतिरम् । एमि । आयुः ॥

वेङ्कट० ऋदूदरेण[1] ऋदूदरः मृदूदरः (द्र० या ६,४) इति शास्तोदरवर्णौ[2] हि मृदूदरः भवति । तेन अहम् सख्या सङ्गतो भवामि । यः सोमः पीतः माम् न हिंस्येत् [3]इन्द्र! । अयम् यः[3] सोमः निहितः अस्मासु तस्मै सोमाय प्रवृद्धम् आयुः जठरे मयि अवस्थानम्[4] इन्द्रम् याचे ॥ १० ॥

[5]इति षष्ठाष्टके चतुर्थाध्याये द्वादशो वर्गः[5] ॥

अप त्या अस्थुरनिरा अमीवा निरत्रसन् तमिषीचीरभैषुः ।
आ सोमो अस्माँ अरुहद् विहाया अगन्म यत्र प्रतिरन्त आयुः ॥ ११ ॥

अप । त्याः । अस्थुः । अनिराः । अमीवाः । निः । अत्रसन् । तमिषीचीः । अभैषुः ।
आ । सोमः । अस्मान् । अरुहत् । विऽहायाः । अगन्म । यत्र । प्रऽतिरन्ते । आयुः ॥ ११ ॥

वेङ्कट० अप तिष्ठन्तु अपगच्छन्तु ताः[6] अनिराः[7] प्रेरयितुमशक्याः अमीवाः । नितरां त्रस्यन्तु अमीवा बलमग्लन्त्यो बिभ्यतु च । त्रासः कम्पहेतुः भयाद् अन्यः । आ अरुहत्[8] अस्मान् सोमः महान्, अगन्म तम् यस्मिन् सोमे वर्धयन्ति आयुः पुरुषाः ॥ ११ ॥

यो न इन्दुः पितरो हृत्सु पीतोऽमर्त्यो मर्त्याँ आविवेश ।
तस्मै सोमाय हविषा विधेम मृळीके अस्य सुमतौ स्याम ॥ १२ ॥

यः । नः । इन्दुः । पितरः । हृत्ऽसु । पीतः । अमर्त्यः । मर्त्यान् । आऽविवेश ।
तस्मै । सोमाय । हविषा । विधेम । मृळीके । अस्य । सुऽमतौ । स्याम ॥ १२ ॥

वेङ्कट० यः अस्माकम् इन्दुः हे पितरः! हृत्सु पीतः अमर्त्यः मर्त्यान् आविवेश तस्मै सोमाय हविषा परिचरेम । सुखे सोमस्य सुमतौ च वयम् स्याम ॥ १२ ॥

त्वं सोम पितृभिः संविदानोऽनु द्यावापृथिवी आ ततन्थ ।
तस्मै त इन्दो हविषा विधेम वयं स्याम पतयो रयीणाम् ॥ १३ ॥

---

१. नास्ति मूको. २. शास्तोदरवर्णौ मूको. ३-३. एन्द्रास्य मूको. ४. अमवस्थानम् मूको. ५-५. नास्ति मूको. ६. ताम् मूको. ७. अग्निः आ वि[°]; अस्थिरा मं[°]. ८. अरुहम् मूको.

त्वम् । सोम । पितृऽभिः । सम्ऽविदानः । अनु । द्यावापृथिवी इति । आ । ततन्थ ।
तस्मै । ते । इन्दो इति । हविषा । विधेम । वयम् । स्याम । पतयः । रयीणाम् ॥ १३ ॥

वेङ्कट० त्वम् सोम! पितृभिः सङ्गच्छमानः अनु आ ततन्थ द्यावापृथिव्यौ[1] । तस्मै ते इन्दो! हविषा परिचरेम। वयम् इति स्पष्टम् ॥ १३ ॥

त्रातारो देवा अधि वोचता नो मा नो निद्रा ईशत मोत जल्पिः ।
वयं सोमस्य विश्वह प्रियासः सुवीरासो विदथमा वदेम ॥ १४ ॥

त्रातारः । देवाः । अधि । वोचत । नः । मा । नः । निऽद्रा । ईशत । मा । उत । जल्पिः ।
वयम् । सोमस्य । विश्वह । प्रियासः । सुऽवीरासः । विदथम् । आ । वदेम ॥ १४ ॥

वेङ्कट० हे त्रातारः देवाः! अस्माकम् अधिवचनं [2]कुरुत। मा अस्माकम्[2] निद्रा स्वप्नः[3] ईशिष्ट, मा च जल्पिः। वयम् सोमस्य सर्वदा प्रियाः सुपुत्राः गृहम् आभिमुख्येन वदेम। आवदनं गृहस्थानां पुत्रपौत्राणां धनेन उपच्छन्दनम् इत्यर्थः[4] ॥ १४ ॥

त्वं नः सोम विश्वतो वयोधास्त्वं स्वर्विदा विशा नृचक्षाः ।
त्वं न इन्द ऊतिभिः सजोषाः पाहि पश्चातादुत वा पुरस्तात् ॥ १५ ॥

त्वम् । नः । सोम । विश्वतः । वयःऽधाः । त्वम् । स्वःऽवित् । आ । विश । नृऽचक्षाः ।
त्वम् । नः । इन्दो इति । ऊतिऽभिः । सऽजोषाः । पाहि । पश्चातात् । उत । वा । पुरस्तात् ॥

वेङ्कट० त्वम् अस्माकम् सोम! विश्वतः अन्नस्य दाता। त्वम् सर्ववित् आ विश अस्मान् मनुष्याणां द्रष्टा[5]। त्वम् च इन्दो![6] अस्मान् मरुद्भिः सङ्गतः रक्ष पश्चात् पुरस्तात् च[7] ॥१५॥

[8]इति षष्ठाष्टके चतुर्थाध्याये त्रयोदशो वर्गः[8] ॥

अथ वालखिल्यम्[9]

[४९ (१)]

प्रस्कण्वः काण्व ऋषिः । इन्द्रो देवता । प्रगाथः छन्दः (=विषमा बृहती, समा सतोबृहती) ।

अभि प्र वः सुराधसमिन्द्रमर्च यथा विदे ।
यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति ॥ १ ॥

---

1. स्पष्टम् मा पाता° वि[1]; भामधाता° अ[1]. 2-2. °तम् मरमा° मूको. 3. स्वप्नं मूको. 4. इति वि[1]. 5. द्रष्टः मूको. 6. इन्द्र मूको. 7. नास्ति अ[1]. 8-8. नास्ति मूको. 9. वालखिल्यसूक्तानि [४९-५९ (११)] न सन्ति मूको.

अभि । प्र । वः । सुऽराधसम् । इन्द्रम् । अर्च । यथा । विदे ।
यः । जरितृऽभ्यः । मघऽवा । पुरुऽवसुः । सहस्रेणऽइव । शिक्षति ॥ १ ॥

शतानीकेव प्र जिगाति धृष्णुया हन्ति वृत्राणि दाशुषे ।
गिरेरिव प्र रसा अस्य पिन्विरे दत्राणि पुरुभोजसः ॥ २ ॥
शतानीकाऽइव । प्र । जिगाति । धृष्णुऽया । हन्ति । वृत्राणि । दाशुषे ।
गिरेःऽइव । प्र । रसाः । अस्य । पिन्विरे । दत्राणि । पुरुऽभोजसः ॥ २ ॥

आ त्वा सुतास इन्दवो मदा य इन्द्र गिर्वणः ।
आपो न वज्रिन्नन्वोक्यं सरः पृणन्ति शूर राधसे ॥ ३ ॥
आ । त्वा । सुतासः । इन्दवः । मदाः । ये । इन्द्र । गिर्वणः ।
आपः । न । वज्रिन् । अनु । ओक्यम् । सरः । पृणन्ति । शूर । राधसे ॥ ३ ॥

अनेहसं प्रतरणं विवक्षणं मध्वः स्वादिष्ठमीं पिब ।
आ यथा मन्दसानः किरासि नः प्र क्षुद्रेव त्मना धृषत् ॥ ४ ॥
अनेहसम् । प्रऽतरणम् । विवक्षणम् । मध्वः । स्वादिष्ठम् । ईम् । पिब ।
आ । यथा । मन्दसानः । किरासि । नः । प्र । क्षुद्राऽइव । त्मना । धृषत् ॥ ४ ॥

आ नः स्तोममुप द्रवद्धियानो अश्वो न सोतृभिः ।
यं ते स्वधावन्स्वदयन्ति धेनव इन्द्र कण्वेषु रातयः ॥ ५ ॥
आ । नः । स्तोमम् । उप । द्रवत् । हियानः । अश्वः । न । सोतृऽभिः ।
यम् । ते । स्वधाऽवन् । स्वदयन्ति । धेनवः । इन्द्र । कण्वेषु । रातयः ॥ ५ ॥

इति षष्ठाष्टके चतुर्थाध्याये चतुर्दशो वर्गः ॥

उग्रं न वीरं नमसोप सेदिम विभूतिमक्षितावसुम् ।
उद्रीव वज्रिन्नवतो न सिञ्चते क्षरन्तीन्द्र धीतयः ॥ ६ ॥
उग्रम् । न । वीरम् । नमसा । उप । सेदिम । विऽभूतिम् । अक्षितऽवसुम् ।
उद्रीऽइव । वज्रिन् । अवतः । न । सिञ्चते । क्षरन्ति । इन्द्र । धीतयः ॥ ६ ॥

यद्ध नूनं यद्वा यज्ञे यद्वा पृथिव्यामधि ।
अतो नो यज्ञमाशुभिर्महेमत उग्र उग्रेभिरा गहि ॥ ७ ॥

यत् । इ । नूनम् । यत् । वा । यज्ञे । यत् । वा । पृथिव्याम् । अधि ।
अतः । नः । यज्ञम् । आशुऽभिः । महेऽमते । उग्रः । उग्रेभिः । आ । गहि ॥ ७ ॥

अजिरासो हरयो ये त आशवो वाता इव प्रसक्षिणः ।
येभिरपत्यं मनुषः परीयसे येभिर्विश्वं स्वर्दृशे ॥ ८ ॥

अजिरासः । हरयः । ये । ते । आशवः । वाताःऽइव । प्रऽसक्षिणः ।
येभिः । अपत्यम् । मनुषः । परिऽईयसे । येभिः । विश्वम् । स्वः । दृशे ॥ ८ ॥

एतावतस्त ईमह इन्द्र सुम्नस्य गोमतः ।
यथा प्रावो मघवन् मेध्यातिथिं यथा नीपातिथिं धने ॥ ९ ॥

एतावतः । ते । ईमहे । इन्द्र । सुम्नस्य । गोऽमतः ।
यथा । प्र । आवः । मघऽवन् । मेध्यऽअतिथिम् । यथा । नीपऽअतिथिम् । धने ॥ ९ ॥

यथा कण्वे मघवन् त्रसदस्यवि यथा पक्थे दशव्रजे ।
यथा गोशर्ये असनोर्ऋजिश्वनीन्द्र गोमद्धिरण्यवत् ॥ १० ॥

यथा । कण्वे । मघऽवन् । त्रसदस्यवि । यथा । पक्थे । दशऽव्रजे ।
यथा । गोऽशर्ये । असनोः । ऋजिश्वनि । इन्द्र । गोऽमत् । हिरण्यऽवत् ॥ १० ॥

इति पष्ठाष्टके चतुर्थाध्याये पञ्चदशो वर्गः ॥

[५० (२)]

पुष्टिगुः काण्व ऋषिः । इन्द्रो देवता । प्रगाथः छन्दः (=विषमा बृहती, समा सतोबृहती) ।

प्र सु श्रुतं सुराधसमर्चा शक्रमभिष्टये ।
यः सुन्वते स्तुवते काम्यं वसु सहस्रेणेव मंहते ॥ १ ॥

प्र । सु । श्रुतम् । सुऽराधसम् । अर्च । शक्रम् । अभिष्टये ।
यः । सुन्वते । स्तुवते । काम्यम् । वसु । सहस्रेणऽइव । मंहते ॥ १ ॥

शतानीका हेतयो अस्य दुष्टरा इन्द्रस्य समिषो महीः ।
गिरिर्न भुज्मा मघवत्सु पिन्वते यदीं सुता अमन्दिषुः ॥ २ ॥

शतऽअनीकाः । हेतयः । अस्य । दुस्तराः । इन्द्रस्य । सम्ऽइषः । महीः ।
गिरिः । न । भुज्मा । मघवत्ऽसु । पिन्वते । यत् । ईम् । सुताः । अमन्दिषुः ॥ २ ॥

यदीं सुतास इन्दवोऽभि प्रियममन्दिषुः ।
आपो न धायि सवनं म आ वसो दुघा इवोप दाशुषे ॥ ३ ॥

यत् । ईम् । सुतासः । इन्दवः । अभि । प्रियम् । अमन्दिषुः ।
आपः । न । धायि । सवनम् । मे । आ । वसो इति । दुघाःऽइव । उप । दाशुषे ॥ ३ ॥

अनेहसं वो हवमानमूतये मध्वः क्षरन्ति धीतयः ।
आ त्वा वसो हवमानास इन्दव उप स्तोत्रेषु दधिरे ॥ ४ ॥

अनेहसम् । वः । हवमानम् । ऊतये । मध्वः । क्षरन्ति । धीतयः ।
आ । त्वा । वसो इति । हवमानासः । इन्दवः । उप । स्तोत्रेषु । दधिरे ॥ ४ ॥

आ नः सोमे स्वध्वर इयानो अत्यो न तोशते ।
यं ते स्वदावन्त्स्वदन्ति गूर्तयः पौरे छन्दयसे हवम् ॥ ५ ॥

आ । नः । सोमे । सुऽअध्वरे । इयानः । अत्यः । न । तोशते ।
यम् । ते । स्वदाऽवन् । स्वदन्ति । गूर्तयः । पौरे । छन्दयसे । हवम् ॥ ५ ॥

इति षष्ठाष्टके चतुर्थोध्याये षोडशो वर्गः ॥

प्र वीरमुग्रं विविचिं धनस्पृतं विभूतिं राधसो महः ।
उद्रीव वज्रिन्नवतो वसुत्वना सदा पीपेथ दाशुषे ॥ ६ ॥

प्र । वीरम् । उग्रम् । विविचिम् । धनऽस्पृतम् । विऽभूतिम् । राधसः । महः ।
उद्रीऽइव । वज्रिन् । अवतः । वसुऽत्वना । सदा । पीपेथ । दाशुषे ॥ ६ ॥

यद्ध नूनं परावति यद् वा पृथिव्यां दिवि ।
युजान इन्द्र हरिभिर्महेमत ऋष्व ऋष्वेभिरा गहि ॥ ७ ॥

यत् । ह । नूनम् । पराऽवति । यत् । वा । पृथिव्याम् । दिवि ।
युजानः । इन्द्र । हरिऽभिः । महेऽमते । ऋष्व । ऋष्वेभिः । आ । गहि ॥ ७ ॥

रथिरासो हरयो ये ते अस्रिध ओजो वातस्य पिप्रति ।
येभिर्नि दस्युं मनुषो निघोषयो येभिः स्वः परीयसे ॥ ८ ॥

रथिरासः । हरयः । ये । ते । अस्रिधः । ओजः । वातस्य । पिप्रति ।
येभिः । नि । दस्युम् । मनुषः । निऽघोषयः । येभिः । स्वरिति स्वः । परिऽईयसे ॥ ८ ॥

एतावतस्ते वसो विद्याम शूर नव्यसः ।
यथा प्राव एतशं कृत्व्ये धने यथा वशं दशव्रजे ॥ ९ ॥

एतावतः । ते । वसो इति । विद्याम । शूर । नव्यसः ।
यथा । प्र । आवः । एतशम् । कृत्व्ये । धने । यथा । वशम् । दशऽव्रजे ॥ ९ ॥

यथा कण्वे मघवन् मेधे अध्वरे दीर्घनीथे दमूनसि ।
यथा गोशर्ये असिषासो अद्रिवो मयि गोत्रं हरिश्रियम् ॥ १० ॥

यथा । कण्वे । मघऽवन् । मेधे । अध्वरे । दीर्घऽनीथे । दमूनसि ।
यथा । गोऽशर्ये । असिषासः । अद्रिऽवः । मयि । गोत्रम् । हरिऽश्रियम् ॥ १० ॥

इति षष्ठाष्टके चतुर्थोऽध्याये सप्तदशो वर्गः ॥

[५१ (३)]

श्रुष्टिगुः काण्व ऋषिः । इन्द्रो देवता । प्रगाथः छन्दः (=विषमा बृहत्यः, समाः सतोबृहत्यः)।

यथा मनौ सांवरणौ सोममिन्द्रापिबः सुतम् ।
नीपातिथौ मघवन् मेध्यातिथौ पुष्टिगौ श्रुष्टिगौ सचा ॥ १ ॥

यथा । मनौ । साम्ऽवरणौ । सोमम् । इन्द्र । अपिबः । सुतम् ।
नीपऽअतिथौ । मघऽवन् । मेध्यऽअतिथौ । पुष्टिऽगौ । श्रुष्टिऽगौ । सचा ॥ १ ॥

पार्षद्वाणः प्रस्कण्वं समसादयच्छयानं जिव्रिमुद्धितम् ।
सहस्राण्यसिषासद् गवामृषिस्त्वोतो दस्यवे वृकः ॥ २ ॥

पार्षद्वाणः । प्रस्कण्वम् । सम् । असादयत् । शयानम् । जिव्रिम् । उद्धितम् ।
सहस्राणि । असिषासत् । गवाम् । ऋषिः । त्वाऽऊतः । दस्यवे । वृकः ॥ २ ॥

य उक्थेभिर्न विन्धते चिकिद्य ऋषिचोदनः ।
इन्द्रं तमच्छा वद नव्यस्या मत्यरिष्यन्तं न भोजसे ॥ ३ ॥

यः । उक्थेभिः । न । विन्धते । चिकित् । यः । ऋषिऽचोदनः ।
इन्द्रम् । तम् । अच्छ । वद । नव्यस्या । मती । अरिष्यन्तम् । न । भोजसे ॥ ३ ॥

यस्मा अर्कं सप्तशीर्षाणमानृचुस्त्रिधातुमुत्तमे पदे ।
स त्विमा विश्वा भुवनानि चिक्रददादिज्जनिष्ट पौंस्यम् ॥ ४ ॥

यस्मै । अर्कम् । सप्तऽशीर्षाणम् । आनृचुः । त्रिऽधातुम् । उत्ऽतमे । पदे ।
सः । तु । इमा । विश्वा । भुवनानि । चिक्रदत् । आत् । इत् । जनिष्ट । पौंस्यम् ॥ ४ ॥

यो नो दाता वसूनामिन्द्रं तं हूमहे वयम् ।
विद्मा ह्यस्य सुमतिं नवीयसीं गमेम गोमति व्रजे ॥ ५ ॥

यः । नः । दाता । वसूनाम् । इन्द्रम् । तम् । हूमहे । वयम् ।
विद्म । हि । अस्य । सुऽमतिम् । नवीयसीम् । गमेम । गोऽमति । व्रजे ॥ ५ ॥

इति षष्ठाष्टके चतुर्थोऽध्याये अष्टादशो वर्गः ॥

यस्मै त्वं वसो दानाय शिक्षसि स रायस्पोषमश्नुते ।
तं त्वा वयं मघवन्निन्द्र गिर्वणः सुतावन्तो हवामहे ॥ ६ ॥

यस्मै । त्वम् । वसो इति । दानाय । शिक्षसि । सः । रायः । पोषम् । अश्नुते ।
तम् । त्वा । वयम् । मघऽवन् । इन्द्र । गिर्वणः । सुतऽवन्तः । हवामहे ॥ ६ ॥

कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यते ॥ ७ ॥

कदा । चन । स्तरीः । असि । न । इन्द्र । सश्चसि । दाशुषे ।
उपऽउप । इत् । नु । मघऽवन् । भूयः । इत् । नु । ते । दानम् । देवस्य । पृच्यते ॥ ७ ॥

प्र यो ननक्षे अभ्योजसा क्रिविं वधैः शुष्णं निघोषयन् ।
यदेदस्तम्भीत्प्रथयन्नमूं दिवमादिज्जनिष्ट पार्थिवः ॥ ८ ॥

प्र । यः । ननक्षे । अभि । ओजसा । क्रिविम् । वधैः । शुष्णम् । निऽघोषयन् ।
यदा । इत् । अस्तम्भीत् । प्रथयन् । अमूम् । दिवम् । आत् । इत् । जनिष्ट । पार्थिवः ॥ ८ ॥

यस्यायं विश्व आर्यो दासः शेवधिपा अरिः ।
तिरश्चिदर्ये रुशमे पवीरवि तुभ्येत्सो अज्यते रयिः ॥ ९ ॥

यस्य । अयम् । विश्वः । आर्यः । दासः । शेवधिऽपाः । अरिः ।
तिरः । चित् । अर्ये । रुशमे । पवीरवि । तुभ्य । इत् । सः । अज्यते । रयिः ॥ ९ ॥

तुरण्यवो मधुमन्तं घृतश्चुतं विप्रासो अर्कमानृचुः ।
अस्मे रयिः पप्रथे वृष्ण्यं शवोऽस्मे सुवानास इन्दवः ॥ १० ॥

तुरण्यवः । मधुऽमन्तम् । घृतऽश्चुतम् । विप्रासः । अर्कम् । आनृचुः ।
अस्मे इति । रयिः । पप्रथे । वृष्ण्यम् । शवः । अस्मे इति । सुवानासः । इन्दवः ॥ १० ॥

इति षष्ठाष्टके चतुर्थाध्याये एकोनविंशो वर्गः ॥

[५२ (४)]

आयुः काण्व ऋषिः । इन्द्रो देवता । प्रगाथः छन्दः (= विषमा बृहत्यः, समाः सतोबृहत्यः)।

यथा मनौ विवस्वति सोमं शक्रापिबः सुतम् ।
यथा त्रिते छन्द इन्द्र जुजोषस्यायौ मादयसे सचा ॥ १ ॥
यथा । मनौ । विवस्वति । सोमम् । शक्र । अपिबः । सुतम् ।
यथा । त्रिते । छन्दः । इन्द्र । जुजोषसि । आयौ । मादयसे । सचा ॥ १ ॥

पृषध्रे मेध्ये मातरिश्वनीन्द्र सुवाने अमन्दथाः ।
यथा सोमं दशशिप्रे दशोण्ये स्यूमरश्मावृजूनसि ॥ २ ॥
पृषध्रे । मेध्ये । मातरिश्वनि । इन्द्र । सुवाने । अमन्दथाः ।
यथा । सोमम् । दशऽशिप्रे । दशऽओण्ये । स्यूमऽरश्मौ । ऋजूनसि ॥ २ ॥

य उक्था केवला दधे यः सोमं धृषितापिबत् ।
यस्मै विष्णुस्त्रीणि पदा विचक्रम उप मित्रस्य धर्मभिः ॥ ३ ॥
यः । उक्था । केवला । दधे । यः । सोमम् । धृषिता । अपिबत् ।
यस्मै । विष्णुः । त्रीणि । पदा । विऽचक्रमे । उप । मित्रस्य । धर्मऽभिः ॥ ३ ॥

यस्य त्वमिन्द्र स्तोमेषु चाकनो वाजे वाजिञ्छतक्रतो ।
तं त्वा वयं सुदुघामिव गोदुहो जुहूमसि श्रवस्यवः ॥ ४ ॥
यस्य । त्वम् । इन्द्र । स्तोमेषु । चाकनः । वाजे । वाजिन् । शतक्रतो इति शतऽक्रतो ।
तम् । त्वा । वयम् । सुदुघामऽइव । गोऽदुहः । जुहूमसि । श्रवस्यवः ॥ ४ ॥

यो नो दाता स नः पिता महाँ उग्र ईशानकृत् ।
अयामन्नुग्रो मघवा पुरूवसुर्गोरश्वस्य प्र दातु नः ॥ ५ ॥
यः । नः । दाता । सः । नः । पिता । महान् । उग्रः । ईशानऽकृत् ।
अयामन् । उग्रः । मघऽवा । पुरुऽवसुः । गोः । अश्वस्य । प्र । दातु । नः ॥ ५ ॥

इति षष्ठाष्टके चतुर्थाध्याये विंशो वर्गः ॥

यस्मै॒ त्वं व॑सो दा॒नाय॒ मंह॑से॒ स रा॒यस्पोष॑मिन्वति ।
व॒सू॒यवो॒ वसु॑पतिं श॒तक्र॑तुं॒ स्तोमै॒रिन्द्रं॑ हवामहे ॥ ६ ॥

यस्मै॑ । त्वम् । व॒सो॒ इति॑ । दा॒नाय॑ । मंह॑से । सः । रा॒यः । पोष॑म् । इन्व॑ति ।
व॒सु॒ऽयवः॑ । वसु॑ऽपतिम् । श॒तऽक्र॑तुम् । स्तोमैः॑ । इन्द्र॑म् । ह॒वा॒म॒हे॒ ॥ ६ ॥

क॒दा च॒न प्र यु॑च्छस्यु॒भे नि पा॑सि॒ जन्म॑नी ।
तुरी॑यादित्य॒ हव॑नं त इन्द्रि॒यमा त॑स्थाव॒मृतं॑ दि॒वि ॥ ७ ॥

क॒दा । च॒न । प्र । यु॒च्छ॒सि॒ । उ॒भे इति॑ । नि । पा॒सि॒ । जन्म॑नी॒ इति॑ ।
तुरी॑य । आ॒दि॒त्य॒ । हव॑नम् । ते॒ । इ॒न्द्रि॒यम् । आ । त॒स्थौ॒ । अ॒मृत॑म् । दि॒वि ॥ ७ ॥

यस्मै॒ त्वं म॑घवन्निन्द्र गिर्वणः॒ शिक्षो॒ शिक्ष॑सि दा॒शुषे॑ ।
अ॒स्माकं॒ गिर॑ उ॒त सु॑ष्टु॒तिं व॑सो कण्व॒वच्छृ॑णु॒धी हव॑म् ॥ ८ ॥

यस्मै॑ । त्वम् । म॒घ॒ऽव॒न् । इ॒न्द्र॒ । गि॒र्व॒णः॒ । शिक्षो॒ इति॑ । शिक्ष॑सि । दा॒शुषे॑ ।
अ॒स्माक॑म् । गिरः॑ । उ॒त । सु॒ऽस्तु॒तिम् । व॒सो॒ इति॑ । क॒ण्व॒ऽवत् । शृ॒णु॒धि॒ । हव॑म् ॥ ८ ॥

अस्ता॑वि॒ मन्म॑ पू॒र्व्यं ब्रह्मेन्द्रा॑य वोचत ।
पू॒र्वीर्ऋ॒तस्य॑ बृह॒तीर॑नूषत स्तो॒तुर्मे॒धा अ॑सृक्षत ॥ ९ ॥

अस्ता॑वि । मन्म॑ । पू॒र्व्यम् । ब्रह्म॑ । इन्द्रा॑य । वो॒च॒त॒ ।
पू॒र्वीः । ऋ॒तस्य॑ । बृ॒ह॒तीः । अ॒नू॒ष॒त॒ । स्तो॒तुः । मे॒धाः । अ॒सृ॒क्ष॒त॒ ॥ ९ ॥

समिन्द्रो॒ रायो॑ बृह॒तीर॑धूनुत॒ सं क्षो॒णी समु॒ सूर्य॑म् ।
सं शु॒क्रासः॒ शुच॑यः॒ सं गवा॑शिरः॒ सोमा॒ इन्द्र॑ममन्दिषुः ॥ १० ॥

सम् । इन्द्रः॑ । रायः॑ । बृ॒ह॒तीः । अ॒धू॒नु॒त॒ । सम् । क्षो॒णी इति॑ । सम् । ऊँ इति॑ । सूर्य॑म् ।
सम् । शु॒क्रासः॑ । शुच॑यः । सम् । गोऽआ॑शिरः । सोमाः॑ । इन्द्र॑म् । अ॒म॒न्दि॒षुः॒ ॥ १० ॥

इति पष्ठाष्टके चतुर्थाध्याये एकविंशो वर्गः ॥

[५३ (५)]

मेध्यः काण्व ऋषिः । इन्द्रो देवता । प्रगाथः छन्दः (=विषमा बृहत्यः, समाः सतोबृहत्यः) ।

उ॒प॒मं त्वा॑ म॒घोनां॒ ज्येष्ठं॑ च वृष॒भाणा॑म् ।
पु॒र्भित्त॑मं मघवन्निन्द्र गो॒विद॒मीशा॑नं रा॒य ई॑महे ॥ १ ॥

उपऽमम् । त्वा । मघोनाम् । ज्येष्ठम् । च । वृषभाणाम् ।
पूर्भित्ऽतमम् । मघऽवन् । इन्द्र । गोऽविदम् । ईशानम् । रायः । ईमहे ॥ १ ॥

य आयुं कुत्समतिथिग्वमर्दयो वावृधानो दिवेदिवे ।
तं त्वा वयं हर्यश्वं शतक्रतुं वाजयन्तो हवामहे ॥ २ ॥
यः । आयुम् । कुत्सम् । अतिथिऽग्वम् । अर्दयः । ववृधानः । दिवेऽदिवे ।
तम् । त्वा । वयम् । हरिऽअश्वम् । शतऽक्रतुम् । वाजऽयन्तः । हवामहे ॥ २ ॥

आ नो विश्वेषां रसं मध्वः सिञ्चन्त्वद्रयः ।
ये परावति सुन्विरे जनेष्वा ये अर्वावतीन्दवः ॥ ३ ॥
आ । नः । विश्वेषाम् । रसम् । मध्वः । सिञ्चन्तु । अद्रयः ।
ये । पराऽवति । सुन्विरे । जनेषु । आ । ये । अर्वाऽवति । इन्दवः ॥ ३ ॥

विश्वा द्वेषांसि जहि चाव चा कृधि विश्वे सन्वन्त्वा वसु ।
शीर्ष्टेषु चित्ते मदिरासो अंशवो यत्रा सोमस्य तृम्पसि ॥ ४ ॥
विश्वा । द्वेषांसि । जहि । च । अव । च । आ । कृधि । विश्वे । सन्वन्तु । आ । वसु ।
शीर्ष्टेषु । चित् । ते । मदिरासः । अंशवः । यत्र । सोमस्य । तृम्पसि ॥ ४ ॥

इति षष्ठाष्टके चतुर्थाध्याये द्वाविंशो वर्गः ॥

इन्द्र नेदीय एदिहि मितमेधाभिरूतिभिः ।
आ शंतम शंतमाभिरभिष्टिभिरा स्वापे स्वापिभिः ॥ ५ ॥
इन्द्र । नेदीयः । आ । इत् । इहि । मितऽमेधाभिः । ऊतिऽभिः ।
आ । शम्ऽतम । शम्ऽतमाभिः । अभिष्टिऽभिः । आ । सुऽआपे । स्वापिऽभिः ॥ ५ ॥

आजितुरं सत्पतिं विश्वचर्षणिं कृधि प्रजास्वाभगम् ।
प्र सू तिरा शचीभिर्ये त उक्थिनः क्रतुं पुनत आनुषक् ॥ ६ ॥
आजिऽतुरम् । सत्ऽपतिम् । विश्वऽचर्षणिम् । कृधि । प्रऽजासु । आऽभगम् ।
प्र । सु । तिर । शचीभिः । ये । ते । उक्थिनः । क्रतुम् । पुनते । आनुषक् ॥ ६ ॥

यस्ते साधिष्ठोऽवसे ते स्याम भरेषु ते ।
वयं होत्राभिरुत देवहूतिभिः ससवांसो मनामहे ॥ ७ ॥

यः । ते । साधिष्ठः । अवसे । ते । स्याम । भरेषु । ते ।
वयम् । होत्राभिः । उत । देवहूतिऽभिः । ससऽवांसः । मनामहे ॥ ७ ॥

अहं हि ते हरिवो ब्रह्म वाजयुराजिं यामि सदोतिभिः ।
त्वामिदेव तममे समश्वयुर्गव्युरग्रे मथीनाम् ॥ ८ ॥

अहम् । हि । ते । हरिऽवः । ब्रह्म । वाजऽयुः । आजिम् । यामि । सदा । ऊतिऽभिः ।
त्वाम् । इत् । एव । तम् । अमे । सम् । अश्वऽयुः । गव्युः । अग्रे । मथीनाम् ॥ ८ ॥

इति षष्ठाष्टके चतुर्थाध्याये त्रयोविंशो वर्गः ॥

[५४ (६)]

मातरिश्वा काण्व ऋषिः । इन्द्रो देवता, तृतीयाचतुर्थ्यो विश्वे देवाः । प्रगाथः छन्दः
(=विषमा बृहत्यः, समाः सतोबृहत्यः) ।

एतत् त इन्द्र वीर्यं गीर्भिर्गृणन्ति कारवः ।
ते स्तोभन्त ऊर्जमावन् घृतश्चुतं पौरासो नक्षन् धीतिभिः ॥ १ ॥

एतत् । ते । इन्द्र । वीर्यम् । गीःऽभिः । गृणन्ति । कारवः ।
ते । स्तोभन्तः । ऊर्जम् । आवन् । घृतऽश्चुतम् । पौरासः । नक्षन् । धीतिऽभिः ॥ १ ॥

नक्षन्त इन्द्रमवसे सुकृत्यया येषां सुतेषु मन्दसे ।
यथा संवर्ते अमदो यथा कृश एवास्मे इन्द्र मत्स्व ॥ २ ॥

नक्षन्ते । इन्द्रम् । अवसे । सुऽकृत्यया । येषाम् । सुतेषु । मन्दसे ।
यथा । सम्ऽवर्ते । अमदः । यथा । कृशे । एव । अस्मे इति । इन्द्र । मत्स्व ॥ २ ॥

आ नो विश्वे सजोषसो देवासो गन्तनोप नः ।
वसवो रुद्रा अवसे न आ गमञ्छृण्वन्तु मरुतो हवम् ॥ ३ ॥

आ । नः । विश्वे । सऽजोषसः । देवासः । गन्तन । उप । नः ।
वसवः । रुद्राः । अवसे । नः । आ । गमन् । शृण्वन्तु । मरुतः । हवम् ॥ ३ ॥

पूषा विष्णुर्हवनं मे सरस्वत्यवन्तु सप्त सिन्धवः ।
आपो वातः पर्वतासो वनस्पतिः शृणोतु पृथिवी हवम् ॥ ४ ॥

पूषा । विष्णुः । हवनम् । मे । सरस्वती । अवन्तु । सप्त । सिन्धवः ।
आपः । वातः । पर्वतासः । वनस्पतिः । शृणोतु । पृथिवी । हवम् ॥ ४ ॥

इति षष्ठाष्टके चतुर्थाध्याये चतुर्विंशो वर्गः ॥

यदिन्द्र राधो अस्ति ते माघोनं मघवत्तम ।
तेन नो बोधि सधमाद्यो वृधे भगो दानाय वृत्रहन् ॥ ५ ॥

यत् । इन्द्र । राधः । अस्ति । ते । माघोनम् । मघवत्ऽतम ।
तेन । नः । बोधि । सधऽमाद्यः । वृधे । भगः । दानाय । वृत्रऽहन् ॥ ५ ॥

आजिपते नृपते त्वमिद्धि नो वाज आ वक्षि सुक्रतो ।
वीती होत्राभिरुत देववीतिभिः ससवांसो वि शृण्विरे ॥ ६ ॥

आजिऽपते । नृऽपते । त्वम् । इत् । हि । नः । वाजे । आ । वक्षि । सुक्रतो इति सुऽक्रतो ।
वीती । होत्राभिः । उत । देववीतिऽभिः । ससऽवांसः । वि । शृण्विरे ॥ ६ ॥

सन्ति ह्यर्य आशिष इन्द्र आयुर्जनानाम् ।
अस्मान् नक्षस्व मघवन्नुपावसे धुक्षस्व पिप्युषीमिषम् ॥ ७ ॥

सन्ति । हि । अर्ये । आऽशिषः । इन्द्रे । आयुः । जनानाम् ।
अस्मान् । नक्षस्व । मघऽवन् । उप । अवसे । धुक्षस्व । पिप्युषीम् । इषम् ॥ ७ ॥

वयं त इन्द्र स्तोमेभिर्विधेम त्वमस्माकं शतक्रतो ।
महि स्थूरं शशयं राधो अह्रयं प्रस्कण्वाय नि तोशय ॥ ८ ॥

वयम् । ते । इन्द्र । स्तोमेभिः । विधेम । त्वम् । अस्माकम् । शतक्रतो इति शतऽक्रतो ।
महि । स्थूरम् । शशयम् । राधः । अह्रयम् । प्रस्कण्वाय । नि । तोशय ॥ ८ ॥

इति षष्ठाष्टके चतुर्थोऽध्याये पञ्चविंशो वर्गः ॥

[५५ (७)]

कृशः काण्व ऋषिः । प्रस्कण्वदानं देवता । गायत्री छन्दः, तृतीयापञ्चम्यावनुष्टुभौ

भूरीदिन्द्रस्य वीर्यं१ व्यख्यमभ्यायति । राधस्ते दस्यवे वृक ॥ १ ॥
भूरि । इत् । इन्द्रस्य । वीर्यम् । वि । अख्यम् । अभि । आ । अयति । राधः । ते । दस्यवे । वृक ॥

शतं श्वेतास उक्षणो दिवि तारो न रोचन्ते । मह्ना दिवं न तस्तभुः ॥ २ ॥
शतम् । श्वेतासः । उक्षणः । दिवि । तारः । न । रोचन्ते । मह्ना । दिवम् । न । तस्तभुः ॥ २ ॥

शतं वेणूञ्छतं शुनः शतं चर्माणि म्लातानि ।
शतं मे बल्बजस्तुका अरुषीणां चतुःशतम् ॥ ३ ॥

शतम् । वेणून् । शतम् । शुनः । शतम् । चर्माणि । म्लातानि ।
शतम् । मे । बल्बजऽस्तुकाः । अरुषीणाम् । चतुःऽशतम् ॥ २ ॥

सुदेवाः स्थ काण्वायना वयोवयो विचरन्तः । अश्वासो न चङ्क्रमत ॥ ४ ॥
सुऽदेवाः । स्थ । काण्वायनाः । वयःऽवयः । विऽचरन्तः । अश्वासः । न । चङ्क्रमत ॥ ४ ॥

आदित् साप्तस्य चर्किरन्नानूनस्य महि श्रवः ।
श्यावीरतिध्वसन् पथश्चक्षुषा चन संनशे ॥ ५ ॥
आत् । इत् । साप्तस्य । चर्किरन् । न । अनूनस्य । महि । श्रवः ।
श्यावीः । अतिऽध्वसन् । पथः । चक्षुषा । चन । सम्ऽनशे ॥ ५ ॥

इति षष्ठाष्टके चतुर्थाध्याये षड्विंशो वर्गः ॥

[५६ (८)]

पृषध्रः काण्व ऋषिः । इन्द्रो देवता, पञ्चम्या अग्निसूर्यौ । गायत्री छन्दः, पञ्चमी पङ्क्तिः ।

प्रति ते दस्यवे वृक राधो अदर्श्यह्रयम् । द्यौर्न प्रथिना शवः ॥ १ ॥
प्रति । ते । दस्यवे । वृक । राधः । अदर्शि । अह्रयम् । द्यौः । न । प्रथिना । शवः ॥ १ ॥

दश मह्यं पौतक्रतः सहस्रा दस्यवे वृकः । नित्याद् रायो अमंहत ॥ २ ॥
दश । मह्यम् । पौतऽक्रतः । सहस्रा । दस्यवे । वृकः । नित्यात् । रायः । अमंहत ॥ २ ॥

शतं मे गर्दभानां शतमूर्णावतीनाम् । शतं दासाँ अति स्रजः ॥ ३ ॥
शतम् । मे । गर्दभानाम् । शतम् । ऊर्णाऽवतीनाम् । शतम् । दासान् । अति । स्रजः ॥ ३ ॥

तत्रो अपि प्राणीयत पूतक्रतायै व्यक्ता । अश्वानामिन्न यूथ्याम् ॥ ४ ॥
तत्रो इति । अपि । प्र । अनीयत । पूतऽक्रतायै । विऽअक्ता । अश्वानाम् । इत् । न । यूथ्याम् ॥ ४ ॥

अचेत्यग्निश्चिकितुर्हव्यवाट् स सुमद्रथः ।
अग्निः शुक्रेण शोचिषा बृहत् सूरो अरोचत दिवि सूर्यो अरोचत ॥ ५ ॥
अचेति । अग्निः । चिकितुः । हव्यऽवाट् । सः । सुमत्ऽरथः ।
अग्निः । शुक्रेण । शोचिषा । बृहत् । सूरः । अरोचत । दिवि । सूर्यः । अरोचत ॥ ५ ॥

इति षष्ठाष्टके चतुर्थाध्याये सप्तविंशो वर्गः ॥

[५७ (९)]

मेध्यः काण्व ऋषिः । अश्विनौ देवता । त्रिष्टुप् छन्दः ।

युवं देवा क्रतुना पूर्व्येण युक्ता रथेन तविषं यजत्रा ।
आगच्छतं नासत्या शचीभिरिदं तृतीयं सवनं पिबाथः ॥ १ ॥

युवम् । देवा । क्रतुना । पूर्व्येण । युक्ताः । रथेन । तविषम् । यजत्रा ।
आ । अगच्छतम् । नासत्या । शचीभिः । इदम् । तृतीयम् । सवनम् । पिबाथः ॥ १ ॥

युवां देवास्त्रय एकादशासः सत्याः सत्यस्य ददृशे पुरस्तात् ।
अस्माकं यज्ञं सवनं जुषाणा पातं सोममश्विना दीद्यग्नी ॥ २ ॥

युवाम् । देवाः । त्रयः । एकादशासः । सत्याः । सत्यस्य । ददृशे । पुरस्तात् ।
अस्माकम् । यज्ञम् । सवनम् । जुषाणा । पातम् । सोमम् । अश्विना । दीद्यग्नी इति दीदिऽअग्नी ॥

पनाय्यं तदश्विना कृतं वां वृषभो दिवो रजसः पृथिव्याः ।
सहस्रं शंसा उत ये गविष्टौ सर्वाँ इत्ताँ उप याता पिबध्यै ॥ ३ ॥

पनाय्यम् । तत् । अश्विना । कृतम् । वाम् । वृषभः । दिवः । रजसः । पृथिव्याः ।
सहस्रम् । शंसाः । उत । ये । गोऽइष्टौ । सर्वान् । इत् । तान् । उप । यात । पिबध्यै ॥ ३ ॥

अयं वां भागो निहितो यजत्रेमा गिरो नासत्योप यातम् ।
पिबतं सोमं मधुमन्तमस्मे प्र दाश्वांसमवतं शचीभिः ॥ ४ ॥

अयम् । वाम् । भागः । निऽहितः । यजत्रा । इमाः । गिरः । नासत्या । उप । यातम् ।
पिबतम् । सोमम् । मधुऽमन्तम् । अस्मे इति । प्र । दाश्वांसम् । अवतम् । शचीभिः ॥ ४ ॥

इति षष्ठाष्टके चतुर्थोऽध्याये अष्टाविंशो वर्गः ॥

[५८ (१०)]

मेध्यः काण्व ऋषिः । विश्वे देवा देवता, प्रथमाया ऋत्विजो वा । त्रिष्टुप् छन्दः ।

यमृत्विजो बहुधा कल्पयन्तः सचेतसो यज्ञमिमं वहन्ति ।
यो अनूचानो ब्राह्मणो युक्त आसीत् का स्वित् तत्र यजमानस्य संवित् ॥ १ ॥

यम् । ऋत्विजः । बहुधा । कल्पयन्तः । सऽचेतसः । यज्ञम् । इमम् । वहन्ति ।
यः । अनूचानः । ब्राह्मणः । युक्तः । आसीत् । का । स्वित् । तत्र । यजमानस्य । सम्ऽवित् ॥

एक एवाग्निर्बहुधा समिद्ध एकः सूर्यो विश्वमनु प्रभूतः ।
एकैवोषाः सर्वमिदं वि भात्येकं वा इदं वि बभूव सर्वम् ॥ २ ॥

एकः । एव । अग्निः । बहुधा । सम्ऽइद्धः । एकः । सूर्यः । विश्वम् । अनु । प्रऽभूतः ।
एका । एव । उषाः । सर्वम् । इदम् । वि । भाति । एकम् । वै । इदम् । वि । बभूव । सर्वम् ॥२॥

ज्योतिष्मन्तं केतुमन्तं त्रिचक्रं सुखं रथं सुषदं भूरिवारम् ।
चित्रामघा यस्य योगेऽधिजज्ञे(?)[1] तं वां हुवे अतिरिक्तं पिबध्यै ॥ ३ ॥

ज्योतिष्मन्तम् । केतुऽमन्तम् । त्रिऽचक्रम् । सुऽखम् । रथम् । सुऽसदम् । भूरिऽवारम् ।
चित्रऽमघा । यस्य । योगे । अधिऽजज्ञे(?)[1] । तम् । वाम् । हुवे । अतिऽरिक्तम्[2] । पिबध्यै ॥ ३ ॥

इति षष्ठाष्टके चतुर्थाध्याये एकोनत्रिंशो वर्गः ॥

[५९ (११)]

सुपर्णः काण्व ऋषिः । इन्द्रावरुणौ देवता । जगती छन्दः ।

इमानि वां भागधेयानि सिस्रत इन्द्रावरुणा प्र महे सुतेषु वाम् ।
यज्ञेयज्ञे ह सवना भुरण्यथो यत् सुन्वते यजमानाय शिक्षथः ॥ १ ॥

इमानि । वाम् । भागऽधेयानि । सिस्रते । इन्द्रावरुणा । प्र । महे । सुतेषु । वाम् ।
यज्ञेऽयज्ञे । ह । सवना । भुरण्यथः । यत् । सुन्वते । यजमानाय । शिक्षथः ॥ १ ॥

निष्षिध्वरीरोषधीराप आस्तामिन्द्रावरुणा महिमानमाशत ।
या सिस्रतू रजसः पारे अध्वनो ययोः शत्रुर्नकिरादेव ओहते ॥ २ ॥

निःऽसिध्वरीः । ओषधीः । आपः । आस्ताम् । इन्द्रावरुणा । महिमानम् । आशत ।
या । सिस्रतुः । रजसः । पारे । अध्वनः । ययोः । शत्रुः । नकिः । अदेवः । ओहते ॥ २ ॥

---

1. पद्योगीयतिङ्स्वरस्य सावसरत्वात् °जज्ञे इति सुबोधम् । 2. अति । रिक्तम् इत्युपलब्धः पाठः प्रमादजुष्टः द्र.

सत्यं तदिन्द्रावरुणा कृशस्य वां मध्व ऊर्मिं दुहते सप्त वाणीः ।
ताभिर्दाश्वांसमवतं शुभस्पती यो वामदब्धो अभि पाति चित्तिभिः ॥ ३ ॥

सत्यम् । तत् । इन्द्रावरुणा । कृशस्य । वाम् । मध्वः । ऊर्मिम् । दुहते । सप्त । वाणीः ।
ताभिः । दाश्वांसम् । अवतम् । शुभः । पती इति । यः । वाम् । अदब्धः । अभि । पाति । चित्तिऽभिः ॥

घृतप्रुषः सौम्या जीरदानवः सप्त स्वसारः सदन ऋतस्य ।
या ह वामिन्द्रावरुणा घृतश्चुतस्ताभिर्धत्तं यजमानाय शिक्षतम् ॥ ४ ॥

घृतऽप्रुषः । सौम्याः । जीरऽदानवः । सप्त । स्वसारः । सदने । ऋतस्य ।
याः । ह । वाम् । इन्द्रावरुणा । घृतऽश्चुतः । ताभिः । धत्तम् । यजमानाय । शिक्षतम् ॥ ४ ॥

इति पञ्चमाष्टके चतुर्थाध्याये त्रिंशो वर्गः ॥

अवोचाम महते सौभगाय सत्यं त्वेषाभ्यां महिमानमिन्द्रियम् ।
अस्मान्त्स्विन्द्रावरुणा घृतश्चुतस्त्रिभिः साप्तेभिरवतं शुभस्पती ॥ ५ ॥

अवोचाम । महते । सौभगाय । सत्यम् । त्वेषाभ्याम् । महिमानम् । इन्द्रियम् ।
अस्मान् । सु । इन्द्रावरुणा । घृतऽश्चुतः । त्रिऽभिः । साप्तेभिः । अवतम् । शुभः । पती इति ॥

इन्द्रावरुणा यदृषिभ्यो मनीषां वाचो मतिं श्रुतमदत्तमग्रे ।
यानि स्थानान्यसृजन्त धीरा यज्ञं तन्वानास्तपसाभ्यपश्यम् ॥ ६ ॥

इन्द्रावरुणा । यत् । ऋषिऽभ्यः । मनीषाम् । वाचः । मतिम् । श्रुतम् । अदत्तम् । अग्रे ।
यानि । स्थानानि । असृजन्त । धीराः । यज्ञम् । तन्वानाः । तपसा । अभि । अपश्यम ॥ ६ ॥

इन्द्रावरुणा सौमनसमदृप्तं रायस्पोषं यजमानेषु धत्तम् ।
प्रजां पुष्टिं भूतिमस्मासु[1] धत्तं दीर्घायुत्वाय प्र तिरतं न आयुः ॥ ७ ॥

इन्द्रावरुणा । सौमनसम् । अदृप्तम् । रायः । पोषम् । यजमानेषु । धत्तम् ।
प्रऽजाम् । पुष्टिम् । भूतिम्(?)[1] । अस्मासु । धत्तम् । दीर्घायुऽत्वाय । प्र । तिरतम् । नः । आयुः ॥७॥

इति पञ्चमाष्टके चतुर्थाध्याये एकत्रिंशो वर्गः ॥

इति वालखिल्यं समाप्तम् ॥

---

१. एवमुपलभ्यमानस्य पाठस्य भूति° इति शोधः सुवेचः; सपा. खि १,६,७ ऽपिम् इति पाभे.

[६०]

[1]भर्गः प्रागाथ ऋषिः । अग्निर्देवता । प्रगाथश्छन्दः (=विषमा बृहत्यः, समाः सतोबृहत्यः)[1] ।

अग्न आ याह्यग्निभिर्होतारं त्वा वृणीमहे ।
आ त्वामनक्तु प्रयता हविष्मती यजिष्ठं बर्हिरासदे ॥ १ ॥

अग्ने । आ । याहि । अग्निऽभिः । होतारम् । त्वा । वृणीमहे ।
आ । त्वाम् । अनक्तु । प्रऽयता । हविष्मती । यजिष्ठम् । बर्हिः । आऽसदे ॥ १ ॥

वेङ्कट० प्रागाथः । अग्ने ! आ गच्छ अग्निभिः अन्यैः सहायभूतैः सह । होतारम् त्वाम् वृणीमहे । आभिमुख्येन त्वाम् अनक्तु सिञ्चताम् अध्वर्योर्बाहुभ्याम् प्रयता हविष्मती स्रुग्[2] यष्टृतमम्, बर्हिषि[3] या स्रुग् आसाद्यते ॥ १ ॥

अच्छा हि त्वा सहसः सूनो अङ्गिरः स्रुचश्चरन्त्यध्वरे ।
ऊर्जो नपातं घृतकेशमीमहेऽग्निं यज्ञेषु पूर्व्यम् ॥ २ ॥

अच्छ । हि । त्वा । सहसः । सूनो इति । अङ्गिरः । स्रुचः । चरन्ति । अध्वरे ।
ऊर्जः । नपातम् । घृतऽकेशम् । ईमहे । अग्निम् । यज्ञेषु । पूर्व्यम् ॥ २ ॥

वेङ्कट० अच्छ चरन्ति हि त्वा हे सहसः सूनो ! अङ्गिरसामेक ! स्रुचः यज्ञे । अन्नस्य पुत्रं [4]रक्षकं वा[4] ज्वालाकेशम् याचामहे अभिलषितम् अग्निम् यज्ञेषु मुख्यम् ॥ २ ॥

अग्ने कविर्वेधा असि होता पावक यक्ष्यः ।
मन्द्रो यजिष्ठो अध्वरेष्वीड्यो विप्रेभिः शुक्र मन्मभिः ॥ ३ ॥

अग्ने । कविः । वेधाः । असि । होता । पावक । यक्ष्यः ।
मन्द्रः । यजिष्ठः । अध्वरेषु । ईड्यः । विप्रेभिः । शुक्र । मन्मऽभिः ॥ ३ ॥

वेङ्कट० अग्ने ! कविः विधाता भवसि होता हे शोधक ! यष्टव्यः मोदनः यष्टृतमः यज्ञेषु स्तोतव्यः विप्रैः हे शुक्र ![5] दीप्त ! स्तुतिभिः ॥ ३ ॥

अद्रोघमा वहोशतो यविष्ठ्य देवाँ अजस्र वीतये ।
अभि प्रयांसि सुधिता वसो गहि मन्दस्व धीतिभिर्हितः ॥ ४ ॥

१-१. नास्ति मूको. २. स्रग् मूको. ३. बर्हिषी मूको. ४-४. रक्ष मूको. ५. शुक्र मूको.

अद्रोघम् । आ । वह । उशतः । यविष्ठ्य । देवान् । अजस्र । वीतये ।
अभि । प्रयांसि । सुऽधिता । आ । वसो इति । गहि । मन्दस्व । धीतिऽभिः । हितः ॥ ४ ॥

वेङ्कट० अद्रोघम् मां प्रति आ वह कामयमानान् युवतम! देवान् अनवरतं दीप्यमान! हविषो भक्षणाय। अभि आ गच्छ सुनिहितानि हवींषि वासयित!। 'मन्दस्व कर्मभिः' दमे निहित[1] ॥ ४ ॥

त्वमित् सप्रथा अस्यग्ने त्रातर्ऋतस्कविः ।
त्वां विप्रासः समिधान दीदिव आ विवासन्ति वेधसः ॥ ५ ॥

त्वम् । इत् । सऽप्रथाः । असि । अग्ने । त्रातः । ऋतः । कविः ।
त्वाम् । विप्रासः । सम्ऽइधान । दीदिऽवः । आ । विवासन्ति । वेधसः ॥ ५ ॥

वेङ्कट० त्वम् एव सर्वतः पृथुतमः भवसि अग्ने! रक्षित! सत्यभूत क्रान्तप्रज्ञः। त्वाम् मेधाविन हे समिध्यमान! दीप्त[2] परिचरन्ति विधातारः[3] कर्मणाम् ॥ ५ ॥

'इति षष्ठाष्टके चतुर्थाध्याये द्वात्रिंशो वर्गः' ॥

शोचा शोचिष्ठ दीदिहि विशे मयो रास्व स्तोत्रे महाँ असि ।
देवानां शर्मन् मम सन्तु सूरयः शत्रूषाहः स्वग्नयः ॥ ६ ॥

शोच । शोचिष्ठ । दीदिहि । विशे । मयः । रास्व । स्तोत्रे । महान् । असि ।
देवानाम् । शर्मन् । मम । सन्तु । सूरयः । शत्रुऽसहः । सुऽअग्नयः ॥ ६ ॥

वेङ्कट० शोच हे अत्यन्त शोचिष्क[4] दीपय च। प्रजायै सुखं देहि धनं च स्तोत्रे। महान् त्वम् असि। देवै प्रत्ते सुखे मम भवन्तु स्तोतारः शत्रूणामभिभवितार शोभनाग्निका ॥ ६ ॥

यथा चिद् वृद्धमतसमग्ने संजूर्वसि क्षमि ।
एवा दह मित्रमहो यो अस्मध्रुग् दुर्मन्मा कश्च वेनति ॥ ७ ॥

यथा । चित् । वृद्धम् । अतसम् । अग्ने । सम्ऽजूर्वसि । क्षमि ।
एव । दह । मित्रऽमहः । यः । अस्मऽध्रुक् । दुःऽमन्मा । कः । च । वेनति ॥ ७ ॥

वेङ्कट० यथा प्रवृद्धम् 'अतसम् वृक्ष'[6] शुष्कम् अग्ने। संजूर्वसि। जूर्वतिर्हिंसाकर्मा। सन्दहसि पृथिव्या

१. मन्दतरं मूको. २-२. मनुष्य कर्मणि मूको. ३. निहितम् मूको. ४. दीप्ति मूको. ५. °तारम् मूको. ६-६ नास्ति मूको. ७-७. अतस वृक्ष मूको

वर्तमानम्। एवम् दह हे मित्रपूजयितः!। यः अस्माकं द्रोग्धा[1] दुर्बुद्धिः कश्चित् कामयते द्रोग्धुम् अस्मान् इति ॥ ७ ॥

मा नो मर्ताय रिपवे रक्षस्विने माघशंसाय रीरधः ।
अस्रेधद्भिस्तरणिभिर्यविष्ठ्य शिवेभिः पाहि पायुभिः ॥ ८ ॥

मा । नः । मर्ताय । रिपवे । रक्षस्विने । मा । अघऽशंसाय । रीरधः ।
अस्रेधत्ऽभिः । तरणिऽभिः । यविष्ठ्य । शिवेभिः । पाहि । पायुऽभिः ॥ ८ ॥

वेङ्कट० मा अस्मान् मनुष्याय हिंसित्रे बलवते मा च स्तेनाय वशं नय। [2]अक्षीणैः तारकैः[2] युवतम! कल्याणैः पाहि पालनैः ॥ ८ ॥

पाहि नो अग्न एकया पाह्युत द्वितीयया ।
पाहि गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो ॥ ९ ॥

पाहि । नः । अग्ने । एकया । पाहि । उत । द्वितीयया ।
पाहि । गीःऽभिः । तिसृऽभिः । ऊर्जाम् । पते । पाहि । चतसृऽभिः । वसो इति ॥ ९ ॥

वेङ्कट० अस्मान् अग्ने। एकया गिरा ऋचा, पाहि उत द्वितीयया। पाहि गीर्भिः तिसृभिः च अन्नानां पते![3]। पाहि चतसृभिः च वासयितः! ॥ ९ ॥

पाहि विश्वस्माद्रक्षसो अराव्णः प्र स्म वाजेषु नोऽव ।
त्वामिद्धि नेदिष्ठं देवतातय आपिं नक्षामहे वृधे ॥ १० ॥

पाहि । विश्वस्मात् । रक्षसः । अराव्णः । प्र । स्म । वाजेषु । नः । अव ।
त्वाम् । इत् । हि । नेदिष्ठम् । देवऽतातये । आपिम् । नक्षामहे । वृधे ॥ १० ॥

वेङ्कट० पाहि विश्वस्मात् रक्षसः अदातुः। प्र रक्ष अस्मान् सङ्ग्रामेषु। त्वाम् एव अभ्यासन्नतमम् यज्ञाय बन्धुम् वयम् नक्षामहे व्याप्नुमः वृद्ध्यर्थम् ॥ १० ॥

[4]इति पञ्चाष्टके चतुर्थाध्याये प्रथस्त्रिंशो वर्गः[4] ॥

आ नो अग्ने वयोवृधं रयिं पावक शंस्यम् ।
रास्वा च न उपमाते पुरुस्पृहं सुनीती स्वयशस्तरम् ॥ ११ ॥

---

१. द्रोग्धारम् मूको. २-२. उद्वेजैस्तारकैः मूको. ३. पते मूको. ४-४. नास्ति मूको.

आ । नः । अग्ने । वयःऽवृधम् । रयिम् । पावक । शंस्यम् ।
रास्व । च । नः । उपऽमाते । पुरुऽस्पृहम् । सुऽनीती । स्वयशःऽतरम् ॥ ११ ॥

वेङ्कट० आ हर अस्मदर्थम् अग्ने! अन्नस्य वर्धयितारम् रयिम् पावक! शंसनीयम् । देहि च अस्मभ्यं हे उपमाते! । धन य समीपे करोति स उपमाता । बहुभिः स्पृहणीयम् शोभनेन प्रणयनेन आयन्तम् स्वभूतकीर्ति ॥ ११ ॥

येन वंसाम पृतनासु शर्धतस्तरन्तो अर्य आदिशः ।
स त्वं नो वर्ध प्रयसा शचीवसो जिन्वा धियो वसुविदः ॥ १२ ॥

येन । वंसाम । पृतनासु । शर्धतः । तरन्तः । अर्यः । आऽदिशः ।
स । त्वम् । नः । वर्ध । प्रयसा । शचीवसो इति शचीऽवसो । जिन्व । धियः । वसुऽविदः ॥

वेङ्कट० येन हिंस्याम सङ्ग्रामेषु वेगं कुर्वत तरन्त 'शत्रून् आद्रियमाणाः[1]', तं रयिं देहि । स त्वम् अस्मान् वर्धय च अन्नेन हे प्रज्ञया वासयितः[1] कर्मधन! । धाः, प्रीणय कर्माणि धनस्य लम्भकानि ॥ १२ ॥

शिशानो वृषभो यथाग्निः शृङ्गे दविध्वत् ।
तिग्मा अस्य हनवो न प्रतिधृषे सुजम्भः सहसो यहुः ॥ १३ ॥

शिशानः । वृषभः । यथा । अग्निः । शृङ्गे इति । दविध्वत् ।
तिग्माः । अस्य । हनवः । न । प्रतिऽधृषे । सुऽजम्भः । सहसः । यहुः ॥ १३ ॥

वेङ्कट० तीक्ष्णीकुर्वन् वृषभ इव अग्निः शृङ्गे ज्वालाशरीरे[2] धून्वन् । तीक्ष्णा अस्य हनवः हनुसदृशा रश्मयः न[3] प्रति धर्षितुं शक्याः । सुदंष्ट्रः[4] सहसः पुत्रः[5] ॥ १३ ॥

नहि ते अग्ने वृषभ प्रतिधृषे जम्भासो यद्वितिष्ठसे ।
स त्वं नो होतः सुहुतं हविष्कृधि वंस्वा नो वार्या पुरु ॥ १४ ॥

नहि । ते । अग्ने । वृषभ । प्रतिऽधृषे । जम्भासः । यत् । विऽतिष्ठसे ।
स । त्वम् । नः । होतरिति । सुऽहुतम् । हविः । कृधि । वंस्व । नः । वार्या । पुरु ॥ १४ ॥

वेङ्कट० नहि ते अग्ने! वृषभ! प्रतिधर्षितुं शक्यन्ते ज्वालाः, यदा दावभूतो विविधं गच्छसि । स त्वम् अस्माकम् होतः! सुहुतम् हविः कुरु । वस्व[6] अस्मभ्यं धनानि बहूनि ॥ १४ ॥

---

१. शत्रूणां इच॰ मूको. २. ज्वाला शरीर मूको. ३. नुदित वि॰, नास्ति अ॰. ४. सुदंष्ट्र मूको. ५. पुत्र मूको. ६. वस्व मूको.

शेषे वनेषु मात्रोः सं त्वा मर्तास इन्धते ।
अतन्द्रो हव्या वहसि हविष्कृत आदिद् देवेषु राजसि ॥ १५ ॥

शेषे । वनेषु । मात्रोः । सम् । त्वा । मर्तासः । इन्धते ।
अतन्द्रः । हव्या । वहसि । हविःऽकृतः । आत् । इत् । देवेषु । राजसि ॥ १५ ॥

वेङ्कट० शेषे त्वम् अरण्येषु अरण्योः[1]। ततः अरणी आहृत्य मथित्वा जातं सम् त्वा ताम् इन्धते मनुष्याः । ततः त्वम्[2] अनलसः हव्यानि वहसि यजमानस्य । अनन्तरम् एव देवेषु राजसि ॥ १५ ॥

सप्त होतारस्तमिदीळते त्वाग्ने सुत्यजमह्रयम् ।
भिनत्स्यद्रिं तपसा वि शोचिषा प्राग्ने तिष्ठ जनाँ अति ॥ १६ ॥

सप्त । होतारः । तम् । इत् । ईळते । त्वा । अग्ने । सुऽत्यजम् । अह्रयम् ।
भिनत्सि । अद्रिम् । तपसा । वि । शोचिषा । प्र । अग्ने । तिष्ठ । जनान् । अति ॥ १६ ॥

वेङ्कट० सप्त होतारः तम् एव[3] स्तुवन्ति त्वाम् अग्ने । शोभनत्यागम् उद्धतम् । वि भिनत्सि मेघम्[4] तपसा शोचिषा च । प्र तिष्ठ अग्ने । जनान् अतीत्य हवींष्यादाय देवान् प्रति ॥ १६ ॥

अग्निमग्निं वो अध्रिगुं हुवेम वृक्तबर्हिषः ।
अग्निं हितप्रयसः शश्वतीष्वा होतारं चर्षणीनाम् ॥ १७ ॥

अग्निम्ऽअग्निम् । वः । अध्रिऽगुम् । हुवेम । वृक्तऽबर्हिषः ।
अग्निम् । हितऽप्रयसः । शश्वतीषु । आ । होतारम् । चर्षणीनाम् ॥ १७ ॥

वेङ्कट० अग्निम् एव वः अधृतगमनम् आह्वयाम विच्छिन्नबर्हिषः । अग्निम् निहितहविष्काः बह्वीषु भूमिषु आ ह्वयन्ति मनुष्यार्थं देवानां ह्वातारम् ॥ १७ ॥

केतेन शर्मन्त्सचते सुषामण्यग्ने तुभ्यं चिकित्वना ।
इषण्यया नः पुरुरूपमा भर वाजं नेदिष्ठमूतये ॥ १८ ॥

केतेन । शर्मन् । सचते । सुऽसामनि । अग्ने । तुभ्यम् । चिकित्वना ।
इषण्यया । नः । पुरुऽरूपम् । आ । भर । वाजम् । नेदिष्ठम् । ऊतये ॥ १८ ॥

---

1. अरण्याः मूको.　2. तद् मूको.　3. एव त्वाम् मूको.　4. मेघः मूको.

वेङ्कट० प्रज्ञानेन शोभनसामके यज्ञे वय सचते करोति अतः चिकितुषा सहकारिणा जनेन । स त्वम् अस्माकम् इदण्यया इच्छया बहुरूपम् आ हर अन्नम् अन्तिकतमम् रक्षणाय ॥ १८ ॥

अग्ने जरितर्विश्पतिस्तेपानो देव रक्षसः ।
अप्रोषिवान् गृहपतिर्महाँ असि दिवस्पायुर्दुरोणयुः ॥ १९ ॥

अग्ने । जरितः । विश्पतिः । तेपानः । देव । रक्षसः ।
अप्रोषिऽवान् । गृहऽपतिः । महान् । असि । दिवः । पायुः । दुरोणऽयुः ॥ १९ ॥

वेङ्कट० अग्ने ! स्तोतः ! त्वं विशां पालयिता तपन् हे देव ! रक्षांसि अप्रोषिवान् गृह एव तिष्ठन् गृहस्वामी महान् भवसि दिवः रक्षकः यजमानगृहस्य कामयिता ॥ १९ ॥

मा नो रक्ष आ वेशीदाघृणीवसो मा यातुर्यातुमावताम् ।
परोगव्यूत्यनिरामप क्षुधमग्ने सेध रक्षस्विनः ॥ २० ॥

मा । नः । रक्षः । आ । वेशीत् । आघृणिवसो इत्याघृणिऽवसो । मा । यातुः । यातुऽमावताम्[1] ।
परःऽगव्यूति । अनिराम् । अप । क्षुधम् । अग्ने । सेध । रक्षस्विनः ॥ २० ॥

वेङ्कट० मा अस्मान् रक्षः आ विशतु तेजोधन !, मा च हिंसा हिंसावतां यातुधानानाम् । गव्यूतेः क्रोशात् परस्तात् अन्नाभावम् उपक्षपयितारम् रक्षांसि च अप सेध अग्ने ! ॥ २० ॥

'इति षष्ठाष्टके चतुर्थोऽध्याये पञ्चत्रिंशो वर्गः' ॥

[६१]

'भर्गः प्रागाथ ऋषिः । इन्द्रो देवता । प्रगाथश्छन्दः (= विषमा बृहत्यः, समाः सतोबृहत्यः) सप्तदशी शङ्कुमती' ।

उभयं शृणवच्च न इन्द्रो अर्वागिदं वचः ।
सत्राच्या मघवा सोमपीतये धिया शविष्ठ आ गमत् ॥ १ ॥

उभयम् । शृणवत् । च । नः । इन्द्रः । अर्वाक् । इदम् । वचः ।
सत्राच्या । मघऽवा । सोमऽपीतये । धिया । शविष्ठः । आ । गमत् ॥ १ ॥

वेङ्कट० अस्माकं 'स्तोत्रशस्त्रात्मकम् उभयम्' इदम् वच शृणोतु अभिमुखम् आगतः इन्द्रः । महत् धनम् अञ्चन्त्या बुद्ध्या मघवा सोमपानाय बलवत्तमः आ गच्छतु ॥ १ ॥

---

1. त्यवन मूको. २. द्र. ऋवे ९.२५१०; ३-३. नास्ति मूको. ४-४. स्तोत्रशस्त्रात्मकम्' मूको.

तं हि स्वराजं वृषभं तमोजसे धिषणे निष्टतक्षतुः ।
उतोपमानां प्रथमो नि षीदसि सोमकामं हि ते मनः ॥ २ ॥

तम् । हि । स्वऽराजम् । वृषभम् । तम् । ओजसे । धिषणे इति । निःऽततक्षतुः ।
उत । उपऽमानाम् । प्रथमः । नि । सीदसि । सोमऽकामम् । हि । ते । मनः ॥ २ ॥

वेङ्कट० तम् हि स्वराजम् वर्षितारं वर्षाणाम् अर्थे द्यावापृथिव्यौ[1] नितरां सञ्चस्करतुः, तम् एव बलाय । अपि च [2]उपमानभूतानां देवानां[2] मुख्यो भूत्वा निषीदसि । सोमकामम् हि ते मनः ॥ २ ॥

आ वृषस्व पुरूवसो सुतस्येन्द्रान्धसः ।
विद्मा हि त्वा हरिवः पृत्सु सासहिमधृष्टं चिद् दधृष्वणिम् ॥ ३ ॥

आ । वृषस्व । पुरुवसो इति पुरुऽवसो । सुतस्य । इन्द्र । अन्धसः ।
विद्म । हि । त्वा । हरिऽवः । पृत्ऽसु । ससहिम् । अधृष्टम् । चित् । दधृष्वणिम् ॥ ३ ॥

वेङ्कट० आ सिञ्चस्व बहुधन! सुतम् इन्द्र! सोमं जठरे । जानीमः[3] हि त्वां सेनासु अभिभवितारम्, हरिवः![4] शत्रुभिः धर्षयितुमशक्यम् धर्षकमन्येषाम् ॥ ३ ॥

अप्रामिसत्य मघवन् तथेदसदिन्द्र क्रत्वा यथा वशः ।
सनेम वाजं तव शिप्रिन्नवसा मक्षू चिद्यन्तो अद्रिवः ॥ ४ ॥

अप्रामिऽसत्य । मघऽवन् । तथा । इत् । असत् । इन्द्र । क्रत्वा । यथा । वशः ।
सनेम । वाजम् । तव । शिप्रिन् । अवसा । मक्षु । चित् । यन्तः । अद्रिऽवः ॥ ४ ॥

वेङ्कट० अविनश्यत्सत्य! मघवन्! तथा एव भवति तत्, इन्द्र! प्रज्ञानेन यथा त्वं कामयसे । भजेमहि अन्नम् तव शिप्रिन्! रक्षणेन क्षिप्रं शत्रून् गच्छन्तो वज्रिन्! ॥ ४ ॥

शग्ध्यू३ षु शचीपत इन्द्र विश्वाभिरूतिभिः ।
भगं न हि त्वा यशसं वसुविदमनु शूर चरामसि ॥ ५ ॥

शग्धि । ऊँ इति । सु । शचीऽपते । इन्द्र । विश्वाभिः । ऊतिऽभिः ।
भगम् । न । हि । त्वा । यशसम् । वसुऽविदम् । अनु । शूर । चरामसि ॥ ५ ॥

वेङ्कट० देहि सुष्ठु शचीपते! इन्द्र! विश्वैः मरुद्भिः । भगम् इव भाग्याधिपतिं यशस्विनम् त्वां धनानां लम्भयितारम् शूर![5] वयम् हि अनु चरामः ॥ ५ ॥

[6]इति पञ्चाष्टके चतुर्थाध्याये षड्विंशो वर्गः[6] ॥

---

1. °व्यो मूको. 2-2. °मान देवाना गूताना मूको. 3. जानीम मूको. 4. हरिभिः इव वि'; हरिव क'. 5. शूरम् मूको. 6-6. नास्ति मूको.

पौ॒रो अश्व॑स्य पुरु॒कृद् गवा॑मस्युत्सो॑ देव हिर॒ण्ययः॑ ।
नकि॒र्हि दानं॑ परि॒मर्धि॑षत् त्वे यद्य॒द्यामि॒ तदा भ॑र ॥ ६ ॥

पौ॒रः । अश्व॑स्य । पु॒रु॒ऽकृत् । गवा॑म् । अ॒सि॒ । उत्सः॑ । दे॒व॒ । हि॒र॒ण्ययः॑ ।
नकिः॑ । हि । दान॑म् । प॒रि॒ऽमर्धि॑षत् । त्वे इति॑ । यत्ऽय॑त् । यामि॑ । तत् । आ । भ॒र॒ ॥ ६ ॥

वेङ्कट० पूरयिता अश्वस्य भवसि, बहूनां कर्ता गवाम् भवसि, उत्ससदृश[1] देव! हिरण्मयशरीर! न कश्चित् हि[2] दानम् परिहिनस्ति त्वयि अवस्थितम्[3]। यद्यत् याचे अहम्, तत् सर्वम् आ भर[4] ॥ ६ ॥

त्वं ह्येहि॒ चेर॑वे वि॒दा भगं॒ वसु॑त्तये ।
उद् वा॑वृषस्व मघव॒न् गवि॑ष्टय॒ उदि॒न्द्राश्व॑मिष्टये ॥ ७ ॥

त्वम् । हि । आ । इ॒हि॒ । चेर॑वे । वि॒दाः । भग॑म् । वसु॑त्तये ।
उत् । वा॒वृ॒ष॒स्व॒ । म॒घ॒ऽव॒न् । गोऽइ॑ष्टये । उत् । इ॒न्द्र॒ । अश्व॑म्ऽइष्टये ॥ ७ ॥

वेङ्कट० त्वम् हि दाता आ गच्छ अनुचरते। लभस्व आदत्स्व भजनीय कल्याण धनम् अस्माकम् वसुनो दानाय। उत्सिञ्च गा देहि मघवन्! गा इच्छते। तथा उत् वावृषस्व अश्वम् [5]मघवन्! अश्वमिच्छते[5] ॥ ७ ॥

त्वं पु॒रू स॒हस्रा॑णि श॒तानि॑ च यू॒था दा॒नाय॑ मंहसे ।
आ पु॑रंद॒रं च॑कृम॒ विप्र॑वचस॒ इन्द्रं॒ गाय॒न्तोऽव॑से ॥ ८ ॥

त्वम् । पु॒रु । स॒हस्रा॑णि । श॒तानि॑ । च॒ । यू॒था । दा॒नाय॑ । मं॒हसे॑ ।
आ । पु॒र॒म्ऽद॒रम् । च॒कृ॒म॒ । विप्र॑ऽवचसः । इन्द्र॑म् । गाय॑न्तः । अव॑से ॥ ८ ॥

वेङ्कट० त्वम् पुरूणि सहस्राणि शतानि च गवां यूथानि दानाय अनुमन्यसे। यद्वा दातो यजमान, तस्मै प्रयच्छसि। त त्वा पुरां दारयितारम् अभिमुख कुर्मः विशेषेण प्रकृष्टवचस इन्द्रम् गायन्त रक्षणार्थम् ॥ ८ ॥

अवि॑प्रो वा॒ यदवि॑ध॒द्विप्रो॑ वेन्द्र ते॒ वचः॑ ।
स प्र म॑मन्दत् त्वा॒या श॑तक्रतो॒ प्राचा॑मन्यो॒ अहं॑सन ॥ ९ ॥

अवि॑प्रः । वा॒ । यत् । अवि॑धत् । विप्रः॑ । वा॒ । इ॒न्द्र॒ । ते॒ । वचः॑ ।
सः । प्र । म॒म॒न्द॒त् । त्वा॒ऽया । श॒त॒क्र॒तो॒ इति॑ शतऽक्रतो । प्राचा॑मन्यो॒ इति॒ प्राचा॑ऽमन्यो । अहं॑ऽसन ॥ ९ ॥

---

1 उत्सदृश मूको. 2 नास्ति वि°. 3. °रीयत मूको. 4 हर अ[1]. 5-5 मघवन्नश्व° मूको.

वेङ्कट० मेधारहितो मेधावी वा यत् इन्द्र! तव वचः करोति त्वां स्तौति, सः अकर्षेण मोदते त्वरकामनया शतप्रज्ञ! प्राचीनक्रोध! । नेन्द्रस्य क्रोधं प्रतिहन्ति कश्चित् । अहमित्युक्त्वा यः शत्रून् भजते सः अहंसनः ॥ ९ ॥

उग्रबाहुर्म्रक्षकृत्वा पुरंदरो यदि मे शृणवद्धवम् ।
वसूयवो वसुपतिं शतक्रतुं स्तोमैरिन्द्रं हवामहे ॥ १० ॥

उग्रऽबाहुः । म्रक्षऽकृत्वा । पुरम्ऽदरः । यदि । मे । शृणवत् । हवम् ।
वसुऽयवः । वसुऽपतिम् । शतऽक्रतुम् । स्तोमैः । इन्द्रम् । हवामहे ॥ १० ॥

वेङ्कट० उद्गूर्णबाहुः हिंसायाः कर्ता पुरन्दरः यदि मे शृणोति ह्वानम्, धनकामाः वसुपतिम् शतप्रज्ञम् स्तोमैः[1] सर्वदा इन्द्रम् वयम् हवामहे ॥ १० ॥

[2]इति षष्ठाष्टके चतुर्थाध्याये सप्तत्रिंशो वर्गः[2] ॥

न पापासो मनामहे नारायासो न जल्हवः ।
यदिन्न्विन्द्रं वृषणं सचा सुते सखायं कृणवामहै ॥ ११ ॥

न । पापासः । मनामहे । न । अरायासः । न । जल्हवः ।
यत् । इत् । नु । इन्द्रम् । वृषणम् । सचा । सुते । सखायम् । कृणवामहै ॥ ११ ॥

वेङ्कट० यास्कः (६,२५) —'न पापा मन्यामहे । नाधनाः । न ज्वलनेन हीनाः । अस्त्यस्मासु ब्रह्मचर्यमध्ययनं तपो दानकर्मेत्यृषिरवोचत्' इति । यस्मात् इन्द्रम् वर्षितारं सह सुते सोमे सखायम् कुर्म इति ॥ ११ ॥

उग्रं युयुज्म पृतनासु सासहिमृणकातिमदाभ्यम् ।
वेदा भृमं चित् सनिता रथीतमो वाजिनं यमिदू नशत् ॥ १२ ॥

उग्रम् । युयुज्म । पृतनासु । ससहिम् । ऋणऽकातिम् । अदाभ्यम् ।
वेद । भृमम् । चित् । सनिता । रथिऽतमः । वाजिनम् । यम् । इत् । ऊँ इति । नशत् ॥१२॥

वेङ्कट० उद्गूर्णं योजयामः सङ्ग्रामेषु अभिभवितारम् याचकातिम् ऋणभूतस्तुतिम् ऋणवत् फलप्रदानेन स्तोतारम् उत्तमर्णमिव संयोजयन्तम् अहिंस्यम् । 'अयम् इन्द्रः तं श्रमं वेत्ति, बहुषु अश्वेषु भ्रमणकुशलमेवाश्वं[3] सम्भक्ततमः सारथिरिव यम् एव हविष्मन्तं बहूनां मनुष्याणां मध्ये इन्द्रो व्याप्नोति ॥ १२ ॥

१. सोम मूको.　२-२. नास्ति मूको.　३. 'लभिता' मूको.

यत इन्द्र भयामहे ततो नो अभयं कृधि ।
मघवञ्छग्धि तव तन्न ऊतिभिर्वि द्विषो वि मृधो जहि ॥ १३ ॥

यतः । इन्द्र । भयामहे । ततः । नः । अभयम् । कृधि ।
मघऽवन् । शग्धि । तव । तत् । नः । ऊतिऽभिः । वि । द्विषः । वि । मृधः । जहि ॥ १३ ॥

वेङ्कट० यतः शत्रोः इन्द्र! भयामहे, ततः अस्माकम् अभयम् कुरु। मघवन्! शक्तः[1] भवसि। तव सैः अस्माकं रक्षणैः जहि द्वेष्टॄन्, वि जहि हिंसकान् ॥ १३ ॥

त्वं हि राधसस्पते राधसो महः क्षयस्यासि विधतः ।
तं त्वा वयं मघवन्निन्द्र गिर्वणः सुतावन्तो हवामहे ॥ १४ ॥

त्वम् । हि । राधसः ऽपते । राधसः । महः । क्षयस्य । असि । विधतः ।
तम् । त्वा । वयम् । मघऽवन् । इन्द्र । गिर्वणः । सुतऽवन्तः । हवामहे ॥ १४ ॥

वेङ्कट० त्वम् [2]हि धनपते! धनस्य[2] महतो गृहस्य च दाता भवसि परिचरतः[3]। षष्ठीसामर्थ्यात् प्रदातेति लभ्यते। तम् त्वा वयम् इति स्पष्टम् ॥ १४ ॥

इन्द्रः स्पळुत वृत्रहा परस्पा नो वरेण्यः ।
स नो रक्षिषच्चरमं स मध्यमं स पश्चात् पातु नः पुरः ॥ १५ ॥

इन्द्रः । स्पट् । उत । वृत्रऽहा । परःऽपाः । नः । वरेण्यः ।
सः । नः । रक्षिषत् । चरमम् । सः । मध्यमम् । सः । पश्चात् । पातु । नः । पुरः ॥ १५ ॥

वेङ्कट० इन्द्रः वेत्ता। स्पशतिर्ज्ञानकर्मा। वृत्रहा परपारयिता अस्माकं वरणीयः। सः अस्माकं रक्षतु चरमम् पुत्रम्, [4]सः मध्यमम्[4]। स एव अस्मान् पश्चात् पुरस्ताच्च रक्षतु ॥ १५ ॥

'इति पञ्चाष्टके चतुर्थाध्याये अष्टात्रिंशो वर्गः' ॥

त्वं नः पश्चादधरादुत्तरात् पुर इन्द्र नि पाहि विश्वतः ।
आरे अस्मत् कृणुहि दैव्यं भयमारे हेतीरदेवीः ॥ १६ ॥

त्वम् । नः । पश्चात् । अधरात् । उत्तरात् । पुरः । इन्द्र । नि । पाहि । विश्वतः ।
आरे । अस्मत् । कृणुहि । दैव्यम् । भयम् । आरे । हेतीः । अदेवीः ॥ १६ ॥

वेङ्कट० त्वम् अस्मान् इन्द्र! सर्वतः रक्ष। कुरु देवकृतम् भयम् अस्मत् दूरे, आयुधानि आसुराणि च ॥ १६ ॥

---

१. शक्त मूको. २-२. हि…धनं मूको. ३. परिचर मूको. ४-४. नास्ति मूको.

अद्याद्या श्वःश्व इन्द्र त्रास्व परे च नः ।
विश्वा च नो जरितॄन्त्सत्पते अहा दिवा नक्तं च रक्षिषः ॥ १७ ॥

अद्यऽअद्य । श्वःऽश्वः । इन्द्र । त्रास्व । परे । च । नः ।
विश्वा । च । नः । जरितॄन् । सत्ऽपते । अहा । दिवा । नक्तम् । च । रक्षिषः ॥ १७ ॥

वेङ्कट० यद्यद् अद्यशब्दवाच्यम्[1], तत्र सर्वत्र अस्मान् इन्द्र! रक्ष, एव श्वश्च तृतीये च दिवसे अस्मान्। सर्वाणि एव च अहानि स्तोतॄन् अस्मान् हे सतां पते! दिवा नक्तम् च रक्ष ॥ १७ ॥

प्रभङ्गी शूरो मघवा तुवीमघः संमिश्लो वीर्याय कम् ।
उभा ते बाहू वृषणा शतक्रतो नि या वज्रं मिमिक्षतुः ॥ १८ ॥

प्रऽभङ्गी । शूरः । मघऽवा । तुविऽमघः । सम्ऽमिश्लः । वीर्याय । कम् ।
उभा । ते । बाहू इति । वृषणा । शतक्रतो इति शतऽक्रतो । नि । या । वज्रम् । मिमिक्षतुः ॥१८॥

वेङ्कट० प्रभञ्जनशील शूर मघवा बहुधन संमिश्रयिता वीर्यकरणाय सोमस्य। उभौ ते बाहू वर्षितारौ शतकर्मन्[1], यौ वज्रम् नि मिमिक्षतुः परिगृह्णीतः ॥ १८ ॥

[2]इति पञ्चाष्टके चतुर्थाध्याये एकोनचत्वारिंशो वर्गः[2] ॥

[६२]

[3]प्रगाथो घौर काण्व ऋषिः । इन्द्रो देवता । पङ्क्तिश्छन्दः, सप्तम्यादिनवम्यन्ता बृहत्यः[3] ।

प्रो अस्मा उपस्तुतिं भरता यज्जुजोषति ।
उक्थैरिन्द्रस्य माहिनं वयो वर्धन्ति सोमिनो भद्रा इन्द्रस्य रातयः ॥ १ ॥

प्रो इति । अस्मै । उपऽस्तुतिम् । भरत । यत् । जुजोषति ।
उक्थैः । इन्द्रस्य । माहिनम् । वयः । वर्धन्ति । सोमिनः । भद्राः । इन्द्रस्य । रातयः ॥ १ ॥

वेङ्कट० प्रगाथ । प्र भरत[1] अस्मै उपस्तुतिम्, यदि सेवते शस्त्रैः इन्द्रस्य महत् अन्नम् वर्धयन्ति यजमानाः । भजनीयानि इन्द्रस्य दानानि ॥ १ ॥

अयुजो असमो नृभिरेकः कृष्टीरयास्यः ।
पूर्वीरति प्र वावृधे विश्वा जातान्योजसा भद्रा इन्द्रस्य रातयः ॥ २ ॥

अयुजः । असमः । नृऽभिः । एकः । कृष्टीः । अयास्यः ।
पूर्वीः । अति । प्र । ववृधे । विश्वा । जातानि । ओजसा । भद्राः । इन्द्रस्य । रातयः ॥ २ ॥

---

१ भद्य पद॰ अ[1]. २-२. नास्ति मूको. ३. हल भ[1].

वेङ्कट० असहाय कार्ये![1] नृभिः असहायः एव उपक्षपयितुमरातीन्[2] महीः प्रजाः[3] अति प्र वर्धते। विश्वानि च जातानि 'बलेन अति'[4] प्रवर्धते ॥ २ ॥

अहितेन चिदर्वता जीरदानुः सिषासति ।
प्रवाच्यमिन्द्र तत् तव वीर्याणि करिष्यतो भद्रा इन्द्रस्य रातयः ॥ ३ ॥

अहितेन । चित् । अर्वता । जीरऽदानु । सिसासति ।
प्रऽवाच्यम् । इन्द्र । तत् । तव । वीर्याणि । करिष्यत । भद्राः । इन्द्रस्य । रातयं ॥ ३ ॥

वेङ्कट० केन चित् अप्रेजितेन अपि अश्वेन क्षिप्रदानः[5] सम्भक्तुमिच्छति। प्रकर्षेण वाच्यम् इन्द्र! तत् तव सङ्ग्रामेषु वीर्याणि करिष्यतः, यत् स्वयमेव युज्यमानेन अश्वेन सम्भजनम्[6] इति ॥ ३ ॥

आ याहि कृणवाम त इन्द्र ब्रह्माणि वर्धना ।
येभिः शविष्ठ चाकनो भद्रमिह श्रवस्यते भद्रा इन्द्रस्य रातयः ॥ ४ ॥

आ । याहि । कृणवाम । ते । इन्द्र । ब्रह्माणि । वर्धना ।
येभिं । शविष्ठ । चाकनं । भद्रम् । इह । श्रवस्यते । भद्रा । इन्द्रस्य । रातयं ॥ ४ ॥

वेङ्कट० आ याहि कृणवाम ते इन्द्र! स्तोत्राणि वर्धनानि, यै बलवत्तम! कामयसे भद्रम् कर्तुम् इह अन्नमिच्छते ॥ ४ ॥

धृषतश्चिद् धृषन्मनः कृणोषीन्द्र यत् त्वम् ।
तीव्रैः सोमैः सपर्यतो नमोभिः प्रतिभूषतो भद्रा इन्द्रस्य रातयः ॥ ५ ॥

धृषत । चित् । धृषत् । मनं । कृणोषि । इन्द्र । यत् । त्वम् ।
तीव्रै । सोमैं । सपर्यत । नमंऽभि । प्रतिऽभूषत । भद्रा । इन्द्रस्य । रातयं ॥ ५ ॥

वेङ्कट० धृष्टाद् अपि धृष्टम् अत्यन्तं "धृष्टम् मन"[7] करोषि इन्द्र। यस्मात् त्वम्। तीव्रैः सोमैः परिचरतः नमस्कारैः अलङ्कुर्वतः तस्य तव इन्द्रस्य भजनीयानि दानानि ॥ ५ ॥

अव चष्ट ऋचीषमोऽवताँ इव मानुषः ।
जुष्ट्वी दक्षस्य सोमिनः सखायं कृणुते युजं भद्रा इन्द्रस्य रातयः ॥ ६ ॥

अवं । चष्टे । ऋचीषम । अवतान्ऽइंव । मानुष ।
जुष्ट्वी । दक्षस्य । सोमिनं । सखायम् । कृणुते । युजम् । भद्रा । इन्द्रस्य । रातयं ॥ ६ ॥

---

१ अन्य मूको २ प्रजा उप॰ मूको ३. नास्ति मूको. ४. बलेन यानि मूको. ५. ॰दानुः वि॰, ॰दानु न मूको. ६ भजनम् मूको. ७-७ मन धृष्टम् वि॰

वेङ्कट० अव पश्यति ऋचा समः स्तुत्या समः 'कूपान् इव मानुषः[1]। सेविता वृद्धस्य यजमानस्य सखायम्[2] करोति युज्यमानं[3] सोममातृण्णम्[4] अपेक्षितम्[5] ॥ ६ ॥

'इति पष्ठाष्टके चतुर्थाध्याये चत्वारिंशो वर्गः'॥

विश्वे त इन्द्र वीर्यं देवा अनु क्रतुं ददुः ।
भुवो विश्वस्य गोपतिः पुरुष्टुत भद्रा इन्द्रस्य रातयः ॥ ७ ॥

विश्वे । ते । इन्द्र । वीर्यम् । देवाः । अनु । क्रतुम् । ददुः ।
भुवः । विश्वस्य । गोऽपतिः । पुरुऽस्तुत । भद्राः । इन्द्रस्य । रातयः ॥ ७ ॥

वेङ्कट० विश्वे ते इन्द्र! धनं ददतु[7] देवाः अनुसृत्य[8] प्रज्ञानम् भवतः[9]। त्वम् विश्वस्य गोपतिः बहुभिः स्तुत![10] ॥ ७ ॥

गृणे तदिन्द्र ते शव उपमं देवतातये ।
यद्धंसि वृत्रमोजसा शचीपते भद्रा इन्द्रस्य रातयः ॥ ८ ॥

गृणे । तत् । इन्द्र । ते । शवः । उपऽमम् । देवऽतातये ।
यत् । हंसि । वृत्रम् । ओजसा । शचीऽपते । भद्राः । इन्द्रस्य । रातयः ॥ ८ ॥

वेङ्कट० स्तौमि इन्द्र! तव तत् बलम् अन्तिकम् यजमानाय । येन हंसि[11] शत्रुम् बलेन प्रज्ञापते![12] ॥ ८ ॥

समनेव वपुष्यतः कृणवन्मानुषा युगा ।
विदे तदिन्द्रश्चेतनमध श्रुतो भद्रा इन्द्रस्य रातयः ॥ ९ ॥

समनाऽइव । वपुष्यतः । कृणवत् । मानुषा । युगा ।
विदे । तत् । इन्द्रः । चेतनम् । अध । श्रुतः । भद्राः । इन्द्रस्य । रातयः ॥ ९ ॥

वेङ्कट० समनस्का मानिनी इव वपुरिच्छतः[13] पुरुषान् कृणोति विधेयान् मानुषाणि युगानि कालान् मासादीन्[14]। लम्भयति तत् [15]इन्द्रः प्रज्ञापकम्[15]। तेन विश्रुतो भवति ॥ ९ ॥

उज्जातमिन्द्र ते शव उत् त्वामुत् तव क्रतुम् ।
भूरिगो भूरि वावृधुर्मघवन् तव शर्मणि भद्रा इन्द्रस्य रातयः ॥ १० ॥

१-१. कूपानि पश्मा मूको. २. वायम् मूको. ३. पूज्य° मूको. ४. सोमपात्रणम् भा°. ५. अपेक्षा मूको. ६-६. नास्ति मूको. ७. ददिम मूको. ८. मन्वनु मूको. ९. भव इवः मूको. १०. स्तुतः मूको. ११. नास्ति मूको. १२. °ज्ञाने मूको. १३. पतीष्ठत मूको. १४. मासादीन् मूको. १५-१५. इन्द्र° मूको.

उत् । जातम् । इन्द्र । ते । शर्वे । उत् । त्वाम् । उत् । तव॑ । क्रतुम् ।
भूरिगो इति भूरिऽगो । भूरि॑ । वृवृधुः । मघऽवन् । तव॑ । शर्मणि । भद्राः । इन्द्र॑स्य । रातयः॑ ॥

वेङ्कट० उत् वर्धयन्ति प्रादुर्भूतम् इन्द्र! तव बलम् उत् वर्धयन्ति च त्वाम् 'उत् वर्धयन्ति तव' प्रज्ञानम् बहुपशो! मघवन्! अत्यन्तम्, तव' सुखे वर्तमानाः' ॥ १० ॥

अहं च त्वं च वृत्रहन्त्सं युज्याव सनिभ्य आ ।
अरातीवा चिदद्रिवोऽनु नौ शूर मंसते भद्रा इन्द्रस्य रातयः ॥ ११ ॥

अहम् । च । त्वम् । च । वृत्रऽहन् । सम् । युज्याव । सनिऽभ्यः॑ । आ ।
अरातिऽवा । चित् । अद्रिऽवः । अनु॑ । नौ । शूर । मंसते । भद्राः । इन्द्र॑स्य । रातयः॑ ॥ ११ ॥

वेङ्कट० "अहम् च त्वम् च वृत्रहन्!" सङ्गतौ भवाव यावता कालेन धनानि लभ्यन्ते तावत् कालम् । सङ्गतयोः च आवयोः अप्रदानशीलः' अपि वज्रिन्! स्तवनानाम्' अनुमननं करोति ॥ ११ ॥

सत्यमिद्वा उ तं वयमिन्द्रं स्तवाम नानृतम् ।
महाँ असुन्वतो वधो भूरि ज्योतींषि सुन्वतो भद्रा इन्द्रस्य रातयः ॥ १२ ॥

सत्यम् । इत् । वै । ऊँ इति॑ । तम् । वयम् । इन्द्र॑म् । स्तवाम । न । अनृ॑तम् ।
महान् । असु॑न्वतः । वधः । भूरि॑ । ज्योतींषि । सुन्वतः । भद्राः । इन्द्र॑स्य । रातयः॑ ॥ १२ ॥

वेङ्कट० सत्यम् एव तम् वयम् इन्द्रम् स्तवाम, न तु अनृतम् । अस्माभिः उक्ताः गुणाः सत्याः एव नानृताः इति । महान् भवति असुन्वतः प्रहारः । बहूनि च ज्योतींषि सुन्वतः इति ॥ १२ ॥

'इति षष्ठाष्टके चतुर्थोऽध्याये एकचत्वारिंशो वर्गः' ॥

[६३]

'प्रगाथः काण्व ऋषिः । इन्द्रो देवता, द्वादश्या देवाः । गायत्री छन्दः, प्रथमाचतुर्थीपञ्चमीसप्तम्यः अनुष्टुभः, द्वादशी त्रिष्टुप्' ।

स पूर्व्यो महानां वेनः क्रतुभिरानजे । यस्य द्वारा मनुष्पिता देवेषु धिय आनजे ॥ १ ॥

सः । पूर्व्यः॑ । महाना॑म् । वेनः । क्रतुऽभिः । आनजे । यस्य॑ । द्वारा॑ । मनुः॑ । पिता । देवेषु॑ । धियः॑ । आनजे ॥

वेङ्कट० स मुख्यः महतां कान्तः' कर्मभिः आनजे । आनजिः' प्राप्तिकर्मा । महता कर्माणि उद्दिश्य

१ १ सुन्वतः मूको २ च वि', च अ'. ३ 'माना मूको ४ या (६,४) द्र
५ उर्वमानम् मूको ६ ६ नास्ति मूको ७. नास्ति मूको. ८ नास्ति मूको.

गच्छति। यस्य[1] इन्द्रस्य द्वारेण सर्वेषां भूतानाम् पिता मनुः देवेषु अभिलषितानि[2] प्राप्तः[3] ॥ १ ॥

दिवो मानं नोत्सदन्त्सोमपृष्ठासो अद्रयः । उक्था ब्रह्म च शंस्या ॥ २ ॥

दिवः । मानम् । न । उत् । सदन् । सोमऽपृष्ठासः । अद्रयः । उक्था । ब्रह्म । च । शंस्या ॥ २ ॥

वेङ्कट० द्युलोकस्य निर्मातारम् इन्द्रम् न उत् सृजन्तु सदा अभिषुण्वन्तु सोमम् इन्द्राय[4] सोमपृष्ठाः ग्रावाणः । शस्त्राणि च[5] स्तोत्राणि च अस्मै शंसनीयानि ॥ २ ॥

स विद्वाँ अङ्गिरोभ्य इन्द्रो गा अवृणोदप । स्तुषे तदस्य पौंस्यम् ॥ ३ ॥

सः । विद्वान् । अङ्गिरःऽभ्यः । इन्द्रः । गाः । अवृणोत् । अप । स्तुषे । तत् । अस्य । पौंस्यम् ॥ ३ ॥

वेङ्कट० सः विद्वान् अङ्गिरसामर्थाय[6] "अप अवृणोत्[7]" इन्द्रः पशून् पणिभिः अपहृतान्[8] । स्तौमि[9] अस्य तत् वीर्यम् ॥ ३ ॥

स प्रत्नथा कविवृध इन्द्रो वाकस्य वक्षणिः । शिवो अर्कस्य होमन्यस्मत्रा गन्त्ववसे ॥४॥

सः । प्रत्नऽथा । कविऽवृधः । इन्द्रः । वाकस्य । वक्षणिः ।
शिवः । अर्कस्य । होमनि । अस्मऽत्रा । गन्तु । अवसे ॥ ४ ॥

वेङ्कट० पूर्वस्मिन्[10] इव काले सम्प्रति च कवीनां वर्धयिता इन्द्रः स्तोतुः वोढा शिवः च भवति । अर्चनीयस्य सोमस्य होमे सः अस्मासु गच्छतु रक्षणाय ॥ ४ ॥

आदू नु ते अनु क्रतुं स्वाहा वरस्य यज्यवः ।
श्वात्रमर्का अनूषतेन्द्र गोत्रस्य दावने ॥ ५ ॥

आत् । ऊँ इति । नु । ते । अनु । क्रतुम् । स्वाहा । वरस्य । यज्यवः ।
श्वात्रम् । अर्काः । अनूषत । इन्द्र । गोत्रस्य । दावने ॥ ५ ॥

वेङ्कट० आत् अनन्तरम् एव तव अनु स्तुवन्ति[11] प्रज्ञानम्[12] स्वाहायाः पत्युः अग्नेः यष्टारः स्वधा-गार्थम् अग्निं यजन्तः क्षिप्रम् (तु. या ५,३) स्तोतारः इन्द्र! धनस्य दानाय ॥ ५ ॥

इन्द्रे विश्वानि वीर्या कृतानि कर्त्वानि च । यमर्का अध्वरं विदुः ॥ ६ ॥

इन्द्रे । विश्वानि । वीर्या । कृतानि । कर्त्वानि । च । यम् । अर्काः । अध्वरम् । विदुः ॥ ६ ॥

---

१. सस्य मूको. २. अभिवर्धितानि मूको. ३. प्रातः मूको. ४. इन्द्राय मं'. ५. नास्ति मं'. ६. 'माधो' मूको. ७-७. यात्' मूको. ८. 'हृता मूको ९. स्तौमि मूको. १०. सो' मूको. ११. यर' मूको. १२. 'शानां मूको.

वेङ्कट० इन्द्रे[1] विश्वानि वीर्याणि कृतानि च कर्तव्यानि च । यम्[2] स्तोतार हिंसारहितम् जानन्ति[3] ॥ ६ ॥

[4]इति पञ्चाष्टके चतुर्थाध्याये द्विचत्वारिंशो वर्गः[4] ॥

यत् पाञ्चजन्यया विशेन्द्रे घोषा असृक्षत ।
अस्तृणाद् बर्हणा विपोऽर्यो मानस्य स क्षयः ॥ ७ ॥

यत् । पाञ्चऽजन्यया । विशा । इन्द्रे । घोषाः । असृक्षत ।
अस्तृणात् । बर्हणा । विपः । अर्यः । मानस्य । सः । क्षयः ॥ ७ ॥

वेङ्कट० [5]यत् पञ्चजनभवया सर्वया विशा प्रजया[6] इन्द्रे स्तुतिवाचः असृक्षत[5] सृज्यन्ते, तदानीं स्तृणाति शत्रून् महत्त्वेन । मेधाविन स्तोतु ईश्वर पूजाया [7]स निवास[7] ॥ ७ ॥

इयमु ते अनुष्टुतिश्चकृषे तानि पौंस्या । प्रावश्चक्रस्य वर्तनिम् ॥ ८ ॥

इयम् । ऊँ इति । ते । अनुऽस्तुति । चकृषे । तानि । पौंस्या । प्र । अवः । चक्रस्य । वर्तनिम् ॥ ८ ॥

वेङ्कट० इयम् उ ते अनुष्टुतिः अनुक्रमेण [8]क्रियमाणा स्तुतिः[8], कृतवानसि तानि वीर्याणि । [9]प्र अवः चक्रस्य वर्तनिम्[9] । कात्तीवतस्य रथस्य मार्गं यथा अन्ये न बाधन्ते तथा करोषि[10] ॥ ८ ॥

अस्य वृष्णो व्योदन उरु क्रमिष्ट जीवसे । यवं न पश्व आ ददे ॥ ९ ॥

अस्य । वृष्णः । विऽओदने । उरु । क्रमिष्ट । जीवसे ।
यवम् । न । पश्वः । आ । ददे ॥ ९ ॥

वेङ्कट० अस्य वर्षितुः विविधे अन्ने स्वभूत विस्तीर्णं पदनिधानं करोति जीवनाय[11] सर्वं लोकः । तदा यवम्[12] पशव इव विविधम् ओदनम् आ ददे स्तुत्यात् । तथा नाम तत् स्तोत्रम् ॥ ९ ॥

तद् दधाना अवस्यवो युष्माभिर्दक्षपितरः । स्याम मरुत्वतो वृधे ॥ १० ॥

तत् । दधानाः । अवस्यवः । युष्माभिः । दक्षऽपितरः । स्याम । मरुत्वतः । वृधे ॥ १० ॥

वेङ्कट० [13]तत् स्तोत्रम् दधानाः[13] रक्षणम् इच्छन्तः युष्माभिः सह दक्षपितरः वयम् । दक्षो नाम प्रजापतिः । स्याम मरुत्वतः इन्द्रस्य वर्धनाय ॥ १० ॥

---

१. नास्ति मूको. २. यम् मूको. ३. जनयन्ति मूको. ४-४. नास्ति मूको. ५-५. सु. या. इ., ८. ६. °स्यत मूको. ७-७. सन्निवास मूको. ८-८. क्रममाण स्तुति मूको. ९-९. प्रारक्षश्चक्रस्य वर्तनीम् मूको. १०. करोति मूको. ११. इति वनाय मूको. १२. वयम् मूको.

यत्कृत्वियाय धाम्न ऋक्वभिः शूर नोनुमः । जेषामेन्द्र त्वया युजा ॥ ११ ॥

। ऋत्वियाय । धाम्ने । ऋक्वऽभिः । शूर । नोनुमः । जेषाम । इन्द्र । त्वया । युजा ॥ ११ ॥

कट० सत्यम् एव ऋतौ भवाय[1] धाम्ने[2] कल्याणाय तेजसे तुभ्यं मरुद्भिः सह शूर! स्तोत्रं कुर्मः[3]। जयेम[4] इन्द्र! त्वया सहायेन शत्रून् ॥ ११ ॥

अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः ।

यः शंसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्माँ अवन्तु देवाः ॥ १२ ॥

स्मे इति । रुद्राः । मेहना । पर्वतासः । वृत्रऽहत्ये । भरऽहूतौ । सऽजोषाः ।

: । शंसते । स्तुवते । धायि । पज्रः । इन्द्रऽज्येष्ठाः । अस्मान् । अवन्तु । देवाः ॥ १२ ॥

कट० [5]देवाः ये[5] अस्मान् रुद्राः मेहनेन सेचनेन[6] युक्ताः मेघाः शत्रुहननसाधने सङ्ग्रामे सङ्गताः[7], शंसते[8] स्तुवते च प्रदानाय निहितः वेगवान् पर्जन्यः, ते इमे इन्द्रज्येष्ठाः[8] देवाः रक्षन्तु । पुनः अस्मान् इति पूरणम् ॥ १२ ॥

[9]इति षष्ठाष्टके चतुर्थोऽध्याये त्रिचत्वारिंशो वर्गः[9] ॥

[६४]

[9]प्रगाथः काण्व ऋषिः । इन्द्रो देवता । गायत्री छन्दः[9] ।

उत् त्वा मन्दन्तु स्तोमाः कृणुष्व राधो अद्रिवः । अव ब्रह्मद्विषो जहि ॥ १ ॥

उत् । त्वा । मन्दन्तु । स्तोमाः । कृणुष्व । राधः । अद्रिऽवः । अव । ब्रह्मऽद्विषः । जहि ॥ १ ॥

वेङ्कट० त्वाम् उत् मादयन्तु स्तोमाः । कुरु अन्नं वज्रिन्! । अव जहि ब्रह्मणः द्वेष्टॄन् राक्षसान् ॥ १ ॥

पदा पणीँरराधसो नि बाधस्व महाँ असि । नहि त्वा कश्चन प्रति ॥ २ ॥

पदा । पणीन् । अराधसः । नि । बाधस्व । महान् । असि । नहि । त्वा । कः । चन । प्रति ॥ २ ॥

वेङ्कट० पदा असुरान् [10]अराधस्कान् नि बाधस्व । यतः महान् असि । नहि त्वा कः अपि प्रति[10] भवति ॥ २ ॥

त्वमीशिषे सुतानामिन्द्र त्वमसुतानाम् । त्वं राजा जनानाम् ॥ ३ ॥

---

१. य मूको. २. दाम्ने मूको. ३. कुर्वः मूको. ४. ह्येम मूको. ५-५. देवीय मूको. ६. सेचनाय मूको. ७. °त मूको. ८. °न्द्र ज्ये° मूको. ९-९. नास्ति मूको. १०-१०. अराधसर्गणि मति मूको.

त्वम्। ईशिषे। सुतानाम्। इन्द्र। त्वम्। असुतानाम्। त्वम्। राजा। जनानाम् ॥ ३ ॥

वेङ्कट० अभिषुतसोमानाम् अन्येषां च इन्द्र! त्वम् ईशिषे। त्वम् राजा जनानाम् ॥ ३ ॥

एहि प्रेहि क्षयो दिव्याघोषञ्चर्षणीनाम्। ओभे पृणासि रोदसी ॥ ४ ॥

आ। इहि। प्र। इहि। क्षयः। दिवि। आऽघोषन्। चर्षणीनाम्। आ। उभे इति। पृणासि। रोदसी इति ॥

वेङ्कट० आ गच्छ प्र [1]गच्छ निवासम् दिवः त्वम् आघोषणम्[1] कुर्वन् मनुष्याणाम् अर्थाय। आ पूरयसि द्यावापृथिव्यौ उभे अपि ॥ ४ ॥

त्वं चित् पर्वतं गिरिं शतवन्तं सहस्रिणम्। वि स्तोतृभ्यो रुरोजिथ ॥ ५ ॥

त्वम्। चित्। पर्वतम्। गिरिम्। शतऽवन्तम्। सहस्रिणम्। वि। स्तोतृऽभ्यः। रुरोजिथ ॥ ५ ॥

वेङ्कट० त्वं च पर्ववन्तम् मेघम्[2] शतसहस्रोदकवन्तम् वि जहि वज्रेण स्तोतृभ्यः ॥ ५ ॥

वयमु त्वा दिवा सुते वयं नक्तं हवामहे। अस्माकं काममा पृण ॥ ६ ॥

वयम्। ऊँ इति। त्वा। दिवा। सुते। वयम्। नक्तम्। हवामहे। अस्माकम्। कामम्। आ। पृण ॥ ६ ॥

वेङ्कट० निगदसिद्धा ॥ ६ ॥

[1]इति षष्ठाष्टके चतुर्थाध्याये चतुश्चत्वारिंशो वर्गः[1] ॥

क्व१ स्य वृषभो युवा तुविग्रीवो अनानतः। ब्रह्मा कस्तं सपर्यति ॥ ७ ॥

क्व। स्यः। वृषभः। युवा। तुविऽग्रीवः। अनानतः। ब्रह्मा। कः। तम्। सपर्यति ॥ ७ ॥

वेङ्कट० [3]क स वर्षिता[3] युवा बहुग्रीवः[4]। कण्ठस्था नाड्यो ग्रीवाः। कश्चित्[6] प्रति नमनमकुर्वन्। ब्राह्मणः कः तम् पूजयति ॥ ७ ॥

कस्य स्वित् सवनं वृषा जुजुष्वाँ अव गच्छति। इन्द्रं क उ स्विदा चके ॥ ८ ॥

कस्य। स्वित्। सवनम्। वृषा। जुजुष्वान्। अव। गच्छति। इन्द्रम्। कः। ऊँ इति। स्वित्। आ। चके ॥

वेङ्कट० कस्य स्वित् सवनम् वृषा प्रीयमाणः अव[7] गच्छति। इन्द्रम् वा कः जानाति ॥ ८ ॥

कं ते दाना असक्षत वृत्रहन् कं सुवीर्या। उक्थे क उ स्विदन्तमः ॥ ९ ॥

१-१. भजस्विष्म सदित्वे मायोषणम् मूको. २. मयं मूको. ३-३. क्वादित्त मूको. ४-४. क्षरयिता वि[२], कासु क्षरयिता अ[१]. ५. बहुश्रवः वि[२]; बहुयवः अ[१]. ६. कश्चिद् मूको. ७. वत् वि[२].

म् । ते । दानाः । असक्षत । वृत्रऽहन् । कम् । सुऽवीर्या । उक्थे । कः । ऊँ इति । स्वित् । अन्तमः ॥९॥

वेङ्कट० कम् तव दानानि सेवन्ते वृत्रहन् ! । कम् वा सुवीर्याणि सचन्ते[1] । शस्त्रे कः उ इत्थं[2] च अन्तिकतमः भवति ॥ ९ ॥

अयं ते मानुषे जने सोमः पूरुषु सूयते । तस्येहि प्र द्रवा पिब ॥ १० ॥

अयम् । ते । मानुषे । जने । सोमः । पूरुषु । सूयते । तस्य । आ । इहि । प्र । द्रव । पिब ॥ १० ॥

वेङ्कट० अयम् ते मानुषे जने सोमः पूरुनामसु राजसु सूयते । तम् आ गच्छ प्र द्रव पिब च । आगमनानन्तरं पात्रं प्रति गमनं प्रद्रवः ॥ १० ॥

अयं ते शर्यणावति सुषोमायामधि प्रियः । आर्जीकीये मदिन्तमः ॥ ११ ॥

अयम् । ते । शर्यणाऽवति । सुऽसोमायाम् । अधि । प्रियः । आर्जीकीये । मदिन्ऽतमः ॥ ११ ॥

वेङ्कट० [3]अयम् ते[3] शर्यणावति [4]कुरुक्षेत्रस्य जघनार्धभवे सरस्वत्ये[4] सुषोमाख्यायां नद्याम् प्रियकरः आर्जीकीयनाम्नि देशे च अत्यन्तं मदयिता सोमः । इत्यत्र सम्बन्धः ॥ ११ ॥

तमद्य राधसे महे चारुं मदाय घृष्वये । एहीमिन्द्र द्रवा पिब ॥ १२ ॥

तम् । अद्य । राधसे । महे । चारुम् । मदाय । घृष्वये । [5]आ । इहि । ईम् । इन्द्र । द्रव । पिब[5] ॥ १२ ॥

वेङ्कट० तम् अद्य महते धनाय चारुम् शत्रूणां घर्षणशीलाय[6] मदाय आ गच्छ इन्द्र ! द्रव पिब च ॥ १२ ॥

[1]इति पञ्चाष्टके चतुर्थाध्याये पञ्चचत्वारिंशो वर्गः[1] ॥

[६५]

[1]प्रगाथः काण्व ऋषिः । इन्द्रो देवता । गायत्री छन्दः[1] ।

यदिन्द्र प्रागपागुदङ् न्यग्वा हूयसे नृभिः । आ याहि तूयमाशुभिः ॥ १ ॥

यत् । इन्द्र । प्राक् । अपाक् । उदक् । न्यक् । वा । हूयसे । नृऽभिः । आ । याहि । तूयम् । आशुऽभिः ॥

वेङ्कट० यदि त्वम् इन्द्र ! अस्मदीयैः[7] मनुष्यैः प्राक् अपाक् उदक् न्यक् वा हूयसे, आ गच्छ क्षिप्रम् अश्वैः ॥ १ ॥

यद्वा प्रस्रवणे दिवो मादयासे स्वर्णरे । यद्वा समुद्रे अन्धसः ॥ २ ॥

---

१ याचते मूको. २. विश्वम मूको. ३-३. नास्ति मूको. ४-४. तु. ऋ ८,६,३९ भाष्यम्; दक्षिण सस्य जघनार्धभवे समरयन्ते मूको. ५-५. तु. द्रष्टव्यो १०मो मन्त्रः, ८,१७,११ च । ६. घर्ष° मूको. ७. अ-दीयैः मूको.

यत्। वा। प्रऽस्रवणे। दिवः। मादयासे। स्वःऽनरे। यत्। वा। समुद्रे। अन्धसः ॥ २ ॥

वेङ्कट० यत् वा अन्तरिक्षस्य प्रस्रवणे स्थाने मादयसि, स्वर्नरे वा अस्मिन् लोके[1], यत् वा अन्तरिक्षे सोमेन[2]। उत्तरत्र सम्बन्धः ॥ २ ॥

आ त्वा गीर्भिर्महामुरुं हुवे गामिव भोजसे । इन्द्र सोमस्य पीतये ॥ ३ ॥

आ। त्वा। गीःऽभिः। महाम्। उरुम्। हुवे। गाम्ऽइव। भोजसे। इन्द्र। सोमस्य। पीतये ॥ ३ ॥

वेङ्कट० निगदव्याख्याता इति ॥ ३ ॥

आ त इन्द्र महिमानं हरयो देव ते महः । रथे वहन्तु बिभ्रतः ॥ ४ ॥

आ। ते। इन्द्र। महिमानम्। हरयः। देव। ते। महः। रथे। वहन्तु। बिभ्रतः ॥ ४ ॥

वेङ्कट० आ वहन्तु तव इन्द्र! महिमानम् हरयः। [3]देव! ते[3] महः [4]अश्वा आ वहन्तु[4] रथे धारयन्तः ॥ ४ ॥

इन्द्र गृणीष उ स्तुषे महाँ उग्र ईशानकृत् । एहि नः सुतं पिब ॥ ५ ॥

इन्द्र। गृणीषे। ऊँ इति। स्तुषे। महान्। उग्रः। ईशानऽकृत्। आ। इहि। नः। सुतम्। पिब ॥ ५ ॥

वेङ्कट० इन्द्र! उच्यसे स्तूयसे, महान् उद्गूर्णः ऐश्वर्यकृत्। आ इहि, नः सुतम् पिब ॥ ५ ॥

सुतावन्तस्त्वा वयं प्रयस्वन्तो हवामहे । इदं नो बर्हिरासदे ॥ ६ ॥

सुतऽवन्तः। त्वा। वयम्। प्रयस्वन्तः। हवामहे। इदम्। नः। बर्हिः। आऽसदे ॥ ६ ॥

वेङ्कट० सुतसोमवन्तः हविष्मन्तः च त्वा वयम् हवामहे। इदम्[5] अस्माकम् बर्हिः आसनाय[6] सर्वेति[7] ॥ ६ ॥

[8]इति षष्ठाष्टके चतुर्थाध्याये षट्चत्वारिंशो वर्गः[8] ॥

यच्चिद्धि शश्वतामसीन्द्र साधारणस्त्वम् । तं त्वा वयं हवामहे ॥ ७ ॥

यत्। चित्। हि। शश्वताम्। असि। इन्द्र। साधारणः। त्वम्। तम्। त्वा। वयम्। हवामहे ॥ ७ ॥

वेङ्कट० यत् चित् हि बहूनाम् भवसि इन्द्र! समानः त्वम्। तथाऽपि तम् त्वा वयम् हवामहे ॥ ७ ॥

इदं ते सोम्यं मध्वधुक्षन्नद्रिभिर्नरः । जुषाण इन्द्र तत् पिब ॥ ८ ॥

इदम्। ते। सोम्यम्। मधु। अधुक्षन्। अद्रिऽभिः। नरः। जुषाणः। इन्द्र। तत्। पिब ॥ ८ ॥

---

१. तु. ऋ ८,६,३९. २. तु. ऋ ८,११,१५. ३-३. नास्ति वि. ४-४. आवहन्तु मूको. ५. इदं मूको. ६. आसनाय मूको. ७. तमर्थे० मूको. ८-८. नास्ति मूको.

वेङ्कट० इदम् ते सोममयम् मधु अधुक्षत् सुधियः ग्रावभिः । सेवमानः[1] इन्द्र! पिब तत् ॥ ८ ॥

विश्वाँ अर्यो विपश्चितोऽति ख्यस्तूयमा गहि । अस्मे धेहि श्रवो बृहत् ॥ ९ ॥

विश्वान् । अर्यः । विपःऽचितः । अति । ख्यः । तूयम् । आ । गहि । अस्मे इति । धेहि । श्रवः । बृहत् ॥ ९ ॥

वेङ्कट० विश्वान् स्वामी [2]विपश्चितः अति ख्यः अतीत्य अस्मान् एव पश्य[2]। तदर्थं क्षिप्रम् [3]आ गहि[3], अस्मासु धेहि[4] च[5] महत् अन्नम् ॥ ९ ॥

दाता मे पृषतीनां राजा हिरण्यवीनाम् । मा देवा मघवा रिषत् ॥ १० ॥

दाता । मे । पृषतीनाम् । राजा । हिरण्यऽवीनाम् । मा । देवाः । मघऽवा । रिषत् ॥ १० ॥

वेङ्कट० प्रदाता मे हिरण्यपरिवीतानाम्[6] पृषतीनाम् राजा धनवान् हे देवाः! मा [7]रिष्टो भवतु[7] ॥ १० ॥

सहस्रे पृषतीनामधि श्चन्द्रं बृहत् पृथु । शुक्रं हिरण्यमा ददे ॥ ११ ॥

सहस्रे । पृषतीनाम् । अधि । चन्द्रम् । बृहत् । पृथु । शुक्रम् । हिरण्यम् । आ । ददे ॥ ११ ॥

वेङ्कट० पृषद्वर्णानां गवाम् [8]सहस्रे उपरि[8] स्थितम् आह्लादकम् उच्छ्रितम् [9]विस्तीर्णम् उज्ज्वलम् हिरण्यम्[9] अहम् आ ददे ॥ ११ ॥

नपातो दुर्गहस्य मे सहस्रेण सुराधसः । श्रवो देवेष्वक्रत ॥ १२ ॥

नपातः । दुःऽगहस्य । मे । सहस्रेण । सुऽराधसः । श्रवः । देवेषु । अक्रत ॥ १२ ॥

वेङ्कट० ध्यपेक्षावार्जितस्य दुर्गहस्य दुःखे गाहमानस्य[10] दरिद्रस्य मे गवाम् सहस्रेण सह शोभनधना राजानः अन्नम् देवेषु प्रीतेषु अप्रतः प्रापय्छन्निति [11]"कञ्चन राजानं निर्दिशति"[11] ॥१२॥

[1]इति षष्ठाष्टके चतुर्थाध्याये सप्तचत्वारिंशो वर्गः[1] ॥

[६६]

[1]कलिः प्रागाथ ऋषिः । इन्द्रो देवता । प्रगाथश्छन्दः (=विषमा बृहत्यः, समाः सतोबृहत्यः), पञ्चदशी अनुष्टुप्[1] ।

तरोभिर्वो विदद्वसुमिन्द्रं सबाध ऊतये ।
बृहद्गायन्तः सुतसोमे अध्वरे हुवे भरं न कारिणम् ॥ १ ॥

---

१. सेव° मूको. २-२. विपश्चितोऽति कुल्योऽतीत्यस्मानेव पश्य मूको. ३-३. नास्ति मूको. ४. देहि मूको. ५. नास्ति वि°. ६. °वीता° मूको. ७-७. रिष्टोऽभवत् मूको. ८-८. °से उ···मुप° ९-९. °लम्ब(°ज्वा भा°)ऽहिरण्य° मूको. १०. दाह° मूको. ११-११. दिव···राजा° मूको.

तरे॑ऽभि । वः॒ । वि॒दत्ऽव॑सुम् । इन्द्र॑म् । स॒ऽबाधः॑ । ऊ॒तये॑ ।
बृ॒हत् । गाय॑न्तः । सु॒तऽसो॑मे । अ॒ध्व॒रे । हु॒वे । भर॑म् । न । का॒रिण॑म् ॥ १ ॥

वेङ्कट० वेदयद्वसुम् इन्द्रम् बाधासहिता रक्षणार्थम् बृहत् साम गायन्त[1] सुतसोमे यज्ञे परिचरन्तेति शेष । तम् अहं युष्मदर्थं ह्वयामि भर्तारं कुटुम्बिनम् इव करणशीलम् इति ॥ १ ॥

न यं दु॒ध्रा वर॑न्ते॒ न स्थि॒रा मुरो॒ मदे॑ सुशि॒प्रमन्ध॑सः ।
य आ॒दृत्या॑ शशमा॒नाय॑ सुन्व॒ते दाता॑ जरि॒त्र उ॒क्थ्य॑म् ॥ २ ॥

न । यम् । दु॒ध्राः । वर॑न्ते । न । स्थि॒राः । मुरः॑ । मदे॑ । सु॒ऽशि॒प्रम् । अन्ध॑सः ।
यः । आ॒ऽदृत्य॑ । श॒श॒मा॒नाय॑ । सु॒न्व॒ते । दाता॑ । ज॒रि॒त्रे । उ॒क्थ्य॑म् ॥ २ ॥

वेङ्कट० न यम् दुर्धरा वारयन्ति[2], न च स्थिरा मनुष्या सोमस्य मदन सुहनुम्[3], य[4] आदरं कृत्वा यजमानाय सुन्वते स्तुवते[5] च प्रशस्य धनम् दाता इति ॥ २ ॥

यः श॒क्रो मृ॒क्षो अश्व्यो॒ यो वा॒ कीजो॑ हिर॒ण्ययः॑ ।
स ऊ॒र्वस्य॑ रेजय॒त्यपा॑वृति॒मिन्द्रो॒ गव्य॑स्य वृत्र॒हा ॥ ३ ॥

यः । श॒क्रः । मृ॒क्षः । अश्व्यः॑ । यः । वा॒ । कीजः॑ । हि॒र॒ण्ययः॑ ।
सः । ऊ॒र्वस्य॑ । रे॒ज॒य॒ति॒ । अप॑ऽवृतिम् । इन्द्रः॑ । गव्य॑स्य । वृ॒त्र॒ऽहा ॥ ३ ॥

वेङ्कट० य शक स्तोतृणा परिचारक[6] परिचरणीयो वा अश्वेषु कुशल, य वा कीज[7] इति अद्भुतमाह । किम् अस्य जन्मेदमद्भुत दृष्ट्वा पृच्छन्ति । हिरण्मयशरीर, स महत गोसङ्घस्य अपवरणम् कम्पयति विवृतद्वार व्रजं करोति इन्द्र वृत्रहा ॥ ३ ॥

निखा॑तं चि॒द्यः पु॑रुसंभृ॒तं वसू॒दिद्वप॑ति दा॒शुषे॑ ।
व॒ज्री सु॑शि॒प्रो हर्य॑श्व॒ इत् क॑र॒दिन्द्रः॒ क्रत्वा॒ यथा॒ वश॑त् ॥ ४ ॥

नि॒ऽखा॑तम् । चि॒त् । यः । पु॒रु॒ऽस॒भृ॒तम् । वसु॑ । उत् । इत् । वप॑ति । दा॒शुषे॑ ।
व॒ज्री । सु॒ऽशि॒प्रः । हरि॑ऽअश्वः । इत् । क॒र॒त् । इन्द्रः॑ । क्रत्वा॑ । यथा॑ । वश॑त् ॥ ४ ॥

वेङ्कट० भूम्याम् निखातम् अपि बहु च यत् यत सम्भृतम्[8] वसु यजमानाय य दातुम् उत् वपति । वज्री सुहनु हर्यश्व एव यत् करोति इन्द्र, कर्मणा यथा कर्तुं कामयते ॥ ४ ॥

---

१ गायत मूको. २ °य तु मूको ३ सह° मूको ४ य मूको. ५ °बन्त मूको
६. °रक मूको ७. °गेश मूको. ८ मत मूको ९ पुरसं° मूको

यद् वावन्थ पुरुष्टुत पुरा चिच्छूर नृणाम् ।
वयं तत् त इन्द्र सं भरामसि यज्ञमुक्थं तुरं वचः ॥ ५ ॥

यत् । ववन्थ । पुरुऽस्तुत । पुरा । चित् । शूर । नृणाम् ।
वयम् । तत् । ते । इन्द्र । सम् । भरामसि । यज्ञम् । उक्थम् । तुरम् । वचः ॥ ५ ॥

वेङ्कट० यत् अचीकमथाः[1] पुरुष्टुत! पुरा [2]चित् विक्रान्त![2] नृणाम् [3]सकाशात्, वयम्[3] तत् ते इन्द्र! सम्प्रति सम् भरामः यज्ञम् शस्त्रं च क्षिप्रं वाच्यम्[4] इति ॥ ५ ॥

[5]इति षष्ठाष्टके चतुर्थाध्याये अष्टाचत्वारिंशो वर्गः[5] ॥

सचा सोमेषु पुरुहूत वज्रिवो मदाय द्युक्ष सोमपाः ।
त्वमिद्धि ब्रह्मकृते काम्यं वसु देष्ठः सुन्वते भुवः ॥ ६ ॥

सचा । सोमेषु । पुरुऽहूत । वज्रिऽवः । मदाय । द्युक्ष । सोमऽपाः ।
त्वम् । इत् । हि । ब्रह्मऽकृते । काम्यम् । वसु । देष्ठः । सुन्वते । भुवः ॥ ६ ॥

वेङ्कट० सह सोमेषु पुरुहूत! वज्रिन्! सोमं पातुम् [6]मदाय हे द्युमन्![6] सोमस्य पाता!। त्वम् एव हि स्तोत्रकृते कमनीयम् वसु दातृतमः सुन्वते भवसि। सर्वं धनं प्रयच्छतीत्यर्थः ॥ ६ ॥

वयमेनमिदा ह्योऽपीपेमेह वज्रिणम् ।
तस्मा उ अद्य समना सुतं भरा नूनं भूषत श्रुते ॥ ७ ॥

वयम् । एनम् । इदा । ह्यः । अपीपेम । इह । वज्रिणम् ।
तस्मै । ऊँ इति । अद्य । समना । सुतम् । भर । आ । नूनम् । भूषत । श्रुते ॥ ७ ॥

वेङ्कट० वयम् एनम् इदानीम् ह्यः च आप्याययामः अत्र वज्रिणम्। तस्मै[7] [8]एव अद्य[8] सङ्ग्रामार्थम् सुतम् सोमम् भर। आ[9] भूषत आभवतु[10] आगच्छतु सम्प्रति [11]स्तोत्रे श्रुते[11] ॥ ७ ॥

वृकश्चिदस्य वारण उरामथिरा वयुनेषु भूषति ।
सेमं नः स्तोमं जुजुषाण आ गहीन्द्र प्र चित्रया धिया ॥ ८ ॥

वृकः । चित् । अस्य । वारणः । उराऽमथिः । आ । वयुनेषु । भूषति ।
सः । इमम् । नः । स्तोमम् । जुजुषाणः । आ । गहि । इन्द्र । प्र । चित्रया । धिया ॥ ८ ॥

---

1. अचीकम मूको. 2-2. चि … मूको. 3-3. विशाखपम् मूको. 4. आप्यम् मूको. 5-5. नास्ति मूको. 6-6. मदाय मरत मूको. 7. तस्मात् मूको. 8-8. द्यावाय मूको. 9. नास्ति मूको. 10. भवतु मूको. 11. °त्रे … ते मूको.

वेङ्कट० स्तेन अपि इन्द्रस्य धारयिता गच्छतो[1] बहूनां मथिता[2] आ भवति मार्गेषु, आनुकूल्यम् एव भजते। स॰ त्वम् इमम् नः स्तोमम्[3] सेवमानः आगच्छ। इन्द्र। चित्रम् कर्म उद्दिश्य प्र आगच्छेति ॥ ८ ॥

कदू न्व१स्याकृतमिन्द्रस्यास्ति पौंस्यम् ।
केनो नु कं श्रोमतेन न शुश्रुवे जनुषः परि वृत्रहा ॥ ९ ॥

कत् । ऊँ इति । नु । अस्य । अकृतम् । इन्द्रस्य । अस्ति । पौंस्यम् ।
केनो इति । नु । कम् । श्रोमतेन । न । शुश्रुवे । जनुषः । परि । वृत्रऽहा ॥ ९ ॥

वेङ्कट० किम् नु खलु अस्य अकृतम् इन्द्रस्य भवति वीर्यम्। सर्वमेव करोति। केन नु खलु श्रवणीयेन वीर्येण न श्रूयते[4] जन्मनः प्रभृति वृत्रहा। यद्यद् इतः पूर्वं चकार सर्वेण एव तेन कर्मणा श्रूयत इति ॥ ९ ॥

कदू महीरधृष्टा अस्य तविषीः कदु वृत्रघ्नो अस्तृतम् ।
इन्द्रो विश्वान् बेकनाटाँ अहर्दृश उत क्रत्वा पणीँरभि ॥ १० ॥

कत् । ऊँ इति । महीः । अधृष्टाः । अस्य । तविषीः । कत् । ऊँ इति । वृत्रऽघ्नः । अस्तृतम् ।
इन्द्रः । विश्वान् । बेकऽनाटान् । अहःऽदृशः । उत । क्रत्वा । पणीन् । अभि ॥ १० ॥

वेङ्कट० कदा नु खलु अस्य इन्द्रस्य महान्ति बलानि धर्षणीयानि(?) अधर्षितानि आसन्। कदा खलु वृत्रघ्नः[5] भेत्तव्यम् अस्तृतम्[6] भवति। अत्र यास्कः (६,२६)—"बेकनाटाः खलु कुसीदिनो भवन्ति। द्विगुणकारिणो वा। द्विगुणदायिनो वा। द्विगुणं कामयन्त इति वा। 'इन्द्रो विश्वान्°।' इन्द्रः सर्वान् बेकनाटान् अहर्दृशः[7] सूर्यदृशो य इमान्यहानि पश्यन्ति न पराणीति वा। अभिभवति कर्मणा पणींश्च वणिजः" इति ॥ १० ॥

'इति षष्ठाष्टके चतुर्थाध्याये एकोनपञ्चाशो वर्गः'[8] ॥

वयं घा ते अपूर्व्येन्द्र ब्रह्माणि वृत्रहन् ।
पुरूतमासः पुरुहूत वज्रिवो भृतिं न प्र भरामसि ॥ ११ ॥

वयम् । घ । ते । अपूर्व्या । इन्द्र । ब्रह्माणि । वृत्रऽहन् ।
पुरुऽतमासः । पुरुऽहूत । वज्रिऽवः । भृतिम् । न । प्र । भरामसि ॥ ११ ॥

---

१. °च्छता मूको. २. पथिका मूको. ३. स्तोत्र° मूको. ४. श्रद्धते वि°; श्रयं दधते अ°. ५. °श मूको. ६. भवत मूको. ७. नास्ति मूको. ८-८. नास्ति मूको.

वेङ्कट० वयम् खलु ते इन्द्र! नूतनानि ब्रह्माणि वृत्रहन्![1] बहुतमाः अनेके वयम् पुरुहूत! वज्रिन्! कर्मकराय[2] भृतिम्[3] इव प्र भरामः[4] ॥ ११ ॥

पूर्वीश्चिद्धि त्वे तुविकूर्मिन्नाशसो हवन्त इन्द्रोतयः ।
तिरश्चिदर्यः सवना वसो गहि शविष्ठ श्रुधि मे हवम् ॥ १२ ॥

पूर्वीः । चित् । हि । त्वे इति । तुविऽकूर्मिन् । आऽशसः । हवन्ते । इन्द्र । ऊतयः ।
तिरः । चित् । अर्यः । सवना । आ । वसो इति । गहि । शविष्ठ । श्रुधि । मे । हवम् ॥ १२ ॥

वेङ्कट० बहूनि हि आशंसनानि त्वयि बहुकर्मन्![5] स्थितानि[6] रक्षाश्च[7] स्तोतारः हवन्ते । तिरस्कृत्य अरेः सवनानि अरीन् वा आ गच्छ वासयितः! । बलवत्तम! शृणु मे ह्वानम् ॥ १२ ॥

वयं घा ते त्वे इद्विन्द्र विप्रा अपि ष्मसि ।
नहि त्वदन्यः पुरुहूत कश्चन मघवन्नस्ति मर्डिता ॥ १३ ॥

वयम् । घ । ते । त्वे इति । इत् । ऊँ इति । इन्द्र । विप्राः । अपि । स्मसि ।
नहि । त्वत् । अन्यः । पुरुऽहूत । कः । चन । मघऽवन् । अस्ति । मर्डिता ॥ १३ ॥

वेङ्कट० वयम् खलु तव स्वभूताः । तथा सति त्वयि एव इन्द्र! मेधाविनः अपि भवामः । नहि त्वत् अन्यः इति स्पष्टम् ॥ १३ ॥

त्वं नो अस्या अमतेरुत क्षुधोऽभिशस्तेरव स्पृधि ।
त्वं न ऊती तव चित्रया धिया शिक्षा शचिष्ठ गातुवित् ॥ १४ ॥

त्वम् । नः । अस्याः । अमतेः । उत । क्षुधः । अभिऽशस्तेः । अव । स्पृधि ।
त्वम् । नः । ऊती । तव । चित्रया । धिया । शिक्ष । शचिष्ठ । गातुऽवित् ॥ १४ ॥

वेङ्कट० अस्याः दुर्मतेः दारिद्र्यकृतायाः तथा क्षुधः अभिशस्तेः च अव[8] स्पृधि विमोचय । त्वम् अस्मभ्यम्[9] देहि[10] हि तव रक्षणेन चित्रेण कर्मणा शचिष्ठ![11] मार्गज्ञः ॥ १४ ॥

सोम इद्वः सुतो अस्तु कलयो मा बिभीतन ।
अपेदेष ध्वस्मायति स्वयं घैषो अपायति ॥ १५ ॥

---

१. °ब्रह्म मूको. २. कर्म कारय वि°. ३. इदं मूको. ४. हरा° म°. ५. °नै मूको. ६. स्थिरतानि मूको. ७. रक्षा° मूको. ८. नास्ति मूको. ९. मधुमन् मूको. १०. देहि मूको. ११. शचिष्ठ वि°; शचिष्ठ म°.

सोम॑ । इव । च । सुत । अस्तु । कल्य । मा । बिभीतन ।
अप॑ । इव । एष । ध्वस्मा । अयति । स्वयम् । घ । एव । अप॑ । अयति ॥ १५ ॥

वेङ्कट० सोम एव क्षिप्रम् इन्द्रार्थं युष्माकम् सुत भवतु । हे कल्य ![1] । पुत्राणां ज्ञातीनां च [2]सम्बोधनम् । मा बिभीतन[2] । अप गच्छतु भय ध्वसनशील राक्षस स्वयम् एव ॥ १५ ॥

[3]इति षष्ठाष्टके चतुर्थाध्याये पञ्चाशो वर्ग[3] ॥

[६७]

[1]मत्स्य साम्मद ऋषि, मैत्रावरुणिर्मान्य, बहवो वा मत्स्या जालनद्धा । आदित्या देवता, दशम्यादिद्वादश्यन्तानाम् अदिति । गायत्री छन्द[1] ।

त्यान् नु क्षत्रियाँ अव आदित्यान् याचिषामहे । सुमृळीकाँ अभिष्टये ॥ १ ॥

त्यान् । नु । क्षत्रियान् । अव॑ । आदित्यान् । याचिषामहे । सुऽमृळीकान् । अभिष्टये ॥ १ ॥

वेङ्कट० शौनक[2]—ऋषि [2]साम्मदो मत्स्य । ऋषिमत्स्य मैत्रावरुणिं वा मत्स्यानेव वा विदु सूक्तेऽस्मिन्—त्यान् नु क्षत्रियान् अव ।

तान् क्षिप्र[3] जाल्या क्षत्रियान् रक्षणम् अदित्यान् याचिषामहे सुखयितॄन् अभिगमनाय अभिमताय वा । जालात् [4]निर्गमन प्रार्थितम्[4] ॥ १ ॥

मित्रो नो अत्यंहतिं वरुणः पर्षदर्यमा । आदित्यासो यथा विदुः ॥ २ ॥

मित्र । न । अति॑ । अंहतिम् । वरुण । पर्षत् । अर्यमा । आदित्यास॑ । यथा॑ । विदु ॥ २ ॥

वेङ्कट० मित्रादय अस्मान् अंहतिम् जालम्[5] अति नयन्तु, यथा जानन्ति ॥ २ ॥

तेषां हि चित्रमुक्थ्यं१ वरूथमस्ति दाशुषे । आदित्यानामरंकृते ॥ ३ ॥

तेषाम् । हि । चित्रम् । उक्थ्यम् । वरूथम् । अस्ति । दाशुषे । आदित्यानाम् । अरम्ऽकृते ॥३॥

वेङ्कट० तेषाम् हि चायनीयं[8] प्रशस्य धन विद्यते आदित्यानाम् प्रयच्छते पर्याप्तकारिणे यजमानाय ॥ ३ ॥

महि वो महतामवो वरुण मित्रार्यमन् । अवांस्या वृणीमहे ॥ ४ ॥

महि॑ । व । महताम् । अव॑ । वरुण । मित्र॑ । अर्यऽमन् । अवांसि । आ । वृणीमहे ॥ ४ ॥

---

१. कल्य मूको २ २ °पुत्रमविधिरवान् वि°, °भनमाम्बिहितान् भ° ३ ३ नास्ति मूको ४ तु बृदे ६,८७ ९१ ५ ५ साम्मद मत्स्य इर्षस्य मैत्रावरुणिं च वा मत्स्यानेव विदु सूक्तरत् । त्या क्षत्रिया अव तान् क्षिप्रम् मूको ६ ६ °मन प्रार्थित मूको ७ जलम् मूक ८ याचनीयम् मूको.

वेङ्कट० महत् व महताम् रक्षणम् वरुण! मित्र! अर्यमन्!। तथा सति भवतां रक्षणानि आ वृणीमहे ॥ ४ ॥

जीवान् नो अभि धेतनादित्यासः पुरा हथात् । कद्ध स्थ हवनश्रुतः ॥ ५ ॥

जीवान् । नः । अभि । धेतन । आदित्यासः । पुरा । हथात् । कत् । ह । स्थ । हवनऽश्रुतः ॥५॥

वेङ्कट० यास्क (६,२७)— 'जीवतो नोऽभिधावताऽऽदित्याः । पुरा[1] हननात् । क्व नु[2] स्थ ह्वानश्रुतः ।' इति । मत्स्यानां जालमापन्नानाम् एतद् आर्षं वदयन्ते' इति ॥ ५ ॥

[3]इति पञ्चाष्टके चतुर्थाध्याये एकपञ्चाशो वर्गः[3] ॥

यद्वः श्रान्ताय सुन्वते वरूथमस्ति यच्छर्दिः । तेना नो अधि वोचत ॥ ६ ॥

यत् । वः । श्रान्ताय । सुन्वते । वरूथम् । अस्ति । यत् । छर्दिः । तेन । नः । अधि । वोचत ॥

वेङ्कट० यत् व श्रान्ताय सुन्वते वरणीयं धनम् अस्ति, यत् च गृहम्, तेन अस्मान् अधि ब्रूत। तदुभयं दत्त्वाऽधिवचनं च कुरुत ॥ ६ ॥

अस्ति देवा अंहोरुर्वस्ति रत्नमनागसः । आदित्या अद्भुतैनसः ॥ ७ ॥

अस्ति । देवाः । अंहोः । उरु । अस्ति । रत्नम् । अनागसः । आदित्याः । अद्भुतऽएनसः[4] ॥७॥

वेङ्कट० अस्ति देवाः! आहन्तुः पापशीलस्य बहु हिंसनम्। अस्ति रत्नम्[5] अपापस्य आदित्याः! अभूतपापाः, यद् वा[6] ये पापकृताः महद् एनः कुर्वन्ति ते तथोक्ताः ॥ ७ ॥

मा नः सेतुः सिषेदयं महे वृणक्तु नस्परि । इन्द्र इद्धि श्रुतो वशी ॥ ८ ॥

मा । नः । सेतुः । सिसेत् । अयम् । महे । वृणक्तु । नः । परि । इन्द्रः । इत् । हि । श्रुतः । वशी ॥

वेङ्कट० मा अस्मान् अयम् सेतुः जालं बध्नातु । महते कर्मणे अस्मान् परि वृणक्तु वर्जयतु। इन्द्र एव विश्रुतः स्वतन्त्रो जालात् मोचयतु इति ॥ ८ ॥

मा नो मृचा रिपूणां वृजिनानामविष्यवः । देवा अभि प्र मृक्षत ॥ ९ ॥

मा । नः । मृचा । रिपूणाम् । वृजिनानाम् । अविष्यवः । देवाः । अभि । प्र । मृक्षत ॥ ९ ॥

वेङ्कट० मृचिर्हिंसाकर्मा। 'मत् क्षुरेण मचयत' (शौ ८, २, १७) इति मन्त्रः । मा अस्मान्

---

१. अनु परा वि[2], अनुपुरा अ[3]   २-२. क्व वा ध्रुव मूको.   ३-३. नास्ति मूको.   ४. मा५१ वा स५३ वेति विमृश्यम् ।   ५. रत्न मूको.   ६. व मूको.

रिपूणाम् हिंसकानाम् मृचा जालेन । ते 'अभि प्र मृक्षत'[1] इत्यभिप्राय ।[2] देवा ! । अभिप्रमर्शनम्[3] उपरि जालस्य प्रेरणम् ॥ ९ ॥

उत त्वामदिते मह्यहं देव्युप ब्रुवे । सुमृळीकामभिष्टये ॥ १० ॥

उत । त्वाम् । अदिते । महि । अहम् । देवि । उप । ब्रुवे । सुऽमृळीकाम् । अभिष्टये ॥ १० ॥

वेङ्कट० आदित्यानां मातुरियं स्तुतिः मत्स्यानामन्यतमस्येति ॥ १० ॥

'इति षष्ठाष्टके चतुर्थाध्याये द्विपञ्चाशो वर्गः'[4] ॥

पर्षि दीने गंभीर आँ उग्रपुत्रे जिघांसतः । माकिस्तोकस्य नो रिषत् ॥ ११ ॥

पर्षि । दीने । गभीरे । आ । उग्रऽपुत्रे । जिघांसतः । माकिः । तोकस्य । नः । रिषत् ॥ ११ ॥

वेङ्कट० आ पर्षि क्षीणे[5] उदके । 'गभीरम्'[6] (निघ १,१२) इति उदकनाम । उद्गूर्णपुत्रे[7] जिघांसतः शत्रोः । मा कश्चित् अस्माकं पुत्रं हिंसीत् ॥ ११ ॥

अनेहो न उरुव्रज उरूचि वि प्रसर्तवे । कृधि तोकाय जीवसे ॥ १२ ॥

अनेहः । नः । उरुऽव्रजे । उरूचि । वि । प्रऽसर्तवे । कृधि । तोकाय । जीवसे ॥ १२ ॥

वेङ्कट० अनहरं अस्मान् हे विस्तीर्णगमने[8] उरूचि ! दूरं हीयं गता भवति, तथा उरुत्वं च अञ्चति । प्रसरणाय वि कुरु 'आगतं अपनय तोकार्थम् जीवितुम्'[8] । यथा जीवेम वयम् पुत्रान् रक्षितुम् ॥ १२ ॥

ये मूर्धानः क्षितीनामदब्धासः स्वयशसः । व्रता रक्षन्ते अद्रुहः ॥ १३ ॥

ये । मूर्धानः । क्षितीनाम् । अदब्धासः । स्वऽयशसः । व्रता । रक्षन्ते । अद्रुहः ॥ १३ ॥

वेङ्कट० ये उच्छ्रिता प्रजानाम् अहिंसिता स्वकीर्तय[9] कर्माणि रक्षन्ते द्रोहरहिता ॥ १३ ॥

ते न आस्नो वृकाणामादित्यासो मुमोचत । स्तेनं बद्धमिवादिते ॥ १४ ॥

ते । नः । आस्नः । वृकाणाम् । आदित्यासः । मुमोचत । स्तेनम् । बद्धम्ऽइव । अदिते ॥ १४ ॥

वेङ्कट० ते न अस्मान् आस्यात्[10] हिंसकानाम् आदातॄणाम् वा आदित्या मुञ्चत त्व[11] च अदिते । स्तेनम् इव बद्धम्[12] ॥ १४ ॥

अपो षु ण इयं शरुरादित्या अप दुर्मतिः । अस्मदेत्वजघ्नुषी ॥ १५ ॥

---

१ हि प्रक्षत मूको २ १४५ वि॰, तृष्ठ्यादय अ॰ ३ अभिप्रदर्श अभिप्रमर्श॰ अ॰ ४-४ नास्ति मूको ५. क्षीणम् मूको ६ हीरम् मूको. ७. उद्गीर्णे पु॰ मूको ८-८. जान्नानिनयनो(ते अ॰)कार्थे जीवि॰ मूको. ९ स्वकीर्णय मूको १० अस्मान् वि॰, अस्माद अ॰. ११ त मूको १२ बधम् मूको.

अपो इति । सु । नः । इयम् । शर्रुः । आदित्याः । अर्प । दुःऽमतिः । अस्मत् । एतु । अजघ्नुषी ॥

वेङ्कट० अस्मत्तः अपगच्छतु[1] आदित्याः । अहिंसन्ती[2] आदित्यस्य[3] इयम् शरु[4] प्रसितिः दुर्मतिः च[5] ॥१५॥

[6] इति षष्ठाष्टके चतुर्थाध्याये त्रिपञ्चाशो वर्गः[7] ॥

शश्वद्धि वः सुदानव आदित्या ऊतिभिर्वयम् । पुरा नूनं बुभुज्महे ॥ १६ ॥

शश्वत् । हि । वः । सुऽदानवः । आदित्याः । ऊतिऽभिः । वयम् । पुरा । नूनम् । बुभुज्महे ॥१६॥

वेङ्कट० शश्वत् हि युष्माकम् हे सुदानाः आदित्याः । रक्षणैः वयम् भुञ्ज्महे पुरा सम्प्रति च ॥ १६ ॥

शश्वन्तं हि प्रचेतसः प्रतियन्तं चिदेनसः । देवाः कृणुथ जीवसे ॥ १७ ॥

शश्वन्तम् । हि । प्रऽचेतसः । प्रतिऽयन्तम् । चित् । एनसः । देवाः । कृणुथ । जीवसे ॥ १७ ॥

वेङ्कट० बहुमपि हि नन[8] हे सुमतय प्रतिगच्छन्तं[9] शत्रून् पापकृत देवाः । कुरुत जीवनाय ॥ १७ ॥

तत् सु नो नव्यं सन्यस आदित्या यन्मुमोचति । बन्धाद् बद्धमिवादिते ॥१८॥

तत् । सु । नः । नव्यम् । सन्यसे । आदित्याः । यत् । मुमोचति । बन्धात् । बद्धम्ऽइव । अदिते ॥

वेङ्कट० तत्[10] सुष्ठु अस्माकं नवतरम् सम्भजनाय[11] भवतु, आदित्याः । यत् अस्मान् मुञ्चति बन्धात्[12] बद्धम्[13] इव अदिते । च ॥ १८ ॥

नास्माकमस्ति तत् तर आदित्यासो अतिष्कदे । यूयमस्मभ्यं मृळत ॥ १९ ॥

न । अस्माकम् । अस्ति । तत् । तरः । आदित्यासः । अतिऽस्कदे । यूयम् । अस्मभ्यम् । मृळत ॥

वेङ्कट० न अस्माकम् अस्ति स वेगो हे आदित्याः, यो वेगः प्रसितेः अतिस्कन्दनाय भवति । तथा सति यूयम् अस्मभ्यम् सुखं कुरुत ॥ १९ ॥

मा नो हेतिर्विवस्वत आदित्याः कृत्रिमा शरुः । पुरा नु जरसो वधीत् ॥२०॥

मा । नः । हेतिः । विवस्वतः । आदित्याः । कृत्रिमा । शरुः । पुरा । नु । जरसः । वधीत् ॥२०॥

वेङ्कट० मा अस्मान् वैवस्वतस्य[14] यमस्य हेतिः कृत्रिमा प्रसितिः पुरा नु जरसः वधीत् । यूयमिव[15] जीर्णाः स्याम अहताः[16] ॥ २० ॥

---

1 °च्छतु वि[2] 2 °हन्ति मूको 3 अधिकस्य मूको 4 शत्रु मूको 5-5 नास्ति 6-6 नास्ति मूको 7 धन मूको 8 °च्छन्त मूको 9 मद्य वि[2], मन्त, तव अ[2] मूको, 10 समवन वि[2] समत नोप अ[1] 11 बधात् का 12 बद्धम मूको 13 वैस्वत स्य मूको 14 °यमव मूको 15 हता मूको

वि षु द्वेषो व्यंहतिमादित्यासो वि संहितम् । विष्वग्वि वृहता रपः ॥ २१ ॥

वि । सु । द्वेषः । वि । अंहतिम् । आदित्यासः । वि । सम्ऽहितम् । विष्वक् । वि । वृहत । रपः ॥२१॥

वेङ्कट० वि वृहत द्वेषः, 'वि वृहत अंहतिम् आदित्याः! संहितम्' जालं च, विषूचीनम् वि वृहत पापम् इति ॥ २१ ॥

'इति षष्ठाष्टके चतुर्थाध्याये चतुःपञ्चाशो वर्गः' ॥

व्याख्यत् पौश्निस्तथन्त्यास्तुरीयं माधवाह्वयः ।
अध्यायमष्टके षष्ठे शब्दैः कतिपयैरिति ॥ १ ॥

इति वेङ्कटमाधवाचार्यविरचिते ऋक्संहिताव्याख्याने षष्ठाष्टके चतुर्थोऽध्यायः ॥

—*—

इति ऋग्वेदे सभाष्ये षष्ठाष्टके चतुर्थोऽध्यायः ॥

१-१. विवृहत … आदित्या संहतिम् मूको. २-२. नास्ति मूको.

अथ पञ्चमोऽध्यायः ।

वेङ्कट०

'आ त्वा रथं यथोतये' त्वाचिक्यासति माधवः ।
अतिच्छन्दस्सु यत्कश्चे द्विपदासु च दर्शयन् ॥ १ ॥

त्रयः पादा जागताः स्युरष्टकौ च तथा परौ ।
आहुस्सामतिजगतीं सा 'प्र वो मुहे मतयः'[1] ॥ २ ॥

पदानि सप्त शक्वर्याः सा 'प्रो ष्वस्मै पुरोरथम्'[2] ।
पदानि सप्ताष्टकानि शृणुताप्यतिशक्वरीम् ॥ ३ ॥

पदे षोडशके पूर्वे जागतं च तथाऽष्टके ।
'साकं जातः क्रतुने(ना[3] इ)ति पदैः पञ्चभिरन्विता ॥ ४ ॥

अष्टेस्त्रयः षोडशका अष्टकौ च तथोत्तमौ ।
'त्रिकद्रुकेषु महिषः'[4] इत्यष्टिं कवयो विदुः ॥ ५ ॥

'अग्निं होतारम्'[5] अत्यष्टिर्जागतावष्टकास्त्रयः ।
जागताश्चाष्टकश्चाथ[6] सप्त पादा भवन्ति ते ॥ ६ ॥

'अवर्मह इन्द्र'[7] धृतिर्जागतावष्टकास्त्रयः ।
षोडशोऽथाष्टकश्चान्त्यः[8] सप्त पादाः प्रकीर्तिताः ॥ ७ ॥

सप्तैवातिधृतेः पादाः 'स हि शर्धो न मारुतम्'[9] ।
द्वादशकषोडशकावष्टका जागतोऽष्टकः ॥ ८ ॥

चतुर्दशेत्थं कविभिः पुराणैः
छन्दांसि दृष्टानि समीरितानि ।
[10]दृश्यन्ति दृष्टानि तु[10] संहितायाम्
अन्यानि[11] वेदेष्वपरेषु सन्ति ॥ ९ ॥

चतुरधिकच्छन्दांसि[12] दर्शितानि चतुर्दश ।
यानि दशतयीष्वासन्नुत्तराणि सुभेषजे ॥ १० ॥

---

१. ऋ ५,८७,१. २. ऋ १०,१३३,१. ३ ऋ २,२२,१. ४. ऋ २,२२,१. ५. ऋ १,१२७,१. ६. ऋ १,१२८,८. ६. 'कस्त्वाय वेङ्कट. ७. ऋ १,१३३,६. ८. श्योरशोऽष्टक' वि' अ'. ९. ऋ १,१२७,६. १२८,८. ६. 'कस्त्वाय वेङ्कट. ७. ऋ १,१३३,६. ८. श्योरशोऽष्टक' वि' अ'. ९. ऋ १,१२७,६.

१०-१०. दृश्यं तु दृष्टानिति वि' अ'. ११. आमानि वि' अ'. १२. 'कच्छन्दस्सु वि' अ'.

वि षु द्वेषो व्यंहतिमादित्यासो वि संहितम् । विष्वग्वि वृहता रपः ॥ २१ ॥

वि । सु । द्वेषः । वि । अंहतिम् । आदित्यासः । वि । सम्ऽहितम् । विष्वक् । वि । वृहत । रपः ॥२१॥

वेङ्कट० वि वृहत द्वेषः, [1]वि वृहत अंहतिम् आदित्याः! संहितम्[1] आलं च, निपूर्चीनम् वि वृहत पापम् इति ॥ २१ ॥

[2]इति षष्ठाष्टके चतुर्थोऽध्याये चतुःपञ्चाशो वर्गः[2] ॥

व्याख्यत् पौत्रश्चिन्तयन्त्यास्तुरीयं माधवाह्वयः ।
अध्यायमष्टके षष्ठे शब्दैः कतिपयैरिति ॥ १ ॥

इति वेङ्कटमाधवाचार्यविरचिते ऋक्संहिताव्याख्याने षष्ठाष्टके चतुर्थोऽध्यायः ॥

—*—

इति ऋग्वेदे सभाष्ये षष्ठाष्टके चतुर्थोऽध्यायः ॥

१-१. विद्वान् ··· आदित्या संहतिम् मूको. २-२. नास्ति मूको.

इति '[1]प्रकृतिराकृतिर्विकृतिः संकृतिस्तथा'।
षष्ठी चाभिकृतिर्नाम सप्तम्युत्कृतिरुच्यते ॥ ११ ॥

अशीतिश्चतुरशीतिरष्टाशीतिर्द्विनवतिः ।
षण्णवतिः शतं पूर्णमुत्तमं तु चतुरशतम् ॥ १२ ॥

[2]प्रातिशाख्ये निदाने च माप्रमाप्रतिमादय[2]।
नानाविधानि [3]छन्दांसि लक्षितानि च लक्षणै[3] ॥ १३ ॥

उक्तानां छन्दसां सन्ति द्विपदैकपदा अपि ।
त्रिष्टुब्जगत्योर्गायत्र्याः पङ्क्त्या याऽनूचतुष्पदा[4] ॥ १४ ॥

'एक पाद[5] एकपदा 'द्वौ पादौ'[6] द्विपदोच्यते ।
प्रोच्यते तेनतेनैव सरूपा[7] यस्य पादत ॥ १५ ॥

न दाशतय्येकपदा[8] काचिद् यास्कस्य विद्यते ।
'भद्रं नो अपि वातय'[9] तस्यैकादशिनी विराट् ॥ १६ ॥

'इन्द्रो विश्वस्य गोपति'[10] 'इन्द्रो विश्वस्य भूपति'[10] ।
एतावच्चतस्रो गायत्रीराहुरेकपदा इति ॥ १७ ॥

'पवस्व सोम मन्दयन्निन्द्राय मधुमत्तम'[11] ।
इति तिस्रः समाख्याता गायत्र्यो द्विपदा इति ॥ १८ ॥

'आ वां सुम्ने वरिमन्'[12] सा त्रिष्टुबेकपदोच्यते ।
'महि राधो विश्वजन्यम्'[13] त्रैष्टुभं द्विपदां विदु ॥ १९ ॥

'अग्ने भव सुषमिधा'[14] सूक्तं सर्वं च तादृशम् ।
'स नो वाजेषु'[15] पादौ द्वौ जगतीं द्विपदां विदु ॥ २० ॥

'उरौ देवा अनिबाध'[16] 'सिपक्तु न ऊर्जव्यस्य'[17] ।
द्वे विराजावेकपदे तथाऽ(था 'अ)सिक्न्या यजमानो न होता'[18] ॥ इति ॥ २१ ॥

१-१. 'राकृति रस° वि[२] अ[१] २ २. 'शास्वेऽपिशने मा प्रति° वि[२] अ[१], 'प्रमा प्रतिमेति च वैकल्पम
३ 'क्षणम् वि[२] अ[१]. ४ ४. मूचु° वि[२] अ[१] अ[२] ७. सरूपे वि[२] अ[१]. ५ एकपादा वि[२] अ[१] ६ ६ द्विपादा वि[२]
८. 'कपादा वि[२] अ[१]. ९. ऋ १०, २०,१ ११ ऋ ९,६७,१६. १२. ऋ ६,६३,११. १३ ऋ ६,४७,२५ १० आश्वौ ८,२,२१.
१४ ऋ ७,१७,१ १५ ऋ ८, ४६,१३ १६ ऋ ५,४२,१७ १७. ऋ ५,४१,२०. १८. ऋ ४,१७,१५.

[६८]

[1]प्रियमेध आङ्गिरस ऋषिः । इन्द्रो देवता, अन्त्यानां षण्णां ऋक्षाश्वमेधौ ।
गायत्री छन्दः, अनुष्टुम्मुखः प्रगाथः (=अनुष्टुब्गायत्र्यौ), प्रथमा-
चतुर्थीसप्तमीदशम्यः अनुष्टुभः, षोडशी शङ्कुमती[1] ।

आ त्वा रथं यथोतये सुम्नाय वर्तयामसि । तुविकूर्मिमृतीषहमिन्द्र शविष्ठ सत्पते ॥१॥

[2]आ । त्वा । रथम् । यथा । ऊतये[2] । सुम्नाय । वर्तयामसि ।
तुविऽकूर्मिम् । ऋतिऽसहम् । इन्द्र । शविष्ठ । सत्ऽपते ॥ १ ॥

वेङ्कट० प्रियमेधः । आ वर्तयामः त्वाम्, यथा रथम् आवर्तयन्ति, रक्षणाय सुखाय च बहोः कर्तारम् हिंसकानामभिभवितारम् इन्द्र! शविष्ठ! सत्पते! ॥ १ ॥

तुविशुष्म तुविक्रतो शचीवो विश्वया मते । आ पप्राथ महित्वना ॥ २ ॥

तुविऽशुष्म । तुविक्रतो इति तुविऽक्रतो । शचीऽवः । विश्वया । मते । आ । पप्राथ । महिऽत्वना ॥ २ ॥

वेङ्कट० बहुबल! बहुकर्मन्! विज्ञानवन्! विश्वव्यापेन महत्त्वेन पूजनीय! आ पूरितवानसि ॥ २ ॥

यस्य ते महिना महः परि ज्मायन्तमीयतुः । हस्ता वज्रं हिरण्ययम् ॥ ३ ॥

यस्य । ते । महिना । महः । परि । ज्मायन्तम् । ईयतुः । हस्ता । वज्रम् । हिरण्ययम् ॥ ३ ॥

वेङ्कट० यस्य ते महत्त्वेन महतः परिगृहीतः । पृथिवी ज्मा[3] । ज्मायन्तम् महान्तम् वज्रम् हस्तौ हिरण्मयम् । महान्तं वज्रं महत्त्वेन हस्तौ परिगृहीत इति पूर्वेण सम्बन्धः ॥ ३ ॥

विश्वानरस्य वस्पतिमनानतस्य शवसः । एवैश्च चर्षणीनामूती हुवे रथानाम् ॥४॥

विश्वानरस्य । वः । पतिम् । अनानतस्य । शवसः ।
एवैः । च । चर्षणीनाम् । ऊती । हुवे । रथानाम् ॥ ४ ॥

वेङ्कट० विश्वान् प्रत्यृतस्य शत्रूणामप्रह्वस्य[4] शवसः पतिम् युष्माकं सैनिकानां गमनैः रथानाम् च गमनैः सह हुवे रक्षणाय । यदा[5] सैनिकाः सरथाः प्रविशन्ति युध्मदीया[5], तदानीम् इन्द्रं हुव इति ॥ ४ ॥[6]

अभिष्टये सदावृधं स्वर्मीळ्हेषु यं नरः । नाना हवन्त ऊतये ॥ ५ ॥

अभिष्टये । सदाऽवृधम् । स्वःऽमीळ्हेषु । यम् । नरः । नाना । हवन्ते । ऊतये ॥ ५ ॥

१-१. नास्ति मूको. २-२ व्यु. नियमश्च या (५,३) द्र. ३. नास्ति मूको. ४. °णा प्र° मूके. ५. यथा मूको. ६. या (१२,२१) व्याख्यानमपि द्र.

वेङ्कट० अभिलषितसिद्ध्यर्थम् सदावृधम् सङ्ग्रामेषु यम्[1] मनुष्याः[2] नाना ह्वन्ते रक्षणार्थम् ॥ ५ ॥

[3]इति षष्ठाष्टके पञ्चमाध्याये प्रथमो वर्गः[3] ॥

पुरोमात्रमृचीषममिन्द्रमुग्रं सुराधसम् । ईशानं चिद्वसूनाम् ॥ ६ ॥

पुरःऽमात्रम् । ऋचीषमम् । इन्द्रम् । उग्रम् । सुऽराधसम् । ईशानम् । चित् । वसूनाम् ॥ ६ ॥

वेङ्कट० परा मात्रा यस्य तम् ऋचा समम् इन्द्रम् उग्रम् सुधनम् ईशानम् च वसूनाम्[4] ॥ ६ ॥

तंतमिद्राधसे मह इन्द्रं चोदामि पीतये । यः पूर्व्यामनुष्टुतिमीशे कृष्टीनां नृतुः ॥७॥

तम्ऽतम् । इत् । राधसे । महे । इन्द्रम् । चोदामि । पीतये ।

यः । पूर्व्याम् । अनुऽस्तुतिम् । ईशे । कृष्टीनाम् । नृतुः ॥ ७ ॥

वेङ्कट० तम् एव सर्वदा महते धनाय इन्द्रम् चोदयामि सोमं पातुम्, यः पश्चमुखस्थाम् अनुष्टुतिम् प्रति ईश्वरो भवति मनुष्याणाम् विनेता ॥ ७ ॥

न यस्य ते शवसान सख्यमानंश मर्त्यः । नकिः शवांसि ते नशत् ॥ ८ ॥

न । यस्य । ते । शवसान । सख्यम् । आनंश । मर्त्यः । नकिः । शवांसि । ते । नशत् ॥ ८ ॥

वेङ्कट० न यस्य ते हे बलम्[5] आचरन्! सख्यम् आनशे मनुष्यः, तस्य तव न कश्चिद् बलानि व्याप्नोति ॥ ८ ॥

त्वोतासस्त्वा युजाप्सु सूर्ये महद्धनम् । जयेम पृत्सु वज्रिवः ॥ ९ ॥

त्वाऽऊतासः । त्वा । युजा । अप्ऽसु । सूर्ये । महत् । धनम् । जयेम । पृत्ऽसु । वज्रिऽवः ॥ ९ ॥

वेङ्कट० '[6]त्वया रक्षिताः[6] त्वया सहायेन अपाम् अप्सु स्नातुं सूर्ये च द्रष्टुम्[7] महत् धनम् जयेम सङ्ग्रामेषु वज्रिन्[1] । धनलाभात् अमृतस्यैतदुभय प्रयोजनम् ॥ ९ ॥

तं त्वा यज्ञेभिरीमहे तं गीर्भिर्गिर्वणस्तम ।
इन्द्र यथा चिदाविथ वाजेषु पुरुमाय्यम् ॥ १० ॥

तम् । त्वा । यज्ञेभिः । ईमहे । तम् । गीःऽभिः । गिर्वणःऽतम ।
इन्द्र । यथा । चित् । आविथ । वाजेषु । पुरुऽमाय्यम् ॥ १० ॥

---

१. य मूको. २. ऋष्या मूको. ३-३. नास्ति मूको. ४. वधु° मूको ५. बलम् मूको. ६. त्वद मूको. ७ दृष्टं वि[२]; °ष्टु अ[१].

वेङ्कट० तम् त्वा यज्ञैः प्रवृत्तैः याचामहे, तम् स्तुतिभिः हे अतिशयेन गीर्भिः वननीय!। इन्द्र! यथा रक्षसि सद्मामेषु बहुप्रज्ञम्[१]। चकार उपजन ॥ १० ॥

'इति षष्ठाष्टके पञ्चमाध्याये द्वितीयो वर्गः' ॥

यस्यं ते स्वादु सख्यं स्वाद्वी प्रणीतिरद्रिवः । यज्ञो वितन्तसाय्यः ॥ ११ ॥

यस्यं । ते । स्वादु । सख्यम् । स्वाद्वी । प्रऽनीतिः । अद्रिऽवः । यज्ञः । वितन्तसाय्यः ॥ ११ ॥

वेङ्कट० यस्य ते हर्षकम् सख्यम् स्वाद्वी[२] च प्रणीतिः 'वज्रिन्! यज्ञः[३] विशेषेण तननीयः[४] ॥ ११ ॥

उरु णस्तन्वे३ तने उरु क्षयाय नस्कृधि । उरु णो यन्धि जीवसे ॥ १२ ॥

उरु । नः । तन्वे । तने । उरु । क्षयाय । नः । कृधि । उरु । नः । यन्धि । जीवसे ॥ १२ ॥

वेङ्कट० बहु न पुत्राय तत्पुत्राय च बहु च सर्वस्मै निवासाय[६] धनं कुरु। 'उरु धन[७] प्रयच्छ अस्मभ्यं जीवनाय ॥ १२ ॥

उरुं नृभ्यं उरुं गवं उरुं रथाय पन्थाम् । देववीतिं मनामहे ॥ १३ ॥

उरुम् । नृऽभ्यः । उरुम् । गवे । उरुम् । रथाय । पन्थाम् । देवऽवीतिम् । मनामहे ॥ १३ ॥

वेङ्कट० उरुम् नृप्रभृतीनां पन्थानम् देववीतिम् यज्ञं[८] च अस्मात्[९] प्रार्थयामहे ॥ १३ ॥

उपं मा षड् द्वाद्वा नरः सोमंस्य हर्ष्या । तिष्ठन्ति स्वादुरातयः ॥ १४ ॥

उपं । मा । षट् । द्वाऽद्वा । नरः । सोमंस्य । हर्ष्या । तिष्ठन्ति । स्वादुऽरातयः ॥ १४ ॥

वेङ्कट० उप तिष्ठन्ति मा यज्ञे[१०] प्रसर्पन्तः[११] षट् मनुष्या द्वौद्वौ[१२] भूत्वा सोमस्य पीतेन हर्षेण शोभनदाना ॥ १४ ॥

ऋज्राविन्द्रोत आ ददे हरी ऋक्षस्य सूनवि । आश्वमेधस्य रोहिता ॥ १५ ॥

ऋज्रौ । इन्द्रऽउते । आ । ददे । हरी इति । ऋक्षस्य । सूनवि । आश्वऽमेधस्य । रोहिता ॥ १५ ॥

वेङ्कट० षट्सु तेषु राजसु अतिथिग्वपुत्रे[१३] इन्द्रोते ऋजुगामिनौ अश्वौ अहम् आ ददे, तथा हरी ऋक्षस्य सूनौ[१४]। तथा अश्वमेधपुत्रस्य रोहितवर्णौ आददे ॥ १५ ॥

'इति षष्ठाष्टके पञ्चमाध्याये तृतीयो वर्गः' ॥

---

१. °ज्ञ मूको. २-२. नास्ति मूको. ३. स्वादु वि°. ४-४. यज्ञ वज्रिन् मूको. ५. °नीय मूको. ६. दिव° मूको. ७-७. स्थाय मूको. ८. यज्ञ मूको. ९. अस्मान् मूको. १०. यज्ञे वि°, रेवज ब°. ११. प्रसर्पन्ति वि. १२. नास्ति मूको. १३. अतिथि पु° मूको. १४. सूनो मूको.

सुरथाँ आतिथिग्वे स्वभीशूँरार्क्षे । आश्वमेधे सुपेशसः ॥ १६ ॥

सुऽरथान् । आतिथिऽग्वे । सुऽअभीशून् । आर्क्षे । आश्वऽमेधे । सुऽपेशसः ॥ १६ ॥

वेङ्कट० 'सुरथान् शोभनाश्वान् अतिथिग्वपुत्रे[1] इन्द्रोते, तथा स्वभीशून् ऋक्षपुत्रे, तथा आश्वमेधे सुरूपान् आ ददे'[2] ॥ १६ ॥

षळश्वाँ आतिथिग्व इन्द्रोते वधूमतः । सचा पूतक्रतौ सनम् ॥ १७ ॥

षट् । अश्वान् । आतिथिऽग्वे । इन्द्रऽउते । वधूऽमतः । सचा । पूतऽक्रतौ । सनम् ॥ १७ ॥

वेङ्कट० ऋक्षाश्वमेधाभ्यां प्रेरितौ[3] तयोः पुत्रौ बहु धनम् ऋषये प्रायच्छताम्। तद्[4] दृष्ट्वा अतिथिग्व च तयोः वशे वर्तमान 'स्वपुत्रमिन्द्रोतमवदद् पूतक्रतौ' देहीति। तदानया दर्शयति—'षट् अश्वान्[5] अतिथिग्वपुत्रे इन्द्रोते पूतक्रतौ[6] 'सचाभि वधूमि युक्तान् आर्क्षाऽऽश्वमेधाभ्यां प्रत्तेन धनेन सह अभजम्। एवं चाश्वान् पुत्रान् तस्मै देहीति आतिथिग्वदानस्यापि इय[7] स्तुतिर्भवति । तत्र कात्यायन (ऋअ २,८,६८)—'अन्त्या षड् ऋक्षाश्वमेधयोर्दानस्तुतिः' इति ॥ १७ ॥

ऐषु चेतद्वृषण्वत्यन्तर्ऋज्रेष्वरुषी । स्वभीशुः कशावती ॥ १८ ॥

आ । एषु । चेतत् । वृषण्ऽवती । अन्तः । ऋज्रेषु । अरुषी । सुऽअभीशुः । कशाऽवती ॥ १८ ॥

वेङ्कट० आ ज्ञायते एषु अश्वारोहेण पुंसा तद्वती अन्तः ऋजुगामिषु अश्वेषु आरोचमाना स्वभीशुः कशावती काचिद् वडवा च इति तं[8] प्रशस्ताम् अश्वानां मध्ये स्थितां वडवाम् आह ॥ १८ ॥

न युष्मे वाजबन्धवो निनित्सुश्चन मर्त्यः । अवद्यमधि दीधरत् ॥ १९ ॥

न । युष्मे इति । वाजऽबन्धवः । निनित्सुः । चन । मर्त्यः । अवद्यम् । अधि । दीधरत् ॥ १९ ॥

वेङ्कट० हे अन्नबन्धव[9] इति 'त्रयाणां पितॄणां सम्बोधनम्। अपि वा षण्णां पुत्राणां पितॄणां च। न युष्मासु[10] निनित्सुः अपि मर्त्यः अवधारयति[10] अवद्यम् ॥ १९ ॥

[11]इति षष्ठाष्टके पञ्चमाध्याये चतुर्थो वर्गः[11] ॥

---

१ १ नास्ति वि[२] १ अतिथि अ[१]. २ पूरि[°] मूको. ३ त वि[२] ४ ४. °पुत्रो तमदर्शयत मूको, ५ ५ षडश्वान् मूको. ६ प्रज्ञाने वि[२] ७ ७ सत्ताभि वधूयुक्तानृक्षाश्वमेधाभ्यां प्रत्तेन धनेन सहाभजन् एव चाश्वचये तानिति तस्मै देहि दिश्यदानस्यापि यं मूको ८ °वडव मूको. ९ ९ °णां पुत्राणां पितॄणां च न यु[°] अ[१]. १०. न धा[°] मूको. ११-११. नास्ति मूको.

[६९]

[1]प्रियमेध आङ्गिरस ऋषिः। इन्द्रो देवता, एकादश्याः (पूर्वार्धस्य) विश्वे देवाः, एकादश्याः (उत्तरार्धस्य) द्वादश्याश्च वरुणः। अनुष्टुप् छन्दः, द्वितीया उष्णिक्, चतुर्थ्यादिषडृचा गायत्र्यः, एकादशीषोडश्यौ पङ्क्ती, सप्तदश्यष्टादश्यौ बृहत्यौ[1]।

प्रप्र वस्त्रिष्टुभमिषं मन्दद्वीरायेन्दवे। धिया वो मेधसातये पुरंध्या विवासति॥१॥

प्रऽप्र। वः। त्रिऽस्तुभम्। इषम्। मन्दत्ऽवीराय। इन्दवे।
धिया। वः। मेधऽसातये। पुरम्ऽध्या। आ। विवासति॥ १॥

वेङ्कट० प्रभरत[2] यूयम् त्रिष्टुभम् वृषभम् अन्नम् मन्दद्वीराय[3]। यो वीरान् हर्षयति। इन्दुः इन्दतेः ऐश्वर्यकर्मण.। इन्दनकर्मणे[4]। स[5] युष्मान् यज्ञभजनार्थम् धिया पुरन्ध्या भगेन देवेन सह आ गच्छति॥ १॥

नदं व ओदतीनां नदं योयुवतीनाम्। पतिं वो अघ्न्यानां धेनूनामिषुध्यसि॥२॥

नदम्। वः। ओदतीनाम्। नदम्। योयुवतीनाम्।
पतिम्। वः। अघ्न्यानाम्। धेनूनाम्। इषुध्यसि॥ २॥

वेङ्कट० ओदत्य उषसः। 'ओदती' (निघ १,२) इत्युषोनाम[6]। यस्मात् इन्द्रात् उषसः निर्गच्छन्ति नदात् इव उदकानि, तम् इन्द्रम् अहं युष्मदर्थं ह्वयामि। योयुवत्यः नद्यः, उदकेन मिश्रयन्ति इति। तथा पतिम् गवाम्। अथ एकवदाह[7]—त्वं धेनूः[8] इच्छसि॥ २॥

ता अस्य सूददोहसः सोमं श्रीणन्ति पृश्नयः।
जन्मन् देवानां विशस्त्रिष्वा रोचने दिवः॥ ३॥

ताः। अस्य। सूदऽदोहसः। सोमम्। श्रीणन्ति। पृश्नयः।
जन्मन्। देवानाम्। विशः। त्रिषु। आ। रोचने। दिवः॥ ३॥

वेङ्कट० ताः इन्द्रस्य सूदसदृशदोहाः[9]। 'सूदः' (निघ ३,२३) इति कूपनाम[10]। सोमम् श्रीणन्ति आशिरेण गावः देवानाम् जन्मस्थाने[11] विशन्त्यः[12] दिवः आदित्यस्य रोचने हि त्रिषवणेषु इति॥ ३॥

अभि प्र गोपतिं गिरेन्द्रमर्च यथा विदे। सूनुं सत्यस्य सत्पतिम्॥ ४॥

अभि। प्र। गोऽपतिम्। गिरा। इन्द्रम्। अर्च। यथा। विदे। सूनुम्। सत्यस्य। सत्ऽपतिम्॥

१-१. नास्ति मूको. २. °रथ मूको. ३. मदद्वी° वि[२]; महद्वी° अ[२]. ४. इन्द्रकर्मणा मूको. ५. न मूको. ६-६. ओषसोत्युषोना° मूको. ७. °वदा ह मूको. ८. धेनुः वि[२] ९. °दोह मूको. १०. रूप° मूको. ११. स्थाने मूको. १२. विशन्ये मूको

वेङ्कट० अभि प्र अर्च गवां पतिम् इन्द्रम् गिरा यथा स इन्द्रो गुणैः ज्ञायते, सत्यस्य सुनुम् सतां पतिम् ॥ ४ ॥

आ हर॑यः ससृज्रि॒रेऽरु॑षी॒रधि॑ ब॒र्हिषि॑ । यत्रा॒भि सं॒नवा॑महे ॥ ५ ॥

आ । हर॑यः । स॒सृ॒ज्रि॒रे । अरु॑षीः । अधि॑ । ब॒र्हिषि॑ । यत्र॑ । अ॒भि । स॒म्ऽनवा॑महे ॥ ५ ॥

वेङ्कट० आ सृजन्ति अश्वा आरोचमानाः बर्हिषः उपरि, यस्मिन् स्थितम् इन्द्रं वयम् अभि[1] संस्तुमः ॥ ५ ॥

[1]इति षष्ठाष्टके पञ्चमाध्याये पञ्चमो वर्गः.[1] ॥

इन्द्रा॑य॒ गाव॑ आ॒शिरं॑ दुदु॒ह्रे व॒ज्रिणे॒ मधु॑ । यत् सी॑मुपह्व॒रे वि॒दत् ॥ ६ ॥

[2]इन्द्रा॑य । गावः॑ । आ॒ऽशिर॑म् । दु॒दु॒ह्रे । व॒ज्रिणे॑ । मधु॑[2] । यत् । सी॒म् । उ॒प॒ऽह्व॒रे । वि॒दत् ॥६॥

वेङ्कट० इन्द्राय गावः आशिरम् दुहते[4] वज्रिणे मदकरम् । यत् इन्द्रः मधु लभते समीपे वर्तमानं गवाम् इति ॥ ६ ॥

उद्यद् ब्र॒ध्नस्य॑ वि॒ष्टपं॑ गृ॒हमिन्द्र॑श्च॒ गन्व॑हि ।
मध्वः॑ पी॒त्वा स॑चेवहि॒ त्रिः स॒प्त सख्युः॑ प॒दे ॥ ७ ॥

उत् । यत् । ब्र॒ध्नस्य॑ । वि॒ष्टप॑म् । गृ॒हम् । इन्द्रः॑ । च॒ । गन्व॑हि ।
मध्वः॑ । पी॒त्वा । स॒चे॒व॒हि॒ । त्रिः । स॒प्त । सख्युः॑ । प॒दे ॥ ७ ॥

वेङ्कट० यदा[5] उद् गच्छावः महतः आदित्यस्य [6]विष्टपम् गृहम् अहम्[6] इन्द्रः च, तदा[7] सोमम् पीत्वा तत्र [8]संसृष्टौ भवेव[8] । त्रि सप्त इति देवलोकानाम् उत्तमम् एकविंशमाह । 'असावादित्य एकविंशः' (ऐब्रा १,३०) इति ब्राह्मणम् । सख्युः स्थाने[9] ॥ ७ ॥

अर्च॑त॒ प्रार्च॑त॒ प्रिय॑मेधासो॒ अर्च॑त । अर्च॑न्तु पुत्र॒का उ॒त पुरं॒ न धृ॒ष्ण्व॑र्चत ॥८॥

अर्च॑त । प्र । अ॒र्च॒त॒ । प्रिय॑ऽमेधासः । अर्च॑त । अर्च॑न्तु । पु॒त्र॒काः । उ॒त । पुर॑म् । न । धृ॒ष्णु । अ॒र्च॒त॒ ॥ ८ ॥

वेङ्कट० अर्चत प्रकर्षेण अर्चत इन्द्रं हे प्रियमेधाः! अर्चत । तथा पुत्रकाः अर्चन्तु । यथा पुरम् धर्षणशीलम् अर्चन्ति, तादृशम् इन्द्रम् अर्चत ॥ ८ ॥

अव॑ स्वराति॒ गर्ग॑रो गो॒धा परि॑ सनिष्वणत् ।
पिङ्गा॒ परि॑ चनिष्कद॒दिन्द्रा॑य ब्रह्मोद्य॑तम् ॥ ९ ॥

---

१. अभि वि[1]; अदि अ[1]. २-२. नास्ति मूको. ३-३. तु. ऋ ८,६,११; ७,१०; या ६,८. ४. दुह्यते: मूको. ५. यथा मूको. ६-६. परिष्ठवामहे त्वा मूको. ७. वा मूको. ८-८. सदृशौ भवेव इति मूको ९. स्थाने. मूको.

अव । स्वनति । गर्गरः । गोधा । परि । सनिस्वनत् ।
पिङ्गा । परि । चनिस्कदत् । इन्द्राय । ब्रह्म । उत्ऽयतम् ॥ ९ ॥

वेङ्कट० 'गर्गरः वाद्यः' अव स्वरति प्रवृत्ते' युद्धे । हस्तघ्नः' च भृशं' परि स्वनत् इति । पिशङ्गवर्णा ज्या च परितः स्कन्दते । तथा इन्द्राय च स्तोत्रम् उद्यतम् भवति ॥ ९ ॥

आ यत् पतन्त्येन्यः सुदुघा अनपस्फुरः ।
अपस्फुरं गृभायत सोममिन्द्राय पातवे ॥ १० ॥

आ । यत् । पतन्ति । एन्यः । सुऽदुघाः । अनपऽस्फुरः ।
अपऽस्फुरम् । गृभायत । सोमम् । इन्द्राय । पातवे ॥ १० ॥

वेङ्कट० आ पतन्ति यदा नद्यः सुदोहाः वारयन्तम् अप्रवृद्धोदकाः, तदानीं युष्माः यूयं प्रवृद्धम् सोमम् इन्द्राय पातुं गृह्णीत ॥ १० ॥

ँइति पञ्चाष्टके पञ्चमाध्याये षष्ठो वर्गः ॥

अपादिन्द्रो अपादग्निर्विश्वे देवा अमत्सत ।
वरुण इदिह क्षयत् तमापो अभ्यनूषत वत्सं संशिश्वरीरिव ॥ ११ ॥

अपात् । इन्द्रः । अपात् । अग्निः । विश्वे । देवाः । अमत्सत ।
वरुणः । इत् । इह । क्षयत् । तम् । आपः । अभि । अनूषत । वत्सम् । संशिश्वरीःऽइव ॥ ११ ॥

वेङ्कट० अपात् वैश्वदेवाद् धर्मयुक्तम्' अपिबत् सोमम् इन्द्रः । अपिबत् अग्निः । विश्वे च देवाः अतृप्यन् सोमेन । वरुणः च इह न्यवसत् । तम् निषण्णं' हि आपः अभि अस्तुवन्, यथा वत्सम् संशिश्वर्यः सह्गच्छमाना गावः । क्षयतेः गतिकर्मण' इदं रूपम् ॥ ११ ॥

सुदेवो असि वरुण यस्य ते सप्त सिन्धवः ।
अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव ॥ १२ ॥

सुऽदेवः । असि । वरुण । यस्य । ते । सप्त । सिन्धवः ।
अनुऽक्षरन्ति । काकुदम् । सूर्म्यम् । सुषिराम्ऽइव ॥ १२ ॥

१. गर्गरोगात् वि'; गर्गरोवात्तो अ'. २. °ते मूको. ३. °भं मूको. ४. सृशत् मूको.
५-५. नास्ति मूको. ६. धर्म° वि'; धर्म हस्युक्तं अ'. ७. °ष्ण मूको. ८. मट्कि्मक° मूको.

वेङ्कट० कल्याणदंष्ट्रो भवसि वरुण।, यस्य सप्त नद्यः तव जिह्वाम् अनुसरन्ति। वरुणस्य एव जिह्वा यत् समुद्रः। सूर्म्यंशब्दो गदायां दृष्टः—'एषा वै सूर्मी कर्णकावत्येतया ह स्म वै देवा असुराणां शततर्हांस्तृंहन्ति' (तै १,५,७,६) इति। इह तु सुषिरे काष्ठविशेषे वर्तते। निरुक्तं (या ५,२७) द्रष्टव्यम् इति ॥ १२ ॥

यो व्यतीँरफाणयत् सुयुक्ताँ उप दाशुषे ।
तक्वो नेता तदिद्वपुरुपमा यो अमुच्यत ॥ १३ ॥

यः । व्यतीन् । अफाणयत् । सुऽर्युक्तान् । उप । दाशुषे ।
तक्वः । नेता । तत् । इत् । वपुः । उपऽमा । यः । अमुच्यत ॥ १३ ॥

वेङ्कट० यः विशेषेण आगमनशीलान् अश्वान् उप गमयति सुयुक्तान् दाश्वांसम् उद्दिश्य। गमनशीलः तदानीम् एव उदकं भवति। उपमानभूतः यः इन्द्रः अमुच्यत अन्यैः बलिभिः मुक्तो भवति ॥ १३ ॥

अतीदु शक्र ओहत इन्द्रो विश्वा अति द्विषः ।
भिनत् कनीन ओदनं पच्यमानं परो गिरा ॥ १४ ॥

अति । इत् । ऊँ इति । शक्रः । ओहते । इन्द्रः । विश्वाः । अति । द्विषः ।
भिनत् । कनीनः । ओदनम् । पच्यमानम् । परः । गिरा ॥ १४ ॥

वेङ्कट० अति एव गच्छति इन्द्रः शक्तः। तदेवाह—इन्द्रः विश्वाः द्विषः अति गच्छति इति। भिनत्ति कमनीय इन्द्रः मेघम्[1] माध्यमिकया वाचा देवतया पच्यमानम् 'परस्तात् स्थितः[1] ॥१४॥

अर्भको न कुमारकोऽधि तिष्ठन्नवं रथम् ।
स पक्षन्महिषं मृगं पित्रे मात्रे विभुक्रतुम् ॥ १५ ॥

अर्भकः । न । कुमारकः । अधि । तिष्ठत् । नवम् । रथम् ।
स । पक्षत् । महिषम् । मृगम् । पित्रे । मात्रे । विभुऽक्रतुम् ॥ १५ ॥

वेङ्कट० अल्पशरीरः इव कुमारः अधि तिष्ठति इन्द्रः नवम् रथम्। स. पचतु[4] भक्षणाय महिषम् मृगम् द्यावापृथिव्योः अभ्युदयाय महुकर्माणम् ॥ १५ ॥

आ तू सुशिप्र दंपते रथं तिष्ठा हिरण्ययम् ।
अध द्युक्षं सचेवहि सहस्रपादमरुषं स्वस्तिगामनेहसम् ॥ १६ ॥

१-१. रति वि[1]; शरि ह क[1]. २. द्र निघ १,१०. ३-३. पुरस्ताद् स्थितः मूको. ४. पचतु: मूको.

आ । तु । सुऽशिप्र । दम्ऽपते । रथम् । तिष्ठ । हिरण्ययम् ।
अर्ध । द्युक्षम् । सचेवहि । सहस्रऽपादम् । अरुषम् । स्वस्तिऽगाम् । अनेहसम् ॥ १६ ॥

वेङ्कट० आ तिष्ठ क्षिप्रं सुहनो![१] गृहपते! हिरण्मयम् रथम् । तम् अहं च आरोहेयम् इति वदति—सम्प्रति दीप्तम् सचेवहि बहुपादम् आरोचमानम् स्वस्ति गन्तारम् अनुपद्रवम् इति ॥ १६ ॥

तं घेमित्था नमस्विन उप स्वराजमासते ।
अर्थं चिदस्य सुधितं यदेतव आवर्तयन्ति दावने ॥ १७ ॥

तम् । घ । ईम् । इत्था । नमस्विनः । उप । स्वऽराजम् । आसते ।
अर्थम् । चित् । अस्य । सुऽधितम् । यत् । एतवे । आऽवर्तयन्ति । दावने ॥ १७ ॥

वेङ्कट० तम् खलु एनम् इत्थं हविष्मन्तः उप आसते स्वराजम् । अर्थम् चित् अस्य सुनिहितम् याचते, यदा इन्द्रं दानाय आत्मनि यातुम् आवर्तयन्ति ॥ १७ ॥

अनु प्रत्नस्यौकसः प्रियमेधास एषाम् ।
पूर्वामनु प्रयतिं वृक्तबर्हिषो हितप्रयस आशत ॥ १८ ॥

अनु । प्रत्नस्य । ओकसः । प्रियऽमेधासः । एषाम् ।
पूर्वाम् । अनु । प्रऽयतिम् । वृक्तऽबर्हिषः । हितऽप्रयस । आशत ॥ १८ ॥

वेङ्कट० अनु आशत एषाम् देवानाम् प्रत्नस्य ओकसः पुराणम् आत्मीयं गृहं पोषयितुं प्रियमेधा मुख्यम् प्रदानम् स्तीर्णबर्हिषः निहितहविष्का[२] ॥ १८ ॥

[२]इति षष्ठाष्टके पञ्चमाध्याये सप्तमो वर्गः[२] ॥

[७०]

[१]पुरुहन्मा आङ्गिरस ऋषिः । इन्द्रो देवता । बृहती छन्दः, प्रथमादिषष्ठ्यन्ता प्रगाथ (=विषमा बृहत्य, समाः सतो बृहत्य), द्वादशी शङ्कुमती, त्रयोदशी उष्णिक्, चतुर्दशी अनुष्टुप्, पञ्चदशी पुरउष्णिक्[१] ।

यो राजा चर्षणीनां याता रथेभिरध्रिगुः ।
विश्वासां तरुता पृतनानां ज्येष्ठो यो वृत्रहा गृणे ॥ १ ॥

---

१. सुहनो मूको. २-२. नास्ति मूको.

यः । राजा । चर्षणीनाम् । याता । रथेभिः । अध्रिऽगुः ।
विश्वासाम् । तरुता । पृतनानाम् । ज्येष्ठः । यः । वृत्रऽहा । गृणे ॥ १ ॥

वेङ्कट० पुरुहन्मा आङ्गिरसः । यः राजा चर्षणीनाम् याता रथैः अप्रतिगमनः विश्वासाम् तारकः पृतनानाम् श्रेष्ठः । यः च वृत्रहा स्तूयते ॥ १ ॥

इन्द्रं तं शुम्भ पुरुहन्मन्नवसे यस्य द्विता विधर्तरि ।
हस्ताय वज्रः प्रति धायि दर्शतो महो दिवे न सूर्यः ॥ २ ॥

इन्द्रम् । तम् । शुम्भ । पुरुऽहन्मन् । अवसे । यस्य । द्विता । विऽधर्तरि ।
हस्ताय । वज्रः । प्रति । धायि । दर्शतः । महः । दिवे । न । सूर्यः ॥ २ ॥

वेङ्कट० इन्द्रम् तम् स्तुतिभिः अलङ्कुरु हे पुरुहन्मन्! रक्षणार्थम् । यस्य तव विधर्तरि द्वैधं भवति शौर्यम् अनौद्धत्यं च, तस्य हस्ताय प्रतिनिहितः[1] वज्रः दर्शनीयः महान् दिवः इव सूर्यः ॥ २ ॥

नकिष्टं कर्मणा नशद्यश्चकार सदावृधम् ।
इन्द्रं न यज्ञैर्विश्वगूर्तमृभ्वसमधृष्टं धृष्ण्वोजसम् ॥ ३ ॥

नकिः । तम् । कर्मणा । नशत् । यः । चकार । सदाऽवृधम् ।
इन्द्रम् । न । यज्ञैः । विश्वऽगूर्तम् । ऋभ्वसम् । अधृष्टम् । धृष्णुऽओजसम् ॥ ३ ॥

वेङ्कट० नकिः तम् कर्मणा भिक्षणादिना व्याप्नोति परिचरन्, यः जातः न चकार सदा[2] वर्धकम् इन्द्रम् यज्ञैः विश्वैः आहूतम् महान्तम् शत्रुभिः अधृष्टम् धर्षणशीलबलम् ॥ ३ ॥

अषाळ्हमुग्रं पृतनासु सासहिं यस्मिन् महीरुरुज्रयः ।
सं धेनवो जायमाने अनोनवुर्द्यावः क्षामो अनोनवुः ॥ ४ ॥

अषाळ्हम् । उग्रम् । पृतनासु । ससहिम् । यस्मिन् । महीः । उरुऽज्रयः ।
सम् । धेनवः । जायमाने । अनोनवुः । द्यावः । क्षामः । अनोनवुः ॥ ४ ॥

वेङ्कट० असोढम् उद्गूर्णम् पृतनासु अभिभवितारम् । यस्मिन् जायमाने महत्यः उरुवेगाः [3]सम् अस्तुवन्[3] [4]प्रीणयित्र्यः द्यावः पृथिव्य.[4] च ॥ ४ ॥

यद् द्याव इन्द्र ते शतं शतं भूमीरुत स्युः ।
न त्वा वज्रिन्त्सहस्रं सूर्या अनु न जातमष्ट रोदसी ॥ ५ ॥

---

१. प्रतिरि° वि°. २. सदेत्र क°. ३-३. सरस्तुवत् वि°. ४-४. °द्योर्वनपृथिव्यः मूको.

यत् । द्यावः । इन्द्र । ते । शतम् । शतम् । भूमीः । उत । स्युरिति । स्युः ।
न । त्वा । वज्रिन् । सहस्रम् । सूर्याः । अनु । न । जातम् । अष्ट । रोदसी इति ॥ ५ ॥

वेङ्कट० यदि द्युलोकाः[1] इन्द्र! तव प्रतिमानार्थम् शतम् स्युः, अपि वा शतम् भूमयः, तथापि न त्वाम् अश्नुवते[2]। त्वम् एव तेभ्योऽतिरिच्यसे। तथा न त्वा वज्रिन्! सहस्रम्[3] अपि सूर्याः अनु भवन्ति। किं बहुना, न जातम् किंचन भूतं त्वाम् अश्नुते, न च द्यावापृथिव्यौ इति ॥ ५ ॥

[4]इति षष्ठाष्टके पञ्चमाध्यायेऽष्टमो वर्गः[4] ॥

आ पप्राथ महिना वृष्ण्या वृषन् विश्वा शविष्ठ शवसा ।
अस्माँ अव मघवन् गोमति व्रजे वज्रिञ्चित्राभिरूतिभिः ॥ ६ ॥

आ । पप्राथ । महिना । वृष्ण्या । वृषन् । विश्वा । शविष्ठ । शवसा ।
अस्मान् । अव । मघवन् । गोऽमति । व्रजे । वज्रिन् । चित्राभिः । ऊतिऽभिः ॥ ६ ॥

वेङ्कट० आ पूरयसि महता बलेन विश्वानि एव वीर्याणि वर्षयितर! आवर्षित.!। अस्मान् रक्ष [5]मघवन्! गोमति व्रजे[5] वज्रिन्![6] चित्रैः पालनैः ॥ ६ ॥

न सीमदेव आपदिषं दीर्घायो मर्त्यः ।
एतग्वा चिद्य एतशा युयोजते हरी इन्द्रो युयोजते ॥ ७ ॥

न । सीम् । अदेवः । आपत् । इषम् । दीर्घायो इति दीर्घऽआयो । मर्त्यः ।
एतऽग्वा । चित् । यः । एतशा । युयोजते । हरी इति । इन्द्रः । युयोजते ॥ ७ ॥

वेङ्कट० न सर्वम् अस्तोता प्राप्नोति अन्नम् हे दीर्घजीव! मनुष्यः। एतौ अश्वौ भवतः प्राप्तव्यं गच्छत इति। तौ एतशवर्णौ इन्द्रस्य स्वभूतौ[7]। य इन्द्र. रथे [8]युनक्ति तौ। यो न स्तौति, स न[8] प्राप्नोति अन्नम् इति ॥ ७ ॥

तं वो महो महाय्यमिन्द्रं दानाय सक्षणिम् ।
यो गाधेषु य आरणेषु हव्यो वाजेष्वस्ति हव्यः ॥ ८ ॥

तम् । वः । महः । महाय्यम् । इन्द्रम् । दानाय । सक्षणिम् ।
यः । गाधेषु । यः । आऽअरणेषु । हव्यः । वाजेषु । अस्ति । हव्यः ॥ ८ ॥

---

1. लोकाः मूको. 2. अश्नुवन्त मूको. 3. स तथा मूको 4-4. नास्ति मूको. 5-5. °वन्दो… मजे वि, °वन्…मजे अ'. 6. वज्रे मूको. 7. °त मूको. 8-8. अनक्तिरथेन स्तौति छन्दः मूको.

वेङ्कट० तम् यूयं महतः अपि पूजनीयम् इन्द्रम् दानाय[1] सचमानम् परिचरत[2], यः उच्छ्रितेषु निम्नेषु च उदकेषु आह्वातव्यो भवति सङ्ग्रामेषु च ॥ ८ ॥

उदू षु णो वसो महे मृशस्व शूर राधसे ।
उदू षु मह्यै मघवन् मघत्तय उदिन्द्र श्रवसे महे ॥ ९ ॥

उत् । ऊँ इति । सु । नः । वसो इति । महे । मृशस्व । शूर । राधसे ।
उत् । ऊँ इति । सु । मह्यै । मघऽवन् । मघत्तये । उत् । इन्द्र । श्रवसे । महे ॥ ९ ॥

वेङ्कट० उत् मृशस्व उत्थापय सुष्ठु अस्मान्[3] वासयितः! शूर! महते धनाय। उत् मृशस्व मघवन्! महत्यै धनदानाय। उत् मृशस्व इन्द्र! महत्यै कीर्त्यै ॥ ९ ॥

त्वं न इन्द्र ऋतयुस्त्वानिदो नि तृम्पसि ।
मध्ये वसिष्व तुविनृम्णोर्वोर्नि दासं शिश्नथो हथैः ॥ १० ॥

त्वम् । नः । इन्द्र । ऋतऽयुः । त्वाऽनिदः । नि । तृम्पसि ।
मध्ये । वसिष्व । तुविऽनृम्ण । ऊर्वोः । नि । दासम् । शिश्नथः । हथैः ॥ १० ॥

वेङ्कट० त्वम् अस्मान् इन्द्र! यज्ञकामः। त्वां यो निन्दति अयजमानः[4] तस्मात् नि[5] तृम्पसि तत आकृष्य नितरां तर्पयसि । स त्वं तव ऊर्वोः[6] मध्ये अस्मान् सुष्ठु आच्छादय रक्षार्थं वास कुरु तुविनृम्ण! । नि शिश्नथः "च असुरम्" प्रहारैः ॥ १० ॥

"इति षष्ठाष्टके पञ्चमाध्याये नवमो वर्गः" ॥

अन्यव्रतममानुषमयज्वानमदेवयुम् ।
अव स्वः सखा दुधुवीत पर्वतः सुघ्नाय दस्युं पर्वतः ॥ ११ ॥

अन्यऽव्रतम् । अमानुषम् । अयज्वानम् । अदेवऽयुम् ।
अव । स्वः । सखा । दुधुवीत । पर्वतः । सुऽघ्नाय । दस्युम् । पर्वतः ॥ ११ ॥

वेङ्कट० इन्द्रादन्यं यो यजते[9] सोऽन्यव्रत तम्[10] मनुष्याणाम् अहितम् अयज्वानम् अदेवकामम्[11] इन्द्र![12] स्वः सखा पर्वतर्षिः स्वर्गात् अव दुधुवीत सुष्ठु यो हन्ति तस्मै तम् दस्युम् तस्य मध्यतः इति। पुनः पर्वत इति पूरणम् ॥ ११ ॥

---

१. आनय वि'; आनाय २. °रत मूको. ३. °स्माव मूको. ४. यजमा° मूको. ५ न मूको. ६. °वं. मूको. ७-७. चाप्सुरं वि'; चासुन अ'. ८-८. नास्ति मूको. ९. °ते मूको. १०. तद् मूको. ११. देव° मूको. १२. °न्द्रः वि'.

त्वं नं इन्द्रासां हस्ते शविष्ठ दावने ।
धानानां न सं गृंभायास्मयुर्द्विः सं गृंभायास्मयुः ॥ १२ ॥

त्वम् । नः । इन्द्र । आसाम् । हस्ते । शविष्ठ । दावने ।
धानानाम् । न । सम् । गृभाय । अस्मऽयुः । द्विः । सम् । गृभाय । अस्मऽयुः ॥ १२ ॥

वेङ्कट० त्वम् अस्माकम् इन्द्र! एकैकशः दानाय आसाम् गवाम् [1]समर्थ! हस्ते सम् गृहाण[1] । कर्मणि षष्ठी । यथा बह्वीर्धानाः हस्ते गृह्णाति तद्वत् । अस्मत्काम बह्वीः [2]गाः हस्ते[2] गृहाण । ताः सर्वाः दत्त्वा पुनः च सम् गृहाण इति ॥ १२ ॥

सखायः क्रतुमिच्छत कथा राधाम शरस्य ।
उपस्तुतिं भोजः सूरिर्यो अह्रयः ॥ १३ ॥

सखायः । क्रतुम् । इच्छत । कथा । राधाम । शरस्य ।
उपऽस्तुतिम् । भोजः । सूरिः । यः । अह्रयः ॥ १३ ॥

वेङ्कट० हे सखायः! कर्म इच्छत । कथम् साधयामः शत्रूणां हिंसितुः[3] उपस्तुतिम्, भोजकः स्तोतॄणाम् प्राज्ञः यः अह्रयः[4] अभवत ॥ १३ ॥

भूरिभिः समह ऋषिभिर्बर्हिष्मद्भिः स्तविष्यसे ।
यदित्थमेकमेकमिच्छर वत्सान् पराददः ॥ १४ ॥

भूरिऽभिः । समह । ऋषिऽभिः । बर्हिष्मत्ऽभिः । स्तविष्यसे ।
यत् । इत्थम् । एकम्ऽएकम् । इत् । शर । वत्सान् । पराऽददः ॥ १४ ॥

वेङ्कट० [5]हे शर! सपूज! इन्द्र![5] त्वम् ऋषिभिः बहुभिः यज्ञवद्भिः स्तविष्यसे[6] । य त्वम् इत्थम् एकम्-एकम् वत्सान्[7] स्तोतृभ्यः तेभ्यः परायच्छसि । वत्सप्रदानेन मातरोऽपि प्रदत्ता[8] भवन्ति ॥ १४ ॥

कर्णगृह्या मघवा शौरदेव्यो वत्सं नस्त्रिभ्य आनयत् । अजां सूरिर्न धातवे ॥ १५ ॥

कर्णऽगृह्य । मघऽवा । शौरऽदेव्यः । वत्सम् । नः । त्रिऽभ्यः ।
आ । अनयत् । अजाम् । सूरिः । न । धातवे ॥ १५ ॥

वेङ्कट० शत्रुभिः आहृतान् गवां वत्सान् कर्णे गृहीत्वा मघवा शौरदेव्यः शूरदेवानाम् इदं युद्धं शौरदेवम् । युद्धकुशलः शौरदेव्यः । सः वत्सम् अस्माकं हिंसितृभ्यः शत्रुभ्यः आ अनयत्[9] ।

१-१. समर्थः गृहाय मूको. २-२. गृहेरत वि[1]; गहस्ते अ[1]. ३. °त्तनिः वि[1]. ४. अह्नः मूको. ५-५. मावेरशार स पूर्णेन्द्र वि[2], माहेरशार स पूर्ण अ[1]. ६. स्तुनिष्य मूको. ७ °त्सात वि[1], श अ[1]. ८ नत्ता मूको. ९. °नवत मूको.

यथा[1] अजाम् आत्मीयाम् प्राप्य स्वामी तस्या पयो दुग्ध्वा[2] पातु कर्णे गृहीत्वा हरति आनयति[3] ॥ १५ ॥

[4]इति षष्ठाष्टके पञ्चमाध्याये दशमो वर्गः[4] ॥

[७१]

[5]सुदीतिपुरुमीळ्हौ आङ्गिरसौ ऋषि, अन्यतरो वा। अग्निर्देवता। गायत्री छन्द, दशम्यादिपञ्चदशयन्ता प्रगाथ (=विषमा बृहत्य, समा सतोबृहत्य)[5]।

त्वं नो॑ अग्ने म॒हो॑भिः पा॒हि विश्व॑स्या॒ अरा॑तेः। उ॒त द्वि॒षो मर्त्य॑स्य ॥ १ ॥

त्वम्। नः॒। अ॒ग्ने॒। म॒हः॑ऽभिः। पा॒हि। विश्व॑स्याः। अरा॑तेः। उ॒त। द्वि॒षः। मर्त्य॑स्य ॥ १ ॥

वेङ्कट० [6]सुदीति पुरुमीळ्हो[6] वा। त्वम् अस्मान् अग्ने! महोभि मनुष्यस्य बहुविधात् अदानात् रक्ष धनप्रदानेन, तथा द्वेषात् च बलप्रदानेन मनुष्यस्य ॥ १ ॥

न॒हि म॒न्युः पौरु॑षेय॒ ईशे॑ हि वः॑ प्रियजात। त्वमिदा॑सि क्षपा॑वान् ॥ २ ॥

न॒हि। म॒न्युः। पौरु॑षेयः। ईशे॑। हि। वः॒। प्रि॒य॒ऽजा॒त॒। त्वम्। इत्। अ॒सि॒। क्षपा॑ऽवान् ॥ २ ॥

वेङ्कट० दिवाचर पुरुष भवति, रात्रिञ्चर रक्ष। तत्र दिवा सूर्यम् अधिष्ठाय अग्नि[7] चरति। तत्र एतद् उच्यते—नहि तव पौरुषेय क्रोध ईश्वर भवति प्रियजनन[8]। त्वम् एव भवसि [7]रात्रिमान्, अत[7] नक्तं च न अभिभूयसे ॥ २ ॥

स नो॒ विश्वे॑भिर्दे॒वेभि॒रूर्जो॑ नपा॒द्भद्र॑शोचे। र॒यिं दे॑हि वि॒श्ववा॑रम् ॥ ३ ॥

सः। नः॒। विश्वे॑भिः। दे॒वेभिः॑। ऊर्जः॑। न॒पा॒त्। भद्र॑ऽशोचे। र॒यिम्। दे॒हि॒। वि॒श्वऽवा॑रम् ॥ ३ ॥

वेङ्कट० निगदसिद्धा ॥ ३ ॥

न तम॑ग्ने॒ अरा॑तयो॒ मर्तं॑ युवन्त रा॒यः। यं त्राय॑से दा॒श्वांस॑म् ॥ ४ ॥

न। तम्। अ॒ग्ने॒। अरा॑तयः। मर्त॑म्। यु॒व॒न्त॒। रा॒यः। यम्। त्राय॑से। दा॒श्वांस॑म् ॥ ४ ॥

वेङ्कट० न[9] तम् अग्ने! शत्रव मर्तम् पृथक् कुर्वन्ति [9]धनात्, यम्[9] यजमानं त्वं रक्षसि ॥ ४ ॥

यं त्वं वि॑प्र मे॒धसा॑ताव॒ग्ने हि॒नोषि॒ धना॑य। स तवो॒ती गोषु॒ गन्ता॑ ॥ ५ ॥

यम्। त्वम्। वि॒प्र॒। मे॒धऽसा॑तौ। अग्ने॑। हि॒नोषि॑। धना॑य। सः। तव॑। ऊ॒ती। गोषु॑। गन्ता॑ ॥५॥

१ यस्या वि[1]. २ दुग्ध्वा वि[1]. ३ आधाव इति मूको. ४-४ नास्ति मूको. ५-५ ० पुत्रमिरो मूको ६ [0]ळ्हि मूको ७-७ रात्रिमात्मन वि[1] ८ धनम् वि[1]. ९-९ धनान्यम् मूको

वेङ्कट० यम् त्वम् विप्र! यजने[1] अग्ने! प्रेरयसि धनाय, सः तव रक्षणेन गोषु गन्ता भवति ॥ ५ ॥

[2]इति षष्ठाष्टके पञ्चमाध्याये एकादशो वर्गः[2] ॥

त्वं र॒यिं पु॑रु॒वीर॑मग्ने दा॒शुषे॒ मर्ता॑य । प्र णो॑ नय॒ वस्यो॒ अच्छ॑ ॥ ६ ॥

त्वम् । र॒यिम् । पु॒रु॒ऽवीर॑म् । अग्ने॑ । दा॒शुषे॑ । मर्ता॑य । प्र । नः॒ । न॒य॒ । वस्यः॑ । अच्छ॑ ॥ ६ ॥

वेङ्कट० त्वम् धनं बहुवीरम् अग्ने! प्रयच्छसि दाशुषे मनुष्याय । अस्मान् अपि प्र णयसि श्रेयः धनं प्रति ॥ ६ ॥

उ॒रु॒ष्या णो॒ मा परा॑ दा अघाय॒ते जा॑तवेदः । दु॒रा॒ध्ये॒३॒॑ मर्ता॑य ॥ ७ ॥

उ॒रु॒ष्य । नः॒ । मा । परा॑ । दाः॒ । अ॒घ॒ऽय॒ते । जा॒त॒ऽवे॒दः॒ । दुः॒ऽआ॒ध्ये॑ । मर्ता॑य ॥ ७ ॥

वेङ्कट० रक्ष अस्मान् । मा परा दाः अघमिच्छते जातवेदः! दुर्बुद्धये मनुष्याय ॥ ७ ॥

अग्ने॒ माकि॑ष्टे दे॒वस्य॑ रा॒तिमदे॑वो युयोत । त्वमी॑शिषे॒ वसू॑नाम् ॥ ८ ॥

अग्ने॑ । माकिः॑ । ते॒ । दे॒वस्य॑ । रा॒तिम् । अदे॑वः । यु॒यो॒त॒ । त्वम् । ई॒शि॒षे॒ । वसू॑नाम् ॥ ८ ॥

वेङ्कट० अग्ने! मा कश्चित् तव देवस्य तव दानम् अदेवः[3] पृथक् करोतु । त्वम् ईशिषे धनानाम् ॥ ८ ॥

स नो॒ वस्व॒ उप॑ मा॒स्यूर्जो॑ नपा॒न्माहि॑नस्य । सखे॑ वसो जरि॒तृभ्यः॑ ॥ ९ ॥

सः । नः॒ । वस्वः॑ । उप॑ । मा॒सि॒ । ऊर्जः॑ । न॒पा॒त् । माहि॑नस्य । सखे॑ । व॒सो॒ इति॑ । ज॒रि॒तृऽभ्यः॑ ॥९॥

वेङ्कट० उपमानं[4] प्रदानम् । सः अस्मभ्यम् उप प्रयच्छ हे अन्नस्य पुत्र! महद् धनम् सखे! वासयितः! स्तोतृभ्यः ॥ ९ ॥

अच्छा॑ नः शी॒रशो॑चिषं॒ गिरो॑ यन्तु दर्श॒तम् ।
अच्छा॑ य॒ज्ञासो॒ नम॑सा पुरू॒वसुं॑ पुरुप्रश॒स्तमू॒तये॑ ॥ १० ॥

अच्छ॑ । नः॒ । शी॒रऽशो॑चिषम् । गिरः॑ । य॒न्तु॒ । द॒र्श॒तम् ।
अच्छ॑ । य॒ज्ञासः॑ । नम॑सा । पु॒रु॒ऽवसु॑म् । पु॒रु॒ऽप्र॒श॒स्तम् । ऊ॒तये॑ ॥ १० ॥

वेङ्कट० अभिगच्छन्तु[5] अस्माकम् शयनशीलज्वालम् शयनशीलज्वालम्[6] या स्तुतयः दर्शनीयम् । अच्छ यन्तु यज्ञाः च हविषा बहुधनम् बहुप्रशस्तम् रक्षार्थम् ॥ १० ॥

[2]इति षष्ठाष्टके पञ्चमाध्याये द्वादशो वर्गः[2] ॥

---

१. भजने वि॰; °षु अ॰. २-२. नास्ति मूको. ३. दव वि॰. ४. ध्यान मूको. ५. °च्छतु मूको. ६. तच्चन° मूको.

अ॒ग्निं सू॒नुं सह॑सो जा॒तवे॑दसं दा॒नाय॒ वार्या॑णाम् ।
द्वि॒ता यो भू॒दमृ॑तो॒ मर्त्ये॒ष्वा होता॑ म॒न्द्रत॑मो वि॒शि ॥ ११ ॥

अ॒ग्निम् । सू॒नुम् । सह॑सः । जा॒तऽवे॑दसम् । दा॒नाय॑ । वार्या॑णाम् ।
द्वि॒ता । यः । भूत् । अ॒मृत॑ः । मर्त्ये॑षु । आ । होता॑ । म॒न्द्रऽत॑मः । वि॒शि ॥ ११ ॥

वेङ्कट० अग्निम् सहस सुतम् जातप्रज्ञम् दानाय धनानाम् । द्विता यः अभूत् । अमृत सन् मर्त्येषु च अभवत् इति द्वैधम्[1] । होता मादयितृतम मनुष्येषु भवति । तम् अच्छ यन्तु इति ॥ ११ ॥

अ॒ग्निं वो॑ देवय॒ज्यया॒ग्निं प्र॑य॒त्य॑ध्व॒रे ।
अ॒ग्निं धी॒षु प्र॑थ॒मम॒ग्निमर्व॑त्य॒ग्निं क्षैत्रा॑य॒ साध॑से ॥ १२ ॥

अ॒ग्निम् । वः॒ । दे॒व॒ऽय॒ज्यया॑ । अ॒ग्निम् । प्र॒ऽय॒ति । अ॒ध्व॒रे ।
अ॒ग्निम् । धी॒षु । प्र॒थ॒मम् । अ॒ग्निम् । अर्व॑ति । अ॒ग्निम् । क्षैत्रा॑य । साध॑से ॥ १२ ॥

वेङ्कट० अग्निम् युष्माकं देवयागार्थं स्तौमि, अग्निम् वर्तमाने यज्ञे, अग्निम् कर्मसु, [2]अग्निम् मुख्यमागते[2] भ्रातृव्ये, अग्निम् एव क्षेत्रसम्बन्धिने[3] साधनाय क्षेत्राणि साधयितुम् ॥ १२ ॥

अ॒ग्निरि॒षां स॒ख्ये द॑दातु न॒ ईशे॒ यो वार्या॑णाम् ।
अ॒ग्निं तो॒के तन॑ये॒ शश्व॑दीमहे॒ वसुं॒ सन्तं॑ तनू॒पाम् ॥ १३ ॥

अ॒ग्निः । इ॒षाम् । स॒ख्ये । द॒दा॒तु॒ । नः॒ । ईशे॑ । यः । वार्या॑णाम् ।
अ॒ग्निम् । तो॒के । तन॑ये । शश्व॑त् । ई॒म॒हे॒ । वसु॑म् । सन्त॑म् । त॒नू॒ऽपाम् ॥ १३ ॥

वेङ्कट० अग्निः अन्नानि सख्ये ददातु[4] नः, ईशे यः धनानाम् । अग्निम् पुत्रार्थं[5] तत्पुत्रार्थं च बहु याचामहे वासयितारम् सन्तम् अङ्गानां पालयितारम् ॥ १३ ॥

अ॒ग्निमी॑ळि॒ष्वाव॑से॒ गाथा॑भिः शी॒रशो॑चिषम् ।
अ॒ग्निं रा॒ये पु॑रुमीळ्ह श्रु॒तं नरो॒ऽग्निं सु॑दी॒तये॑ छ॒र्दिः ॥ १४ ॥

अ॒ग्निम् । ई॒ळि॒ष्व॒ । अव॑से । गाथा॑भिः । शी॒रऽशो॑चिषम् ।
अ॒ग्निम् । रा॒ये । पु॒रु॒ऽमी॒ळ्ह॒ । श्रु॒तम् । नरः॑ । अ॒ग्निम् । सु॒ऽदी॒तये॑ । छ॒र्दिः ॥ १४ ॥

---

१ १. तु. ऋ ८, ४,२,५ २१,° २ द्वैधम् मूको. ३ ३ अभिमुख्य° वि°. ४ क्षेत्र साध° मूको. ५ ददातु मूको ६. अपुत्रार्थं मूको.

वेङ्कट० अग्निम् स्तुहि [1]रक्षणाय वाग्भिः[1] शयनशीलरोचिषम्[2], अग्निम् धनाय हे पुरुमीळ्ह!। विश्रुतम् नरः स्तुवन्ति अन्ये च। अग्निम् सुदीतये[3] च मह्यं गृहं याचस्वेति सुदीतिः[4] पुरुमीळ्हमाह[5] सखायम् ऋत्विजं वेति ॥ १४ ॥

अग्निं द्वेषो योतवै नो गृणीमस्यग्निं शं योश्च दातवे ।
विश्वासु विक्ष्ववितेव हव्यो भुवद्वस्तुर्ऋषूणाम् ॥ १५ ॥

अग्निम् । द्वेषः । योतवै । नः । गृणीमसि । अग्निम् । शम् । योः । च । दातवे ।
विश्वासु । विक्षु । अविताऽइव । हव्यः । भुवत् । वस्तुः । ऋषूणाम् ॥ १५ ॥

वेङ्कट० अग्निम् अस्माकं द्वेष्टॄन् पृथक् कर्तुं स्तुमः, अग्निम् शम् च योः च दातुम्। विश्वासु विक्षु रक्षको[6] राजा इव ह्वातव्यः भवतु वासयिता अस्माकम् ऋषूणाम्[7]। ऋषवः ऋषयः ॥ १५ ॥

[8]इति पञ्चाष्टके पञ्चमाध्याये त्रयोदशो वर्गः[8] ॥

[७२]

[8]हर्यतः प्रागाथ ऋषिः। अग्निर्देवता, हवींषि वा। गायत्री छन्दः[8]।

हविष्कृणुध्वमा गमदध्वर्युर्वनते पुनः । विद्वाँ अस्य प्रशासनम् ॥ १ ॥

हविः । कृणुध्वम् । आ । गमत् । अध्वर्युः । वनते । पुनरिति । विद्वान् । अस्य । प्रऽशासनम् ॥ १ ॥

वेङ्कट० प्रागाथो[9] हर्यतः। आग्नेयम्। 'हविः कृणुध्वम्'। आ जगाम अग्निः। आगते च अध्वर्युः अध्वरं भजते विद्वान् अस्य[10] हविषः प्रशासनम् यथा हविः क्रियते ॥ १ ॥

नि तिग्ममभ्यंशुं सीदद्धोता मनावधि । जुषाणो अस्य सख्यम् ॥ २ ॥

नि । तिग्मम् । अभि । अंशुम् । सीदत् । होता । मनौ । अधि । जुषाणः । अस्य । सख्यम् ॥ २ ॥

वेङ्कट० तिग्मम् अंशुम् अग्निम् होता च अभि नि षीदति यजमाने जुषाणः अग्नेः सख्यम् ॥ २ ॥

अन्तरिच्छन्ति तं जने रुद्रं परो मनीषया । गृभ्णन्ति जिह्वया ससम् ॥ ३ ॥

अन्तः । इच्छन्ति । तम् । जने । रुद्रम् । परः । मनीषया । गृभ्णन्ति । जिह्वया । ससम् ॥ ३ ॥

वेङ्कट० अन्तः इच्छन्ति तम् जने अग्निं परस्तात् स्थितं प्रज्ञानेन। गृह्णन्ति स्तुत्या स्वपनम्। अत्र[11] यास्कः (५,३)—'स्वपनम् एतत् माध्यमिकं[12] ज्योतिरनित्यदर्शनम्' इति ॥ ३ ॥

१-१. रक्ष पार्हिनिः वि¹; रक्ष पार्गति म¹. २. °शीलम् मूको. ३. सुदीयते मूको. ४. °नि मूको. ५. 'मार्य वि¹; °माया म¹. ६. राजको मूको. ७. अपूणाम् मूको. ८-८. नास्ति मूको. ९. अग्नि म° मूको. १०. अप मूको. ११. अत्र मूको. १२. मध्यमं मूको.

जाम्यतीतपे धनुर्वयोधा अरुहद्वनम् । दृपदं जिह्वयावधीत् ॥ ४ ॥

जामि । अतीतपे । धनुः । वयःऽधाः । अरुहत् । वनम् । दृपदम् । जिह्वया । आ । अवधीत् ॥४॥

वेङ्कट० गमनशीलम् धनुः तपति अन्नस्य[1] दाता मध्यमः अग्निः[2], उदकम् (तु निघ १,१२) आ रोहति[3], दृपदम् मेघम् च जिह्वया हन्ति ॥ ४ ॥

चरन् वत्सो रुशन्निह निदातारं न विन्दते । वेति स्तोतव अम्ब्यम् ॥ ५ ॥

चरन् । वत्सः । रुशन् । इह । निऽदातारम् । न । विन्दते । वेति । स्तोतवे । अम्ब्यम् ॥ ५ ॥

वेङ्कट० चरन् वत्सः श्वेतो भवन् इह निदातारम् न विन्दते । "यः प्रतिबध्नाति"[4] न तं लभते । वैद्युतः सोऽयं वत्सः स्वयमेव गच्छति आत्मानं स्तोतुम् "अम्ब्यम् माध्यमिकां वाचम्"[5] इति ॥ ५ ॥

"इति षष्ठाष्टके पञ्चमाध्याये चतुर्दशो वर्गः"[6] ॥

उतो न्वस्य यन्महदश्वावद्योजनं बृहत् । दामा रथस्य ददृशे ॥ ६ ॥

उतो इति । नु । अस्य । यत् । महत् । अश्वऽवत् । योजनम् । बृहत् । दामा । रथस्य । ददृशे ॥६॥

वेङ्कट० अपि च तत् क्षिप्रम् "यत् अस्य" दीर्घं पृथु सम्बद्धाश्वम् योजनम् दृश्यते । एतदेवाऽऽह— "दामा रथस्य इति"[7] रज्जुं नियोजयति, सा यदा दृश्यत । उत्तरत्र सम्बन्धः ॥ ६ ॥

दुहन्ति सप्तैकामुप द्वा पञ्च सृजतः । तीर्थे सिन्धोरधि स्वरे ॥ ७ ॥

दुहन्ति । सप्त । एकाम् । उप । द्वा । पञ्च । सृजतः । तीर्थे । सिन्धोः । अधि । स्वरे ॥ ७ ॥

वेङ्कट० तदा दुहन्ति सप्त ऋत्विजः एकाम् घर्मदुघाम् उदिते[8] सूर्ये । तत्र च द्वौ अध्वर्यू पञ्च अन्यानृत्विजः उप सृजतः[9] यजमानं ब्रह्माणं होतारम् आग्नीध्रं प्रस्तोतारम् इति कस्यचित् सिन्धोः तीर्थे । यत्र असौ यजते ऋषिः तत्र । स्वरति शब्दकर्मा । यत् तीर्थम् ऋत्विजां शब्दैः शब्दं करोति तत्रेति ॥ ७ ॥

आ दशभिर्विवस्वत इन्द्रः कोशमचुच्यवीत् । खेदया त्रिवृता दिवः ॥ ८ ॥

आ । दशऽभिः । विवस्वतः । इन्द्रः । कोशम् । अचुच्यवीत् । खेदया । त्रिऽवृता । दिवः ॥८॥

वेङ्कट० इत्थं परिचरतः अस्य यजमानस्य दशभिः अङ्गुलिभिः इन्द्रः दिवः मेघम् आ अचुच्यवत् त्रिवृता रश्मिना इति ॥ ८ ॥

---

1 "न्नस्य वि", "धस्य क्ष 2 अग्निम् मूको 3 रोद मूको 4-4 य °मूको 5-5 अस्य माध्यमिका वोचम् मूको 6-6 नास्ति मूको 7-7 यन्दाम्य वि° 8 °, नाम्नामरसये मूको, 9 मनिये मूको 10 °न मूको

परिं त्रिधातुरध्वरं जूर्णिरेति नवीयसी । मध्वा होतारो अञ्जते ॥ ९ ॥

परि । त्रिऽधातु । अध्वरम् । जूर्णि । एति । नवीयसी । मध्वा । होतारः । अञ्जते ॥ ९ ॥

वेङ्कट० 'परि त्रिविष्टि अध्वरम्' (ऋ ४,१५,२) इत्यनेन[1] समानम् । अस्मिन् यज्ञे परि एति त्रिधातु[2] क्षिप्रा नवतरा अग्ने[3] ज्वाला । घृतेन[4] होतारः च अग्निम् अञ्जते[5] ॥ ९ ॥

सिञ्चन्ति नमसावतमुच्चाचक्रं परिज्मानम् । नीचीनंबारमक्षितम् ॥ १० ॥

सिञ्चन्ति । नमसा । अवतम् । उच्चाऽचक्रम् । परिऽज्मानम् । नीचीनऽबारम् । अक्षितम् ॥ १० ॥

वेङ्कट० सिञ्चन्ति नमनेन[6] अवतम्[7] महावीरम् उपरिस्थितचक्रम् परिचारम् नीचीनद्वारम्[8] अक्षीणम् आहवनीयस्य उपरि ॥ १० ॥

[9]इति षष्ठाष्टके चमाध्याये पञ्चदशो वर्गः[9] ॥

अभ्यारमिदद्रयो निषिक्तं पुष्करे मधु । अवतस्य विसर्जने ॥ ११ ॥

अभिऽआरम् । इत् । अद्रय । निऽसिक्तम् । पुष्करे । मधु । अवतस्य । विऽसर्जने ॥ ११ ॥

वेङ्कट० अभिगम्य ऋत्विजः महावीरस्य अन्तरिक्षे[10] निषिक्तम् मधु सिञ्चन्ति आदियमाना महावीरस्य विसर्जने । होमानन्तरं हि तम् आसादयन्ति आसन्द्यामिति ॥ ११ ॥

गाव उपावतावतं मही यज्ञस्य रप्सुदा । उभा कर्णा हिरण्यया ॥ १२ ॥

गावः । उप । अवत । अवतम् । मही इति । यज्ञस्य । रप्सुदा । उभा । कर्णा । हिरण्यया ॥ १२ ॥

वेङ्कट० हे गावः । उप गच्छत घर्मदुघा महावीरम् । महती[11] यज्ञस्य रप्सुदा [12]महावीरोपयोगिता यस्मात् सा[12] रप्सुदा । उभौ च अस्य हिरण्मयौ कर्णौ हिरण्मयजतौ रुक्मौ इति ॥ १२ ॥

आ सुते सिञ्चत श्रियं रोदस्योरभिश्रियम् । रसा दधीत वृषभम् ॥ १३ ॥

आ । सुते । सिञ्चत । श्रियम् । रोदस्योः । अभिऽश्रियम् । रसा । दधीत । वृषभम् ॥ १३ ॥

वेङ्कट० आ सिञ्चत सुते गोपयसि श्रयणम् आज्य पय द्यावापृथिव्यौ अभिश्रयन्तम् । वृषभम् अग्निं रसे दधीत । 'आग्नेयी वा एषा यदजा' (तैब्रा ३,७,३,१) इति ब्राह्मणादित्थमुक्तम् इति ॥ १३ ॥

ते जानत स्वमोक्यं सं वत्सासो न मातृभिः । मिथो नसन्त जामिभिः ॥ १४ ॥

ते । जानत । स्वम् । ओक्यम् । सम् । वत्सासः । न । मातृऽभिः । मिथः । नसन्त । जामिऽभिः ॥ १४ ॥

---

१. इत्येतेन भ[?]. २. [?]तु मूको. ३. [?]ग्ने मूको. ४ घृते[?] मूको ५. [?]न्ते मूको. ६-६. नमनेन वि[?]; नरनेन भ[?]. ७. अवतः मूको. ८. नीचद्वा[?] मूको. ९-९. नास्ति मूको. १०. अन्तरिक्षे मूको. ११. महिती मूको. १२-१२. [?]वीरोपयोगिता मूको.

वेङ्कट० ते गाव जानत स्वम् निवासस्थान महावीरम् । यथा वत्सा मातृभि मिथ सङ्गता भवन्ति । एवम् नामिभि सम् नसन्त इति ॥ १४ ॥

उप स्रक्वेषु बप्सतः कृण्वते धरुणं दिवि । इन्द्रे अग्ना नमः स्वः ॥ १५ ॥

उप । स्रक्वेषु । बप्सतः । कृण्वते । धरुणम् । दिवि । इन्द्रे । अग्ना । नमः । स्वरिति स्वः ॥ १५ ॥

वेङ्कट० उप कुर्वन्ति महावीरस्य स्रक्वेषु ज्वालया भक्षयतः[१] अग्नौ अन्नं प्रदास्यम् इन्द्राग्न्यो धारकम् अन्तरिक्षे । यदा[२] महावीरस्य अस्य प्रदेशम् अग्नि बप्सति, तदानीम् इन्द्राग्न्यो द्वारम् अन्न गव्यमाज च महावीरस्यास्य उपरि कृण्वन्ति ॥ १५ ॥

[३]इति पञ्चाष्टके पञ्चमाध्याये षोडशो वर्ग[३] ॥

अधुक्षत् पिप्युषीमिषमूर्जं सप्तपदीमरिः । सूर्यस्य सप्त रश्मिभिः ॥ १६ ॥

अधुक्षत् । पिप्युषीम् । इषम् । ऊर्जम् । सप्तऽपदीम् । अरिः । सूर्यस्य । सप्त । रश्मिऽभिः ॥ १६ ॥

वेङ्कट० अधुक्षत् आप्याययत् अन्नं रसं च सप्तपदीम् माध्यमिका वाचम् । सा हि घर्मधुग्भूत्वा तिष्ठति । तथा च अस्यवामीये (ऋ १,१६४,२७,२८) उक्तम् । गन्ता वायु सूर्यस्य सप्तभि रश्मिभ ॥ १६ ॥

सोमस्य मित्रावरुणोदिता सूर आ ददे । तदातुरस्य भेषजम् ॥ १७ ॥

सोमस्य । मित्रावरुणा । उत्ऽइता । सूरे । आ । ददे । तत् । आतुरस्य । भेषजम् ॥ १७ ॥

वेङ्कट० हे मित्रावरुणौ[४] उदिते सूर्ये ममामित्र[५] यष्टे सोमम्[६] आ ददे देवाना [७]भागाय । तत्[७] [७]दि आतुरस्य[७] अस्मदाद भेषजम् ॥ १७ ॥

उतो न्वस्य यत् पदं हर्यतस्य निधान्यम् । परि द्यां जिह्वयातनत् ॥ १८ ॥

उतो इति । नु । अस्य । यत् । पदम् । हर्यतस्य । निऽधान्यम् । परि । द्याम् । जिह्वया । अतनत् ॥ १८ ॥

वेङ्कट० अपि च सोमे अपि च क्षिप्रम् अस्य हर्यतस्य मम यत् हविषा निधानयोग्य[८] स्थानम् उत्तरवेद्यात्मकम् । 'सौम्युत्तरवेदि' (माश ७,३,१,२७) ताम् अग्निर्ज्वालया[९] परितनोति ॥ १८ ॥

[३]इति पञ्चाष्टके पञ्चमाध्याये सप्तदशो वर्ग[३] ॥

---

१ °न्त मूको २. यथा मूको, ३ ३ नास्ति मूको, ४ मम्मा° मूको ५. गोम मूको ६ ६ गावत मूको ७ ७. ध्यातुरस्य वि°, ध्यातुरस्य अ°, ८ निदान° मूको ९ अग्निज्वा°

[७३]

[1]गोपवन आत्रेयः सप्तवध्रिर्वा ऋषिः। अश्विनौ देवता। गायत्री छन्दः[1]।

उदीराथामृतायते युञ्जाथामश्विना रथम्। अन्ति षद् भूतु वामवः ॥ १ ॥

उत्। ईराथाम्। ऋतऽयते। युञ्जाथाम्। अश्विना। रथम्। अन्ति। सत्। भूतु। वाम्। अवः ॥

वेङ्कट० गोपवन आत्रेयः सप्तवध्रिर्वा। उत् गच्छतम्[2] यज्ञमिच्छते। युञ्जाथाम् च अश्विनौ! रथम्[3]! आसन्ने[4] स्थाने अस्माकं विद्यमानं भवतु युवयोः पालनम् ॥ १ ॥

निमिषश्चिज्जवीयसा रथेना यातमश्विना। अन्ति षद् भूतु वामवः ॥ २ ॥

निऽमिषः। चित्। जवीयसा। रथेन। आ। यातम्। अश्विना। अन्ति। सत्। भूतु। वाम्। अवः ॥

वेङ्कट० चक्षुषो निमेषादपि वेगवत्तरेण रथेन आ यातम् अश्विनौ! ॥ २ ॥

उप स्तृणीतमत्रये हिमेन घर्ममश्विना। अन्ति षद् भूतु वामवः ॥ ३ ॥

उप। स्तृणीतम्। अत्रये। हिमेन। घर्मम्। अश्विना। अन्ति। सत्। भूतु। वाम्। अवः ॥ ३ ॥

वेङ्कट० असुरैः अग्नौ प्रक्षिप्ताय अत्रये युवां तम् अग्निम् हिमेन उपस्तीर्णवन्तौ[5] ॥ ३ ॥

कुह स्थः कुह जग्मथुः कुह श्येनेव पेतथुः। अन्ति षद् भूतु वामवः ॥ ४ ॥

[6]कुह। स्थः। कुह। जग्मथुः। कुह। श्येनाऽइव। पेतथुः[6]। अन्ति। सत्। भूतु। वाम्। अवः ॥ ४ ॥

वेङ्कट० क्व भवथः[7]। सम्प्रति क्व च[8] गच्छथः[9]। [10]क्व वा[10] श्येनौ इव पेतथुः इदं [11]निरूपयन्तो प्रेष्ठम्। अन्ति षद् भूतु वामवः[11] ॥ ४ ॥

यदद्य कर्हि कर्हि चिच्छुश्रूयातमिमं हवम्। अन्ति षद् भूतु वामवः ॥ ५ ॥

[12]यत्। अद्य। कर्हि। कर्हि। चित्। शुश्रूयातम्। इमम्। हवम्[12]। अन्ति। सत्। भूतु। वाम्। अवः ॥

वेङ्कट० यत् अद्य कस्मिन् अपि देशे कस्मिन् अपि काले शृणुयातम् इमम् हवम्। येनयेन वाक्यसंयोगेन उत्तरोऽर्धर्चः सङ्गच्छते तत्र मध्य आनयेदिति ॥ ५ ॥

[1]इति षष्ठाष्टके पञ्चमाध्याये अष्टादशो वर्गः[1] ॥

अश्विना यामहूतमा नेदिष्ठं याम्याप्यम्। अन्ति षद् भूतु वामवः ॥ ६ ॥

१-१. नास्ति मूको. २. °च्छत मूको. ३ तु. ऋ १,४६,१. ४. °सने मूको. ५. तु. ऋ १,११६,८. ६-६. तु ऋ ५,७८,१-२. ७. °दथ मको. ८. नास्ति वि°. ९. °ष्य मूको. १०-१०. नास्ति वि°. ११-११. °पनि पदं सर्वाणि यद्युष्मा मूको. १२-१२. तु. ऋ ५,७४,१०.

अश्विना । यामऽहूतमा । नेदिष्ठम् । यामि । आप्यम् । अन्ति । सत् । भूतु । वाम् । अवः ॥६॥

वेङ्कट० अश्विनौ अत्यन्तम् आह्वातव्यौ नेदिष्ठम् याचे बान्धवम् ॥ ६ ॥

अवन्तमत्रये गृहं कृणुतं युवमश्विना । अन्ति षद् भूतु वामवः ॥ ७ ॥

अवन्तम् । अत्रये । गृहम् । कृणुतम् । युवम् । अश्विना । अन्ति । सत् । भूतु । वाम । अवः ॥७॥

वेङ्कट० रक्षन्तम् अत्रये कृणुतम् गृहम् युवाम् अश्विनौ[1] ॥ ७ ॥

वरेथे अग्निमातपो वदते वल्ग्वत्रये । अन्ति षद् भूतु वामवः ॥ ८ ॥

वरेथे इति । अग्निम् । आऽतपः । वदते । वल्गु । अत्रये । अन्ति । सत् । भूतु । वाम् । अवः ॥८॥

वेङ्कट० आधारयतम् अग्निम् 'आतप[2] वदते वल्गु[2] स्तोत्रम् अत्रये ॥ ८ ॥

प्र सप्तवध्रिराशसा धारामग्नेरशायत । अन्ति षद् भूतु वामवः ॥ ९ ॥

प्र । सप्तऽवध्रिः । आऽशसा । धाराम् । अग्नेः । अशायत । अन्ति । सत् । भूतु । वाम् । अवः ॥९॥

वेङ्कट० 'प्र अशायत' रात्रिषु मञ्जूषाया[3] निर्गत्य सप्तवध्रि आशसनेन युवयो प्रार्थनेन अग्ने धाराम् मञ्जूषाया अन्त प्रविष्टाम् प्राशायत इति[4] ॥ ९ ॥

इहा गतं वृषण्वसू शृणुतं म इमं हवम् । अन्ति षद् भूतु वामवः ॥१०॥

इह । आ । गतम् । वृषण्वसू इति वृषण्ऽवसू । शृणुतम् । मे । इमम् । हवम् । अन्ति । सत् । भूतु । वाम् । अवः ॥

वेङ्कट० इह आ गच्छत हे वृष्यमाणधनौ[5] । शृणुतम् मे इमम् हवम् ॥ १० ॥

[4]इति पञ्चाष्टके पञ्चमाध्याये एकोनविंशो वर्गः[4] ॥

किमिदं वां पुराणवज्जरतोरिव शस्यते । अन्ति षद् भूतु वामवः ॥ ११ ॥

किम् । इदम् । वाम् । पुराणऽवत् । जरतोःऽइव । शस्यते । अन्ति । सत् । भूतु । वाम् । अवः ॥ ११ ॥

वेङ्कट० युवयो प्रत्नयो[6] जरतो[7] इव च मया पुन पुन शस्यते तादृशयो इति अनागमनात् अश्विनौ वदति । वृद्ध जीर्णं वा शस्यमानं[8] इन्द्रियवैकल्यात् न तत् क्षिप्र श्रुत्वा करोति ॥ ११ ॥

समानं वां सजात्यं समानो बन्धुरश्विना । अन्ति षद् भूतु वामवः ॥ १२ ॥

---

१ १ °पा न् उ मूको. २-२. प्रासाय मूको. ३. °या मूको ४ तु ऋ ५ ७८,४. ५ ° नास्ति मूको ६. °त्नो मूको ७ °रयो मूको. ८ यास्य° मूको.

समानम् । वाम् । सऽजात्यम् । समान । बन्धु । अश्विना । अन्ति । सत् । भूतु । वाम् । अवं ॥१२॥

वेङ्कट० समानम् युवयो सजात्यम् । एकम् एव उत्पत्तिस्थानम् इत्यर्थं । समान च बन्धु स्तुति इति ॥ १२ ॥

यो वां रजांस्यश्विना रथो वियाति रोदसी । अन्ति षद् भूतु वामवः ॥ १३ ॥

य । वाम् । रजांसि । अश्विना । रथ । विऽयाति । रोदसी इति । अन्ति । सत् । भूतु । वाम् । अवं ॥

वेङ्कट० य युवयो सर्वान् लोकान् द्यावापृथिव्यौ च अश्विनौ । वि याति [1]रथ, तेन आगच्छतम्[1] इति ॥ १३ ॥

आ नो गव्येभिरश्व्यैः सहस्रैरुप गच्छतम् । अन्ति षद् भूतु वामवः ॥ १४ ॥

आ । न । गव्येभि । अश्व्यै । सहस्रै । उप । गच्छतम् । अन्ति । सत् । भूतु । वाम् । अवं ॥

वेङ्कट० उप आ गच्छतम् अस्मान् बहुभि गव्यै अश्व्यै[2] च ॥ १४ ॥

मा नो गव्येभिरश्व्यैः सहस्रेभिरति ख्यतम् । अन्ति षद् भूतु वामवः ॥ १५ ॥

मा । न । गव्येभि । अश्व्यै । सहस्रेभि । अति । ख्यतम् । अन्ति । सत् । भूतु । वाम् । अवं ॥

वेङ्कट० मा अस्मान् एतै अति पश्यतम् । अतिदर्शनम् अपदानम् इति ॥ १५ ॥

अरुणप्सुरुषा अभूदकर्ज्योतिर्ऋतावरी । अन्ति षद् भूतु वामवः ॥ १६ ॥

अरुणऽप्सु । उषा । अभूत् । अकं । ज्योति । ऋतऽवरी । अन्ति । सत् । भूतु । वाम् । अवं ॥

वेङ्कट० अरुणरूपा उषा अभूत् । करोति ज्योति उषा ॥ १६ ॥

अश्विना सु विचाकशद्वृक्षं परशुमाँ इव । अन्ति षद् भूतु वामवः ॥१७॥

अश्विना । सु । विऽचाकशत् । वृक्षम् । परशुमान्ऽइव । अन्ति । सत् । भूतु । वाम् । अवं ॥१७॥

वेङ्कट० अश्विनौ ![3] सुष्ठु नाशयति अन्धकारम् अत्यन्त दीप्यमान सूर्य अग्नि वा वृक्षम् परशुमान् इव ॥ १७ ॥

पुरं न धृष्णवा रुज कृष्णया बाधितो विशा । अन्ति षद् भूतु वामवः ॥ १८ ॥

पुरम् । न । धृष्णो इति । आ । रुज । कृष्णया । बाधित । विशा । अन्ति । सत् । भूतु । वाम् । अवं ॥

१-१ रथो गच्छ° मूको. २ अश्वै मूको. ३ अन्वय ?.

वेङ्कट० कर्षणशीलया विशा शत्रुभूतया बाधित त्वं सत्पते! धृष्णुः भूत्वा मनुष्याम् आ रुज इति आत्मनः अनुशासनम्। अपि वा सत्पतिम् अग्निं गोपवनः अनुशास्ति इति ॥ १८ ॥

'इति षष्ठाष्टके पञ्चमाध्याये विंशो वर्गः' ॥

[७४]

'गोपवन आत्रेय ऋषिः । अग्निर्देवता, त्रयोदश्यादिपञ्चदश्यन्तानां श्रुतर्वण आर्क्षस्य दानम् । प्रथमादिद्वादश्यन्ता अनुष्टुब्गुप् प्रगाथश्छन्दः (= अनुष्टुब्गायत्र्यौ), अवशिष्टा अनुष्टुभः'।

विशोविशो वो अतिथिं वाजयन्तः पुरुप्रियम् ।
अग्निं वो दुर्यं वचः स्तुषे शूषस्य मन्मभिः ॥ १ ॥

विशःऽविशः । वः । अतिथिम् । वाजऽयन्तः । पुरुऽप्रियम् ।
अग्निम् । वः । दुर्यम् । वचः । स्तुषे । शूषस्य । मन्मऽभिः ॥ १ ॥

वेङ्कट० सर्वस्य मनुष्यस्य अतिथिम् यूयम् अन्नम् इच्छन्तः बहुप्रियम् परिचरत । अहं च अग्निम् युष्माकं गृहभवम् वचसा स्तौमि सुखकरस्य स्तोत्रैः इति ॥ १ ॥

यं जनासो हविष्मन्तो मित्रं न सर्पिरासुतिम् । प्रशंसन्ति प्रशस्तिभिः ॥ २ ॥

यम् । जनासः । हविष्मन्तः । मित्रम् । न । सर्पिःऽआसुतिम् । प्रऽशंसन्ति । प्रशस्तिऽभिः ॥ २ ॥

वेङ्कट० यम् जनाः हविष्मन्तः सखायम् इव यस्मिन् घृतं हूयते, प्रशंसन्ति प्रशंसनैः तम् इति ॥ २ ॥

पन्यांसं जातवेदसं यो देवतात्युद्यता । हव्यान्यैरयद्दिवि ॥ ३ ॥

पन्यांसम् । जातऽवेदसम् । यः । देवऽताति । उत्ऽयता । हव्यानि । ऐरयत् । दिवि ॥ ३ ॥

वेङ्कट० अत्यन्त स्तोतारम् जातवेदसम्, यः यज्ञे' उद्यता हव्यानि' द्युलोके प्रेरयति ॥ ३ ॥

आगन्म वृत्रहन्तमं ज्येष्ठमग्निमानवम् । यस्य श्रुतर्वा बृहन्नार्क्षो अनीक एधते ॥ ४ ॥

आ । अगन्म । वृत्रहन्ऽतमम् । ज्येष्ठम् । अग्निम् । आनवम् ।
यस्य । श्रुतर्वा । बृहन् । आर्क्षः । अनीके । एधते ॥ ४ ॥

---

१ भरतान मूको. २-२. नास्ति मूको. ३. पयसा मूको ४. य वि'. ५. हव्यादि मूको.

वेङ्कट० आगता नूनक्तमम् प्रशस्यम् अग्निम्[1] मनुष्याणां सम्बन्धिनम्, यस्य अयम् धुतवा आर्छ.[2] 'महान् ज्वालासंघे[3] वर्धते इति । भिक्षणाय यत्र आगत तत्रत्यम्[4] अग्नि स्तौति ॥ ४ ॥

अमृतं जातवेदसं तिरस्तमांसि दर्शतम् । घृताहवनमीड्यम् ॥ ५ ॥

अमृतम् । जातऽवेदसम् । [5]तिरः । तमांसि । दर्शतम्[5] । घृतऽआहवनम् । ईड्यम् ॥ ५ ॥

वेङ्कट० अमृतम् जातवेदसम्, य तमांसि तिरः दर्शयति विनाशयति, यस्मिन् च घृतम् आहूयते, स्तुत्यं तम् आगन्म इति ॥ ५ ॥

[6]इति पञ्चाष्टके पञ्चमाध्याये एकविंशो वर्गः[6] ॥

सबाधो यं जना इमेऽग्निं हव्येभिरीळते । जुह्वानासो यतस्रुचः ॥ ६ ॥

[7]सऽबाधः । यम् । जनाः । इमे । अग्निम् । हव्येभिः । ईळते[7] । जुह्वानासः । यतऽस्रुचः ॥ ६ ॥

वेङ्कट० बाधसहिता यम् जना इमे अग्निम् हव्यैः सह स्तुवन्ति होमं कुर्वाणा आत्तस्रुचः[8] ॥ ६ ॥

इयं ते नव्यसी मतिरग्ने अधाय्यस्मदा । मन्द्र सुजात सुक्रतोऽमूर दस्मातिथे ॥७॥

इयम् । ते । नव्यसी । मतिः । अग्ने । अधायि । अस्मत् । आ ।
मन्द्र । सुऽजात । सुक्रतो इति सुऽक्रतो । अमूर । दस्म । अतिथे ॥ ७ ॥

वेङ्कट० इयम् ते नवतरा स्तुतिः अग्ने! निहिताऽभूत् अस्मासु हे मोदमान! शोभनजनन! सुप्रज्ञ! अमूढ! दर्शनीय! अतिथे! ॥ ७ ॥

सा ते अग्ने शंतमा चनिष्ठा भवतु प्रिया । तया वर्धस्व सुष्टुतः ॥ ८ ॥

सा । ते । अग्ने । शम्ऽतमा । चनिष्ठा । भवतु । प्रिया । तया । वर्धस्व । सुऽस्तुतः ॥ ८ ॥

वेङ्कट० सा ते अग्ने! शन्तमा अतिशयेन[9] अन्नवती भवतु प्रिया। तया मत्या वर्धस्व सुष्टुत ॥ ८ ॥

सा द्युम्नैर्द्युम्निनी बृहदुपोप श्रवसि श्रवः । दधीत वृत्रतूर्ये ॥ ९ ॥

सा । द्युम्नैः । द्युम्निनी । बृहत् । उपऽउप । श्रवसि । श्रवः । दधीत । वृत्रऽतूर्ये ॥ ९ ॥

वेङ्कट० सा हविर्भिः हविष्मती[9] महत् अन्नम् अस्माकम् उप दधीत वर्तमानस्य अन्नस्य उपरि अनुपक्षीणे पूर्वस्मिन् अन्ने[10] सङ्ग्रामे शत्रूणाम्[11] ॥ ९ ॥

---

१. °ग्नि मूको. २. नास्ति मूको ३-३. महाज्वालावरौव मूको. ४. तस्य तम° अ°. ५-५. तु म° ३,२७,१३ ६-६. नास्ति मूको. ७-७. तु. ऋ ७,८,१ ८. °च इति अ°. ९-९. °द्रि… भरि° मूको. १०. °ि मूको. ११. अग्ने मूको.

अश्वमिद्गां रथप्रां त्वेषमिन्द्रं न सत्पतिम् ।
यस्य श्रवांसि तूर्वथ पन्यंपन्यं च कृष्टयः ॥ १० ॥

अश्वम् । इव । गाम् । रथऽप्राम् । त्वेषम् । इन्द्रम् । न । सत्ऽपतिम् ।
यस्य । श्रवांसि । तूर्वथ । पन्यम्ऽपन्यम् । च । कृष्टयः ॥ १० ॥

वेङ्कट० अश्वम् इव गन्तारम् 'रथानां धनैः' पूरयितारम् दीप्तम् इन्द्रम् इव च सतां पतिम् इम परिचरत अग्निम्, यस्य बलेन शत्रूणाम् अन्नानि 'तूर्वथ हिंस्थ पन्यम्' च स्तुत्य धनम् मनुष्याः ॥ १० ॥

'इति षष्ठाष्टके पञ्चमाध्याये द्वाविंशो वर्गः' ॥

यं त्वा गोपवनो गिरा चनिष्ठदग्ने अङ्गिरः । स पावक श्रुधी हवम् ॥ ११ ॥

यम् । त्वा । गोपवन । गिरा । चनिष्ठत् । अग्ने । अङ्गिरः । सः । पावक । श्रुधि । हवम् ॥ ११ ॥

वेङ्कट० यम् त्वा ऋषयम्[4] गोपवन गिरा[5] अतिशयेन अन्नप्रदातारम् अकरोत् अग्ने! अङ्गिरः!, स पावक! शृणु तस्य ह्वानम् ॥ ११ ॥

यं त्वा जनास ईळते सबाधो वाजसातये । स बोधि वृत्रतूर्ये ॥ १२ ॥

यम् । त्वा । जनासः । ईळते । सऽबाधः । वाजऽसातये । सः । बोधि । वृत्रऽतूर्ये ॥ १२ ॥

वेङ्कट० जनास यम् त्वा जनाः स्तुवन्ति बाधासहिताः अन्नलाभाय, स[6] बुध्यस्व अस्मान् सङ्ग्रामे ॥ १२ ॥

अहं हुवान आर्क्षे श्रुतर्वणि मदच्युति ।
शर्धांसीव स्तुकाविनां मृक्षा शीर्षा चतुर्णाम् ॥ १३ ॥

अहम् । हुवानः । आर्क्षे । श्रुतर्वणि । मदऽच्युति ।
शर्धांसिऽइव । स्तुकाऽविनाम् । मृक्ष[7] । शीर्षा । चतुर्णाम् ॥ १३ ॥

वेङ्कट० अहम् हूयमान ऋक्षस्य अपत्ये श्रुतर्वनाम्नि शत्रुमदस्य च्यावयितरि[8], स्तुकाविनः[9] ऊर्णायव स्तुकाः[10] केशसङ्घात, तद्वता शर्धांसि इव उच्छ्रितानि लोमानि इव "हस्तेन उन्मृजामि"[11] प्रतिगृह्यमाणानाम् चतुर्णाम् अश्वानां शिरांसि ॥ १३ ॥

---

१ रथ ध° मूको २. तूर्वथा बलस्य मूको. ३ ३. नास्ति मूको. ४. नास्ति अ°. ५ रो मूको ६ स मूको ७ = √मृक्ष् > लटि उपु१ °मृक्षामि > (वावि) > °मृक्षाह् > यनि इति (तु. छन्द) । ८. च्यावयि° मूको ९. कापि न मूको १०. स्तुता मूको ११ ११. तु. ऋ १,१२६,४ भाष्यम् ।

मां चत्वार आशवः शविष्ठस्य द्रवित्नवः ।
सुरथासो अभि प्रयो वक्षन् वयो न तुग्र्यम् ॥ १४ ॥

माम् । चत्वारः । आशवः । शविष्ठस्य । द्रवित्नवः ।
सुऽरथासः । अभि । प्रयः । वक्षन् । वयः । न । तुग्र्यम् ॥ १४ ॥

वेङ्कट० माम् चत्वारः अश्वाः बलवत्तमस्य श्रुतर्वणः गमनशीलाः शोभनरथाः अभि अवहन् शत्रूणाम् अन्नं प्रति । यथा तुग्र्यम् भुज्युं चतस्रः नावः स्वगृहं प्रापयन् इति ॥ १४ ॥

सत्यमित् त्वा महेनदि परुष्ण्यव देदिशम् ।
नेमापो अश्वदातरः शविष्ठादस्ति मर्त्यः ॥ १५ ॥

सत्यम् । इत् । त्वा । महेऽनदि । परुष्णि । अव । देदिशम् ।
न । ईम् । आपः । अश्वऽदातरः । शविष्ठात् । अस्ति । मर्त्यः ॥ १५ ॥

वेङ्कट० सत्यम् एव त्वां हे महानदि![1] परुष्णि! अव देदिशम् त्वां प्रति वदामि। तदेवाऽऽह— नेमापः इति। हे आपः! न अस्मात्[2] बलवत्तमाद् अन्यः कश्चित् मनुष्यः अश्वानाम् अतिशयेन दाता विद्यते[3] इति ॥ १५ ॥

[4]इति षष्ठाष्टके पञ्चमाध्याये त्रयोविंशो वर्गः[4] ॥

[७५]

[4]विरूप आङ्गिरस ऋषिः। अग्निर्देवता। गायत्री छन्दः[4]।

युक्ष्वा हि देवहूतमाँ अश्वाँ अग्ने रथीरिव । नि होता पूर्व्यः सदः ॥ १ ॥
युक्ष्व । हि । देवऽहूतमान् । अश्वान् । अग्ने । रथीःऽइव । नि । होता । पूर्व्यः । सदः ॥ १ ॥

वेङ्कट० विरूपः। योजय रथे देवानाम् आह्वातृतमान् अश्वान् अग्ने! सारथिः इव। युक्त्वा च मुख्यः त्वम् नि षीद च होता इति ॥ १ ॥

उत नो देव देवाँ अच्छा वोचो विदुष्टरः । श्रद्विश्वा वार्या कृधि ॥ २ ॥
उत । नः । देव । देवान् । अच्छ । वोचः । विदुःऽतरः । श्रत् । विश्वा । वार्या । कृधि ॥ २ ॥

वेङ्कट० अपि च अस्मान् देव! देवान् अभिमुखाः विद्वत्तमः[5]। श्रत्[6] च कृधि विश्वानि वरणीयानि धनानि देवेषु अस्माकम् ॥ २ ॥

---

१. मातः अपि वि[?]; महान् अपि अ[?]. २. आभार मूको ३. विद्यत मूको ४-४. नास्ति मूको. ५. विद्वतम मूको. ६. ॰ मूको.

त्वं ह यद्यविष्ठ्य सहसः सूनवाहुत । ऋतावा यज्ञियो भुवः ॥ ३ ॥

त्वम् । ह । यत् । यविष्ठ्य । सहसः । सूनो इति । आऽहुत । ऋतऽवा । यज्ञियः । भुवः ॥ ३ ॥

वेङ्कट० त्वम् खलु यदा युवतम[1] सहसः पुत्र[1] आहुत । सत्यवान् यज्ञसम्पादक भवसि, तदा अत्र विधा वार्या इधि (ऋ ८,७५,२) ॥ ३ ॥

अयमग्निः सहस्रिणो वाजस्य शतिनस्पतिः । मूर्धा कवी रयीणाम् ॥ ४ ॥

अयम् । अग्निः । सहस्रिणः । वाजस्य । शतिनः । पतिः । मूर्धा । कविः । रयीणाम् ॥ ४ ॥

वेङ्कट० अयम् अग्नि सहस्रशतसङ्ख्यस्य अन्नस्य स्वामी[1] वन्दित 'क्रान्तप्रज्ञ मनुष्याणाम् रयीणाम् च भवति[2] ॥ ४ ॥

तं नेमिमृभवो यथा नमस्व सहूतिभिः । नेदीयो यज्ञमङ्गिरः ॥ ५ ॥

तम् । नेमिम् । ऋभवः । यथा । आ । नमस्व । सहूतिऽभिः । नेदीयः । यज्ञम् । अङ्गिरः ॥ ५ ॥

वेङ्कट० हे अङ्गिर ! तम् [3]यज्ञम् आ नमस्व समीपतरम्[3] आनमय समानह्वाने अन्यै देवै सह, यथा रथस्य नेमिम् ऋभव आनमन्ति । आनमनकुशला ऋभव ॥ ५ ॥

[4]इति षष्ठाष्टके पञ्चमाध्याये चतुर्विंशो वर्गः[4] ॥

तस्मै नूनमभिद्यवे वाचा विरूप नित्यया । वृष्णे चोदस्व सुष्टुतिम् ॥ ६ ॥

तस्मै । नूनम् । अभिऽद्यवे । वाचा । विऽरूप । नित्यया । वृष्णे । चोदस्व । सुऽस्तुतिम् ॥ ६ ॥

वेङ्कट० तस्मै इदानीम् अभिगतदीप्तये वाचा विरूप ! अनवरतया[5] वृष्ण चोदस्व सुष्टुतिम् । अग्निं स्तुहीति ॥ ६ ॥

कमु ष्विदस्य सेनयाऽग्नेरपाकचक्षसः । पणिं गोषु स्तरामहे ॥ ७ ॥

[6]कम् । ऊं इति । स्वित् । अस्य । सेनया । अग्नेः[6] । अपाकऽचक्षसः । पणिम् । गोषु । स्तरामहे ॥७॥

वेङ्कट० कम्[7] खलु अस्य सेनया ज्वालानीकेन अग्न अनल्पतेजस[8] पणिम् असुर गोनिमित्तम् स्तरामहे । स्तरण हिंसनम् इति । तदानीं बलिनम् अभिभवाम इति ॥ ७ ॥

मा नो देवानां विशः प्रस्नातीरिवोस्राः । कृशं न हासुरघ्न्याः ॥ ८ ॥

मा । नः । देवानाम् । विशः । प्रस्नातीःऽइव । उस्राः । कृशम् । न । हासुः । अघ्न्याः ॥ ८ ॥

---

१ स्वाम् मूको. २ °ग्नं रयीणां मव वि°. ३-३ °ज्ञमानस नमर° मूको. ४-४ नास्ति मूको. ५ अनरकतया वि° अनवरकत्या अ. ६-६ सु ऋ १०,१५६,२. ७ त मूको. ८ मल्प° मूको.

वेङ्कट० मा अस्मान् देवानाम् परिचारकान्[1] अग्निः हासीत्, यथा 'पयः क्षरन्त्यः[2] उस्राः न परित्यजन्ति। कृशम् न हासुः अघ्न्याः इति औपमिकम्। कृशं वत्सं [3]यथा गावो न परित्यजन्ति[3] तद्वन्मा हासीत् इति ॥ ८ ॥

मा नः॑ समस्य दूढ्य१ः॑ परि॑द्वेषसो अंहतिः। ऊर्मिर्न नाव॒मा व॑धीत् ॥ ९ ॥

मा। नः॒। स॒मस्य॑। दुः॒ऽध्यः॑। परि॑ऽद्वेषसः। अं॒हतिः॑। ऊ॒र्मिः। न। नाव॑म्। आ। व॒धीत् ॥ ९ ॥

वेङ्कट० मा अस्मान् सर्वस्य दुर्बुद्धेः[4] परितः द्विषतः हननम् आहतिः ऊर्मिः[5] इव नावम् आ वधीत् ॥ ९ ॥[6]

नम॑स्ते अग्न॒ ओज॑से गृ॒णन्ति॑ देव कृ॒ष्टयः॑। अमै॑र॒मित्र॑मर्दय ॥ १० ॥

नमः॑। ते॒। अ॒ग्ने॒। ओज॑से। गृ॒णन्ति॑। दे॒व॒। कृ॒ष्टयः॑। अमैः॑। अ॒मित्र॑म्। अ॒र्द॒य॒ ॥ १० ॥

वेङ्कट० नमस्कारम् तव अग्ने! देव! बलाय मनुष्याः उच्चारयन्ति। स त्वं बलैः अमित्रम् अर्दय ॥ १० ॥

[7]इति षष्ठाष्टके पञ्चमाध्याये पञ्चविंशो वर्गः[7] ॥

कु॒वित् सु नो॒ गवि॑ष्टयेऽग्ने॑ सं॒वेषि॑षो र॒यिम्। उरु॑कृदु॒रु ण॑स्कृधि ॥ ११ ॥

कु॒वित्। सु। नः॒। गोऽइ॑ष्टये। अग्ने॑। स॒म्ऽवेषि॑षः। र॒यिम्। उरु॑ऽकृत्। उ॒रु। नः॒। कृ॒धि॒ ॥

वेङ्कट० बहु अस्माकम् गविष्टये अग्ने! सुष्ठु धनं सम्प्रापय। बहुकृत्[8] बहु अस्माकं कुर्विति। पूरयितुम् अस्माकं वा इच्छामिति ॥ ११ ॥

मा नो॑ अ॒स्मिन् म॑हाध॒ने परा॑ वर्ग्भार॒भृद्य॑था। सं॒वर्गं॒ सं र॒यिं ज॑य ॥ १२ ॥

मा। नः॒। अ॒स्मिन्। म॒हा॒ऽध॒ने। परा॑। व॒र्क्। भा॒र॒ऽभृत्। य॒था। स॒म्ऽवर्ग॑म्। सम्। र॒यिम्। ज॒य ॥

वेङ्कट० मा अस्मान् अस्मिन् सङ्ग्रामे परित्याक्षीः, यथा भारभृत् अन्ते भारं परित्यजति। सर्वतः शत्रुभ्यः सह्यमानं धनम् अस्मदर्थम् जय इति ॥ १२ ॥

अ॒न्यम॒स्मद् भि॒या इ॒यमग्ने॒ सिष॑क्तु दु॒च्छुना॑। वर्धा॑ नो॒ अम॑वच्छवः॑ ॥ १३ ॥

अ॒न्यम्। अ॒स्मत्। भि॒ये। इ॒यम्। अग्ने॑। सिस॑क्तु। दु॒च्छुना॑। वर्धा॑। नः॒। अम॑ऽवत्। शवः॑ ॥ १३ ॥

वेङ्कट० अस्मत्तः अन्यम् तस्य भयाय इयम् अग्ने! दुच्छुना सेवताम्[9]। बाधकगणः दुच्छुना। वर्धय अस्माकं बलयुक्तं बलम् ॥ १३ ॥

---

1. °रकान् वि°; रकाम् अ°. 2-2. पयः क्षरन्त्यः मूको. 3-3. या ··· रि° मूको. 4. °द्धे मूको. 5. °र्मिन् मूको. 6. या. (५,२३) व्याख्यानम् अपि द्र. 7-7. नास्ति मूको. 8. °कृन्न मूको. 9. °ता मूको.

यस्याजुषन्नमस्विनः शमीमदुर्मखस्य वा । तं घेदग्निर्वृधावति ॥ १४ ॥

यस्य । अजुषत् । नमस्विनः । शमीम् । अदुःऽमखस्य । वा । तम् । घ । इत् । अग्निः । वृधा । अवति ॥

वेङ्कट० यस्य असेवत नमस्कारवतः अदुष्टयज्ञस्य वा कर्म, तम् एव अग्निः[1] वर्धनेन रक्षति[2] ॥ १४ ॥

परस्या अधि संवतोऽवराँ अभ्या तर । यत्राहमस्मि ताँ अव ॥ १५ ॥

परस्याः । अधि । सम्ऽवतः । अवरान् । अभि । आ । तर । यत्र । अहम् । अस्मि । तान् । अव ॥

वेङ्कट० परस्याः अस्याः संवतः शत्रुसेनायाः अवरान् अभि आ तर इति आत्मीयान् योद्धृन् निर्दिशति । यत्र अहम् अस्मि तान् रक्ष ॥ १५ ॥

विद्मा हि ते पुरा वयमग्ने पितुर्यथावसः । अधा ते सुम्नमीमहे ॥ १६ ॥

विद्म । हि । ते । पुरा । वयम् । अग्ने । पितुः । यथा । अवसः । अध । ते । सुम्नम् । ईमहे ॥

वेङ्कट० जानीमः हि ते[3] पुरा वयम् रक्षणम् अग्ने! यथा पितुः । अथ ते सुखं याचामहे ॥ १६ ॥

[4]इति षष्ठाष्टके पञ्चमाध्याये षड्विंशो वर्गः ॥

[७६]

कुरुसुतिः काण्व ऋषिः । इन्द्रो देवता । गायत्री छन्दः[7] ।

इमं नु मायिनं हुव इन्द्रमीशानमोजसा । मरुत्वन्तं न वृञ्जसे ॥ १ ॥

इमम् । नु । मायिनम् । हुवे । इन्द्रम् । ईशानम् । ओजसा । मरुत्वन्तम् । न । वृञ्जसे ॥ १ ॥

वेङ्कट० कुरुसुतिः[5] । इमम् क्षिप्रम् प्राज्ञम् हुवे[6] इन्द्रम् ईश्वरम् बलेन मरुत्वन्तम् इदानीं शत्रूणां छेदनाय ॥ १ ॥

अयमिन्द्रो मरुत्सखा वि वृत्रस्याभिनच्छिरः । वज्रेण शतपर्वणा ॥ २ ॥

अयम् । इन्द्रः । मरुत्ऽसखा । वि । वृत्रस्य । अभिनत् । शिरः । वज्रेण । शतऽपर्वणा ॥ २ ॥

वेङ्कट० अयम् इन्द्रः मरुत्सखा वृत्रस्य वि अच्छिनत् शिरः वज्रेण बहुसन्धिना ॥ २ ॥

वावृधानो मरुत्सखेन्द्रो वि वृत्रमैरयत् । सृजन्त्समुद्रिया अपः ॥ ३ ॥

ववृधानः । मरुत्ऽसखा । इन्द्रः । वि । वृत्रम् । ऐरयत् । सृजन् । समुद्रियाः । अपः ॥ ३ ॥

---

१. °विम् मूको. २. °क्षन्ति मूको. ३. नास्ति वि'. ४-७. नास्ति मूको. ५. कुरुसुति मूको. ६. हुव मूको.

वेङ्कट० वर्धमानः मरुत्सखा इन्द्रः वृत्रम् वि ऐरयत् सृजन्[1] आन्तरिक्ष्याणि उदकानि ॥ ३ ॥

अयं ह येन वा इदं स्वर्मरुत्वता जितम् । इन्द्रेण सोमपीतये ॥ ४ ॥

अयम् । ह । येन । वै । इदम् । स्वः । मरुत्वता । जितम् । इन्द्रेण । सोमऽपीतये ॥ ४ ॥

वेङ्कट० अयम् ह खलु इन्द्रः, येन खलु इदम् सर्वम् मरुत्वता जितम् इन्द्रेण सोमपानार्थम् ॥ ४ ॥

मरुत्वन्तमृजीषिणमोजस्वन्तं विरप्शिनम् । इन्द्रं गीर्भिर्हवामहे ॥ ५ ॥

मरुत्वन्तम् । ऋजीषिणम् । ओजस्वन्तम् । विऽरप्शिनम् । इन्द्रम् । गीःऽभिः । हवामहे ॥ ५ ॥

वेङ्कट० मरुत्वन्तम् तृतीयसवनस्थेन ऋजीषेण तद्वन्तम् ओजस्वन्तम् महान्तम् (द्र. निघ ३,३) इन्द्रम् स्तुतिभिः हवामहे ॥ ५ ॥

इन्द्रं प्रत्नेन मन्मना मरुत्वन्तं हवामहे । अस्य सोमस्य पीतये ॥ ६ ॥

इन्द्रम् । प्रत्नेन । मन्मना । मरुत्वन्तम् । हवामहे । अस्य । सोमस्य । पीतये ॥ ६ ॥

वेङ्कट० इन्द्रम् पुराणेन स्तोत्रेण मरुत्वन्तम् इति स्पष्टम् ॥ ६ ॥

[2]इति षष्ठाष्टके पञ्चमाध्याये सप्तविंशो वर्गः[2] ॥

मरुत्वाँ इन्द्र मीढ्वः पिबा सोमं शतक्रतो । अस्मिन् यज्ञे पुरुष्टुत ॥ ७ ॥

मरुत्वान् । इन्द्र । मीढ्वः । पिब । सोमम् । शतक्रतो इति शतऽक्रतो । अस्मिन् । यज्ञे । पुरुऽस्तुत ॥

वेङ्कट० स्पष्टमिति ॥ ७ ॥

तुभ्येदिन्द्र मरुत्वते सुताः सोमासो अद्रिवः हृदा हूयन्त उक्थिनः ॥ ८ ॥

तुभ्य । इत् । इन्द्र । मरुत्वते । सुताः । सोमासः । अद्रिऽवः । हृदा । हूयन्ते । उक्थिनः ॥ ८ ॥

वेङ्कट० तुभ्यम् एव इन्द्र ! मरुत्वते सुताः सोमाः वज्रिन् ! श्रद्धया हूयन्ते शस्त्रवन्तः ॥ ८ ॥

पिबेदिन्द्र मरुत्सखा सुतं सोमं दिविष्टिषु । वज्रं शिशान ओजसा ॥ ९ ॥

पिब । इत् । इन्द्र । मरुत्ऽसखा । सुतम् । सोमम् । दिविष्टिषु । वज्रम् । शिशानः । ओजसा ॥ ९ ॥

वेङ्कट० पिब एव इन्द्र ! मरुत्सखा सुतम् सोमम् महायागगमनेषु वज्रम् तीक्ष्णीकुर्वन् बलेन ॥ ९ ॥

---

1. मृद्' मूको. २-२. नास्ति मूको.

उत्तिष्ठन्नोजसा सह पीत्वी शिप्रे अवेपयः । सोममिन्द्र चमू सुतम् ॥ १० ॥

उत्ऽतिष्ठन् । ओजसा । सह । पीत्वी । शिप्रे इति । अवेपयः । सोमम् । इन्द्र । चमू इति । सुतम् ॥१०॥

वेङ्कट० उत्तिष्ठन् बलेन सह पीत्वा यत्रं त्वम् अवेपयः सोमम् इन्द्र! चम्वोः अधिषवणफलकयोः सुतम् ॥ १० ॥

अनु त्वा रोदसी उभे क्रक्षमाणमकृपेताम् । इन्द्र यद्दस्युहाभवः ॥ ११ ॥

अनु । त्वा । रोदसी इति । उभे इति । क्रक्षमाणम् । अकृपेताम् । इन्द्र । यत् । दस्युऽहा । अभवः ॥११॥

वेङ्कट० अनु कल्पयेताम्[1] त्वाम् उभे द्यावापृथिव्यौ विक्षिपन्तम् शत्रून्, इन्द्र! यदा[2] त्वम् दस्युहा भवसि ॥ ११ ॥

वाचमष्टापदीमहं नवस्रक्तिमृतस्पृशम् । इन्द्रात् परि तन्वं ममे ॥ १२ ॥

वाचम् । अष्टाऽपदीम् । अहम् । नवऽस्रक्तिम् । ऋतऽस्पृशम् । इन्द्रात् । परि । तन्वम् । ममे ॥ १२ ॥

वेङ्कट० वाचम् दिग्भिः अवान्तरदिग्भिः च अष्टापदीम् ताभिः आदित्येन च नवस्रक्तिम् सत्यस्पृशम् अहम् इन्द्रात् तन्वम्[3] परि ममे । तनुत्वम् इन्द्राय अपर्याप्तमिति ॥ १२ ॥

'इति पञ्चाष्टके पञ्चमाध्याये अष्टाविंशो वर्गः' ॥

[७७]

'कुरुसुतिः काण्व ऋषिः। इन्द्रो देवता। गायत्री छन्दः, अन्त्ये द्वे प्रगाथः
(=१मा बृहती, २या सतोबृहती)'।

जज्ञानो नु शतक्रतुर्वि पृच्छदिति मातरम् । क उग्राः के ह शृण्विरे ॥ १ ॥

जज्ञानः । नु । शतऽक्रतुः । वि । पृच्छत् । इति । मातरम् । के । उग्राः । के । ह । शृण्विरे ॥१॥

वेङ्कट० जायमानः एव शतक्रतुः वि 'पृच्छत् इत्थम्' मातरम्—के उद्गूर्णबलाः, के च खलु विश्रुता इति ॥ १ ॥

आदीं शवस्यब्रवीदौर्णवाभमहीशुवम् । ते पुत्र सन्तु निष्टुरः ॥ २ ॥

आत् । ईम् । शवसी । अब्रवीत् । और्णऽवाभम् । अहीशुवम् । ते । पुत्र । सन्तु । निःऽतुरः ॥ २ ॥

वेङ्कट० अनन्तरम् एव पुत्रं माता अब्रवीत् और्णवाभम्[6] अहीशुवम्[7] च असुरौ उक्त्वा—तादृशाः पुत्र! भवन्तु तव निस्तारणीया इति ॥ २ ॥

---

१. कल्पेता वि[॰]; कल्पेतं अ[॰]. २. यथा मूको. ३. तत्त्वम् मूको. ४-४. नास्ति मूको. ५-५. प्रच्छदि तं मूको. ६. 'वाहम् मूको. ७. अभीशुपम वि[॰].

समित् तान् वृत्रहाखिदत् खे अराँ इव खेदया । प्रवृद्धो दस्युहाभवत् ॥ ३ ॥

सम् । इत् । तान् । वृत्रऽहा । अखिदत् । खे । अरान्ऽइव । खेदया । प्रऽवृद्धः । दस्युऽहा । अभवत् ॥ ३ ॥

वेङ्कट० सर्वान् संहृत्य वृत्रहा सम् अखिदत्। सङ्खेदनम् आकर्षणम्। यथा रथचक्रस्य खे अरान् खेदया रज्ज्वा सङ्खिदन्ति। प्रवृद्ध दस्युहा अभवत् ॥ ३ ॥

एकया प्रतिधापिबत् साकं सरांसि त्रिंशतम् । इन्द्रः सोमस्य काणुका ॥ ४ ॥

एकया । प्रतिऽधा । अपिबत् । साकम् । सरांसि । त्रिंशतम् । इन्द्रः । सोमस्य । काणुका ॥ ४ ॥

वेङ्कट० एकेनैव प्रतिधानेन अपिबत् सह त्रिंशतम् सरांसि इन्द्र सोमस्य पूर्णानि [1]कान्तानि इति वा कान्तानि इति वा[1]। निरुक्त (या ५,११) च द्रष्टव्यमिति ॥ ४ ॥

अभि गन्धर्वमतृणदबुध्नेषु रजःस्वा । इन्द्रो ब्रह्मभ्य इद्वृधे ॥ ५ ॥

अभि । गन्धर्वम् । अतृणत् । अबुध्नेषु । रजःऽसु । आ । इन्द्रः । ब्रह्मऽभ्यः । इत् । वृधे ॥ ५ ॥

वेङ्कट० [3]गन्धर्वो मेघ[3]। गाम् उदकं धारयति इति। त रश्मिभि अभि अतृणत् अबुध्नेषु पदनिधानयोग्यस्थलरहितेषु लोकेषु। अन्तरिक्षे स्थित इत्यर्थ। इन्द्र ब्राह्मणान् एव वर्धयितुम् ॥ ५ ॥

[4]इति षष्ठाष्टके पञ्चमाध्याये एकोनत्रिंशो वर्ग[4] ॥

निराविध्यद् गिरिभ्य आ धारयंत् पक्वमोदनम् । इन्द्रो बुन्दं स्वाततम् ॥ ६ ॥

नि । अविध्यत् । गिरिऽभ्यः । आ । धारयत् । पक्वम् । ओदनम् । इन्द्रः । बुन्दम् । सुऽआततम् ॥ ६ ॥

वेङ्कट० नि अविध्यत् मेघेभ्य उदक निर्गमयितु मनुष्याणाम् पक्वम् ओदनम् धारयत्[5] कुर्वन्। तुमभाव छान्दस। इन्द्र इषुम् सृष्ट्वा तथा ॥ ६ ॥[5]

शतब्रध्न इषुस्तव सहस्रपर्ण एक इत् । यमिन्द्र चकृषे युजम् ॥ ७ ॥

शतऽब्रध्नः । इषुः । तव । सहस्रऽपर्णः । एकः । इत् । यम् । इन्द्र । चकृषे । युजम् ॥ ७ ॥

वेङ्कट० शताग्र इषु तव सहस्रपर्ण[7] भवति एक एव, यम् इन्द्र। कृतवानसि[8] सहायम् ॥ ७ ॥

तेन स्तोतृभ्य आ भर नृभ्यो नारिभ्यो अत्तवे । सद्यो जात ऋभुष्ठिर ॥ ८ ॥

---

१ वैप १,२१४५ d द्र. २-२ कान्तादीनि वा काम्य इति वा मूको. ३-३ गान्धर्वमेक वि[१], °र्वोमेक अ[१]. ४-४. नास्ति मूको. ५ नास्ति मूको ६ निर्वचन व्याख्यान च या. (५,११) द्र. ७ °स वर्णस्य मूको. ८. तवा[१] वि[१]

तेने । स्तोतृऽभ्यः । आ । भर । नृऽभ्यः । नारिऽभ्यः । अत्तवे । सद्यः । जातः । ऋभुऽस्थिर ॥ ८ ॥

वेङ्कट० तेन स्तोतृभ्यः असाभ्यम् आ भर बहु अन्नं पुत्रेभ्यः स्त्रीभ्यः च अत्तुं पर्याप्तम्, सद्यः एव प्रादुर्भूतः ऋभुस्थिर ! । महान् स्थिरः च तथोक्तः ॥ ८ ॥

एता च्यौत्नानि ते कृता वर्षिष्ठानि परीणसा । हृदा वीड्वधारयः ॥ ९ ॥

एता । च्यौत्नानि । ते । कृता । वर्षिष्ठानि । परीणसा । हृदा । वीळु । अधारयः ॥ ९ ॥

वेङ्कट० एतानि बलानि त्वया कृतानि वृद्धतमानि परिणद्धानि । कानीत्याह—हृदा इति । बुद्ध्या त्वं स्थिराणि पर्वतादीनि अधारयः[1] इति ॥ ९ ॥

विश्वेत् ता विष्णुराभरदुरुक्रमस्त्वेषितः ।
शतं महिषान् क्षीरपाकमोदनं वराहमिन्द्र एमुषम् ॥ १० ॥

विश्वा । इत् । ता । विष्णुः । आ । अभरत् । उरुऽक्रमः । त्वाऽइंषितः ।
शतम् । महिषान् । क्षीरऽपाकम् । ओदनम् । [2]वराहम् । इन्द्रः । एमुषम्[2] ॥ १० ॥

वेङ्कट० विश्वानि एव तानि वराहरूपः विष्णुः आ अहरत् असुरेषु स्थितानि उरुक्रमः त्वया इन्द्र![3] प्रेषितः । शतम् महिषान् क्षीरपाकम् ओदनम् चाहरत् । परोक्षः—तम् वराहम् आहृतासुरस्वम् इन्द्रः देवेभ्यः आहरत् । यच्छतेः प्रसारणे "[4]लिटि रूपम् एमुषम् इति[4]" । धनानि यः यच्छति स्म स तथोक्त इति ॥ १० ॥

तुविक्षं ते सुकृतं सूमयं धनुः साधुर्बुन्दो हिरण्ययः ।
उभा ते बाहू रण्या सुसंस्कृत ऋदूपे चिदृदूवृधा ॥ ११ ॥

तुविऽक्षम् । ते । सुऽकृतम् । सुऽमयम् । धनुः । साधुः । बुन्दः । हिरण्ययः ।
उभा । ते । बाहू इति । रण्या । सुऽसंस्कृता । ऋदूपे । चित् । ऋदूऽवृधा ॥ ११ ॥

वेङ्कट० यास्कः (६,३३)—'बहुविक्षेपं महाविक्षेपं वा ते सुकृतं सुमयं सुसुखं धनुः । साधयिता ते बुन्दः हिरण्मयः । उभौ ते बाहू रमणीयौ साङ्ग्राम्यौ वा ऋदूपे अर्दनपातिनौ गमनपातिनौ वा । मर्मण्यर्दनवेधिनौ गमनवेधिनौ वा' इति ॥ ११ ॥

[5]इति पञ्चाष्टके पञ्चमाध्याये त्रिंशो वर्गः[5] ॥

---

१. °यतः मूको. २-२. निर्वचनं निगमश्च या. (५,४) द्र. ३. इन्द्रः मूको. ४-४. लिगि रूपमेमुषदिति मूको. ५-५. नास्ति मूको.

[७८]

[1]कुरुसुतिः काण्व ऋषिः। इन्द्रो देवता। गायत्री छन्दः, दशमी बृहती[1]।

पुरोळाशं नो अन्धस इन्द्र सहस्रमा भर। शता च शूर गोनाम् ॥ १ ॥

पुरोळाशम्। नः। अन्धसः। इन्द्र। सहस्रम्। आ। भर। शता। च। शूर। गोनाम् ॥ १ ॥

वेङ्कट० पुरः दीयमानम् अस्मभ्यम् [2]अन्नम् सुव्यञ्जनम्[2] आ हर इन्द्र! गवाम् सहस्रम् शतानि च शूर! इति ॥ १ ॥

आ नो भर व्यञ्जनं गामश्वमभ्यञ्जनम्। सचा मना हिरण्यया ॥ २ ॥

आ। नः। भर। विऽअञ्जनम्। गाम्। अश्वम्। अभिऽअञ्जनम्। सचा। मना। हिरण्यया ॥ २ ॥

वेङ्कट० आ भर[3] अस्मभ्यम् व्यञ्जनम् गाम् अश्वम् तैलम् च, तैः सह मननीयानि हिरण्मयानि उपस्कराणि चेति ॥ २ ॥

उत नः कर्णशोभना पुरूणि धृष्णवा भर। त्वं हि शृण्विषे वसो ॥ ३ ॥

उत। नः। कर्णऽशोभना। पुरूणि। धृष्णो इति। आ। भर। त्वम्। हि। शृण्विषे। वसो इति ॥ ३ ॥

वेङ्कट० अपि च अस्मभ्यम् कर्णालङ्करणानि[4] बहूनि धृष्णो! आ भर। त्वम् हि उदारः श्रूयसे वासयितः! ॥ ३ ॥

नकीं वृधीक इन्द्र ते न सुषा न सुदा उत। नान्यस्त्वच्छूर वाघतः ॥ ४ ॥

नकीम्। वृधीकः। इन्द्र। ते। न। सुऽसाः। न। सुऽदाः। उत। न। अन्यः। त्वत्। शूर। वाघतः ॥ ४ ॥

वेङ्कट० नास्ति कश्चित् त्वत्तः वर्धयिता इन्द्र!, न अपि सुष्ठु सम्भक्ता युद्धादौ, न अपि सुष्ठु अभिमतानां दाता। एतदेवाह—न अन्यः त्वत् शूर! ऋत्विजः इति यजमानस्य त्वत्तः अन्यः नास्ति नेता इति ॥ ४ ॥

नकीमिन्द्रो निकर्तवे न शक्रः परिशक्तवे। विश्वं शृणोति पश्यति ॥ ५ ॥

नकीम्। इन्द्रः। निऽकर्तवे। न। शक्रः। परिऽशक्तवे। विश्वम्। शृणोति। पश्यति ॥ ५ ॥

वेङ्कट० इन्द्रः [5]न निकर्तुं[5] शक्यते। तथा शक्रः परिशक्वे परिभवाय न च भवति। विश्वम् च शृणोति, पश्यति च सर्वम् इति ॥ ५ ॥

[1]इति षष्ठाष्टके पञ्चमाध्याये एकत्रिंशो वर्गः[1] ॥

१-१. नास्ति मूको. २-२. अन्नं सुव्यं अ° मूको. ३. हर अ°. ४. कर्णाऽऽङ्ग° मूको.
५-५. न क° वि°; निक° अ°.

स मन्युं मर्त्यानामदब्धो नि चिकीषते । पुरा निदश्चिकीषते ॥ ६ ॥

सः । मन्युम् । मर्त्यानाम् । अदब्धः । नि । चिकीषते । पुरा । निदः । चिकीषते ॥ ६ ॥

वेङ्कट० सः[1] क्रोधम् मर्त्यानाम् स्वयम् अहिंसितः नि चिकीषते[2] निकरोति प्रागेव निन्दायाः। यावदेव एनम् अभिभवति, प्रागेव ततः ॥ ६ ॥

क्रत्व इत् पूर्णमुदरं तुरस्यास्ति विधतः । वृत्रघ्नः सोमपाव्नः ॥ ७ ॥

क्रत्वे । इत् । पूर्णम् । उदरम् । तुरस्य । अस्ति । विधतः । वृत्रऽघ्नः । सोमऽपाव्नः ॥ ७ ॥

वेङ्कट० कर्मणा एव पूर्णम्[3] उदरम्[4] भवति क्षिप्रस्य वृत्रघ्नः सोमपाव्नः। य एनं परिचरति, तस्य कर्मणा इति ॥ ७ ॥

त्वे वसूनि संगता विश्वा च सोम सौभगा । सुदात्वपरिह्वृता ॥ ८ ॥

त्वे इति । वसूनि । सम्ऽगता । विश्वा । च । सोम । सौभगा । सुऽदातु । अपरिऽह्वृता ॥ ८ ॥

वेङ्कट० त्वयि धनानि सङ्गतानि विश्वानि च सोम! सौभाग्यानि शोभनानि च दानानि अकुटिलानि इति इन्द्रेण पीयमानम् सोममाहेति[5] ॥ ८ ॥

त्वामिद्यवयुर्मम कामो गव्युर्हिरण्ययुः । त्वामश्वयुरेषते ॥ ९ ॥

त्वाम् । इत् । यवऽयुः । मम । कामः । गव्युः । हिरण्यऽयुः । त्वाम् । अश्वऽयुः । आ । ईषते ॥ ९ ॥

वेङ्कट० त्वाम् एव यवम्[6] इच्छन् आ इच्छति मम कामः गव्युः हिरण्ययुः च, त्वाम् एव अश्वयुः च इति ॥ ९ ॥

तवेदिन्द्राहमाशसा हस्ते दात्रं चना ददे ।
दिनस्य वा मघवन्त्संभृतस्य वा पूर्धि यवस्य काशिना ॥ १० ॥

तव । इत् । इन्द्र । अहम् । आऽशसा । हस्ते । दात्रम् । चन । आ । ददे ।
दिनस्य । वा । मघऽवन् । सम्ऽभृतस्य । वा । पूर्धि । यवस्य । काशिना ॥ १० ॥

वेङ्कट० तव एव इन्द्र! महाशसनेन अयम् इन्द्रः मम यवम् दास्यति इति बुद्ध्या भिक्षणे प्रवृत्त अहम् हस्तेन लवनाय दात्रम् आ ददे। तत्र दात्रेण अनेन लूनस्य वा मघवन्!, अपि वा प्रागेव यवमर्दि सम्भृतस्य वा यवस्य पूरय मुष्टिना इति ॥ १० ॥

"इति पञ्चाष्टके पञ्चमाध्याये द्वात्रिंशो वर्गः" ॥

---

१. सं मूको. २ °कीर्षिते मूको. ३ पूर्वम् मूको. ४. उदकम् मूको. ५ 'मम दे' मूको ६ य मूको. ७ ७. नास्ति मूको

[७९]

¹कृत्नुर्भार्गव ऋषिः । सोमो देवता । गायत्री छन्दः, नवमी अनुष्टुप्² ।

अयं कृत्नुरगृभीतो विश्वजिदुद्भिदित् सोमः । ऋषिर्विप्रः काव्येन ॥ १ ॥

अयम् । कृत्नुः । अगृभीतः । विश्वऽजित् । उत्ऽभित् । इत् । सोमः । ऋषिः । विप्रः । काव्येन ॥१॥

तम् एनम् ऋषिं विप्र

वेङ्कट० अयम् सोमः कर्ता शत्रुभिः अगृहीतः विश्वजित् उद्भेत्ता च । काव्येन वर्धयति ॥ १ ॥

अभ्यूर्णोति यन्नग्नं भिषक्ति विश्वं यत् तुरम् । प्रेमन्धः ख्यन्निः श्रोणो भूत् ॥२॥

अभि । ऊर्णोति । यत् । नग्नम् । भिषक्ति । विश्वम् । यत् । तुरम् ।
प्र । ईम् । अन्धः । ख्यत् । निः । श्रोणः । भूत् ॥ २ ॥

भिषज्यति च विश्वम्

वेङ्कट० अभि छादयति वासांसि जनयन् सोमः यत् नग्नम् भवति । अपि यत् आतुरम् ओषधीषु प्रविष्टः । तथा ³पीतसोमः सन् अन्धः³ विप्र पश्यति । श्रोणः अपि निः भवति निर्गच्छति ॥ २ ॥

त्वं सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्यः । उरु यन्तासि वरूथम् ॥ ३ ॥

त्वम् । सोम । तनूकृत्ऽभ्यः । द्वेषःऽभ्यः । अन्यऽकृतेभ्यः । उरु । यन्ता । असि । वरूथम् ॥ ३ ॥

कृपयाश्च इत्यर्थः, उरु यन्ता

वेङ्कट० त्वम् सोम ! अज्ञानां विघ्नदकेभ्यः द्वेषोभ्यः शत्रुकृतेभ्यः, 'अन्यकृतानि हि रक्षांसि' (तै ६, ३, ९, ३) इति भवसि पारकः स्तोतॄणाम् इति । ब्राह्मणम् ॥ ३ ॥

त्वं चित्ती तव दक्षैर्दिव आ पृथिव्या ऋजीषिन् । यावीरघस्य चिद् द्वेषः ॥४॥

त्वम् । चित्ती । तव । दक्षैः । दिवः । आ । पृथिव्याः । ऋजीषिन् । यावीः । अघस्य । चित् । द्वेषः ॥

अस्माकम् आहन्तुः शत्रोः

वेङ्कट० त्वम् प्रज्ञया तव बलैः दिवः⁴ च 'पृथिव्याः च पृथक्' कुरु द्विषः कृपया हे तृतीयसवनस्थेन ऋजीषेण तद्वन्! इति ॥ ४ ॥

अर्थिनो यन्ति चेदर्थं गच्छानिद् ददुषो रातिम् । ववृज्युस्तृष्यतः कामम् ॥ ५ ॥

अर्थिनः । यन्ति । च । इत् । अर्थम् । गच्छान् । इत् । ददुषः । रातिम् । ववृज्युः । तृष्यतः । कामम् ॥

गच्छन्ति च दातुः दानम् । ते च दातारः

वेङ्कट० अर्थिनः यन्ति च अर्थम् प्रति भिक्षमाणाः,

१-१. नास्ति मूको. २-२. तु ऋ ४,११,१; १०,२५,११. ३-३. °तम सन्न: मूको. ४. धीर मूको. ५. °वाथ निरापुस ९° मूको.

तृष्यतः भिक्षमाणस्य क्षामम् धनप्रदानेन संस्थापयन्ति । स तृष्यः तदाश्रय इति ॥ ५ ॥

[1]इति षष्ठाष्टके पञ्चमाध्याये त्रयस्त्रिंशो वर्गः[1] ॥

विदद्यत् पूर्व्यं नष्टमुदीमृतायुमीरयत् । प्रेमायुस्तारीदतीर्णम् ॥ ६ ॥

विदत् । यत् । पूर्व्यम् । नष्टम् । उत् । ईम् । ऋतऽयुम् । ईरयत् ।
प्र । ईम् । आयुः । तारीत् । अतीर्णम् ॥ ६ ॥

वेङ्कट० यदा प्रत्नं धनम् नष्टम् लभते, तदा यज्ञकामम् एनं सोमः उत् ईरयति, प्रवर्धयति च आयुः अन्नम् अन्यैः अतीर्णम् । सोमेन यजमानः साधयति अन्नम् इति ॥ ६ ॥

सुशेवो नो मृळयाकुरदृप्तक्रतुरवातः । भवा नः सोम शं हृदे ॥ ७ ॥

सुऽशेवः । नः । मृळयाकुः । अदृप्तऽक्रतुः । अवातः । भव । नः । सोम । शम् । हृदे ॥ ७ ॥

वेङ्कट० सुसुखः अस्माकं सुखयिता अप्रमत्तप्रज्ञानः गमनवर्जितः उदर एव तिष्ठन् सोम! भव शङ्करः हृदयाय । पुनः न इति पूरणम् ॥ ७ ॥

मा नः सोम सं वीविजो मा वि बीभिषथा राजन् । मा नो हार्दि त्विषा वधीः ॥८॥

मा । नः । सोम । सम् । वीविजः । मा । वि । बीभिषथाः । राजन् ।
मा । नः । हार्दि । त्विषा । वधीः ॥ ८ ॥

वेङ्कट० मा अस्मान् सोम! सम् वीविजः चलिताङ्गान् कार्षीः, मा च वि बीभिषथाः[2] राजन्!, मा च अस्माकम् हृदयम् दीप्त्या वधीः ॥ ८ ॥

अव यत् स्वे सधस्थे देवानां दुर्मतीरीक्षे ।
राजन्नप द्विषः सेध मीढ्वो अप स्रिधः सेध ॥ ९ ॥

अव । यत् । स्वे । सधऽस्थे । देवानाम् । दुःऽमतीः । ईक्षे ।
राजन् । अप । द्विषः । सेध । मीढ्वः । अप । स्रिधः । सेध ॥ ९ ॥

वेङ्कट० अव ईक्षे अहं यदा स्वे गृहे देवानाम् दुर्मतयः न प्रविशन्तु इति, तदानीम् एव राजन्! सेक्त! अप सेध द्विषः स्रिधः च इति ॥ ९ ॥[3]

[1]इति षष्ठाष्टके पञ्चमाध्याये चतुस्त्रिंशो वर्गः[1] ॥

१-१. नास्ति मूको. २. बीभिषथाः मूको. ३. द्र ऋ ८,१८,१०; १०,२५,७.

[८०]

[1]एकद्यूनौंधस ऋषिः। इन्द्रो देवता, दशम्या देवाः। गायत्री छन्दः, दशमी त्रिष्टुप्[1]।

नह्य१॑न्यं ब॒ळाक॑रं मर्डि॒तारं॑ शतक्रतो। त्वं न॑ इन्द्र मृळय ॥ १ ॥

[2]न॒हि। अ॒न्यम्। ब॒ळा। अक॑रम्। म॒र्डि॒तार॑म्। श॒त॒क्र॒तो॒ इति॑ शत॒ऽक्र॒तो॒[2]। त्वम्। न॒ः। इन्द्र॒। मृ॒ळय॒ ॥१॥

वेङ्कट० [1]एकद्यूनौंधसः। न अन्यम्[1] सत्यम् एव अहं करोमि सुखयितारम्[3] शतक्रतो!। तथा सति त्वम् इन्द्र! अस्मान् सुखय ॥ १ ॥

यो न॒ः शश्व॑त् पु॒राऽवि॒थामृ॑ध्रो॒ वाज॑सातये। स त्वं न॑ इन्द्र मृळय ॥ २ ॥

यः। न॒ः। शश्व॑त्। पु॒रा। आवि॑थ। अमृ॑ध्रः। वाज॑ऽसातये। सः। त्वम्। न॒ः। इन्द्र॒। मृ॒ळय॒ ॥२॥

वेङ्कट० यः अस्मान् पुरा सर्वम् एव रक्षितवानसि अहिंसितः[4] अन्नस्य लाभाय। सः त्वम् इदानीम् अपि इन्द्र! मृडय अस्मान् इति ॥ २ ॥

किम॒ङ्ग र॑ध्र॒चोद॑नः सुन्वा॒नस्या॑वि॒तेद॑सि। कु॒वित् स्वि॑न्द्र णः॒ शकः॑ ॥ ३ ॥

[5]किम्। अ॒ङ्ग। र॒ध्र॒ऽचोद॑नः। सु॒न्वा॒नस्य॑। अ॒वि॒ता। इत्। अ॒सि॒[5]। कु॒वित्। सु। इ॒न्द्र॒। न॒ः। शकः॑ ॥३॥

वेङ्कट० किम् त्वम् अङ्ग क्षिप्रम् सुन्वानस्य अविता एव भवसि। रध्रचोदनः रध्रस्य राधकस्य यः चोदयति धनं स तथोक्तः। तथा सति इन्द्र! बहु अस्माकम् कुर्विति ॥ ३ ॥

इन्द्र॒ प्र णो॒ रथ॑मव प॒श्चाच्चि॑त् सन्त॑मद्रिवः। पु॒रस्ता॑देनं मे कृधि ॥ ४ ॥

इन्द्र॑। प्र। न॒ः। रथ॑म्। अ॒व॒। प॒श्चात्। चि॒त्। सन्त॑म्। अ॒द्रि॒ऽव॒ः। पु॒रस्ता॑त्। ए॒न॒म्। मे॒। कृ॒धि॒ ॥४॥

वेङ्कट० इन्द्र! अस्माकम् प्र रक्ष रथम्। पश्चात् अपि भवन्तं वज्रिन्! पुरस्तात् एनम् कुरु मम इति ॥ ४ ॥

हन्तो॒ नु किमा॑ससे प्रथ॒मं नो॒ रथं॑ कृधि। उ॒प॒मं वा॑ज॒यु श्रवः॑ ॥ ५ ॥

हन्तो॒ इति॑। नु। किम्। आ॒स॒से॒। प्र॒थ॒मम्। न॒ः। रथ॑म्। कृ॒धि॒। उ॒प॒ऽमम्। वा॒ज॒ऽयु। श्रवः॑ ॥ ५ ॥

वेङ्कट० हन्त इति आभिमुख्यकृदामन्त्रितेन[6] समानम्। हन्त इन्द्र! किम् त्वम् आससे। मुख्यम् नः रथम् कुरु। अन्नमिच्छत् इदम् अस्मदीयम् अन्नं हविर्भूतं तव उपमम् भवति समीपे[7] वर्तत इति ॥ ५ ॥

[1]इति पञ्चाष्टके पञ्चमाध्याये पञ्चत्रिंशो वर्गः[1] ॥

१-१. नास्ति मूको. २-२. तु. ऋ ८,६६,१३. ३-३. °पूर्णोपसजन्यं मूको. ४. °सनः मूको. ५-५. तु ऋ ६,४४,१०. ६. °मुख्यते करामन्ति तेन मूको. ७. समीपे मूको.

अवा॑ नो वाज॒युं रथं॑ सु॒करं॑ ते॒ किमित् परि॑ । अ॒स्मान्त्सु जि॒ग्युष॑स्कृधि ॥ ६ ॥

अव॑ । न॒ । वा॒ज॒ऽयुम् । रथ॑म् । सु॒ऽकर॑म् । ते॒ । किम् । इत् । परि॑ । अ॒स्मान् । सु । जि॒ग्युषः॑ । कृ॒धि ॥ ६ ॥

वेङ्कट० रक्ष अस्माकम् अन्नेच्छुम् रथम् । सुकरम् ते किम् इत् सर्वं कर्तव्यं भवति परित । तथा सति अस्मान् सुष्ठु जेतॄन्[1] कुरु इति ॥ ६ ॥

इन्द्र॒ दृह्य॑स्व॒ पूर॑सि भ॒द्रा त॑ एति निष्कृ॒तम् । इ॒यं धीर्ऋ॒त्विया॑वती ॥ ७ ॥

इन्द्र॑ । दृह्य॑स्व । पूः । अ॒सि॒ । भ॒द्रा । ते॒ । ए॒ति॒ । निः॒ऽकृ॒तम् । इ॒यम् । धीः । ऋ॒त्विय॑ऽवती ॥ ७ ॥

वेङ्कट० इन्द्र![2] दृढ बलपरिवृत त्वं पुरम् इव भवसि । भद्रा तव गच्छति संस्कृतस्थानम् इयम् धीः कर्मकाले कृता ॥ ७ ॥

मा सी॑मव॒द्य आ भा॑गु॒र्वी काष्ठा॑ हि॒तं धन॑म् । अ॒पावृ॑क्ता अर॒त्नयः॑ ॥ ८ ॥

मा । सी॒म् । अ॒व॒द्ये । आ । भाः॒ । उ॒र्वी । काष्ठा॑ । हि॒तम् । धन॑म् । अ॒प॒ऽआवृ॑क्ताः । अ॒र॒त्नयः॑ ॥ ८ ॥

वेङ्कट० मा अस्मान् सर्वत अवद्ये आ भज, न कुतश्चित्[3] प्रापयावद्यम् । अपराजितान् कुर्वित्यर्थः । "उर्वी काष्ठा" चङ्क्रमणार्थ आज्यन्त[4] (तु. या २,१५) । तत्र शत्रुषु निहितम् आनिहीर्षित धनम् । अपावृक्ता सन्तु अदाना यजमाना शत्रव ॥ ८ ॥

तु॒री॒यं नाम॑ य॒ज्ञियं॑ य॒दा कर॒स्तदु॑श्मसि । आदित् पति॑र्न ओहसे ॥ ९ ॥

तु॒री॑यम् । नाम॑ । य॒ज्ञिय॑म् । य॒दा । करः॑ । तत् । उ॒श्म॒सि॒ । आत् । इत् । पतिः॑ । न॒ । ओ॒ह॒से॒ ॥

वेङ्कट० चतुर्थम् नाम यज्ञियम् यदा च अस्माकम् करोषि, तत् वय कामयामहे । अनन्तरम् एव पति[5] त्व च अस्मान् वहसि । नक्षत्रनाम गुह्य नाम प्रकाश नाम इति त्रीणि नामानि । सोमयाजीति तुरीय नाम इति ॥ ९ ॥

अवी॑वृधद्वो अमृता॒ अम॑न्दीदेक॒द्यूर्दे॑वा उ॒त याश्च॑ देवीः ।
तस्मा॑ उ॒ राधः॑ कृणुत प्रश॒स्तं प्रा॒तर्म॒क्षू धि॒याव॑सुर्जगम्यात् ॥ १० ॥

अवी॑वृधत् । व॒ः । अ॒मृ॒ताः॒ । अम॑न्दीत् । ए॒क॒ऽद्यूः । दे॒वाः॒ । उ॒त । याः । च॒ । दे॒वीः॒ ।
तस्मै॑ । ऊँ॒ इति॑ । राधः॑ । कृ॒णु॒त॒ । प्र॒ऽश॒स्तम् । प्रा॒तः । म॒क्षु । धि॒याऽव॑सुः । ज॒ग॒म्या॒त् ॥ १० ॥

वेङ्कट० इयं वैश्वदेवी[6] । हे देवा ! अमृता ! युष्मान् अयम् अवीवृधत्, अमन्दीत् एकद्यू । अपि च

---

१. जैत्रान् वि'; जेत्रीन् अ'. २ °न्द्र मूको ३ मरिव° वि'; तरिच° अ'. ४-४ नास्ति मूको. ५ पत्र मूको ६ नास्ति मूको. ७ वै देवी मूको.

याः भवथ यूयं हे देवपत्न्यः![1] तस्मै मह्यं धनं कुरुत प्रशस्तम्। प्रातः एव अस्मान् इन्द्रः कर्मवसुः आगच्छतु इति ॥ १० ॥

[2]इति षष्ठाष्टके पञ्चमाध्याये षट्त्रिंशो वर्गः[2] ॥

[८१]

[3]कुसीदी काण्व ऋषिः। इन्द्रो देवता। गायत्री छन्दः[3]।

आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभं सं गृभाय। महाहस्ती दक्षिणेन ॥ १ ॥

आ। तु। नः। इन्द्र। क्षुऽमन्तम्। चित्रम्। ग्राभम्। सम्। गृभाय। महाऽहस्ती। दक्षिणेन ॥१॥

वेङ्कट० काण्वः[1] कुसीदी। [4]आभिमुख्येन सम् गृहाण इन्द्र! अस्माकम्[4] दातुं शब्दवत् प्रसिद्धं धनम् पूजनीयम् महाहस्तः त्वम् दक्षिणेन हस्तेन ॥ १ ॥

विद्मा हि त्वा तुविकूर्मिं तुविदेष्णं तुवीमघम्। तुविमात्रमवोभिः ॥ २ ॥

विद्म। हि। त्वा। तुविऽकूर्मिम्। तुविऽदेष्णम्। तुविऽमघम्। तुविऽमात्रम्। अवःऽभिः ॥ २ ॥

वेङ्कट० जानीमः हि त्वा बहुकर्माणं बहुप्रदेयं बहुमघं[5] बहुप्रमाणं पालनैः[6] युक्तं चेति ॥ २ ॥

नहि त्वा शूर देवा न मर्तासो दित्सन्तम्। भीमं न गां वारयन्ते ॥ ३ ॥

नहि। त्वा। शूर। देवाः। न। मर्तासः। दित्सन्तम्। भीमम्। न। गाम्। वारयन्ते ॥ ३ ॥[6]

वेङ्कट० नहि [7]त्वा शूर! देवाः मनुष्याश्च दित्सन्तम्[7] भीमम् इव वृषभम् यवसे प्रवृत्तं वारयन्ति ॥३॥

एतो न्विन्द्रं स्तवामेशानं वस्वः स्वराजम्। न राधसा मर्धिषन्नः ॥ ४ ॥

एतो इति। नु। इन्द्रम्। स्तवाम। ईशानम्। वस्वः। स्वऽराजम्। न। राधसा। मर्धिषत्। नः ॥

वेङ्कट० आगच्छत क्षिप्रम्, इन्द्रम् स्तवाम धनस्य ईशानम् वरिष्ठस्य स्वराजम्। न अस्मान् राधसा मर्धिषत्, अन्य आढ्यः धनेन न प्रबाधताम् इति ॥ ४ ॥

प्र स्तोषदुप गासिषच्छ्रवत् साम गीयमानम्। अभि राधसा जुगुरत् ॥ ५ ॥

प्र। स्तोषत्। उप। गासिषत्। श्रवत्। साम। गीयमानम्। अभि। राधसा। जुगुरत् ॥ ५ ॥

वेङ्कट० प्र स्तौतु इन्द्रः, अस्माकम् उपगानं च 'करोतु, शृणोतु' च साम गीयमानम्। अभि गृणातु च धनेन अस्मान् इति ॥ ५ ॥[9]

[2]इति षष्ठाष्टके पञ्चमाध्याये सप्तत्रिंशो वर्गः[2] ॥

---

1. °पत्नयः मूको. 2-2. नास्ति मूको. 3. इन्म मूको. 4-4. °ख्येन ... अस्माकं मूको. 5. °मखं म². 6. तु. ऋ ४,३१,८;८,१४,४. 7-7. त्वा त नम मूको. 8-8. क ... गु° मूको. 9. तु. ऋ १,१०,४;४८,१४;५४,५.

आ नो भर दक्षिणेनाभि सव्येन प्र मृश । इन्द्र मा नो वसोर्निर्भाक् ॥ ६ ॥

आ । नः । भर । दक्षिणेन । अभि । सव्येन । प्र । मृश । इन्द्र । मा । नः । वसोः । निः । भाक् ॥

वेङ्कट० आ हर अस्मभ्यम् धनम् दक्षिणेन हस्तेन । अभि प्र मृश अस्मदर्थम् सव्येन च धनम् । इन्द्र ! मा अस्मान् धनात् नि भाक्षी[1] ॥ ६ ॥

उप क्रमस्वा भर धृषता धृष्णो जनानाम् । अदाशूष्टरस्य वेदः ॥ ७ ॥

उप । क्रमस्व । आ । भर । धृषता । धृष्णो इति । जनानाम् । अदाशूःऽतरस्य । वेदः ॥ ७ ॥

वेङ्कट० उप क्रमस्व अस्मान् प्रति । आ हर धृष्टेन मनसा हे धर्षयित[2] जनानाम् मध्ये अत्यन्तम् अदातु धनम् ॥ ७ ॥

इन्द्र य उ नु ते अस्ति वाजो विप्रेभिः सनित्वः । अस्माभिः सु तं सनुहि ॥ ८ ॥

इन्द्र । यः । ऊँ इति । नु । ते । अस्ति । वाजः । विप्रेभिः । सनित्वः । अस्माभिः । सु । तम् । सनुहि ॥

वेङ्कट० इन्द्र ! यः एव तव वाजः विद्यते मेधाविभिः सम्भननीयः, तम् अस्मान् उद्दिश्य देहि इति ॥ ८ ॥

सद्योजुवस्ते वाजा अस्मभ्यं विश्वश्चन्द्राः । वशैश्च मक्षू जरन्ते ॥ ९ ॥

सद्यःऽजुवः । ते । वाजाः । अस्मभ्यम् । विश्वऽचन्द्राः । वशैः । च । मक्षु । जरन्ते ॥ ९ ॥

वेङ्कट० सद्योनिर्गमनाः ते वाजाः अस्मभ्यम् भवन्तु सर्वकान्ताः । अपरोक्ष उत्तरार्धः । त्वाम् एते स्तोतारः कामैः हेतुभिः शीघ्रं स्तुवन्ति इति ॥ ९ ॥

[3]इति षष्ठाष्टके पञ्चमाध्याये अष्टात्रिंशो वर्गः[4] ॥

अष्टकस्येति षष्ठस्य माधवः सुन्दरीसुतः ।
व्याख्यत् पञ्चममध्यायं तत् पश्यन्तु च पण्डिताः ॥

इति वेङ्कटमाधवाचार्यविरचिते ऋक्संहिताव्याख्याने षष्ठाष्टके पञ्चमोऽध्यायः ॥

—*—

इति ऋग्वेदे सभाष्ये षष्ठाष्टके पञ्चमोऽध्यायः ॥

---

१. न मूको. २ धर्षि मूको. ३ °तु मूको. ४-४. नास्ति मूको.

अथ षष्ठोऽध्यायः।

वेङ्कट०

'आ प्र द्रव परावतो' व्याचिख्यासति माधवः।
प्रगाथेषु च वक्तव्यं सम्पत्तिं च प्रदर्शयन् ॥ १ ॥

बार्हतो बृहतीपूर्वः ककुप्पूर्वस्तु काकुभः।
एतौ सतोबृहत्यन्तौ प्रगाथौ भवतो द्वृचौ ॥ २ ॥

'त्वमङ्ग प्र'[1], 'प्र वो यह्वं'[2], 'मा चिद्'[3], 'बृहदु गायिषे'[4]।
बार्हतान् काकुभानाहुः 'तं गूर्धया'[5], 'वयमिन्द्(?)'[6] इति ॥ ३ ॥

चतुर्थपञ्चावभ्यस्येत् प्रगाथे बार्हते सति।
बृहत्युभे च ककुभौ सम्पद्यन्ते तथा सति ॥ ४ ॥

द्वितिरस्कारं शंसेत बृहतीकारमिच्छता।
तयोरेव द्विरभ्यासः कार्य इत्याश्वलायनः ॥ ५ ॥

तृतीयपञ्चमौ पादावभ्यस्येत् काकुभे[7] बुधः।
ऋचौ द्वे ककुभस्तिस्रः सम्पद्यन्ते तथा सति ॥ ६ ॥

महासतोबृहत्यन्तो यो महाबृहतीमुखः।
स महाबार्हतो नाम 'बृहद्भिरग्ने अर्चिभिः'[8] ॥ ७ ॥

महाबार्हतप्रगाथे चतुर्थं सप्तमं तथा।
अभ्यस्येते बृहत्यः स्युस्तिस्रस्तदा इति पण्डिताः ॥ ८ ॥

सन्ति प्रगाथा बहवः प्रातिशाख्यप्रदर्शिताः।
पातञ्जले निदाने तु द्वौ प्रगाथौ प्रदर्शितौ ॥ ९ ॥

प्रगाथो यवमध्यान्तो 'वामी वामस्य धूतयः'[9]।
बृहत्यौ मुखतस्तस्य गायत्रीत्वं ततो भवेत् ॥ १० ॥

अनुष्टुब्द्वे च गायत्र्यावथसानुष्टुभः स्मृतः।
'आ त्वा रथं यथोतये'[10] इति तत्र निदर्शनम् ॥ ११ ॥

---

1. ऋ १,८४,१९. 2. ऋ १,३६,१. 3. ऋ ८,१,१. 4. ऋ ७,९६,१. 5. मद्र मूको; ऋ ८,१९,१. 6. ऋ ८,२१,१. 7. ककुभे मूको. 8. ऋ ६,४८,७. 9. ऋ ६,४८,२०. 10. ऋ ८,६८,१.

अत्र निदानम् — 'यस्य कस्यचिच्छन्दस सम्पदं[1] कश्चिदिच्छति ।
चतुर्थं तस्य सङ्ख्याय तावतीराहरेद् ऋच ॥ १२ ॥
यदि तच्छन्द आहरेद् अन्यद् यस्य सम्पदे ।
चतुर्थं तस्य सङ्ख्याय त्रिशास्तावतीश्च[2] ॥ १३ ॥ इति ॥

तदिदं 'तिस्रोऽनुष्टुभ चतस्रो गायत्र्य' इत्यादिब्राह्मणाना समर्थनम् । तत्र गायत्रीभिः शस्ताभि जगती सम्पादयितुमिच्छन् जगत्या चतुर्थं गणयेत् । द्वादश भवन्ति । ततो द्वादश गायत्री शंसेत् । यदिदं जगतीसम्पादनार्थमाहृत छन्द गायत्र तस्य यच्चतुर्थं तत् पङ्क्येत् । षड् भवन्ति । एवं च द्वादश गायत्र्य षड् जगत्यो भवन्ति । गायत्रीभि त्रिष्टुभ सम्पादयितुमिच्छन् एकादश गायत्रीराहरेत् । षट् त्रिष्टुभो भवन्ति । गायत्रीभि पङ्क्ती सम्पादयितुमिच्छन् दश गायत्रीराहरेत् । षट् पङ्क्त्यो भवन्ति । अथोष्णिग्भिर्जगती सम्पादयितुमिच्छन् द्वादशोष्णिह आहरेत् । सप्त जगत्यो भवन्ति । उष्णिग्भि त्रिष्टुभ सम्पादयितुमिच्छन् एकादशोष्णिह आहरेत् । सप्त त्रिष्टुभो भवन्ति । गायत्रीभिरुष्णिह सम्पादयितुमिच्छन् सप्त गायत्रीराहरेत् । षडुष्णिहो भवन्ति । उष्णिग्भिर्गायत्री सम्पादयितुमिच्छन् षडुष्णिह आहरेत् । सप्त गायत्र्यो भवन्ति । एवं सर्वत्र द्रष्टव्यमिति ॥

[८२]

'कुसीदी काण्व ऋषि । इन्द्रो देवता । गायत्री छन्द'[3] ।

आ प्र द्रव परावतोऽर्वावतश्च वृत्रहन् । मध्वः प्रति प्रभर्मणि ॥ १ ॥

आ । प्र । द्रव । पराऽवत । अर्वाऽवत । च । वृत्रऽहन् । मध्व । प्रति । प्रऽभर्मणि ॥ १ ॥

वेङ्कट० आ प्र द्रव दूरात् अन्तिकात् च वृत्रहन्[3] सोमान् प्रति तेषा प्रहरणे[4] ॥ १ ॥

तीव्राः सोमास आ गहि सुतासो मादयिष्णवः । पिबा दधृग्यथोचिषे ॥ २ ॥

तीव्रा । सोमास । आ । गहि । सुतास । मादयिष्णव । पिब । दधृक् । यथा । ओचिषे ॥ २ ॥

वेङ्कट० तीव्ररसा सोमा इमे मम सुता मदकरा । आ गच्छ, पिब तान् धृष्ट सन्, यथा तान् सेवसे ॥ २ ॥

इषा मन्दस्वादु तेऽरं वराय मन्यवे । भुवत् त इन्द्र शं हृदे ॥ ३ ॥

इषा । मन्दस्व । आत् । ऊँ इति । ते । अरम् । वराय । मन्यवे । भुवत् । ते । इन्द्र । शम् । हृदे ॥ ३ ॥

वेङ्कट० सोमेन मन्दस्व । अनन्तरम् एव सेयम् इड् अरम् भवतु तव वरकाय क्रोधाय, तथा तव[5] इन्द्र । शम्[6] हृदयाय च ॥ ३ ॥

---

१ °द मूको २ निद् १,६. ३-३ नास्ति मूको ४. प्रहरणम् मूको. ५. तव मूको. ६ नास्ति मूक.

आ त्वंशत्रवा गहि न्युक्थानि च हूयसे । उपमे रोचने दिवः ॥ ४ ॥

आ । तु । अशत्रो इति । आ । गहि । नि । उक्थानि । च । हूयसे । उपऽमे । रोचने । दिव ॥४॥

वेङ्कट० आ गच्छ क्षिप्रम् हे असपत्न[1] सङ्ग्रामे । तथा द्युलोकात् अग्निभि दीप्यमाने समीपस्थे यज्ञे च उक्थानि[2] प्रति नि[2] हूयसे । तत्र आ गच्छ ॥ ४ ॥

तुभ्यायमद्रिभिः सुतो गोभिः श्रीतो मदाय कम् । प्र सोम इन्द्र हूयते ॥ ५ ॥

तुभ्य । अयम् । अद्रिऽभि । सुत । गोभि । श्रीत । मदाय । कम् । प्र । सोम । इन्द्र । हूयते ॥५॥

वेङ्कट० तुभ्यम् अयम् ग्रावभि सुत गोविकारै मिश्रित मदार्थम् प्र हूयत ॥ ५ ॥

[3]इति षष्ठाष्टके षष्ठाध्याये प्रथमो वर्ग[3] ॥

इन्द्र श्रुधि सु मे हवमस्मे सुतस्य गोमतः । वि पीतिं तृप्तिमश्नुहि ॥ ६ ॥

इन्द्र । श्रुधि । सु । मे । हवम् । अस्मे इति । सुतस्य । गोऽमत । नि । पीतिम् । तृप्तिम् । अश्नुहि ॥६॥

वेङ्कट० इन्द्र! सुष्ठु श्रुधि मे ह्वानम् । तथा अस्माभि सुतस्य गोभि श्रीतस्य[4] च पानम्[5] तृप्तिम् च वि अश्नुहि ॥ ६ ॥

य इन्द्र चमसेष्वा सोमश्चमूषु ते सुतः । पिबेदस्य त्वमीशिषे ॥ ७ ॥

य । इन्द्र । चमसेषु । आ । सोम । चमूषु । ते । सुत । पिब । इत् । अस्य । त्वम् । ईशिषे ॥७॥

वेङ्कट० य इन्द्र! चमसेषु सोम चमूषु च सुत दृश्यते । अद्य चस्व । पिब त्वम् अमु सोमम् । तस्य त्वम् एव ईश्वर इति ॥ ७ ॥

यो अप्सु चन्द्रमा इव सोमश्चमूषु ददृशे । पिबेदस्य त्वमीशिषे ॥ ८ ॥

य । अप्ऽसु । चन्द्रमाःऽइव । सोम । चमूषु । ददृशे । पिब । इत् । अस्य । त्वम् । ईशिषे ॥८॥

वेङ्कट० य अन्तरिक्षे चन्द्रमा इव सोम चमूषु दृश्यते गृहीत ॥ ८ ॥

यं ते श्येनः पदाभरत् तिरो रजांस्यस्पृतम् । पिबेदस्य त्वमीशिषे ॥ ९ ॥

[6]यम् । ते । श्येन । पदा । आ । अभरत्[6] । तिर । रजांसि । अस्पृतम् । पिब । इत् । अस्य । त्वम् । ईशिषे ॥

वेङ्कट० यम् ते श्येन पदा आ जहार तिर कुर्वन् लोकान् आन्तरिक्ष्यान् तेषु एकेषु अस्पृष्टम्[7] धातुभि । 'पद्भ्यां ह सवने समगृह्णाद् मुखेनैकम्' (तै ६,१,६,४) इति ब्राह्मणम् ॥ ९ ॥

इति षष्ठाष्टके षष्ठाध्याये द्वितीयो वर्ग ॥

---

१. उक्थानि मूको. २. नास्ति मूको. ३-३ नास्ति मूको ४ श्रितस्य मूको. ५. अन्नम् मूको
६ ६. तु. ऋ १०,१४४,५ ७ स्पृष्टम् मूको

[८३]

[1]कुसीदी काण्व ऋषिः । विश्वे देवा देवता । गायत्री छन्दः[1] ।

देवानामिदवो महत् तदा वृणीमहे वयम् । वृष्णामस्मभ्यमूतये ॥ १ ॥

देवानाम् । इत् । अवः । महत् । तत् । आ । वृणीमहे । वयम् । वृष्णाम् । अस्मभ्यम् । ऊतये ॥ १ ॥

वेङ्कट० देवानाम् एव पालनम् महत् विद्यते । तत् आ वृणीमहे वयम् वृष्णाम् तेषां स्वभूतम् अस्मभ्यम् रक्षणाय ॥ १ ॥

ते नः सन्तु युजः सदा वरुणो मित्रो अर्यमा । वृधासश्च प्रचेतसः ॥ २ ॥

ते । नः । सन्तु । युजः । सदा । वरुणः । मित्रः । अर्यमा । वृधासः । च । प्रऽचेतसः ॥ २ ॥

वेङ्कट० ते अस्माकम् सन्तु सहायाः सदा वरुणादयः वर्धयितारः[2] च सुमतयः ॥ २ ॥

अति नो विष्पिता पुरु नौभिरपो न पर्षथ । यूयमृतस्य रथ्यः ॥ ३ ॥

अति । नः । विऽपिता । पुरु । नौभिः । अपः । न । पर्षथ । यूयम् । ऋतस्य । रथ्यः ॥ ३ ॥

वेङ्कट० अति पर्षथ[3] अस्मान् विष्पितानि विप्राप्तानि विततानि बहूनि बलानि नौभिः उदकानि इव यूयम् हे सत्यस्य यज्ञस्य वा नेतारः[4] ॥ ३ ॥

वामं नो अस्त्वर्यमन् वामं वरुण शंस्यम् । वामं ह्यावृणीमहे ॥ ४ ॥

वामम् । नः । अस्तु । अर्यमन् । वामम् । वरुण । शंस्यम् । वामम् । हि । आऽवृणीमहे ॥ ४ ॥

वेङ्कट० वामम् धनम् नः अस्तु अर्यमन्! वामम् वरुण! शंसनीयम् । वामम् हि वयम् आवृणीमहे ॥ ४ ॥

वामस्य हि प्रचेतस ईशानासो रिशादसः । नेमादित्या अघस्य यत् ॥ ५ ॥

वामस्य । हि । प्रऽचेतसः । ईशानासः । रिशादसः । न । ईम् । आदित्याः । अघस्य । यत् ॥ ५ ॥

वेङ्कट० वामस्य हि धनस्य हे प्रचेतसः! ईश्वराः यूयम् हे रिशतामसितारः[5] । न एनम् आदित्याः! तत् प्राप्नोतु यत् अघस्य सम्बन्धि ॥ ५ ॥

[1]इति षष्ठाष्टके षष्ठाध्याये तृतीयो वर्गः[1] ॥

वयमिद्वः सुदानवः क्षियन्तो यान्तो अध्वन्ना । देवा वृधाय हूमहे ॥ ६ ॥

वयम् । इत् । वः । सुऽदानवः । क्षियन्तः । यान्तः । अध्वन् । आ । देवाः । वृधाय । हूमहे ॥ ६ ॥

वेङ्कट० वयम् युष्मान् हे शोभनदानाः[1] निवसन्तः गृहेषु[2] अध्वनि वा गच्छन्तः देवाः! वर्धनाय आ[3] हूमहे ॥ ६ ॥

१-१. नास्ति मूको. २. °रम् मूको. ३. वर्षे मूको. ४. °रे मूको. ५. नास्ति मूको.

अधि न इन्द्रैषां विष्णो सजात्यानाम् । इता मरुतो अश्विना ॥ ७ ॥

अधि । नः । इन्द्र । एषाम् । विष्णो इति । सऽजात्यानाम् । इत । मरुतः । अश्विना ॥ ७ ॥

वेङ्कट० हे इन्द्रादयः! एषाम् सजात्यानाम्[1] अस्मान् एव आगच्छत ॥ ७ ॥

प्र भ्रातृत्वं सुदानवोऽध द्विता समान्या । मातुर्गर्भे भरामहे ॥ ८ ॥

प्र । भ्रातृऽत्वम् । सुऽदानवः । अध । द्विता । समान्या । मातुः । गर्भे । भरामहे ॥ ८ ॥

यत् युष्माकम् समान्या द्विता च मातुः गर्भे सञ्जातम्
वेङ्कट० प्र भरामहे वयं 'हे सुदानाः[2] आदित्याः सर्वे भ्रातरः इन्द्रश्च सहता इति।
भ्रातृत्वम् । प्रभरणम्[3] उच्चारणं प्रकाशनं वा । 'अदितिः पुत्रकामा साध्येभ्यो देवेभ्यो ब्रह्मौदनमपचत्' (तै ६,५,६,१) इति ब्राह्मणम् ॥ ८ ॥

यूयं हि ष्ठा सुदानव इन्द्रज्येष्ठा अभिद्यवः । अधा चिद्व उत ब्रुवे ॥ ९ ॥

यूयम् । हि । स्थ । सुऽदानवः । इन्द्रऽज्येष्ठाः । अभिऽद्यवः । अध । चित् । वः । उत । ब्रुवे ॥ ९ ॥

अथ युष्मान् अहं
वेङ्कट० यूयम् हि भवथ हे सुदानाः! इन्द्रनेतृकाः अभिगतदीप्तयः।
स्तौमि ॥ ९ ॥

"इति पञ्चाष्टके पञ्चाध्याये चतुर्थो वर्गः" ॥

[८४]

'उशना काव्य ऋषिः। अग्निर्देवता । गायत्री छन्दः' ।

प्रेष्ठं वो अतिथिं स्तुषे मित्रमिव प्रियम् । अग्निं रथं न वेद्यम् ॥ १ ॥

प्रेष्ठम् । वः । अतिथिम् । स्तुषे । मित्रम्ऽइव । प्रियम् । अग्निम् । रथम् । न । वेद्यम् ॥ १ ॥

'प्रेष्ठम् युष्माकम्' अतिथिम् स्तौमि, मित्रम् इव प्रियम् अग्निम् रथम्
वेङ्कट० उशना काव्यः।
इव धनहितम् लाभहेतुम् वा इति ॥ १ ॥

कविमिव प्रचेतसं यं देवासो अध द्विता । नि मर्त्येष्वादधुः ॥ २ ॥

कविम्ऽइव । प्रऽचेतसम् । यम् । देवासः । अध । द्विता । नि । मर्त्येषु । आऽदधुः ॥ २ ॥

वेङ्कट० क्रान्तकर्माणम् प्रकृष्टचेतसम् इव पुरुषम् यम् देवाः द्वैधं मनुष्येषु नि आदधुः गार्हपत्यम्

---

१. साजा° अ°. २-२. नास्ति मूको. ३. प्रकर° मूको. ४-४. प्रेष्ठं ···मूको.

आहवनीयं च । यद्वा दिवि वर्तमानस्य पृथिव्यां [1]च यस्य निधानं कृतवन्तः । स्तुये[1] तम् इति ॥ २ ॥

त्वं यविष्ठ दाशुषो नॄँः पाहि शृणुधी गिरः । रक्षा तोकमुत त्मना ॥ ३ ॥

त्वम् । यविष्ठ । दाशुषः । नॄन् । पाहि । शृणुधि । गिरः । रक्ष । तोकम् । उत । त्मना ॥ ३ ॥

वेङ्कट० त्वम् युवतम! दत्तवतः मनुष्यान् पाहि, शृणु[2] च स्तुतीः, रक्ष पुत्रम् अपि च आत्मना एव ॥ ३ ॥

कया ते अग्ने अङ्गिर ऊर्जो नपादुपस्तुतिम् । वराय देव मन्यवे ॥ ४ ॥

कया । ते । अग्ने । अङ्गिरः । ऊर्जः । नपात् । उपऽस्तुतिम् । वराय । देव । मन्यवे ॥ ४ ॥

वेङ्कट० कया वाचा तुभ्यम् अग्ने! अङ्गिरः! अन्नस्य पुत्र! उपस्तुतिम् वरणीयाय अभिमन्यमानाय शत्रूम् देव![3] भरेम इति ॥ ४ ॥

दाशेम कस्य मनसा यज्ञस्य सहसो यहो । कदु वोच इदं नमः ॥ ५ ॥

दाशेम । कस्य । मनसा । यज्ञस्य । सहसः । यहो इति । कत् । ऊँ इति । वोचे । इदम् । नमः ॥५॥

वेङ्कट० दाशेम [4]कीदृशस्य मनसा[4] युक्ताः[5] वयं यजमानस्य हे सहसः पुत्र! । कदा वा तुभ्यम् इदम् नमः अहम् वोचे[6] हविः वा नमस्कारं वेति ॥ ५ ॥

[7]इति षष्ठाष्टके षष्ठाध्याये पञ्चमो वर्गः[7] ॥

अधा त्वं हि नस्करो विश्वा अस्मभ्यं सुक्षितीः । वाजद्रविणसो गिरः ॥ ६ ॥

अध । त्वम् । हि । नः । करः । विश्वाः । अस्मभ्यम् । सुऽक्षितीः । वाजऽद्रविणसः । गिरः ॥ ६ ॥

वेङ्कट० अथ त्वम् अस्मभ्यम् कुरु । तदेवाऽऽह—अस्मभ्यम् सुनिवासाः वाजद्रविणसः च गिरः विश्वाः स्युरिति[8] । दीप्तधनाः वाजद्रविणस इति ॥ ६ ॥

कस्य नूनं परीणसो धियो जिन्वसि दंपते । गोषाता यस्य ते गिरः ॥ ७ ॥

कस्य । नूनम् । परीणसः । धियः । जिन्वसि । दम्ऽपते । गोऽसाता । यस्य । ते । गिरः ॥७॥

वेङ्कट० कस्य इदानीं महतः कर्माणि प्रीणयसि गृहपते!, गवां लाभे भवन्ति यस्य तव स्तुतयः ॥ ७ ॥

१-१. च ···स्तुये वि'; ··· स्तुये अ'. २. श्रुधि मूको. ३. देवम् वि'. ४-४. 'दशम' मूको. ५. युक्तम् मूको. ६. वोचः मूको. ७-७. नास्ति ८. सुरि° मूको.

तं म॑र्जयन्त सु॒क्रतुं॑ पुरो॒यावा॑नमा॒जिषु॑ । स्वेषु॒ क्षये॑षु वा॒जिन॑म् ॥ ८ ॥

तम् । म॒र्ज॒य॒न्त॒ । सु॒ऽक्रतु॑म् । पु॒रः॒ऽयावा॑नम् । आ॒जिषु॑ । स्वेषु॑ । क्षये॑षु । वा॒जिन॑म् ॥ ८ ॥

वेङ्कट० तम् परिचरन्ति सुप्रज्ञम् पुरोगन्तारम् आजिषु स्वेषु गृहेषु बलिनम् ॥ ८ ॥

क्षेति॒ क्षेमे॑भिः सा॒धुभि॒र्नकि॒र्यं घ्नन्ति॒ हन्ति॒ यः । अग्ने॑ सु॒वीर॑ एधते ॥ ९ ॥

क्षेति॑ । क्षेमे॑भिः । सा॒धुऽभिः॑ । नकिः॑ । यम् । घ्नन्ति॑ । हन्ति॑ । यः । अग्ने॑ । सु॒ऽवीरः॑ । ए॒ध॒ते॒ ॥ ९ ॥

वेङ्कट० निवसति साधुभिः क्षेमैः सह। न यम् केचन घ्नन्ति। हन्ति यः [1]सर्वान्। अग्ने![1] सुपुत्रः च वर्धते स तव एव स्तोतेति[2] ॥ ९ ॥

[3]इति पञ्चाष्टके पञ्चाध्याये षष्ठो वर्गः[3] ॥

[८५]

[3]कृष्ण आङ्गिरस ऋषिः । अश्विनौ देवता । गायत्री छन्दः[3] ।

आ मे॒ हवं॑ नास॒त्याश्वि॑ना॒ गच्छ॑तं यु॒वम् । मध्वः॒ सोम॑स्य पी॒तये॑ ॥ १ ॥

आ । मे॒ । हव॑म् । ना॒स॒त्या॒ । अश्वि॑ना । गच्छ॑तम् । यु॒वम् । मध्वः॑ । सोम॑स्य । पी॒तये॑ ॥ १ ॥

वेङ्कट० आङ्गिरसः कृष्णः। आ गच्छतम् युवाम् अश्विनौ! मम हवम् मदकरं सोमं[4] पातुम् ॥ १ ॥

इ॒मं मे॒ स्तोम॑मश्विने॒मं मे॑ शृणु॒तं हव॑म् । मध्वः॒ सोम॑स्य पी॒तये॑ ॥ २ ॥

इ॒मम् । मे॒ । स्तोम॑म् । अ॒श्वि॒ना॒ । इ॒मम् । मे॒ । शृ॒णु॒तम् । हव॑म् । मध्वः॑ । सोम॑स्य । पी॒तये॑ ॥ २ ॥

वेङ्कट० स्तोत्रम् आगमनविषयं[5] ह्वानं च शृणुतम् इति ॥ २ ॥

अ॒यं वां॒ कृष्णो॑ अश्विना॒ हव॑ते वाजिनीवसू । मध्वः॒ सोम॑स्य पी॒तये॑ ॥ ३ ॥

अ॒यम् । वा॒म् । कृष्णः॑ । अ॒श्वि॒ना॒ । हव॑ते । वा॒जि॒नी॒व॒सू॒ इति॑ वाजिनीऽवसू । मध्वः॑ । सोम॑स्य । पी॒तये॑ ॥ ३ ॥

वेङ्कट० अयम् कृष्णः नाम वाम् हवते अश्विनौ! अन्नधनौ! ॥ ३ ॥

शृ॒णु॒तं ज॑रि॒तुर्हवं॒ कृष्ण॑स्य स्तुव॒तो न॑रा । मध्वः॒ सोम॑स्य पी॒तये॑ ॥ ४ ॥

शृ॒णु॒तम् । ज॒रि॒तुः । हव॑म् । कृष्ण॑स्य । स्तु॒व॒तः । न॒रा॒ । मध्वः॑ । सोम॑स्य । पी॒तये॑ ॥ ४ ॥

वेङ्कट० शृणुतम् स्तवनशीलस्य[6] हवम् कृष्णनाम्नः सम्प्रति स्तुवतः हे नेतारौ! इति ॥ ४ ॥

१-१. सर्वाननेषु वि[1]; °वाननेषु अ[1]. २. स्तोते मूको. ३-३ नास्ति मूको. ४. सोममिमं अ[1].
५. आह्म° मूको. ६. हवन° मूको.

छर्दिर्यन्तमदाभ्यं विप्राय स्तुवते नरा । मध्वः सोमस्य पीतये ॥ ५ ॥

छर्दिः । यन्तम् । अदाभ्यम् । विप्राय । स्तुवते । नरा । मध्वः । सोमस्य । पीतये ॥ ५ ॥

वेङ्कट० गृहम् यच्छतम् अहिंस्यम् मेधाविने स्तुवते नरौ! इति ॥ ५ ॥

[1]इति षष्ठाष्टके षष्ठाध्याये सप्तमो वर्गः[1] ॥

गच्छतं दाशुषो गृहमित्था स्तुवतो अश्विना । मध्वः सोमस्य पीतये ॥ ६ ॥

गच्छतम् । दाशुषः । गृहम् । इत्था । स्तुवतः । अश्विना । मध्वः । सोमस्य । पीतये ॥ ६ ॥

वेङ्कट० गच्छतम् यजमानस्य गृहम् इत्थम् स्तुवतः अश्विनौ! ॥ ६ ॥

युञ्जाथां रासभं रथे वील्वङ्गे वृषण्वसू । मध्वः सोमस्य पीतये ॥ ७ ॥

युञ्जाथाम् । रासभम् । रथे । वीळुऽअङ्गे । वृषण्वसू इति वृषण्ऽवसू । मध्वः । सोमस्य । पीतये ॥ ७ ॥

वेङ्कट० युञ्जाथाम् रासभम् रथे[2] रथे दृढाङ्गे हे वृष्यमाणधनौ! ॥ ७ ॥

त्रिवन्धुरेण त्रिवृता रथेना यातमश्विना । मध्वः सोमस्य पीतये ॥ ८ ॥

त्रिऽवन्धुरेण । त्रिऽवृता । रथेन । आ । यातम् । अश्विना । मध्वः । सोमस्य । पीतये ॥ ८ ॥

वेङ्कट० त्रिफलकासङ्घाटेन त्रिकोणेन रथेन आ यातम् अश्विनौ! ॥ ८ ॥

नू मे गिरो नासत्याश्विना प्रावतं युवम् । मध्वः सोमस्य पीतये ॥ ९ ॥

नु । मे । गिरः । नासत्या । अश्विना । प्र । अवतम् । युवम् । मध्वः । सोमस्य । पीतये ॥ ९ ॥

वेङ्कट० क्षिप्रम् मे गिरः [1]हे नासत्यौ![1] अश्विनौ! युवाम् प्र गच्छतम् रक्षतं चेति ॥ ९ ॥

[1]इति षष्ठाष्टके षष्ठाध्याये अष्टमो वर्गः[1] ॥

[८६]

[1]कृष्ण आङ्गिरस ऋषिः, विश्वको वा कार्ष्णिः । अश्विनौ देवता । जगती छन्दः[1] ।

उभा हि दस्रा भिषजा मयोभुवोभा दक्षस्य वचसो बभूवथुः ।
ता वां विश्वको हवते तनूकृथे मा नो वि यौष्टं सख्या मुमोचतम् ॥ १ ॥

१-१. नास्ति मूको. २. नास्ति मूको.

उगा । हि । दुस्रा । भिषजा । मयः॑ऽभुवा । उभा । दक्ष॑स्य । वर्च॑सः । बुभूवथुः ।
ता । वाम् । विश्व॑कः । हुवते । तनुऽकृथे । मा । नः । वि । यौष्टम् । सख्या । मुमोच॑तम् ॥१॥

वेङ्कट० कार्ष्णिर्विश्वकः[1] कृष्णो वा आङ्गिरसः। उभौ हि दस्रौ भिषजौ सुखस्य भावयितारौ उभौ दक्षस्य प्रजापतेः स्तुतेः सम्बन्धिनौ बभूवथुः। तौ वाम् विश्वकः ह्वयते पुत्रस्य कृते। मा अस्माकं सख्यानि पृथक् कुरुतम्। अत्र आगन्तुम् अधमप्रदात् मुञ्चतम् इति। विष्णाप्वम्[2] उद्दिश्य तस्य पिता विश्वकः वा ह्वयत इति आत्मानम् आह। अपि वा विश्वकस्य पिता कृष्णः वदति—अयं मम पुत्रो विश्वकः पुत्रार्थं वाम् ह्वयत इति ॥ १ ॥

कुथा नूनं वां विम॑ना उप॑ स्तवद्युवं धियं॑ ददथुर्वस्य॑इष्टये ।
ता वां विश्व॑को हवते तनूकृथे मा नो वि यौ॑ष्टं सख्या मुमोच॑तम् ॥ २ ॥

कुथा । नूनम् । वाम् । विऽम॑नाः । उप॑ । स्तवत् । युवम् । धियम् । ददथुः । वस्यः॑ऽइष्टये ।
ता । वाम् । विश्व॑कः । हुवते । तनुऽकृथे । मा । नः । वि । यौष्टम् । सख्या । मुमोच॑तम् ॥२॥

वेङ्कट० कथम् वाम् पुरा विमनाः ऋषिः उप स्तवत्। यद्वा विमनसे बुद्धिं दधथुः वसिष्ठस्य[3] अभिलषितस्य इष्टये अभिगमनाय। ता वाम् इति गतम्॥ २ ॥

युवं हि ष्मा पु॑रुभुजेममे॑धतुं विष्णाप्वे॑ ददथुर्वस्य॑इष्टये ।
ता वां विश्व॑को हवते तनूकृथे मा नो वि यौ॑ष्टं सख्या मुमोच॑तम् ॥ ३ ॥

युवम् । हि । स्म । पुरुऽभुजा । इमम् । एधतुम् । विष्णाप्वे॑ । ददथुः । वस्यः॑ऽइष्टये ।
ता । वाम् । विश्व॑कः । हुवते । तनुऽकृथे । मा । नः । वि । यौष्टम् । सख्या । मुमोच॑तम् ॥३॥

वेङ्कट० हे पुरुभुजौ! युवाम् हि स्म इमम् एधतुम् इमां वृद्धिम् विष्णाप्वे मम पुत्रे पौत्रे वा दधथुः अस्माकं वसीयसः इच्छां पूरयितुम्॥ ३ ॥

उत त्यं वीरं ध॑नसामृ॑जीषिणं दूरे चित् सन्त॒मव॑से हवामहे ।
यस्य स्वादि॑ष्ठा सुम॒तिः पितुर्यथा मा नो वि यौ॑ष्टं सख्या मुमोच॑तम् ॥ ४ ॥

उत । त्यम् । वीरम् । धनऽसाम् । ऋजीषिणम् । दूरे । चित् । सन्तम् । अव॑से । हुवामहे ।
यस्य॑ । स्वादि॑ष्ठा । सुऽमतिः । पितुः । यथा । मा । नः । वि । यौष्टम् । सख्या । मुमोच॑तम् ॥

वेङ्कट० अपि च तम् वीरम् धनानां[4] सम्भक्तारम्। [5]ऋजीषम् अपार्जितं[5] भवति। अभिषुतसोमं[6]

1. °र्णिन्वइवक मूको. 2. विष्णोप्णावम् मूको 3. वसिष्ठाय वि°. 4. नास्ति मूको. 5-5. °पमार्जि° मूको. 6. °मिम२° :

विसृष्टं दूरे अपि सन्तम् रक्षणाय हवामहे। पुत्रो हि पितरं रक्षति। यस्य स्वादुतमा सुष्टुतिः पितुः विश्वकस्य इव ॥ ४ ॥

ऋतेन॑ दे॒वः स॑वि॒ता श॑माय॒त ऋ॒तस्य॒ शृङ्ग॑मुर्वि॒या वि प॑प्रथे ।
ऋ॒तं सा॑साह॒ महि॑ चि॒त् पृ॑त॒न्यतो॒ मा नो॒ वि यौ॑ष्टं स॒ख्या मु॑मो॒च॑तम् ॥ ५ ॥

ऋ॒तेन॑ । दे॒वः । स॒वि॒ता । श॒म॒ऽआ॒य॒ते । ऋ॒तस्य॑ । शृङ्ग॑म् । उ॒र्वि॒या । वि । प॒प्र॒थे ।
ऋ॒तम् । स॒सा॒ह॒ । महि॑ । चि॒त् । पृ॒त॒न्य॒तः । मा । नः॒ । वि । यौ॒ष्ट॒म् । स॒ख्या । मु॒मो॒च॑तम् ॥५॥

वेङ्कट० सत्येन देवः सविता सायं शर्मं गच्छति, 'सत्यस्यैव शृङ्गम्' दिवा विस्तीर्णम् वि प्रथयति। अपि च इदम् ऋतम् अभिभवति महद् अपि बलम् पृतन्यतः। एवं प्रशस्तम् ऋतं भवति। युवाम् अपि ऋतेन मा नः वि यौष्टम् इति ॥ ५ ॥

'इति षष्ठाष्टके षष्ठाध्याये नवमो वर्गः' ॥

[८७]

'कृष्ण आङ्गिरस ऋषिः, वासिष्ठो वा द्युम्नीकः, प्रियमेध आङ्गिरसो वा। अश्विनौ देवता। प्रगाथश्छन्दः. (=विषमा बृहत्यः, समाः सतोबृहत्यः)'।

द्यु॒म्नी वां॒ स्तोमो॑ अश्विना॒ क्रिवि॒र्न सेक॒ आ ग॑तम् ।
मध्वः॑ सु॒तस्य॒ स दि॒वि प्रि॒यो न॑रा पा॒तं गौ॑रावि॒वेरि॑णे ॥ १ ॥

द्यु॒म्नी । वा॒म् । स्तोमः॑ । अ॒श्वि॒ना॒ । क्रिविः॑ । न । सेके॑ । आ । ग॒त॒म् ।
मध्वः॑ । सु॒तस्य॑ । सः । दि॒वि । प्रि॒यः । न॒रा॒ । पा॒त॒म् । गौ॒रौ॒ऽइ॑व । इरि॑णे ॥ १ ॥

वेङ्कट० द्युम्नीकः वासिष्ठः प्रियमेधो वा आङ्गिरसः। वाम्[3] द्युम्नी युवयोः स्तोता भवति अश्विनौ! कूपः (तु. निघ ३,२३) इव सेके, अनुपक्षीणस्तोत्रः। तथा सति आ गच्छतम्। अपि च अन्नविषयः[4] स्तोमः स्तुतिः इति। सः अयं स्तोता दिवि अभिषुतस्य सोमस्य प्रियः भवति। तम् पातम् शीघ्रमागत्य नरौ! यथा तृषितौ[5] 'गौरौ इरिणे' शीघ्रम् आगच्छतः ॥ १ ॥

पिब॑तं घ॒र्मं मधु॑मन्तमश्विना ब॒र्हिः सी॑दतं नरा ।
ता म॑न्दसा॒ना मनु॑षो दुरो॒ण आ नि पा॑तं॒ वेद॑सा॒ वयः॑ ॥ २ ॥

१-१. 'स्वर्धे ... तृ' मूको. २-२. नास्ति मूको. ३. युवाम् मूको. ४. 'अन्नियः मूको. ५. तृषीणौ मूको. ६-६ 'रक्षि' मूको.

पिबंतम् । घर्मम् । मधुंऽमन्तम् । अश्विना । आ । बर्हिः । सीदतम् । नरा ।
ता । मन्दसाना । मनुषः । दुरोणे । आ । नि । पातम् । वेदसा । वयः ॥ २ ॥

वेङ्कट० पिबतम् घर्मम् मधुररसवन्तम् अश्विनौ[1]। आ सीदतम् बर्हि नरौ[1]। तौ मोदमानौ मनुष्यगृहे आगत्य नि पिबतम्[2] पुरोडाशादिना सह सोमलक्षणम् अन्नम्। अपि च आरक्षतम् धनेन सह आयुरिति ॥ २ ॥

आ वां विश्वाभिरूतिभिः प्रियमेधा अहूषत ।
ता वर्तिर्यातमुप वृक्तबर्हिषो जुष्टं यज्ञं दिविष्टिषु ॥ ३ ॥

[2]आ । वाम् । विश्वाभिः । ऊतिऽभिः । प्रियऽमेधाः । अहूषत ।[2]
ता । वर्तिः । यातम् । उप । वृक्तऽबर्हिषः । जुष्टम् । यज्ञम् । दिविष्टिषु ॥ ३ ॥

वेङ्कट० आहूतवन्त वाम् विश्वैः पालनैः प्रिययज्ञाः प्रियमेधाः वा। एकस्मिन् बहुवचनम्। तौ गृहम् आगच्छतम् यजमानस्य पर्याप्तम् यज्ञम् प्रति अह्न आगमनेषु ॥ ३ ॥

पिबंतं सोमं मधुमन्तमश्विना बर्हिः सीदतं सुमत् ।
ता वावृधाना उप सुष्टुतिं दिवो गन्तं गौराविवेरिणम् ॥ ४ ॥

पिबंतम् । सोमम् । मधुंऽमन्तम् । अश्विना । आ । बर्हिः । सीदतम् । सुऽमत् ।
ता । ववृधानौ । उप । सुऽस्तुतिम् । दिवः । गन्तम् । गौरौऽइव । इरिणम् ॥ ४ ॥

वेङ्कट० पिबतम् सोमम् मधुमन्तम् अश्विनौ[1]। आ सीदतम् बर्हि शोभनम्। तौ वर्धमानौ उप गच्छतम् सुष्टुतिम् द्युलोकात् गौरौ इव इरिणम् ॥ ४ ॥

आ नूनं यातमश्विनाश्वेभिः प्रुषितप्सुभिः ।
दस्रा हिरण्यवर्तनी शुभस्पती पातं सोममृतावृधा ॥ ५ ॥

आ । नूनम् । यातम् । अश्विना । अश्वेभिः । प्रुषितप्सुऽभिः ।
दस्रा । हिरण्यवर्तनी इति हिरण्यऽवर्तनी । शुभः । पती इति । पातम् । सोमम् । ऋतऽवृधा ॥५॥

वेङ्कट० आ यातम् इदानीम् अश्विनौ! अश्वैः दीप्तरूपैः। दर्शनीयौ! हिरण्मयरथौ! उदकस्य पालयितारौ! पिबतम् सोमम् यज्ञस्य वर्धयितारौ! ॥ ५ ॥

वयं हि वां हवामहे विपन्यवो विप्रासो वाजसातये ।
ता वल्गू दस्रा पुरुदंससा धियाश्विना श्रुष्ट्या गतम् ॥ ६ ॥

1. पिबत मूको. २-२. नास्ति मूको. ऋ ८,८,१८

व॒यम् । हि । वा॒म् । हवा॑महे । वि॒प॒न्यवः॑ । विप्रा॑सः । वाज॑ऽसातये ।
ता । व॒ल्गू इति॑ । द॒स्रा । पु॒रु॒ऽदंस॑सा । धि॒या । अ॒श्विना॑ । श्रु॒ष्टी । आ । ग॒त॒म् ॥ ६ ॥

वेङ्कट० वयम् हि वाम् ह्वयामहे स्तोतारः मेधाविनः अन्नलाभाय । तौ वल्गनशीलौ दस्रौ बहुकर्माणौ प्रज्ञया अश्विनौ! क्षिप्रम् आ गच्छतम् ॥ ६ ॥

[1]इति षष्ठाष्टके षष्ठाध्याये दशमो वर्गः[1] ॥

[८८]

[1]नोधा गौतम ऋषिः । इन्द्रो देवता । प्रगाथश्छन्दः (=विषमा बृहत्य , समा सतोबृहत्य॑)[1] ।

तं वो॑ द॒स्मम्ृ॑ती॒पहं॒ वसो॑र्मन्दा॒नमन्ध॑सः ।
अ॒भि व॒त्सं न स्वस॑रेषु धे॒नव॒ इन्द्रं॑ गी॒र्भिर्न॑वामहे ॥ १ ॥

तम् । वः॒ । द॒स्मम् । ऋ॒ति॒ऽसह॑म् । वसोः॑ । म॒न्दा॒नम् । अन्ध॑सः ।
अ॒भि । व॒त्सम् । न । स्वस॑रेषु । धे॒नवः॑ । इन्द्र॑म् । गीः॒ऽभिः । न॒वा॒म॒हे॒ ॥ १ ॥

वेङ्कट० नोधा गौतमः । तम् युष्माकं दर्शनीयम् बाधकानामभिभवितारम् वासयित्राऽन्नेन सोमेन मन्दानम् अभि [2]नवामहे अभिशब्दयामः[2], वत्सम् इव गोष्ठेषु धेनवः, इन्द्रम् स्तुतिभिः ॥ १ ॥

द्यु॒क्षं सु॒दानुं॒ तवि॑षीभि॒रावृ॑तं गि॒रिं न पु॑रु॒भोज॑सम् ।
क्षु॒मन्तं॒ वाजं॑ श॒तिनं॑ सह॒स्रिणं॑ म॒क्षू गोम॑न्तमीमहे ॥ २ ॥

द्यु॒क्षम् । सु॒ऽदानु॑म् । तवि॑षीभिः । आऽवृ॑तम् । गि॒रिम् । न । पु॒रु॒ऽभोज॑सम् ।
क्षु॒ऽमन्त॑म् । वाज॑म् । श॒तिन॑म् । स॒ह॒स्रिण॑म् । म॒क्षु । गोऽम॑न्तम् । ई॒म॒हे॒ ॥ २ ॥

वेङ्कट० दीप्तम् शोभनदानम् बलैः आवृतम् शिलोच्चयम् इव बहुभिर्भोक्तव्यम् शब्दवन्तम् वाजम् याचामहे ॥ २ ॥

न त्वा॑ बृ॒हन्तो॒ अद्र॑यो॒ वर॑न्त इन्द्र वी॒ळवः॑ ।
यद्दित्स॑सि स्तुव॒ते माव॑ते॒ वसु॒ नकि॒ष्टदा मि॑नाति ते ॥ ३ ॥

न । त्वा॒ । बृ॒हन्तः॑ । अद्र॑यः । वर॑न्ते । इ॒न्द्र॒ । वी॒ळवः॑ ।
यत् । दित्स॑सि । स्तु॒व॒ते । माऽव॑ते । वसु॑ । नकिः॑ । तत् । आ । मि॒ना॒ति॒ । ते॒ ॥ ३ ॥

[1-1]. नास्ति मूको. [2-2] 'भदे हि शब्द' मूको.

वेङ्कट० न त्वां महान्तः शिलोच्चयाः वारयन्ति इन्द्र! त्वाः, यत् दातुमिच्छसि स्तुवते मादृशाय धनम्। न कश्चित् तव आभिमुख्येन हिनस्ति तत्, तव देयम् इति। पूर्वार्धप्रपञ्च उत्तरः ॥ ३ ॥

योद्धासि क्रत्वा शवसोत दंसना विश्वा जाताभि मज्मना ।
आ त्वायमर्क ऊतये ववर्तति यं गोतमा अजीजनन् ॥ ४ ॥

योद्धा । असि । क्रत्वा । शवसा । उत । दंसना । विश्वा । जाता । अभि । मज्मना ।
आ । त्वा । अयम् । अर्कः । ऊतये । ववर्तति । यम् । गोतमाः । अजीजनन् ॥ ४ ॥

वेङ्कट० योद्धा भवसि प्रज्ञानेन अपि च बलेन कर्मणा। विश्वानि जातानि अभि भवसि च बलेन। तम् त्वा अयम् मन्त्रः स्तोता वा रक्षणाय आ वर्तयति, यम् अजीजनन् गोतमाः ॥ ४ ॥

प्र हि रिरिक्ष ओजसा दिवो अन्तेभ्यस्परि ।
न त्वा विव्याच रज इन्द्र पार्थिवमनु स्वधां ववक्षिथ ॥ ५ ॥

प्र । हि । रिरिक्षे । ओजसा । दिवः । अन्तेभ्यः । परि ।
न । त्वा । विव्याच । रजः । इन्द्र । पार्थिवम् । अनु । स्वधाम् । ववक्षिथ ॥ ५ ॥

वेङ्कट० स्वबलेन[1] अतिरिक्तो भवसि दिवः पर्यन्तेभ्यः। महता शरीरेण न त्वां व्याप्नोति पार्थिवम् रजः लोकः इन्द्र!। स त्वम् अनु [2]वहसि अन्नम्[2] उदकं वा इति ॥ ५ ॥

नकिः परिष्टिर्मघवन् मघस्य ते यद् दाशुषे दशस्यसि ।
अस्माकं बोध्युचथस्य चोदिता मंहिष्ठो वाजसातये ॥ ६ ॥

नकिः । परिष्टिः । मघऽवन् । मघस्य । ते । यत् । दाशुषे । दशस्यसि ।
अस्माकम् । बोधि । उचथस्य । चोदिता । मंहिष्ठः । वाजऽसातये ॥ ६ ॥

वेङ्कट० न अस्ति ते [3]परिष्टिः निरोद्धा[3] मघवन्! धनस्य, यदा त्वम् दाशुषे ददासि। तथा सति अस्माकम् बुध्यस्व वचनम् चोदयिता धनानाम् दातृतमः अन्नलाभाय इति ॥ ६ ॥

[4]इति पञ्चाष्टके षष्ठाध्याये एकादशो वर्गः[4] ॥

[८९]

[5]नृमेधपुरुमेधावाङ्गिरसौ ऋषी। इन्द्रो देवता। प्रथमादिचतुर्थ्यन्ताः प्रगाथौ (=विषमे बृहत्यौ, समे सतोबृहत्यौ), पञ्चमीषष्ठ्यौ अनुष्टुभौ, सप्तमी बृहती[5]।

बृहदिन्द्राय गायत मरुतो वृत्रहन्तमम्[6] ।
येन ज्योतिरजनयन्नृतावृधो देवं देवाय जागृवि ॥ १ ॥

---

१. स्वलेन मूको. २-२. वहस्यन्नं मूको. ३-३. "परिष्टि" मूको. ४-४. नास्ति मूको.
५. तु. एवं सर्वत्र; वैतु. इहैव परम्परागत. पाठः "हंत" (पपा. "हन्ऽत")[1] इति।

बृहत् । इन्द्राय । गायत । मरुतः । वृत्रहन्ऽतमम् ।
येन । ज्योतिः । अजनयन् । ऋतऽवृधः । देवम् । देवाय । जागृवि ॥ १ ॥

वेङ्कट० नृमेध-पुरुमेधौ आङ्गिरसौ । अतिशयेन पापविनाशनम् बृहत् [1]'साम इन्द्राय' गायत हे स्तोतारः![1], येन साम्ना ज्योतिः इन्द्राय अजनयन्[2] यज्ञस्य वर्धकाः देवनशीलम् जागरणशीलम् देवाय इति ॥ १ ॥

अपाधमदभिशस्तीरशस्तिहाथेन्द्रो द्युम्न्याभवत् ।
देवास्त इन्द्र सख्याय येमिरे बृहद्भानो मरुद्गण ॥ २ ॥

अप । अधमत् । अभिऽशस्तीः । अशस्तिऽहा । अथ । इन्द्रः । द्युम्नी । आ । अभवत् ।
देवाः । ते । इन्द्र । सख्याय । येमिरे । बृहद्भानो इति बृहत्ऽभानो । मरुत्ऽगण ॥ २ ॥

वेङ्कट० अप अधमत् [4]अभिशस्तीः हिंसाः अशस्तिहा । अथ[4] इन्द्रः [5]यशस्वी आ अभवत् । अथ[5] प्रत्यक्षः—देवाः ते इन्द्र! सख्यार्थम् आत्मनः नि-येमिरे महादीप्ते! मरुत्सख![6] ॥ २ ॥

प्र व इन्द्राय बृहते मरुतो ब्रह्मार्चत ।
वृत्रं हनति वृत्रहा शतक्रतुर्वज्रेण शतपर्वणा ॥ ३ ॥

प्र । वः । इन्द्राय । बृहते । मरुतः । ब्रह्म । अर्चत ।
वृत्रम् । हनति । वृत्रऽहा । शतऽक्रतुः । वज्रेण । शतऽपर्वणा ॥ ३ ॥

वेङ्कट० प्र अर्चयत यूयम् इन्द्राय महते स्तोतारः![7] स्तोत्रम् । वृत्रम् हन्ति वृत्रहा बहुप्रज्ञः वज्रेण शतपर्वणा इति ॥ ३ ॥

अभि प्र भर धृषता धृषन्मनः श्रवश्चित् ते असद् बृहत् ।
अर्षन्त्वापो जवसा वि मातरो हनो वृत्रं जया स्वः ॥ ४ ॥

अभि । प्र । भर । धृषता । धृषत्ऽमनः । श्रवः । चित् । ते । असत् । बृहत् ।
अर्षन्तु । आपः । जवसा । वि । मातरः । हनः । वृत्रम् । जय । स्वरिति स्वः ॥ ४ ॥

वेङ्कट० अभि प्र भर[8] अस्मभ्यं धृष्टेन मनसा हे शत्रूणां धर्षणशीलमनस्क!, अन्नं तव भवति महत् । यशः च । आपः विविधं गच्छन्तु वेगेन मातृस्थानीयाः । यदर्थं ताडय[8] मेघम् । जय सर्वम् इति ॥ ४ ॥

1-1. स्तोमेन्द्रा° वि[1]; तोमेन्द्रा° अ[1]. २. द्र. निरु ३,१८. ३. अन° मूको. ४-४. °रतीर्हिंसो भवि शस्तिध वि[1]; °स्तीर्हिंसो भदि शस्तिथ अ[1]. ५-५. °यशस्वि ... थ मूको. ६. °त्साय मूको. ७. भरेण मूको. ८. °वन् मूको.

यज्जायथा अपूर्व्य मघवन् वृत्रहत्याय ।
तत् पृथिवीमप्रथयस्तदस्तभ्ना उत द्याम् ॥ ५ ॥

यत् । जायथाः । अपूर्व्य । मघऽवन् । वृत्रऽहत्याय ।
तत् । पृथिवीम् । अप्रथयः । तत् । अस्तभ्नाः । उत । द्याम् ॥ ५ ॥

वेङ्कट० यदा[1] त्वम् अजायथाः हे त्वत्तः व्यतिरिक्तेन पूर्व्येण[2] वर्जित![3] मघवन्! वृत्रहत्याय, तदानीम् पृथिवीम् अप्रथयः । अपि तथा आदित्यम् च अस्तभ्ना[4] ॥ ५ ॥

तत् ते यज्ञो अजायत तदर्क उत हस्कृतिः ।
तद्विश्वमभिभूरसि यज्जातं यच्च जन्त्वम् ॥ ६ ॥

तत् । ते । यज्ञः । अजायत । तत् । अर्कः । उत । हस्कृतिः[5] ।
[6]तत् । विश्वम् । अभिऽभूः । असि[6] । यत् । जातम् । यत् । च । जन्त्वम् ॥ ६ ॥

वेङ्कट० तदानीं त्वदर्थम्[7] यज्ञ अजायत, तदानीं मन्त्रः अपि च प्रीत्यै क्रियमाणो हर्षस्य सूचकः । तदानीम् विश्वम् अभिभवसि यत् जातम् यत् च जनयितव्यम् तत् विश्वम् इति ॥ ६ ॥

आमासु पक्वमैरय आ सूर्यं रोहयो दिवि ।
घर्मं न सामन्तपता सुवृक्तिभिर्जुष्टं गिर्वणसे बृहत् ॥ ७ ॥

[8]आमासु । पक्वम् । ऐरयः । आ । सूर्यम् । रोहयः । दिवि[8] ।
घर्मम् । न । सामन् । तपत । सुवृक्तिऽभिः । [9]जुष्टम् । गिर्वणसे । बृहत्[9] ॥ ७ ॥

वेङ्कट० आमासु गोषु पक्वम् पय त्वम् ऐरय । आ रोहयः च सूर्यम् दिवि। तम् इम यथा घर्मम् सामभिः तपन्ति, तथा तीक्ष्णीकुरुत स्तुतिभिः पर्याप्तम् गिर्वणसे बृहत् साम गायते इति ॥ ७ ॥

[10]इति षष्ठाष्टके षष्ठाध्याये द्वादशो वर्गः[10] ॥

[९०]

[10]नृमेधपुरुमेधावाङ्गिरसौ ऋषी । इन्द्रो देवता । प्रगाथश्छन्द (=विषमा बृहत्य, समाः सतोबृहत्य)[10] ।

आ नो विश्वासु हव्य इन्द्रः समत्सु भूषतु ।
उप ब्रह्माणि सवनानि वृत्रहा परमज्या ऋचीषमः ॥ १ ॥

१. यथा मूको. २ पूर्वेण मूको. ३. वर्जित् वि[२]. ४ °भ्नात् मूको. ५ तु. ऋ १,२३,१२; ४,७,३. ६-६. तु. ऋ ८,९७,९. ७. यद° वि[२]. ८-८. तु. ऋ १,६२,९,९,१०७,७. ९-९. तु. या ६,१४. १० १०. नास्ति मूको.

आ । नः । विश्वासु । हव्यः । इन्द्रः । समत्ऽसु । भूषतु ।
उप । ब्रह्माणि । सवनानि । वृत्रऽहा । परमऽज्याः । ऋचीषमः ॥ १ ॥

वेङ्कट० उप आ भवतु अस्माकम् ब्रह्माणि इन्द्रः सर्वेषु सङ्ग्रामेषु ह्वातव्यः सवनानि च वृत्रहा प्रकर्षेण क्षपयिता स्तुत्या समः ॥ १ ॥

त्वं दाता प्रथमो राधसामस्यसि सत्य ईशानकृत् ।
तुविद्युम्नस्य युज्या वृणीमहे पुत्रस्य शवसो महः ॥ २ ॥

त्वम् । दाता । प्रथमः । राधसाम् । असि । असि । सत्यः । ईशानऽकृत् ।
तुविऽद्युम्नस्य । युज्या । आ । वृणीमहे । पुत्रस्य । शवसः । महः ॥ २ ॥

वेङ्कट० त्वम् दाता मुख्यः धनानाम् भवसि । असि च सत्यकर्मा ऐश्वर्यकृत् । बहुधनस्य योग्यानि धनानि आ वृणीमहे बलस्य सूनोः महतः तव ॥ २ ॥

ब्रह्मा त इन्द्र गिर्वणः क्रियन्ते अनतिद्भुता ।
इमा जुषस्व हर्यश्व योजनेन्द्र या ते अमन्महि ॥ ३ ॥

ब्रह्म । ते । इन्द्र । गिर्वणः । क्रियन्ते । अनतिऽअद्भुता ।
इमा । जुषस्व । हरिऽअश्व । योजना । इन्द्र । या । ते । अमन्महि ॥ ३ ॥

वेङ्कट० ब्रह्माणि ते इन्द्र! गीर्भिर्वननीय! क्रियन्ते, [1]यानि त्वद् गुणान् नाऽतिभवन्ति[1] सत्यानि । तानि इमानि जुषस्व हर्यश्व!, यानि त्वा योजयन्ति[2], इन्द्र! यानि तव वयम् उक्तवन्तः ॥ ३ ॥

त्वं हि सत्यो मघवन्ननानतो वृत्रा भूरि न्यृञ्जसे ।
स त्वं शविष्ठ वज्रहस्त दाशुषेऽर्वाञ्चं रयिमा कृधि ॥ ४ ॥

त्वम् । हि । सत्यः । मघऽवन् । अनानतः । वृत्रा । भूरि । निऽऋञ्जसे ।
सः । त्वम् । शविष्ठ । वज्रऽहस्त । दाशुषे । अर्वाञ्चम् । रयिम् । आ । कृधि ॥ ४ ॥

वेङ्कट० त्वम् हि सत्यः मघवन्! अनम्रः वृत्राणि भूरीणि न्यक् करोषि । सः त्वम् इति स्पष्टम् ॥ ४ ॥

त्वमिन्द्र यशा अस्यृजीषी शवसस्पते ।
त्वं वृत्राणि हंस्यप्रतीन्येक इदनुत्ता चर्षणीधृता ॥ ५ ॥

१-१. यानिश्वगुणात्यानिय° मूको. २. यनि मूको.

त्वम् । इन्द्र । यशाः । असि । ऋजीषी । शवसः । पते ।
त्वम् । वृत्राणि । हंसि । अप्रतीनि । एकः । इत् । अनुत्ता । चर्षणिऽधृता ॥ ५ ॥

वेङ्कट० त्वम् इन्द्र! यशस्वी भवसि ऋजीषी। हे बलस्य पते! त्वम् वृत्राणि हंसि बलिभि
भवतिष्ठानि एव एक अन्यै अनुत्तानि[1] नोत्तुमशक्यानि[2] चर्षणीनां धारकेण ॥ ५ ॥

तमु त्वा नूनमसुर प्रचेतसं राधो भागमिवेमहे ।
महीव कृत्तिः शरणा त इन्द्र प्र ते सुम्ना नो अश्नवन् ॥ ६ ॥

तम् । ऊँ इति । त्वा । नूनम् । असुर । प्रऽचेतसम् । राधः । भागम्ऽइव । ईमहे ।
महीऽइव । कृत्तिः । शरणा । ते । इन्द्र । प्र । ते । सुम्ना । नः । अश्नवन् ॥ ६ ॥

वेङ्कट० तम् उ त्वा इदानीं हे बलवन्! प्रकृष्टज्ञानम्[3] धनम् पितृत भागम् इव याचामहे।
यास्क (५,२०)—"कृत्तिः कृन्ततेः। यशो वा अन्नं वा। 'महीव कृत्तिः शरणा त इन्द्र'।
सुमहत् इन्द्र "शरणमन्तरिक्षे कृत्तिरिव"[4] इति। प्र अश्नवन् तव सुखानि अस्मान् इति ॥ ६ ॥
"इति षष्ठाष्टके षष्ठाध्याये त्रयोदशो वर्गः" ॥

[९१]

[5]आत्रेयी अपाला ऋषिः । इन्द्रो देवता । अनुष्टुप् छन्दः, आद्ये पङ्क्ती[5] ।

कन्या३ वारवायती सोममपि स्रुताविदत् ।
अस्तं भरन्त्यब्रवीदिन्द्राय सुनवै त्वा शक्राय सुनवै त्वा ॥ १ ॥

कन्या । वाः । अवऽयती । सोमम् । अपि । स्रुता । अविदत् ।
अस्तम् । भरन्ती । अब्रवीत् । इन्द्राय । सुनवै । त्वा । शक्राय । सुनवै । त्वा ॥ १ ॥

वेङ्कट० अपाला आत्रेयी। कन्या स्नानार्थम् उदकम् प्रति अवगच्छन्ती मार्गे सोमम् अपि अलभत।
तं सोमं गृहं प्रति आहरन्ती सा अब्रवीत्—इन्द्राय सुनवै त्वा शक्राय सुनवै त्वा इति। तस्यै ह ग्रावाण
शाट्यायनकम्—"सा तीर्थमभ्यवयती सोमांशुमविन्दत्। तं समखादत्। साभिव्याहरत् 'कन्या
इव दन्ता वदन्ति'[6]। स इन्द्र आद्रवद् ग्रावाणो 'व वदन्तीति'[7]। अस्त भरन्त्यब्रवीदिन्द्राय सुनवै त्वा शक्राय सुनवै त्वा इति।
वारवायती' सोममपि 'स्रुताऽविदत्। अस्त भरन्त्यब्रवीदिन्द्राय सुनवै त्वा शक्राय सुनवै त्वा इति।
असौ वा इदं' ग्रावाण इव दन्ता वदन्तीति विदितेन्द्र पराभवतीत'[8]। तमब्रवीत् 'असौ य एषि वीरक'
(ऋ ८,९१,२)" इत्यादि (तु जैमि १,२२०, बृदे ६,९९-१०७, षड्गुरुशिष्य [ऋभा]) ॥ १ ॥

1 °नुत्तानि मूको. 2 नोत्तुम° मूको. 3. °ष्ट ज्ञा° मूको. 4 4. °रिक्षे वि मूको. 5-5. नास्ति मूको. 6 कु मूको. 7-7. वैदन्ती° मूको. 8 वारवायत्री मूको. 9 9. सुता°
तदाशिष्यद्वैयाधं मूको. 10-10 पुराणवर्तनम् वि°.

असौ य एषि वीरको गृहंगृहं विचाकशत् ।
इमं जम्भसुतं पिब धानावन्तं करम्भिणमपूपवन्तमुक्थिनम् ॥ २ ॥

असौ । य । एषि । वीरक । गृहम्ऽगृहम् । विऽचाकशत् ।
इमम् । जम्भऽसुतम् । पिब । धानाऽवन्तम् । करम्भिणम् । अपूपऽवन्तम् । उक्थिनम् ॥ २ ॥

वेङ्कट० असौ य गच्छसि[1] सोमपानाय वीर. गृहंगृहम् प्रति दीप्यमान । स त्वम् इमम् दंष्ट्राभ्या सुत सोमम् पिब धानादियुक्तम् इति । धानादींश्च अपाला इन्द्राय तदानीं सोमेन सह न्यवेदयदिति ॥ २ ॥

आ चन त्वां चिकित्सामोऽधि चन त्वा नेमसि ।
शनैरिव शनकैरिवेन्द्रायेन्दो परि स्रव ॥ ३ ॥

आ । चन । त्वा । चिकित्साम । अधि । चन । त्वा । न । इमसि ।
शनैःऽइव । शनकैःऽइव । इन्द्राय । इन्दो इति । परि । स्रव ॥ ३ ॥

वेङ्कट० आ चिकित्साम त्वाम् अवश्यम्[2] इन्द्र[3] मम गृहम् आगतम् आजानीम । न च त्वां वयम् अधिगच्छाम त्वमेव इहाऽऽगत इति । इन्द्र मत्वा सोमम् आह—शनैरिव [3]शनकैरिवेति । स त्वम् इन्दो । असै इन्द्राय आगताय[4] शनै इव शनकै इव च परि स्रव । अभिपूयमाण सोमो यज्ञेषु प्रथम शनै परिस्रवति, तत शनकैरिति । शाट्यायनकम्—'अनादिमगाणैवैतम्[5] अब्रवीत्—'आ चन त्वा [5]चिकित्सामोऽधि चन[6] त्वा नेमसि' इति । पुरा मा सर्वय-चोपाल्[7] स्नौतीत्यपपर्यावर्तत । 'शनैरिव शनकैरिवेन्द्रायेन्दो परि स्रव' इति ह वा अस्यै मुखात् सोमं निरपयत् । सोमपीथ इव ह वा अस्य [8]स भवति[8] य एव विद्वान् स्त्रियै मुखम् उपाजिघ्रति" (तु जैमि १,२२०) इति ॥ ३ ॥

कुविच्छकत् कुवित् करत् कुविन्नो वस्यसस्करत् ।
कुवित् पतिद्विषो यतीरिन्द्रेण संगमामहै ॥ ४ ॥

कुवित् । शकत् । कुवित् । करत् । कुवित् । नः । वस्यसः । करत् ।
कुवित् । पतिऽद्विषः । यतीः । इन्द्रेण । सम्ऽगमामहै ॥ ४ ॥

वेङ्कट० बहु [9]अस्मान् शक्तान्[9] करोतु । बहु च अस्माक करोतु । [10]बहु चास्मान् करोतु[10] वस्यसः[11] । अत्यन्तम् त्वग्दोषात्[12] पतिभि [12]द्विष्टा पतिष्म[12] इतो गच्छन्त्यो वय कैश्चित् अनुक्षमाना साम्प्रति इन्द्रेण सङ्गमामहै ॥ ४ ॥

---

१. °च्छसि मूको २. अवश्यम् मूको ३-३. नास्ति वि'. ४. °तया मूको. ५-५ °मोऽधि मूको. ६. सेऽयमपाला मूको. ७-७. सह पी मूको. ८-८. °स्माताम् मूको. ९-९. नास्ति मूको. १०. नास्ति मूको. ११. त्वो° वि', त्वो° अ'. १२-१२. नास्ति अ'.

इमानि त्रीणि विष्टपा तानीन्द्र वि रोहय । शिरस्ततस्योर्वरामादिदं म उपोदरे ॥ ५ ॥

इमानि । त्रीणि । विष्टपा । तानि । इन्द्र । वि । रोहय ।
शिरः । ततस्य । उर्वराम् । आत् । इदम् । मे । उप । उदरे ॥ ५ ॥

वेङ्कट० इमानि त्रीणि स्थानानि तानि त्वम् इन्द्र । वि रोहय । शिरः ततस्य मम पितुः । तथा उर्वराम् पितुः क्षेत्रम् । ततः यत् इदम् [1]मे उप उदरे इति[1] गुह्यं निर्दिशति । तद्धि स्वग्दोषे[2] सति अप्रजातरोमकं भवतीति । शाट्यायनकम्—'तामन्वीत्—अपाले किं कामासीति । साऽब्रवीत्—'इमानि त्रीणि विष्टपा'' इति । खलतिर्हाऽस्यै[3] पितास । त हाऽखल्तिं चकार । उर्वरं । हाऽस्य न जज्ञे । सो ह जज्ञे[4]। उपस्थे हाऽस्यै रोमाणि नासुः । तान्यु ह जज्ञिरे[5] (तु. जैमि १,२२१) इति । अस्योत्तरा भूयसे निर्वचनाय—'असौ च या न' इति ॥ ५ ॥

असौ च या न उर्वरादिमां तन्वं मम ।
अथो ततस्य यच्छिरः सर्वा ता रोमशा कृधि ॥ ६ ॥

असौ । च । या । नः । उर्वरा । आत् । इमाम् । तन्वम् । मम ।
अथो इति । ततस्य । यत् । शिरः । सर्वा । ता । रोमशा । कृधि ॥ ६ ॥

वेङ्कट० निगदव्याख्याता ॥ ६ ॥

खे रथस्य खेऽनसः खे युगस्य शतक्रतो । अपालामिन्द्र त्रिष्पूत्व्यकृणोः सूर्यत्वचम् ॥७॥

खे । रथस्य । खे । अनसः । खे । युगस्य । शतक्रतो इति शतऽक्रतो ।
अपालाम् । इन्द्र । त्रिः । पूत्वी । अकृणोः । सूर्यऽत्वचम् ॥ ७ ॥

वेङ्कट० शाट्यायनकम्—"ताम्[6] खे रथस्याऽत्यबृहत् । सा शोभाऽभवत्[7] । तां खेऽनसोऽत्यबृहत् । सा संश्लिष्टिकाऽभवत्[8] । तद् एषाऽभ्यनूच्यते[9]—'खे रथस्य खेऽनस.'' इति । तस्यै ह यत्[10] कल्याणतमं रूपाणां तद्रूपमास' (तु जैमि १,२२१) इति । त्वग्दोषापनयनाय[11] अक्षादिछिद्रेष्वतिकर्षणमिति ॥ ७ ॥

[12]इति षष्ठाष्टके पञ्चाध्याये चतुर्दशो वर्गः[12] ॥

[९२]

[12]श्रुतकक्षः सुकक्षो वा आङ्गिरस ऋषिः । इन्द्रो देवता । गायत्री छन्दः, प्रथमानुष्टुप्[12] ।

पान्तमा वो अन्धस इन्द्रमभि प्र गायत । विश्वासाहं शतक्रतुं मंहिष्ठं चर्षणीनाम् ॥ १ ॥

१-१. मृशोवो इति अ', मृशोदर इति वि'. २. स्वं दो° मूको ३. खल° मूको. ४. न ज° मूको. ५. जज्ञुस मूको. ६. नास्ति मूको. ७. °भव मूको. ८. संशिश्लिका° मूको ९. °ह्यनू° मूको. १०. तत् मूको. ११ त्वग° मूको. १२-१२ नास्ति मूको.

पान्तम् । आ । वः । अन्धसः । इन्द्रम् । अभि । प्र । गायत ।
विश्वऽसहम् । शतऽक्रतुम् । मंहिष्ठम् । चर्षणीनाम् ॥ १ ॥

वेङ्कट० श्रुतकक्षः सुकक्षो[1] वा आङ्गिरसः । पिबन्तम् आभिमुख्येन सोमं यूयम् इन्द्रम् अभि प्र गायत सर्वसहम् बहुप्रज्ञम् दातृतमम् मनुष्याणाम् ॥ १ ॥

पुरुहूतं पुरुष्टुतं गाथान्यं सनश्रुतम् । इन्द्र इति ब्रवीतन ॥ २ ॥

पुरुऽहूतम् । पुरुऽस्तुतम् । गाथान्यम् । सनऽश्रुतम् । इन्द्रः । इति । ब्रवीतन ॥ २ ॥

वेङ्कट० बहुभिर्हूतम् बहुभिः स्तुतम् गातव्यम् सनातनश्रुतम् एनम् इन्द्रः इति यूयम् ब्रवीतन ॥ २ ॥

इन्द्र इन्नो महानां दाता वाजानां नृतुः । महाँ अभिज्ञ्वा यमत् ॥ ३ ॥

इन्द्रः । इत् । नः । महानाम् । दाता । वाजानाम् । नृतुः । महान् । अभिऽज्ञु । आ । यमत् ॥ ३ ॥

वेङ्कट० इन्द्रः एव अस्माकं महताम् दाता [2]अन्नानाम् नेता[2] । सः महान् अस्मान् [3]अभिजानुकम् आ यच्छतु हस्तयोः परिगृह्य नयतु आत्मसमीपम् इति ॥ ३ ॥

अपादु शिप्र्यन्धसः सुदक्षस्य प्रहोषिणः । इन्दोरिन्द्रो यवाशिरः ॥ ४ ॥

अपात् । ऊँ इति । शिप्री । अन्धसः । सुऽदक्षस्य । प्रऽहोषिणः । इन्दोः । इन्द्रः । यवऽआशिरः ॥ ४ ॥

वेङ्कट० अपिबत् शिप्री सोमम् सुदक्षस्य प्रकर्षेण जुह्वतः । तदेवाऽऽह—इन्दोः इन्द्रः यवाशिरः अपिबदिति ॥ ४ ॥

तम्वभि प्रार्चतेन्द्रं सोमस्य पीतये । तदिद्ध्यस्य वर्धनम् ॥ ५ ॥

तम् । ऊँ इति । अभि । प्र । अर्चत । इन्द्रम् । सोमस्य । पीतये । तत् । इत् । हि । अस्य । वर्धनम् ॥ ५ ॥

वेङ्कट० [4]प्र मंहत तम् एव इन्द्रम्[4] अभिषुतसोमस्य पानाय । तत् एव हि अस्य वर्धनम् सोमपानम् इति ॥ ५ ॥

[*]इति षष्ठाष्टके षष्ठाध्याये पञ्चदशो वर्गः[*] ॥

अस्य पीत्वा मदानां देवो देवस्यौजसा । विश्वाभि भुवना भुवत् ॥ ६ ॥

अस्य । पीत्वा । मदानाम् । देवः । देवस्य । ओजसा । विश्वा । अभि । भुवना । भुवत् ॥ ६ ॥

वेङ्कट० अस्य सोमस्य मदकराणि पीत्वा देवः इन्द्रः देवनशीलस्य सोमस्य बलेन विश्वानि भुवनानि अभि भवति[5] इति ॥ ६ ॥

---

1. सुरक्षो° वि[1]; सुदक्षो अ[1]. 2-2. ना ··· नेता वि[1]; ··· नेन अ[1]. 3-3. मदितमेवेन्द्र आयम् मूको. 4-4. नास्ति मूको 5. °वति मूको.

त्वमु वः सत्रासाहं विश्वासु गीर्ष्वायतम् । आ च्यावयस्यूतये ॥ ७ ॥
त्वम् । ऊँ इति । वः । सत्राऽसहम् । विश्वासु । गीःऽसु । आऽयतम् । आ । च्यवयसि । ऊतये ॥७॥
वेङ्कट० तम् एव युष्माकम् बहुसहनम् सर्वेषु स्तोत्रेषु विततम् आ गमय रक्षणाय ॥ ७ ॥

युध्मं सन्तमनर्वाणं सोमपामनपच्युतम् । नरमवार्यक्रतुम् ॥ ८ ॥
युध्मम् । सन्तम् । अनर्वाणम् । सोमऽपाम् । अनपऽच्युतम् । नरम् । अवार्यऽक्रतुम् ॥ ८ ॥
वेङ्कट० योद्धारम् सन्तम् अप्रत्यृतम् अन्यैः सोमस्य पातारम् अनपच्युतम्[1] सङ्ग्रामे नरम् अवार्यकर्माणम्[2] ॥ ८ ॥

शिक्षा ण इन्द्र राय आ पुरु विद्वाँ ऋचीषम । अवा नः पार्ये धने ॥ ९ ॥
शिक्ष । नः । इन्द्र । रायः । आ । पुरु । विद्वान् । ऋचीषम । अव । नः । पार्ये । धने ॥ ९ ॥
वेङ्कट० प्रयच्छ अस्मभ्यम् इन्द्र! धनानि[3] आहृत्य [4]बहु सर्वज्ञः त्वम् हे स्तुत्या क्षम! । रक्ष[4] अस्मान् पारभवे[5] शत्रुषु स्थिते धने आजिहीर्षिते[6] ॥ ९ ॥

अतश्चिदिन्द्र ण उपा याहि शतवाजया । इषा सहस्रवाजया ॥ १० ॥
अतः । चित् । इन्द्र । नः । उप । आ । याहि । शतऽवाजया । इषा । सहस्रऽवाजया ॥ १० ॥
वेङ्कट० अस्मात् अन्तरिक्षात् त्वम् इन्द्र! [7]शत्रुस्थानाद् वा अस्मान्[7] उप आ गच्छ अन्नेन बहुबलेन अपि च बहुभिः क्षमाणैः(?) युक्तेन इति ॥ १० ॥

[8]इति षष्ठाष्टके षष्ठाध्याये षोडशो वर्गः[8] ॥

अयाम धीवतो धियोऽर्वद्भिः शक्र गोदरे । जयेम पृत्सु वज्रिवः ॥ ११ ॥
अयाम । धीऽवतः । धियः । अर्वत्ऽभिः । शक्र । गोऽदरे । जयेम । पृत्ऽसु । वज्रिऽवः ॥ ११ ॥
वेङ्कट० युद्धार्थं गच्छामः वयं [9]कर्मवन्तः कर्माणि अश्वैः[9] शक्र! गवां दारयितः! । तत्र शत्रुम् जयेम वज्रिन्! सङ्ग्रामेषु ॥ ११ ॥

वयमु त्वा शतक्रतो गावो न यवसेष्वा । उक्थेषु रणयामसि ॥ १२ ॥
वयम् । ऊँ इति । त्वा । शतक्रतो इति शतऽक्रतो । गावः । न । यवसेषु । आ । उक्थेषु । रणयामसि ॥१२॥
वेङ्कट० वयम् उ त्वा शतक्रतो! पशून् इव यवसेषु[10] उक्थेषु रमयामः[11] ॥ १२ ॥

---

१. अनच्युः° मूको. २. वार्य° मूको. ३. °नात् मूको. ४-४. °हु ··· रक्ष मूको. ५. पारहवे मूको. ६. °र्षते मूको. ७-७. °स्थानौ अ° वि²; °स्थानावास्मा अ². ८-८. नास्ति मूको. ९-९. कर्म ··· श्वैः मूको. १०. समसे° वि². ११. °म मूको.

निश्वा हि मंर्त्यत्वनानुकामा शंतक्रतो । अगंन्म वज्रिन्नाशसंः ॥ १३ ॥

निश्वा । हि । मर्त्यऽत्वना । अनुऽकामा । शतक्रतो इति शतऽक्रतो । अगंन्म । वज्रिन् । आऽशसंः ॥१३॥

वेङ्कट० विश्वानि एव मर्त्यत्वानि कामानुगतानि शतक्रतो ! । मनुष्या[1] चेत् तानितानि इच्छन्ति इत्यर्थः । तथा सति प्राप्नुयाम वज्रिन् ! वयम् आशसनानि ॥ १३ ॥

त्वे सु पुत्र शवसोऽवृत्रन् कामंकातयः । न त्वामिन्द्राति रिच्यते ॥ १४ ॥

त्वे इति । सु । पुत्र । शवस । अवृत्रन् । कामंऽकातय । न । त्वाम् । इन्द्र । अति । रिच्यते ॥१४॥

वेङ्कट० त्वयि सुष्ठु वर्तन्ते हे शवस पुत्र ! कामकातय[2] जना कामपराः शब्दा येषां भवन्ति ते । न त्वाम् इन्द्र ! कश्चित् अति रिच्यते देवम्[3] ॥ १४ ॥

स नों वृषन्त्सनिंष्ठया सं घोरयां द्रवित्न्वा । धियाविड्ढि पुरंध्या ॥ १५ ॥

स । नः । वृषन् । सनिंष्ठया । सम् । घोरयां । द्रवित्न्वा । धिया । अविड्ढि । पुरंम्ऽध्या ॥ १५ ॥

वेङ्कट० स अस्मान् वर्षित[1] दातृतमया घोरया सपत्नानां द्रावयित्र्या[5] बहुना धारयित्र्या धिया[6] कर्मणा सम् अभिपालय[7] ॥ १५ ॥

"इति पञ्चाष्टके षष्ठाध्याये सप्तदशो वर्गः" ॥

यस्तें नूनं शंतक्रतविन्द्रं द्युम्नितंमो मदंः । तेनं नूनं मदें मदेः ॥ १६ ॥

य । ते । नूनम् । शतक्रतो इति शतऽक्रतो । इन्द्र । द्युम्निऽतंम ।
मदं । तेनं । नूनम् । मदें । मदेरिति मदे ॥ १६ ॥

वेङ्कट० य ते नूनम् शतमते[8] इन्द्र[1] यशस्वितम सोम, तेन इदानीम् 'मदे सद' सञ्जाते मादय[9] अस्मान् अपि ॥ १६ ॥

यस्ते चित्रश्रंवस्तमो य इंन्द्र वृत्रहन्तंमः । य ओंजोदातंमो मदंः ॥ १७ ॥

य । ते । चित्रश्रंवऽतम । य । इन्द्र । वृत्रहन्ऽतम । य । ओजःऽदातंम । मदं ॥ १७ ॥

वेङ्कट० य तव अतिशयेन चित्रयशा अतिशयेन शत्रूणां च हन्ता, य च अतिशयेन बलदायी मद, तेन मादयेति ॥ १७ ॥

त्रिभ्रा हि यस्ते अद्रिवस्त्वादंत्तः सत्य सोमपाः । विश्वासु दस्म कृष्टिषु ॥१८॥

---

१ °नुष्य वि° २. °तम मूको. ३ °र तेदेवम् मूको ४ धारयि° मूको ५ °त्या वि°, नास्ति अ°. ६. अरिण° वि°, भ°पा° अ° ७-७ नास्ति मूको. ८ शतमपि मूको ९-९ मदेरन मूको १० नास्ति मूको.

विद्म । हि । यः । ते । अद्रिऽवः । त्वाऽदत्तः । सत्य । सोमऽपाः । विश्वासु । दस्म । कृष्टिषु ॥१८॥

वेङ्कट० जानीमः हि यः ते रयि.[1] वज्रिन्!। एतदेवाऽऽह—त्वया दत्तः यः सत्य! सोमस्य पातः! विश्वेषु च यजमानेषु दस्म! इति ॥ १८ ॥

इन्द्राय मद्वने सुतं परि ष्टोभन्तु नो गिरः । अर्कमर्चन्तु कारवः ॥ १९ ॥

इन्द्राय । मद्वने । सुतम् । परि । स्तोभन्तु । नः । गिरः । अर्कम् । अर्चन्तु । कारवः ॥ १९ ॥

वेङ्कट० इन्द्राय मदनशीलाय अभिषुतं सोमम् अस्माकं वाच स्तुवन्तु[2]। अर्चनीयं सोमम्[3] अर्चयन्तु स्तोतारः चेति ॥ १९ ॥

यस्मिन् विश्वा अधि श्रियो रणन्ति सप्त संसदः । इन्द्रं सुते हवामहे ॥२०॥

यस्मिन् । विश्वाः । अधि । श्रियः । रणन्ति । सप्त । सम्ऽसदः । इन्द्रम् । सुते । हवामहे ॥२०॥

वेङ्कट० यस्मिन् अधि विश्वाः श्रियः भवन्ति, रमन्ते च सप्त संसदः होत्राः, तम् इन्द्रम् सुते हवामहे ॥ २० ॥

[4]इति षष्ठाष्टके षष्ठाध्याये अष्टादशो वर्गः[4] ॥

त्रिकद्रुकेषु चेतनं देवासो यज्ञमत्नत । तमिद्वर्धन्तु नो गिरः ॥ २१ ॥

त्रिऽकद्रुकेषु । चेतनम् । देवासः । यज्ञम् । अत्नत । तम् । इत् । वर्धन्तु । नः । गिरः ॥ २१ ॥

वेङ्कट० व्याख्याता (ऋ ८,१३,१८ द्र.) ॥ २१ ॥

आ त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः । न त्वामिन्द्राति रिच्यते ॥ २२ ॥

आ । त्वा । विशन्तु । इन्दवः । समुद्रम्ऽइव । सिन्धवः । न । त्वाम् । इन्द्र । अति । रिच्यते ॥

वेङ्कट० आ विशन्तु त्वाम् इन्दवः समुद्रम् इव नद्यः । न त्वाम् कश्चित् इन्द्र! बलेन अतिरिच्यते ॥ २२ ॥

विव्यक्थ महिना वृषन् भक्षं सोमस्य जागृवे । य इन्द्र जठरेषु ते ॥ २३ ॥

विव्यक्थ । महिना । वृषन् । भक्षम् । सोमस्य । जागृवे । यः । इन्द्र । जठरेषु । ते ॥ २३ ॥

वेङ्कट० व्याप्तवानसि महत्त्वेन वृषन्! सोमस्य भक्षम् जागरणशील!, यः सोमः तव उदरेषु प्रविशति[5] इन्द्र! ॥ २३ ॥

अरं त इन्द्र कुक्षये सोमो भवतु वृत्रहन् । अरं धामभ्य इन्दवः ॥ २४ ॥

---

२. रयि मूको. २. 'वतु मूको. ३. स्तोम' मूको. ४-४. नास्ति मूको. ५. 'शन्ति मूको.

अरम् । ते । इन्द्र । कुक्षये । सोमः । भवतु । वृत्रऽहन् । अरम् । धामऽभ्यः । इन्दवः ॥ २४ ॥

वेङ्कट० पर्याप्तम् ते इन्द्र! जठराय सोमः भवतु वृत्रहन्। । अरम् शरीरेभ्यः नानाविधेभ्यः सोमाः भवन्तु ॥ २४ ॥

अरमश्वाय गायति श्रुतकक्षो अरं गवे । अरमिन्द्रस्य धाम्ने ॥ २५ ॥

अरम् । अश्वाय । गायति । श्रुतऽकक्षः । अरम् । गवे । अरम् । इन्द्रस्य । धाम्ने ॥ २५ ॥

वेङ्कट० नवाश्वसिद्ध्यर्थम् अयम् श्रुतकक्षः स्तौति पर्याप्तम्, तथा गृहार्थं च। यद् इन्द्रः प्रयच्छति अश्वादिकम् इति ॥ २५ ॥

अरं हि ष्मा सुतेषु णः सोमेष्विन्द्र भूषसि । अरं ते शक्र दावने ॥ २६ ॥

अरम् । हि । स्म । सुतेषु । नः । सोमेषु । इन्द्र । भूषसि । अरम् । ते । शक्र । दावने ॥ २६ ॥

वेङ्कट० पर्याप्तम् यस्मात् सुतेषु सोमेषु त्वं भवसि, पर्याप्तम् प्रयच्छसि धनम्। तथा सति अरम् ते शक्र! दात्रे भवन्तु सोमाः ॥ २६ ॥

[1]इति षष्ठाष्टके षष्ठाध्याये एकोनविंशो वर्गः[1] ॥

पराकात्ताच्चिदद्रिवस्त्वां नक्षन्त नो गिरः । अरं गमाम ते वयम् ॥ २७ ॥

पराकात्तात् । चित् । अद्रिऽवः । त्वाम् । नक्षन्त । नः । गिरः । अरम् । गमाम । ते । वयम् ॥

वेङ्कट० दूरात् अपि वज्रिन्! त्वाम् व्याप्नुवन्तु अस्माकम् इतो निर्गताः स्तुतयः। पर्याप्तम् गमाम त्वत्तः वयम् धनम् ॥ २७ ॥

एवा ह्यसि वीरयुरेवा शूर उत स्थिरः । एवा ते राध्यं मनः ॥ २८ ॥

एव । हि । असि । वीरऽयुः । एव । शूरः । उत । स्थिरः । एव । ते । राध्यम् । मनः ॥ २८ ॥

वेङ्कट० एवं भवसि वीरकामः त्वं युद्धे, तथा एवम् एव च शूरः, अपि च स्थिरः। एवम् एव तव आराधनीयम् मनः स्तुत्यम्[2] ॥ २८ ॥

एवा रातिस्तुवीमघ विश्वेभिर्धायि धातृभिः । अधा चिदिन्द्र मे सचा ॥ २९ ॥

एव । रातिः । तुविऽमघ । विश्वेभिः । धायि । धातृऽभिः । अध । चित् । इन्द्र । मे । सचा ॥२९॥

वेङ्कट० एवम् रातिः बहुधन! विश्वैः धार्यते यजमानैः। अथ च त्वम् एवंविधो मम अपि सहायः इति ॥ २९ ॥

मो षु ब्रह्मेव तन्द्रयुर्भुवो वाजानां पते । मत्स्वा सुतस्य गोमतः ॥ ३० ॥

१-१. नास्ति मूको. २. स्तुति मूको.

मो इति । सु । ब्रह्माऽइव । तन्द्रयुः । भुवः । वाजानाम् । पते । मत्स्व । सुतस्य । गोऽमतः ॥३०॥

वेङ्कट० मा भवः[1] हे अश्वानाम् पते! त्वं ब्राह्मण इव तन्द्रयुः। ब्राह्मणो[2] हि निवृत्तकर्मा तन्द्रायुक्तः भवति। मत्स्व सुखेन गोमिश्रणेन ॥ ३० ॥

मा न इन्द्राभ्या३दिशः सूरो अक्तुष्वा यमन् । त्वा युजा वनेम तत् ॥ ३१ ॥

मा । नः । इन्द्र । अभि । आऽदिशः । सूरः । अक्तुषु । आ । यमन् । त्वा । युजा । वनेम । तत् ॥

वेङ्कट० मा अस्मान् इन्द्र! अभि आ गच्छन्तु रात्रिषु आदेष्टारः सूरः सरणशीलाः राक्षसाः। त्वया सहायेन तत् वयं रक्षः हन्यामेति ॥ ३१ ॥

त्वयेदिन्द्र युजा वयं प्रति ब्रुवीमहि स्पृधः । त्वमस्माकं तव स्मसि ॥ ३२ ॥

त्वया । इत् । इन्द्र । युजा । वयम् । प्रति । ब्रुवीमहि । स्पृधः । त्वम् । अस्माकम् । तव । स्मसि ॥३२॥

वेङ्कट० त्वया एव इन्द्र! सहायेन वयम्[3] प्रति ब्रुवीमहि[4] स्पर्धमानान्। त्वम् अस्माकम् भवसि, वयं च [5]तव स्म.[5] ॥ ३२ ॥

त्वामिद्धि त्वायवोऽनुनोनुवतश्चरान् । सखाय इन्द्र कारवः ॥ ३३ ॥

त्वाम् । इत् । हि । त्वाऽयवः । अनुऽनोनुवतः । चरान् । सखायः । इन्द्र । कारवः ॥ ३३ ॥

वेङ्कट० त्वाम् एव हि त्वत्कामाः अनुक्रमेण स्तुवन्तः चरन्तु सखायः इन्द्र! स्तोतारः, निवृत्तोपद्रवा इति ॥ ३३ ॥

[6]इति पष्ठाष्टके पष्ठाध्याये विंशो वर्गः[6] ॥

[९३]

[6]सुकक्ष आङ्गिरस ऋषिः। इन्द्रो देवता, चतुर्स्त्रिंश्या इन्द्र ऋभवश्च। गायत्री छन्दः.[6]।

उद् घेदभि श्रुतामघं वृषभं नर्यापसम् । अस्तारमेषि सूर्य ॥ १ ॥

उत् । घ । इत् । अभि । श्रुतऽमघम् । वृषभम् । नर्यऽअपसम् । अस्तारम् । एषि । सूर्य ॥ १ ॥

वेङ्कट० उत् एषि विख्यातधनम् वर्षितारम् नृहितकर्माणम्[7] अनुग्रहीतुम्[8] सूर्य[9], उदारोऽस्ता प्रदाता, तम्[9] इति ॥ १ ॥

नव यो नवतिं पुरो बिभेद बाह्वोजसा । अहिं च वृत्रहावधीत् ॥ २ ॥

नव । यः । नवतिम् । पुरः । बिभेद । बाहुऽओजसा । अहिम् । च । वृत्रऽहा । अवधीत् ॥२॥

---

१. भुवः अ°. २. ब्रह्म° मूको. ३. च यम् मूको. ४. मवी° मूको. ५. त्वमव स्म मूको. ६-६. नास्ति मूको. ७. निहि° मूको. ८. जनुकम्प हि मूको. ९. नास्ति मूको.

वेङ्कट० नव नवतिम् च यः पुरः बिभेद बाहुबलेन, अहिम् च अवधीत् स वृत्रहा इति ॥ २ ॥

स नु इन्द्रः शिवः सखाश्वावद्गोमद्यवमत् । उरुधारेव दोहते ॥ ३ ॥

स । नु । इन्द्र । शिव । सखा । अश्वऽवत् । गोऽमत् । यवऽमत् । उरुधाराऽइव । दोहते ॥ ३ ॥

वेङ्कट० स नः इन्द्रः कल्याणः सखा अश्वादियुक्तं धनम् उरुधारा गौः इव पयः दोहते[1] ॥ ३ ॥

यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य । सर्वं तदिन्द्र ते वशे ॥ ४ ॥

यत् । अद्य । कत् । च । वृत्रऽहन् । उत्ऽअगाः । अभि । सूर्य । सर्वम् । तत् । इन्द्र । ते । वशे ॥४॥

वेङ्कट० यत् किञ्च अद्य वृत्रहन्! सूर्य! अभि उदगाः सर्वम् तत् इन्द्र! तव वशे भवति[2] स्थावरं जङ्गमं च ॥ ४ ॥

यद्वा प्रवृद्ध सत्पते न मरा इति मन्यसे । उतो तत्सत्यमित्तव ॥ ५ ॥

यत् । वा । प्रऽवृद्ध । सत्ऽपते । न । मरै । इति । मन्यसे । उतो इति । तत् । सत्यम् । इत् । तव ॥

वेङ्कट० यत् वा त्वम् प्रवृद्ध! सतां पते[3] न अहम् मरै इति मन्यसे । अपि च तत् तव सत्यम् एव ॥ ५ ॥

इति षष्ठाष्टके षष्ठाध्याये एकविंशो वर्गः[4] ॥

ये सोमासः परावति ये अर्वावति सुन्विरे । सर्वांस्ताँ इन्द्र गच्छसि ॥ ६ ॥

ये । सोमासः । पराऽवति । ये । अर्वाऽवति । सुन्विरे । सर्वान् । तान् । इन्द्र । गच्छसि ॥ ६ ॥

वेङ्कट० ये सोमाः दूरे, ये वा अन्तिके अभिषुताः, सर्वान् तान् इन्द्र! गच्छसि[5] ॥ ६ ॥

तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे । स वृषा वृषभो भुवत् ॥ ७ ॥

तम् । इन्द्रम् । वाजयामसि । महे । वृत्राय । हन्तवे । स । वृषा । वृषभ । भुवत् ॥ ७ ॥

वेङ्कट० तम् इन्द्रम् बलिनं कुर्मः महत् वृत्रं हन्तुम् । स वृषा वृषभः भवतु ॥ ७ ॥

इन्द्रः स दामने कृत ओजिष्ठः स मदे हितः । द्युम्नी श्लोकी स सोम्यः ॥८॥

इन्द्र । स । दामने । कृत । ओजिष्ठ । स । मदे । हित । द्युम्नी । श्लोकी । स । सोम्य ॥८॥

वेङ्कट० इन्द्र स दानाय सृष्टः बलवत्तमः । स सोमे च निहितः । भगवान् स्तुतिमान् स सोमं च अर्हति ॥ ८ ॥

---

१. दाम्नें रि'; दो मे भ. २ °न्ति मूको. ३ °महित मूको. ४ °र्गो मूको ५. °न्ति मूको

गिरा वज्रो न संभृतः सबलो अनपच्युतः । ववक्ष ऋष्वो अस्तृतः ॥ ९ ॥

गिरा । वज्रः । न । सम्ऽभृतः । सऽबलः । अनपऽच्युतः । ववक्षे । ऋष्वः । अस्तृतः ॥ ९ ॥

वेङ्कट० स्तुत्या स्तोतृभिः[1] आयुधम् इव कर्मभिः सम्भृतः[2] उत्पादितः बलसहितः अनपच्युतः[3] वहति महान्[4] (द्र । नप ३,२) युद्धे अहिंसितः ॥ ९ ॥

दुर्गे चिन्नः सुगं कृधि गृणान इन्द्र गिर्वणः । त्वं च मघवन् वशः ॥ १० ॥

दुःऽगे । चित् । नः । सुऽगम् । कृधि । गृणानः । इन्द्र । गिर्वणः । त्वम् । च । मघऽवन् । वशः ॥ १० ॥

वेङ्कट० दुर्गे अपि अस्माकम्[5] सुगम् पन्थानम् कृधि स्तूयमान इन्द्र ! गिर्वणः ! । त्वम् चेत् मघवन् ![6] अस्मान् कामयेथाः ॥ १० ॥

"इति षष्ठाष्टके पञ्चमाध्याये द्वाविंशो वर्गः" ॥

यस्य ते नू चिदादिशं न मिनन्ति स्वराज्यम् । न देवो नाध्रिगुर्जनः ॥ ११ ॥

यस्य । ते । नु । चित् । आऽदिशम् । न । मिनन्ति । स्वऽराज्यम् । न । देवः । न । अध्रिऽगुः । जनः ॥ ११ ॥

वेङ्कट० यस्य तव अद्य पुरा च आज्ञाम् न हिंसन्ति, स्वराज्यम् च । न देवः न अपि अप्रतगमनः मनुष्यः । वीरः अप्रतगमनः भवति ॥ ११ ॥

अधा ते अप्रतिष्कुतं देवी शुष्मं सपर्यतः । उभे सुशिप्र रोदसी ॥ १२ ॥

अध । ते । अप्रतिऽस्कुतम् । देवी इति । शुष्मम् । सपर्यतः । उभे इति । सुऽशिप्र । रोदसी इति ॥ १२ ॥

वेङ्कट० अथ ते अप्रतिकूलं शत्रुभिः देव्यौ द्यावापृथिव्यौ उभे[8] पूजयतः[9] बलम् हे सुहनो ! ॥ १२ ॥

त्वमेतदधारयः कृष्णासु रोहिणीषु च । परुष्णीषु रुशत् पयः ॥ १३ ॥

त्वम् । एतत् । अधारयः । [10]कृष्णासु । रोहिणीषु । च । परुष्णीषु । रुशत् । पयः[10] ॥ १३ ॥

वेङ्कट० त्वम् एतत् पयः धारयसि[11] कृष्णासु च रोहिणीषु च । 'परुष्णी पर्ववती' इति यास्कः (९,२६)। पर्ववतीषु गोषु श्वेतम् इति ॥ १३ ॥

वि यदहेरध त्विषो विश्वे देवासो अक्रमुः । विदन्मृगस्य ताँ अमः ॥ १४ ॥

वि । यत् । अहेः । अध । त्विषः । विश्वे । देवासः । अक्रमुः । विदत् । मृगस्य । तान् । अमः ॥ १४ ॥

वेङ्कट० वि अक्रमुः यदा अहेः ॥ १४ ॥

---

१ स्तोतृम् मूको. २ सम्राम् मूको. ३ "सचु" मूको. ४ महत् मूको. ५ 'कम् इन्द्र. ६ नास्ति मूको. ७ ७ नास्ति मूको. ८ उभौ मूको. ९ "यत मूको. १० १० सु मूको. ११ "य मूको.

ऋ १, ६२, ९, ८, १२, २५ १०, ४९, १०

आदु मे निवरो भुवद्वृत्रहादिष्ट पौंस्यम् । अजातशत्रुरस्तृतः ॥ १५ ॥

आत् । ऊँ इति । मे । निऽवरः । भुवत् । वृत्रऽहा । अदिष्ट । पौंस्यम् । अजातऽशत्रुः । अस्तृतः ॥१५॥

वेङ्कट० .. ॥ १५ ॥

[1]इति षष्ठाष्टके षष्ठाध्याये त्रयोविंशो वर्गः[1] ॥

श्रुतं वो वृत्रहन्तमं प्र शर्धं चर्षणीनाम् । आ शुषे राधसे महे ॥ १६ ॥

श्रुतम् । वः । वृत्रहन्ऽतमम् । प्र । शर्धम् । चर्षणीनाम् । आ । शुषे । राधसे । महे ॥ १६ ॥

वेङ्कट० विश्रुतम् युष्माकम् वृत्रहन्तमम् प्र आ शुषे[2] प्रयच्छामि बलभूतम् चर्षणीनाम् महते धनाय ॥१६॥

अया धिया च गव्यया पुरुणामन् पुरुष्टुत । यत् सोमेसोम आभवः ॥ १७ ॥

अया । धिया । च । गव्यऽया । पुरुऽनामन् । पुरुऽस्तुत । यत् । सोमेऽसोमे । आ । अभवः ॥१७॥

वेङ्कट० अनया स्तुत्या गा इच्छन्त्या वयम् युक्ता[3] भवेम हे बहुनामन्! [4]उत बहुस्तुत[4]! यदि सर्वेषु सोमेषु अस्माकम् आ भवसि ॥ १७ ॥

बोधिन्मना इदस्तु नो वृत्रहा भूर्यासुतिः । शृणोतु शक्र आशिषम् ॥ १८ ॥

बोधित्ऽमना । इत् । अस्तु । नः । वृत्रऽहा । भूरिऽआसुतिः । शृणोतु । शक्रः । आऽशिषम् ॥१८॥

वेङ्कट० यस्य मन अभिमत बुध्यते स[5] बोधिन्मना । स एव अस्तु अस्माकम् वृत्रहा भूर्यासुतिः बहुप्रसव । शृणोतु च शक्र आशासनम् ॥ १८ ॥

कया त्वं न ऊत्याभि प्र मन्दसे वृषन् । कया स्तोतृभ्य आ भर ॥ १९ ॥

कया । त्वम् । नः । ऊत्या । अभि । प्र । मन्दसे । वृषन् । कया । स्तोतृऽभ्यः । आ । भर ॥१९॥

वेङ्कट० कया त्वम् केन अभिगमनेन अस्मान् अभि प्र मन्दसे वृषन्! । कया च स्तोतृभ्य अस्मभ्यम् आ बिभर्षि धनम् ॥ १९ ॥

कस्य वृषा सुते सचा नियुत्वान् वृषभो रणत् । वृत्रहा सोमपीतये ॥ २० ॥

कस्य । वृषा । सुते । सचा । नियुत्वान् । वृषभः । रणत् । वृत्रऽहा । सोमऽपीतये ॥ २० ॥

वेङ्कट० कस्य वृषा सुते सहायभूत नियुत्वान् वृषभः[6] रमते वृत्रहा सोमपानाय ॥ २० ॥

[1]इति षष्ठाष्टके षष्ठाध्याये चतुर्विंशो वर्गः[1] ॥

१-१. नास्ति मूको. २. < √ शुष् 'स्तुतौ' (वैतु. वें. सा √श्वस् 'व्याप्तौ' इति, ग्रस्त. मश्र. √घस् इति)। शिष्टं यैन १,३२४११ द्र. ३. भयु° मूको ४-४ उरस्तु° वि°, °° स्तुत अ°. ५ ना वि°. ६ नास्ति वि°.

अभी षु णस्त्वं रयिं मन्दसानः सहस्रिणम् । प्रयन्ता बोधि दाशुषे ॥ २१ ॥
अभि । सु । नः । त्वम् । रयिम् । मन्दसानः । सहस्रिणम् । प्रऽयन्ता । बोधि । दाशुषे ॥२१॥

वेङ्कट० अभि आहर सुष्टु अस्मभ्यम् त्वम् रयिम् मोदमानः सहस्रसङ्ख्याकम् । प्रदाता भवामि इति बुध्यस्व यजमानाय इति ॥ २१ ॥

पत्नीवन्तः सुता इम उशन्तो यन्ति वीतये । अपां जग्मिर्निचुम्पुणः ॥ २२ ॥
पत्नीऽवन्तः । सुताः । इमे । उशन्तः । यन्ति । वीतये । अपाम् । जग्मिः । निऽचुम्पुणः ॥२२॥

वेङ्कट० पत्नीवन्तः सुताः इमे अद्भिः सोमाः कामयमानाः यन्ति पानाय अपाम् गन्ता भवति निचुम्पुणः सोमः इति यास्कः (तु. या ५,१८) ॥ २२ ॥

इष्टा होत्रा असृक्षतेन्द्रं वृधासो अध्वरे । अच्छावभृथमोजसा ॥ २३ ॥
इष्टाः । होत्राः । असृक्षत । इन्द्रम् । वृधासः । अध्वरे । अच्छ । अवऽभृथम् । ओजसा ॥ २३ ॥

वेङ्कट० यजन्तः सह होत्राः विसृजन्ति इन्द्रम् वर्धयन्तः यज्ञे बलेन अवभृथम् प्रति । यावदवभृथम् इन्द्रमेव होत्रका यजन्ति ॥ २३ ॥

इह त्या सधमाद्या हरी हिरण्यकेश्या । वोळ्हामभि प्रयो हितम् ॥ २४ ॥
इह । त्या । सधऽमाद्या । हरी इति । हिरण्यऽकेश्या । वोळ्हाम् । अभि । प्रयः । हितम् ॥२४॥

वेङ्कट० गता (ऋ ८,३२,२९ द्र.) ॥ २४ ॥

तुभ्यं सोमाः सुता इमे स्तीर्णं बर्हिर्विभावसो । स्तोतृभ्य इन्द्रमा वह ॥ २५ ॥
तुभ्यम् । सोमाः । सुताः । इमे । स्तीर्णम् । बर्हिः । विभावसो इति विभाऽवसो ।
स्तोतृऽभ्यः । इन्द्रम् । आ । वह ॥ २५ ॥

वेङ्कट० निगदसिद्धेति ॥ २५ ॥

[1]इति षष्ठाष्टके षष्ठाध्याये पञ्चविंशो वर्गः[1] ॥

आ ते दक्षं वि रोचना दधद्रत्ना वि दाशुषे । स्तोतृभ्य इन्द्रमर्चत ॥ २६ ॥
आ । ते । दक्षम् । वि । रोचना । दधत् । रत्ना । वि । दाशुषे । स्तोतृऽभ्यः । इन्द्रम् । अर्चत ॥२६॥

वेङ्कट० आभिमुख्येन वि दधातु बलम् तुभ्यं दीप्तम्, तथा रत्नानि च यजमानाय । तथा च स्तोतृभ्यः च तम् इन्द्रम् यूयम् अर्चत इति यजमानस्य स्तोतृणां चानुशासनमिति ॥ २६ ॥

१-१. नास्ति मूको.

आ ते दधामीन्द्रियमुक्था विश्वा शतक्रतो । स्तोतृभ्य इन्द्र मृळय ॥ २७ ॥

आ । ते । दधामि । इन्द्रियम् । उक्था । विश्वा । शतक्रतो इति शतऽक्रतो । स्तोतृऽभ्यः । इन्द्र । मृळय ॥

वेङ्कट० आ दधामि ते इन्द्रियम्[1] बलकरं हविः उक्थानि च विश्वानि शतक्रतो ।। स्तोतृणाम् इन्द्र ! सुखम् उत्पादय ॥ २७ ॥

भद्रम्भद्रं न आ भरेषमूर्जं शतक्रतो । यदिन्द्र मृळयासि नः ॥ २८ ॥

भद्रम्ऽभद्रम् । नः । आ । भर । इषम् । ऊर्जम् । शतक्रतो इति शतऽक्रतो । यत् । इन्द्र । मृळयासि । नः ॥

वेङ्कट० भद्रम् धनम् अस्मभ्यम् आ हर इषम् च ऊर्जम् च शतक्रतो !, यत् इन्द्र ! अस्मान् सुखयसि ॥ २८ ॥

स नो विश्वान्या भर सुवितानि शतक्रतो । यदिन्द्र मृळयासि नः ॥ २९ ॥

सः । नः । विश्वानि । आ । भर । सुवितानि । शतक्रतो इति शतऽक्रतो । यत् । इन्द्र । मृळयासि । नः ॥२९॥

वेङ्कट० स अस्मभ्यम् विश्वानि आ भर सुवितानि अभ्युदयान्[2] ॥ २९ ॥

त्वामिद्वृत्रहन्तम सुतावन्तो हवामहे । यदिन्द्र मृळयासि नः ॥ ३० ॥

त्वाम् । इत् । वृत्रहन्ऽतम । सुतऽवन्तः । हवामहे । यत् । इन्द्र । मृळयासि । नः ॥ ३० ॥

वेङ्कट० त्वाम् एव हे अतिशयेन वृत्राणां हन्तः[3] अभिषुतसोमाः हवामहे[4], यत्[5] इन्द्र ! अस्मान् सुखयसि ॥ ३० ॥

[6]इति षष्ठाष्टके षष्ठाध्याये षड्विंशो वर्गः[6] ॥

उप नो हरिभिः सुतं याहि मदानां पते । उप नो हरिभिः सुतम् ॥ ३१ ॥

उप । नः । हरिऽभिः । सुतम् । याहि । मदानाम् । पते । उप । नः । हरिऽभिः । सुतम् ॥ ३१ ॥

वेङ्कट० 'उप आ याहि' अस्माकं सोमम् हे सोमानाम् पते ! अश्वैः । उप न इति पूरणम् ॥३१॥

द्विता यो वृत्रहन्तमो विद इन्द्रः शतक्रतुः । उप नो हरिभिः सुतम् ॥ ३२ ॥

द्विता । यः । वृत्रहन्ऽतमः । विदे । इन्द्रः । शतऽक्रतुः । उप । नः । हरिऽभिः । सुतम् ॥ ३२ ॥

वेङ्कट० यः वृत्रहन्तमः द्विता[7] ज्ञायते इन्द्रः शतकर्मा उग्रः च । सोऽस्माकं सुखतमैः अश्वैः उप आयातु ॥३२॥

त्वं हि वृत्रहन्नेषां पाता सोमानामसि । उप नो हरिभिः सुतम् ॥ ३३ ॥

त्वम् । हि । वृत्रऽहन् । एषाम् । पाता । सोमानाम् । असि । उप । नः । हरिऽभिः । सुतम् ॥ ३३ ॥

---

१. नास्ति मूको. २. °यामि मूको. ३. अवेम इ मूको. ४. यदि को. ५-५. नास्ति मूको. ६-६. वयादि को. ७. अपि मूको.

वेङ्कट० यस्मात् त्वम् इमान् पिबसि सोमान्, अतः[1] उप आयाहि इति ॥ ३३ ॥

इन्द्रं॑ इ॒षे द॑दातु न ऋभु॒क्षण॑मृ॒भुं र॒यिम् । वा॒जी द॑दातु वा॒जिन॑म् ॥ ३४ ॥

इन्द्रः॑ । इ॒षे । द॒दा॒तु॒ । नः॒ । ऋ॒भु॒क्षण॑म् । ऋ॒भुम् । र॒यिम् । वा॒जी । द॒दा॒तु॒ । वा॒जिन॑म् ॥ ३४ ॥

वेङ्कट० इन्द्रः अन्नार्थम् अस्मभ्यं महान्तम् ऋभुम् देवं प्रयच्छतु दातारम्[2]। तथा बलवान् इन्द्रः बलवन्तम् अश्ववन्तं वा कनीयांसम् च प्रयच्छतु[3] इति ॥ ३४ ॥

[4]इति षष्ठाष्टके षष्ठाध्याये सप्तविंशो वर्गः[5] ॥

[९४]

[6]बिन्दुः पूतदक्षो वा आङ्गिरस ऋषिः । मरुतो देवता । गायत्री छन्दः[7] ।

गौर्ध॑यति म॒रुतां॑ श्रव॒स्युर्मा॒ता म॒घोना॑म् । यु॒क्ता वह्नी॒ रथा॑नाम् ॥ १ ॥

गौः । ध॒य॒ति॒ । म॒रुता॑म् । श्र॒व॒स्युः । मा॒ता । म॒घोना॑म् । यु॒क्ता । वह्निः॑ । रथा॑नाम् ॥ १ ॥

वेङ्कट० बिन्दुः आङ्गिरसः। धनवताम् मरुताम् माता गौः सोमं पिबति अन्नकामा। युक्ता वोढ्री[1] रथानाम् भवति[1] सेयम् इति। मारुतं सूक्तम् ॥ १ ॥

यस्या॑ दे॒वा उ॒पस्थे॑ व्र॒ता विश्वे॑ धा॒रय॑न्ते । सूर्या॒मासा॑ दृ॒शे कम् ॥ २ ॥

यस्याः॑ । दे॒वाः । उ॒प॒ऽस्थे॑ । व्र॒ता । विश्वे॑ । धा॒रय॑न्ते । सूर्या॒मासा॑ । दृ॒शे । कम् ॥ २ ॥

वेङ्कट० यस्याः गोः उपस्थे विश्वे देवाः वर्तमानाः कर्माणि धारयन्ते। यस्या वा उपस्थे सूर्याचन्द्रमसौ वर्तमानौ दर्शनाय भवतः ॥ २ ॥

तत् सु नो॒ विश्वे॑ अ॒र्य आ सदा॑ गृणन्ति का॒रवः॑ । म॒रुतः॒ सोम॑पीतये ॥ ३ ॥

तत् । सु । नः॒ । विश्वे॑ । अ॒र्यः । आ । सदा॑ । गृ॒ण॒न्ति॒ । का॒रवः॑ । म॒रुतः॑ । सोम॑ऽपीतये ॥ ३ ॥

वेङ्कट० तत् सुष्ठु अस्माकम् सदा विश्वे अपि गन्तारः[7] आ गृणन्ति स्तोतारः। मरुतः सोमपानाय आह्वातव्या इति ॥ ३ ॥

अस्ति॒ सोमो॑ अ॒यं सु॒तः पिब॑न्त्यस्य म॒रुतः॑ । उ॒त स्व॒राजो॑ अ॒श्विना॑ ॥ ४ ॥

अस्ति॑ । सोमः॑ । अ॒यम् । सु॒तः । पिब॑न्ति । अ॒स्य॒ । म॒रुतः॑ । उ॒त । स्व॒ऽराजः॑ । अ॒श्विना॑ ॥ ४ ॥

वेङ्कट० विद्यते अयम् सोमः अभिषुतः। पिबन्ति च एनं माध्यन्दिने सवने मरुतः स्वयं दीप्ताः। अश्विनौ च पिबतः[8] ॥ ४ ॥

---

१. धनवन्तः मूको. २. °रः मूको. ३. °न्तु अ°. ४-५. नास्ति मूको. ५. पोभि मूको.
६. °न्ति मूको. ७. °रम् मूको. ८. °ति मूको.

पिबन्ति मित्रो अर्यमा तना पूतस्य वरुणः । त्रिषधस्थस्य जावतः ॥ ५ ॥

पिबन्ति । मित्र । अर्यमा । तना । पूतस्य । वरुण । त्रिऽसधस्थस्य । जाऽवत ॥ ५ ॥

वेङ्कट० पिबन्ति मित्रावरुणौ अर्यमा च अमु पवित्रेण पूतम् त्रिस्थानम्[1]। द्रोणकलश आधवनीय पूतभृदिति तानि स्थानानि । जावत जववत । वेगवन्तम् इति ॥ ५ ॥

उतो न्वस्य जोषमाँ इन्द्रः सुतस्य गोमतः । प्रातर्होतेव मत्सति ॥ ६ ॥

उतो इति । नु । अस्य । जोषम् । आ । इन्द्रः । सुतस्य । गोऽमत । प्रात । होताऽइव । मत्सति ॥ ६ ॥

वेङ्कट० अपि च अस्य सेवाम् इन्द्र अभिषुतस्य गोभि मिश्रितस्य प्रात सवने अभिष्टौति, यथा होता देवान् इति ॥ ६ ॥

[2]इति षष्ठाष्टके षष्ठाध्याये अष्टाविंशो वर्गः[2] ॥

कदत्विषन्त सूरयस्तिर आप इव स्रिधः । अर्षन्ति पूतदक्षसः ॥ ७ ॥

कत् । अत्विषन्त । सूरय । तिर । आपःऽइव । स्रिध । अर्षन्ति । पूतऽदक्षस ॥ ७ ॥

वेङ्कट० कदा दीप्यन्ते अन्तरिक्षे भाजा मरुत तिरश्चीनम् उदकानि इव । शोषका शत्रूणां मरुत च इमे कदा गच्छन्ति शुद्धबला ॥ ७ ॥

कद्वो अद्य महानां देवानामवो वृणे । त्मना च दस्मवर्चसाम् ॥ ८ ॥

कत् । व । अद्य । महानाम् । देवानाम् । अव । वृणे । त्मना । च । दस्मऽवर्चसाम् ॥ ८ ॥

वेङ्कट० कदा वः अद्य महताम् देवानाम् रक्षणम् अहम् वृणे आत्मना च अलङ्कारैरपि विना दर्शनीयवर्चसाम्[3] ॥ ८ ॥

आ ये विश्वा पार्थिवानि पप्रथन् रोचना दिवः । मरुतः सोमपीतये ॥ ९ ॥

आ । ये । विश्वा । पार्थिवानि । पप्रथन् । रोचना । दिव । मरुत । सोमऽपीतये ॥ ९ ॥

वेङ्कट० आ पप्रथन् ये सर्वाणि पार्थिवानि दिव च रोचनानि ज्योतींषि मरुत । सोमपानाय आह्वयामि तान्[4] इति ॥ ९ ॥

त्यान्नु पूतदक्षसो दिवो वो मरुतो हुवे । अस्य सोमस्य पीतये ॥ १० ॥

त्यान् । नु । पूतऽदक्षस । दिव । व । मरुत । हुवे । अस्य । सोमस्य । पीतये ॥ १० ॥

वेङ्कट० तान् क्षिप्र शुद्धबलान् द्युलोकात् युष्मान् आह्वयामि मरुत ! ॥ १० ॥

---

1 °न मूको. २-२. नास्ति मूको. ३. °वचसाम् मूको. ४. तानि मूको.

त्यान् नु ये वि रोदसी तस्तभुर्मरुतो हुवे । अस्य सोमस्य पीतये ॥ ११ ॥

त्यान् । नु । ये । वि । रोदसी इति । तस्तभुः । मरुतः । हुवे । अस्य । सोमस्य । पीतये ॥ ११ ॥

वेङ्कट० ये द्यावापृथिव्यौ 'वि तस्तभुः', तान्' एतान् मरुतः हुवे ॥ ११ ॥

त्यं नु मारुतं गणं गिरिष्ठां वृषणं हुवे । अस्य सोमस्य पीतये ॥ १२ ॥

त्यम् । नु । मारुतम् । गणम् । गिरिऽस्थाम् । वृषणम् । हुवे । अस्य । सोमस्य । पीतये ॥ १२ ॥

वेङ्कट० तम् इमम् मारुतम् गणम् मेघेषु स्थितम् वर्षितारम् आह्वयामि इति ॥ १२ ॥

'इति पष्ठाष्टके पष्ठाध्याये एकोनत्रिंशो वर्गः' ॥

[९५]

'तिरश्चीराङ्गिरस ऋषिः । इन्द्रो देवता । अनुष्टुप् छन्दः' ।

आ त्वा गिरो रथीरिवास्थुः सुतेषु गिर्वणः । अभि त्वा समनूषतेन्द्र वत्सं न मातरः ॥ १ ॥

आ । त्वा । गिरः । रथीःऽइव । अस्थुः । सुतेषु । गिर्वणः ।
अभि । त्वा । सम् । अनूषत । इन्द्र । वत्सम् । न । मातरः ॥ १ ॥

वेङ्कट० तिरश्चीः आङ्गिरसः । आ तिष्ठन्ति त्वां स्तुतयः, क्षिप्रं रथेन गच्छन् इव प्राप्यं देशम्, सुतेषु सोमेषु गीर्भिर्वननीय! । त्वाम् अभि सम् शब्दयन्ति गिरः इन्द्र! वत्सम् इव मातरः ॥ १ ॥

आ त्वा शुक्रा अचुच्यवुः सुतास इन्द्र गिर्वणः ।
पिबा त्व१स्यान्धस इन्द्र विश्वासु ते हितम् ॥ २ ॥

आ । त्वा । शुक्राः । अचुच्यवुः । सुतासः । इन्द्र । गिर्वणः ।
पिब । तु । अस्य । अन्धसः । इन्द्र । विश्वासु । ते । हितम् ॥ २ ॥

वेङ्कट० आ गमयन्तु त्वाम् इन्द्र! गिर्वणः! सुताः ज्वलन्तः । सोमम् पिब' क्षिप्रम् इदमन्नम् । इन्द्र! विश्वासु दिक्षु त्वदर्थमेव हविः निहितं भवति ॥ २ ॥

पिबा सोमं मदाय कमिन्द्र श्येनाभृतं सुतम् ।
त्वं हि शश्वतीनां पती राजा विशामसि ॥ ३ ॥

पिब । सोमम् । मदाय । कम् । इन्द्र । श्येनऽआभृतम् । सुतम् ।
त्वम् । हि । शश्वतीनाम् । पतिः । राजा । विशाम् । असि ॥ ३ ॥

१-१. 'स्त…तान् वि'; …तान् म'. २-२. नास्ति मूको. ३. 'वन्तः वि'; 'वत भ'.

वेङ्कट० पिब सोमम् मदाय। कम् इति पूरणम्। इन्द्र! दिवः गायत्र्याहृतम् अभिषुतम्। त्वम् हि बह्वीनाम् विशाम्[1] स्वामी राजा च भवसि ॥ ३ ॥

श्रुधी हवं तिरश्च्या इन्द्र यस्त्वा सपर्यति ।
सुवीर्यस्य गोमतो रायस्पूर्धि महाँ असि ॥ ४ ॥

श्रुधि । हवम् । तिरश्च्याः । इन्द्र । यः । त्वा । सपर्यति ।
सुऽवीर्यस्य । गोऽमतः । रायः । पूर्धि । महान् । असि ॥ ४ ॥

वेङ्कट० श्रुधि हवम् तिरश्च्याः मम इन्द्र!, यः त्वां परिचरति। श्रुत्वा च शोभनवीर्येण गोमता धनेन पूरय। महान् त्वम् असि इति ॥ ४ ॥

इन्द्र यस्ते नवीयसीं गिरं मन्द्रामजीजनत् ।
चिकित्विन्मनसं धियं प्रत्नामृतस्य पिप्युषीम् ॥ ५ ॥

इन्द्र । यः । ते । नवीयसीम् । गिरम् । मन्द्राम् । अजीजनत् ।
चिकित्वित्ऽमनसम् । धियम् । प्रत्नाम् । ऋतस्य । पिप्युषीम् ॥ ५ ॥

वेङ्कट० इन्द्र! यः ते नवतराम् स्तुतिम् मदकरीम् अजीजनत्, अस्मै त्वं कुरु चिकित्विन्मनसम् धियम् त्वदीयं रक्षणाख्यं कर्म प्रत्नाम् सत्येन पूर्णाम्। अनया क्रियमाणं[2] यद् रक्षणं सर्वेषां हृदयं प्रज्ञापयति तत् चिकित्वन्मनस्कम् इति ॥ ५ ॥

[3]इति पञ्चाष्टके षष्ठाध्याये त्रिंशो वर्गः[3] ॥

तमु ष्टवाम यं गिर इन्द्रमुक्थानि वावृधुः ।
पुरूण्यस्य पौंस्या सिषासन्तो वनामहे ॥ ६ ॥

तम् । ऊँ इति । स्तवाम । यम् । गिरः । इन्द्रम् । उक्थानि । ववृधुः ।
पुरूणि । अस्य । पौंस्या । सिसासन्तः । वनामहे ॥ ६ ॥

वेङ्कट० तम् एव स्तुमः, यम् स्तुतयः शस्त्राणि च इन्द्रम् वावृधुः। बहूनि अस्य इन्द्रस्य वीर्याणि सम्भक्तुमिच्छन्तः वयं भजामहे ॥ ६ ॥

एतो न्विन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना ।
शुद्धैरुक्थैर्वावृध्वांसं शुद्ध आशीर्वान् ममत्तु ॥ ७ ॥

एतो इति । नु । इन्द्रम् । स्तवाम । शुद्धम् । शुद्धेन । साम्ना ।
शुद्धैः । उक्थैः । ववृध्वांसम् । शुद्धः । आशीःऽवान् । ममत्तु ॥ ७ ॥

---

१. विशाद: मूको. २. क्रीयमाणं मूको. ३-३. नास्ति मूको

वेङ्कट० अत्र शाट्यायनकम्[1]—"इन्द्रो वा असुरान् हत्वाऽपूत इवामेध्योऽमन्यत[2]। सोऽकामयत शुद्धमेव मा सन्तं शुद्धेन साम्ना स्तुयुरिति। स ऋषीनब्रवीत्—स्तुत मेति[3]। त एतद्[4] ऋषयः सामापश्यन् तेनास्तुवन्—'एतो[5] न्विन्द्रम्[6]' इति। ततो वा इन्द्रः शुद्धः पूतो मेध्योऽभवत्[7]' (तु. जैमि ३,१२८) इति। आगच्छत क्षिप्रम् इन्द्रम् स्तवाम शुद्धम् शुद्धेन साम्ना शुद्धैः च शस्त्रैः वर्धमानम्। तमिमम् शुद्धः सोमः मिश्रितः मादयतु[1] ॥ ७ ॥

इन्द्र॑ शु॒द्धो न॒ आ ग॑हि शु॒द्धः शु॒द्धाभि॑रू॒तिभि॑ः ।
शु॒द्धो र॒यिं नि धा॑रय शु॒द्धो म॑मद्धि सो॒म्यः ॥ ८ ॥

इन्द्र॑ । शु॒द्धः । न॒ः । आ । ग॒हि॒ । शु॒द्धः । शु॒द्धाभि॑ः । ऊ॒तिऽभि॑ः ।
शु॒द्धः । र॒यिम् । नि । धा॒र॒य॒ । शु॒द्धः । म॒म॒द्धि॒ । सो॒म्यः ॥ ८ ॥

वेङ्कट० इन्द्र! शुद्धः अस्मान् आ गच्छ। शुद्धः त्वं शुद्धैः मरुद्भिः। शुद्धः त्वं धनं च नि धारय। शुद्धः त्वं माद्य सोमार्हः ॥ ८ ॥

इन्द्र॑ शु॒द्धो हि नो॑ र॒यिं शु॒द्धो रत्ना॑नि दा॒शुषे॑ ।
शु॒द्धो वृ॒त्राणि॑ जिघ्नसे शु॒द्धो वाजं॑ सिषाससि ॥ ९ ॥

इन्द्र॑ । शु॒द्धः । हि । न॒ः । र॒यिम् । शु॒द्धः । रत्ना॑नि । दा॒शुषे॑ ।
शु॒द्धः । वृ॒त्राणि॑ । जि॒घ्न॒से॒ । शु॒द्धः । वाज॑म् । सि॒सा॒स॒सि॒ ॥ ९ ॥

वेङ्कट० इन्द्र! शुद्धः त्वम् अस्मभ्यम् रयिम् प्रयच्छ। शुद्धः त्वम् रत्नानि च यजमानाय प्रयच्छ। शुद्धः त्वं शत्रून् हंसि। शुद्धः त्वम् अन्नं प्रदातुमिच्छसि ॥ ९ ॥

"इति पष्ठाष्टके षष्ठाध्याये एकत्रिंशो वर्गः[8] ॥

[९६]

"तिरश्चीराङ्गिरसो द्युतानो वा मारुतिरृषिः †। इन्द्रो देवता, चतुर्दश्या इन्द्रामरुतः, पञ्चदश्या इन्द्राबृहस्पती। त्रिष्टुप् छन्दः, चतुर्थी विराट्, एकविंशी पुरस्ताज्ज्योतिः"।

अ॒स्मा उ॒षास॒ आति॑रन्त॒ याम॒मिन्द्रा॑य॒ नक्त॒मूर्म्या॑ः सु॒वाच॑ः ।
अ॒स्मा आपो॑ मा॒तर॑ः स॒प्त त॑स्थु॒र्नृभ्य॒स्तरा॑य॒ सिन्ध॑वः सुपा॒राः ॥ १ ॥

अ॒स्मै । उ॒षस॑ः । आ । अ॒ति॒र॒न्त॒ । याम॑म् । इन्द्रा॑य । नक्त॑म् । ऊर्म्या॑ः । सु॒ऽवाच॑ः ।
अ॒स्मै । आप॑ः । मा॒तर॑ः । स॒प्त । त॒स्थु॒ः । नृऽभ्य॑ः । तरा॑य । सिन्ध॑वः । सु॒ऽपा॒राः ॥ १ ॥

---

१. मामेव[?] अ[?]. २. स्त मूको. ३. स्तुत मूको. ४. एत मूको. ५. एतो मूको. ६. °तु इति अ[?]. ७-७. नास्ति मूको. † तु. ऋअ. ५. च; बैतु. सा. °त ऋ° इति।

वेङ्कट० द्युतानो मारुतिः, पूर्वो वा। अस्मै भीताः[1] उषसः गमनं वर्धयन्ति। यथा पूर्वमुच्छन्ति। नक्तम्, ऊर्म्या.[2] इति रात्रिनामनी[3] (तु. निघ १,७)। 'तत्रैकं नैघण्टुकम्'[4]। रात्रयः च शोभनवाचः[5]।[6] तथा अस्मै व्याप्ता[7] मातरः सप्त नद्यः मनुष्याणां तरणार्थं तिष्ठन्ति सुपाराः[8] ॥ १ ॥

अतिविद्धा विथुरेणा चिदस्त्रा त्रिः सप्त सानु संहिता गिरीणाम् ।
न तद् देवो न मर्त्यस्तुतुर्याद्यानि प्रवृद्धो वृषभश्चकार ॥ २ ॥

'अतिऽविद्धा । विथुरेण । चित् । अस्त्रा' । त्रिः । सप्त । सानु । सम्ऽहिता । गिरीणाम् ।
न । तत् । देवः । न । मर्त्यः । तुतुर्यात् । यानि । प्रऽवृद्धः । वृषभः । चकार ॥ २ ॥

वेङ्कट० अतिविद्धानि असहायेन अपि इन्द्रेण शरस्य क्षेप्त्रा[9] त्रिः[10] सप्त एकविंशतिसङ्ख्यानि[11] गिरीणाम् सानूनि[12] निरन्तराणि। 'स दर्भपुञ्जीलम् उद्वृह्य सप्त गिरीन् भित्त्वा तमहन्' (तै ६,२,४,३) इति च ब्राह्मणम्। तत् कर्म देवः वा मर्त्यः[13] वा न तुतुर्यात्[14] तरेत् न तथा कर्तुं शक्नोति, यानि प्रवृद्धः वृषभः[15] चकार इति ॥ २ ॥

इन्द्रस्य वज्र आयसो निमिश्ल इन्द्रस्य बाह्वोर्भूयिष्ठमोजः ।
शीर्षन्निन्द्रस्य क्रतवो निरेक आसन्नेषन्त श्रुत्या उपाके ॥ ३ ॥

इन्द्रस्य । वज्रः । आयसः । निऽमिश्लः । इन्द्रस्य । बाह्वोः । भूयिष्ठम् । ओजः ।
शीर्षन् । इन्द्रस्य । क्रतवः । निरेके । आसन् । आ । ईषन्त । श्रुत्यै । उपाके ॥ ३ ॥

वेङ्कट० इन्द्रवज्र अयसा निर्मितः इन्द्रेण अत्यन्तं सम्बद्धः[16]। इन्द्रस्य बाह्वोः भूयिष्ठम् बलम्। युद्धार्थं यदा इन्द्रः निर्गच्छति, तदानीम् इन्द्रस्य शीर्षन् कर्माणि भवन्ति दर्शनप्रेरणादीनि तथा आस्ये। निर्गच्छतः[17] अनुशासत इन्द्रस्य श्रवणार्थम् अन्तिके सर्वे आ गच्छन्ति ॥ ३ ॥

मन्ये त्वा यज्ञियं यज्ञियानां मन्ये त्वा च्यवनमच्युतानाम् ।
मन्ये त्वा सत्वनामिन्द्र केतुं मन्ये त्वा वृषभं चर्षणीनाम् ॥ ४ ॥

मन्ये । त्वा । यज्ञियम् । यज्ञियानाम् । मन्ये । त्वा । च्यवनम् । अच्युतानाम् ।
मन्ये । त्वा । सत्वनाम् । इन्द्र । केतुम् । मन्ये । त्वा । वृषभम् । चर्षणीनाम् ॥ ४ ॥

वेङ्कट० जानामि त्वाम् यज्ञियानाम् देवानाम् यज्ञियम्। मन्ये त्वा च्यावयितारम् अच्युतानाम् अपि वीराणाम्। मन्ये त्वा भजमानानां भटानाम्[18] इन्द्र। प्रज्ञापकम्। मन्ये त्वा वर्षितारं मनुष्याणाम् ॥ ४ ॥

---

१. दिताः मूको. २. नास्ति मूको. ३. नतिरात्रि° मूको. ४-४. कवैकमपस्कम् मूको. ५. उषसोऽपि द्र. (तु. ऋ ३,७,१०). ६. तु. ऋ ४,३०,३. ७. सुपाव वि°. ८-८. तु. ऋ ८,७०,१; ६,१६८,६. ९. क्षो मूको. १०. त्रि मूको. ११. °स्या मूको. १२. सन्द मूको. १३. मर्त्य. मूको. १४. तुर्° मूको. १५ °भः मूको. १६. °म्बः मूको. १७. निर्ग. मूको. १८. भटाम् मूको.

आ यद्वज्रं बाह्वोरिन्द्र धत्से मदच्युतमहये हन्तवा उं ।
प्र पर्वता अनवन्त प्र गावः प्र ब्रह्माणो अभिनक्षन्त इन्द्रम् ॥ ५ ॥

आ । यत् । वज्रम् । बाह्वो । इन्द्र । धत्से । मदऽच्युतम् । अहये । हन्तवे । ऊँ इति ।
प्र । पर्वता । अनवन्त । प्र । गावः । प्र । ब्रह्माणः[१] । अभिऽनक्षन्त । इन्द्रम् ॥ ५ ॥

वेङ्कट० यदा त्वम् इन्द्र[१] वज्रम् बाह्वो आ धत्से शत्रूणां मदस्य च्यावयितारम् अहिं हन्तुम् ।
यदा[१] वा प्रकर्षेण अशब्दयन् मेघाः तत्स्थानि उदकानि । 'यदद सम्प्रयतीरहावनदता
हते । तस्मादा नद्यो नाम स्थ' (तै ५,६,१,२) इति मन्त्रः । तुरीयः पादः परोक्षः । तदानीम्
अभिगच्छन्त ब्राह्मणाः इन्द्रम्[१] प्र अस्तुवन्, यद्वा पर्वतादयः अस्तुवन् इति ॥ ५ ॥

[२]इति पष्ठाष्टके पञ्चमाध्याये द्वात्रिंशो वर्गः[२] ॥

तमु ष्टवाम य इमा जजान विश्वा जातान्यवराण्यस्मात् ।
इन्द्रेण मित्रं दिधिषेम गीर्भिरुपो नमोभिर्वृषभं विशेम ॥ ६ ॥

तम् । ऊँ इति । स्तवाम । यः । इमा । जजान । विश्वा । जातानि । अवराणि । अस्मात् ।
इन्द्रेण । मित्रम् । दिधिषेम । गीःऽभिः । उपो इति । नमःऽभिः । वृषभम् । विशेम ॥ ६ ॥

वेङ्कट० तम् एव स्तुमः, यः इमानि भूतानि जजान । तस्मात् अस्मात् विश्वानि एव जातानि
अपरकालीनानि भवन्ति । तेन अनेन इन्द्रेण वयं स्तुतिभिः मैत्रीं धारयेम । उप विशाम च
नमस्कारैः क्रियमाणैः हविर्भिः वा वृषभम् इति ॥ ६ ॥

वृत्रस्य त्वा श्वसथादीषमाणा विश्वे देवा अजहुर्ये सखायः ।
मरुद्भिरिन्द्र सख्यं ते अस्त्वथेमा विश्वाः पृतना जयासि ॥ ७ ॥

वृत्रस्य । त्वा । श्वसथात् । ईषमाणाः । विश्वे । देवाः । अजहुः । ये । सखायः ।
मरुत्ऽभिः । इन्द्र । सख्यम् । ते । अस्तु । अथ । इमाः । विश्वाः । पृतनाः । जयासि ॥ ७ ॥

वेङ्कट० वृत्रासुरस्य श्वसनेन भीताः[१] पलायमानाः त्वाम् विश्वे देवाः त्यक्तवन्तः, ये तव प्राक्
सखायः आसन् । तथा सति मरुद्भिः इन्द्र ! तव सख्यम् अस्तु, ये त्वां न परित्यजन्ति ।
अथ इमाः विश्वाः पृतनाः जयासि इति वृत्रं घ्नन्तम् आह इति ॥ ७ ॥

त्रिः षष्टिस्त्वा मरुतो वावृधाना उस्रा इव राशयो यज्ञियासः ।
उप त्वेमः कृधि नो भागधेयं शुष्मं त एना हविषा विधेम ॥ ८ ॥

---

१. तु. ऋ ५,८९,२,३१,४. २ प्र' मूको ३ °प्रती वि'. ४. नास्ति मूको
५-५ नास्ति मूको. ६ हिमा वि', हिता मूको.

त्रि । पृष्ठि । त्वा । मुरुतः । वृवृधाना । उस्राःऽइव । राशयः । युज्ञियांसः ।
उप । त्वा । आ । इम । कृधि । नः । भागऽधेयम् । शुष्मम् । ते । एना । हुविषां । विधेम ॥८॥

वेङ्कट० त्रि षष्टि त्वाम् मरुत "ईदृङ् चान्यादृङ् च"[1] (तै १,८,१३,२,४,६,५,५, मा १७,८०-८४) एवमादिका सप्तका नव गणा भवन्ति। तेषु त्रय आरण्येऽनुवाक्या। 'स्वतवांश्च प्रघासी च' (मा १७ ८५) इति एष ग्रामेऽनुवाक्येषु षष्ठ आम्नात[2]। त्वा वर्धयन्त गाव इव सङ्घीभूता यज्ञार्हा अभवन्। तं त्वा वयम् उप आ गच्छाम, कृधि न भागधेयम्। बलं[1] तव अनेन हविषा वयं कुर्मः ॥ ८॥

तिग्ममायुधं मरुतामनीकं कस्त इन्द्र प्रति वज्रं दधर्ष ।
अनायुधासो असुरा अदेवाश्चक्रेण ताँ अप वप ऋजीषिन् ॥ ९ ॥

तिग्मम् । आयुधम् । मरुताम् । अनीकम् । कः । ते । इन्द्र । प्रति । वज्रम् । दधर्ष ।
अनायुधासः । असुराः । अदेवाः । चक्रेण । तान् । अप । वप । ऋजीषिन् ॥ ९ ॥

वेङ्कट० तीक्ष्णम् आयुधम् मरुताम् च सङ्घम् क ते प्रति धर्षयति वज्रम् च। आयुधवर्जिता असुरा[3] देववर्जिता। तान् चक्रेण अप वप अपनुद[4] ऋजीषिन्। ॥ ९ ॥

मह उग्राय तवसे सुवृक्तिं प्रेरय शिवतमाय पश्वः ।
गिर्वाहसे गिर इन्द्राय पूर्वीर्धेहि तन्वे कुविदङ्ग वेदत् ॥ १० ॥

महे । उग्राय । तवसे । सुऽवृक्तिम् । प्र । ईरय । शिवऽतमाय । पश्वः ।
गिर्वाहसे । गिरः । इन्द्राय । पूर्वीः । धेहि । तन्वे । कुवित् । अङ्ग । वेदत् ॥ १० ॥

वेङ्कट० महते उद्गूर्णाय वृद्धाय स्तुतिम् प्र ईरय स्तोत[5] शिवतमाय पशो। पशुर्द्विपात्[6] चतुष्पात् च। गीर्भि उह्यमानाय गिर इन्द्राय बह्वी कुरु। स्तोतृपुत्राय स्वशरीराय वा बहुधन क्षिप्रम् इन्द्रो लम्भयतु इति ॥ १० ॥

[7]इति षष्ठाष्टके षष्ठाध्याये त्रयस्त्रिंशो वर्ग[7] ॥

उक्थवाहसे विभ्वे मनीषां द्रुणा न पारमीरया नदीनाम् ।
नि स्पृश धिया तन्वि श्रुतस्य जुष्टतरस्य कुविदङ्ग वेदत् ॥ ११ ॥

उक्थऽवाहसे । विऽभ्वे । मनीषाम् । द्रुणा । न । पारम् । ईरय । नदीनाम् ।
नि । स्पृश । धिया । तन्वि । श्रुतस्य । जुष्टऽतरस्य । कुवित् । अङ्ग । वेदत् ॥ ११ ॥

१-१. ईदृश मूको. २. °म्नातं मूको ३ बलवन् मूको. ४ °रान् मूको. ५ मनुत ६ पशिपात् वि°; चतुष्पाद् सं°. ७-७ नास्ति मूको.

यथा पथिकम् नदीनाम् पारम् द्रुणा प्रापयन्ति।

वेङ्कट० स्तोत्रे उद्यमानाय महते स्तुतिमापय, यथा पथिकम् नदीनाम् पारम् द्रुणा प्रापयन्ति। नि स्पृश धाम् आत्मानं गमय पुत्रार्थम् आत्मार्थं स्तुतिमिन्द्र प्रति गमयेरपर्यं। नि स्पृश धाम् आत्मानं गमय पुत्रार्थम् आत्मार्थं वा। विश्रुतस्य जुष्टतरस्य इन्द्रस्य स्वभूत प्रज्ञया कर्मणा वा 'पर्याप्त वितरिष्यति' ॥ ११ ॥

तद्विविड्ढि यत् त इन्द्रो जुजोषत् स्तुहि सुष्टुतिं नमसा विवास ।
उप भूष जरितर्मा रुवण्यः श्रावया वाचं कुविदङ्ग वेदत् ॥ १२ ॥

तत् । विविड्ढि । यत् । ते । इन्द्रः । जुजोषत् । स्तुहि । सुऽस्तुतिम् । नमसा । आ । विवास ।
उप । भूष । जरितः । मा । रुवण्यः । श्रवय । वाचम् । कुवित् । अङ्ग । वेदत् ॥ १२ ॥

वेङ्कट० तत् कुरु, यत् तव स्वभूतम् इन्द्र स्वीकुर्यात्। स्तुहि सुस्तोत्रम् इन्द्रम्। हविषा परिचर। उप भव[2] च जरितः। स्तोतः[1]। मा रुवण्य मा रोदी[1] धनाभावात्। श्रावय इन्द्रम् वाचम् ॥ १२ ॥

अव द्रप्सो अंशुमतीमतिष्ठदियानः कृष्णो दशभिः सहस्रैः ।
आवत् तमिन्द्रः शच्या धमन्तमप स्नेहितीर्नृमणा अधत्त ॥ १३ ॥

अव । द्रप्सः । अंशुऽमतीम् । अतिष्ठत् । इयानः । कृष्णः । दशऽभिः । सहस्रैः ।
आवत् । तम् । इन्द्रः । शच्या । धमन्तम् । अप । स्नेहितीः । नृऽमनाः । अधत्त ॥ १३ ॥

वेङ्कट० यथा इन्द्र कृष्णासुर जघान तत् अस्मिन् तृचे वदति— द्रप्स द्रुत गच्छति इति अव अतिष्ठत् द्रुत[1] गच्छन् अंशुमतीम् नाम नदीम् अन्वीयमान कृष्ण दशभि असुराणाम् सहस्रैः। तम् अभ्यगच्छत् इन्द्र प्रज्ञानेन अन्तरुदके वर्तमानम् उच्छ्वसन्तम्। अथ तस्यानुचरान् च हतवान् इति यदप्युचेति। स्नेहतिर्वधकर्मसु[1] (निघ २,१९) पठित। अप अधत्त हिंसित्री सेना नृमणा इन्द्र नृषु मन अस्य भवतीति। 'अप स्नीहितिं नृमणा अधद्रा'[1] (कौ १,३०३) इति छन्दोगा पठति। तदानीं तम् एव हुतपदगतम् अपाधत्त इत्यर्थः ॥ १३ ॥

द्रप्समपश्यं विषुणे चरन्तमुपह्वरे नद्यो अंशुमत्याः ।
नभो न कृष्णमवतस्थिवांसमिष्यामि वो वृषणो युध्यताजौ ॥ १४ ॥

द्रप्सम् । अपश्यम् । विषुणे । चरन्तम् । उपऽह्वरे । नद्यः । अंशुऽमत्याः ।
नभः । न । कृष्णम् । अवतस्थिऽवांसम् । इष्यामि । वः । वृषणः । युध्यत । आजौ ॥ १४ ॥

वेङ्कट० तुरीयपादो मारुत। उत्तरा ऐन्द्राबार्हस्पत्या[1]। मारुत[1] प्रति यथा इन्द्र उवाच तद् अत्र कीर्त्यते— द्रप्सम् अहम् अपश्यम् विष्वगञ्चने देशे चरन्तम् अंशुमत्या नद्या उपह्वरे

---

१ १ पर्याप्तितरस्येति वि[1] पया प तरस्यति आ[1] २ इव मूको. ३ °दीत मूको ४. स्तुत मूको. ५. तेहन्विव° मूको ६ अद्धाम् मूको. ७ इन्द्रा° मूको. ८. गणमिति शेष ।

गूढे नभ[१] न आदित्यम्[२] (तु या २,१४) इव उपदीप्यमान कृष्णासुरम् [३]उदकस्यान्त अवस्थितम्[३] । दृष्टे च सत्यस्मिन् युद्धार्थं युष्मान्[४] इच्छामि । हे मरुत ! तम् इमम् युध्यत सङ्ग्रामे इति ॥ १४ ॥

अधं द्रप्सो अंशुमत्या उपस्थेऽधारयत् तन्वं तित्विषाणः ।
विशो अदेवीरभ्याऽऽचरन्तीर्बृहस्पतिना युजेन्द्रः ससाहे ॥ १५ ॥

अधं । द्रप्स । अंशुऽमत्या । उपऽस्थे । अधारयत् । तन्वम् । तित्विषाण ।
विशं । अदेवी. । अभि । आऽचरन्ती । बृहस्पतिना । युजा । इन्द्र । ससहे ॥ १५ ॥

वेङ्कट० द्रुतगामी कृष्ण अंशुमत्या उपस्थे अधारयत् आत्मीय शरीर दीप्यमान । तत्र गत्वा बृहस्पतिना सहायेन इन्द्र अदेवी विश असुरानागच्छत अभिसोढवान् इति । 'अव द्रप्सो अंशुमतीमतिष्ठत्' (ऋ ८,९६,१३) इत्यैन्द्राबार्हस्पत्य तृच शसति' (ऐब्रा ६, २६) इत्यादि । ब्राह्मणानुरूपोऽयमर्थ । केचित् पुनरत्र बृहद्देवताकारेण उक्तम् इति श्लोकान् पठन्ति —

"अपक्रम्य तु देवेभ्य सोमो वृत्रभयार्दित ।
नदीमंशुमतीं [५]नाम्ना अभ्यतिष्ठत्[५] कुरून् प्रति ॥

त बृहस्पतिनैकेन सोऽभ्ययाद् वृत्रहा सह ।
योत्स्यमानस्तु सहृष्टैर्मरुद्भिर्विविधायुधै ॥

दृष्ट्वा तानायत[६] सोम स्वबलेन व्यवस्थित ।
मन्वानो वृत्रमायात[७] जिघांसुमरिसेनया ॥

व्यवस्थित धनुष्मन्त तमुवाच बृहस्पति ।
मरुत्पतिरय सोम एहि देवान् पुनर्विभो ॥

सोऽश्रवं नेति त शक्र स्वर्ग[८] एव बलाद्बली ।
इयाय देवानादाय त [९]वपुर्विधिवत् सुरा[९] ॥

जघ्नु पीत्वा च दैत्यानां समरे नवतीर्नव ।
[१०]तद् 'अव द्रप्स'[†][१०] इत्यस्मिन् तृचे सर्वं निगद्यते ॥" (बृदे ६,१०९-११५) इति ॥

तदेतदनार्षमिव प्रतिभाति ॥ १५ ॥

[११]इति षष्ठाष्टके षष्ठाध्याये चतुर्दिशो वर्ग[११] ॥

---

१. °भर मूको. २ °रम मूको. ३-३. °रद्य मूको. ४ युष्मार्द मूको. ५-५. नाम अभ्यति° मूको. ६. तानायत् वि°; तानायमानत्स्र मूको ७. °वृत्रमायान् मूको. ८. स्वग मूको. ९-९. पुनर्विभवत् पुरा मूको. १०-१० तदेवर्चेव वि°; तदेवर्चेव अ°. † ऋ ८,९६,१३-१५. ११-११. नास्ति मूको.

त्वं ह त्यत् स॒प्तभ्यो जाय॑मानोऽश॒त्रुभ्यो॑ अभवः॒ शत्रु॑रिन्द्र ।
गू॒ळ्हे द्यावा॑पृथि॒वी अन्व॑विन्दो विभु॒मद्भ्यो॒ भुव॑नेभ्यो॒ रणं॑ धाः ॥ १६ ॥

त्वम् । ह॒ । त्यत् । स॒प्तऽभ्यः॑ । जाय॑मानः । अ॒श॒त्रुऽभ्यः॑ । अ॒भ॒वः॒ । शत्रुः॑ । इ॒न्द्र॒ ।
गू॒ळ्हे इति॑ । द्यावा॑पृथि॒वी इति॑ । अनु॑ । अ॒वि॒न्दः॒ । वि॒भु॒मत्ऽभ्यः॑ । भुव॑नेभ्यः । रण॑म् । धाः॒ ॥ १६ ॥

वेङ्कट० त्वम् एतत् सप्तभ्यः असुरेभ्यः प्रादुर्भवन् एव शत्रुरहितेभ्यः बलवद्भ्यः शत्रुः अभवः इन्द्र! । तमसा गूढे इव द्यावापृथिव्यौ अनु अविन्दः । तथा भुवनेभ्यः महद्भ्यः रणम् रमणम् धारयसि इति ॥ १६ ॥

त्वं ह॒ त्यद॑प्रतिमा॒नमोजो॒ वज्रे॑ण वज्रिन् धृषि॒तो ज॑घन्थ ।
त्वं शुष्ण॒स्यावा॑तिरो॒ वध॑त्रै॒स्त्वं गा इ॑न्द्र॒ शच्येद॑विन्दः ॥ १७ ॥

त्वम् । ह॒ । त्यत् । अ॒प्र॒ति॒ऽमा॒नम् । ओजः॑ । वज्रे॑ण । व॒ज्रि॒न् । धृ॒षि॒तः । ज॒घ॒न्थ॒ ।
त्वम् । शुष्ण॑स्य । अव॑ । अ॒ति॒रः॒ । वध॑त्रैः । त्वम् । गाः । इ॒न्द्र॒ । शच्या॑ । इत् । अ॒वि॒न्दः॒ ॥ १७ ॥

वेङ्कट० त्वम् ह त्यत् निरुपमानं बलं कृष्णस्य वज्रेण वज्रिन्! धृष्टः सन् हतवान्। एतदेवाऽऽह। तथा त्वम् इन्द्र! प्रज्ञया शत्रूणाम् त्वम् शुष्णस्य बलं विनाशितवान् असि आयुधैः इति। गाः अविन्दः इति ॥ १७ ॥

त्वं ह॒ त्यद्वृ॑षभ चर्षणी॒नां घ॒नो वृ॒त्राणां॑ तवि॒षो ब॑भूथ ।
त्वं सिन्धूँ॑रसृजस्तस्तभा॒नान् त्वम॒पो अ॑जयो दा॒सप॑त्नीः ॥ १८ ॥

त्वम् । ह॒ । त्यत् । वृ॒ष॒भ॒ । च॒र्ष॒णी॒नाम् । घ॒नः । वृ॒त्राणा॑म् । त॒वि॒षः । ब॒भू॒थ॒ ।
त्वम् । सिन्धू॑न् । अ॒सृ॒जः॒ । त॒स्त॒भा॒नान् । त्वम् । अ॒पः । अ॒ज॒यः॒ । दा॒सऽप॑त्नीः ॥ १८ ॥

वेङ्कट० त्वम् ह एतत् वर्षितः मनुष्याणां हन्ता उपद्रवाणां प्रवृद्धः बभूथ। तथा त्वम् सिन्धून् असुरैः निरुध्यमानान् उद्-असृज। त्वम् उदकानि अजयः असुरस्वामिकानि ॥ १८ ॥

स सु॒क्रतू॑ रणि॒ता यः सु॒तेष्वनु॑त्तमन्यु॒र्यो अहे॑व रे॒वान् ।
य एक॒ इन्नर्यपां॑सि॒ कर्ता॒ स वृ॑त्र॒हा प्रतीद॒न्यमा॑हुः ॥ १९ ॥

सः । सु॒ऽक्रतुः॑ । र॒णि॒ता । यः । सु॒तेषु॑ । अनु॑त्तऽमन्युः । यः । अहा॑ऽइव । रे॒वान् ।
यः । एकः॑ । इत् । नरि॑ । अपां॑सि । कर्ता॑ । सः । वृ॒त्र॒ऽहा । प्रति॑ । इत् । अ॒न्यम् । आ॒हुः॒ ॥ १९ ॥

वेङ्कट० स सुप्रज्ञः रमयिता, यः सोमेषु अप्रतिनुन्नक्रोधः, यः दिवसः इव धनवान्।

१ १ तु स १०,४९,८,१२०,६ २ नास्ति मूको ३ रणम् मूको ४ °वान् मूको ५ एधरे° मूको ६ °न्द्र मूको ७ बभूव मूका ८ अजय मूका. ९ °तिरस्तक्रोध वि°, तिरस्तक्रोध म°,

दिवसेषु हि धनानि प्रादुर्भवन्ति [1]न रात्रिषु[1]। यः एकः एव[2] मनुष्ये कर्माणि करोति। सः वृत्रहा भवति अन्यम् प्रति एव आहुः। इन्द्रः[3] सर्वम् अन्यम् प्रति भवति इति आहुः इत्यर्थः ॥ १९ ॥

स वृ॒त्र॒हेन्द्र॑श्चर्षणी॒धृत् तं सु॑ष्टु॒त्या हव्यं॑ हुवेम ।
स प्रा॑वि॒ता म॒घवा॑ नोऽधिव॒क्ता स वाज॑स्य श्रव॒स्य॑स्य दा॒ता ॥ २० ॥

सः । वृ॒त्र॒ऽहा । इन्द्रः॑ । च॒र्ष॒णि॒ऽधृत् । तम् । सु॒ऽस्तु॒त्या । हव्य॑म् । हु॒वे॒म ।
सः । प्र॒ऽअ॒वि॒ता । म॒घऽवा॑ । नः॒ । अ॒धि॒ऽव॒क्ता । सः । वाज॑स्य । श्र॒व॒स्य॑स्य । दा॒ता ॥ २० ॥

वेङ्कट० सः वृत्रहा इन्द्रः मनुष्याणां धर्ता। तम् वयम्[4] आह्वातव्यं शोभनया स्तुत्या हुवेम। सः प्रकर्षेण रक्षिता धनवान्[5] अस्माकम् अधिवक्ता[6]। सः अन्नस्य यशोनिमित्तस्य[7] दाता ॥ २० ॥

स वृ॒त्र॒हेन्द्र॑ ऋ॒भु॒क्षाः स॒द्यो ज॑ज्ञा॒नो हव्यो॑ बभूव ।
कृ॒ण्वन्नपां॑सि॒ नर्या॑ पु॒रूणि॒ सोमो॒ न पी॒तो हव्यः॒ सखि॑भ्यः ॥ २१ ॥

सः । वृ॒त्र॒ऽहा । इन्द्रः॑ । ऋ॒भु॒क्षाः । स॒द्यः । ज॒ज्ञा॒नः । हव्यः॑ । ब॒भू॒व ।
कृ॒ण्वन् । अपां॑सि । नर्या॑ । पु॒रूणि॑ । सोमः॑ । न । पी॒तः । हव्यः॑ । सखि॑ऽभ्यः ॥ २१ ॥

वेङ्कट० सः वृत्रहा इन्द्रः महान् सद्यः एव प्रादुर्भवन् आह्वातव्यः बभूव कुर्वन् कर्माणि नृहितानि[8] बहूनि सोमः इव रक्षकः ह्वातव्यः सखीनाम् इति ॥ २१ ॥

[9]इति षष्ठाष्टके षष्ठाध्याये पञ्चत्रिंशो वर्गः[9] ॥

[९७]

[10]रेभः काश्यप ऋषिः। इन्द्रो देवता। बृहती छन्दः, दशमीत्रयोदश्यौ अतिजगत्यौ, एकादशी-द्वादश्यौ उपरिष्टाद्बृहत्यौ, चतुर्दशी त्रिष्टुप्, पञ्चदशी जगती[10]।

या इ॑न्द्र॒ भुज॒ आभ॑रः॒ स्व॑र्वाँ॒ असु॑रेभ्यः ।
स्तो॒तार॒मिन्म॑घवन्नस्य वर्धय॒ ये च॒ त्वे वृ॒क्तब॑र्हिषः ॥ १ ॥

याः । इ॒न्द्र॒ । भुजः॑ । आ । अभ॑रः । स्वः॑ऽवान् । असु॑रेभ्यः ।
स्तो॒तार॑म् । इत् । म॒घ॒ऽव॒न् । अ॒स्य॒ । व॒र्ध॒य॒ । ये । च॒ । त्वे इति॑ । वृ॒क्तऽब॑र्हिषः ॥ १ ॥

वेङ्कट० रेभः[11] काश्यपः। याः त्वम् इन्द्र! भुजः धनानि असुरेभ्यः आ अहरः[11] सुखवान्। स्तोतारम् एव तेन आहृतेन धनेन वर्धय, ये च अन्ये त्वदर्थं कीर्णबर्हिषः तांश्च इति ॥ १ ॥

१-१. नारादिषु को. २. एव मूको. ३. इन्द्र मूको. ४. वयम् मूको. ५. धनवताम् वि[a]; [b]नवतान् अ[c]. ६. अधिवक्ता वि[a]; [b]वक्तं अ[c]. ७. यशोनिर्मितस्य वि[a]; यशोनिमित्तस्य अ[c]. ८. निहि[d] मूको. ९-९. नास्ति मूको. १०. रेरः मूको. ११. [b]हर मूको

यमिन्द्र दधिषे त्वमश्वं गां भागमव्ययम् ।
यजमाने सुन्वति दक्षिणावति तस्मिन् तं धेहि मा पणौ ॥ २ ॥

यम् । इन्द्र । दधिषे । त्वम् । अश्वम् । गाम् । भागम् । अव्ययम् ।
यजमाने । सुन्वति । दक्षिणाऽवति । तस्मिन् । तम् । धेहि । मा । पणौ ॥ २ ॥

वेङ्कट० यम् इन्द्र! धारयसि त्वम् अश्वम् गाम् धनम् अपि च अव्ययम्[1], तम् सर्वम् तस्मिन् सुन्वति दक्षिणावति यजमाने धेहि, मा पणौ। पणिः पणनात्, अयष्टा जनः ॥ २ ॥

य इन्द्र सस्त्यव्रतोऽनुष्वापमदेवयुः ।
स्वैः ष एवैर्मुमुरत् पोष्यं रयिं सनुतर्धेहि तं ततः ॥ ३ ॥

यः । इन्द्र । सस्ति । अव्रतः । अनुऽस्वापम् । अदेवऽयुः ।
स्वैः । सः । एवैः । मुमुरत् । पोष्यम् । रयिम् । सनुतः । धेहि । तम् । ततः ॥ ३ ॥

वेङ्कट० यः इन्द्र! स्वपिति अव्रतः भूत्वा, अनुवृत्तस्वापं[2] यथा तथा स्वपिति अदेयकामः। सर्वैरेव गमनैः मारयतु विनाशयतु सः पोष्यम् धनम्। ततः तम् अन्तर्हिते देशे स्थापय ॥ ३ ॥

यच्छक्रासि परावति यदर्वावति वृत्रहन् ।
अतस्त्वा गीर्भिर्द्युगदिन्द्र केशिभिः सुतावाँ आ विवासति ॥ ४ ॥

यत् । शक्र । असि । पराऽवति । यत् । अर्वाऽवति । वृत्रऽहन् ।
अतः । त्वा । गीःऽभिः । द्युऽगत्[3] । इन्द्र । केशिऽभिः । सुतऽवान् । आ । विवासति ॥ ४ ॥

वेङ्कट० यदि शक्र! भवसि दूरे, यदि वा अन्तिके वृत्रहन्!। '[4]अस्मात् देशात्[4]' त्वां स्तुतिभिः दिवं प्रति गच्छद्भिः इन्द्र![5] केशिभिः अश्वैः यजमानः आ गमयति ॥ ४ ॥

यद्वासि रोचने दिवः समुद्रस्याधि विष्टपि ।
यत् पार्थिवे सदने वृत्रहन्तम यदन्तरिक्ष आ गहि ॥ ५ ॥

यत् । वा । असि । रोचने । दिवः । समुद्रस्य । अधि । विष्टपि ।
यत् । पार्थिवे । सदने । वृत्रहन्ऽतम । यत् । अन्तरिक्षे । आ । गहि ॥ ५ ॥

वेङ्कट० यत् वा भवसि दीप्ते द्युलोकस्य, यद्वा[6] समुद्रस्य विष्टपि तत् सम्बद्धे कस्मिंश्चिद् स्थाने, यदि वा पार्थिवे स्थाने वृत्रहन्तम!, यदि वा अन्तरिक्षे, आ गच्छ ॥ ५ ॥

[7]इति षष्ठाष्टके षष्ठाध्याये षड्विंशो वर्गः[7] ॥

---

१. आश्चर्य वि³; अर्थं अ¹. २. 'नुव्रतस्व' मूको. ३. वैप १,१६७१ ग ६. ४-४. अस्मात् देशात् मूको. ५. इन्द्रम् मूको. ६. यथा मूको. ७-७. नास्ति मूको.

[illegible] सोमेषु सोमपाः सुतेषु शवसस्पते ।
[illegible] राधसा सूनृतावतेन्द्र राया परीणसा ॥ ६ ॥

[illegible] । सोमेषु । सोमऽपाः । सुतेषु । शवसः । पते ।
[illegible] । राधसा । सूनृताऽवता । इन्द्र । राया । परीणसा ॥ ६ ॥

[illegible] सोमेषु हे सोमस्य पातः! सुतेषु बलस्य पते! मादयस्व अन्नेन[1] शब्दवता [illegible] धनेन च महता ॥ ६ ॥

मा न इन्द्र परा वृणग्भवा नः सधमाद्यः ।
त्वं न ऊती त्वमिन्न आप्यं मा न इन्द्र परा वृणक् ॥ ७ ॥

मा । नः । इन्द्र । परा । वृणक् । भव । नः । सधऽमाद्यः ।
[illegible] । नः । ऊती । त्वम् । इत् । नः । आप्यम् । मा । नः । इन्द्र । परा । वृणक् ॥ ७ ॥

[illegible] मा अस्मान्, इन्द्र! परित्याक्षीः । भव अस्माकं सोमेन सहमाद्यः । त्वम् अस्माकं [illegible] । त्वम् एव अस्माकम् ज्ञातेयम् इति ॥ ७ ॥

[illegible] इन्द्र सचा सुते नि षदा पीतये मधु ।
[illegible] जरित्रे मघवन्नवो महदस्मे इन्द्र सचा सुते ॥ ८ ॥

[illegible] । इन्द्र । सचा । सुते । नि । सद । पीतये । मधु ।
[illegible] । [illegible] । मघऽवन् । अवः । महत् । अस्मे इति । इन्द्र । सचा । सुते ॥ ८ ॥

[illegible] इन्द्र! मम[2] अभिषुते सोमे नि षीद मधु पातुम् । कुरु स्तोत्रे[3] मघवन्! [illegible] ॥ ८ ॥

[illegible] त्वा सुधार्य आशत न मर्त्यासो अद्रिवः ।
[illegible] सर्वसाभिभूरसि न त्वा देवास आशत ॥ ९ ॥

[illegible] । आशत । न । मर्त्यासः । अद्रिऽवः ।
[illegible] । सर्वसा । अभिऽभूः । असि । न । त्वा । देवासः । आशत ॥ ९ ॥

[illegible] देवा व्याप्नुवन्, न अपि मनुष्या वज्रिन्! । विश्वानि एव जातानि भूतानि [illegible] सर्वेण अभिभवः भवसि ॥ ९ ॥

[illegible] पृतना अभिभूतरं नरं सजूस्ततक्षुरिन्द्रं जजनुश्च राजसे ।
[illegible] वरे आमुरिमुतोग्रमोजिष्ठं तवसं तरस्विनम् ॥ १० ॥

१. [illegible] २. सोम मूको. ३. 'स्य मूको.

विश्वाः । पृतनाः । अभिऽभूतरम् । नरम् । सऽजूः । ततक्षुः । इन्द्रम् । जजनुः । च । राजसे ।
क्रत्वा । वरिष्ठम् । वरे । आऽमुरिम् । उत । उग्रम् । ओजिष्ठम् । तवसम् । तरस्विनम् ॥ १० ॥

वेङ्कट० सर्वाः एव पृतनाः अत्यन्तमभिभवितारम् नेतारम् सङ्गता स्तुतिभिः तीक्ष्णमकुर्वन् इन्द्रम्, जनयामासुः च आत्मनो विराजनार्थम् । अपि च[1] कर्मणा वरिष्ठम् एव मारकं शत्रूणाम् आत्मनः वरे च शत्रुधनार्थे[2] च कुर्वन्ति उद्गूर्णम् अतिशयेन बलिनम् वृद्धम् वेगवन्तम् ॥ १० ॥

[3]इति पञ्चाष्टके पञ्चाध्याये सप्तत्रिंशो वर्गः[3] ॥

समीं रेभासो अस्वरन्निन्द्रं सोमस्य पीतये ।
स्वर्पतिं यदीं वृधे धृतव्रतो ह्योजसा समूतिभिः ॥ ११ ॥

सम् । ईम् । रेभासः । अस्वरन् । इन्द्रम् । सोमस्य । पीतये ।
स्वःऽपतिम् । यत् । ईम् । वृधे । धृतऽव्रतः । हि । ओजसा । सम् । ऊतिऽभिः ॥ ११ ॥

वेङ्कट० सम् अस्वरन् एव स्तोतारः इन्द्रम् सोमस्य पानाय स्वर्गस्य पतिम् । यत् एनं वर्धनाय[4] सस्तुवन्ति, तदा धृतव्रतः हि इन्द्रः बलेन[5] स्तोतृभिः सम् गच्छते रक्षणे ॥ ११ ॥

नेमिं नमन्ति चक्षसा मेषं विप्रा अभिस्वरा ।
सुदीतयो वो अद्रुहोऽपि कर्णे तरस्विनः समृक्वभिः ॥ १२ ॥

नेमिम् । नमन्ति । चक्षसा । मेषम् । विप्राः । अभिऽस्वरा ।
सुऽदीतयः । वः । अद्रुहः । अपि । कर्णे । तरस्विनः । सम् । ऋक्वऽभिः ॥ १२ ॥

वेङ्कट० य इन्द्रः अरान् इव नेमिः[6] सर्वं परिभवति तं दर्शनेन एव नमन्ति मेधातिथेः मेषम्[7] मेधाविनः अभिस्वरणेन[8] । सुदीप्तयः यूयम् अद्रोग्धारः चेति तान् विप्रान् आह । अपि च इन्द्रस्य कर्णे श्रोत्रसमीपे वेगवन्तः 'ताम् नमत अर्चनैः'[9] मन्त्रैः इति ॥ १२ ॥

तमिन्द्रं जोहवीमि मघवानमुग्रं सत्रा दधानमप्रतिष्कुतं शवांसि ।
मंहिष्ठो गीर्भिरा च यज्ञियो ववर्तद्राये नो विश्वा सुपथा कृणोतु वज्री ॥ १३ ॥

तम् । इन्द्रम् । जोहवीमि । मघऽवानम् । उग्रम् । सत्रा । दधानम् । अप्रतिऽस्कुतम् । शवांसि ।
मंहिष्ठः । गीःऽभिः । आ । च । यज्ञियः । ववर्तत् । राये । नः । विश्वा । सुऽपथा । कृणोतु । वज्री ॥ १३ ॥

वेङ्कट० तम् इन्द्रम् आह्वयामि धनवन्तम् उद्गूर्णम् सत्यम् एव बलानि दधानम् शत्रुभिः अप्रतिकृतम् ।

1. नास्ति मूको. 2. शत्रुध° मूको. 3-3. नास्ति मूको. 4. अव° मूको. 5. बले मूको. 6. °[illegible] मूको. 7. तु. माश ३,२,४,१८; षब्रा १,१; प्रभृ. 8. दिश्व मूको. 9. नेमिम् मूको. 10. सह अ° मूको.

पूज्यः[1] स्तुतिभिः आ च यज्ञियः वर्तते यज्ञेषु। धनाय अस्माकम् विश्वानि अपि सुपथा[2] सुमार्गाणि[3] करोतु वज्री इति ॥ १३ ॥

त्वं पुर॑ इन्द्र चि॒किदे॑ना॒ व्योज॑सा शविष्ठ शक्र नाशय॒ध्यै॑ ।
त्वद्विश्वा॑नि॒ भुव॑नानि वज्रि॒न् द्यावा॑ रेजेते पृथि॒वी च॑ भी॒षा ॥ १४ ॥

त्वम् । पुरः॑ । इ॒न्द्र॒ । चि॒कित् । ए॒नाः॒ । वि । ओज॑सा । श॒वि॒ष्ठ॒ । श॒क्र॒ । ना॒श॒य॒ध्यै॑ ।
त्वत् । विश्वा॑नि । भुव॑नानि । व॒ज्रि॒न् । द्यावा॑ । रे॒जे॒ते॒ इति॑ । पृ॒थि॒वी इति॑ । च॒ । भी॒षा ॥ १४ ॥

वेङ्कट० त्वम् एव एनानि पुराणि बलेन विनाशयितुम् चिकित् ज्ञाता[4] भवसि बलवत्तम! शक्र! इन्द्र!। त्वत् विश्वानि भुवनानि भीत्या कम्पन्ते वज्रिन्! द्यावापृथिवी च इति[5] ॥ १४ ॥

तन्म॑ ऋ॒तमि॑न्द्र शूर चित्र पात्व॒पो न व॑ज्रिन् दुरि॒ताति॑ पर्षि॒ भूरि॑ ।
क॒दा न॑ इन्द्र रा॒य आ द॑शस्येर्वि॒श्वप्स्न्य॑स्य स्पृहया॒य्य॑स्य राजन् ॥ १५ ॥

तत् । मा॒ । ऋ॒तम् । इ॒न्द्र॒ । शू॒र॒ । चि॒त्र॒ । पा॒तु॒ । अ॒पः । न । व॒ज्रि॒न् । दुः॒ऽइ॒ता । अति॑ । प॒र्षि॒ । भूरि॑ ।
क॒दा । नः॒ । इ॒न्द्र॒ । रा॒यः । आ । द॒श॒स्येः॒ । वि॒श्वऽप्स्न्य॑स्य । स्पृ॒ह॒या॒य्य॑स्य । रा॒ज॒न् ॥ १५ ॥

वेङ्कट० तत् तव स्वभूतं सत्यम् इन्द्र! शूर! पूजनीय! मा रक्षतु[6]। स त्वम् उदकानि इव वज्रिन्! दुरितानि अति पारय[7] बहूनि। कदा अस्मभ्यम् इन्द्र! राजन्! धनम्[8] स्पृहणीयम् बहुरूपम् आभिमुख्येन दास्येः इति ॥ १५ ॥

[9]इति षष्ठाष्टके षष्ठाध्याये अष्टात्रिंशो वर्गः[9] ॥

षष्ठस्य षष्ठमध्यायं व्याचकारेति माधवः ।
सङ्कर्षणानुजो यस्य भ्राताऽऽसीद्वेङ्कटानुजः कविः ॥

इति वेङ्कटमाधवाचार्यविरचिते ऋक्संहिताव्याख्याने षष्ठाष्टके षष्ठोऽध्यायः ॥

—※—

इति ऋग्वेदे सभाष्ये षष्ठाष्टके षष्ठोऽध्यायः ॥

---

१. °त्वम् मूको. २. सुमा वि[२]. ३. सुगानि वि[१]. ४. ज्ञाना मूको. ५. द्यावर्थः अ[१]. ६. °न्तु मूको. ७. पार ··· मूको. ८. धनं धने मूको. ९-९. नास्ति मूको.

अथ सप्तमोऽध्यायः ।

वेङ्क०　[1]इन्द्राय साम गायत[1] इत्यादिष्वस्ति माधव. ।
पादेपूर्णेषु यत्तत्त्वम् आदितः सम्प्रदर्शयन् ॥ १ ॥

व्यूहेदेकाक्षरीभावात्[2] पादेपूर्णेषु सम्पदे ।
क्षैप्रवर्णाश्च संयोगात्[3] व्यवेयात्[4] सदृशौ. स्वरै ॥ २ ॥

व्यूहेदेकारमुत्यस्या[5] [6]'प्र इता जयता नर'[6] ।
'मिता इव स्वरवो(व [7]अ)ऽस्याम् ओकारो[8] व्यूह्यते तथा ॥ ३ ॥

'इक इधाने'[9] मविष्टान्त यणो सत्त्वेयमिष्यते ।
यामाहु. क्षैप्रवर्णेति तेषां च व्यूह इष्यते ॥ ४ ॥

'अग्ने चिकिद्धि अस्य नः'[10], 'द्रु अन्न सुपिप्पलि'[11] ।
सन्धीनेयविधान् व्यूहेत्[12] सम्पदर्थमिति स्थिति ॥ ५ ॥

यस्येतिलोपलुप्तश्च पुनरानीयते तथा ।
'मर्तो वुरीत सख्यम्'[13] इति तत्र निदर्शनम् ॥ ६ ॥

समीचीना यदा वृत्तिर्न व्यूहेऽपि भवेदिह ।
न तदा व्यूहमिच्छन्ति तत्रैतच्छिन्नदर्शनम् ॥ ७ ॥

'विश्वो देवस्य नेतु'[14] इत्यस्यामृचि श्रूयते ।
सप्ताक्षरं [15]'प्रथमं पदमष्टाक्षराणि'[15] त्रीणि ॥ ८ ॥

[16]'न तु सन्धिनिमित्तोऽय'[16] यकारो विश्वगोचर ।
अनुक्तस्तस्य च व्यूहो यस्माद् [17]'व्यूहेऽपि नाक्षरम्'[17] ॥ ९ ॥

अक्षरे पादकल्पेऽस्ति[17] स्यात्स च हल् केवलोऽक्षरम् ।
संयोगानामतो व्यूहो न कार्य इति मद्धृशा ॥ १० ॥

१-१. नास्ति वि[1]. २. °वात् वि[2]. ३. °गात् वि[1] अ[1]. ४. ०व्यपेयात् वि[2], नास्ति वि[1] अ[1]. ५. °काक्षरम्° वि[2] अ[1]. ६-६. प्रति इता ज° वि[1] अ[1], प्रेता जयता नरोनि वेङ्क., ऋ १०,१०३,१३. ७ ऋ ७,५९,१. ८. °एकारो वि[1] अ[1], °मोकार वेङ्क० ९. उपस्था° वि[1] अ[1]. १०. ऋ ५,२२,४. ११. ऋ २,७,६. १२. व्यूहे वि[1] अ[1]. १३ ऋ ५,५०,१. १४ १४. °प्रथम° वेङ्क०. १५-१५. नन्वस° वि[1] अ[1]. १६ १६ व्यूहे विना° मूको, १७ पादकोऽस्ति वि[1] अ[1].

भवतो[1] द्वौ यणादेशौ यदेकस्मिन् पदे तदा[1]।
तथा व्यूहेद् यणादेशं[2] यथा वृत्तिर्न दुष्यति ॥ ११ ॥
व्यूहे च वृत्त्यसिद्धिश्चेद्[4] व्यूहं नेच्छन्ति केचन।
व्यूहेनाक्षरसङ्ख्या च कार्येत्याह माधवः ॥ १२ ॥

तदिमौ श्लोकौ भवतः — 'चत्वारि सन्धिजातानि यैश्छन्दो ह्रसते[5] न च।
प्रश्लिष्टमभिनिहितं[6] क्षिप्रसन्धिरभिद्रुतम्[7] ॥
एतानि सन्धिजातानि मिमानश्छन्दसोऽक्षरैः[8]।
द्वैधं कुर्यादसम्पूर्णे न पूर्णे किञ्चनेङ्गयेत् ॥'[9] इति ॥
गुणो वृद्धिश्च दीर्घश्च प्रश्लिष्टाः सन्धयः स्मृताः।
'एङः पदान्तादती(ति[10] इ)ति सन्तोऽभिनिहितं[10] विदुः ॥ १३ ॥
[11]प्रायोऽर्थौ वृत्तमित्येते[11] पदज्ञानस्य[12] हेतवः।
[13]बलीयः स्याद्[13] विरोधे च पूर्वं पूर्वमिति स्थितिः ॥ १४ ॥ इति ॥

'अग्निमीळे पुरोहितम्'[14] इति गायत्रीभिः सह पाठात् गायत्रो वा पादोऽवान्तरश्चार्थ[15] तस्मिन्नेव संस्थितस्तथावृत्तियुक्तश्च भवति। प्रायार्थयोर्विरोधे[16] प्रायबलीयस्त्वात् 'त्वं वरुणं मनवे स्योनान्'[17] इति पादान्तः[18]। पदार्थबलीयस्त्वं भवति 'स्यानान्तरं' इति पादान्तः[19] स्यात्, 'अग्नि पूर्वेभिर्ऋषिभिरीड्यः'[20] इति च। 'ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिः'[21] इति च। प्रायवृत्तविरोधे प्रायबलीयस्त्वात् 'प्रत्यग्रभीष्म नृतमस्य नृणाम्'[22] इत्येकादशाक्षर एव भवति न विकल्पेन द्वादशाक्षरः अर्थवृत्तविरोधेऽर्थबलीयस्त्वाद्[23] 'यदग्ने स्यामहं त्वम्'[24] इति पादान्तः। न वृत्ताद् अहम् इति। एवं[25] सर्वत्र बोद्धव्यमिति[26]।

[९८]

[27]नृमेध आङ्गिरस ऋषिः। इन्द्रो देवता। उष्णिक् छन्दः, सप्तमीदशम्येकादश्यः ककुभः, नवमीद्वादश्यौ पुरउष्णिहौ[28]।

इन्द्रा॑य॒ साम॑ गायत॒ विप्रा॑य बृह॒ते बृ॒हत्। ध॒र्म॒कृते॑ विप॒श्चिते॑ पन॒स्यवे॑ ॥ १ ॥

इन्द्रा॑य। साम॑। गा॒य॒त॒। विप्रा॑य। बृ॒ह॒ते। बृ॒हत्। ध॒र्म॒ऽकृते॑। वि॒प॒ऽचिते॑। प॒न॒स्यवे॑ ॥ १ ॥

१. °वतो वि[1] अ[1]. २. तथा वि[1] अ[1]. ३. °णादेश वि[1], यणादेश अ[1]. ४ प्रत्यसि° वि[1,2] अ[1]. ५ ह्रसते वि[1,2] अ[1]. ६. °निहृत बॅकल. ७. °सन्धुपद्रु° वि[1] अ[1]. ८. °श्छन्दो अक्षरे वि[1] अ[1]. ९. या ६,१,१०९. १०. स धोभि° वि[1] अ[1]. ११ ११ प्रयोगोऽर्थो वृत्तिरेते बॅकल. १२ पाद° कथा १७२५. १३-१३. बलीयस्य वि[1] अ[1]. १४. ऋ १,१,१. १५ °र्थम् वि[1] अ[1]. १६. प्रयोगो° वि[1] अ[1] १७ ऋ १०,७३,७ १८. 'न ··· मूको १९. °दान्तर वि[1] अ', °दान्त वि[1]. २०. ऋ १,१,२ २१ ऋ १,३६,१३ २२ ऋ ५,३०,१२ २३. °ष्टविधि° वि[1] अ[1]. २४. ऋ ८, ४४,२३. २५ एव° वि[1] अ' २६. बोध्यमि° वि[1]. २७-२७ नास्ति मूको.

वेङ्कट० नृमेध[1] आङ्गिरस । इन्द्राय साम गायत मेधाविने महते बृहत्साम कर्मणः कर्त्रे विज्ञाय[2] स्तुतिमिच्छते ॥ १ ॥

त्वमिन्द्राभिभूरसि त्वं सूर्यमरोचयः । विश्वकर्मा विश्वदेवो महाँ असि ॥ २ ॥

त्वम् । इन्द्र । अभिऽभूः । असि । त्वम् । सूर्यम् । अरोचयः ।
विश्वऽकर्मा । विश्वऽदेवः । महान् । असि ॥ २ ॥

वेङ्कट० त्वम् इन्द्र! अभिभविता भवसि । त्वम् सूर्यम् अरोचयः । विश्वस्य कर्ता विश्वदेव सर्वदेव । 'अग्निं या अन्वन्या देवताः । इन्द्रमन्वन्याः' (तैब्रा ३,७,१,८) इति ब्राह्मणम् । महान् भवसि ॥ २ ॥

विभ्राजञ्ज्योतिषा स्वरगच्छो रोचनं दिवः । देवास्त इन्द्र सख्याय येमिरे ॥ ३ ॥

[3]विऽभ्राजन् । ज्योतिषा । स्वः । अगच्छः । रोचनम् । दिवः[3] । देवाः । ते । इन्द्र । सख्याय । येमिरे ॥ ३ ॥

वेङ्कट० प्रकाशयन् ज्योतिषा स्वर्गम् अगच्छः दिवः आदित्यस्य रोचनम् । देवाः ते इन्द्र! सख्याय आत्मानं नियतवन्तः[4] ॥ ३ ॥

एन्द्र नो गधि प्रियः सत्राजिदगोह्यः । गिरिर्न विश्वतस्पृथुः पतिर्दिवः ॥ ४ ॥

आ । इन्द्र । नः । गधि । प्रियः । सत्राऽजित् । अगोह्यः । गिरिः । न । विश्वतः । पृथुः । पतिः । दिवः ॥ ४ ॥

वेङ्कट० आ गच्छ इन्द्र! अस्मान् प्रियतमः महतो नेता गूहितुमशक्यः[5] पर्वत इव सर्वतः पृथुतरः स्वामी[6] दिवः ॥ ४ ॥

अभि हि सत्य सोमपा उभे बभूथ रोदसी । इन्द्रासि सुन्वतो वृधः पतिर्दिवः ॥ ५ ॥

अभि । हि । सत्य । सोमऽपाः । उभे इति । बभूथ । रोदसी इति ।
इन्द्र । असि । सुन्वतः । वृधः । पतिः । दिवः ॥ ५ ॥

वेङ्कट० [7]अभि बभूथ[7] हि सत्य! सोमस्य पातः! उभे द्यावापृथिव्यौ । स त्वम् इन्द्र! असि सुन्वतः वर्धयिता [8]पतिः दिवः[8] ॥ ५ ॥

त्वं हि शश्वतीनामिन्द्र दर्ता पुरामसि । हन्ता दस्योर्मनोर्वृधः पतिर्दिवः ॥ ६ ॥

[9]त्वम् । हि । शश्वतीनाम् । इन्द्र । दर्ता । पुराम् । असि[9] । हन्ता । दस्योः । मनोः । वृधः । पतिः । दिवः ॥ ६ ॥

---

१ नृमेधमिति वि[1]. २ मेधाविने विज्ञाय वि[1], मेधाविज्ञाय वि[2] अ[1]. ३-३. = ऋ १०,१७०,४. ४. °यमवन्त वि[2] अ[1]. ५ गही° मूको. ६ स्वा वि[2] अ[1]. ७-७ भाविभ वि[1] अ[1]. ८-८. नास्ति वि[1] ९-९ तु ऋ ८,१७,१४.

वेङ्कट० [1]त्वम् हि बह्वीनाम् इन्द्र! दारयिता पुराम् भवसि, हन्ता उपक्षपयितुः, अस्य मनुष्यस्य च वर्धयिता, पतिः दिवः[1] ॥ ६ ॥

[2]इति षष्ठाष्टके सप्तमाध्याये प्रथमो वर्गः[2] ॥

अधा हीन्द्र गिर्वण उप त्वा कामान् महः ससृज्महे । उदेव यन्त उदभिः ॥७॥

अध । हि । इन्द्र । गिर्वणः । उप । त्वा । कामान् । महः । ससृज्महे । उदाऽइव । यन्तः । उदऽभिः ॥ ७ ॥

वेङ्कट० [3]सम्प्रति इन्द्र! गिर्वणः! त्वां वयम् कामान् कमनीयान् स्तोमान्[3] उप सृजामः प्रापयामः त्वां स्तोमान् बहून्, यथा उदकेन गच्छन्तः पुरुषा मज्जलिनोऽस्य[?] उदकैः समीपस्थान्[4] संसृजन्ति इति ॥ ७ ॥

वार्ण त्वा यव्याभिर्वर्धन्ति शूर ब्रह्माणि । वावृध्वांसं चिदद्रिवो दिवेदिवे ॥ ८ ॥

वाः । न । त्वा । यव्याभिः । वर्धन्ति । शूर । ब्रह्माणि । ववृध्वांसम् । चित् । अद्रिऽवः । दिवेऽदिवे ॥ ८ ॥

वेङ्कट० यथा उदकं नदीभिः वर्धयन्ति, तथा त्वाम् शूर! स्तोत्रैः[5] वर्धयन्ति वृद्धम् एव वज्रिन्! अन्वहम्। न तु यथा निरुदके देशे नदीभिः तद्वत् इति ॥ ८ ॥

युञ्जन्ति हरी इषिरस्य गाथयोरौ रथ उरुयुगे । इन्द्रवाहा वचोयुजा ॥ ९ ॥

युञ्जन्ति । हरी इति । इषिरस्य । गाथया । उरौ । रथे । उरुऽयुगे । इन्द्रऽवाहा । वचःऽयुजा ॥ ९ ॥

वेङ्कट० युञ्जन्ति अश्वौ गमनशीलस्य स्तोतारः वाचा महति महायुगे रथे इन्द्रस्य वाहनभूतौ वचनमात्रेणैव युज्यमानौ इति ॥ ९ ॥

त्वं न इन्द्रा भरँ ओजो नृम्णं शतक्रतो विचर्षणे । आ वीरं पृतनाषहम् ॥१०॥

त्वम् । नः । इन्द्र । आ । भर । ओजः । नृम्णम् । शतक्रतो इति शतऽक्रतो । विऽचर्षणे । आ । वीरम् । पृतनाऽसहम् ॥ १० ॥

वेङ्कट० त्वम् अस्मभ्यम् इन्द्र! आ हर बलम् धनम् च हे बहुकर्मन्! विद्रष्टः! वीरम् च सेनाम्[6] अभिभवितारम् ॥ १० ॥

त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ । अधा ते सुम्नमीमहे ॥११॥

त्वम् । हि । नः । पिता । वसो इति । त्वम् । माता । शतक्रतो इति शतऽक्रतो । बभूविथ । अध । ते । सुम्नम् । ईमहे ॥ ११ ॥

१-१. नास्ति वि[1]. २-२. नास्ति मूको. ३. नास्ति वि[1]. ४. °स्थानाम् वि[1]. ५. स्तोत्रैः वि[1] अ[1]. ६. सेनानाम् अ[1].

वेङ्कट० त्वम् हि अस्माकम् पिता अभवः वासयितः!, त्वम् माता च शतक्रतो!। अथ तव स्वभूतं सुखम् याचामहे ॥ ११ ॥

त्वां शुष्मिन् पुरुहूत वाजयन्तमुप ब्रुवे शतक्रतो । स नो रास्व सुवीर्यम् ॥१२॥

त्वाम्। शुष्मिन्। पुरुऽहूत। वाजऽयन्तम्। उप। ब्रुवे। शतक्रतो इति शतऽक्रतो।
सः। नः। रास्व। सुऽवीर्यम् ॥ १२ ॥

वेङ्कट० त्वाम् बलवन्![1] पुरुहूत! बलमिच्छन्तम् उप स्तौमि शतक्रतो!। सः नः देहि सुवीर्यम् धनम् ॥ १२ ॥

[2]इति षष्ठाष्टके सप्तमाध्याये द्वितीयो वर्गः[2] ॥

[९९]

[3]नृमेध आङ्गिरस ऋषिः। इन्द्रो देवता। प्रगाथश्छन्दः (=विषमा बृहत्यः, समा सतोबृहत्यः)[3]।

त्वामिदा ह्यो नरोऽपीप्यन् वज्रिन् भूर्णयः ।
स इन्द्र स्तोमवाहसामिह श्रुध्युप स्वसरमा गहि ॥ १ ॥

त्वाम्। इदा। ह्यः। नरः। अपीप्यन्। वज्रिन्। भूर्णयः।
सः। इन्द्र। स्तोमऽवाहसाम्। इह। श्रुधि। उप। स्वसरम्। आ। गहि ॥ १ ॥

वेङ्कट० त्वाम् अद्य ह्यः च भरणशीलाः यजमानाः सोमम् अपाययन्[4] वज्रिन्!। सः इन्द्र! स्तोत्र वाहसाम्[5] अस्माकं स्तोत्रम्[6] इह श्रुधि, उप आ गच्छ[7] च स्वसरम्[8] गृहम् इति ॥ १ ॥

मत्स्वा सुशिप्र हरिवस्तदीमहे त्वे आ भूषन्ति वेधसः ।
तव श्रवांस्युपमान्युक्थ्या सुतेष्विन्द्र गिर्वणः ॥ २ ॥

मत्स्व। सुऽशिप्र। हरिऽवः। तत्। ईमहे। त्वे इति। आ। भूषन्ति। वेधसः।
तव। श्रवांसि। उपऽमानि। उक्थ्या। सुतेषु। इन्द्र। गिर्वणः ॥ २ ॥

वेङ्कट० सोमेन मत्स्व सुशिप्र! हरिव.!। तत् वयं याचामहे। [9]त्वयि आ[9] भवन्ति परिचारकाः। किं वाच्यम्[10] इत्याह — तव अन्नानि उपमानभूतानि प्रशस्यानि सुतेषु सोमेषु इन्द्र! गिर्वणः! ॥ २ ॥

श्रायन्तइव सूर्यं विश्वेदिन्द्रस्य भक्षत ।
वसूनि जाते जनमान ओजसा प्रति भागं न दीधिम ॥ ३ ॥

---

1. शुष्मिन् वि¹. 2-2. नास्ति मूको. 3. या. (५,४) अर्थो निर्वचनञ्च विमृश्यम्। वैप १,२५३३ b द्र. 4. अपायत् वि¹ अ¹. 5. स्तोत्र स्तोत्र वाहसाम् वि² अ¹. 6. ओजम् मूको. 7. ०च्छत् मूको. 8. स्वरम् वि² अ¹. 9-9. त्वयि मूको. 10 वाच्यम् मूको.

श्रयन्तःऽइव । सूर्यम् । विश्वा । इत् । इन्द्रस्य । भक्षत ।
वसूनि । जाते । जनमाने । ओजसा । प्रति । भागम् । न । दीधिम ॥ ३ ॥[1]

वेङ्कट० यथा समाश्रिताः रश्मयः सूर्यम् भजन्ते, एवम् इन्द्रस्य विश्वानि एव धनानि भजत । स[2] वसूनि जाते जनिष्यमाणे च बलेन करोति । तथा सति पित्र्यम् इव[3] भागम् तानि धनानि प्रति धारयेमेति ॥ ३ ॥

अनर्शरातिं वसुदामुप स्तुहि भद्रा इन्द्रस्य रातयः ।
सो अस्य कामं विधतो न रोषति मनो दानाय चोदयन् ॥ ४ ॥

अनर्शऽरातिम् । वसुऽदाम् । उप । स्तुहि । भद्राः । इन्द्रस्य । रातयः ।
सः । अस्य । कामम् । विधतः । न । रोषति । मनः । दानाय । चोदयन् ॥ ४ ॥

वेङ्कट० 'अनर्शरातिम्'[4] अनश्लीलदानम्' इति यास्कः (६,२३)। वसूनाम् दातारम् स्तोतः! उप स्तुहि[5]। भद्राः इन्द्रस्य रातयः । सः अस्य कामम् परिचरतः[6] न हिनस्ति स्वमनः दानाय प्रेरयन् ॥ ४ ॥

त्वमिन्द्र प्रतूर्तिष्वभि विश्वा असि स्पृधः ।
अशस्तिहा जनिता विश्वतूरसि त्वं तूर्य तरुष्यतः ॥ ५ ॥

त्वम् । इन्द्र । प्रऽतूर्तिषु । अभि । विश्वाः । असि । स्पृधः ।
अशस्तिऽहा । जनिता । विश्वऽतूः । असि । त्वम् । तूर्य । तरुष्यतः ॥ ५ ॥

वेङ्कट० त्वम् इन्द्र! सङ्ग्रामेषु अभि भवसि विश्वाः स्पृधः । अशस्तीनाम् हन्ता जनयिता च प्रशस्तीनाम् असुरेभ्यः विश्वस्य हिंसिता भवसि । त्वम् बाधस्व[7] बाधकान्[8] ॥ ५ ॥

अनु ते शुष्मं तुरयन्तमीयतुः क्षोणी शिशुं न मातरा ।
विश्वास्ते स्पृधः श्नथयन्त मन्यवे वृत्रं यदिन्द्र तूर्वसि ॥ ६ ॥

अनु । ते । शुष्मम् । तुरयन्तम् । ईयतुः । क्षोणी इति । शिशुम् । न । मातरा ।
विश्वाः । ते । स्पृधः । श्नथयन्त । मन्यवे । वृत्रम् । यत् । इन्द्र । तूर्वसि ॥ ६ ॥

वेङ्कट० अनु गच्छतः तव बलम् बाधमानम् शत्रुम् द्यावापृथिव्यौ शिशुम् इव मातरौ । विश्वाः एव सङ्ग्रामकारिण्यः सेनाः तव क्रोधाय श्नथिताः भिन्नाः भवन्ति, शत्रुम् यत् इन्द्र! हंसि ॥ ६ ॥

इत ऊती वो अजरं प्रहेतारमप्रहितम् ।
आशुं जेतारं हेतारं रथीतममतूर्तं तुग्र्यावृधम् ॥ ७ ॥

---

१ इह या. (६,८) अनुसंधेयः । २. नास्ति त्रि'. ३. एव वि' अ'. ४. नास्ति मूको. ५. स्तुहि वि' अ'. ६. °चरतः वि' अ'. ७. बाधकस्य मूको. ८. °कात् वि' अ'.

इतः । ऊती । वः । अजरम् । प्रऽहेतारम् । अप्रऽहितम् ।
आशुम् । जेतारम् । हेतारम् । रथिऽतमम् । अतूर्तम् । तुग्र्यऽवृधम् ॥ ७ ॥

वेङ्कट० इतः कुरुत यूयं रक्षणाय अजरम्[1] शत्रूणां प्रेरकम् अप्रहितम्[2] आशुम् जेतारम्[3] गन्तारम्[4] रथितमम् अहिंसितम् उदकस्य वर्धयितारम् ॥ ७ ॥

इष्कर्तारमनिष्कृतं सहस्कृतं शतमूतिं शतक्रतुम् ।
समानमिन्द्रमवसे हवामहे वसवानं वसूजुवम् ॥ ८ ॥

इष्कर्तारम् । अनिःऽकृतम् । सहःऽकृतम् । शतम्ऽऊतिम् । शतऽक्रतुम् ।
समानम् । इन्द्रम् । अवसे । हवामहे । वसवानम् । वसुऽजुवम् ॥ ८ ॥

वेङ्कट० संस्कर्तारं स्तोतृणाम् असंस्कृतम्[5] अन्यैः बलेन कृतं बहुरक्षणं बहुप्रज्ञं बहूनाम् समानम् इन्द्रम् रक्षणाय हवामहे वसूनि आच्छादयन्तम् वसूनां प्रेरकम् इति ॥ ८ ॥

[6]इति पञ्चाष्टके सप्तमाध्याये तृतीयो वर्गः[6] ॥

[१००]

[1]नेमो भार्गव ऋषिः, चतुर्थीपञ्चम्योश्च इन्द्रः। इन्द्रो देवता, अष्टम्याः सुपर्णः, नवम्या
वज्रो वा, दशम्येकादश्योः वाक्। त्रिष्टुप् छन्दः, षष्ठी जगती,
सप्तम्यष्टमीनवम्यः अनुष्टुभः[6]।

अयं त एमि तन्वा पुरस्ताद्विश्वे देवा अभि मा यन्ति पश्चात् ।
यदा मह्यं दीधरो भागमिन्द्रादिन्मया कृणवो वीर्याणि ॥ १ ॥

अयम् । ते । एमि । तन्वा । पुरस्तात् । विश्वे । देवाः । अभि । मा । यन्ति । पश्चात् ।
यदा । मह्यम् । दीधरः । भागम् । इन्द्र । आत् । इत् । मया । कृणवः । वीर्याणि ॥ १ ॥

वेङ्कट० नेमो भार्गवः। शत्रून् अभिभवितुम् अयम् ते अग्रतः गच्छामि पुत्रेण सह। तथा गच्छन्तं मां त्वया सह सर्वे देवाः अभि गच्छन्ति पश्चात्। यदा त्वम् मह्यम् शत्रुषु स्थितम् भागम् धारयसि इन्द्र!, अनन्तरम् एव मया सह सच्छत्रुं जेतुम् वीर्याणि कुर्याः। शत्रुजयार्थं गच्छतः सपुत्रस्य मम साहाय्यं[7] कुरु, यदि शत्रुधनं मह्यं दित्ससि इति ॥ १ ॥

दधामि ते मधुनो भक्षमग्रे हितस्ते भागः सुतो अस्तु सोमः ।
असश्च त्वं दक्षिणतः सखा मेऽधा वृत्राणि जङ्घनाव भूरि ॥ २ ॥

---

१. अजनुम् वि[१] अ[१]. २. अप्रनिहतम वि[१]. ३. नास्ति वि[१]. ४. नास्ति वि[१] अ[१].
५. संस्कृ° वि[१] अ[१]. ६-६. नास्ति मूको ७. सहायं अ[१].

दधामि । ते । मधुनः । भक्षम् । अग्रे । हितः । ते । भागः । सुतः । अस्तु । सोमः ।
[1]असः । च । त्वम् । दक्षिणतः । सखा । मे । अध । वृत्राणि । जङ्घनाव । भूरि[1] ॥ २ ॥

वेङ्कट० धारयामि तुभ्यं सोमस्य भक्षम्[2] प्रथमम् । निहितः तव हृदये भवतु भजनीयः सुतः सोमः । भव च त्वम् मम दक्षिणपार्श्वे स्थितः सखा सन् । अथ त्वं च अहं च बहून् अस्मदीयान् शत्रून्[3] हन्वः ॥ २ ॥

प्र सु स्तोमं भरत वाजयन्त इन्द्राय सत्यं यदि सत्यमस्ति ।
नेन्द्रो अस्तीति नेम उ त्व आह क ईं ददर्श कमभि ष्टवाम ॥ ३ ॥

प्र । सु । स्तोमम् । भरत । वाजऽयन्तः । इन्द्राय । सत्यम् । यदि । सत्यम् । अस्ति ।
न । इन्द्रः । अस्ति । इति । नेमः । ऊँ इति । त्वः । आह । कः । ईम् । ददर्श । कम् । अभि । स्तवाम ॥ ३ ॥

वेङ्कट० प्र हरत सुष्टु स्तोमम् सङ्ग्राममिच्छन्तः यूयम् इन्द्राय सत्यभूतम्, यदि सत्यम् नाम किञ्चित् विद्यते । सत्यास्तित्वे कः सन्देहः । तत्र आह—न इन्द्रः नाम कश्चित् विद्यते इति नेमः एव अयं भार्गवः कश्चित् वदति, कः एनम् इन्द्रम् ददर्श, कम् वयम् अभि ष्टवाम । तस्मादिन्द्रो नाम कश्चित् विद्यत इति वादमात्रम् एव, न तु तत् सत्यम् इति ॥ ३ ॥

अयमस्मि जरितः पश्य मेह विश्वा जातान्यभ्यस्मि मह्ना ।
ऋतस्य मा प्रदिशो वर्धयन्त्यादर्दिरो भुवना दर्दरीमि ॥ ४ ॥

अयम् । अस्मि । जरितरिति । पश्य । मा । इह । [4]विश्वा । जातानि । अभि । अस्मि । मह्ना[4] ।
ऋतस्य । मा । प्रऽदिशः । वर्धयन्ति । आऽदर्दिरः । भुवना । दर्दरीमि ॥ ४ ॥

वेङ्कट० ऋषिवचनम् आकर्ण्य इन्द्र आजगाम । आगतः सन् आत्मानं द्वाभ्यां स्तौति । अयम् अहम् अस्मि स्तोतः!, पश्य माम् इह स्थितम् । विश्वानि जातानि अभि भवामि अहं महत्त्वेन । सत्यस्य यज्ञस्य वा प्रदेष्टारः माम् वर्धयन्ति[5] । आदरणशीलोऽहं भुवनानि शत्रुभूतानि दर्दरीमि ॥ ४ ॥

आ यन्मा वेना अरुहन्नृतस्यँ एकमासीनं हर्यतस्य पृष्ठे ।
मनश्चिन्मे हृद आ प्रत्यवोचदचिक्रदञ्छिशुमन्तः सखायः ॥ ५ ॥

आ । यत् । मा । वेनाः । अरुहन् । ऋतस्य । एकम् । आसीनम् । हर्यतस्य । पृष्ठे ।
मनः । चित् । मे । हृदे । आ । प्रति । अवोचत् । अचिक्रदन् । शिशुऽमन्तः । सखायः ॥ ५ ॥

वेङ्कट० यदा मां यज्ञं कामयमानाः आ अरुहन् एकम् आसीनम् कान्तस्य अन्तरिक्षस्य पृष्ठे, तदानीं तेषां

१-१. तु० ऋ १०,८३,७. २. भक्षण वि[२] अ[१]. ३. शत्रूणाम् वि[१] अ[१]. ४-४. तु ऋ ६,२५,५; ८,८८,४; १०,१५३,५. ५. °न्तीति अ[१].

भवताम् आरोहम् मनः एव मम हृदयाय प्रति अवोचत् — अज्ञासिषं तव आह्वानम्। क्रन्दन्ति अमी पुत्रयुक्ताः सखायः माम् इति ॥ ५ ॥

विश्वेत् ता ते सर्वनेषु प्रवाच्या या चकर्थ मघवन्निन्द्र सुन्वते ।
पारावतं यत् पुरुसंभृतं वस्वपावृणोः शरभाय ऋषिबन्धवे ॥ ६ ॥

विश्वा । इत् । ता । ते । सर्वनेषु । प्रऽवाच्या । या । चकर्थ । मघऽवन् । इन्द्र । सुन्वते ।
पारावतम् । यत् । पुरुऽसंभृतम् । वसु । अपऽअवृणोः । शरभाय । ऋषिऽबन्धवे ॥ ६ ॥

वेङ्कट० ऋषिस्तु तं दृष्ट्वा सुप्रीतः 'विश्वेत्ता ते' इति तृचेन विविधानि च कर्माणि दानं मैत्रं च शंसति — विश्वानि एव तानि कर्माणि तव सवनेषु प्रवाच्यानि[1], यानि चकर्थ 'त्वम् मघवन्! इन्द्र! सुन्वते[2] यजमानाय[2]। परावत्स्थः कस्य चित् स्वभूतम् यत् त्वम् पुरुसंभृतम्[3] धनम् अपावृणोः शरभनाम्ने ऋषये[4] इति। बहु च संभृतं च पुरुसंभृतम् इति ॥ ६ ॥

[5]इति षष्ठाष्टके सप्तमाध्याये चतुर्थो वर्गः[5] ॥

प्र नूनं धावता पृथङ्ङ् नेह यो वो अवावरीत् ।
नि षीं वृत्रस्य मर्मणि वज्रमिन्द्रो अपीपतत् ॥ ७ ॥

प्र । नूनम् । धावत । पृथक् । न । इह । यः । वः । अवावरीत् ।
नि । सीम् । वृत्रस्य । मर्मणि । वज्रम् । इन्द्रः । अपीपतत् ॥ ७ ॥

वेङ्कट० प्र धावत इदानीम् "पृथक् । इह न" तिष्ठति यः प्रतिगते तदा युष्मान् निवारयति । नि अपीपतत् शत्रोः मर्मणि वज्रम् इन्द्रः ॥ ७ ॥

मनोजवा अयमान आयसीमतरत् पुरम् । दिवं सुपर्णो गत्वाय सोमं वज्रिण आभरत् ॥८॥

मनःऽजवाः । अयमानः । आयसीम् । अतरत् । पुरम् ।
दिवम् । सुऽपर्णः । गत्वाय । सोमम् । वज्रिणे । आ । अभरत् ॥ ८ ॥

वेङ्कट० मनोवेगः गच्छन् आयसीम् अतरत् पुरम्। दिवम्[6] सुपर्णः[6] गत्वा सोमम् इन्द्राय आ अभरत् ॥ ८ ॥

समुद्रे अन्तः शयत उद्ना वज्रो अभीवृतः । भरन्त्यस्मै संयतः पुरःप्रस्रवणा बलिम् ॥९॥

समुद्रे । अन्तरिति । शयते । उद्ना । वज्रः । अभिऽवृतः ।
भरन्ति । अस्मै । सम्ऽयतः । पुरःऽप्रस्रवणाः । बलिम् ॥ ९ ॥

---

१. वाच्यानि वि[२] अ[२]. २-२. त्वमघवन्ति भू मु[२] वि अ[२]. ३. सज्ञा[२] वि[२]. ४. नास्ति मूको. ५. ऋषभ वि[१] अ[२]. ६-६. नास्ति मूको. ७-७. प्रथग् वि[२]; पृथग् अ[१]. ८. नास्ति वि[१]. ९. सुव[२] मूको.

वेङ्कट० समुद्रस्य अन्ते देशे उदकेन यत्र परिवर्जितः। तस्मै यज्ञाय सङ्ग्रामस्य पुरः प्रस्रवणाः पुरस्ताद् गच्छन्त यस्मिन् हरन्ति। तस्य ऐषा भवन्तीदमर्थं ॥ ९ ॥

यद्वाग्वद॑न्त्यविचेत॒नानि॒ राष्ट्री॑ दे॒वानां॑ निष॒साद॑ म॒न्द्रा ।
चत॑स्र॒ ऊर्जं॑ दुदुहे॒ पयां॑सि॒ क्व॑ स्विदस्याः पर॒मं ज॑गाम ॥ १० ॥

यत् । वाक् । वद॑न्ती । अ॒वि॒ऽचे॒त॒नानि॑ । राष्ट्री॑ । दे॒वाना॑म् । नि॒ऽस॒साद॑ । म॒न्द्रा ।
चत॑स्रः । ऊर्ज॑म् । दु॒दु॒हे॒ । पयां॑सि । क्व॑ । स्वि॒त् । अ॒स्याः॒ । प॒र॒मम् । ज॒गा॒म॒ ॥ १० ॥

वेङ्कट० यदा वाक् वदन्ती प्रज्ञापयन्ती[1] विज्ञानरहितान् अप्रज्ञातानर्थान्, राजमाना[2] देवानाम् मदना[3] निषीदति यज्ञे, तदानीम् चतस्रः दिशः अन्नम् दुदुहे सा उदकानि च। 'क्व स्वित्' अस्याः परमम् पदम् जगाम न सन्तिष्ठते। अत्र यास्क (११, २८)—'यद् वाग् वदन्त्यविचेतनान्यविज्ञातानि राष्ट्री देवानां निषसाद मन्दा मदना[4] चतस्रोऽनु दिश ऊर्जं दुदुहे पयांसि। क्व स्विदस्याः परमं जगामेति यत् पृथिवीं गच्छतीति वा यदादित्यरश्मयो हरन्तीति वा' इति ॥१०॥

दे॒वीं वाच॑मजनयन्त दे॒वास्तां वि॒श्वरू॑पाः प॒शवो॑ वदन्ति ।
सा नो॑ म॒न्द्रेष॒मूर्जं॒ दुहा॑ना धे॒नुर्वाग॒स्मानुप॒ सुष्टु॒तैतु॑ ॥ ११ ॥

दे॒वीम् । वाच॑म् । अ॒ज॒न॒य॒न्त॒ । दे॒वाः । ताम् । वि॒श्वऽरू॑पाः । प॒शवः॑ । व॒द॒न्ति॒ ।
सा । नः॒ । म॒न्द्रा । इष॑म् । ऊर्ज॑म् । दुहा॑ना । धे॒नुः । वाक् । अ॒स्मान् । उप॑ । सुऽस्तु॑ता । आ । ए॒तु॒ ॥ ११ ॥

वेङ्कट० यास्क (११,२९)—'देवीं वाचमजनयन्त देवाः। तां सर्वरूपाः[5] पशवो वदन्ति व्यक्तवाचश्चाव्यक्तवाचश्च। सा नो मदनान्नं च रसं च दुहाना धेनुर्वाग् अस्मान् उपैतु सुष्टुता'। इन्द्रसाहचर्यात् माध्यमिका वागत्र स्तुतेति ॥ ११ ॥

सखे॑ विष्णो वित॒रं वि क्र॑मस्व॒ द्यौर्दे॒हि लो॒कं वज्रा॑य वि॒ष्कभे॑ ।
हना॑व वृ॒त्रं रि॒णचा॑व॒ सिन्धू॒निन्द्र॑स्य यन्तु प्रस॒वे विसृ॑ष्टाः ॥ १२ ॥

सखे॑ । विष्णो॒ इति॑ । वि॒ऽत॒रम् । वि । क्र॒म॒स्व॒ । द्यौः । दे॒हि । लो॒कम् । वज्रा॑य । वि॒ऽस्कभे॑ ।
हना॑व । वृ॒त्रम् । रि॒णचा॑व । सिन्धू॑न् । इन्द्र॑स्य । य॒न्तु॒ । प्र॒ऽस॒वे । विऽसृ॑ष्टाः ॥ १२ ॥

वेङ्कट० शौनक—"त्रींल्लोकानभिविष्टेमान्[6] इन्द्रस्तस्थौ स्वया त्विषा।
तं नाशक्नुवद्धन्तुमिन्द्रो विष्णुमभ्येत्य सोऽब्रवीत् ॥
वृत्रं हनिष्ये तिष्ठस्व विक्रम्याद्य[7] ममान्तिके।
उद्यतस्यैव वज्रस्य द्यौर्ददातु[8] ममान्तरम् ॥

1. ज्ञि° मूको. 2. राजान शी° मूको. 3. मोदना वि[1]. 4-4 कश्चित् वि[1] अ[1], कश्चित् वि[1] ५ नास्ति मूको. 6. विश्वरूपा अ[1]. 7. 'भिवृत्यैकाद् वि[1] अ[1], 'भिवृत्यैतान् वि[1]. 8. °क्रमाय वि[1] अ[1]. 9. °धातु वि[1] अ[1]

तथेति विष्णुस्तच्चक्रे द्यौश्चास्य विवरं ददौ ।

तदेतदखिलं प्रोक्तं 'सखे विष्णो' इति त्वृचा" (बृदे ६,१२१-१२४) ॥ इति ।

वेङ्कट० [1]हे सखे। विष्णो।[1] त्वम् अत्यन्तम् वि क्रमस्व । द्यौ । देहि अवकाशं वज्रस्य विष्कम्भनाय । हनाव त्वम् च अहम् च 'विष्णो'[2] वृत्रम् । रिणचाव गमयाव[2] वृत्रावष्टब्धान् सिन्धून् । त इमे सिन्धव इन्द्रस्य प्रसवे विसृष्टा यन्तु इति ॥ १२ ॥

[1]इति षष्ठाष्टके सप्तमाध्याये पञ्चमो वर्गः[1] ॥

[१०१]

[1]जमदग्निर्भार्गव ऋषि । मित्रावरुणौ देवता, पञ्चम्या मित्रावरुणादित्या, षष्ठ्या आदित्या, सप्तम्यष्टम्यो अश्विनौ, नवमीदशम्यो वायु, एकादशीद्वादश्यो सूर्य, त्रयोदश्या उषा सूर्यप्रभा वा, चतुर्दश्या पवमान, पञ्चदशीषोडश्यो गौ । प्रथमाद्वितीये प्रगाथ (=प्रथमा बृहती, द्वितीया सतोबृहती), तृतीया गायत्री, चतुर्थी सतोबृहती, पञ्चम्यादित्रयोदश्यन्ता प्रगाथ (=विषमा बृहत्य, समा सतोबृहत्य), अन्त्यास्तिस्रस्त्रिष्टुभ[1] ।

ऋध॑गि॒त्था स मर्त्यः॑ शश॒मे दे॒वता॑तये ।
यो नू॒नं मि॒त्रावरु॑णाव॒भिष्ट॑य आच॒क्रे ह॒व्यदा॑तये ॥ १ ॥

ऋध॑क् । इ॒त्था । स । मर्त्यः॑ । श॒श॒मे । दे॒वऽता॑तये ।
यः । नू॒नम् । मि॒त्रावरु॑णौ । अ॒भिष्ट॑ये । आ॒ऽच॒क्रे । ह॒व्यऽदा॑तये ॥ १ ॥

वेङ्कट० जमदग्निर्भार्गव । ऋधक्[3] सत्यम् इत्थम् स मनुष्य यज्ञाय इति सत्करोति[4], य[5] क्षिप्रम् मित्रावरुणौ अभिमतसिद्ध्यर्थम् अभिमुखौ करोति यजमानाय ॥ १ ॥

वर्षि॑ष्ठक्षत्रा उरु॒चक्ष॑सा नरा॒ राजा॑ना दीर्घ॒श्रुत्त॑मा ।
ता बा॒हुता॒ न दं॒सना॑ रथर्य॒तः सा॒कं सूर्य॑स्य र॒श्मिभिः॑ ॥ २ ॥

वर्षि॑ष्ठऽक्षत्रौ । उ॒रु॒ऽचक्ष॑सा । नरा॑ । राजा॑ना । दी॒र्घ॒श्रु॒त्ऽत॑मा ।
ता । बा॒हुता॑ । न । दं॒सना॑ । र॒थ॒र्य॒तः । सा॒कम् । सूर्य॑स्य । र॒श्मिऽभिः॑ ॥ २ ॥

वेङ्कट० अतिशयेन[6] वृद्धबलौ महादर्शनौ नेतारौ राजानौ अतिशयेन विद्वांसौ तौ भुजौ इव कर्माणि प्राप्नुत साकम् सूर्यस्य रश्मिभि । यथा भुजौ सह कर्म प्रविशत[7], तद्वत्[8] यज्ञं प्राप्नुत इति ॥ २ ॥

प्र यो वां॑ मि॒त्रावरुणाजि॒रो दू॒तो अद्र॑वत् । अयः॑शीर्षा॒ मदे॑रघुः ॥ ३ ॥

प्र । यः । वा॒म् । मि॒त्रा॒व॒रु॒णा॒ । अ॒जि॒रः । दू॒तः । अद्र॑वत् । अयः॑ऽशीर्षा । मदे॑ऽरघुः ॥ ३ ॥

१-१. नास्ति मूको. २-२ विष्णो। न गमय वि[१] अ[१] ३. ऋधम् मूको. ४. सत्क° वि[१]. ५. य वि[१] अ[१]. ६. नास्ति मूको ७ प्रविश वि[१] अ[१]. ८. तद् वि[१].

वेङ्कट० प्र अद्रवत् अभिगच्छति यः वाम् हे मित्रावरुणौ! गमनशीलः दूतः यजमानः, स हि देवानां दूतो भवति, स[1] हिरण्यालङ्कृतशिरस्कः भवति, मदकरे धने च गन्ता भवति[2] ॥ ३ ॥

न यः संपृच्छे न पुनर्हवीतवे न संवादाय रमते ।
तस्मान्नो अद्य समृतेरुरुष्यतं बाहुभ्यां न उरुष्यतम् ॥ ४ ॥

न । यः । सम्ऽपृच्छे । न । पुनः । हवीतवे । न । सम्ऽवादाय । रमते ।
तस्मात् । नः । अद्य । सम्ऽऋतेः । उरुष्यतम् । बाहुऽभ्याम् । नः । उरुष्यतम् ॥ ४ ॥

वेङ्कट० न यः सम्प्रश्नाय[3] न च हवनाय[4] न च संवादाय[5] आरमते उग्रः शत्रुः, तस्मात् शत्रोः अस्मान्[6] "अद्य सङ्ग्रामाद्[7] रक्षतम् बाहुभ्याम् इति ॥ ४ ॥

प्र मित्राय प्रार्यम्णे सचथ्यमृतावसो ।
वरूथ्यं१ वरुणे छन्द्यं वचः स्तोत्रं राजसु गायत ॥ ५ ॥

प्र । मित्राय । प्र । अर्यम्णे । सचथ्यम् । ऋतवसो इत्यृतऽवसो ।
वरूथ्यम् । वरुणे । छन्द्यम् । वचः । स्तोत्रम् । राजऽसु । गायत ॥ ५ ॥

वेङ्कट० प्र गायत मित्राय अर्यम्णे च सेवनार्हम्[8] वचः हे यज्ञधनाः![9] । बहुवदाह— यज्ञगृहभवम् वरुणे प्रीणनसाधनम् वचः गायत[10] । तदेवाह— स्तोत्रम् राजसु गायत इति । मित्रादीन् राज्ञः स्तुत इति समुदायार्थः ॥ ५ ॥

[11]इति पञ्चाष्टके सप्तमाध्याये षष्ठो वर्गः[11] ॥

ते हिन्विरे अरुणं जेन्यं वस्वेकं पुत्रं तिसृणाम् ।
ते धामान्यमृता मर्त्यानामदब्धा अभि चक्षते ॥ ६ ॥

ते । हिन्विरे । अरुणम् । जेन्यम् । वसु । एकम् । पुत्रम् । तिसृणाम् ।
ते । धामानि । अमृताः । मर्त्यानाम् । अदब्धाः । अभि । चक्षते ॥ ६ ॥

वेङ्कट० ते प्रेरयन्ति अरुणवर्णम् जयसाधनम् वसु इति । एतदेवाह— एकम् पुत्रम् तिसृणाम् पृथिव्यादीनाम् आदित्यं प्रेरयन्ति । ते स्थानानि अमृताः मनुष्याणाम् अहिंसिताः अभि पश्यन्ति ॥ ६ ॥

आ मे वचांस्युद्यता द्युमत्तमानि कर्त्वा ।
उभा यातं नासत्या सजोषसा प्रति हव्यानि वीतये ॥ ७ ॥

---

१. न वि[२]; नास्ति वि[१]. २. इति वि[२] अ[१]. ३. °प्रश्ना° वि[२] अ[१]. ४. °नाताय वि[१]; °नाताय त अ[१]. ५. सम्पादाय वि; सम्पादना अ[१]. ६. अस्मात् मूको. ७-७. मन्वस° मूको. ८. सेवना° वि[२] अ[१]; सेसचना° वि[१]. ९. यज्ञनाथ वि[२] अ[१]; कज्ञधनाथ वि[२]. १०. नय वि[२] अ[१]. ११-११. नास्ति मूको.

आ । मे । वचांसि । उत्ऽयता । द्युमत्ऽतमानि । कर्त्वा ।
उभा । यातम् । नासत्या । सऽजोषसा । प्रति । हव्यानि । वीतये ॥ ७ ॥

वेङ्कट० आ यातम् मे वचांसि वचनानि च दीप्ततमानि च कर्माणि उभौ सङ्गतौ नासत्यौ![1], प्रति गच्छतम् हव्यानि च भक्षणाय इति ॥ ७ ॥

रातिं यद्वामरक्षसं हवामहे युवाभ्यां वाजिनीवसू ।
प्राचीं होत्रां प्रतिरन्तावितं नरा गृणाना जमदग्निना ॥ ८ ॥

रातिम् । यत् । वाम् । अरक्षसम् । हवामहे । युवाभ्याम् । वाजिनीवसू इति वाजिनीऽवसू ।
प्राचीम् । होत्राम् । प्रऽतिरन्तौ । इतम् । नरा । गृणाना । जमत्ऽअग्निना ॥ ८ ॥

वेङ्कट० दानम् यत् युवयोः सम्बन्धि[2] रक्षोवर्जितम् हवामहे इति । एतदेवाह—हवामहे युवाभ्याम् क्रियमाणाम् रातिम् हे अन्नधनौ! इति । तदानीं प्राङ्मुखाम्[3] स्तुतिम् वर्धयन्तौ[4] आगच्छतम्[5] नेतारौ! स्तूयमानौ जमदग्निना इति ॥ ८ ॥

आ नो यज्ञं दिविस्पृशं वायो याहि सुमन्मभिः ।
अन्तः पवित्र उपरि श्रीणानो३यं शुक्रो अयामि ते ॥ ९ ॥

आ । नः । यज्ञम् । दिविऽस्पृशम् । वायो इति । याहि । सुमन्मऽभिः ।
अन्तरिति । पवित्रे । उपरि । श्रीणानः । अयम् । शुक्रः । अयामि । ते ॥ ९ ॥

वेङ्कट० आ याहि अस्माकम् यज्ञम् देवान् स्पृशन्तम् वायो! सुष्टुतिभिः शुश्रूषिताभिः । पवित्रस्य मध्ये उपरि श्रीयमाणो निषिच्यमानः अयम् सोमः नियत आसीत् तुभ्यम् इति ॥ ९ ॥

वेत्यध्वर्युः पथिभी रजिष्ठैः प्रति हव्यानि वीतये ।
अधा नियुत्व उभयस्य नः पिब शुचिं सोमं गवाशिरम् ॥ १० ॥

वेति । अध्वर्युः । पथिऽभिः । रजिष्ठैः । प्रति । हव्यानि । वीतये ।
अध । नियुत्वः । उभयस्य । नः । पिब । शुचिम् । सोमम् । गोऽआशिरम् ॥ १० ॥

वेङ्कट० गच्छति अध्वर्युः हविर्धानात् ऋजुतमैः मार्गैः, प्रति नयति च[6] हवींषि तत्र भक्षणाय । अथ नियुत्वः! उभयविधम् अस्माकम् पिब सोमम् । उभयविधत्वमेव दर्शयति—शुचिम्[7] सोमम् गोभिश्रितम् चेति ॥ १० ॥

[8]इति षष्ठाष्टके सप्तमाध्याये सप्तमो वर्गः[8] ॥

---

१. नास्ति वि॰. २. सम्बन्धितम् वि॰ अ॰. ३. ॰ख्यः वि॰ अ॰. ४. ॰न्त वि॰ अ॰. ५. अनुगच्छत वि॰ अ॰. ६. नास्ति अ॰. ७. शुचि मूको. ८-८. नास्ति मूको.

बण्महाँ असि सूर्य बळादित्य महाँ असि ।
महस्ते सतो महिमा पनस्यतेऽद्धा देव महाँ असि ॥ ११ ॥

बट्[1] । महान् । असि । सूर्य । बट् । आदित्य । महान् । असि ।
महः । ते । सतः । महिमा । पनस्यते । अद्धा[1] । देव । महान् । असि ॥ ११ ॥

वेङ्कट० सत्यं त्वम् महान् असि सूर्य । 'बट् अदिते[2] पुत्र[3] महान् असि । 'महतः भवतः[3] तव महिमा स्तोतृभिः स्तूयते । सत्यमेव देव । महान् भवसि[4] ॥ ११ ॥

बट् सूर्य श्रवसा महाँ असि सत्रा देव महाँ असि ।
मह्ना देवानामसुर्यः पुरोहितो विभु ज्योतिरदाभ्यम् ॥ १२ ॥

बट् । सूर्य । श्रवसा । महान् । असि । सत्रा[1] । देव । महान् । असि ।
मह्ना । देवानाम् । असुर्यः । पुरःऽहितः । विऽभु । ज्योतिः । अदाभ्यम् ॥ १२ ॥

वेङ्कट० सत्यमेव सूर्य । श्रुतेन त्वम् महान् भवसि । सत्यमेव देव[5] महान् असि । महत्त्वेन देवानाम् असुराणां हन्ता पुरोहितः त्वम् । तस्य तव विभु ज्योतिः अहिंस्यम् इति ॥ १२ ॥

इयं या नीच्यर्किणी रूपा रोहिण्या कृता ।
चित्रेव प्रत्यदर्श्यायत्यन्तर्दशसु बाहुषु ॥ १३ ॥

इयम् । या । नीची । अर्किणी । रूपा । रोहिण्या । कृता ।
चित्राऽइव । प्रति । अदर्शि । आऽयती । अन्तः । दशऽसु । बाहुषु ॥ १३ ॥

वेङ्कट० सेयम् उषस्या, सूर्यप्रभास्तुतिः[6] वा । इयम् या नीचीनमुखा[7] स्तुतिमती[8] रूपवती प्रकाशयुक्ता प्रभा उषसा कृता सूर्यदीप्त्या वा 'चित्रा गौः'[9] इव सा प्रति अदर्शि आगच्छन्ती अन्तः दशसु बाहुषु बाहुस्थानीयासु दिक्षु इति ॥ १३ ॥

प्रजा ह तिस्रो अत्यायमीयुर्न्यन्या अर्कमभितो विविश्रे ।
बृहद्ध तस्थौ भुवनेष्वन्तः पवमानो हरित आ विवेश ॥ १४ ॥

प्रऽजाः । ह । तिस्रः । अतिऽआयम् । ईयुः । नि । अन्याः । अर्कम् । अभितः । विविश्रे ।
बृहत् । ह । तस्थौ । भुवनेषु । अन्तरिति । पवमानः । हरितः । आ । विवेश ॥ १४ ॥

वेङ्कट० वाजसनेयकम्—'स तपोऽतप्यत स प्रजाः ससृजे । ता अस्य प्रजाः सृष्टाः पराबभूवुस्ता-

---

१. सत्यनाम (निघ ३,१०). २-२ बहलदिश वि[2] अ[1]. ३-३ भवतो महतः अ[1]. ४. असि अ[1]. ५ देवम् वि[2] ६ °स्तुतिभि मूको ७ नीचीनोमु° वि[2] अ[1], नीतोमु° वि[2]. ८ °मति वि[2] ९-९ चित्रगौ वि[2].

नीमानि वयांसि' (काश १,४,३,१) इत्यादिकम् उक्त्वा आह—"तस्मादप्येतद् ऋषिणाऽभ्यनूक्तम्। 'प्रजा ह तिस्रो अत्यायमीयुः' इति। या अमूः पराभूता[1] 'न्यन्या अर्कमभितो विविश्र' इति अग्निर्वा अर्कस्तमिमाः प्रजा अभितो[2] निविष्टा या इमा अपराभूताः। 'बृहद्ध[3] तस्थौ भुवनेष्वन्तः' इति प्रजापतिमेवैतदभ्यनूक्तं[4] 'पवमानो हरित आ विवेश' इति। दिशो वै हरितस्ता अयं पवमान आविष्टः" (काश १,४,२,४ [तु. माश २,५,१,४,५]) इति। सैषा अस्मद्ब्राह्मणे च व्याख्यैति ॥ १४ ॥

माता रुद्राणां दुहिता वसूनां स्वसादित्यानामृतस्य नाभिः ।
प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट ॥ १५ ॥

माता । रुद्राणाम् । दुहिता । वसूनाम् । स्वसा । आदित्यानाम् । अमृतस्य । नाभिः ।
प्र । नु । वोचम् । चिकितुषे । जनाय । मा । गाम् । अनागाम् । अदितिम् । वधिष्ट ॥ १५ ॥

वेङ्कट० [5]माता रुद्राणाम् रुद्रपुत्राणां[5] मरुताम्, दुहिता वसूनाम्[6], स्वसा आदित्यानाम् अमृतस्य पयसः नाभिः आवासस्थानम्। प्र वोचम् 'अहम् इदानीम्'[6] चिकितुषे जनाय — मा गाम् अनागसम् अदीनां गोरूपाम् वधिष्ट इति। शुश्रूषमाणेभ्य उपदेशः[7] ॥ १५ ॥

वचोविदं वाचमुदीरयन्तीं विश्वाभिर्धीभिरुपतिष्ठमानाम् ।
देवीं देवेभ्यः पर्येयुषीं गामा मावृक्त मर्त्यो दभ्रचेताः ॥ १६ ॥

वचःऽविदम् । वाचम् । उत्ऽईरयन्तीम् । विश्वाभिः । धीभिः । उपऽतिष्ठमानाम् ।
देवीम् । देवेभ्यः । परि । आऽईयुषीम् । गाम् । आ । मा । अवृक्त । मर्त्यः । दभ्रऽचेताः ॥ १६ ॥

वेङ्कट० वचसः[8] लम्भयित्रीम् 'वाचम् उदीरयन्तीम्'[9]। क्षुधितो[10] हि न वाचम् उदीरयति। पयः पीत्वा पश्चात् उदीरयति। विश्वैः कर्मभिः उपतिष्ठमानाम् देवीम् देवेभ्यः मा परि आ अवृक्त गाम्[11] उपगताम्[12] मनुष्यः अल्पचेताः ॥ १६ ॥

[9]इति षष्ठाष्टके सप्तमाध्याये अष्टमो वर्गः[9]।

[१०२]

[1]प्रयोगो भार्गव ऋषिः, अग्निर्बार्हस्पत्यः पावको वा, सहसः पुत्रौ गृहपतियविष्ठावग्नी तयोर्वाऽन्यतरः। अग्निर्देवता। गायत्री छन्दः[1]।

त्वमग्ने बृहद्वयो दधासि देव दाशुषे । कविर्गृहपतिर्युवा ॥ १ ॥

त्वम् । अग्ने । बृहत् । वयः । दधासि । देव । दाशुषे । कविः । गृहऽपतिः । युवा ॥ १ ॥

---

१. प्रजा अत्यायन् मूको. २. अभित: मूको ३. मह° काश. माश. ४. °दन्यनूक्तम मूको. ५-५. नास्ति वि[1]. †-† रुद्राणां माता मिश्राणां वि[2] अ[1]. ६-६. इदानीमहम् वि[1]. ७. °देशम् वि[2] अ[1]. ८. नास्ति वि[1]; °सो हि वि[2]. ९-९. नास्ति मूको. १०. क्षुभितो मूको. ११. मा न मूको. १२. उपगता वि[1]; उपहरता वि[1]; उपहता अ[1].

वेङ्कट० [1]'भार्गवः प्रयोगः, बार्हस्पत्यो वाऽग्निः'[1] । त्वम् अग्ने! बृहत् अन्नं प्रयच्छसि देव! यजमानाय कविः गृहपतिः युवा । अत्र कात्यायनः (ऋअ २,८,१०२)—'भार्गवः प्रयोगो बार्हस्पत्यो वाऽग्निः पावकः सहसः सुतयोर्वाऽन्ययोर्गृहपतियविष्ठयोर्वान्यतर.' इति ॥ १ ॥

स नु ईळानया सह देवाँ अग्ने दुवस्युवा । चिकिद्विभानवा वह ॥ २ ॥

सः । नः । ईळानया । सह । देवान् । अग्ने । दुवस्युवा । चिकित् । विभानो इति विऽभानो । आ । वह ॥ २ ॥

वेङ्कट० सः अस्माकं स्तुवत्या सह समकालम् एव अग्ने! परिचरणशीलया वाचा ज्ञाता सन् हे विभानो! देवान् आ वह ॥ २ ॥

त्वया ह स्विद्युजा वयं चोदिष्ठेन यविष्ठ्य । अभि ष्मो वाजसातये ॥ ३ ॥

त्वया । ह । स्वित् । युजा । वयम् । चोदिष्ठेन । यविष्ठ्य । अभि । स्मः । वाजऽसातये ॥ ३ ॥

वेङ्कट० त्वया ह स्वित् सहायेन वयम् अतिशयेन धनानां प्रेरयित्रा युवतम![2] अभि भवेम शत्रून् अन्नलाभाय ॥ ३ ॥

और्वभृगुवच्छुचिमप्नवानवदा हुवे । अग्निं समुद्रवाससम् ॥ ४ ॥

और्वभृगुऽवत् । शुचिम् । अप्नवानऽवत् । आ । हुवे । अग्निम् । समुद्रऽवाससम् ॥ ४ ॥

वेङ्कट० और्वभृगुवत्[3] अहम् शुचिम् अग्निम् आ हुवे अप्नवानवत् च अग्निम् समुद्रवाससम्[4] वाडवम् इति ॥ ४ ॥

हुवे वातस्वनं कविं पर्जन्यक्रन्द्यं सहः । अग्निं समुद्रवाससम् ॥ ५ ॥

हुवे । वातऽस्वनम् । कविम् । पर्जन्यऽक्रन्द्यम् । सहः । अग्निम् । समुद्रऽवाससम् ॥ ५ ॥

वेङ्कट० हुवे वातसदृशस्वनम्[5] कविम् पर्जन्यसदृशक्रन्दनम् सहस्विनम् ॥ ५ ॥

[6]इति षष्ठाष्टके सप्तमाध्याये नवमो वर्गः[6] ।

आ सवं सवितुर्यथा भगस्येव भुजिं हुवे । अग्निं समुद्रवाससम् ॥ ६ ॥

आ । सवम् । सवितुः । यथा । भगस्यऽइव । भुजिम् । हुवे । अग्निम् । समुद्रऽवाससम् ॥ ६ ॥

वेङ्कट० आ ह्वयामि प्रसवमिव सवितुः भगस्य इव च भोगम् ॥ ६ ॥

अग्निं वो वृधन्तमध्वराणां पुरूतमम् । अच्छा नप्त्रे सहस्वते ॥ ७ ॥

१-१. नास्ति वि[1]. २. °तमाम् वि[1] अ[1]. ३. °भृगव इव वि[1]; और्वाभृगुर इव अ[1]; °भृगुवः इव वि[1]. ४. °वासम् वि[1]. ५. वातस्वनम वि[1]. ६-६. नास्ति मूको.

अग्निम् । वः । वृधन्तम् । अध्वराणाम् । पुरुऽतमम् । अच्छ । नप्त्रे । सहस्वते ॥ ७ ॥

वेङ्कट० अग्निम् यूयं वर्धमानम् अहिंस्यानाम् बलिनां[1] बहूनां ग्लेपयितारम्[2] अभिगच्छत[3] "नप्त्रे पुत्रस्य पुत्राय[4] महस्वते "बलवन्तं नप्तारं[5] लब्धुम्[6] ॥ ७ ॥

अयं यथा न आभुवत् त्वष्टा रूपेव तक्ष्या । अस्य क्रत्वा यशस्वतः ॥ ८ ॥

अयम् । यथा । नः । आऽभुवत् । त्वष्टा । रूपाऽइव । तक्ष्या । अस्य । क्रत्वा । यशस्वतः ॥ ८ ॥

वेङ्कट० अयम् अग्निः यथा अस्मान् आभवति[7] त्वष्टा इव 'देवः रूपाणि[8] विकर्तव्यानि, तथा एनम्[9] अभिगच्छत । अस्य प्रज्ञानेन युक्ताः यशस्वतः[10] भवामो यशस्वन्त इति ॥ ८ ॥

अयं विश्वा अभि श्रियोऽग्निर्देवेषु पत्यते । आ वाजैरुप नो गमत् ॥ ९ ॥

अयम् । विश्वाः । अभि । श्रियः । अग्निः । देवेषु । पत्यते । [11]आ । वाजैः । उप । नः । गमत्[11] ॥९॥

वेङ्कट० अयम् मनुष्याणाम् विश्वाः श्रियः अभिलक्ष्य अग्निः देवानां मध्ये गच्छति । सोऽस्मान् अपि अन्नैः उप आ गच्छतु ॥ ९ ॥

विश्वेषामिह स्तुहि होतॄणां यशस्तमम् । अग्निं यज्ञेषु पूर्व्यम् ॥ १० ॥

विश्वेषाम् । इह । स्तुहि । होतॄणाम् । यशःऽतमम् । अग्निम् । यज्ञेषु । पूर्व्यम् ॥ १० ॥

वेङ्कट० सर्वेषाम् होतॄणाम् मध्ये यशस्विनम् अस्मिन् यज्ञे स्तुहि । तदेवाह — अग्निम् यज्ञेषु मुख्यम् इति ॥ १० ॥

[12]इति षष्ठाष्टके सप्तमाध्याये दशमो वर्गः[12] ॥

शीरं पावकशोचिषं ज्येष्ठो यो दमेष्वा । दीदाय दीर्घश्रुत्तमः ॥ ११ ॥

शीरम् । पावकऽशोचिषम् । ज्येष्ठः । यः । दमेषु । आ । दीदाय । दीर्घश्रुत्ऽतमः ॥ ११ ॥

वेङ्कट० 'शीरम् अनुशायिनमिति वाऽऽशिनमिति वा' इति यास्कः (४,१४)। तं शोधकदीप्तिम्, ज्येष्ठः यः गृहेषु दीप्यते दीर्घश्रुत्तमः[13], तं गृणीहि इति ॥ ११ ॥

तमर्वन्तं न सानसिं गृणीहि विप्र शुष्मिणम् । मित्रं न यातयज्जनम् ॥ १२ ॥

तम् । अर्वन्तम् । न । सानसिम् । गृणीहि । विप्र । शुष्मिणम् । मित्रम् । न । यातयत्ऽजनम् ॥१२॥

वेङ्कट० तम् अश्वम् इव भजनीयम् गृणीहि मेधाविन्! बलिनम् मित्रम् इव यातयज्जनम्[14] हतशत्रुजनम् ॥ १२ ॥

---

१. नास्ति वि॰ अ॰. २. ह्रेप॰ वि॰ अ॰. ३. अधिग॰ वि॰. ४-४. पुत्राय नप्त्रे मूको. ५-५. बलवन्तमप्तारं वि॰ अ॰. ६. लब्धुम् मूको. ७. आवहति वि॰ अ॰; आह्मयति वि॰. ८-८. रूपाणि दवः अ॰. ९. एवम् अ॰. १०. तु. १०मो मन्त्रः, नास्ति मूको. ११-११. तु. ऋ १,५,३; ८,१०१,९. १२-१२. नास्ति मूको. १३. ॰र्घश्र॰ वि॰. १४. ॰ना मूको.

उप त्वा जामयो गिरो देदिशतीर्हविष्कृतः । वायोरनीके अस्थिरन् ॥ १३ ॥

उप । त्वा । जामयः । गिरः । देदिशतीः । हविःऽकृतः । वायोः । अनीके । अस्थिरन् ॥ १३ ॥

वेङ्कट० उप तिष्ठन्ति त्वां स्वसार इव स्तुतयः तव गुणान् दिशन्त्यः यजमानार्थम् वायोः अनीके। त्वां समेधयन्ति प्रज्वलिते[1] त्वयि इति ॥ १३ ॥

यस्य त्रिधात्ववृतं बर्हिस्तस्थावसंदिनम् । आपश्चिन्नि दधा पदम् ॥ १४ ॥

यस्य । त्रिऽधातु । अवृतम् । बर्हिः । तस्थौ । असम्ऽदिनम् । आपः । चित् । नि । दध । पदम् ॥

वेङ्कट० यस्य त्रिधातु अनावृतम् बर्हिः आसनाय तिष्ठति असन्दिनम् अबद्धम्। स्तरणकाले हि तदबद्धं[2] भवति। तस्मिन् अग्नौ आपः अपि पदम् नि दधति अन्तरिक्ष्या माध्यमिके ॥ १४॥

पदं देवस्य मीळ्हुषोऽनाधृष्टाभिरूतिभिः । भद्रा सूर्य इवोपदृक् ॥ १५ ॥

पदम् । देवस्य । मीळ्हुषः । अनाधृष्टाभिः । ऊतिऽभिः । भद्रा । सूर्यःऽइव । उपऽदृक् ॥१५॥

वेङ्कट० स्थानम् देवस्य सेक्तुः शत्रुभिरनाधृष्टैः रक्षणैः भजनीयं भवति । तथा सूर्यः इव मनुष्यैः भजनीया अस्य उपदृष्टिः ॥ १५ ॥

[3]इति षष्ठाष्टके सप्तमाध्याये एकादशो वर्गः[3] ॥

अग्ने घृतस्य धीतिभिस्तेपानो देव शोचिषा । आ देवान् वक्षि यक्षि च ॥ १६ ॥

अग्ने । घृतस्य । धीतिऽभिः । तेपानः । देव । शोचिषा । आ । देवान् । वक्षि । यक्षि । च ॥१६॥

वेङ्कट० अग्ने! घृतस्य निधानैः[4] तपन्[5] देव! ज्वालया[6] आ वह देवान् यज च ॥ १६ ॥

तं त्वाजनन्त मातरः कविं देवासो अङ्गिरः । हव्यवाहममर्त्यम् ॥ १७ ॥

तम् । त्वा । अजनन्त । मातरः । कविम् । देवासः । अङ्गिरः । हव्यऽवाहम् । अमर्त्यम् ॥ १७ ॥

वेङ्कट० तम्[7] त्वाम् अजनयन् निर्मातारः क्रान्तकर्माणम्[8] देवाः हे अङ्गिरः! हव्यवाहम् अमर्त्यम् ॥१७॥

प्रचेतसं त्वा कवेऽग्ने दूतं वरेण्यम् । हव्यवाहं नि षेदिरे ॥ १८ ॥

प्रऽचेतसम् । त्वा । कवे । अग्ने । दूतम् । वरेण्यम् । हव्यऽवाहम् । नि । सेदिरे ॥ १८ ॥

वेङ्कट० प्रचेतसम् त्वाम् कवे! अग्ने! दूतम् वरणीयम् हव्यवाहम् अभि नि सीदन्ति देवाः ॥ १८ ॥

नहि मे अस्त्यघ्न्या न स्वधितिर्वनन्वति । अथैतादृग्भरामि ते ॥ १९ ॥

---

१. °लिते मूको. २. नास्ति वि[1] अ[1]. ३-३. नास्ति मूको. ४. निदानैः वि[1] अ[1]. ५. तपन् मूको. ६. अ° वि[1]. ७. नास्ति वि[1]. ८. क्रान्तकर्मणा वि[1].

नहि । मे । अस्ति । अघ्न्या । न । स्वऽधितिः । वनन्ऽवति । अथ । एतादृक् । भरामि । ते ॥१९॥

वेङ्कट० नहि मे विद्यते[1] गौः, यस्याः[2] पयसा आज्येन च त्वां यजेय। न स्वधितिः काष्ठानि हन्ति, यैः त्वां समिन्धीय[3]। अथ[4] अहं तुभ्यम् एतादृक् भरामि इति। [5]अस्योत्तरा भूयसे निर्वचनाय[5] ॥ १९ ॥

यदग्ने कानि कानि चिदा ते दारूणि दध्मसि । ता जुषस्व यविष्ठ्य ॥ २० ॥

यत् । अग्ने । कानि । कानि । चित् । आ । ते । दारूणि । दध्मसि । ता । जुषस्व । यविष्ठ्य ॥

वेङ्कट० यत्, अग्ने! यानि कानि चित् [6]ते दारूणि[6] आ दध्मसि, अपरशुवृक्णान्यपि तानि सेवस्व हे युवतम!। 'न ह स्म वै पुराऽग्निरपरशुवृक्णं दहति तदस्मै प्रयोग एवर्षिरस्वदयत्' (तै ५,१,१०,१) इति ब्राह्मणम् ॥ २० ॥

यदत्त्युपजिह्विका यद्वम्रो अतिसर्पति । सर्वं तदस्तु ते घृतम् ॥ २१ ॥

[6]यत् । अत्ति । उपऽजिह्विका । यत् । वम्रः । अतिऽसर्पति[6] । सर्वम् । तत् । अस्तु । ते । घृतम् ॥

वेङ्कट० यत् काष्ठम् अत्ति उपजिह्विका, यत् च वम्रः अभि त्वा अतिसर्पति, सर्वम् तत् अस्तु घृतसदृशम् इति[7] ॥ २१ ॥

अग्निमिन्धानो मनसा धियं सचेत मर्त्यः । अग्निमीधे विवस्वभिः ॥ २२ ॥

अग्निम् । इन्धानः । मनसा । धियम् । सचेत । मर्त्यः । अग्निम् । ईधे । विवस्वऽभिः ॥ २२ ॥

वेङ्कट० अग्निम् काष्ठैः इन्धानः मनसा एव श्रद्दधानः कर्म काले भजेत मनुष्यः[8]। अग्निम् एव प्रज्वलयति ऋत्विग्भिः इति ॥ २२ ॥

[5]इति पञ्चमाष्टके सप्तमाध्याये द्वादशो वर्गः[5] ॥

[१०३]

[5]सोभरिः काण्व ऋषिः। अग्निर्देवता, चतुर्दश्या अग्नामरुतः। बृहती छन्दः, पञ्चमी विराड्रूपा, सप्तमीनवम्येकादशीत्रयोदश्यः सतोबृहत्य', अष्टमीद्वादश्यौ ककुभौ, दशमी हसीयसी, चतुर्दशी अनुष्टुप्[5]।

अदर्शि गातुवित्तमो यस्मिन् व्रतान्यादधुः ।
उपो षु जातमार्यस्य वर्धनमग्निं नक्षन्त नो गिरः ॥ १ ॥

---

१. विद्य… मूको. २. °स्य वि[1]. ३. °न्धी अ[1]. ४. यथा अ[1] वि[1]. ५-५. नास्ति मूको. ६-६. निर्वचनं निगमश्च या. (३,२०) द. ७. इत्यर्थः अ[1]. ८. नास्ति वि[1].

अदर्शि । गातुवित्ऽतमः । यस्मिन् । व्रतानि । आऽदधुः ।
उपो इति । सु । जातम् । आर्यस्य । वर्धनम् । अग्निम् । नक्षन्त । नः । गिरः ॥ १ ॥

वेङ्कट० सोभरिः । प्रादुरभूत् अतिशयेन मार्गाणां ज्ञाता, यस्मिन् कर्माणि आदधुः । उप अगच्छन् शोभनजातम् आर्यस्य वर्णस्य वर्धयितारम् अग्निम् अस्माकम् गिरः ॥ १ ॥

प्र दैवोदासो अग्निर्देवाँ अच्छा न मज्मना ।
अनु मातरं पृथिवीं वि वावृते तस्थौ नाकस्य सानवि ॥ २ ॥

प्र । दैवःऽदासः । अग्निः । देवान् । अच्छ । न । मज्मना ।
अनु । मातरम् । पृथिवीम् । वि । ववृते । तस्थौ । नाकस्य । सानवि ॥ २ ॥

वेङ्कट० दिवोदासेनाऽऽहूयमानः अग्निः इमाम् मातरम् पृथिवीम् प्रति न अनु प्र वि ववृते देवान् प्रति तस्य यज्ञे देवानां हव्यं वोढुम् । यस्मादयं बलेन एनम् आजुहाव, नः श्रद्धया । तस्थौ स्वर्गस्य समुच्छ्रिते स्वस्मिन् आयतने एवेति ॥ २ ॥

यस्माद्रेजन्त कृष्टयश्चर्कृत्यानि कृण्वतः ।
सहस्रसां मेधसाताविव त्मनाग्निं धीभिः सपर्यत ॥ ३ ॥

यस्मात् । रेजन्त । कृष्टयः । चर्कृत्यानि । कृण्वतः ।
सहस्रऽसाम् । मेधसातौऽइव । त्मना । अग्निम् । धीभिः । सपर्यत ॥ ३ ॥

वेङ्कट० कर्तव्यानि कुर्वाणात् यस्मात् कम्पन्ते मनुष्याः, सहस्रस्य दातारम् इदानीम् अग्निम् यज्ञे आत्मनैव परिचरत कर्मभिः इति ॥ ३ ॥

प्र यं राये निनीषसि मर्तो यस्ते वसो दाशत् ।
स वीरं धत्ते अग्न उक्थशंसिनं त्मना सहस्रपोषिणम् ॥ ४ ॥

प्र । यम् । राये । निनीषसि । मर्तः । यः । ते । वसो इति । दाशत् ।
सः । वीरम् । धत्ते । अग्ने । उक्थऽशंसिनम् । त्मना । सहस्रऽपोषिणम् ॥ ४ ॥

वेङ्कट० प्रणेतुमिच्छसि यम् धनाय, यः च मर्तः वासयितः[1] तुभ्यं प्रयच्छति, सः वीरम् पुत्रं धारयति अग्ने! उक्थानां शंसितारम् आत्मनैव सहस्रपोषं बहुधनम् ॥ ४ ॥

स दृळ्हे चिदभि तृणत्ति वाजमर्वता स धत्ते अक्षिति श्रवः ।
त्वे देवत्रा सदा पुरूवसो विश्वा वामानि धीमहि ॥ ५ ॥

---

१. नास्ति वि॰.

सः । दृळ्हे । चित् । अभि । तृणत्ति । वाजम् । अर्वता । सः । धत्ते । अक्षिति । श्रवः ।
त्वे इति । देवऽत्रा । सदा । पुरुवसो इति पुरुऽवसो । विश्वा । वामानि । धीमहि ॥ ५ ॥

वेङ्कट० सः दृढे अपि शत्रुपुरे स्थितम् अन्नम् अभि तृणत्ति, तथा अश्वेन सः धारयति अक्षितम् अन्नम्। तथा सति वयं च त्वयि देवे सदा हे बहुधन! विश्वानि धनानि धारयेम स्थितानि इति ॥५॥

'इति पञ्चाष्टके सप्तमाध्याये त्रयोदशो वर्गः'[1] ॥

यो विश्वा दयते वसु होता मन्द्रो जनानाम् ।
मधोर्न पात्रा प्रथमान्यस्मै प्र स्तोमा यन्त्यग्नये ॥ ६ ॥

यः । विश्वा । दयते । वसु । होता । मन्द्रः । जनानाम् ।
मधोः । न । पात्रा । प्रथमानि । अस्मै । प्र । स्तोमाः । यन्ति । अग्नये ॥ ६ ॥

वेङ्कट० यः विश्वानि प्रयच्छति वसूनि होता मोदनो[2] जनेभ्यः, अस्मै सोमस्य इव पात्राणि मुख्यानि प्र गच्छन्ति[3] स्तोमाः अग्नये ॥ ६ ॥

अश्वं न गीर्भी रथ्यं सुदानवो मर्मृज्यन्ते देवयवः ।
उभे तोके तनये दस्म विश्पते पर्षि राधो मघोनाम् ॥ ७ ॥

अश्वम् । न । गीःऽभिः । रथ्यम् । सुऽदानवः । मर्मृज्यन्ते । देवऽयवः ।
उभे इति । तोके इति । तनये[4] । दस्म । विश्पते । पर्षि । राधः । मघोनाम् ॥ ७ ॥

वेङ्कट० अश्वम् इव स्तुतिभिः रथस्य वोढारम् शोभनदानाः परिचरन्ति यजमानाः। पुत्रे पौत्रे च उभयस्मिन् दर्शनीय! विशां पते! प्रयच्छ धनवताम् धनम् ॥ ७ ॥

प्र मंहिष्ठाय गायत ऋताव्ने बृहते शुक्रशोचिषे । उपस्तुतासो अग्नये ॥ ८ ॥

प्र । मंहिष्ठाय । गायत । ऋतऽव्ने । बृहते । शुक्रऽशोचिषे । उपऽस्तुतासः । अग्नये ॥ ८ ॥

वेङ्कट० प्र गायत दातृतमाय[5] यज्ञवते महते शुक्रशोचिषे अग्नये हे उपस्तोतारः![6] यूयम्[7] ॥ ८ ॥

आ वंसते मघवा वीरवद्यशः समिद्धो द्युम्न्याहुतः ।
कुविन्नो अस्य सुमतिर्नवीयस्यच्छा वाजेभिरागमत् ॥ ९ ॥

आ । वंसते । मघऽवा । वीरऽवत् । यशः । सम्ऽइद्धः । द्युम्नी । आऽहुतः ।
कुवित् । नः । अस्य । सुऽमतिः । नवीयसी । अच्छ । वाजेभिः । आऽगमत् ॥ ९ ॥

१-१. नास्ति मूको. २. °नो वि[२] अ[१]. ३. यच्छ° मूको. ४. तु. ऋ १,१४७,१; प्रगृह्याभावः?। ५. मात° वि[१]. ६. यूयमुपस्तो° मूको. ७. यूयं स्तो वि[२] अ[१]; नास्ति वि[१].

वेङ्कट० 'आ प्रयच्छति'[1] धनवान् पुत्रवद् अन्नम् । समिद्धः अन्नवान् आभिमुख्येन आहुतः[2] बहु । अस्मान् अस्य सुमतिः नवतरा अश्वैः सह आगच्छतु ॥ ९ ॥

प्रेष्ठमु प्रियाणां स्तुह्यासावातिथिम् । अग्निं रथानां यमम् ॥ १० ॥

प्रेष्ठम् । ऊँ इति । प्रियाणाम् । स्तुहि । आऽसाव[1] । अतिथिम् । अग्निम् । रथानाम् । यमम् ॥ १० ॥

वेङ्कट० प्रियतमम् प्रियाणाम् स्तोतः! स्तुहि[3] अतिथिम्[4] अग्निम् रथानाम् यन्तारम् ॥ १० ॥

[5]इति षष्ठाष्टके सप्तमाध्याये चतुर्दशो वर्गः[5] ॥

उदिता यो निदिता वेदिता वस्वा यज्ञियो ववर्तति ।
दुष्टरा यस्य प्रवणे नोर्मयो धिया वाजं सिषासतः ॥ ११ ॥

उत्ऽइता । यः । निऽदिता । वेदिता । वसु । आ । यज्ञियः । ववर्तति ।
दुस्तराः । यस्य । प्रवणे । न । ऊर्मयः । धिया । वाजम् । सिसासतः ॥ ११ ॥

वेङ्कट० उद्भूतानि न्यग्भूतानि च यः वेत्ता धनानि यज्ञियः[6] आ वर्तयति । दुस्तराः यस्य ज्वालाः प्रवणाभिमुखाः इव ऊर्मयः कर्मणा सङ्ग्रामम् सम्भक्तुमिच्छतः[6] ॥ ११ ॥

मा नो हृणीतामतिथिर्वसुरग्निः पुरुप्रशस्त एषः । यः सुहोता स्वध्वरः ॥ १२ ॥

मा । नः । हृणीताम् । अतिथिः । वसुः । अग्निः । पुरुऽप्रशस्तः । एषः । यः । सुऽहोता । सुऽअध्वरः ॥ १२ ॥

वेङ्कट० मा अस्मभ्यं क्रुध्यताम् अतिथिः वसुः अग्निः बहुभिः प्रशस्तः एषः यः सुहोता सुयज्ञः[7] च ॥ १२ ॥

मो ते रिषन् ये अच्छोक्तिभिर्वसोऽग्ने केभिश्चिदेवैः ।
कीरिश्चिद्धि त्वामीट्टे दूत्याय रातहव्यः स्वध्वरः ॥ १३ ॥

मो इति । ते । रिषन् । ये । अच्छोक्तिऽभिः । वसो इति । अग्ने । केभिः । चित् । एवैः ।
कीरिः । चित् । हि । त्वाम् । ईट्टे । दूत्याय । रातऽहव्यः । सुऽअध्वरः ॥ १३ ॥

वेङ्कट० मा एव ते[8] रिषन्, ये अभिष्टुतिभिः परिचरन्ति त्वां वासयितः! अग्ने! सुखकरैः च अभिगमनैः । स्तोता हि त्वाम् स्तौति दूत्याय दत्तहविष्कः सुयज्ञः[10] ॥ १३ ॥

अग्ने याहि मरुत्सखा रुद्रेभिः सोमपीतये ।
सोभर्या उप सुष्टुतिं मादयस्व स्वर्णरे ॥ १४ ॥

१-१. नास्ति वि[1] अ[1]. २. इतः वि[1] अ[1]. ३. पैप १,७२२० द्र. ४. स्तुतिम् वि[1] अ[1]. ५. नास्ति वि[1] अ[1]. ६-६. नास्ति मूको. ७. यज्ञोपः मूको. ८. °त वि[1] अ[1]. ९. तव मूको. १०. नास्ति वि[1] अ[1]; सुयज्ञः वि[1].

आ । अग्ने । याहि । मरुत्ऽसखा । रुद्रेभिः । सोमऽपीतये ।
सोभर्याः । उप । सुऽस्तुतिम् । मादयस्व । स्वःऽनरे ॥ १४ ॥

वेङ्कट० आ याहि अग्ने! मरुत्सखा मरुद्भिः सह सोमपानाय। सोमरेः सुष्टुतिम् उप आ मादयस्व सर्वनरे कर्मणि[1] इति ॥ १४ ॥

[1]इति षष्ठाष्टके सप्तमाध्याये पञ्चदशो वर्गः[3] ॥

इति ऋग्वेदे सभाष्ये अष्टमं मण्डलं समाप्तम् ॥

1. °ख्ता वि[२] अ[३]. 2. °मोणि वि[२]. ३-३. नास्ति मूको.

शोधपत्रम्[1]

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
२२८९	१	°विंशाद्या°	°विंश्याद्या°
२२९०	२१	तेजोभिः,	तेजोभिः
,,	२२	च[११]	वा[११]
२२९३	१०	उभा	उभा
,,	१७	भक्षयन्ति	भक्षयन्तु
२२९७	२४	८-८, नास्ति मूको,	×
२२९८	९	°शसंस्य	°शंसस्य
,,	११	। [१]नाराशंसः पूजयामास सदैव यज्ञार्थम्[१]	×
,,	१६	... ...	नराशंसं पूजयामः सदैव यज्ञार्थम्
,,	२६	६-६. नास्ति वि[२] अ[१].	×
२२९९	१९	ऊर्ध्वम्	ऊर्ध्वम्[१]
,,	२६	प्रज्ञो	°प्रज्ञो
२३०१	२२	दर्शनीय ! त्वम्	[१०]°दर्शनीय ! त्वम्[१०]
२३०२	७	रुक्मो	रुक्मो
,,	२२	सरी°	सूरी°
२३०५	३०	मृतमिति	मृतम्
२३२७	२४	दधाति	दधाति
२३३०	३	°यन्तः[१]	°यन्त्यः[१]
,,	२५	वि[२] अ[१].	वि[२] अ[१]; °यन्तः ल लभ.
२३३१	१४	नेतुम्	नेतॄन्
२३३२	२९	त्वयि	त्वयि
२३३३	१३	द्रुह्वः	द्रुह्वः
२३३५	१६	व्युच्छान्	व्युच्छान्
२३३६	५	°मिति[१]	°मिति
,,	८	निःरेके	निरेके
,,	२६	६. °पद° मूको.	×
२३३८	१३	भगेषु	भरेषु
२३४७	२३	व्रजहस्तः	वज्रहस्तः
२३५२	१७	स्तुतिहेतु[१२]	स्तुतिहेतु[१२]
२३५२	१७	°तुः वि[२] अ[१].	१२. °तु ल.
२३५६	१६	बलवन् !	बलवन् !
२३५७	३	इन्द्र	इन्द्र
२३५९	१	इन्द्र	इन्द्र
,,	२	ळ्हा	दृळ्हा
२३६०	१७	असोढा	असोढो
२३६३	८	तुनुषु	तनूषु
२३६६	४	चर्षणिप्राः	चर्षणिप्राः
२३६९	३	। महते धनाय	महते धनाय ।
,,	४	°हन्त्रे[२]	°हन्तृणे[२]
२३७१	१	अन्तरिक्षम्	आन्तरिक्षम्
२३७७	१९	उर्वशीतो°	उर्वशीगतात्°
२३८३	१४	नु ।	नः ।
२३८५	१०	तार्यमाणः	त्रायमाणः
२३९२	२२	अज्येष्ठकनिष्ठाभ्याम्	ज्येष्ठकनिष्ठाभ्याम्
२३९६	१६	°मर्धंच	°मर्धर्चं
२४०६	१५	उपसंम्	उपसम्
२४१३	२	नादेयाः ज्वलन्त्यः[२]	नादेयाः[२] ज्वलन्त्यः
२४१९	२०	जहि	त्वम्[१] जहि
,,	२८	वि[१]	वि[२]
२४२२	६	मनांसि	मनांसि[१]
,,	२३	नास्ति वि[२] अ[१].	×
,,	२४	अ[१] लभ,	अ[१];
२४२५	२	गुरुः	गुरु
२४२६	१	मरुवः	मरुतः
२४३१	२५	ये	हे
२४३५	२५	छन्न	८. छन्न
,,	,,	वि[२]. ८, सायाह्नं	वि[२]; सायाह्न
२४३८	१९	द्रुमे	द्रुम
२४४०	१५	भगाः	भटाः

1. × इत्येतच्चिह्नपरामृष्टः पाठो नेष्टः ।

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
२४४३	८	मथ[1]	मर्थ:[2]
२४४८	१२	दुःऽअत्येत्	दुःऽअत्येर्त्
२४४९	१४	स्वभूताय	स्वभूताय[5]
२४५०	८	वर्पणादेः	वर्पणादेः ये
२४५८	२	चिच्छू॰	चिच्छू॰
२४६०	५	विद्यतम्,	विद्युतम्,
२४६३	९	रथन	रथेन
२४६४	६	शतदूरेषु	शतदुरेषु
२४६६	९	नासत्यौ	नासत्यौ!
,,	१६	वृषणौ	वृषणौ!
२४७९	२५	६. ऋ १,११,२.	६. ऋ १,११,१.
२४८१	१०	नासत्या॰	नासत्या॰
२४८२	१७	उच्छन्ती	उच्छन्ती
२४८४	१५	पार्थिवस्य	पार्थिवस्य
२४९०	१२	सर्वतः[4] । अस्मभ्यं	[4]स वरुणः अस्मभ्यं[4]
,,	२४	[4]त्रुटितम्	४-४. ···स्मभ्यं
२४९५	२२	सुऽमेके	सुमेके
२५०३	१५	[4]तावता आगतौ[4]	तावता[4] आगतौ
२५०७	२१	यत्[1]	×
२५०९	१२	प्र । मक् ।	प्रर्मक्
२५१०	१	मोदमानौ	मोदमानौ
२५१२	१८	ऊ	ऊँ
२५१३	२१	पीप्रिवांसम्	पीपिऽवांसम्
२५२१	२६	† नास्ति मूको.	† नास्ति ल लम.
२५२१	१७	प्रख्यापनीय	प्रख्यापनीयं
२५२४	१८	गाधिनोऽस्य	गाधिनोऽस्य[6]
,,	२५	गाथीन्द्रोस्य	८. गाथीन्द्रोऽस्य
२५२६	२७	५,५१,१.	५,५०,१.
२५२७	९	त्रिऽवर्तु	त्रिऽवर्तु
२५२८	२०	इच्छतु	इच्छतु
२५३३	७	॰अंवति	॰अवथ
२५३७	१५	मन्तु	मन्तु
२५४०	५	मस्प	'मस्प
२५४५	२	मर्दनात्[1]	आवर्तनात्[1]
,,	९	"मा च"	किन्तु
,,	१०	दवाग्निना ।	दवाग्निना .
,,	१७	मदिरित्य॰	अनुमुदिरित्य॰
२५५५	५	विद्म[1]	विप्रो
,,	९	हे [1]अभिपीतः	[1]हे अभिपीतः!
२५५६	९	गोभिः	[2]गोभिः
२५५७	१	इन्द्रैः ।	इन्द्रैः । पुरु ।
२५६२	२२	इन्द्र स्तोमैं॰	इन्द्रं स्तोमैं॰
२५६६	८	मदन्तु	मन्दन्तु
,,	२५	इव	×
,,	,,	इरिण	इवेरिण
२५६६	२६	प्र	प्रा
२५७०	१५	शतऽर्घम्	शतऽर्घम्
२५७१	१	करांरणुः	करारणुः
२५७१	२१	[1]प्रेयम्	[1]प्रेयम्[1]
२५७४	५	॰कानाम्	॰कानाम्[1]
,,	,,	॰मिति[1]	॰मिति
२५७५	२३	अस्माकम्	अस्माकम्[1]
,,	,,	श्येनेभिः[1]	श्येनेभिः
२५७६	२१	हे	×
,,	,,	॰धनौ!	॰धनौ![1]
,,	,,	च[1]	च
२५८०	१५	न	×
२५८१	७	नवभिक्षैराल॰	नवभिक्षणल॰
२५८८	२	इन्द्रम्	इन्द्रम् ।
,,	,,	गच्छन्त्यः ।	गच्छन्त्यः
,,	,,	प्रविभजन्ती (?)'	'प्रति भजन्ती'
२५९४	१५	त्रितस्[1]	त्रिस्थानस्येन्द्रस्य[2]
२६०१	४	काण्वपुत्रः	कण्वपुत्रः
,,	९	स्तुतिकामौः!	स्तुतिकामौ!
२६०२	३	सान्ति	सन्ति
२६०४	११	तत्	यत्
२६०६	३	अश्विनौ	अश्विनौः
२६०७	३	स्तुषति	स्तुवन्ति

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
२६०८	११	यद	यद्
२६१३	१	छन्द[1]	छन्दः[1]
,,	१८	सुन्वतः	सुन्वन्तः
२६२५	१६	दद्वेति[1]	इद्द्वेति[1]
,,	२०	शतक्रतो इति	शतक्रतो इति
,,	,,	शतक्रतो	शतऽक्रतो
२६३१	७	जनै.[1]	भटैः[1]
२६३२	६	हर्षमन्तः[1]	हर्षवन्तः
२६४६	२८	यदानीं विशत वि°;	×
२६४९	२३	रमये[१२] प्रभो!	रमये प्रभो![१२]
२६५०	१८	सुऽसम्°	सुऽसम्°
२६५१	१५	'तिष्ठन्ति च	तिष्ठन्ति स्थावराणि भूतानि
,,	,,	युक्तानि	युक्तानि भवन्ति
२६५२	२	आदिशन्ति,	×
२६५३	२६	एषा	एषा सूक्तो.
२६५८	३	'नर्दं	'नुर्दं
,,	१९	काविराण्णास	काविराण्नास
२६६१	२२	भटैः[८]	भटैः[८]
२६७५	२	विरेच°	निरेच°
२६७९	१२	इन्द्र।	इन्द्र।
२६८०	२०	क्व सा	क्व स
२६९२	१३	वर्धनायः	वर्धनाय
२६९७	२१	इत्यर्थे	×
,,	२५	९. अत्यूर्ध्वा	९-९. इत्यर्थे अत्यूर्ध्वा
२७०७	१४	°पङ्क्तेरथ	°पङ्क्तेरथ
२७१४	२३	एनं[५]	एतत्[५]
२७२१	४	समऽभृतऽश्वः	संभृतऽश्वः
२७३३	२	'ग्याचाश्वस्य	'श्यावाश्वस्य
२७३४	२३	तृतीयाध्याये	तृतीयाध्याये
२७३८	१६	याः	वा
२७४२	८	रीदसी°	रोदसी°
२७४५	१५	जुह्वो३	जुह्वो३
२७६५	२०	अद्रिवः।	अद्रिवः।
२७८२	२०	°हती	°हत्यः
२७८४	१६	समा सतो बृहती	समाः सतो-बृहत्यः
२७९३	४	चद्क्रमत	चङ्क्रमत
२७९५	१	इमम्।	इमम्
२७९७	९	अङ्गिरः	अङ्गिरः
२७९९	१३	अस्मान्	पाहि अस्मान्
२८०१	४	अग्नु	अग्ने
२८०५	१३	'अयम्	अयम्
२८०६	९	राधःऽपते	राधःऽपते
२८१०	३	प्रादुर्भूतम्	प्रादुर्भूतम्
,,	९-१०	तावत् कालम्	यावत्कालम्
२८१७	९	वृहद्	बृहद्
२८१९	१९	श्रूते[११]	श्रुते[११]
२८२४	२४	°प्रदर्श	°प्रदर्श° वि°;
२८३१	१६	इपण	हर्षेण
,,	२५	नास्ति सूक्तो.	द्वौ सूक्तो
२८३९	१	स्युरिति।	स्युरिति
२८४९	२	युञ्जार्यां°	युञ्जार्यां°
,,	९	घर्मम्	घर्मम्
,,	११	श्येनेव	श्येनेवं
२८५१	१७	°द्वृक्ष	°द्वृक्षं
२८५४	१५	जनासः	×
,,	१९	आर्क्षे	आर्क्षे
,,	२०	शर्धांसिऽ°	शर्धांसिऽ°
२८५५	१४	पष्ठा°	षष्ठा°
,,	२२	°त्रया:	°त्र्याः°
२८५९	१६	अद्रिवः	अद्रिवः।
२८६१	२	प्रऽवृद्धः।	प्रऽवृद्धः।
२८६४	१८	मघवन्त्सं°	मघवन्त्सं°
२८६७	१०	किमङ्ग	किमङ्ग
२८७०	३	सव्येन	सव्येन
२८७६	२५	नास्ति	नास्ति सूक्तो.
२८७९	१८	बृहिम्	बृहिम्
२८८०	२१	मधुमान्ध°	मधुमन्त°
२८८५	२३	बृबदा	बृबदा
२८८६	१५	त्वद् गुणान्	त्वद्गुणान्

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्	पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
२८८८	१४	इन्द्रो!	इन्दो!	२९११	९	वर्धग्रस्त्वं	वर्धन्नैरस्त्वं
२८९७	१२	दव.	देव	,,	१६	अजयो	अंजयो
२९०५	४	शुद्धम् शुद्धेन	शुद्धम् शुद्धेन	२९१२	२१	इुन्द्र	इुन्द्र
२९०६	४	‘अतिविद्धा	‘अतिविद्धा	२९१४	१६	इुन्द्र	इुन्द्र
२९०८	७	कुर्म	कुर्मः	२९१७	१०	अस्रः	अंस्र.
,,	१६	ईरय	ईरय	२९२८	१३	यज्ञधना !	यज्ञभन !¹। अथ
,,	२४	द्रुणो	द्रुणो	,,	१९	तिसृणाम्	तिसृणाम्